पावका नः सरस्वती

ISSN- 2394-6199

# ज्ञानगङ्गा

# Jñānagaṅgā

## A Peer Reviewed Annual Research Journal

**Volume IV**



**Editor-in-Chief**
**Dr. Somesh Kumar Mishra**
**Editor**
**Dr. Santanu Kumar Chakrabartti**

*Published by*
**Sri Sitaram Vaidic Adarsha Sanskrit Mahavidyalaya**
*7/2A, Omkarnath Sarani, P.W.D Road, Kolkata- 35*
*Website- www.srisitaramvaidicasm.com*
*E.mail : ssvasm@gmail.com*
**2025**



# Our Family



**Dr. Somesh Kumar Mishra**
Principal

**Dr. Rajeshwar Dwivedi**
Associate Professor
Dept. of Advaita Vedanta





**Dr. Koushik Malakar**
Associate Professor
Dept. of Bengali

**Dr. Atanu Bhattacharya**
Asst. Professor
Dept. of English





**Dr. Gouri Bhattacharyya**
Asst. Professor
Dept. of Philosophy

**Dr. Santanu Kumar Chakrabartti**
Asst. Professor (Guest)
Dept. of Bouddha Darshan



**Mrs. Jayashree Bhattacharya**
Computer Instructor (Contractual)
Dept. of Computer Science





**Dr. Lokenath Das**
Asst. Professor (Guest)
Dept. of Sahitya

**Shri Shanti Ghosh**
Asst. Professor (Guest)
Dept. of Advaita Vedanta





**Dr. Sankha Subhra Gachchhit**
Asst. Professor (Guest)
Dept. of Vyakaran

**Dr. Shubhendu Ghosh**
Asst. Professor (Guest)
Dept. of Sahitya





**Dr. Khyala Nand**
Asst. Professor (Guest)
Dept. of Jyotish

**Miss. Sarita Mahapatra**
Asst. Professor (Guest)
Dept. of Jyotish



**Smt. Geeta Ghanti**
Asst. Professor (Guest)
Dept. of Dharmashastra





**Smt. Sucharita Nandi**
Guest Lecturer
Dept. of Environmental Science

**Smt. Bandana Banerjee**
Asst. Librarian



**Head Assistant**
Vacant

**Shri Debkumar Chatterjee**
Typist





**Shri Sumit Nandi**
Accountant
Out-Source Staff

**Shri Subir Kumar Banerjee**
Computer Asst.
Management Staff



**Shri Rajendra Nath Giri**

**Peon**





**Shri Tapan Naskar**

**Peon**

**Shri Dilip Dey**

**Library Attendant**





**Shri Goutam Jana**

**Sales Counter**

**Out-Source Staff**

College provides higher education in Sahitya, Vyakarana, Dharma shastra, Bouddha Darshan, Jyothish, Advaita Vedanta up to Post Graduate & Ph.D. Level. Bengali, History, English, Philosophy up to Degree level.

E-Class & E-Library facility is provided for college students.0

## Special Courses for our College Students only

Spoken Sanskrit, Spoken English, NET, SET, B.Ed., M.Ed., Ph.D., entrance examination, Computer Literacy and Skill Development programme.








Sri Sitaram Vaidic







ISSN- 2394-6199

पावका नः सरस्वती

# ज्ञानगङ्गा

# Jñānagaṅgā

## A Peer Reviewed Annual Research Journal

## Volume IV

**Editor- in-Chief**
Dr. Somesh Kumar Mishra

**Editor**

Dr. Santanu Kumar Chakrabartti

**Published by**

Sri Sitaram Vaidic Adarsha Sanskrit Mahavidyalaya

7/2A, Omkarnath Sarani

P.W.D. Road, Kolkata- 35

Website- www.srisitaramvaidicasm.com

E.Mail: ssvasm@gmail.com

2025

# Publication Committee


**Patron**

Professor Shrinivasa Varakhedi
Vice- Chancellor
Central Sanskrit University, New Delhi

**Chief Advisor**
Professor S. Subrahmanya Sarma
Chairman, Managing Committee

**Editor- in- Chief**

Dr. Somesh Kumar Mishra

Principal

**Editor**

Dr. Santanu Kumar Chakrabartti

## Associate Editors

Dr. Koushik Malakar
Dr. Rajeshwar Dwivedi
Dr. Atanu Bhattacharya
Dr. Gouri Bhattacharyya
Mrs. Jayashree Bhattacharya
Shri Shanti Ghosh
Dr. Lokenath Das
Dr. Subhendu Ghosh
Dr. Sankha Subhra Gachchhit
Dr. Khyala Nand
Miss. Sarita Mahapatra
Smt. Sucharita Nandi
Smt. Gita Ghanti

# DECLARATION


| | | |
|---|---|---|
| **Chief Advisor** | **:** | **Professor S. Subrahmanya Sarma** |
| **Editor-in-Chief** | **:** | **Dr. Somesh Kumar Mishra** |
| **Editor** | **:** | **Dr. Santanu Kumar Chakrabartti** |
| **Publisher** | **:** | **Sri Sitaram Vaidic Adarsha Sanskrit Mahavidyalaya, 7/2A, P.W.D. Road, Kolkata-35** |
| **ISSN** | **:** | **2394-6199** |
| **Volume** | **:** | **IV** |
| **Year of Publication** | **:** | **2025** |
| **Language** | **:** | **Sanskrit, Hindi, English, Bengali** |


**I hereby declare that the information given here is true to the best of my knowledge.**



**( Dr. Somesh Kumar Mishra)**
**Principal & Editor-In-Chief**

## REVIEW COMMITTEE

1. Prof. Bharat Bhushan Mishra, Bhopal Campus, CSU
2. Prof. Dhananjay Kumar Pandey, B.H.U.
3. Prof. Vishnu Kant Pandey, Jaipur Campus, CSU
4. Prof. Harekrushna Mishra, Visva Bharati
5. Prof. Biswa Ranjan Pati, Puri Campus, CSU
6. Prof. Dipankar Mukhopadhyay, C.U.
7. Prof. Shashikant Dwivedi, B.H.U.
8. Prof. Saswati Mutsuddi, C.U.
9. Prof. Aiswarya Biswas, C.U.
10. Dr. Piyali Chakraborty, C.U.
11. Dr. Ashok kumar Mahato, J.U.
12. Dr. Rakesh Das, RKMVERI, Belur
13. Dr. Debdas Mandal, Jadavpur University

## ADVISORY COMMITTEE

**Prof. S. Subrahmanya Sarma, Chairman, Managing Committee, S.S.V.A.S.M.**

Prof. Sukanta Kumar Senapati, Vice Chancellor, S.S.S.U, Veraval

Prof. Laxmi Nivas Pandey, Vice Chancellor, K.S.D.S.U, Darbhanga

Prof. Pravat Ranjan Mahapatra, S.J.S.V, Puri

Dr. Umasankar Chakrabarty, Scientist, Ex- NASA

Prof. Satyanarayan Chakraborty, R.B.U.

Prof. Nabanarayan Bandyopadhyay, R.B.U.

Prof. Taraknath Adhikari, R.B.U.

Prof. Awadhesh Kumar Choubey, Retired Professor, Agartala Campus, CSU

Prof. Devanand Shukla, Registrar, K.K.S.U, Ramtek

Prof. Kamal Kishor Mishra, C.U.

Prof. Srikant Basu, H.O.D. Department of Paediatric, L.H. Medical College, New Delhi

Prof. Rashmi Sarkar, H.O.D. Department of Dermatology, L.H.M.C. New Delhi

Prof. Rana Rajanish, H.O.D. R.M.N. Hospital, New Delhi



# आशीर्वचनम्

परमहर्षस्य विषयोऽयं यत् अस्माकं श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः ज्ञानगङ्गा इति विद्वत्समीक्षितां मूल्याङ्कितां वार्षिकीं शोधपत्रिकां प्रकाशयति। अद्यावधि अस्याः पत्रिकायाः तृतीयं पुष्पं प्रकाशितम्। भारतीयज्ञानपरम्पराम् आश्रित्य संस्कृत-हिन्दी-बङ्ग-आङ्ग्लभाषासु सन्दृब्धाभिः विविधमौलिकमूल्यविशिष्टरचनाभिः प्रपूर्णेयं पत्रिका ऐषमः चतुर्थं पुष्पं प्रस्फुटयति इति भृशं मोदास्पदम्। यैः शास्त्रधुरीणैः विद्वद्भिः शोधच्छात्रैश्च अस्मिन् पुष्पे शोधलेखाः समर्पिताः ते सर्वे श्लाघनीयाः। आशासे यत् शोधपत्रिकेयं न केवलं विद्यार्थिनामपितु प्रतिष्ठितशास्त्रज्ञानां विद्वन्मूर्द्धन्यानां कृतेऽपि विशिष्टतां निर्वक्ष्यति। पत्रिकायाः अस्याः प्रकाशनकार्ये स्वरूपसौन्दर्यापादने च उपकुर्वद्भ्यः प्राचार्यमहोदयेभ्यः डॉ. सोमेशकुमारमिश्रवर्येभ्यः तत्सहायकसदस्येभ्यश्च हृदयपूर्णम् अभिनन्दनं धन्यवादञ्च वितीर्य भगवतीं कालिकाम् उत्तरोत्तरोन्नत्यै सम्प्रार्थये।



---------------------------------------------

प्रोफेसर् एस्. सुब्रह्मण्यशर्मा

प्रबन्धनसमित्यध्यक्षः

श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य,

कोलकातास्थस्य



# Editorial

The Indian Knowledge Systems (IKS) represent one of the world's most ancient, continuous, and comprehensive traditions of knowledge. Rooted in centuries of inquiry, experience, and practice, this vast intellectual heritage encompasses philosophy, linguistics, logic, mathematics, astronomy, medicine, architecture, ecology, governance, aesthetics, and spirituality. Far from being relics of the past, Indian Knowledge Systems continue to offer profound insights and practical frameworks that remain relevant to the challenges of the contemporary world.

At the heart of IKS lies an integrated vision of knowledge. Unlike fragmented modern disciplines, traditional Indian thought views knowledge as holistic—interlinking the material, intellectual, ethical, and spiritual dimensions of human life. Concepts such as *ṛta* (cosmic order), *dharma* (ethical duty), and *puruṣārtha* (aims of human life) provide a comprehensive worldview that balances individual well-being with social harmony and environmental sustainability. This integrative approach is particularly significant today, when humanity is grappling with ecological crises, ethical dilemmas of technology, and the erosion of value-based education.

The Sanskrit intellectual tradition has been a major vehicle for the preservation and transmission of Indian Knowledge Systems. Through the Vedas, Upaniṣads, Vedāṅgas, Darśanas, Itihāsa-Purāṇas, and an extensive corpus of scientific and technical texts, India developed sophisticated methodologies of inquiry, debate, and validation. Disciplines such as *Nyāya* and *Mīmāṃsā* established rigorous systems of logic and epistemology, while *Āyurveda* and *Jyotiṣa* demonstrated empirical observation combined with philosophical depth. These traditions exemplify a scientific temper that is systematic, critical, and experiential.

In recent years, there has been a renewed national and global interest in Indian Knowledge Systems. This revival is not merely an assertion of cultural pride, but a scholarly recognition of the relevance of indigenous knowledge in addressing present-day issues. Sustainable living practices, traditional health systems, community-based education, and value-oriented leadership models derived from IKS are increasingly being studied, adapted, and integrated into modern

frameworks. National initiatives in education and research have also emphasized the inclusion of Indian Knowledge Systems in curricula, encouraging interdisciplinary engagement and original research.

Institutions like Sri Sitaram Vaidic Adarsha Sanskrit Mahavidyalaya (SSVASM) play a pivotal role in this intellectual resurgence. As a center dedicated to Sanskrit learning and traditional śāstric studies, the college stands at the confluence of tradition and modernity. By nurturing scholars who are deeply grounded in classical texts while remaining open to contemporary academic discourse, SSVASM contributes meaningfully to the reinterpretation and revitalization of Indian Knowledge Systems. Academic seminars, research publications, and interdisciplinary dialogues organized by such institutions help bridge the gap between ancient wisdom and modern scholarship.

This publication aspires to serve as a platform for thoughtful engagement with Indian Knowledge Systems—encouraging critical study, contextual understanding, and creative application. It seeks to highlight research that is rooted in textual authenticity, methodological rigor, and social relevance. In doing so, it reaffirms the belief that Indian Knowledge Systems are not confined to history, but are living traditions capable of guiding humanity toward a more balanced, ethical, and enlightened future.

As we move forward, it is imperative to approach Indian Knowledge Systems with both reverence and reason—honoring their depth while subjecting them to scholarly inquiry. Such an approach will ensure that this invaluable heritage continues to inspire generations of learners, researchers, and practitioners, and that institutions like SSVASM remain torchbearers of India's timeless intellectual legacy.

Dr. Somesh Kumar Mishra,
Principal
Sri Sitaram Vaidic Adarsha Sanskrit
Mahavidyalaya, Kolkata



# कृतज्ञताज्ञापनम्

**परब्रह्मप्रज्ञां गगन-सदृशीं शुभ्रसुखदां**
**क्षमालक्ष्मीयुक्तां विमल-करुणापूर्णनयनाम्।**
**जगन्मातां धात्रीं सरल-ममतामण्डितशिवां**
**नमामि श्रीदुर्गां दनुज-दलनीं पीतजननीम्॥**

भारतीयसंस्कृतेर्मूलम् आधारभूताः च सन्ति वेदाः, यतो हि वेदानाम् अप्रतिहता विचारधारा एव भारतीयसंस्कृतिद्वारा नित्यं निरन्तरं प्रवाहिता भवति। वेदानां व्यापकप्रभावादेवानेकैराक्रमणैः सद्भिरपि अद्यत्वेऽपि भारतीया संस्कृतिः अबाधगत्या पूर्ववत् प्रचलन्ती अस्ति। अतएव प्राचीनेषु वाङ्मयेषु वेदानां महत्त्वं विविधैः प्रकारैः गीतमस्ति। वेदानामनुशीलनेन प्राणिनः ऐहिकं पारत्रिकं च अभ्युदयं सम्पादयन्तः स्वं स्वं जीवनं समुन्नतिशीलं विधातुं प्रभवन्ति। मानवजीवने ये ये विभिन्नाः प्रसङ्गाः उपतिष्ठन्ते, तेषां तेषां मार्गप्रदर्शनस्य क्षमता वैदिकविचारधाराया एकं वैशिष्ट्यं विद्यते।

भारतीयज्ञानपरम्परायाः सामाजिकमपि जीवनं अत्यन्तं व्यापकं विद्यते। स्वभावतः स्वार्थेषु लिप्तानां मानवानां समक्षं समाजस्योन्नतये आत्मरक्षायै च समष्टिभावनोपस्थापनाय वेदेषु बहवो मन्त्राः निर्दिष्टाः सन्ति, यत्र समष्टिभावनायाः समुद्बोधनमस्ति। तद्यथा –

"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथापूर्वे संजानाना उपासते॥" इति।

ज्ञानी आत्मा च समानौ। 'ज्ञानी त्वात्मैव मे मतम्' (गीता)। अस्य ज्ञानस्य प्राप्त्यर्थम् उपायभूतः भारतीयषडङ्गवेदः। श्रीसीतारामदासोङ्कारनाथदेवस्य अशेषकारुण्येन 'ज्ञानगङ्गा' इति शोधपत्रिका वर्षात्परं प्रबुद्धं सहस्रदलकमलमिव पुनर्नवायते। वस्तुतः प्रतिभाति कश्चित्समुल्लासः सम्प्रति श्रीसीतारामवैदिकादर्शसंस्कृत-महाविद्यालयस्य अनुक्षणम्। निबन्धानां भाषा आङ्गल-हिन्दि-वङ्ग-संस्कृतान्यतमाङ्गीकरणीयेति ज्ञानगङ्गायां नानाभाषासु प्रस्तुताः प्रबन्धाः संगृह्य प्रकाश्यन्ते।

एतदवसरे अस्याः प्रकाशनाय कृतभूरिपरिश्रमेभ्यः अस्माकं महाविद्यालयस्य प्रबन्धनसमितेः अध्यक्षेभ्यः एस्. सुब्रह्मण्यशर्ममहाभागेभ्यः, प्राचार्येभ्यः डॉ. सोमेशकुमारमिश्रमहोदयेभ्यश्च मदीयां कृतज्ञतां प्रकटयामि। एवं प्रत्यक्षतया परोक्षतया च ये साहाय्यम् आचरितवन्तः तेभ्यः समेभ्यः धन्यवादाः निवेद्यन्ते। श्रमसाध्यं समयसाध्यं चेदं कार्यं श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य पारिवारिकं स्नेहं विना कदापि न शक्यम् आसीत्। अतस्तेभ्यः प्रेमभरितः हार्दः प्रणामाञ्जलिः।

॥इति शम्॥

भवदीयः

Santanu Kr. Chakraborti

------------------------------------------

डॉ. शान्तनुकुमारचक्रवर्त्ती
सहायकाचार्यः ( अतिथिः ), बौद्धदर्शनविभागस्य
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य, कोलकातास्थस्य

# विषयानुक्रमणिका


| | | |
|---|---|---|
| 01- ब्रह्मजिज्ञासासूत्रे अथशब्दार्थविचारः — | डा. नागराज-भट्टः | 01 |
| 02- बृहच्छब्देन्दुशेखरदिशा प्रथमयोः पूर्वसवर्णः इति सूत्रस्य पदकृत्यविमर्शः— | डा. नीरज-कुमार-भार्गवः | 07 |
| 03- भारतीयज्ञानपरम्परायां महाकविकालिदासस्य साहित्यिकमवदानम्— | डॉ. नीरजतिवारी | 11 |
| 04- महाभाष्यसिद्धान्तरत्नप्रकाशस्थित-सिद्धान्तभेदविमर्शः — | डा. गोपीकृष्णन् रघुः | 22 |
| 05- धात्वर्थविषये प्राच्यनव्यवैयाकरणमतम् — | डा. नितेश कुमार द्विवेदी | 25 |
| 06- निम्बार्काचार्याणां द्वैताद्वैतदर्शनस्य च साम्प्रतिकसमाजे प्रासङ्गिकता — | डा. शन्तनुः अयाचितः | 29 |
| 07- न धातुलोप इति सूत्रप्रत्याख्यानविमर्शः — | डा. सुखदेवभट्टः | 34 |
| 08- केनोपनिषदि षड्विधतात्पर्यलिङ्गानां प्रयोगविमर्शः— | डॉ. कार्तिकमेटे | 38 |
| 09- अथर्ववेदानुसारं कृषेः मूलभूततत्त्वानां महत्त्वपूर्णानां विश्लेषणम् — | डॉ. बिकाश मण्डलः | 45 |
| 10- महाकवि-कालिदास-दृष्ट्या परमतत्त्वस्य स्वरूप-विमर्शः— | डॉ. सुरेश्वर मेहेरः | 53 |
| 11- उद्धवगीतायां आत्मज्ञानवतः साधकस्य स्वरूपम् — | डा० सुजित-परामानिकः | 60 |
| 12- न धातुलोप आर्धधातुके इति सूत्रविमर्शः — | डा. राधा शर्मा | 64 |
| 13- आयुर्वेदशिक्षणविधिविमर्शः — | Dr. Tapas Barman | 68 |
| 14- नास्तिकदर्शनसिद्धान्तेषु नञर्थविचारः — | Dr. Sankar Mondal | 74 |
| 15- परमाणुवादखण्डनप्रसङ्गे वेदान्ते आत्मतत्त्वसिद्धिः— | Dr. Rajesh Pramanik | 83 |
| 16- कर्तुरीप्सिततमं कर्म भोजरीत्या अध्ययनमेकम् — | Dr. Krishna Gopal Patra | 88 |
| 17- 'शाम्भवी'-गीतिकाव्ये सांस्कृतिकविषयाणां समीक्षात्मकमध्ययनम्— | डॉ. निशिकान्तपाण्डेयः | 93 |
| 18- बौद्धज्ञानपरम्परायां नित्यानित्यविनिर्मुक्तः शुद्धशून्यवादः — | डा. शान्तनुकुमारचक्रवर्ती | 97 |
| 19- भारतीयज्ञानपरम्परानुसारेण सम्वत्सर-अयन-ऋतु-मासानां परिचयः — | डॉ. ख्यालानन्दः | 102 |
| 20- भारतीयज्ञानपरम्परायां ज्योतिषशास्त्रस्य योगदानम् — | सुश्रीसरितामहापात्रः | 108 |
| 21- श्रीसारदादेव्याश्चरितचिन्तनम् — | डॉ. शान्तिघोषः | 113 |
| 22- बेनेदेत्तक्रोचेदृष्ट्या काव्यस्वरूपविमर्शः — | डॉ. शुभेन्दु-घोषः | 120 |
| 23- सृष्टिधराचार्यदिशा इको गुणवृद्धी इति सूत्रविचारः— | डॉ. शङ्खशुभ्र-गच्छितः | 126 |
| 24- सांख्यवेदान्तमते चैतन्यसिद्धान्तपरीक्षणम् — | कृष्णेन्दु-बेराः,<br>डा. शन्तनु-अयाचित् | 132 |
| 25- समाजचरित्रयोः साधुत्वे नीतिशतकस्य माहात्म्यम् — | अभिजित् दासः,<br>ब्रह्मचारी लोकेशचैतन्यः | 135 |
| 26- व्युत्पत्तिवादस्य अवतरणपङ्क्तेः विमर्शः — | नारायण-चन्द्रः मेट्याः,<br>डा. नीरज-कुमार-भार्गवः | 143 |
| 27- प्रमिताधिकरणव्युत्पादितन्यायैः हृदयाकाशस्य ब्रह्मस्वरूपत्वम् — | Gaurav Sharma | 148 |
| 28- स्मृतिप्रमाणानां वेदान्तसिद्धान्तसहायकत्वविचारः –<br>एका ब्रह्मसूत्रानुसारिणी समीक्षा — | देवज्योति-कुण्डुः | 151 |
| 29- चतुःश्लोक्यां चतुःसूत्रीसादृश्यम् – एकमध्ययनम् — | शुभदीपदासः | 157 |
| 30- महाकविकालिदासकृते विक्रमोर्वशीयत्रोटके दोषाभासविवेकः — | सुमन्तपात्रः | 162 |
| 31- स्वाधीनेच्छाशक्तिविषयकः श्रीश्रीरामकृष्णपरमहंससिद्धान्तः — | Aneek Kumar Das | 167 |
| 32- ग्रन्थलिपिस्थमातृकायाः सम्पादनम् – एका समीक्षा — | चन्दनमहान्ती | 174 |
| 33- ईश्वरस्यासद्भावे सौगतमतचिन्तनम् — | बिप्लबसरकारः | 178 |
| 34- भारतीयदर्शनेषु नव्यन्यायस्य माहात्म्यम् — | शिवशङ्कर-नाइया | 182 |

| | | |
|---|---|---|
| 35- संस्कृतव्याकरणशास्त्रपरम्परायां दुर्घटपरम्परायाः विकासे शरणदेवस्य योगदानम् — | राजीवमण्डलः | 189 |
| 36- सरस्वतीकण्ठाभरणदिशा प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः, कृद्ग्रहणे गतिकारकपूर्वस्यापि इत्यनयोः परिभाषयोः समीक्षा— | नित्यगोपालपात्रः | 192 |
| 37- सिद्धान्तलेशसंग्रहे अविद्यायाः आश्रयत्वविचारसन्दर्भे भामती-विवरणयोः मतभेदविमर्शः — | अमितः घोषालः | 195 |
| 38- विश्वनाथजगन्नाथमतयोर्दोषप्रदर्शनपुरःसरं मम्मटकृतकाव्यलक्षणस्य पुनः प्रतिष्ठा — | Basanta Chandra | 200 |
| 39- तद्धितप्रत्ययोत्तरेषु जायमानाङ्गकार्यनिरूपणम् — | Tanay Baidya | 206 |
| 40- शब्दस्य काव्यत्वमुत शब्दार्थयोः – एकमध्ययनम् — | अमित-कुमार-गराइः | 212 |
| 41- सांख्यमतानुसारमात्यन्तिकदुःखनिवृत्तिः — | Priyanka Garain | 217 |
| 42- श्रीमद्भगवद्गीतायां 'अहिंसा' तथा 'धर्मयुद्धम्' इत्येतयोः संकल्पयोः दार्शनिकमहत्त्वम् — | गैरिका कोनार | 220 |
| 43- चिकित्साशास्त्रे गुणाः– एका समीक्षा — | चैताली घोषः | 225 |
| 44- अद्वैतवेदान्ते शाब्दबोधः — | अनिमेषरायः | 235 |
| 45- उपनिषत्सु शिक्षण-अधिगमपद्धतिनां विश्लेषणम् — | तानिया पाइन् | 239 |
| 46- अद्वैतवेदान्तमतानुसारं वर्तमानसमाजे विद्याविद्ययोः प्रभावः — | Shrabani Bera | 244 |
| 47- भारतीयज्ञानपरम्परायां प्रसाधनसिद्धान्तः: वाणीवरपुत्रकालिदासस्य खण्डकाव्यस्य विशेषसन्दर्भे — | Riya Bepari<br>Soumitra Sardar | 249 |
| 48- शाण्डिल्योपनिषदि अष्टाङ्गयोगविमर्शः — | कालीचरणदासः | 256 |
| 49- अमृतबिन्दूपनिषद्दिशा आत्मनः अखण्डैकत्वसन्दर्भः — | सौम्यजित् आचार्यः | 261 |
| 50- आलंकारिकदृष्ट्या लघुत्रयी बृहत्त्रयी इति संज्ञायाकरणविमर्शः — | Sanchita Chakraborty | 266 |
| 51- श्रुतिप्रस्थाने ब्रह्मतत्त्वम् — | Naba Kumar Panda | 271 |
| 52- भारतीयज्ञानपरम्परायां पाण्डुलिपिसम्पादनकला — | सुफलमोदकः | 274 |
| 53- अभिज्ञानशकुन्तले तत्समयकालदृष्ट्या स्त्रीशिक्षा - एको विमर्शः— | Satish Das | 286 |
| 54- लक्ष्मीधराचार्यविरचित अद्वैतमकरन्दग्रन्थस्य एकं तात्त्विकविश्लेषणम्— | प्रवीणः म सज्जनः | 290 |
| 55- नाट्यशास्त्रोल्लेखितानां कतिपयानां हस्तमुद्राणां योगविज्ञानदृष्ट्या एकमध्ययनम् — | सुनन्दा दे | 294 |
| 56- संवेदनोन्मुखविकासवैकल्यप्रभावितानां बालानां (Autistic children) उद्वेगनिवृत्तौ (Anxiety Reduction), अतिगतिनियन्त्रणे (Hyperactivity Control) च योगासनाभ्यासः- एकं समीक्षात्मकमध्ययनम् — | संगीता-बागः | 302 |
| 57- भारतीयसामाजिक-इतिहास-चित्रणे बौद्धजातकस्य अवदानम् — | समर खांडा | 306 |
| 58- गुणत्वजातिसिद्धिविचारः — | Jiban Gorai | 310 |
| 59- अकर्मकधातूनां सकर्मकत्वापत्तिः — | तुहिन-मण्डलः | 315 |
| 60- अधिकरणसिद्धान्तघटितन्यायशास्त्रीयसिद्धान्तसमीक्षणम् — | Pankaj Das | 318 |
| 61- शाब्दिकद्रव्यविमर्शः — | उत्तमघोषः | 321 |
| 62- शारीरकमीमांसाभाष्यदिशा इष्टादिकारिणां चन्द्रलोकगतिप्राप्तिपर्यालोचनम्— | कार्त्तिक मण्डलः | 326 |
| 63- भारतीय ज्ञानव्यवस्थायां प्राचीनजनजातीनां योगदानम् — | सुशान्तमण्डलः | 330 |

| | | |
|---|---|---|
| 64- आचार्यभोजराजकृत-सरस्वतीकण्ठाभरणदिशा केवलसमासविमर्शः— | प्रीतम-बेरा | 335 |
| 65- लाक्षणिकरूपकपरम्परायां संकल्पसूर्योदयनाटकम्- एकमध्ययनम्— | अभिजित्-घोषः | 343 |
| 66- प्राचीनभारते-हंससन्देशकाव्ये भौगोलिकवैचित्र्यम् — | डा. अदिति वसु | 346 |
| 67- अद्वैतदर्शन के विकास में बौद्ध सिद्धान्तों का प्रभाव — | डॉ. राजेश्वर द्विवेदी | 351 |
| 68- संस्कृत साहित्य में सामुद्रीक वाणिज्य— | डॉ. परिमल मण्डल | 354 |
| 69- राष्ट्रीय शिक्षा नीति-2020 के आलोक में मीमांसा दर्शन की प्रासंगिकता— | डा. शैलेश मिश्र | 359 |
| 70- सौभाग्यनूपुरम् महाकाव्य में निरूपित भौगोलिक-परिदृश्य — | कुमारी अन्नू मौर्या | 364 |
| 71- शतपथ ब्राह्मण का प्रथम काण्ड में 'अग्नि' पद का विश्लेषण – स्वामी समर्पणानन्द सरस्वती के व्याख्यानुसार— | Priyanka Chowdhury | 369 |
| 72- भारतीय ज्ञान परम्परा में रस की अवधारणा और नागानन्द नाटक में उसका नाट्यात्मक रूप— | नेहा बरनवाल | 372 |
| 73- সাধারণীকরণের প্রকৃত স্বরূপ ও আত্মোপলব্ধিতে তার ভূমিকা: একটি সমীক্ষা — | শ্রী প্রলয় নন্দী<br>ডা. রাকেশ দাশ | 380 |
| 74- মুদ্রারাক্ষসের ভেদনীতি সৌকর্য — | ড. প্রশান্ত কর্মকার | 386 |
| 75- ন্যায়মতে অনুমিতির করণ : একটি পর্যালোচনা— | ড. অঞ্জন দাস | 397 |
| 76- ধম্মপদের নিরিখে যাপনের প্রাত্যহিকতায় বৌদ্ধধর্ম — | ডঃ প্রমা চক্রবর্তী | 402 |
| 77- পরিবেশ সচেতনতায় হস্তী সংরক্ষণের মাহাত্ম্য — | ডঃ জয়দেব পাল,<br>বিপাশা দেবনাথ | 409 |
| 78- বৌদ্ধ সাহিত্যে জাতিব্যবস্থার উপকরণ অন্বেষণ : একটি সমীক্ষা— | সোমনাথ পুরী | 418 |
| 79- বেদাদি শাস্ত্রের আলোকে ব্রাহ্মণ জাতির স্বরূপ এবং শিক্ষা গ্রহণে প্রতিবন্ধক হিসেবে জাতির ভূমিকা — | সুপ্রিয়া দাস | 425 |
| 80- সামাজিক দাবী ও ধর্মশাস্ত্র — | তাপস ধারা | 434 |
| 81- ধর্মশাস্ত্রের আলোকে বর্ণপ্রথার সংশোধন ও তার আধুনিক তাৎপর্য — | Sighra Rajbanshi | 439 |
| 82- ভারতীয় জ্ঞান পরম্পরার গৌরবময় গাথা অন্বেষণ — | Naba Kumar Roy | 447 |
| 83- প্রাচীন জ্ঞান পরম্পরার অন্তর্দৃষ্টি ও পুনরুজ্জীবন — | Lipika Naskar | 454 |
| 84- অশোককুমার শুক্ল বিরচিত পর্যাবরণকাব্যে ধ্বনিপ্রদূষণ বিমর্শ — | Shis Mohammed | 463 |
| 85- কামসূত্রে বর্ণিত তৃতীয়লিঙ্গের সামাজিক বিশ্লেষণ — | Rupjit Bose | 468 |
| 86- সাংখ্যদর্শনানুসারে দুঃখ এবং দুঃখনিবৃত্তির উপায় এক অভিমত — | কাবেরী গঁড়াই | 473 |
| 87- সংস্কৃতসাহিত্যে পরিবেশতত্ত্বের সমীক্ষাত্মক অধ্যয়ন — | Farida Molla | 479 |
| 88- প্রাচীন ভারতীয় শিক্ষা ভাবনা ও সাম্প্রতিক জাতীয় শিক্ষানীতির প্রাসঙ্গিকতা — | মানসী বিশ্বাস | 484 |
| 89- 'ব্যাকারসারলহরী' ব্যাকরণগ্রন্থের সংক্ষিপ্ত পরিশীলন — | সূর্য বর্মন | 489 |
| 90- লালনগীতিতে আত্মতত্ত্ব ও বেদান্তভাবনা: ধারণা ও বিশ্লেষণ — | বাভ্রবী ঘোষ | 493 |

91- প্রত্যাহার : একটি সমীক্ষা — অভিজিৎ দাস 499

92- পাপ, প্রায়শ্চিত্ত ও পুনর্জাগরণ: ধর্মশাস্ত্রে ব্রহ্মহত্যাকারীর প্রায়শ্চিত্ত, নৈতিক বিচার ও ধর্মতাত্ত্বিক তাৎপর্য— সাত্ত্বিকা চক্রবর্ত্তী 508

93- বেদান্তে সাংখ্য দর্শনের প্রাসঙ্গিকতা — Ishadri Das 518

94- উজ্জ্বলনীলমণিতে নায়িকার অষ্টাবস্থা বিমর্শ শ্রী অর্ক দালাল 522

95- Keypoints of Knowledge System — Gouri Bhattacharyya 533

96- Comparing Yogic Science and Science on the Internet— Jayesh Thaker, Dr. Avijit Ghosh 539

97- Situating Disaster and Its Management in the Mahāsthān Fragmentary Stone Plaque Inscription: Text and Context— Dr. Debanjan Maity 548

98- Ethics in Indian Thought: A Philosophical Exploration— Dr. Chhabilal Neupane 555

99- Architectural Excellence in Temples and Monuments as Reflections of Indian Knowledge Systems (IKS) —Dr. Sumanta Bhaskar 566

100- My Understanding of Dhyana Yoga — Dr. Amiya Kumar Das 574

101- The Conceptual Correlation Between Non-Duality and Love: A Philosophical Inquiry into Sri Ramakrishna's Vision— Dibyendu Mondal 578

102- Rapid Eye Movement Sleep: A Deep Insight into Upanisadic Wisdom — Tirtha Halder 584

103- Reviving Sanskrit: NEP's Role in India's Heritage — Pralay Sankar Adhikari 596

104- Gender Encoding in Amarakośa: A Structural and Lexicographic Analysis — Malay Maity 600

105- Evolution of Trade and Commerce in Ancient India: Insights from the Arthashastra — Silajit Bose 606

106- Intoxicating Drink Madya : Analysis from Vedic Prospective — Mrs. Mrinmoyee Samanta 614

107- Educational Institutions: Upanayana and Vedic Learning in the Āpastamba Tradition — Srabani Maharana 617

108- Architectural and Iconographic Legacy of the Pallavas — Varsha. V 623

109- Ancient Indian Number Systems: A Glimpse into the Past — Devu A S 626

110- Refutation of Akhyātivāda According to the Bhamatī— Sinchana Bhat K U 631

111- A Discussion in the Context of the Revolution in the Novel Mrichaktik— Santosh Bagdi 635

# ब्रह्मजिज्ञासासूत्रे अथशब्दार्थविचारः

**डा.नागराज भट्टः**
सहाचार्यः, अद्वैतवेदान्तविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**प्रबन्धसारः** – अद्वितीयब्रह्मात्मनि वेदान्ता एव प्रमाणं "तं त्वौपनिषदं पुरुषं पृच्छामि"[1] इत्यादिश्रुतेः। सन्दिग्धवेदान्तवाक्यानां तात्पर्यनिर्णयानुकूलयुक्तिप्रदर्शनार्थमेव भगवता बादरायणव्यासेन "अथातो ब्रह्मजिज्ञासा" इत्यादिना वेदान्तमीमांसाशास्त्रं प्रवर्तितम्। सर्वे वेदान्ताः अद्वितीयब्रह्मणि एव अविरोधेन समनुगता इति वेदान्तसूत्राणि प्रदर्शयन्ति। शोधप्रबन्धेऽस्मिन् ब्रह्मजिज्ञासासूत्रस्थस्य अथशब्दस्य यथाभाष्यम् अर्थविवेचनं विहितम्। मङ्गलानन्तरारम्भप्रश्नकात्स्‍र्न्येष्वथो अथ' इति कोशप्रामाण्यात् अथशब्दस्य बहवोऽर्थाः सम्भवन्ति। "अथ योगानुशासनम्" इति पातञ्जलयोगसूत्रे अथशब्दः अधिकारार्थे प्रयुक्तः संदृश्यते। एवमेव "अथातो ब्रह्मजिज्ञासा" इत्यत्र कोऽर्थः शास्त्राविरुद्धः इति शाङ्करभाष्ये विमृष्टः। अतश्च अथशब्दस्य मङ्गलार्थत्वे वाक्यार्थे अन्वयाभावात्, अधिकारार्थत्वे ब्रह्मजिज्ञासायाः अनारभ्यत्वात्, पूर्वप्रकृतापेक्षावदर्थत्वे आनन्तर्यार्थत्वावसानात्, आनन्तर्यार्थत्वेन धर्मब्रह्मजिज्ञासयोः नियतक्रमवाचित्वे एककर्तृकत्वाभावेन तयोः (धर्मब्रह्मजिज्ञासयोः) नियतक्रमाविवक्षितत्वात् आनन्तर्यात्वमेव परिगृह्यते। सिद्धान्ते अधिकारिरूपानुबन्धविशेषनिर्णयार्थम् अथशब्दस्य आनन्तर्यार्थता अभ्युपेता। तत्र अथशब्दस्य मङ्गलाद्यर्थत्वासम्भवात् आनन्तर्यार्थत्वपरिग्रहे किमनन्तरं ब्रह्म जिज्ञासितव्यमिति तदवधित्वेन किञ्चित्पुष्कलं कारणं प्रदर्शनीयम्। तत्र साधनचतुष्टयसम्पत्तिरूपं पुष्कलकारणमेव आनन्तर्यावधिः। अथशब्दस्य आनन्तर्यार्थत्वे एव साधनचतुष्टयसम्पन्नः ब्रह्मजिज्ञासायामधिकारी इति शास्त्रारम्भप्रयोजकानुबन्धसिद्धिः भवेत्। इत्थं जिज्ञासासूत्रभाष्यदिशा अथशब्दार्थः समासेन विमृश्यते।
**कुञ्चिशब्दाः** – मीमांसा, अधिकरणं, ब्रह्मजिज्ञासा, अधिकारार्थः, सङ्गतिः, विशयः, विधिः, साधनचतुष्टयम्

**भूमिका-** अपौरुषेयः शब्दराशिरेव वेद इत्युच्यते। वेदः सर्वज्ञात् सर्वशक्तेः परमेश्वरात् पुरुषनिःश्वासवदप्रयत्नेन लीलान्यायेन सञ्जात इति श्रूयते "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः यजुर्वेदः"[2] इति श्रुतेः। सोऽयं वेदः प्रतिपाद्यविषयभेदेन काण्डद्वयात्मना द्वेधा विभक्तः कर्मकाण्डः ज्ञानकाण्डश्चेति। तत्र कर्मकाण्डगतानां सन्दिग्धवाक्यानां तात्पर्यनिर्णयानुकूलयुक्तिप्रदर्शनाय भगवता जैमिनिमुनिना "अथातो धर्मजिज्ञासा" इत्यादिना पूर्वमीमांसादर्शनं प्रवर्तितम्। तत्र वेदप्रतिपाद्यधर्मस्वरूपनिर्णयपरं पूर्वमीमांसादर्शनम्। ज्ञानकाण्डस्थानां सन्दिग्धवेदवाक्यानां (वेदान्तानां) तात्पर्यनिर्णयानुकूलयुक्तिनिरूपणार्थं भगवता वेदव्यासेन "अथातो ब्रह्मजिज्ञासा" इत्यादिना उत्तरमीमांसादर्शनं (वेदान्तदर्शनं) प्रवर्तितम्। तत्र प्रत्यगभिन्नब्रह्मस्वरूपविचारपरम् उत्तरमीमांसादर्शनम्। अद्वितीयब्रह्मात्मप्रतिपत्तिस्तु वेदान्तप्रमाणैरेव "वेदान्तविज्ञानसुनिश्चितार्थाः"[3] इति श्रुतेः। वेदान्तवेद्यपरब्रह्मवस्तुयाथात्म्यज्ञानादेव मोक्ष इति वेदान्तराद्धान्तः। ब्रह्मतत्त्वयाथात्म्यज्ञानं वेदान्तवाक्यविचारेण सम्भवति। तत्र वेदान्तसूत्राणि (ब्रह्मसूत्राणि) युक्तिपूर्वकं सन्दिग्धवेदान्तवाक्यानाम् अद्वितीयब्रह्मात्मनि एव तात्पर्यं प्रदर्शयन्ति। तदुक्तं शाङ्करभाष्ये "वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम्। वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते। वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता"[4] इति। अधिकरणेषु विभक्तानि तानि सूत्राणि तात्पर्यनिर्णयानुकूलन्यायकलापं प्रदर्शयन्ति। विषयविशयादिभिरङ्गैः उपस्थापितो विचारविशेष एव अधिकरणमिति उच्यते। अतश्च अधिकार्याद्यनुबन्धसम्भवात् वेदान्तमीमांसाशास्त्रम् आरम्भणीयमिति जिज्ञासाधिकरणेन प्रसाध्यते।

---

1. बृहदारण्यकोपनिषत् - ३.९.२६
2. बृहदारण्यकोपनिषत्- २.४.१०
3. मुण्डकोपनिषत्- ३.२.६
4. जन्माद्यधिकरणभाष्यम्- पृ.सं. ४८-४९

**विचारसन्दर्भः-** वेदान्तवाक्यार्थनिर्णयफलकः पञ्चाङ्गोपेतः षड्गोपेतो वा वाक्यार्थविचार एव अधिकरणम् इत्युच्यते। तत्र अधिकरणलक्षणं प्रोक्तं यथा- **"विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥"** इति।

क्वचित् सांप्रदायिकपाठे फलम् अधिकरणस्य अङ्गमिति श्रूयते। अतश्च फलं सङ्गतिं च आकलय्य अधिकरणस्य षडङ्गानि भवन्ति इत्युच्यते। अथ विचार्यविषयप्रवेशानुकूलाय षडङ्गनिरूपणपूर्वकं जिज्ञासाधिकरणं समासतो निरूप्यते।

1. **विषयः** – "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः"[1], "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः"[2], "तद्विजिज्ञासस्व"[3] इत्यादि वेदान्तवाक्यम् (वेदान्तमीमांसाशास्त्रम्) एव विषयः।
2. **विशयः** – विषयप्रयोजनसम्भवासम्भवाभ्यां मोक्षोपायभूतब्रह्मज्ञानमुद्दिश्य वेदान्तवाक्यविचारः कर्तव्यो वा न कर्तव्यो वा इत्याकारकः संशयः।
3. **पूर्वपक्षः** – मोक्षोपायभूतब्रह्मज्ञानमुद्दिश्य वेदान्तवाक्यविचारो न कर्तव्यः विषयप्रयोजनाद्यनुबन्धचतुष्टयासिद्धेरिति पूर्वपक्षः। तस्मात् वेदान्तमीमांसाशास्त्रं न आरम्भणीयमिति पूर्वपक्षः।
4. **सिद्धान्तः** – मोक्षहेतुकब्रह्मज्ञानमुद्दिश्य वेदान्तवाक्यविचारः कर्तव्यः विषयप्रयोजनाद्यनुबन्धचतुष्टयसम्भवादिति सिद्धान्तः। अतश्च वेदान्तमीमांसाशास्त्रम् आरम्भणीयमिति सिद्धान्तपक्षः।
5. **फलम्** – पूर्वपक्षानुसारं बन्धस्य सत्यत्वेन तस्य च ज्ञाननिवर्त्यत्वासम्भवात्, ज्ञानात् मुक्त्यसिद्धेः उपायान्तरप्राप्या मुक्तिरिति फलम्। सिद्धान्तानुसारं तु बन्धस्य आध्यासिकत्वेन ज्ञाननिवर्त्यत्वसम्भवात् ज्ञानादेव मुक्तिरिति फलम्।
6. **सङ्गतिः** – सङ्गतिः चतुर्विधा भवति। शास्त्रसङ्गतिः, अध्यायसङ्गतिः, पादसङ्गतिः, अधिकरणसङ्गतिः चेति। अधिकरणसङ्गतिश्च आक्षेपदृष्टान्तादिना अनेकधा भिद्यते। इदं च वेदान्तमीमांसाशास्त्रं प्रत्यगभिन्नब्रह्मस्वरूपविचारपरम्। अतः प्रत्यधिकरणं ब्रह्मस्वरूपसम्बन्धी एव विचारः कर्तव्यः। तत्तदध्यायपादगतम् अधिकरणं तत्तदध्यायपादप्रतिपाद्यविषयसम्बन्धि एव स्यात्। प्रत्यधिकरणं पूर्वाधिकरणेन सङ्गतं भवेत्। अस्य च जिज्ञासाधिकरणस्य उपोद्घातरूपत्वात् न अधिकरणसङ्गतिः अन्वेष्टव्या।

**जिज्ञासाधिकरणस्य आरचनम्-** प्रत्यगभिन्नं ब्रह्मैव वेदान्तशास्त्रस्य विषयः। तत्र प्रत्यगभिन्नब्रह्मविचारात्मकवेदान्तवाक्यानि एव वेदान्तसूत्राणां (शारीरकमीमांसासूत्राणां) विषयः। विषयप्रयोजनाद्यनुबन्धचतुष्टयसम्भवात् तदसम्भवाच्च अद्वितीयब्रह्मप्रतिपादकं वेदान्तमीमांसाशास्त्रम् आरम्भणीयं न वेति संशय्य, विषयप्रयोजनयोरभावात् प्रत्यगभिन्नब्रह्मप्रतिपादकं वेदान्तशास्त्रं नारम्भणीयमिति पूर्वपक्षः सम्भवति। प्रत्यगभिन्नब्रह्मरूपस्य विषयस्य असिद्धिरिति पूर्वपक्षमतम्। शास्त्रस्य विषयासिद्धेः शास्त्रारम्भो न कर्तव्यः। अहं कर्ता भोक्ता इति अनुभवसिद्धकर्तृत्वभोक्तृत्वादिजीवधर्मस्य तद्विलक्षणस्य अकर्तृत्वाभोक्तृत्वादेः ब्रह्मधर्मस्य च एकत्रासम्भवात् प्रत्यगभिन्नब्रह्मरूपविषयो न सिध्यति। कर्तृत्वभोक्तृत्वादिबन्धनिवृत्तिरेव ब्रह्मज्ञानफलमिति सप्रयोजनत्वात्, शास्त्रमारम्भणीयमिति सिद्धान्तमतं न युक्तं यतः ज्ञानेन कर्तृत्वभोक्तृत्वादिरूपस्य सत्यस्य बन्धस्य आत्यन्तिकनिवृत्त्यसम्भवात्। इत्थं विषयप्रयोजनासिद्धेः वेदान्तमीमांसाशास्त्रं न आरम्भणीयमिति पूर्वपक्षः सम्भवति।

**सिद्धान्तः-** तत्र वेदान्तमीमांसाशास्त्रम् आरम्भणीयं विषयप्रयोजनसिद्धेरिति सिद्धान्तः। आत्मानात्मनोः तमःप्रकाशवत् विरुद्धस्वभावयोरपि अध्यासः सम्भवति। अनाद्यविद्यानिमित्तवशात् कर्तृत्वभोक्तृत्वप्रत्ययप्रवाहनिमित्ताच्च अद्वितीये प्रत्यगभिन्नब्रह्मणि औपाधिकः जीवेशभेदोऽङ्गीकृत एव। वेदान्तवेद्यशुद्धब्रह्मविद्यया तु अध्यासनिमित्तभूतायाः अविद्यायाः निवृत्तौ, अध्यासनिमित्तकर्तृत्वभोक्तृत्वाद्ययोगात् जीवेशयोः भेदेन प्रतीतिः नैव सम्भवति। इत्थं वेदान्तशास्त्रस्य प्रत्यगभिन्नब्रह्मलक्षणो विषयः सम्भवति। एवमेव तत्त्वमस्यादिवेदान्तमहावाक्योत्थं ब्रह्मज्ञानम् असत्यरूपस्य बन्धस्य निवर्तकमेव भवति। कर्तृत्वादिरूपबन्धस्य

---

[1]. बृहदारण्यकोपनिषत् २.४.५

[2]. छान्दोग्योपनिषत् ८.७.१

[3]. तैत्तिरीयोपनिषत् ३.१

आध्यासिकत्वेन ज्ञाननिवर्त्यत्वम्। कर्तृत्वभोक्तृत्वादिप्रत्ययानाम् अनर्थानां निवर्तकत्वेन एव वेदान्तजन्यज्ञानस्य सफलत्वं समर्थ्यते। बन्धस्य अध्यस्तत्वेन एव ज्ञाननिवर्त्यत्वमुच्यते। इत्थं वेदान्तमीमांसाशास्त्रम् आरम्भणीयमेव विषयप्रयोजनसिद्धेरिति सिद्धान्तो भवति। ब्रह्मात्मैक्यं विषयः। कर्तृत्वादिरूपबन्धनिवृत्तिः प्रयोजनम्।

**१. ब्रह्मजिज्ञासासूत्रे अथशब्दस्य न मङ्गलार्थकत्वम्।**

इह जिज्ञासासूत्रे अथशब्दस्य मङ्गलार्थत्वेन अन्वयो न भवति। अथशब्दस्य मङ्गलार्थत्वं स्मर्यते यथा

**"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ"** ॥ इति।

जिज्ञासासूत्रे अथशब्दः न मङ्गलार्थको भवति। "मङ्गलस्य च वाक्यार्थे समन्वयाभावात्"[1] इत्युक्तत्वात्। विचारकर्तव्यता एव वाक्यार्थः। तत्र मङ्गलस्य कर्तृत्वादिकारकेण अन्वयो नास्ति। विचारकर्तव्यत्वरूपे सूत्रार्थे मङ्गलं कर्तृकर्मादिकारकरूपेण अन्वितं न भवतीति तात्पर्यम्। सूत्रकृता शास्त्रादौ मङ्गलं कार्यमिति अथशब्दः प्रयुक्त इति चेन्न, वस्तुतस्तु अथशब्दस्य मङ्गलार्थत्वमेव नास्ति। किन्तु अथशब्दश्रवणमात्रेण उच्चारणमात्रेण च मङ्गलकार्यं लक्ष्यते। आनन्तर्यादिषु अन्येषु अर्थेषु प्रयुक्तः अथशब्दः श्रवणमात्रेण शंखवीणानादस्वरवत् मङ्गलप्रयोजको भवति। एवञ्च ओंकाराथशब्दयोः श्रवणं मङ्गलफलकमित्येव स्मृतिवचनस्यापि तात्पर्यम्। तस्मात् यः कश्चिदर्थः अथशब्दस्य भवतु किन्तु मङ्गलार्थस्तु गौण्या गम्यते एव। तदर्थं मङ्गलार्थे अथशब्दप्रयोगः कर्तव्य इति नास्ति इति फलितम्।

**२. ब्रह्मजिज्ञासासूत्रे अथशब्दस्य न प्रकृतादर्थादर्थान्तरवाचित्वम्।**

अथशब्दस्य आनन्तर्यार्थत्वेऽपि पूर्वप्रकृतात् अर्थान्तरवाचित्वमस्तु इति पूर्वपक्षी शङ्कते। परमाणुः सत्यः अथ मिथ्या इत्यस्मिन्प्रयोगे अथशब्दः पूर्वप्रकृतात् परमाणुसत्यत्वरूपपक्षात् अर्थान्तरं पक्षान्तरं द्योतयति। पूर्वप्रकृतायाः धर्मजिज्ञासायाः अर्थान्तरवाचित्वम् अथशब्दस्य भवत्विति पूर्वपक्षः। तस्य च समाधानं प्रोक्तं भाष्ये यथा "पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्"[2] इति। ब्रह्मजिज्ञासायाः पूर्वं नियमेन कश्चन अर्थविशेषः प्रकृतो नास्ति, अर्थविशेषात् तस्याः जिज्ञासायाः अर्थान्तरत्वम् अथशब्देन कथ्येत। अथशब्दस्य अर्थान्तरत्वमपि यथाकामं यतः कुतश्चित् न वक्तव्यम्। तस्य च विशिष्टप्रयोजनाभावात्। पूर्वप्रकृतात् अर्थान्तरवाचित्वे अथशब्दस्य परम्परया आनन्तर्यार्थता एव संसाधिता भवति इत्ययमपि पक्षः निरस्तः।

**३. ब्रह्मजिज्ञासासूत्रे अथशब्दस्य न नियतक्रमार्थत्वम्।**

अथशब्दस्य आनन्तर्यार्थत्वेऽपि धर्मब्रह्मजिज्ञासयोः नियतक्रमबोधनार्थः अथशब्दः इत्ययं पूर्वपक्षः विचार्यते। यद्यपि पूर्वपक्षमते अथशब्दस्य आनन्तर्यार्थत्वं न विवक्षितं तथापि मङ्गलादेः अर्थान्तस्य असम्भवात्, आनन्तर्यार्थत्वं परिगृह्य तत्रैव कश्चित् विशेषो नियम्यते। नियतक्रमबोधनमेव आनन्तर्यार्थकस्य अथशब्दस्य विशेषः इति भावः। तदुक्तं भाष्ये "सति च आनन्तर्यार्थत्वे, यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यम्।"[3] इति। अथशब्दस्य आनन्तर्यार्थत्वेऽपि आनन्तर्यावधिः वक्तव्य इति ब्रह्मजिज्ञासायाः पूर्वावधित्वेन धर्मजिज्ञासा एव उपस्थिता भवति। पूर्ववृत्तं पुष्कलं कारणं ब्रह्मजिज्ञासायाः धर्मजिज्ञासैव इति अथशब्दस्य नियतक्रमबोधकत्वे एव सिध्यति इति पूर्वपक्षसंग्रहः। अत्रेदं सिद्धान्तमतं चिन्त्यते। तत्र जिज्ञासासूत्रे श्रूयमाणस्य अथशब्दस्य आनन्तर्यार्थत्वमेव न तु नियतक्रमबोधकत्वम्। ब्रह्मजिज्ञासायां धर्मविचारः, स्वाध्यायः, कर्मानुष्ठानं च साधारणं कारणं न तु तत्पुष्कलकारणम्। आनन्तर्यावधित्वेन पुष्कलकारणस्यैव उपपादनोपपत्तेः न नियतक्रमार्थः अथशब्दो भवति। पूर्वमीमांसाशास्त्रसिद्धाः सर्वे पदार्थाः न ब्रह्मजिज्ञासायामुपयुक्ताः भवन्ति। धर्मविचारस्य धर्मनिर्णयमात्रहेतुत्वेन पूर्वतन्त्रोपदिष्टकर्मजातं, पूर्वमीमांसाशास्त्रविचारो वा ब्रह्मजिज्ञासायां साधारणकारणत्वेन न तेषाम् आनन्तर्यावधित्वमिति फलितार्थः।

---

1. ब्रह्मसूत्रशाङ्करभाष्यम्- पृ.सं.२९
2. ब्रह्मसूत्रशाङ्करभाष्यम्- पृ.सं.३०
3. ब्रह्मसूत्रशाङ्करभाष्यम्- पृ.सं.३०

धर्मजिज्ञासायाः पुष्कलकारणत्वाभावेन ब्रह्मजिज्ञासायां पूर्वावधित्वाभावेऽपि, श्रुतत्वात् नियतक्रमार्थः अथशब्दो भवत्विति पूर्वपक्षी पुनः प्रत्यवतिष्ठते। यथा "हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः" इत्यत्र कार्यकार्यणत्वाभावेऽपि हृदयाद्यवदानानां क्रमबोधनार्थः अथशब्दो भवति। अत्रेदं समाधानं भवति। हृदयाद्यवदानानां नियतक्रमार्थः अथशब्दः, एककर्तृकत्वेन विवक्षिततत्वात्। किन्तु धर्मब्रह्मजिज्ञासयोः न नियतक्रमो विवक्षितः एककर्तृकत्वाभावात्, फलविषयभेदाच्च। कर्तृत्वभोक्तृत्वादिधर्मविशिष्टः धर्मजिज्ञासायामधिकरोति। ब्रह्मजिज्ञासायां तु तद्विपरीतः। धर्मजिज्ञासायाः फलमभ्युदयः, विषयश्च वेदोक्तः यागादिधर्मः किन्तु ब्रह्मजिज्ञासायाः फलं निःश्रेयसमेव, विषयश्च प्रत्यगभिन्नं परं ब्रह्म। तस्मात् फलविषयाधिकारिभेदात् धर्मब्रह्मजिज्ञासयोः नियतक्रमबोधार्थः अथशब्दः इति व्याख्यानं न युज्यते।

**४. ब्रह्मजिज्ञासासूत्रे अथशब्दस्य न अधिकारार्थत्वम्।**

जिज्ञासासूत्रे श्रूयमाणस्य अथशब्दस्य न अधिकारार्थत्वमिति सिद्धान्तः। अधिकारार्थो नाम आरम्भार्थ एव। यथा "अथ योगानुशासनम्"[1] इत्यादिषु अथशब्दस्य अधिकारार्थत्वं दृष्टं तथा इहापि अथशब्दः अधिकारार्थकः भवतु इति पूर्वपक्षिणामाशयः। अत्रेदं समाधानं चिन्त्यम्। जिज्ञासासूत्रे श्रूयमाणं जिज्ञासापदं ज्ञानेच्छापरम् अथवा विचारलक्षकम् इति पक्षद्वयं प्रकल्प्य विचार्यते। तत्र आदिमपक्षे ब्रह्मज्ञानेच्छा आरभ्यते इति सूत्रार्थः स्यात्। इच्छायाः अनारभ्यत्वेन, अयमादिमः कल्पो न युज्यते। न हि ब्रह्मसूत्रस्य प्रत्यधिकरणं ब्रह्मज्ञानेच्छा क्रियते। नापि द्वितीयः कर्तव्यपदाध्याहारं विना जिज्ञासापदं विचारलक्षकमिति द्वितीयपक्षप्रकल्पनमेव अशक्यत्वात्। लक्षणया सूत्रे कर्तव्यपदाध्याहारे तु कर्तव्यपदेनैव आरम्भार्थद्योतनात्, तदर्थे पुनरपि अथशब्दप्रयोगस्य वैय्यर्थ्यसम्भवात्। तदुक्तं "नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वात्"[2] इति। अतश्च ब्रह्मजिज्ञासायाः अनारभ्यत्वात् अथशब्दः नाधिकारार्थः इति समर्थितम्।

तथाहि "नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वात्" इति भाष्यवाक्यं विमृश्यते। अधिकारो नाम प्रारम्भ इत्युक्तम्। ब्रह्ममीमांसाशास्त्रं प्रारभ्यते इति सूत्रप्रयुक्ताथशब्दः अधिकारार्थक इति पूर्वपक्षाशयः। ततश्च "ब्रह्ममीमांसाशास्त्रं प्रारभ्यते" इति सूत्रार्थः। किन्तु भाष्यकारैः अथशब्दस्य अधिकारार्थत्वं निराकृतम्। तथाहि ब्रह्मणः जिज्ञासा ब्रह्मजिज्ञासा। ज्ञातुम् इच्छा जिज्ञासा इति सन्प्रत्ययो वर्तते। ब्रह्मज्ञानेच्छा "ब्रह्मविषयकज्ञानेच्छा" इति सूत्रस्थजिज्ञासापदात् साक्षादेव गम्यते। यदि अथशब्दः अधिकारार्थकः (प्रारम्भार्थकः) स्यात् तर्हि "ब्रह्मज्ञानेच्छा प्रारभ्यते" इत्येव वक्तव्यम्। किन्तु "ब्रह्मज्ञानेच्छा प्रारभ्यते" इति वाक्यार्थो बाध्यते। ब्रह्मज्ञानेच्छा द्विधा प्रारभ्यते इति वक्तुं शक्यते। तत्र उत्पाद्यतया वा निरूप्यतया (प्रतिपाद्यतया) वा प्रारम्भः द्वेधा सम्भवति। क्वचित् पदार्थः उत्पाद्यतया प्रारभ्यते। क्वचिच्च "विषयोऽयं प्रारभ्यते" इति प्रयोगे विषयः निरूप्यतया (प्रतिपाद्यतया) आरभ्यते इति वक्तव्यम्। तत्र निरूपणीयतया (प्रतिपाद्यतया) प्रारम्भः। प्रकृते ब्रह्मजिज्ञासा नोभयप्रकारेणापि प्रारभ्यते।

१. उत्पाद्यतया प्रारम्भः – ब्रह्मसूत्रस्य क्वचिदपि अधिकरणे उत्पाद्यतया ब्रह्मज्ञानेच्छा न प्रारभ्यते।
२. निरूपणीयतया प्रारम्भः- जिज्ञासाधिकरणोत्तरं न कस्मिन्नपि अधिकरणे ब्रह्मजिज्ञासायाः निरूपणीयतया प्रारम्भो भवति। यतः न क्वचिदपि अधिकरणे ब्रह्मज्ञानेच्छा प्रतिपाद्यते।

ब्रह्मजिज्ञासा इति सूत्रस्थपदं स्वीकृत्य अथशब्दान्वयः क्रियते चेत्, तत्र ब्रह्मजिज्ञासायाः उत्पाद्यतया प्रतिपाद्यतया वा न आरम्भः। अतः न अथशब्दः अधिकारार्थः। तदेव भाष्ये प्रोक्तं "ब्रह्मजिज्ञासायाः अनधिकार्यत्वात्" इति।

ब्रह्मजिज्ञासा इत्यत्र सन्नर्थः इच्छा विशेष्यतया भाति। विशेष्यभूता सा ब्रह्मज्ञानेच्छा न प्रारभ्यते इति तु सत्यम्। किन्तु इच्छाविषयीभूतं ज्ञानं, ज्ञानविषयीभूतं ब्रह्म वा प्रारभ्यते इति अथशब्दस्य अधिकारार्थे एव योजयितुं शक्यते। ज्ञानं उत्पाद्यतया प्रारभ्यते, ब्रह्म प्रतिपाद्यतया प्रारभ्यते इति प्रयोगः युक्त एव। ज्ञानस्य तद्विषयस्य ब्रह्मणो वा प्रारम्भो भवति इति वक्तुं शक्यते। तथाच अथशब्दार्थः अधिकारार्थे एव भवतु इति पुनरपि शङ्का क्रियते। पुनश्च "दण्डी प्रैषान् अन्वाह" इति विधिवाक्यं श्रूयते। तत्र दण्डी

[1]. पातञ्जलयोगदर्शनम् -१.१
[2]. ब्रह्मसूत्रशाङ्करभाष्यम्- पृ.सं.२९

इति शब्दः दण्डविशिष्टपरः किन्तु विधेयः विशेषणभूतः दण्ड एव । यद्यपि जिज्ञासापदे इच्छा एव विशेष्यतया अन्वेति किन्तु तत्र विशेषणमात्रस्य ज्ञानस्य ज्ञानविषयस्य ब्रह्मणो वा केवलस्य विधेयत्वं यथा दण्डमात्रस्य विधेयत्वम् । तथाच ब्रह्म ब्रह्मज्ञानं वा प्रारभ्यते इति विधातुं शक्यमिति पूर्वपक्षाशयः । अत्रापि इदमेव समाधानं वक्तव्यं यत् अथशब्दस्य अधिकारार्थत्वे (आनन्तर्यार्थत्वपरित्यागे) शास्त्रारम्भहेतुभूतानुबन्धासिद्धिप्रसङ्ग इति। तस्मात् ब्रह्मजिज्ञासासूत्रगतः अथशब्दो न अधिकारार्थ इति सिद्धान्तमतम् ।

**५. ब्रह्मजिज्ञासासूत्रे अथशब्दस्य आनन्तर्यार्थत्वसमर्थनम् ।**

अथशब्दस्य अनेकेषु अर्थेषु सत्सु सिद्धान्ते आनन्तर्यार्थ एव परिगृह्यते तेन च विवक्षिताधिकार्याद्यनुबन्धसंग्रहात् । तदुक्तं "न वयम् आनन्तर्यार्थतां व्यसनितया रोचयामहे किन्तु जिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये"[1] इति । तथाहि- आनन्तर्यार्थः अथशब्दः किञ्चित् पूर्ववृत्तम् अपेक्षते । अथशब्दस्य आनन्तर्यार्थकत्वेऽपि आनन्तर्यस्य अवधिः कः इति वक्तव्यम् । यत् नियमेन पूर्ववृत्तं पूर्वभावि असाधारणकारणं (पुष्कलकारणं) तदेव आनन्तर्यस्य अवधिरिति बोद्धव्यम् । साधनचतुष्टयसम्पत्तिरेव[2] आनन्तर्यावधिरिति परमसिद्धान्तः। तत्र स्वाध्यायः, धर्मजिज्ञासा, कर्मावबोधः चेति अनेके अर्थाः अथशब्दस्य आनन्तर्यावधित्वेन सम्भाविता अपि, न ते तद्रूपेण गृह्यन्ते । यदि अथशब्दः प्रारम्भार्थः एव स्यात् तर्हि "साधनचतुष्टयसम्पन्नः अधिकारी" इति शास्त्रारम्भहेतुभूतः अनुबन्धविशेषो नैव लभ्यते । किन्तु आनन्तर्यार्थकोऽथशब्दः अधिकारिविशेषसमर्पको भवति इति भावः।

जिज्ञासासूत्रे च तात्पर्यानुपपत्त्या कर्तव्यपदाध्याहारः भाष्यकारैरेव प्रदर्शितः तद्यथा – "तस्मात् यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या"[3] इति। कर्तव्यपदाध्याहारे निमित्तानि इमानि भवन्ति।

१. जिज्ञासासूत्रे च विधायककर्तव्यपदाभावात्, तस्य च अनुवादकत्वेन आनर्थक्यप्रसङ्गः । अतश्च जिज्ञासासूत्रस्य अनुवादकत्वेन आनर्थक्यपरिहाराय कर्तव्येति पदाध्याहारः।

२. योग्याधिकारिणः विधिवाक्यश्रवणोत्तरं प्रवर्तन्ते इत्यतः पुरुषप्रवृत्तये च जिज्ञासासूत्रे कर्तव्येति पदाध्याहारः।

३. "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः" "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" इति जिज्ञासाधिकरणस्य विषयवाक्यं श्रूयते ।

विषयवाक्येषु विधायकप्रत्ययश्रवणं पुरुषप्रवृत्तिहेतुः । सूत्रं च श्रुतिवाक्यानुसारि भवति । सूत्राणां विषयवाक्येन सह एकवाक्यता अपेक्षिता । किन्तु विधायकपदाभावात् सूत्रवाक्ययोः एकवाक्यताभङ्गप्रसङ्गः स्यात्। पुनश्च श्रुतिसारूप्यं सूत्राणामपेक्षितम्। तस्मात् श्रुतिवाक्येन सह सूत्रस्य एकवाक्यतासम्पादनाय श्रुतिवाक्यसारूप्यसम्पादनाय वा जिज्ञासासूत्रे कर्तव्येति पदाध्याहारः। विषयप्रयोजनाधिकारिसमर्थनेन एव कस्यचित् शास्त्रस्य आरम्भणीयत्वमुपपद्यते । अनुबन्धदर्शनेन खलु प्रेक्षावतां प्रवृत्तिः। अतः अस्यापि वेदान्तमीमांसाशास्त्रस्य अनुबन्धत्रयं प्रदर्शनीयमेव । ब्रह्मजिज्ञासापदेन विषयप्रयोजनसिद्धिः । प्रत्यगभिन्नं ब्रह्मैव वेदान्तशास्त्रस्य विषयः। पुनश्च अथशब्दस्य आनन्तर्यार्थत्वे एव प्रयोजनसिद्धिः। आनन्तर्यार्थत्वं नाम साधनचतुष्टयसम्पत्त्यानन्तर्यमेव विवक्षितम् । एवञ्च साधनचतुष्टयसम्पन्नः मुमुक्षुः ब्रह्मज्ञानाय वेदान्तविचारे प्रवर्तते । ब्रह्मज्ञानमेव साक्षात्फलं न भवति। तच्च साधनरूपं फलम् । मोक्षोपायस्य ब्रह्मज्ञानस्य तद्धेतुतया एव फलत्वसङ्कीर्तनमिति विवेकः । इत्थम् अथशब्दस्य आनन्तर्यार्थत्वे एव ब्रह्मज्ञानरूपं प्रयोजनम् उपपद्यते। साधनरूपं फलं जिज्ञासापदेन लभ्यते।

**सूत्रार्थनिष्कर्षः-** अथशब्देन साधनचतुष्टयसम्पत्त्यानन्तर्यं प्रतिपाद्यते । अतःशब्देन विवेकवैराग्यादिसाधनचतुष्टयस्य ब्रह्मजिज्ञासाहेतुत्वं निरूप्यते । सूत्रस्य अनुवादकत्वेन आनर्थक्यपरिहाराय पुरुषप्रवृत्तये च श्रुतिवाक्यानुसारित्वेन जिज्ञासासूत्रे कर्तव्या इति पदाध्याहारः क्रियते । जिज्ञासा इत्यत्र प्रकृत्या फलीभूतं ब्रह्मापरोक्षज्ञानम् अजहल्लक्षणया साध्यते । यत्र तात्पर्यानुपपत्त्या शक्यार्थमनपहाय अर्थान्तरप्रतीतिः तत्र अजहल्लक्षणा। तदुक्तं "यत्र शक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिः तत्राजहल्लक्षणा यथा शुक्लो घटः"[4] इति । सन्प्रत्ययेन च इच्छासाध्यो विचारः जहल्लक्षणया सम्पाद्यते । यत्र तात्पर्यानुपपत्त्या शक्यार्थं विहाय अर्थान्तरप्रतीतिः

[1]. भामती. पृ.सं २९

[2]. साधनचतुष्टयं तु नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिसाधनसम्पदः, मुमुक्षुत्वं चेति ।

[3]. ब्रह्मसूत्रशाङ्करभाष्यम्- पृ.सं.३६

[4]. वेदान्तपरिभाषा-पृ.सं.२२८

तत्र अजहल्लक्षणा । तदुक्तं “शक्यमनन्तर्भाव्य यत्रार्थान्तरप्रतीतिस्तत्र जहल्लक्षणा, यथा विषं भुंक्ष्व”[1] इति । एवञ्च साधनचतुष्टयसम्पत्तेरनन्तरं ब्रह्मापरोक्षज्ञानाय विचारः कर्तव्य इत्यर्थः प्राप्यते। एतेन अपरोक्षब्रह्मज्ञानस्य मोक्षहेतुत्वं, वेदान्तवाक्यानां च विचार्यत्वम् अवगम्यते। साधनचतुष्टयसम्पत्तेरनन्तरं मोक्षहेतुभूतब्रह्मज्ञानार्थं वेदान्तवाक्यविचारः कर्तव्यः इति सूत्रार्थः सम्पद्यते।

**उपसंहारः -** वेदवाक्यार्थविचाराय प्रवृत्तं मीमांसादर्शनं पूर्वोत्तरशास्त्रभेदेन द्वेधा विभक्तमिति ज्ञायते । जैमिनिमुनिना “अथातो धर्मजिज्ञासा” इत्यादिना कर्मकाण्डगतानां सन्दिग्धानां वेदवाक्यानां तात्पर्यार्थनिर्णयानुकूलतया युक्तयः प्रदर्शिताः। भगवता बादरायणव्यासेन सन्दिग्धवेदान्तवाक्यानाम् अद्वितीयब्रह्मण्येव समन्वयप्रदर्शनार्थं तत्रैव अविरोधप्रसाधनार्थं च “अथातो ब्रह्मजिज्ञासा” इति न्यायप्रस्थानं प्रवर्तितम्। अनेन उपोद्घातरूपाधिकरणेन वेदान्तशास्त्रारम्भः कर्तव्यो वा वेति उपनिषद्विषयवाक्यार्थपर्यालोचनमुखेन विचार्य धर्ममीमांसाशास्त्रवत् ब्रह्ममीमांसाशास्त्रस्यापि अगतार्थत्वात्, अनुबन्धचतुष्टयसिद्धेश्च वेदान्तमीमांसाशास्त्रमारम्भणीयमिति प्रसाध्यते इति शिवम्।

## परिशीलितग्रन्थसूची

१. ब्रह्मसूत्रम्-(प्रथमो भागः) - स्वामिविद्यानन्दगिरिमहाराजः, प्रकाशकः श्रीकैलासविद्या प्रकाशनम्, हृषीकेशः१९९७.

२. ब्रह्मसूत्रशाङ्करभाष्यम् (व्याख्यात्रयोपेतम्) - सम्पादकौ महादेवशर्मा वासुदेवलक्ष्मणशास्त्री च, प्रकाशकः निर्णयसागर प्रेस्, मुम्बई, १९३४.

३.उपनिषद्भाष्यम् (प्रथम-द्वितीय-तृतीयभागाः) - सम्पादकः एस् सुब्रह्मण्यशास्त्री, श्रीदक्षिणामूर्तिमठ प्रकाशनम्, वाराणसी, २००४.

४. ब्रह्मतत्त्वप्रकाशिका- प्रणेता श्रीसदाशिवब्रह्मेन्द्रसरस्वती, प्रकाशकः- श्रीवाणीविलासमुद्रणालयः श्रीरङ्गम्, १९२७.

५. वेदान्तपरिभाषा- सम्पादकः पं गजाननशास्त्री, प्रकाशकः चौखम्बा विद्याभवन वाराणसी, १९८३

[1] वेदान्तपरिभाषा-पृ.सं. २२६

# बृहच्छब्देन्दुशेखरदिशा प्रथमयोः पूर्वसवर्णः इति सूत्रस्य पदकृत्यविमर्शः

Neeraj Kumar Bhargave,
Assistant Professor,
Dept. of Sanskrit and Philosophy
Ramakrishna Mission Vivekananda Educational
and Research Institute,
Belur Math, Howrah,
Email- neerajbhu85@gmail.com

**१.१. सूत्रार्थः-** 'अकः सवर्णे दीर्घः' इत्यतः अकः इति, दीर्घः इति चानुवर्तेते। 'इको यणचि' इत्यतः अचि इत्यनुवर्तते। 'एकः पूर्वपरयोः' इत्यधिक्रियते। प्रथमयोरिति अवयवषष्ठी। प्रथमापदमिह प्रथमा च प्रथमा च इत्येकशेषेणैकं प्रथमाविभक्तिपरम्। द्वितीयं स्वोत्तरत्वसम्बन्धलक्षणया द्वितीयापरम्। अतः प्रथमयोरित्यनेन प्रथमाद्वितीये सुब्विभक्ती विवक्षिते। तेन अकः प्रथमाद्वितीययोः अचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् इति सूत्रार्थो भवति। उदाहरणं तावत् रामशब्दस्य प्रातिपदिकसंज्ञायां द्वितीयाबहुवचने शस्-प्रत्यये अनुबन्धलोपे राम अस् इति जाते 'प्रथमयोः पूर्वसवर्णः' इति प्रकृतसूत्रेण अकारद्वयस्य स्थाने पूर्वसवर्णदीर्घैकादेशे कृते रामास् इति जाते 'तस्माच्छसो नः पुंसि' इति सूत्रेण आकाररूपपूर्वसवर्णदीर्घात्परस्य शसः सकारस्य नकारे रामान् इति रूपं सिद्धम्।

**१.२. अचि इति पदविमर्शः-** सूत्रेऽस्मिन्ननुवृत्तस्य अचि इत्यस्य प्रयोजनमवोचच्छब्देन्दुशेखरकृन्नागेशः "अचि किम्? रामः। विसर्गस्याऽसिद्धत्वादच्परत्वा-ऽभावः"[1] इति। ननु सूत्रे अचि इति पदं किमर्थमनुवृत्तमिति जिज्ञासायामुच्यते अचीत्यनुवृत्त्यभावे अकः प्रथमाद्वितीययोः पूर्वसवर्णदीर्घ एकादेशः स्यात् इति सूत्रार्थः सम्भवेत्। एवमर्थस्वीकारे राम सु इति स्थिते 'ससजुषो रुः' इति सोः रुत्वे 'खरवसानयोर्विसर्जनीयः' इति रोः विसर्गे च रामः इति भवति। तत्र अकाररूपाकः परं प्रथमाविभक्तेः सत्त्वात् सूत्रेणानेन पूर्वसवर्णदीर्घः प्रसज्येत। तद्वारणाय सूत्रे अचीति पदानुवृत्तिः। तेन चेह अकः परं प्रथमाविभक्तौ सत्यामपि अच्पदं नास्तीति अच्परत्वाभावात् पूर्वसवर्णदीर्घैकादेशो न भवति। ननु रामः इत्यत्र विसर्गस्य अच्प्रत्याहारे अन्तर्भाविण अच्परत्वाभावः कथमित्यत नागेशेनोच्यते रोः विसर्गविधायकं 'खरवसानयोर्विसर्जनीयः' (८/३/१५) इति सूत्रं त्रिपादीस्थं, पूर्वसवर्णदीर्घविधायकं 'प्रथमयोः पूर्वसवर्णः' (६/१/१०२) इति सूत्रं च सपादसप्ताध्यायीस्थं वर्तते। तेन 'पूर्वत्रासिद्धम्' इत्यनेन विसर्गस्य असिद्धत्वात् अच्परत्वं न सम्भवति। अतः अच्परत्वाभावात् पूर्वसवर्णदीर्घो न भवति।

**१.२.१. समीक्षा**

प्रकृतसूत्रस्य वृत्तौ काशिकायां वृक्षः, प्लक्षः इति प्रत्युदाहरणं प्रदत्तम्। सूत्रेऽस्मिन् अचि इत्यस्यानुवर्तनात् वृक्षः, प्लक्षः इत्यादौ चाच्परत्वाभावात् पूर्वसवर्णदीर्घो न भवति।[2] सिद्धान्तकौमुद्याः लक्ष्मीटीकातत्त्वबोधिनीटीकयोः रामः इति नागेशोक्तप्रत्युदाहरणमेव वर्तते।[3] एतेन रामः इत्यादि अचि इति पदस्य प्रत्युदाहरणम्।

**१.३. अकः इति पदविमर्शः-** योगेऽस्मिन् अनुवृत्तस्य अकः इति पदस्य सार्थक्यं प्रादर्श्यत नागेशभट्टेन शब्देन्दुशेखरे "अकः किम्? गावौ, नावौ"[4] इति। ननु सूत्रे अकः इत्यस्यानुवृत्तिः किमर्था इत्यत उच्यते अकः इति पदाननुवर्तमाने गावौ इत्यादौ पूर्वसवर्णदीर्घापत्तिः स्यात्। तन्मा भूदेतदर्थं सूत्रे अकः इत्यनुवृत्तिः। तथाहि गोशब्दात् प्रथमाद्विवचने औप्रत्यये गोशब्दस्य च 'गोतो णित्' इत्यनेन णिद्वद्भावे सर्वनामस्थानस्य 'अचो ञ्णिति' इत्यनेन वृद्धौ गौ औ इति स्थिते गोशब्दात् परं प्रथमाविभक्तिस्थम् अच् वर्तते, परन्तु तदव्यवहितपूर्वम् औकारो वर्तते। स चौकारः अक्प्रत्याहारस्थो नास्ति। तस्मात् अकः इति पदाभावे अत्रापि पूर्वसवर्णदीर्घापत्तिः स्यात्। तद्वारणाय अकः

---

[1]बृ.शे. (प्रथमभागः), पृ.सं.- ३०४।
[2]काशिका (सप्तमभागः), पुटसंख्या- १५३।
[3]वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), तत्त्वबोधिनी, पुटसंख्या- १५८।
[4]बृ.शे. (प्रथमभागः), पृ.सं.- ३०४।

इत्यस्यानुवृत्तिरावश्यकी। तेन च औकारस्य अगभावत्वात् पूर्वसवर्णदीर्घैकादेशो न भवति। अपि तु 'एचोऽयवायावः' इति आवादेशे गावौ इति भवति।

**१.३.१. समीक्षा**

काशिकायाम् अकः इत्यस्य नावौ इति प्रत्युदाहरणं वर्तते।[1] सूत्रे अकः इति पदाभावे नौ औ इति स्थिते अत्रापि पूर्वसवर्णदीर्घः प्रसज्येत। तद्वारणाय सूत्रे अकः इत्यनुवृत्तिः। तेन च औकारस्य अगभावत्वात् अत्र पूर्वसवर्णदीर्घो न भवति, अपि तु आवादेशे नावौ इति भवति। तत्त्वबोधिनीकारेण प्रकृतसूत्रे गावौ, नावौ इत्येतत् प्रत्युदाहरणद्वयं प्रोक्तम्।[2] लक्ष्मीटीकायाञ्च गावौ इति नागेशोक्तं प्रत्युदाहरणमेव वर्तते। एतेन नागेशोक्तप्रत्युदाहरणे वैमत्याभावात् गावौ इत्यादि अकः इत्यस्य प्रत्युदाहरणम्।

**१.४. प्रथमयोरिति पदविमर्शः-** सूत्रेऽस्मिन् उपात्तस्य प्रथमयोरिति पदस्य प्रयोजनमवादीच्छब्देन्दुशेखरे "प्रथमयोः किम्? पित्रे"[3] इति। ननु सूत्रे प्रथमयोरिति पदं किमर्थमित्यत उच्यते पित्रे इत्यादौ पूर्वसवर्णापत्तिः स्यात्। तन्मा भूदेतदर्थं सूत्रे प्रथमयोरिति पदम्। तथाहि प्रथमयोरित्यनेन प्रथमाद्वितीये सुब्विभक्ती विवक्षिते। तेन प्रथमाद्वितीययोः सुब्विभक्त्योः परयोरेव पूर्वसवर्णो भवति। तेन च पितृशब्दस्य चतुर्थ्येकवचने ङेप्रत्यये अनुबन्धलोपे पितृ ए इति जाते ए इत्यस्य प्रथमाद्वितीयाविभक्त्योरनन्तर्भावात् पूर्वम् अकः सत्त्वेऽपि पूर्वसवर्णदीर्घो न भवति। अपि तु 'इको यणचि' इत्यनेन ऋकारस्य यणादेशे पित्रे इति भवति। प्रथमयोरिति पदाभावे तु अत्रापि पूर्वसवर्णदीर्घः प्रसज्येत। तद्वारणाय सूत्रे प्रथमयोरिति पदम्।

**१.४.१. समीक्षा**

तत्त्वबोधिनीकारेण प्रथमयोरित्यस्य वृक्षे, प्लक्षे इति प्रत्युदाहरणं प्रोक्तम्।[4] तत्र वृक्षशब्दस्य प्लक्षशब्दस्य च सप्तम्येकवचने ङिप्रत्यये अनुबन्धलोपे वृक्ष इ इति, प्लक्ष इ इति च जाते सूत्रे प्रथमयोरिति पदाभावे अचि परे पूर्वम् अकः सत्त्वात् पूर्वसवर्णापत्तिः स्यात्। तद्वारणाय सूत्रे प्रथमयोरित्युपादानम्। तेन च इ इत्यस्य प्रथमाद्वितीययाविभक्त्योः अनन्तर्भावात् पूर्वम् अकः सत्त्वेऽपि पूर्वसवर्णदीर्घो न भवति। अपि तु 'आद्गुणः' इति गुणे वृक्षे इति, प्लक्षे इति च भवति। यद्यपि प्रथमयोः इत्यस्याभावेऽपि 'नादिचि' इति पूर्वसवर्णदीर्घनिषेधेन वृक्षे, प्लक्षे इत्युदाहरणं सिद्ध्यति, तथापि हरी इत्यत्रेव हर्योरित्यत्रापि पूर्वसवर्णदीर्घः स्यात्। तद्वारणाय प्रथमयोरिति पदमुक्तम् इति। किञ्च लक्ष्मीटीकायामपि प्रोक्तं "प्रथमयोः किम, हर्योः। वृक्षे इत्यादौ तु प्रथमयोरित्यस्याभावेऽपि न दोषः, नादिचि इति निषेधात्।"[5] इति। एतेन प्रथमाद्वितीयाविभक्त्योरेव पूर्वसवर्णदीर्घो यथा स्यात्तदर्थं प्रथमयोः इत्युपादानमिति तात्पर्यसत्त्वात् प्रत्युदाहरणभेदेऽपि नागेशोक्तप्रत्युदाहरणं साधु। तेन पित्रे इति प्रथमयोरिति पदस्य प्रत्युदाहरणम्।

**१.५. पूर्वग्रहणमिति पदविमर्शः-** सूत्रे पूर्वग्रहणस्य सार्थक्यं प्रादर्शयत नागेशेन "पूर्वग्रहणं किम्? अग्नी इत्यत्र पक्षे परसवर्णोऽपि मा भूत्"[6] इति। ननु सूत्रे पूर्वसवर्णः इति पूर्वग्रहणं किमर्थमिति जिज्ञासायामुच्यते पूर्वग्रहणाभावे सूत्रे 'एकः पूर्वपरयोः' इत्यधिकारात् पूर्वपरयोः सवर्णदीर्घ एकादेशः स्यात् इत्यर्थः सम्भवेत्। तेन पूर्वस्य परस्य वा सवर्ण इत्यत्र विनिगमकाभावात् कुत्रचित् पूर्वसवर्णः कुत्रचिच्च परसवर्णोऽपि स्यात्। तेन अग्नी इत्यत्र अग्नि औ इति स्थिते पक्षे परसवर्णस्यापि प्राप्तिः स्यात्। तच्चानिष्टमिति। तद्वारणाय सूत्रे पूर्वग्रहणम्। कृते च पूर्वग्रहणे पूर्वपरयोः पूर्वस्यैव भवितव्यमिति नियमो लभ्यते। तेन च पूर्वसवर्णेन अग्नी इत्यत्र न दोषः।

**१.५.१. समीक्षा**

काशिकाकृद्भ्यामिह अग्नी इत्यत्र पक्षे परसवर्णो मा भूत् इत्येव पूर्वग्रहणप्रयोजनं प्रदर्शितम्। तच्च न्यासकृता स्पष्टीकृतम्। तथाहि पूर्वग्रहणे असति अग्नी इत्यत्र पूर्वपरसमुदायः स्थानी, तस्य च अन्तरतमो दीर्घ आदेशो नास्तीति। तस्मात् अवयवान्तरतमो यस्तेन भवितव्यम्। तत्र च पूर्वः परश्चेति द्वौ अवयवौ। सूत्रे पूर्वग्रहणाभावात् तत्र पूर्वस्यैव भवितव्यम् इति नियमो न लभ्यते, नियमकरणाभावात्।

[1]काशिका (सप्तमभागः), पुटसंख्या- १५३।

[2]वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), तत्त्वबोधिनी, पुटसंख्या- १५८।

[3]बृ.शे. (प्रथमभागः), पृ.सं.- ३०४।

[4]वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), तत्त्वबोधिनी, पुटसंख्या- १५८।

[5]वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), लक्ष्मी, पुटसंख्या- २२५।

[6]बृ.शे. (प्रथमभागः), पृ.सं.- ३०४।

अतः तयोः पर्यायेण आदेशो भवन् पक्षे परसवर्णो वा स्यात्। तस्मात् तन्निवृत्त्यर्थं सूत्रे पूर्वग्रहणम्।[1]

तत्त्वबोधिनीकृतापि काशिकोक्तप्रयोजनमेव प्रोक्तम्। तेन नागेशोक्तप्रयोजने न कस्यापि वैमत्यमिति हेतोः अग्नी इत्यत्र पक्षे परसवर्णो मा भूत् इति पूर्वग्रहणस्य प्रयोजनम्।

**१.६. दीर्घग्रहणमिति पदविमर्शः-** सूत्रे दीर्घ इत्यनुवृत्तेः फलमदर्श्यत नागेशेन "दीर्घग्रहणं तु त्रिमात्रस्य स्थानिनस्त्रिमात्रो मा भूदिति"[2] इति। ननु सूत्रे 'अकः सवर्णे दीर्घः' इत्यतो दीर्घ इत्यस्यानुवृत्तेः किं प्रयोजनमित्यत आह दीर्घग्रहणाभावे स्थानिनः त्रिमात्रस्य आन्तरतम्यात् त्रिमात्र आदेशो मा भूत् इत्येतदर्थं सूत्रे दीर्घग्रहणानुवृत्तिः। तथाहि अग्नी इत्यत्र अग्नि औ इति स्थिते दीर्घग्रहणानुवृत्त्यभावे स्थानिनः त्रिमात्रकत्वात् एकादेशः क्रियमाणः आन्तरतम्यात् त्रिमात्र आदेशः प्राप्नोति। तथा च अग्निशब्दस्य इकार एकमात्रः, औकारो द्विमात्र इत्येतत्समुदायात्मकः अत्र स्थानी। तस्मात् त्रिमात्रे स्थानिनि आन्तरतम्यात् त्रिमात्र आदेशो मा भूत् इत्येतदर्थं दीर्घ इत्यस्यानुवृत्तिरावश्यकी। दीर्घग्रहणे तु सति तेन आदेशे विशिष्यमाणे त्रिमात्रस्य स्थानिन आदेशप्रसङ्गो न भवति। यतोहि द्विमात्रस्यैव दीर्घसंज्ञा विधीयते।

**१.६.१. समीक्षा**

अस्य सूत्रस्य काशिकावृत्तौ त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थं दीर्घग्रहणमिति दीर्घग्रहणप्रयोजनं कथितम्। तच्च तस्मिन्नेव सूत्रे न्यासे स्फुटीकृतम्।[3] तथाहि अग्नि औ इति स्थिते सूत्रे दीर्घग्रहणाननुवृत्तौ स्थानिनस्त्रिमात्रकत्वात् एकादेशः क्रियमाणः स्थानिन आन्तरतम्यात् त्रिमात्रः प्राप्नोति। अत्र अग्निशब्दस्येकार एकमात्रः, औकारो द्विमात्र इत्येतत्समुदायात्मकश्च स्थानी। तस्मात् त्रिमात्रे स्थानिनि अन्तरतमः त्रिमात्र आदेशो मा भूत्तदर्थं दीर्घग्रहणम्। दीर्घग्रहणे तु सति तेनादेशे विशिष्यमाणे द्विमात्रस्यैव दीर्घसंज्ञाविधानात् त्रिमात्रस्यादेशप्रसङ्गो नास्तीति।

तत्त्वबोधिनीकारेणाप्यत्र त्रिमात्रे स्थानिनि त्रिमात्र आदेशो मा भूत्तदर्थं दीर्घग्रहणमिति दीर्घग्रहणप्रयोजनं प्रकृतसूत्रव्याख्याने प्रोक्तम्।[4] किञ्चास्य सूत्रस्य व्याख्याने लक्ष्मीटीकाकृतापि नागेशोक्तप्रयोजनमेव प्रोक्तं दीर्घग्रहणाननुवृत्तौ पूर्वसवर्णविधाने अग्नी, वायू इत्यादौ स्थानिनः त्रिमात्रकतया त्रिमात्रकप्लुतादेशापत्तिः स्यात्तन्निवृत्त्यर्थं दीर्घग्रहणमिति। एतेन शेखरोक्तप्रयोजनं साधु। तेन त्रिमात्रस्य स्थानिनस्त्रिमात्रो मा भूत् इति दीर्घग्रहणस्य प्रयोजनम्।

**१.७. सवर्णग्रहणमिति पदविमर्शः-** योगेऽस्मिन् सवर्णग्रहणस्य प्रयोजनमकथयत् शब्देन्दुशेखरे "ननु सवर्णग्रहणं किमर्थम्, पूर्व इत्येतावतैव दीर्घपदाऽनुवृत्त्या पूर्वस्य दीर्घत्वाऽसम्भवेन पूर्वजातीय इत्यर्थेन, पूर्वान्तरतम इत्यर्थेन वा सिद्धेरिति चेन्न। स्पष्टार्थत्वात्। स्पष्टं चेदं भाष्ये"[5] इति। नागेशेन सवर्णग्रहणस्य स्पष्टार्थत्वं प्रत्यपादि। तथाहि ननु सूत्रे सवर्णग्रहणं किमर्थम्, यतोहि 'अकः सवर्णे दीर्घः' इत्यस्मात् दीर्घ इत्यस्य अनुवृत्तौ पूर्वो दीर्घ इत्येव भवतु। पूर्वो दीर्घः इत्येवमुच्यमाने रामान् इत्यादौ राम अस् इत्यवस्थायां पूर्वस्य दीर्घस्य असम्भवात् पूर्वपदेन लक्षणया पूर्वजातीय इत्यर्थो लभ्यते। तेन पूर्वजातीय इत्यर्थेन, अथवा पूर्वान्तरतम इत्यर्थेन इष्टसिद्धिर्भविष्यति इत्यत आह सवर्णग्रहणं स्पष्टार्थमिति।

स्पष्टं चैतत् प्रकृतसूत्रभाष्ये। तत्रायमाशयः 'प्रथमयोः पूर्वसवर्णोऽमि च' इत्येवोच्यताम्, किमर्थं 'प्रथमयोः पूर्वसवर्णः' इति, 'अमि पूर्वः' इति च पृथक् उच्येते। यदि प्रथमयोः पूर्वसवर्णदीर्घो भवति, अमि चेत्युच्यते, ततश्चाम्यपि अर्थात् वृक्षम्, प्लक्षम् इत्यादौ दीर्घः प्रसज्येत इति चेत्, नैष दोषः। 'अमि च' इत्यत्र दीर्घग्रहणं निवर्तयिष्यते। ननु एवमपि पूर्वसवर्णानुवृत्तेः कुमारीम् इत्यादौ पूर्वसवर्णः त्रिमात्रः प्रसज्येत इति चेत्, सवर्णग्रहणं न करिष्यते। यदि सवर्णग्रहणं न क्रियते, तर्हि पूर्वस्मिन् योगे विप्रतिषिद्धं स्यात्। तथाहि

---

[1]काशिका (सप्तमभागः), न्यासः, पुटसंख्या- १५३।

[2]बृ.शे. (प्रथमभागः), पृ.सं.- ३०४।

[3]दीर्घग्रहणं त्रिमात्रे स्थानिनि इत्यादि। अग्नि+औ इति स्थिते, असति दीर्घग्रहण एकादेशः क्रियमाणः स्थानिन आन्तरतम्यात् त्रिमात्रः प्राप्नोति; स्थानिनस्त्रिमात्रकत्वात्। तथा हि अग्निशब्दस्येकार एकमात्रः, औकारो द्विमात्र इत्येतत्समुदायात्मकश्चात्र स्थानी। तस्मात् त्रिमात्रे स्थानिन्यन्तरतमस्त्रिमात्र आदेशो मा भूदित्येवमर्थं दीर्घग्रहणम्। दीर्घग्रहणे हि सति तेनादेशे विशिष्यमाणे त्रिमात्रस्यादेशप्रसङ्गो न भवति; द्विमात्रस्यैव दीर्घसंज्ञाविधानात्।। (काशिका (सप्तमभागः), न्यासः, पुटसंख्या- १५३)

[4]वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), तत्त्वबोधिनी, पुटसंख्या- १५९।

[5]बृ.शे. (प्रथमभागः), पृ.सं.- ३०४।

सवर्णग्रहणं त्यक्त्वा प्रथमयोः पूर्वो दीर्घः इत्येव सूत्रं भवेत्। तथा सति विप्रतिषेधः स्यात्– यदि पूर्वः, न दीर्घः। अथ दीर्घः, न पूर्वः। पूर्वो दीर्घश्चेति विप्रतिषिद्धम्। एवञ्च यदि पूर्वा व्यक्तिः आश्रीयते तदा अग्नी इत्यादौ पूर्वव्यक्तिः न दीर्घा इति विप्रतिषिद्धं स्यात्। अथ पूर्वाकृतिः आश्रीयते तदा प्रथमयोः पूर्वः इत्यस्मात् आकृत्यर्थकपूर्वशब्दस्यैव उत्तरत्रानुवृत्त्या कुमारीमित्यादौ त्रिमात्रप्रसङ्गरूपदोषः स्यात्। तस्माद् उभयमारब्धव्यम्, पृथक् च वक्तव्यम्। अथ उभयस्मिन् पृथक् कर्तव्ये 'प्रथमयोः पूर्वसवर्णः' इत्यत्र सवर्णग्रहणं किमर्थं कृतम्? यावता दीर्घपदाऽनुवृत्त्या पूर्वोक्तविप्रतिषेधपरिहाराय पूर्वाकृतिः आश्रयिष्यते। सवर्णग्रहणस्यापि फलतः तदेव प्रयोजनम् इति तद् व्यर्थम्। इति चेन्नैतदस्ति। पूर्वा व्यक्तिः इति व्यक्तिपक्षस्यापि सम्भवात् अग्नी इत्यादौ विरोधाशङ्का स्यात्। अर्थात् पूर्वशब्दस्य व्यक्तिपरत्वस्यापि सम्भवेन उक्तविरोधशङ्कानिरासाय स्पष्टप्रतिपत्तये च सवर्णग्रहणम् इति।[1]

**१.७.१. समीक्षा**

प्रकृतसूत्रव्याख्यानावसरे काशिकायाः न्यासटीकाकृता पूर्वं विप्रतिषेधनिरासार्थं सवर्णग्रहणं कर्तव्यमिति प्रदर्श्य अन्तिमे च सवर्णग्रहणस्य स्पष्टार्थत्वमेव प्रत्यपादि।[2] तथाहि सवर्णग्रहणे असति दीर्घ इत्यनुवर्तमाने अग्नी इत्यत्र विप्रतिषिद्धत्वं स्यात् यदि पूर्वो न दीर्घः, अथ दीर्घो न पूर्वः इति। तेन विप्रतिषेधनिरासार्थं सवर्णग्रहणमिति। यदि च पूर्वशब्देन पूर्वाकृतिः उच्येत, दीर्घादनुवृत्तेः पूर्वस्येति षष्ठी वा क्रियेत। तदा तु सवर्णग्रहणम् अकर्तुं शक्यम्। क्रियमाणं वा तत् सुखप्रतिपत्त्यर्थं वेदितव्यम् इति। एतेन सवर्णग्रहणं स्पष्टार्थमिति नागेशकथनं साधु।

**अनुशीलितग्रन्थसूची**


1) नागेशभट्टः। लघुशब्देन्दुशेखरः (पञ्चसन्ध्यन्तो भागः)। ब्रह्मदत्तद्विवेदी (व्याख्याकारः), वाराणसी, चौखम्बा संस्कृत सीरीज आफिस, १९८८।
2) नागेशभट्टः। लघुशब्देन्दुशेखरः (अव्ययीभावान्तो भागः) (षट्टीकोपेतः)। प्रो. शास्त्री नन्दकिशोरः (सम्पा.), काशी : भार्गवपुस्तकालयः, १९९२।
3) नागेशभट्टः। लघुशब्देन्दुशेखरः (भावबोधिनीबालबोधिनीव्याख्योपेतः)। आचार्यः श्रीपादसत्यनारायणमूर्तिः (व्याख्याता सम्पादकश्च), तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्, २००१।
4) नागेशभट्टः। बृहच्छब्देन्दुशेखरः (प्रथमो भागः)। सीतारामशास्त्री (सम्पा.), वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९६।
5) भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (पण्डितश्रीसभापतिशर्मोपाध्यायविरचित-लक्ष्मीव्याख्ययोपेता) (प्रथमोऽशः)। श्रीबालकृष्णशर्मपञ्चोली (सम्पा.), दिल्ली, मोतिलाल वनारसीदास, १९६६।
6) भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता) (प्रथमो भागः)। गिरिधरशर्मा, परमेश्वरानन्दशर्मा (सम्पा.), दिल्ली, मोतीलाल वनारसीदास, २०१०।
7) पतञ्जलिः। महाभाष्यम् (प्रदीपोद्योतोद्भासितेन समुल्लसितम्) (पञ्चमं खण्डम्)। श्रीभार्गवशास्त्री (सम्पा.), दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान, १९८८।
8) वामनजयादित्यौ। काशिका (न्यासपदमञ्जरीभावबोधिनीव्याख्यासहिता) (सप्तमो भागः)। जयशङ्करलालत्रिपाठी, सुधाकरमालवीयः (सम्पा.), वाराणसी, तारा बुक एजेन्सी, १९९०।


[1]व्याकरणमहाभाष्यम् (पञ्चमखण्डम्), पुटसंख्या- १११।
[2]काशिका (सप्तमभागः), न्यासः, पुटसंख्या- १५३।

# भारतीयज्ञानपरम्परायां महाकविकालिदासस्य साहित्यिकमवदानम्

**डॉ.नीरजतिवारी**
असिस्टेन्ट प्रोफेसर, संस्कृतसाहित्यविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः,
चलभाषः- 9450530774

**शोधसारः -** भारतीयज्ञानपरम्परायां संस्कृतसाहित्ये महाकविकालिदासः महान्तः कवयः सन्ति ऐषां अनुशीलनमत्यन्तावश्यकः। अनेनावगाहनेन देशकालविषयस्य एवं कविकृतीनामपि ज्ञानं भवतीति। महाकविना त्रीणि महाकाव्यानि प्रणीतानि अस्तिशब्दमधिकृत्य कुमारसम्भवमहाकाव्यं, वाक्-शब्दमधिकृत्य रघुवंशमहाकाव्यम्, कश्चिच्छब्दमवलम्ब्य मेघदूतखण्डकाव्यमिति। एतदतिरिक्तमस्य महाकवेः ऋतुसंहारमप्यस्ति खण्डकाव्यम्। दृश्यकाव्ये मालविकाग्निमित्रनाटकम्, विक्रमोर्वशीयनाटकम्, अभिज्ञानशाकुन्तलन्नामनाटकमीति विश्वविश्रुतानि, अत एव विविधभाषाऽनूदितानि दृश्यन्ते।रससिद्धस्य अस्य कवीश्वरस्य महिमा तदीयकाव्यैः एव ज्ञायते। तस्य काव्यस्य परिशीलनेन वेदशास्त्रपुराणेषु तस्य अगाधं पाण्डित्यम् आसीत् इति ज्ञायते।कल्पनाचातुर्य, पदानां माधुर्य, पात्रसंविधाननैपुण्यं, रसोल्लासः, ललितानि मनोहराणि वचनानि इत्यादिभिः सुगुणैः अस्य कवेः काव्यानि सर्वजनादरणीयानि। कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः कविरिति सुधीभिः पुरस्कृतः। अस्य रचनाः चतुर्वर्गपुरुषार्थानां प्रदानसाधनस्वरूपाः इत्यपि स्वीकृतं सरसान्तः करणैः सहृदयैः। अयं महाकविः वैदर्भीरीतेः सम्राट्, प्रसादगुणपरिपूर्णः, उपमाप्रयोगगुरुः, प्रकृतिचित्रणचित्रकारः, व्यञ्जनाप्रयोगशाली, अभिनवकल्पनाकुशलः, अन्यतमः काव्यशिल्पी विराजते। कविनां रविः इव विराजते महाकविः कालिदासः। कालिदासस्य साहित्यं न केवलं विदुषां बालकानाम् अपि रुचिकरणं प्रतिभाति। यतो हि काव्यं तु पठ्यते पाठकाः परन्तु काव्यकर्तृणां विषये तेषां ज्ञानं नैव भवति। प्राचीनाः कवयः अपि तेषां परिचयम् स्वग्रन्थे नैव लिखन्ति । अल्पायासेन तेषां परिचयः न भवति। अतः भारतीयज्ञानपरम्परायां महाकविकालिदासस्य साहित्यिकमवदानं गवेषणमिदं सर्वेषां कृते सुबोधकरः सुरुचिकरश्च भविष्यतीति।

**प्रस्तावना -** भारतीयज्ञानपरम्परायां भारतदेशस्यालङ्कारभूतोऽयं महाकविः कुत्र जन्म लेभे, कदाऽऽसीत् , के च तस्य पितरौ आस्ताम्? इति प्रश्नानां नावाप्यते निश्चितं प्रमाणम्। यत्किञ्चिद् वक्तुं शक्यते तदप्यनुमानप्रमाणाधीनमेव।विदुषां मतेन महाकविकालिदासः विक्रमादित्यस्य नवरत्नानां मध्ये एकं महारत्नमासीत्। जनश्रुत्या महाकविः जीवनारम्भे मेषचारकः, स्वाश्रयलग्नतरुस्कन्धखण्डनप्रवृत्तो महामूर्खश्चासीत्। सदानन्दराजकन्याविद्योत्तमया सह पराजिताः पण्डितजनाः कपटरीत्या तया साकं तस्य परिणयसम्बन्धं स्थापितवन्तः। लोके कालिदासविषये विविधाः किंवदन्तयोऽपि प्राप्यन्ते। अयं खलु महामूर्खः युवावस्थायाम्।[1] परन्तु पण्डितैः शास्त्रार्थपराजितैः सासूयमेतस्य पाणिग्रहणं परमविदुष्या विद्योत्तमा साकं मिषेण सम्पादितम्। ज्ञाते कालिदासमौर्ख्ये विद्योत्तमा तिरस्कृतोऽसौ भुवं बभ्राम। कुत्रचित् कालिमन्दिरे महासरस्वत्याः, कृपाकटाक्षेणानुगृहीतोऽसौ गृहं प्रत्यावर्तत। द्वारि स्थित्वाऽसौ अवदत्- "**अनावृत्तं कपाटं द्वारं देहि**।"विद्योत्तमाऽपृच्छत्- "**अस्ति कश्चिद्वाग्विशेषः?**" विद्योत्तमावाक्यमवलम्ब्य महाकविना त्रीणि महाकाव्यानि प्रणीतानि, यथा -अस्तिशब्दमधिकृत्य कुमारसम्भवमहाकाव्यं, वाक्-शब्दमधिकृत्य रघुवंशमहाकाव्यं कश्चिच्छब्दमवलम्ब्य मेघदूतखण्डकाव्यमिति। एतदतिरिक्तमस्य महाकवेः ऋतुसंहारमप्यस्ति काव्यम्। दृश्यकाव्ये मालविकाग्निमित्रं नाटकं, विक्रमोर्वशीयं नाटकं, अभिज्ञानशाकुन्तलन्नाम नाटकं चैतानि विश्वप्रसिद्धान्येव। महाकवेरेतानि काव्यानि विश्वविश्रुतानि, अत एव विविधभाषाऽनूदितानि दृश्यन्ते। नाटकविषये तु अद्वितीयोऽयमजायत विश्ववाङ्मये। यद्यपि पाश्चात्याः कथयन्ति-Kalidas was great as a Sheksapear. परन्तु पाश्चात्यविदुषां मतमिदं समीचीनं न प्रतीयते। महासमीक्षकेन गेटेमहोदयेन पाश्चात्यविदुषां

[1] उष्ट्रे लुम्पति र वा षं वा तस्मै दत्ता निबिडनितम्बा।
किं न करोति स एव हि रुष्टः किं न करोति स एव हि तुष्टः।। कालिदास पृष्ठ-19 , प्रो.अमरनाथपाण्डेयः

कालिदासस्य अभिज्ञानशाकुन्तलं प्रशंसितम्। यस्याः संस्कृतच्छायाऽत्र प्रस्तूयते-

**वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद्यच्चान्यन्मनसो रसायनमतःसन्तर्पणं मोहनम्।**

**एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोरैश्वर्यं यदि वाञ्छसि प्रियसखे ! शाकुन्तलं सेव्यताम्।।**

केचित् कथयन्ति एकया गणिकया विषपानेन हतोऽयं महाकविः। परन्तु इयं हि लोकोक्तिः परमशैवस्य कालिदासस्य विषये हास्यास्पदमेव। इदं जीवनवृत्तमपि वयं स्वात्मसन्तोषार्थमेव स्वीकुर्मः।

**कूटशब्दाः** – अनावृत्तं, कपाटं, अस्ति, कश्चिद्, वाग्विशेषः, कविः, कालिदासः, विद्योत्तमा, काशी, विदर्भः, विक्रमादित्यः, शैवसम्प्रदायः, कार्तिकः, मल्लिनाथे, दिलीपः, अग्निवर्णः, अलकापुरी, प्रावृड्, सुललिता, दुष्यन्तः, शकुन्तला, गान्धर्वविवाहः, औशनरी, मालविका, अग्निमित्रः, सूक्तिवाक्यम्, नैसर्गिकम्।

**शोधपत्रस्योद्देश्यम् -** अनेन शोधपत्रेण गवेषकपाठकाः भारतीयज्ञानपरम्परासंवाहकानां कवीनां देशकालादिविषयान्-कवीनां साहित्यिकमवदानम्-काव्यशैलीं-कवीनां महत्त्वञ्च ज्ञास्यन्ति।

**विषयप्रवेशः -**

**कालिदासस्य जन्मभूमिः-** महाकवेः महद्गौरवस्य विषयोऽयं यत् सर्वे भारतीयाः स्व-स्व प्रान्तेषु अस्य जन्मभूमिः स्वीकुर्वन्ति। विविधमतानां मध्ये केचन हिमालयवर्णनप्रसङ्गात् काश्मीरेषु जन्मस्थलं स्वीकुर्वन्ति, किन्तु उज्जयिनीवर्णनदृष्ट्या उज्जयिनीप्रान्तभूमिरेवाधिकप्रामाणिका बुधजनैः समर्थिता जातेति।

**काशीवास्तव्यः** – केचित् समालोचकाः भणन्ति यत् कविकुलगुरुकालिदासः काशीवास्तव्यः आसीत्। एका जनश्रुति : भारते श्रूयते यत् कवेरस्य पत्नी विद्योत्तमा आसीत्। सा काशीनरेशस्य पुत्री आसीत्। सा महाविदुषी आसीत्। दुर्भाग्यवशात् कालिदासस्य विवाहस्तया सह अभवत्। पत्न्याः अपमानेन कविरयं महान् विद्वान् अभूत्। एतत्कथानुसारं केचित् विद्वांसः कथयन्ति यत् कालिदासः काशीनिवासी आसीत्। बाल्टररुबनमहाभागेन कालिदासस्य जन्मस्थानं काशी एव प्रमाणितम्।[1]

**बंगालवास्तव्यः** – केचित् सुरभारत्या: समालोचकाः कालिदासस्य जन्मस्थानं बंगालं कथयन्ति। बंगाले भगवती काली एव प्रमुखदेवी अस्ति। तत्र भगवत्याः काल्याः एव पूजनं विशेषरूपेण भवति। कोलकत्तानगरस्य कालीमन्दिरं तस्य प्रमाणमस्ति। एतत्सम्बन्धे प्रमाणरूपेण विद्विद्भिः मेघदूतस्य द्वितीयश्लोकः प्रस्तूयते। यथा –

**तस्मिन्नदो कतिचिदबलाविप्रयुक्तः स कामी, नीत्वा मासान्कनकवलस्यभ्रंशरिक्तं प्रकोष्ठः।**

**आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं, वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।।**[2]

अत्र आषाढस्य प्रथमदिवसे एव कालिदासेन लिखितम्। तिथिनिर्देशस्य स्थाने दिनसंख्यायाः निर्देशः बंगालपद्धतौ एव भवति। अत एव कविरयं बंगालवास्तव्यः इति स्वीकुर्वन्ति बङ्गीयाः।

**विदर्भवास्तव्यः** – डॉ.पीटर्सनमहाभागस्य मते कालिदासस्य जन्मस्थानं विदर्भदेशः आसीत्। यतः कालिदासन स्वकीयकाव्येषु विशेषेण वैदर्भीरीतिरेव अङ्गीकृता।

**विदिशावास्तव्यः** – हरप्रसादशास्त्रिमहाभागानुसारं कवेरस्य जन्मस्थानं विदिशा (आधुनिक मेलसा) आसीत्। अनेन कविना विदिशानगर्या वर्णनं विशेषरूपेण मेघदूते कृतम्। यथा –

**तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।**

**तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात् सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ।।**[3]

कविना कालिदासेन मेघदूते विदिशादेशस्य पार्श्वे अवस्थितानां नदीनाम् (पर्वतानाम्) अतिसूक्ष्मविवेचनं विहितम्। अवलोक्यतां तावत् - यथा –

---

[1] कालिदास दर्शन – डॉ. एस.पी.भारद्वाज,पृ.-71

[2] मेघदूतम्- श्लो.- 2

[3] मेघदूतम्- श्लो.- 24

**नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः।**
**यः पुण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥**[1]

संस्कृतसाहित्यस्य प्रसिद्धसमालोचकपरांजेपेनाऽपि कालिदासस्य जन्म स्थानं विदिशा एव प्रमाणितम्।

**अयोध्यावास्तव्यः** – केचिद् वदन्ति यत् कविकुलगुरुकालिदासस्य जन्म स्थानम् अयोध्या आसीत्। रघुवंशमहाकाव्ये अयोध्यां नगरीं प्रति कवेरस्य विशेष: अनुरागो दृश्यते। यथा -

**तमब्रवीत्सा गुरुणानवद्या या नीतपौरा स्वपदोन्मुखेन।**
**तस्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां माम् ॥**[2]
**वस्वौकसारामभिभूय साहं सौराज्य बद्धोत्सवया विभूत्या।**
**समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामवस्थाम् ॥**[3]
**विशीर्णतल्पो ग्रहसंनिवेशः पर्यस्तशालः प्रभुणा विना मे।**
**विडम्बयत्यस्तनिमग्नसूर्यं दिनान्तमुग्रानिलभिन्नमेघम् ॥**[4]
**निशासु भास्वत्कलनूपुराणां यः संचरोऽभूदभिसारिकाणाम्।**
**नदन्मुखोल्कावचितामिषाभिः स वाह्यते राजपथः शिवाभिः ॥**[5]

**मिथिलावास्तव्यः** – केचित् समालोचकाः कथयन्ति कालिदासस्य जन्मस्थानं बिहारप्रान्ते मिथिला आसीत्। वाराणसेयविश्वविद्यालयस्य उपकुलपति स्व. डा. आदित्यनाथझामहाभागेन प्रतिपादितं यत् दरभंगामण्डलान्तर्गतबेनीपट्टीस्थानस्य पार्श्वे उच्चैः (उच्चपीठ) ग्रामे एकं भगवत्याः मन्दिरमस्ति। तत्र एका संस्कृत पाठशाला अति प्राचीना अस्ति। तत्र प्राचीनाभिलेखेषु कालिदासस्य चौपडी इति अंकिताऽस्ति। प्राचीनपत्रेषु कालिदासस्य उल्लेखः दृश्यते। अभिज्ञानशाकुन्तले पतिगृहगमनादिकालिकं यद् वर्णनम् लोचनपथमायाति तत् वर्णनं मिथिलाप्रदेशस्य सामाजिकीं स्थितिम् अनुसरति। भगिन्याः पतिगृहगमनकाले मिथिलायां सम्प्रति अपि तस्याः भ्राता तया सह तस्याः पतिगृहं गच्छति। शकुन्तलया सह भ्रातृरूपेण शार्ङ्गवो गच्छति। उपर्युक्तविवेचनेन डा. झामहाभागेन कालिदासस्य जन्मस्थानं बिहारप्रदेशस्य मिथिलाक्षेत्रम् प्रतिपादितम्।

**काश्मीरवास्तव्यः** –दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षचरेण महामहोपाध्याय स्वर्गीय लक्ष्मीधरकल्लामहाभागेन प्रतिपादितं यत् महाकविकालिदासस्य जन्मस्थानं काश्मीरः आसीत्। कुमारसम्भवे कालिदासेन हिमालयस्य विशेषरूपेण वर्णनं विहितम्। यथा -

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः ॥**[6]
**यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरिदोहदक्षे।**
**भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥**
**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।**
**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥**[7]

**उज्जयिनीवास्तव्यः** –अधिकांश-समालोचकानामनुसारं कालिदासस्य जन्मस्थानं उज्जयिनी अस्ति। महामहोपाध्यायमिराजी, प्रो.

---

1. मेघदूतम्- श्लो.- 25
2. रघुवंशमहाकाव्यम् - 16.9
3. रघुवंशमहाकाव्यम् - 16.10
4. रघुवंशमहाकाव्यम् - 16.11
5. रघुवंशमहाकाव्यम् - 16.12
6. मेघदूतम्- श्लो.- 2
7. कालिदास ग्रन्थावली, आर.सी.रा.चतुर्वेदी- कुमारसम्भवे, प्र.सर्गः

झाला, योगिराजारविन्दादिभिः स्वीकृतं यत् कालिदासस्य जन्मस्थानम् उज्जयिनी एव अस्ति। उज्जयिनीनगरी प्रति कवेरस्य विशेषोऽनुरागः मेघदूते दृश्यते। यथा -

**प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्, पूर्वोद्दिष्टामनुसरं पुरीं श्रीविशालां विशालाम्।**
**स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥**[1]

उपरिलिखितविवेचनानुसारं कथितुं शक्यते यत् कवेः कालिदासस्य जन्मस्थानम् उज्जयिनी नगरी एव आसीत्।

**स्थितिकालः -** कविकालिदासेनापि स्वकीयविषये न कुत्रापि किमपि वर्णनं स्वकीयकाव्येषु उपस्थापितम्। अत एव तस्य कालनिर्णयस्य कार्यं सरलं न अनुभूयते। अन्तर्बाह्यप्रमाणाभ्यां सुरभारत्याः समालोचकैः अधोलिखितप्रकारेण कालिदासस्य कालनिर्णयः विहितः। महाकवेः कालनिर्धारणेऽपि प्रचलितानि विविधमतानि अनुमानप्रमाणाधीनान्येव। प्राच्य-पाश्चात्ययोः सारभूतं त्रिविधकल्पमात्रमत्र प्रदर्शितमस्ति।

1. ख्रीष्टाब्दपूर्वप्रथमशतकं विक्रमादित्यकालिकं च मतम्।
2. स्वर्णयुगस्य स्कन्दगुप्तकालिकं मतम्।
3. षष्ठख्रीष्टाब्दकालिकं मतम्। एतेषु प्रथमकल्पमेवाधिकं प्रामाणिकं मन्यते। अत एव विक्रमादित्यस्य सभायां नवरत्न-सदस्येषु महाकविकालिदासोऽप्यासीदिति निर्णीतम्।

इत्थमेव अन्येऽपि विविधपाश्चात्यसमीक्षकाः एतस्य कालविषये तर्कयन्तः स्व-स्वपक्षं समर्थयन्ति। यथा -

1. सरविलियमजोन्समहोदयः विक्रमसंवत् प्रवर्त्तकस्य ईस्वीयसम्वत्पूर्ववर्तिनः कस्यापिविक्रमादित्यस्य राज्ञः कल्पनां कृत्वा तत्सभामण्डले कालिदासं मत्वा ई.पू. प्रथमशताब्दीसमुद्भवत्वं कालिदासस्य मन्यते।
2. डॉ. वेबरलौसनयाकोबिगाँनियरविलियममहानुभावानां सम्मतिषु ई. द्वितीयशतकयोर्मध्यकालिकत्वं कालिदासस्य स्वीक्रियते।
3. डा. भाऊदाजीमहाशयस्तु-उज्जयिनीनरेशः हर्षविक्रमादित्योऽयं मातृगुप्तनामानं काश्मीरान् शासितुं प्रेषितवान् स मातृगुप्तः कालिदासः एवेति मत्वा कालिदासस्य षष्ठशतकोद्भवत्वं स्वीकरोति।
4. वत्सभट्टिमहोदयस्यैकः शिलालेखः प्राप्यते, यत्र 529 मालवसंवदुल्लेखो विद्यते। स च ई. 473 तः संवदति। तस्य शिलालेखस्य भाषा कालिदासीयां भाषामनुसरति एतदेवाधारीकृत्य मैकडोलनमहोदयः कालिदासस्य पञ्चमशतकोद्भवत्वमङ्गीकरोति।
5. डॉ. हार्नले-प्रभृतयस्तु विद्वांसः कालिदासस्य काव्येषु गोप्ता-गोप्ते-गुप्त-स्कन्ध-प्रभृतिशब्दैः गुप्तवंशीयः नृपाणां स्मरणं मन्यमानाः कालिदासस्य समयं पञ्चमं षष्ठं ईशवीयशतकमाहुः।
6. ए.सी.चटर्जीमहोदयस्तु कालिदासं मालवनरेशय शोधर्मसमकालिकं मत्वा षष्ठशतकवर्तिनमाहुः।
7. रामचन्द्रविनायकपटवर्धनस्तु आषाढ़स्य प्रथमदिवसे, प्रत्यासन्नेनभसि इत्यादि पद्याधारेण ज्योतिषानुसारिणीं गणनां कृत्वा 1800 वर्षपूर्ववर्तिनं कालिदासमातिष्ठते।
8. आर. कृष्णमाचारियमहाशयो मेघसन्देश-विमर्शनामकग्रन्थे लिखति यत् 'दिङ्नागानां पथि परिहरन्' इति श्लोकस्य साक्ष्येण दिङ्नागसमकालिकः कालिदासः ई. षष्ठशतकेऽवर्त्ततेति।
9. म.म. रामावतारशर्मा महोदयः कालिदासं द्वितीयचन्द्रगुप्तसमकालिकं मत्वा 379 तः 450 ई. मध्यवर्तिनं सप्रमाणं साधयति।
10. हिप्पोलाइतफाशमहाभागस्यानुसारेण कालिदासस्य कालः ख्रीष्टादितः प्राक् अष्टमशताब्दी एव अस्ति। तेन वर्णितं यत् कालिदासेन रघुवंशे अग्निवर्णस्य उल्लेखः कृतः। रघुवंशे रघुकुलानां राज्ञां वर्णनक्रमे तेन अग्निवर्णस्य उल्लेखः विहितः। एम् हिप्पोलाइतमहाभागस्यानुसारेण कविकुलगुरुकालिदासः अग्निवर्णस्य समये जातः। अतएव कवेरस्य कालः ख्रीष्टाब्दात् प्राक्

---

[1] . मेघदूतम्- श्लो.30

अष्टमशताब्दी एवाऽस्ति। अस्य मतस्य खण्डनमपि भवितुं शक्यते यत् यदि कविकुलगुरुकालिदासः अग्निवर्णस्य पुत्रस्य समकालिकः आसीत् तदा तेन कविना अग्निवर्णस्य पुत्रस्य उल्लेखः कथं न रघुवंशे विहितः। वाल्टेयरविश्वविद्यालयस्य संस्कृतविभागाध्यक्ष स. डा.सी.कुन्हनराजा-महोदयस्य अनुसारेण कालिदासस्य कालः ख्रीष्टाष्दात् प्राक् द्वितीयशताब्दी भवितुं शक्यते। स्व. डा.सी.कुन्हन्महाभागस्यानुसारेण कविकुलगुरुकालिदासः विदिशायाः राज्ञो-अग्निमित्रस्य समकालिकः आसीत्। अग्निमित्रस्य समय: ख्रष्टाब्दात् 185 कथ्यते। अयमेव काल: कविकुलगुरुकालिदासस्यापि अस्ति। परम्परायाः दृष्टिकोणे कालिदासः विक्रमादित्यस्य समकालिकः आसीत्। यथा उक्तमपि -

**धन्वन्तरिक्षणकामरसिंहशंकु बेतालभट्टघटकर्पराकालिदासाः।**
**ख्यातो वराहभिहिरो नृपतेः सभायां, रत्नानि वै वररुचिर्नव विक्रमस्य।**[1]

भारतीयज्ञानपरम्परानुसारेण कालिदासः विक्रमादित्यस्य सभायाम् आसीत्। सम्राट विक्रमादित्य एव विक्रमसंवत् इत्यस्य प्रवर्तकः आसीत् विक्रमसंवत् इत्यस्य प्रारम्भः ख्रीष्टाब्दात् प्राक् 56 अस्ति। अत एव कविकुलगुरुकालिदासस्य कालः अयमेवास्ति। गाथा-सप्त-शत्यामपि अयम् उल्लेखः अस्ति। अन्येऽपि विविधपाश्चात्यसमीक्षकाः एतस्य कालविषये तर्कयन्तः स्व-स्वपक्षं समर्थयन्ति। परन्तु भारतीयविपश्चितः इतिहासमवलम्ब्य सिकन्दराक्रमणसमये मालवगणसत्तां स्वीकुर्वन्ति। एतेषां मालवगणनां स्थितिः ख्रीष्टाब्दात् पूर्व तृतीयशके दृश्यते।इमे एव मालवगणाः ग्रीकाणां सतताक्रमणात् खिन्नाः सन्तः राजस्थानं सम्प्राप्य ई. पू. प्रथमशतके मालवदेशं स्वायत्तीचक्रुः। एतेषां गणेषु विक्रमादित्यो मुख्यत्वमभजत। अयमेव शकान पराजित्य शकारि-इत्युपाधिमभजत। अस्मिन्नेव विजयावासरे प्रचलितः संवत् **“मालव”** इति व्यपदिश्यते। अतः कालिदासः विक्रमादित्यनवरत्नान्यतमः ई.पू . प्रथमशतके आसीत्। एतस्य देशविषये भूयांसो मतभेदाः सन्ति।

**कालिदासस्य सम्प्रदायः** – मेघदूते महाकवेः कालिदासस्योज्जयिनीम्प्रति सहजानुरागं पक्षपातञ्च दृष्ट्वा कोऽपि तर्कयितुं शक्नोति यदयमासीत्
उज्जयिनीवास्तव्यः। भगवतः त्र्यम्बकस्य महाकालेश्वरस्य परमोपासकः कविरयमासीत् परमशैवः। कालिदासस्य सम्प्रदायो विद्यते शैवः। स शिवभक्तः अस्ति। तस्य ग्रन्थालोकनेन इदं तथ्यं सुतरां प्रत्यक्षं भवति। यथा शाकुन्तलस्य मंगलाचरणे प्रोक्तम्-

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ।।**[2]

अत्र शिवस्तुत्या विज्ञायते यत् कालिदासः शैवः। तथैव रघुवंशस्य मंगलाचरणे अपि उच्यते यत् -

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।**[3]

अत्राऽपि शिवस्तुतिरेव कृता। कुमारसम्भवं तु सर्वमपि शिवपार्वतीवर्णनं करोति। अनेन विज्ञायते यत् कालिदासः शैवसम्प्रदायी वर्तते। अत्र नास्ति सन्देहः।

**महाकविकालिदासस्य साहित्यिकमवदानम्** – महाकवेः निम्नसप्तकृतयः सम्प्रत्युपलब्धाः सन्ति- कुमारसम्भवम् (महाकाव्यम्) (1-17 सर्गाः)। रघुवंशम् (महाकाव्यम्) (1-19 सर्गाः)। मेघदूतम् (खण्डकाव्यम्) (पूर्वोत्तरभागद्वयनिबद्धम्)। ऋतुसंहारम् (खण्डकाव्यम्)(1-6 सर्गाः)। मालविकाग्निमित्रम् (नाटकम्) (पञ्चाङ्कात्मकम्)। विक्रमोर्वशीयम् (नाटकम्) (पञ्चाङ्कात्मकम्),अभिज्ञानशाकुन्तलम् (नाटकम्) (सप्ताङ्कात्मकम्)। अतः कालिदासस्य साहित्यानां संक्षिप्तपरिचयः इत्थमस्ति।

**महाकविकालिदासस्य साहित्यानां संक्षिप्तपरिचयः -**

---

1 . कालिदास भूमिका भाग-पृ.15,वि.वि.वाल्टेयर-1956
2 . अभिज्ञानशाकुन्तलम् – श्लो.1
3 . रघुवंशमहाकाव्यम् – श्लो. 1.1

**कुमारसम्भवमहाकाव्यम्-** कविकुलगुरुणा महाकविना कालिदासेन ख्रीष्टपूर्वप्रथमशतके सप्तदशसर्गात्मकं शिवपार्वतीविवाहकार्तिकेयोत्पत्तितारकासुरवधवृत्तान्तयुतं कुमारसम्भवं नाम महाकाव्यं व्यरचि। अत्र महाकविना कार्तिकेयजन्मवर्णनं संकल्पितं, किन्तु महाकाव्यमिदमष्टमसर्गावधि विलिख्य त्यक्तम्। केचित् काव्यस्यास्याष्टमसर्गमपि कालिदासकृतं न मन्यन्ते, परं मल्लिनाथेनाष्टमसर्गान्ता टीका विलिखिताऽऽलङ्कारिकैः सूक्तिसंग्राहकैश्चाष्टमसर्गावधेः पद्यानि समुद्धृतानि। एतेषु सर्गेष्वष्टसु विषयादृशा सर्वथैक्यमिति कालिदासकृतमेवाष्टमसर्गान्तं काव्यमिदम्। नवमसर्गतः सप्तदशसर्गपर्यन्तं केनापि परवर्त्तिना कविना विरच्य महाकाव्येऽस्मिन् संयोजितमिति निश्चप्रचम्। अत्र कविताचमत्कारः सहृदयहयान्यावर्जयति। जगतो मातापित्रोः पार्वतीपरमेश्वरयोर्दिव्यदम्पत्योः सौन्दर्यस्नेहादिवर्णनं नितान्तमैचित्यपूर्णम्। अत्राष्टमे सर्गे कविकृतं रतिवर्णनमसङ्गतमित्यालङ्कारिका आक्षिपन्ति। पञ्चमसर्गे पार्वत्या घोरतपसो वर्णनं यथोजपूर्ण संश्लिष्टमुदात्तञ्च तथैव तृतीयसर्गे शिवसमाधि वर्णनमपि कृतं महाकविना। नवमसर्गत: सप्तदशसर्गपर्यन्तं विलिखितं केनापि साधारणकविः नेति प्रक्षेपमात्रम्।

**रघुवंशमहाकाव्यम्** – महाकविकालिदास्यातीव उत्कृष्टतमं अत्यन्तश्लाघनीञ्च काव्यमिदं वर्तते। अस्मिन् महाकाव्ये कालिदासः पूर्णरूपेण कवित्वं प्रदर्शितमीति । शिव-पार्वत्याः स्तवनेन महाकाव्यमिदं प्रारभते। तद्यथा-

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥**[1]

च महाकाव्यस्य सम्पूर्ण लक्षणमस्मिन् महाकाव्ये विद्यमानम् अस्ति। अपि च प्राचीनकालतः एव साहित्यसमीक्षकाः एनं प्रशंसन्ते। इदं बहुनायकप्रधानं महाकाव्यम्। अस्मिन् महाकाव्ये एकोनविंशतिः सर्गाः (19) सन्ति तथा च दिलीपतः आरभ्य अग्निवर्णपर्यन्तं राज्ञां वर्णनमस्ति। दिलीपस्य, रघोः दशरथस्य, रामस्य सवृत्तान्तः सुदीर्घम् आलिखितम् तथैव अग्निवर्णसदृशस्य विलासिनः दुर्बलस्य च राज्ञः अपि वर्णितमस्ति। रघुवंशे कालिदासेन येषां रघुवंशीयाणां राज्ञाणां वर्णनं कृतं तेषां नामानि च यथाक्रमं अनेप्रकारेण निरूपितं वर्तते। यथा- 1.दिलीपः 2. रघुः 3. अजः 4. दशरथः 5. रामः 6. कुशः 7. अतिथिः 8. निषधः 9. नलः 10.नभः 11. पुण्डरीकः 12. क्षेमधन्वा 13. देवानीकः 14. अहीनगुः 15. पारियात्रः 16. शिलः17. उन्नाभः18. वजनाभः 19. शखणः 20. व्यषिताश्वः 21. विश्वसहः 22. हिरण्याभः 23. कौसल्यः 24. ब्रमिष्ठः 25. पुत्रः 26. पुण्यः 27. धृवसन्धिः 28. सुदर्शनः 29. अग्निवर्णः।

अस्य काव्यस्य प्रतिपाद्यं विषयं प्रतिसर्गानुसारं निम्नाङ्कितं अस्ति - रघुवंशस्य **प्रथमे द्वितीये**सर्गे च दिलीपस्य पुत्रहीनस्य वर्णनम्। सः नन्दिन्याः गोः सेवां करोति। एतस्य सेवा प्रभावाद् राज्ञी सुदक्षिणा गर्भं संदधौ। **तृतीये चतुर्थे** सर्गे च रघोः वीरतायाः वर्णनमस्ति। पञ्चमे सर्गे अतिप्रसिद्धः कौत्सप्रसङ्गः, यस्मिन् प्रसङ्गे रघोः दानशीलता दृश्यते। **षष्ठे सर्गे** इन्दुमत्याः स्वयंवरस्य प्रसङ्गः, येन वर्णनेन कालिदासः दीपशिखा इति व्यपदेशं प्राप्तवान्। स श्लोकः अयम् –

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥**[2]

**सप्तमे अष्टमे** च सर्गे अजस्य इन्दुमत्याः सह विवाहः तदनन्तरं इन्दुमत्याः वियोगे अजस्य करुणविलापः इत्यादयः सन्ति। **नवमे सर्गे** दशरथस्य शासननीतिः। **दशमे सर्गे** तस्य चतुर्णा पुत्राणां जन्मवर्णनम्। **एकादशमे सर्गे** रामः विश्वामित्रस्य आश्रमं गत्वा राक्षसानां विनाशं करोति। **द्वादशे सर्गे** रामस्य राज्याभिषेकस्य प्रारम्भः, रामवनगमनं, सीताहरणं, रावणवधः इत्यादयः प्रसङ्गाः सन्ति। **त्रयोदशे सर्गे** पुष्पकं विमानमारुह्य रामः सीतया सह अयोध्यां आयाति। **चतुर्दशे सर्गे** सीतात्यागः। **पञ्चदशमे सर्गे** रामः स्वस्य भ्रातृभिः सह राक्षसान् हन्ति। **षोडशसप्तदशअष्टादश** सर्गेषु च कुशतः अग्निवर्णपर्यन्तम् द्वाविंशतीनां राज्ञां वर्णनमस्ति। **एकोनविंशतिः** अन्तिमः सर्गः। अस्मिन् सर्गे अग्निवर्णस्य कामुकतायाः विलासितायाः च वर्णनम् वर्तते। विलासी अग्निवर्णः अकालमृत्युं प्राप्नोति, तदा अग्निवर्णस्य गर्भवत्याः पत्न्याः गर्भस्य अभिषेकं कृत्वा महाकविकालिदासः काव्यं पूर्णं करोति।

---

[1]. रघुवंशमहाकाव्यम्-1.1
[2]. रघुवंशमहाकाव्यम् – 6.67

**मेघदूतम्** – कालिदासस्य अनुपमा कृतिरियम्। मेघदूतं केवलं न गीतिकाव्यम् अपि तु संस्कृतसाहित्यस्य प्रथमं दूतकाव्यं सन्देशकाव्यम् वा। मेघदूते अन्तर्बाह्यप्रकृतेः अद्भुता समरसता लक्ष्यते वस्तुतः एतत्काव्यं विप्रलम्भशृङ्गारस्य मञ्जूषा अस्ति। वैदर्भीरीत्या विरचितं काव्यंमन्दाक्रान्ताछन्दसि विराजते। अस्य काव्यस्य पूर्वमेघः उत्तरमेघश्च इति भागद्वयं विद्वद्भिः कल्पितम्। कथावस्तुना सह काव्यस्य प्रारम्भः भवति। तद्यथा-

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः, शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु, स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥**[1]

मेघदूते स्वकार्यप्रमत्तेन स्वामिना शप्तः कश्चित् यक्षः सेवकः रामगिरिपर्वते निवसति स्म स्वकान्तायाः दूरम्। अष्टमासाः तु येन केन प्रकारेण यापिताः। किन्तु आषाढस्य आरम्भे स मेघं दृष्ट्वा विह्वलः जातः। सः मेघस्य माध्यमेन स्वपत्नीं प्रति सन्देशं प्रेषयति। यक्षः मेघं स्वगृहस्य मार्गं दर्शयति तदा भारतस्य नाना प्रदेशस्य सुन्दरतायाः वर्णनं करोति। अत्र रामगिरितः अलकानगरीपर्यन्तम् भारतीयप्रदेशानां प्राकृतिकरमणीयता दरीदृश्यते पूर्वमेघे विरहव्याकुलस्य यक्षस्य मर्मस्पर्शि वर्णनमस्ति। उत्तरमेघे अलकानगर्याः भव्यवर्णनानि सन्ति। तद्यथा-यक्षभवनस्य वर्णनम्, यक्षस्य पत्न्याः वर्णनम् इत्यादीनि सन्ति। यक्षस्य सन्देशानन्तरं काव्यं पूर्णं भवति।

**ऋतुसंहारम्** – ऋतुसंहारः कविकुलगुरुकालिदासरचितकाव्येषु प्रथमः स्वीक्रियते। काव्यमिदं सुललितं माधुर्यसमन्वितञ्च अस्ति। अत्र षट्सर्गाः राजन्ते। **प्रथमसर्गे** - अष्टविंशतिः श्लोकाः सन्ति। ग्रीष्मऋतोः वर्णनम् अस्ति। अत्र ग्रीष्मऋतोः अतिमार्मिकं याथार्थ्यञ्च वर्णनं समवलोक्यते। अत्र ग्रीष्मऋतो: सर्वेषां पक्षाणाम् उपस्थापनं कविना कृतमस्ति। **द्वितीयसर्गे**- प्रावृड्वर्णनं राजते। अस्मिन् सर्गे नवविंशतिः श्लोकाः राजन्ते। वर्षाऋतोः यथार्थे मनोहरञ्च वर्णनं कविना समुपस्थापितम्। वर्षाऋतोः मयूराणां नृत्यं मनांसि आकर्षयति। कविना कालिदासेन मयूरस्य नृत्यस्य अति मनोहरं वर्णनम् अस्मिन् सर्गे उपस्थापितम्। **तृतीयसर्गे**- शरदृतोः वर्णनमस्ति। अत्र अष्टाविंशतिः श्लोकाः सन्ति। अस्मिन् सर्गे कविना शरदृतोः वर्णनं यथार्थं समीचीनं प्रभावोत्पादकं सुललितभाषयां च समुपस्थापितम्। **चतुर्थसर्गे** - हेमन्तवर्णनमस्ति। अस्मिन् सर्गे नवदश श्लोकाः सन्ति। अत्र हेमन्त-ऋतोः चारुवर्णनं कविकुलगुरुणा विहितम्। वर्णनमिदं प्राकृतिकदृष्ट्या महत्वपूर्णम् अनुभूयते। अत्र हेमन्त-ऋतोः वर्णनं यथार्थं मानवस्य भावस्य उद्बोधक रससमन्वितञ्च दृश्यते। **पञ्चमसर्गे**- शिशिर-ऋतोः वर्णनं कालिदासेन समुपस्थापितम्। अत्र षोडशश्लोकाः सन्ति। कालिदासेन अस्मिन् सर्गे शिशिर-ऋतो: यथार्थं सजीवं वर्णनं विहितम्। **षष्ठसर्गे**- ऋतूनां श्रेष्ठस्य वसन्तऋतोः वर्णनम् अवलोक्यते। अस्मिन् सर्गे अष्टाविंशतिश्लोकाः सन्ति। अत्र वसन्त-ऋतोः प्रभावोत्पादकम् अतिसुन्दरं मनोहरं वर्णनम् अद्वितीयमस्ति। एतादृश वर्णनं सम्पूर्णसंस्कृतवाङ्मये दुर्लभमस्ति। दृश्यतां तावत् ऋतुसंहारस्य अन्तिमश्लोके कविना प्राकृतिकवर्णनेन सह सर्वेषां कल्याणस्य कामना किदृशा कृता। यथा -

**आम्री मङ्गलमञ्जरी वरशरः सत्किंशुकं यद्धनुर्**
**ज्या यस्यालिकुलम् कलङ्करहितं छत्रं सितांशुः सितम्।**
**मत्तेभो मलयानिलः परभृता यद्वन्दिनो लोकजित्**
**सोऽयं वो वितरीतरीतु विनतुर्भद्रं वसन्तान्वितः॥**[2]

एवं वर्णनेन स्पष्टं भवति यद् ऋतुसंहारः मुख्यरूपेण प्राकृतिकवर्णनयुक्तं काव्यमस्ति। अत एव अस्य ग्रन्थस्य प्रतिष्ठा सम्पूर्णसंस्कृतवाङ्मये अस्ति। काव्यस्यास्य भाषा सुललिता सुमनोहराऽस्ति। सर्वाणि काव्यानि रससमन्वितानि सन्ति।

**अभिज्ञानशाकुन्तलनाटकम्** – अभिज्ञानशाकुन्तलं महाकविना कालिदासेन विरचितं विश्वप्रसिद्धं नाटकम्। अस्मिन् नाटके पुरुवंशे जातः दुष्यन्तः नायकः विश्वामित्र - मेनकयोः च पुत्री नायिका शकुन्तला दुष्यन्तेन सह प्रणयं अवाप्तवती। कण्वस्य अनुपस्थितौ दुष्यन्तः शकुन्तलया सह गान्धर्वविवाहं करोति। नगरं प्रति गमनवेलायां दुष्यन्तः शकुन्तला स्मृतिचिह्न नाम अंगुलीयकं ददाति। दुर्वाससः शापेन नगरे स्थितस्य राज्ञः स्मृतिः विलुप्ता। तेन राजा दुष्यन्तः शकुन्तलां विस्मरति। अभिज्ञानं च विलुप्तं भवति। शकुन्तला सगर्भा अस्ति

---

1. मेघदूतम्- श्लो.1
2. ऋतुसंहारम्- 6.35

अपि च तस्य पतिः दुष्यन्तः इति दिव्यज्ञानेन विज्ञाय कण्वः शकुन्तलां दुष्यन्तस्य नगरं प्रति प्रेषयति। शापेन शकुन्तलां विस्मृतः दुष्यन्तः तां न स्वीकरोति। दुष्यन्तेन अपमानिता गर्भवती सा वनाश्रमे निवसति। तत्रैव भरतः इति नामधारिणं पुत्रम् अजनयत्। द्वादशवर्षानन्तरं केनचित् धीवरेण आनीतम् अङ्गुलीयकं दृष्ट्वा दुष्यन्तः सम्पूर्ण पूर्ववृत्तान्तं स्मरति शोकाकुलश्च भवति। वने परिभ्रमता तेन मारिचेः वनाश्रमो दृष्टः। तत्र भरतेन सह शकुन्तला मिलति। इयं कृतिः कालिदासस्य परिणतप्रज्ञायाः फलमिति निःशङ्कम्। अस्य नाटकस्य चतुर्थः अङ्कः श्रेष्ठः इति विदुषां मतम्। शकुन्तलादुष्यन्तयोः कथा पुराणकाले अतीव प्रसिद्धा। कविकालिदासः अस्य नाटकस्य कथा महाभारतात् स्वीकृतः, किन्तु तस्यां कथायां स्वमत्या परिवर्तनं कृतम्। कालिदासस्य नाटकस्य कथायाः महाभारते उक्तकथायाः च तुलनां कुर्मः चेत् तर्हि कालिदासस्य रचनाकौशलम् श्रेष्ठम् प्रतिभाति।

**काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला। तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥ (कस्यापि)**

**विक्रमोर्वशीयनाटकम्** – अस्मिन् रूपके पञ्चाऽङ्कानि सन्ति। प्रतिष्ठानपुरस्य राज्ञः पुरुरवसः च स्वर्गस्य च अप्सरसः उर्वश्याः प्रणयकथा अस्मिन् रूपके निरूपिता | अत्र राज्ञः पूर्वपत्नी काशिराजपुत्री औशनरी प्रतिनायिका अस्ति। पूर्वपत्नीं प्रति राज्ञः दाक्षिण्यं स्तुत्यम्। अत्र भरतमुनेः शापः उर्वश्यै आशीर्वादरूपः भवति, न विघ्नप्रदः। कुमारवने प्रवेशेन लतायां परिवर्तितस्य नायकस्य स्थितिः विपरिता भवति। स विरहाकुलः भवति। पराक्रमशीलतया प्रणयनिष्ठया च विघ्नान् राजा दूरीकरोति। अत्र विदूषकः हास्योत्पादकः एव। मित्रसाहाय्येन विना प्रणयी राजा नायिकां प्राप्तुं प्रयतते। अतः नायकस्य प्रतिभा विशेषरूपेण ध्यानाकर्षिका। अपि च स्वर्गपृथिव्योः मेलनं दृश्यते अनेकेन प्रकारेण।

**मालविकाग्निमित्रनाटकम्** – इदं कालिदासस्य प्रथमं नाटकमिति विद्वांसः वदन्ति। ख्रीस्ताब्देः द्वितीये शतके स्थितः भूतः वा शुङ्गवंशस्य राज्ञः अग्निमित्रस्य च मालविकायाः च कथा संगृह्य पञ्चके रूपकं लिखितं कालिदासेन। अस्मिन् रूपके नायकनायिकयोः प्रणयं निरूपितम्। नायकस्य पूर्वराज्यौ धारिणी च इरावती च स्तः। नायक - नायिकयोः प्रणयमार्ग च अवरोधयतः। किन्तु अस्य नाटकस्य विदूषकः अन्यनाटकात् विशेषः। सः राज्ञः अर्थात् नायकस्य सर्वान् विघ्नान् दूरीकरोति। अन्ते नायकनायिकयोः मेलनं कारयति। अग्निमित्रः एकदा अकस्मात् चित्रे मालविकां दृष्ट्वा तस्यामनुरक्तः भवति। अग्निमित्रस्य धारिणी इरावती च नाम्नी द्वे पत्न्यौ आस्ताम्। धारिण्याः धाता वीरसेनः भगिन्यै उपायनरूपेण एतां मालविकां प्रेषयति स्म। धारिणी मालविकां सेविकारूपेण स्थापयति स्म। चित्रे मालविकां दृष्ट्वा अग्निमित्रः तस्याः मेलनार्थमुत्सुकः आसीत्। एतत्कार्यार्थ विदूषकः साहाय्यं करोति। नायकनायिकयोः मध्ये प्रेमाङ्कुरः प्रस्फुटितः इति वार्ता धारिणीइरावत्योः मध्ये प्राप्ता। राज्ञः द्वे पत्न्यौ तस्य प्रणयकथायां विघ्नभूक्ते जाते। अन्ते तयोः विवाहः जातः। राजा स्वपत्नीसेविकां मालविकां कामयति इति विज्ञाय राज्यौ क्रुद्धे। ते मालविकां तिरस्कुरुतः। परन्तु मालविका राजपुत्री अस्ति इति ज्ञात्वा राज्योः अनुमत्या अग्निमित्रः मालविकया सह परिणयं करोति।

**महाकविकालिदासस्य काव्यस्य च वैशिष्ट्यम्** -सम्प्रति विश्वसाहित्यजगति महाकविकालिदासो विविधगौरवप्रदसंज्ञाभिः समलङ्कृतोऽस्ति। तत्र काव्यगतलोकातिशयसौष्ठवमेव मूलकारणम् एतदर्थं महाकवेः काव्याङ्गदृष्टिभिर्महत्त्वं कौशलञ्च यथाक्रमेणविचारणीयमस्ति।

**रसोत्कर्षः** - काव्यस्यात्मा रस एव मन्यते। ते च कथयन्ति श्रृंगार-करुण-हास-रौद्र-वीरभयानक-बीभत्स-अद्भुत-शान्तादि नवविधरसाः सन्ति। महाकवेः काव्येषु सर्वे रसाः स्वभावसिद्धा अङ्गाङ्गिभावेन च परिपुष्टाः सन्ति। परञ्च श्रृंङ्गाररसस्य प्राधान्यं सर्वत्रैव लक्ष्यते। कुमारसम्भवे शिव-पार्वत्योः सम्भोगश्रृंङ्गारवर्णनं सर्वोत्कृष्टमस्ति। चेतनाचेतनेष्वपि कविः श्रृंङ्गाररसस्य सर्वश्रेष्ठभावं समायोजयति। यथा -

**मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।**
**श्रृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥**[1]

**गुणोत्कर्षः** - रसस्याङ्गिनो धर्माः गुणेति पदेन व्यपदिश्यन्ते। रसस्योत्कर्षहेतवश्च ते प्रधानतया प्रसादौजमाधुर्यविधास्त्रयः सन्तिः।

[1]. कुमारसम्भवम् - 3.26

कालिदासस्य काव्येषु यद्यपि प्रसादगुणस्य प्राधान्यमस्ति तथापि माधुर्यगुणस्यापि सर्वत्रमाधुर्यं, ओजस्य यत्र-तत्र सुनियोजनञ्च काव्यकौशलस्य सर्वोत्कर्षप्रमाणं द्योतयति। कुमारसम्भवे प्रसादपूर्णमाधुर्यगुणाभिव्यक्तिरलौकिकवास्ति। यथा –

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।**

**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥**[1]

**अलङ्कारोत्कर्षः**-रसगुणात्मककाव्यस्य शब्दार्थमेव शरीरम्। शब्देषु यमकानुप्रासादिशब्दालङ्काराः, अर्थेषु रूपकोपमाद्यर्थालङ्काराश्च काव्यस्य बाह्यसौन्दर्यं परिपोषयन्ति। कालिदासस्य काव्येषु सर्वमान्यालङ्काराणां प्रयोगः प्राप्यते, किन्तु उपमायाः स्वभावसिद्धप्रवाहं पदे-पदे यादृशं सौन्दर्यमाविष्करोति तादृशं न कुत्रापि दृश्यते। यथा -

**दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा।**

**पुपोष लावण्यमयान्विशेषाञ्ज्योत्स्नान्तराणीव कलान्तराणि ॥**[2]

**छन्दोत्कर्षः-** आर्यानुष्टुपुपजातिमन्दाक्रान्तादिप्रमुखच्छन्दानामपि नितरां निर्वाहः कालिदासस्य काव्यकौशलं प्रमाणयति। वर्णनवस्तु दृष्टया छन्दानां तत्र-तत्र चयनं लोकोत्तरप्रतिभाप्रकर्षस्य फलमेवास्ति। यथा- कुमारसम्भवस्य प्रथमसर्गे उपजातिवृत्तम्।

**रीतिप्रकर्षः -** वैदर्भपथानुशीलनं तस्य काव्यानां चमत्कारत्वं सुतरां ज्ञायते। केनापि उक्तञ्च-

**सिक्ता मधुद्रवेणासन्यस्य निर्विवशा गिरः। तेनेदं वर्म वैदर्भं कालिदासेन शोधितम्।।**

**कथावस्तु-** वेद-पुराण-रामायण-महाभारत-प्रभृतिशास्त्रग्रन्थेषु वर्णितानि कथावस्तूनि एव कालिदासस्य काव्यकथास्रोतानि सन्ति। कालिदासमवाप्य तेषां तारुण्यं शाश्वतं प्रवाहपूर्णं स्थापितं जातम्।

**प्रकृतिचित्रणम्-** प्रकृतिचित्रणे निसर्गसूक्ष्मदृष्टिप्रतिभासम्पन्नो महाकविरेक एव मन्यते। अचेतनपदार्थाः सचेतनत्वमिव सर्वत्र समाचरन्तः काव्येषु प्रति भान्ति। हिमालयस्य पार्वत्या जनकत्वं, भुवि मेघस्य दौत्यकर्मत्वं, वृक्षाणामाभरणप्रदानत्वमिति सर्वं सजीवचित्रमस्ति।

अनेनप्रकारेण पदलालित्यं, कथोपकथनं, पात्रचित्रणं प्रभृति सर्वकाव्याङ्गदृष्टिभिः महाकवेः कालिदासस्य लोकोत्तरं नैपुण्यं विलोक्य विद्वान्सो बहुसूक्तिवाक्यैः तमभिनन्दन्ति च। तद्यथा –

1. **अनघा गुणसम्पूर्णा समुचितविच्छितिरीतिरसौ।**
   **प्रस्तुतरससंदोहा सरस्वती जयति कालिदासस्य।।**[3]
2. **अस्पृष्टदोषा नलिनीव हृष्टा हारावलीव ग्रथिता गुणौघैः।**
   **प्रियाङ्कपालीव प्रकामहृद्या न कालिदासादपरस्य वाणी।।**[4]
3. **अस्मिन्नितिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते।।**[5]
4. **उपमा कालिदासस्य भारवेरर्थगौरवम्। दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**[6] -
5. **उपमा कालिदासस्य नोत्कृष्टेति मतं मम। अर्थान्तरस्य विन्यासे कालिदासो विशिष्यते।।**[7]
6. **एकोऽपि जीयते हन्त कालिदासो न केनचित्।**

---

[1]. कुमारसम्भवम् - 1.3
[2]. कुमारसम्भवम् - 1.25
[3]. अभिरामः
[4]. श्रीकृष्णकविः
[5]. आनन्दवर्धनाचार्यः, ध्वन्यालोकः
[6]. कस्यापि
[7]. कस्यापि

शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु॥[1]

7. कालिदासगिरां सारं कालिदास: सरस्वती।
चतुर्मुखोऽथवा साक्षाद् विदुर्नान्ये तु मादृशः॥[2]

8. कवयः कालिदासाद्याः कवयो वयमप्यमी। पर्वते परमाणौ च पदार्थत्वं प्रतिष्ठितम्॥[3]

9. कविरमर: कविरचल: कविरभिनन्दश्च कालिदासश्च।
अन्ये कवयः कपयश्चापलमात्रं परं दधते॥[4]

10. कालिदासकविता नवं वयः माहिषं दधि सशर्करं पयः।
शारदेन्दुकला च कोमला स्वर्गसौख्यमुपभुञ्जते नराः॥[5]

11. ख्यातः कृविः सोऽपि च कालिदासः शुद्धा सुधा स्वादुमती च यस्य।
वाणीमिषाच्चन्द्रमरीचिगोत्रसिन्धोः परं पारमवाप कीर्तिः॥[6]

12. निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते॥[7]

13. पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव॥[8]

14. पुष्पेषु चम्पा नगरीषु काञ्ची नदीषु गङ्गा नृवरेषु रामः।
नारीषु रम्भा पुरुषेषु विष्णुः काव्येषु माघ : कविकालिदासः॥[9]

15. भासयत्यपि भासादौ कविवर्गे जगत्त्रयम्।
के न यान्ति निबन्धारः कालिदासस्य दासताम्॥[10]

16. महाकविकालिदासं वन्दे वाग्देवतागुरुम्। यज्जाने विश्वमाभाति दर्पणे प्रतिबिम्बितम्॥[11]

17. यस्याश्चोरश्चिकुरनिकर: कर्णपूरो मयूरो भासो हास: कविकुलगुरुः कालिदासो विलासः।
हर्षो हर्षः हृदयवसति: पञ्चबाणस्तु बाणः,केषां नैषा कथय कविताकामिनी कौतुकाय॥[12]

18. येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिनाजिनवेश्म।
स जयतां रविकीर्ति: कविताश्रितकालिदासभारविकीतिः॥[13]

19. रसभारभरोभित्रां भारतीममरादृते। श्रीमत: कालिदासस्य विज्ञातुं कः क्षमः पुमान्॥[14]

---

1 . राजशेखरः सूक्तिमुक्तावली

2 . मल्लिनाथः, रघुवंशस्य टीकायारम्भे

3 . कृष्णभट्ट शारङ्धरपद्धति, 175

4 . कृष्णभट्ट शारङ्धरपद्धति, 176

5 . उद्भटः

6 . सोड्ढलः,उदयसुन्दरीकथा, पृ.154

7 . बाणभट्टः, हर्षचरितम् -1/16

8 . कस्यापि

9 . कस्यापि

10 . कस्यापि

11 . कस्यापि

12 . जयदेवः प्रसन्नराघवम्,1 /22

13 . ऐहोलशिलालेख:

14 . स्थिरदेव:

20. **लिप्ता मधुद्रवेणासन् यस्य निर्विषया गिरः।तेनेदं वर्त्म वैदर्भं कालिदासेन शोधितम्।**[1]
21. **वयमपि कवयः कवयः कालिदासाद्याः।**
    **दृषदो भवन्ति दृषदश्चिन्तामणयोऽपि हा दृषदः।।**[2]
22. **वाल्मीकेरजनि प्रकाशितगुणा व्यासेन लीलावती।**
    **वैदर्भी कविता स्वयं वृतवती श्रीकालिदासं वरम्।।**[3]
23. **वाल्मीकिमिव सभासं यशः शरीरेण सर्वदा सन्तम्।**
    **रसवदूचनविकासं नमत कविं कालिदासम् तम्।।**[4]
24. **वैदर्भीरीतिसन्दर्भ कालिदासो विशिष्यते।**[5]
25. **श्रीकालिदासकविवर्यसरस्वतीयं किं वर्णयाम्यतितरां रसवाहिनीति।**
    **यत्कलिका भगवती शुचिभावयोगाद् यस्यामहो मुहुरनुग्रहमादधाति।।**[6]
26. **श्रीकालिदासस्य वचो विचार्य नैवान्यकाव्ये रमते मतिर्मे।**
    **किं परिजातं परिहत्य हन्त भृङ्गालिरानन्दति सिन्दुवारे।।**[7]
27. **साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये।**
    **शिक्षासमयेऽपि मुदे रतिलीलाकालिदासोक्ती ।।**[8]
28. **सुवशा कालिदासस्य मन्दाक्रान्ता प्रवल्गति। सदश्वदमकस्येव काम्बोजतुरगाङ्गना।।**[9]

अतः यत् किमपि स्यात् भारतीयज्ञानपरम्परायां महाकविः कालिदासः भारतवर्षस्य राष्ट्रकविः वर्तते। सम्पूर्णो भारतवर्ष एवास्य देशः। अस्य काव्येषु सम्पूर्णस्य राष्ट्रस्य मङ्गलकामना समुपलभ्यते इति।

**निष्कर्षः -** भारतीयज्ञानपरम्परायां महाकविकालिदासस्य साहित्यिकमवदानं एवं काव्यगतवैशिष्टयं निम्नदृष्टिभिः समृद्धमस्ति। तद्यथा- अस्य साहित्येषु श्रृङ्गारादिरसानां यथोचितं निर्वाहोऽस्ति। कथावस्तु एवं कथोपकथनं पात्रचयनञ्च यथायोग्यं दृश्यते। पात्राणां चरित्रचित्रणं नैसर्गिकमस्ति। सूक्ष्मप्रकृतिवर्णने नैपुण्यं प्राप्यते। सर्वत्र पदानां समन्वयं कमनीयञ्चास्ति। प्रसादगुणस्य प्राधान्यम्, माधुर्योजगुणाभ्यां सह तस्य यथोचितं निर्वाहोऽस्ति। उपमादिकाव्यालङ्काराणां सावसरप्रयोगो लक्ष्यते। विविधछन्दानां कथाप्रसङ्गानुसारेण परिवर्तनं समीचीनमेवास्ति। समन्वयात्मकं धर्मार्थकाममोक्षप्रयोजनमपि प्रदर्शितमस्ति। कालिदासस्य भाषा सरला अदोषपूर्णा। किञ्च आयासराहित्येन एव कविः सरलया भाषया तत्त्वम् उपदिशति। अस्मात् कारणात् एव कालिदासस्य काव्यम् अतीवलोकप्रियतां गच्छति। अपि च कालिदासस्य रचना साहित्यं न केवलं विदुषां बालकानाम् अपि रुचिकरणं प्रतिभाति। यतो हि काव्यं तु पठ्यते पाठकैः परन्तु काव्यकर्तृणां विषये तेषां ज्ञानं नैव भवति। प्राचीनाः कवयः अपि तेषां परिचयम् स्वग्रन्थे नैव लिखन्ति। अल्पायासेन तेषां परिचयः न भवति। अतः भारतीयज्ञानपरम्परायां महाकविकालिदासस्य साहित्यिकमवदानम् गवेषणमिदं सर्वेषां कृते सुपथकरः भविष्यतीति।

---

1 . दण्डीअवन्तिसुन्दरीकथा
2 . कस्यापि
3 . कस्यापि
4 . कस्यापि
5 . कस्यापि
6 . बिठो बाअण्णा सुश्लोकलाघव
7 . कस्यापि
8 . गोर्वर्धनाचार्यः आर्यासप्तशती, श्लो- 35
9 . क्षेमेन्द्रः सुवृत्ततिलकम्

# महाभाष्यसिद्धान्तरत्नप्रकाशस्थित-सिद्धान्तभेदविमर्शः

डा.गोपीकृष्णन् रघुः
सहायकाचार्यः, संस्कृत-दर्शनविभागः,
रामकृष्णमिशन् विवेकानन्द-शैक्षणिक-शोधसंस्था,
बेलूरमठः, हौरा, पश्चिमबङ्गः, 711202

**पत्रसंक्षेपः**व्याख्यानतो विशेषप्रतिपत्तिरिति नयेन मूलार्थनिर्णये व्याख्यानानि अत्यन्तं सहकारिभूतानि वर्तन्ते। सर्वत्रैव हि शास्त्रेषु व्याख्यासहितस्यैव मूलस्य पठनपाठनपरम्परा वर्तते। सन्ति हि व्याकरणमहाभाष्यस्य बह्व्यः व्याख्याः प्रसिद्धाः अप्रसिद्धाः च। भर्तृहरेः दीपिका, कैय्यटाचार्यस्य प्रदीपः, भट्टोजीदीक्षितस्य शब्दकौस्तुभः, नागेशभट्टस्य उद्योतश्च नितरां प्रसिद्धाः व्याख्याःभाष्यस्य। तथैव धनेश्वरप्रणीतः चिन्तामणिः, शेषनारायणप्रणीतः सूक्तिरत्नाकरः, नीलकण्ठवाजपेयीकृतो भाष्यतत्त्वविवेकः, शेषविष्णुकृता महाभाष्यप्रकाशिका, शिवरामेन्द्रसरस्वतीकृतो महाभाष्यसिद्धान्तरत्नप्रकाशः, गोपालकृष्णशास्त्रिकृतः शाब्दिकचिन्तामणिः, सदाशिवविरचिता महाभाष्यगूढार्थदीपिनी चेति प्रायः अप्रसिद्धाः व्याख्याः च दृश्यन्ते। एवमेव सिद्धान्तवैचित्र्यात् प्रतिपादवैशिष्ट्याच्च नितरां नवीनत्वमावहति श्रीशिवरामेन्द्रसरस्वतीकृतो महाभाष्यसिद्धान्तरत्नप्रकाशख्या व्याख्या। अस्यां व्याख्यायां यतिवर्येण तत्र तत्र वैय्याकरणकुलाप्रसिद्धानां सिद्धान्तानां निरूपणं करोति। तथैव प्रदीपोक्तानां प्रायः सर्वेषां सिद्धान्तानां निराकरणमपि करोति। पत्रेऽस्मिन् ईदृशानां व्याख्यानानां सिद्धान्तभेदविषये विचारः क्रियते। यतः विषयोऽयं महान् विद्यते अतः स्थालीपुलाकन्यायेन कतिपयान् अंशान् आदाय विचारः प्रस्तूयते।

**कुञ्चीशब्दाः-** निपातः, द्योतकः, वाचकः, शाब्दबोधः, आख्यातमुख्यविशेष्यकः, धात्वर्थमुख्यविशेष्यः, वृत्तिः।

**०. भूमिका**-व्याख्यानतो विशेषप्रतिपत्तिरिति नयेन मूलार्थनिर्णये व्याख्यानानि अत्यन्तं सहकारिभूतानि वर्तन्ते। सर्वत्रैव हि शास्त्रेषु व्याख्यासहितस्यैव मूलस्य पठनपाठनपरम्परा वर्तते। वस्तुतस्तु मनुष्यस्य नयनवत् व्याख्याः शास्त्रेषु। एवं महत्वमापन्नाः व्याख्याः बहुविधाः वर्तन्ते। काश्चन मूलार्थमुद्घायन्ति काश्चन मूलगतान् विशेषान् विवृणोति। अन्याः काश्चन मूलगतान् अर्थान् अन्यथैव प्रतिपादयति। प्रायः व्याख्यायाः वैचित्र्यादेव शास्त्रेषु सिद्धान्तभेदाः अपि जायन्ते। अस्मिन् पत्रे मया तादृशस्यैकस्य विषये प्रस्तूयते।

**१.० विषयप्रवेशः**-सन्ति हि व्याकरणमहाभाष्यस्य बह्व्यः व्याख्याः प्रसिद्धाः अप्रसिद्धाः च। भर्तृहरेः दीपिका, कैय्यटाचार्यस्य प्रदीपः, भट्टोजीदीक्षितस्य शब्दकौस्तुभः, नागेशभट्टस्य उद्योतश्च नितरां प्रसिद्धाः व्याख्याःभाष्यस्य। तथैव धनेश्वरप्रणीतः चिन्तामणिः, शेषनारायणप्रणीतः सूक्तिरत्नाकरः, नीलकण्ठवाजपेयीकृतो भाष्यतत्त्वविवेकः, शेषविष्णुकृता महाभाष्यप्रकाशिका, शिवरामेन्द्रसरस्वतीकृतो महाभाष्यसिद्धान्तरत्नप्रकाशः, गोपालकृष्णशास्त्रिकृतः शाब्दिकचिन्तामणिः, सदाशिवविरचिता महाभाष्यगूढार्थदीपिनी चेति प्रायः अप्रसिद्धाः व्याख्याः च दृश्यन्ते।

आसु टीकासु कैय्यटप्रणीतस्य प्रदीपस्य स्थानं महत्तमं वर्तते। सर्वत्रैव हि भाष्याशयनिर्णयार्थं प्रदीपस्यैव समाश्रयः दृश्यते। अत एव शाब्दिकप्रपञ्चे आकरशब्देन भाष्यप्रदीपयोः ग्रहणं क्रियते। कैय्यटमतञ्च सिद्धान्तत्वेन बहुभिः स्वीकृता वर्तन्ते। किन्तु तावता एव अन्याः प्रदीपानुवादकाः इति न गतार्थाः।

नागेशस्य उद्योतः स्वसिद्धान्तोपस्थापकत्वात् नितरां समादृता वर्तते। तस्मिन् व्याख्याने बहुत्र प्रदीपसिद्धान्तानां खण्डनं च दृश्यते। दीक्षितोऽपि कौस्तुभे तत्र तत्र कैय्यटं निरस्यति। अतः सर्वाः व्याख्याः स्वतन्त्राः सिद्धान्तभेदपुरस्सरं च स्वास्तित्वं रक्षन्ति।

एवमेव सिद्धान्तवैचित्र्यात् प्रतिपादवैशिष्ट्याच्च नितरां नवीनत्वमावहति श्रीशिवरामेन्द्रसरस्वतीकृतो महाभाष्य-सिद्धान्तरत्न-प्रकाशख्या व्याख्या। अस्यां व्याख्यायां यतिवर्येण तत्र तत्र वैय्याकरणकुलाप्रसिद्धानां सिद्धान्तानां निरूपणं करोति। तथैव प्रदीपोक्तानां प्रायः सर्वेषां सिद्धान्तानां निराकरणमपि करोति।

पत्रेऽस्मिन् ईदृशानां व्याख्यानानां सिद्धान्तभेदविषये विचारः क्रियते। यतः विषयोऽयं महान् विद्यते अतः

स्थालीपुलाकन्यायेन नवाह्निकभागस्थान् कतिपयान् अंशान् आदाय विचारः प्रस्तूयते। तत्र इमे अंशाः विशेषेण विचार्यन्ते-

**२.० अथ शब्दानुशासनमित्यत्र निपातानां द्योतकत्व-वाचकत्वविषये मतभेदः-** कैयटः महाभाष्यकृद्वाक्यस्य-'अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते' इत्यस्य व्याख्यानं कुर्वाणः प्रतिपादयति यत् अधिकारार्थ इत्यत्र अर्थशब्दः प्रयोजनपरः। एवञ्चाधिकारः अर्थात् प्रस्तावः द्योतकत्वेन प्रयोजनं यस्य सः तादृशः 'अथ' शब्दः अत्र वाक्ये प्रयुज्यते। एवञ्च निपातस्य अथशब्दस्य द्योत्यार्थकत्वं भाष्यकृदभिप्रायत्वेन व्याख्याति नेतावन्मात्रं, किन्तु समेषां निपातानां द्योतकत्वमकुर्वाणोऽसौ तत्र वाक्यपदीयकर्तुः निर्णयं संवदति। तथा हि निपातानाञ्च द्योतकत्वं वाक्यपदीये निर्णीतम्' इति।

रत्नप्रकाशकारस्तु 'अथ' शब्दस्य वाचकत्वमभिमन्यते। 'अधिकारः प्रस्तावः द्योत्यत्वेनास्य प्रयोजनमित्यर्थः। निपातानाञ्च द्योतकत्वं वाक्यपदीये निर्णीतम्' इति कैयटमनूद्य द्योतकत्वपक्षं खण्डयति। क्रियान्वयिनां निपातविशेषाणां क्रियाविशेषद्योतकताया भ्वादिसूत्रे भगवता व्यवस्थापितत्वेऽपि सर्वत्र निपातानां द्योतकत्वाश्रयणं न युक्तम्। चन्द्र इव मुखं दृश्यते इति 'इव' पदसमभिव्याहारे सादृश्यार्थः प्रतीयते तदभावे तु न प्रतीयत इत्यन्वयव्यतिरेकाभ्यां च निपातसामान्यस्य वाचकत्वमेव युज्यते। उक्तञ्च वाक्यपदीये-

**निपातानां वाचकत्वमन्वयव्यतिरेकयोः॥** इति।

अपि च वाचकपदसमभिव्याहाराभावे द्योतकत्वकल्पनाया असम्भवादत्रार्थशब्दस्य वाच्यपरस्य प्रयोजनपरतया व्याख्यानमनुचितम्। विशेषणविशेष्यभाववैपरीत्येन व्याख्याने च मानाभावः इति अथ' शब्दविषये वाचकत्वमङ्गीकार्यमिति।

नागेशमतम् - 'अव्ययं विभक्ती'ति सूत्रमाधारीकृत्योपसर्गातिरिक्तनिपातानां द्योतकत्ववाचकत्वोभयं स्वीकरोत्यसौ उद्योते। तत्र भाष्ये-वचनेषु इत्युक्तेः कचिन्निपातानां वाचकत्वमणि अत एव समृद्धेः सुपदवाच्यत्वे मद्राणां समृद्धिः सुमद्रमित्यव्ययीभावः। द्योत्यत्वे तु सुमद्रा इति तत्पुरुषः इति स्पष्टम्। तत्रैव निपातानां द्योतकत्वं वाचकत्वञ्च, लक्ष्यानुरोधाच्च व्यवस्था इत्युक्तम्।

तत्र 'परे तु' इति विश्रुतशैल्या स्वमतं प्रतिपादयन्- 'अथ शब्दानुशासन'मित्यत्र अथशब्दस्य वाचकत्वमङ्गीकुर्वाणः तस्याभिधेयमर्थम् अधिकृतम् इति स्वीकृतिपुरस्सरं रत्नप्रकाशमतं पोषयति।

**२.१ आख्यातार्थविशेष्यकः बोधः-**अस्त्यप्रयुक्तः इत्यत्र शाब्दबोधविषये आख्यातमुख्यविशेष्यकशाब्दबोधमेव अङ्गीकुर्वन्ति रत्नप्रकाशकारः।

अप्रयोगः प्रयोगान्यत्वात् इति वार्तिकव्याख्याने यदेषां शब्दानामर्थे अन्यान् शब्दान् प्रयुञ्जते। ऊषे इत्यस्य शब्दस्यार्थे क्व यूयमुषिताः इति भाष्यम्। ऊष इति तिङन्तः । उषिताः इति तत्समानार्थकः कृदन्तः। ऊष इत्यस्य उषिता इति समानार्थः न भवति, परोक्षतादेः विशेषस्यानवगमात् तथापि तत्प्रत्यायनाय यूयमुषिता इति युष्मच्छब्दघटितः प्रयोग इति कैयटः। तिङन्ते सर्वत्र धात्वर्थमुख्यविशेष्यकः शाब्दबोध इति ऊष इत्यस्य उषिता इति समानार्थकः न भवति। तत्र कर्तृविशेष्यकबोधस्य जायमानत्वादिति कैयटाशयः।

धात्वर्थविशेष्यकः शाब्दबोध इति वदन्तः परास्ता इति प्रकाशकारः । तथा हि- आख्यातार्थविशेष्यकः शाब्दबोधः भाष्यवार्तिककृतोः संमतं लक्ष्यते इति सः अभिप्रैति। उक्तं तेन एतेन धात्वर्थविशेष्यकः शाब्दबोधः इति वदन्तः वैयाकरणंमन्याः परास्ता इति। ऊष इत्यस्य समानार्थकः उषिताः इति प्रकृतभाष्येण, भ्वादिसूत्रस्थेन पचति भवति इत्यादिभाष्येण च विरोधात्। यदि धात्वर्थविशेष्यकः शाब्दबोधः भाष्यकाराभिप्रेतः तर्हि उषिताः इति कर्तृतान्तं विहाय क्व युष्माभिः उषितम् इति भावक्तान्तेन निर्दिशेत्। तथा न निदर्शितम् इति प्रकृतसूत्रभाष्यविरोधः। वर्तमानपचिक्रियायाः वर्तमानभवनाश्रयत्वसंभवेऽपि भूतभविष्यत्-पचिक्रियायाः वर्तमानभवनाश्रयत्वा संभवेन भ्वादिसूत्रभाष्येणापि विरोधः स्पष्ट एव। आख्यातार्थविशेष्यत्वाङ्गीकारे भूतभविष्यत्पाकाश्रयाभिन्नः वर्तमानभवनाश्रय इति बोधः उपपद्यते इति तत्पक्षे विरोधो नास्ति। पक्ष्यामीत्यनेन भविष्यत्पाकाश्रयत्वं बुद्ध्यते।

ननूक्तरीत्या आख्यातार्थमुख्यविशेष्यकबोधाङ्गीकारे पच्यादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्तीति भ्वादिसूत्रस्थं भाष्यं कथं युज्यते इति चेदुच्यते। भावे लकारे पच्यादिक्रियाः एव भवतिक्रियाकर्त्र्यः। कर्मणि कर्तरि च लकारे पच्यादिवाच्यफलव्यापाराश्रयो कर्मकर्तारौ भवतिक्रिया कर्तारौ। अतो न दोषः इति।

ननु आख्यातार्थमुख्यविशेष्यकबोधाङ्गीकारे भावप्रधानमाख्यातम्, सत्त्वप्रधानानि नामानीति यास्कवचनं विरुध्येत इति

चेदुच्यते। आख्यातं तिङन्तं भावप्रधानं भावविशेष्यकं भवति। भावश्च भवनं, तदाश्रयौ च कर्मकर्तारौ। भावपदेनोभयोरपि ग्रहणमिति तदाशयः। एवञ्च भावे लकारे भवनं विशेष्यम्। कर्मणि कर्तरि वा लकारे कर्मकर्तारौ। नामानि सुबन्तानि सत्त्वविशेष्यकाणि। सत्त्वं नाम विशेष्याकांक्षं वस्तु कर्मादि। तिङभिहितः भावः भवनं तदाश्रयकर्मकर्तारौ च कृदभिहितभाववत् क्रियासमवायं तिङर्थान्तरविशेषणतां न गच्छति न प्राप्नोति असत्त्वरूपत्वादिति सार्वधातुके यक् इति (३-१-६७) सूत्रस्थस्य तिङभिहित इति भाष्यस्यार्थः । एवञ्च आख्यातार्थविशेष्यकवोध एव भाष्यसम्मत इति महता ग्रन्थेन न्यरूपयत् प्रकाशकारः।

वस्तुतस्तु कौस्तुभभूषणमञ्जूषादिग्रन्थविरोधात् भाष्यासम्मतत्वाच्च आख्यातार्थमुख्यविशेष्यकवोध इति मतमुपेक्ष्यम्।

**२.२ वृत्तिविग्रहयोः समानार्थकत्वम्-**"वाक्येनाभिधाने प्राप्ते समासः आरभ्यमाणस्तत्समानार्थ एव न्याय्यः" इति प्रदीपव्याख्यायां वदन् कैय्यटः वृत्तिवाक्ययोः समानविषयत्वमेव सूचयति। तथाहि- यस्मिन्नर्थे वाक्यस्य प्रवृत्तिर्भवति तस्मिन्नेवार्थे वृत्तेरपि प्रवृत्तिर्भवति। यथा राज्ञः पुरुषः इत्यस्य प्रवृत्तिः यस्मिन् पुरुषे भवति तस्मिन्नेव पुरुषे राजपुरुषः इति समासस्यापि प्रवृत्तिर्भवति। अमुमेवांशं नागेशः "एतेन वृत्तिविग्रहयोः समानविषयत्वं सूचितम्" इति स्पष्टमेवोद्योते लिखति।

किन्तु महाभाष्यस्य रत्नप्रकाशव्याख्यातुः शिवरामेन्द्रसरस्वतिनां मते समानार्थकत्वं नाम "वाक्येन बोधयितुमिष्टस्यैवार्थस्य समासेन बोधनीयता" एव समानार्थकता। तन्मते यादृशश्च विशेषणविशेष्यभावविशिष्टः शाब्दबोधः वाक्याद्गम्यते तादृश एव वृत्तेः अपि गन्तव्यः। अत एव तत्परं वदन्ति- "एतेन वृत्तिविग्रहयोः भिन्नार्थकत्वमषष्ठ्यर्थबहुव्रीह्यादावङ्गीकुर्वन्तो निरस्ताः। प्रकृतभाष्यविरोधात्। .....अत एव धात्वर्थविशेष्यक-शाब्दबोधमिच्छन्तो वैय्याकरणंमन्याः निरस्ताः।" इति।

विचारे क्रियमाणे तु वृत्तिवाक्ययोः समानार्थत्वं गमकत्वमित्यत्र वस्तुतः समानविषयत्वमेव ग्राह्यं न तु समानविशेषण-विशेष्यभावविशिष्टः शाब्दबोधविशिष्टः इति सिद्ध्यति। अत एव नागेशः समानविषयत्वमित्येव उक्तवान् न तु समानार्थकत्वमिति।

**३.० मतभेदकारणम्-**ईदृशानां मतभेदानां कारणविषये आलोच्यते। यथा शिवरामेन्द्रसरस्वतीनां मते मीमांसाशास्त्रस्य प्रभावः मतभेदकारणं
भवितुमर्हति। शब्दनित्यत्वविषये ते शब्दस्य आकाशाश्रयत्वात् नित्यत्वमिति वदन्ति। तत्र मीमांसकेषु प्राभाकराणां मतेन सादृश्यं दृश्यते। तथैव शाब्दबोधे आख्यातमुख्यविशेष्यकशाब्दबोधमेव अङ्गीकुर्वन्ति। तदपि मीमांसकनयानुसारि दृश्यते। एवं शिवरामेन्द्रसरस्वतीवर्याणां मीमांसाशास्त्रपाण्डित्यं तेषां व्याकरणविषयकविचारेऽपि अनुवर्तत इत्यतः अन्यवैय्याकरणेभ्यः भिन्नतया तैः भाष्यपङ्क्तीनां व्याख्यानमकरोदिति स्पष्टं प्रतीयते। अत एव तेषां व्याख्या इतरवैय्याकरणव्याख्येभ्यः क्वचित् भिन्नं प्रतीयते। अयं नवीनः मार्गः महाभाष्यस्य पङ्क्तीनां नूतनदृष्ट्या विचारार्थमत्यन्तमुपयोगि वर्तते।

**४.० उपसंहृतिः-** 'वादे वादे जायते तत्त्वबोधः' इत्युक्तरीत्या केषाञ्चित् विशिष्टस्थानानां विचारपुरस्सरं महाभाष्यव्याख्यानानां वैचित्र्यं वैपुल्यं च परिशील्य तद्गतान् सिद्धान्तान् विविच्य युक्तायुक्तविचारेण ग्रहणं कर्तव्यमस्ति। तेन शास्त्रस्य बुद्धेश्च विकासः वृद्धिश्च सिद्ध्यति। तदर्थमयं प्रयासः इति शम्॥

**Bibliography**


1. Narasimhacharya, M. S. (Editor) (1973) *Mahābhāshyaprdīpavyākhyānāni- Vol 1,* Pondicherry: French Institue.
2. Narasimhacharya, M. S. (Editor) (1976) *Mahābhāshyaprdīpavyākhyānāni- Vol 3,* Pondicherry: French Institue.
3. Bharthṛhari, *Mahābhāshyadīpikā,* (1987), Bronkhost, Johannes (Editor), Poona: Bhandarkar Oriental Research Institute.
4. Jha, Rudradhara (Editor cum Commentator) (2011)*Vyākaraṇamahābhāshyam (navāhnikam)*, Varanasi: Choukhambha Samkrit Samsthan.
5. Sarma, Thangaswamy R. *Mīmāmsāmañjarī,* (1996), New Delhi: Indian Council of Philosophical Research.

# धात्वर्थविषये प्राच्यनव्यवैयाकरणमतम्

डा.नितेश कुमार द्विवेदी
सहायकाचार्यः, व्याकरणम्
लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयः
देवघरः झारखण्डः
दूरवाणीसंख्या- 8382855353
knitish052@gmail.com

**शोधपत्रसारः**- पत्रेऽस्मिन् धात्वर्थविषये वैयाकरणमतम् प्रस्तुतमस्ति। तथा हि – भट्टोजिदीक्षितस्तु फलं व्यापारश्च धात्वर्थः तत्र एकवृन्तगतफलद्वयन्यायेन फले व्यापारे च शक्तिः इति प्रतिपादयति। नागेशमते फलावच्छिन्नव्यापारे, व्यापारावच्छिन्ने फले च धातोः शक्तिरस्ति। शाब्दबोधे च प्राचीनमते सर्वत्र अर्थात् कर्तरि कर्मणि च व्यापारमुख्यविशेष्यकशाब्दबोधो भवति। किन्तु नागेशमते कर्तरि व्यापारमुख्यविशेष्यकशाब्दबोधः तथा च कर्मणि फलमुख्यविशेष्यकशाब्दबोधो जायते। तस्मात् वैयाकरणमते धात्वर्थमुख्यविशेष्यकबोधो जायते। शाब्दबोधे वैषम्यादेव धात्वर्थे मतभेदो वर्तते । पत्रेऽस्मिन् मतद्वयं निरूप्य कस्मिन् मते लाघवम् किञ्च मतं गुरुभूतमिति प्रतिपादितम् वर्तते ।

**कूटशब्दाः** – फलम् ,व्यापारः ,धातुः,प्रत्ययः,क्रियाविशेषणम्,शक्तिः,कार्यकारणभावः,शाब्दबोधः

**विषयः** - दधाति विविधं शब्दरूपं यः स धातुरिति व्युत्पत्या धातुः सुबन्ततिङन्तात्मकं पदं धारयति।अत्र डुधाञ् धारणपोषणयोः धातोः तुन् प्रत्ययो भवति । यथा – रामः इत्यत्र रम् धातोर्घञ्[1] प्रत्ययेन निष्पद्यते । सर्वे शब्दाः धातुजाः इति यास्कोक्त्या सर्वाण्यपि नामसमूहानि धातुजानि सन्तीति हेतोर्धातुः किल सर्वत्र सुबन्ततिङन्तेष्वनुस्यूत इति निश्चप्रचम्।

**प्राचीनमतम्**

प्राचीनाः कौण्डभट्टादयस्तु- एकवृन्तगतफलद्वयन्यायेन धातोः फलनिरूपिता ,व्यापारनिरूपिता च पृथगुपस्थितिप्रयोजिकैव खण्डशः शक्तिरिति स्वीकुर्वन्ति। अत एव फलव्यापारयोर्धातुरित्यत्र द्विवचनोक्तिः संगच्छते।तथा चोक्तम् –

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**[2]
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥**

खण्डशः शक्तिस्वीकृतत्वादेव स्तोकं पचतीत्यादौ स्तोकपदार्थस्य धात्वर्थे फलेऽन्वयः, अन्यथा विशिष्टशक्तिस्वीकारे तु फलस्य धात्वर्थैकदेशेन तत्रान्वयोऽसम्भवः, “**पदार्थःपदार्थेनान्वेति न तु पदार्थैकदेशेन**” इति न्यायात्। अतएव ऋद्ध स्य राजपुरुषः इत्यत्र ऋद्धस्य पदार्थैकदेशीभूते राजनि ,किञ्च घटत्वे नित्यान्वयविवक्षया नित्यो घटः इति च न प्रयोगः।

ननु हरिशब्दादुपस्थितयोः विष्णुसिंहयोः परस्परान्वयबोधवारणाय तत्पदजन्यतद्धर्मावच्छिन्नविषयक-शाब्दबुद्धित्वावच्छिन्नं प्रत्यपरपदजन्योपस्थिति कारणमिति कार्यकारणभावस्यावश्यस्वीकर्तव्यतया, एकस्मादेव धातोः उपस्थितयोः फलव्यापारयोः परस्परान्वयो न स्यात्। अपरपदजन्योपस्थित्यभावात् ।

अतएवोक्तम् नैयायिकधुरन्धरगदाधरेण **शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते**[3]” इति चेत्? अत्रोच्यते– व्युत्पत्तिवैचित्र्येण क्वचिदेकपदोपस्थापितयोरपि पदार्थयोः परस्परान्वयस्य सर्वसम्मतत्वेन तस्य नियमस्यासार्वत्रिकत्वात्। अत एव **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**[4] इति सूत्रे मात्रपदोपस्थापितयोरर्थयोः परस्परान्वयो भवति। तथा हि

---

[1] करणाधिकरणयोश्च पाणिनिसूत्रम् 3.3.117
[2] वैयाकरणभूषणसार कारिका 2
[3] व्युत्पत्तिवादः पृष्ठसंख्या 1
[4] पाणिनिसूत्रम् 2.3.46

प्रातिपदिकार्थेति सूत्रे मात्रशब्दस्यावधारणमर्थः। उक्तञ्च मात्रशब्दस्येति।तस्य चावधारणमर्थः। मात्रं कार्त्स्न्येऽवधारणे इत्यमरः।तत्रावधारणञ्चान्ययोगव्यवच्छेदः। योगः सम्बन्धः, व्यवच्छेदोऽभावः, एवञ्चाभावे सम्बन्धस्य प्रतियोगितयान्वयो भवति।

नन्वेवं हरिशब्दवाच्ययोः विष्णुसिंहयोः परस्परं कथं नान्वयः इति चेत् ? उच्यते – तत्र हरिशब्दस्य प्रत्येकस्मिन्नर्थे पृथक् पृथक् शक्तिः, अतः **"सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति"** इति नियमात् तत्र एकस्मिन्नेवकाले हरिशब्दादर्थद्वस्योपस्थितिः शक्त्या न भवति। अपि त्वर्थान्तरस्योपस्थितिः व्यञ्जनावृत्या भवति। सैवाभिधामूलाव्यञ्जनेति साहित्यिकानां सम्मतिः।

उक्तञ्चाचार्यमम्मटेन –

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**

**संयोगाद्यैरवाच्यार्थधीकृत् व्यावृत्तिरञ्जनम्।।**[1]

**अयम्भावः-** नानार्थकस्य शब्दस्यैकस्मिन्नर्थे संयोगादिभिः शक्तौ नियन्त्रितायां , तद्भिन्नार्थस्य प्रतीतिर्व्यञ्जनयैव भवति। न तु शक्त्या इति। एवञ्चानेन सिद्ध्यति यत् नानार्थकैरपि शब्दैः युगपन्नानार्थस्योपस्थितिः शक्त्या न भवति। तस्मात् हरिशब्दादिस्थले नार्थद्वयस्य परस्परमन्वयापत्तिः।

फलव्यापारयोरपि धातोः युगपदुपस्थितिः न सम्भवतीति न वक्तव्यम् , सकृदुच्चरितेति न्यायः विभिन्नशक्योपस्थितावेव प्रवर्तते। यत्रैकेवशक्त्या, एकवृन्तगतफलद्वयन्यायेन पदार्थद्वयस्योपस्थितिस्तत्र नायं नियमः। अत एवाख्यात-पदोपस्थापितयोर्नैयायिकानां कृतिवर्तमानादिकालयोः, वैयाकरणानां कर्तृसंख्ययोश्च परस्परान्वयबोधः संगच्छते।

ननु फलव्यापारयोः खण्डशः शक्तिस्वीकारे पृथगुपस्थिते संयोगरूपे फले भेदान्वयविवक्षया "गमनं न स्पन्दः" इति प्रयोगस्य प्रामाण्यापत्तिस्स्यादिति चेन्न, अन्तरङ्गत्वात् पूर्वमुपस्थितयोः फलव्यापारयोरेवान्वयः, तत्पश्चादेव फले पदार्थान्तरस्यान्वयो भवति। एवञ्च फलस्य व्यापारे विशेषणे जाते तत्र पदार्थान्तरस्य भेदस्यान्वयो न सम्भवति। **"गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्"**[2] इति न्यायात्।

स्तोकं पचतीत्यादौ तु स्तोकादीनां तत्रान्वयः सम्भवत्येव, **क्रियाविशेषणानां कर्मत्वम् क्लीबत्वञ्च**[3] इत्यभियुक्तोक्तिसामर्थ्यात्। तस्मात् फलव्यापारयोः खण्डशः शक्तिस्वीकारे तु नास्ति कश्चन दोष इति प्राचीनानामुद्घोषः ।

**नागेशमतम्-** नागेशस्तु फलविशिष्टव्यापारे, व्यापारविशिष्टे फले च धातोः शक्तिः स्वीकुरोति। अत एव नागेशमते कर्तृप्रत्यये व्यापारमुख्यविशेष्यकः, कर्मप्रत्ययस्थले फलमुख्यविशेष्यकः शाब्दबोधः। तत्र फलस्य व्यापारे वैशिष्ट्यमुकूलत्वसम्बन्धेन, व्यापारस्य च जन्यत्वसम्बन्धेन फले वैशिष्ट्यं बोध्यम्। कथितञ्च नागेशेन – **"तस्मात् फलावच्छिन्नव्यापारे, व्यापारावच्छिन्ने फले च धातूनां शक्तिः, कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहरश्च तत्तद्बोधे नियामक इत्याहुः**[4]"इति।

एवं स्वाभिमतं विशिष्टशक्तिवादं समर्थयता, पृथक् शक्तिवादञ्च दूषयित्वा भट्टनागेशेन खण्डशः शक्तिवादे इमानि दूषणान्युपस्तानि।

1. उद्देश्यविधेयभावेनान्वयापत्तिः।
2. कार्यकारणभावद्वयकल्पनम्।
3. अर्थद्वये शक्तिद्वयकल्पनम्।
4. बोधजनकत्वसम्बन्धद्वयकल्पनम्।

**उद्देश्यविधेयभावेनान्वयापत्तिः-** तत्र प्रथमस्तावत् – फले व्यापारे च खण्डशः शक्तिस्वीकारे फलव्यापारयोः परस्परमुद्देश्यविधेयभावेनान्वयापत्तौ व्यापारोद्देश्यकफलविधेयकस्य, फलोद्देश्यकव्यापारविधेयकस्य च बोधापत्तिः।

---

[1] काव्यप्रकाश द्वितीयोल्लासः कारिका 19

[2] प्रौढमनोरमा शब्दरत्न पृ0 15

[3] व्युत्पत्तिवादः प्रथमाकारकम् पृ0 42

[4] परमलघुमञ्जूषा ,धात्वर्थविचारः पृ0 101

उक्तञ्च भट्टनागेशेन- **फलव्यापारयोर्धातोः पृथक्शक्तावुद्देश्यविधेयभावेनान्वयापत्तिस्तयोः स्यात्, पृथगुपस्थितयोस्तथान्वयस्यौत्सर्गिकत्वात्।**[1]

अयम्भावः- घटपदात् घटघटत्वयोरविशिष्टोपस्थितिसत्वात् न तत्रोद्देश्यविधेयभावेनान्वयः, अतो ज्ञायते यत् विशिष्टोपस्थित्यभावः तत्रोद्देश्यविधेयभावेनान्वयो भवति। एवञ्च धातोरपि पृथग् पृथगुपस्थितयोः फलव्यापारयोः परस्परमुद्देश्यविधेयभावेनान्वयापत्तिः।

**वस्तुतस्तु**– उद्देश्यविधेयभावेनान्वयं प्रति विभिन्नपदजन्योपस्थितिरेव कारणम्, एकपदात् विभिन्नशक्तिज्ञानजन्योपस्थितपदार्थ-द्वयस्योद्देश्यविधेयभावेनान्वये तु प्रमाणाभावः दृष्टान्ताभावश्च। अतः हरिपदादुपस्थितयोः सूर्यसिंहयोर्न परस्परमुद्देश्यविधेयभावेनान्वयः। एवञ्च पृथक्शक्तिवादेऽपि नायं दोषो युक्तिसंगत इति।

**कार्यकारणभावद्वयकल्पनम्**– फलत्वावच्छिन्नप्रकारतानिरूपितव्यापारविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्, व्यापारत्वावच्छिन्नप्रकारतानिरूपितफलविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पने गौरवं पृथक्शक्तिवादिमते इति नागेशाभिप्रायः।

**अर्थद्वये शक्तिद्वयकल्पनम्** – अर्थद्वयेशक्तिद्वयकल्पने नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकेकैकधर्मवत्त्वरूपनानार्थत्वं धातोस्स्यात् पृथक्शक्तिवादिमते, यथा हरिः शब्दः नानार्थकः तथा धातुरपि नानार्थक इति व्यवहारापत्तिः।

**सम्बन्धद्वयकल्पनम्** –फलनिरूपितव्यापारनिरूपितस्वविषयकबोधजनकत्वरूपसम्बन्धद्वयकल्पने गौरवम्। अत एवानेकगौरवग्रस्तत्वात् पृथक् शक्तिवादो न युक्तियुक्तः। एवञ्च विशिष्ट एव शक्तिः स्वीकरणीया इति नागेशसम्मतिः। उक्तञ्च नागेशेन–**फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्, व्यापारविशेषणकफल-विशेष्यकबोधे कर्मप्रत्ययसमभिव्याहृत-धातुजन्योपस्थितिः कारणम्।** [2] एवं रीत्या कार्यकारणभावद्वयकल्पनम्, धातोरर्थद्वये शक्तिकल्पनं धातोर्बोधजनकत्वसम्बन्धद्वयकल्पनं चातिगौरवम्।

**सिद्धान्तपक्षः-** वस्तुतस्तु पृथक्शक्तिवाद उपन्यस्ता इमे दोषाः विशिष्टशक्तिवाद एवागच्छन्ति, न तु पृथक् शक्तिवादे। प्राचां मते कर्तृप्रत्यये कर्मप्रत्यये चोभयत्रापि व्यापारमुख्यविशेष्यकबोधस्यैव स्वीकृतत्वेन फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृत-धातुजन्योपस्थितिः कारणम्, व्यापारविशेषणकफलविशेष्यकबोधे कर्मप्रत्ययसमभिव्याहृतधातु-जन्योपस्थितिः कारणम् एतादृशी कार्यकारणभावकल्पना पृथक् शक्तिवादिमते नास्ति।

प्रत्युत नागेशमते फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्, व्यापारविशेषणक-फलविशेष्यकबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पना स्वीकर्तव्या, तेषां मते कर्तृप्रत्यये व्यापारमुख्यविशेष्यकबोधस्य, कर्मप्रत्यये च फलमुख्यविशेष्यकबोधस्येष्टत्वात्। एवञ्च कार्यकारणभावद्वय-कल्पनाख्यरूपं गौरवं विशिष्टशक्तिवादे नागेशमते न तु पृथक्शक्तिवादे। किञ्च नागेशाभिमते विशिष्टशक्तिवादे फलावच्छिन्नव्यापारत्वस्य, व्यापारावच्छिन्नफलत्वस्य च शक्यतावच्छेदकत्वे शक्तिनानात्वापत्तिः, नानाशक्यतावच्छेदकत्वादिति महद् गौरवम्।

किञ्च विशिष्टशक्तिस्वीकारे स्तोकं पचतीत्यादौ स्तोकादीनां फलेऽन्वयो न स्यात्, फलस्य पदार्थैकदेशत्वेन "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति न्यायविरोधात्। देवदत्तस्य गुरूकुलम् इत्यादिवदत्राप्येकदेशेऽन्वयः सम्भवत्येवेति न वक्तव्यम् नित्यसाकांक्षस्थल एकदेशान्वयस्वीकारेऽप्यत्र तत्स्वीकारे मानाभावः।

पृथक् शक्तिवादे प्राचां मते त्वेकवृन्तावलम्बितफलद्वयन्यायेन फलव्यापारयोरेकैवशक्तिः खण्डशः स्वीक्रियते। अतः पृथक् शक्तिवादे शक्तिद्वयकल्पनम् न करणीयम्, प्रत्युत नागेशमत एवायं दोषः। तस्मात् पृथक् शक्तिवाद एव श्रेयस्करः।

[1] परमलघुमञ्जूषा, धात्वर्थविचारः पृ0101
[2] परमलघुमञ्जूषा, धात्वर्थविचारः पृ0101

**निष्कर्षः-** नागेशनये भट्टोजिदीक्षितमते कर्मप्रत्ययसमभिव्याहृतस्थले व्यापारविशषणकफलविशेष्यकबोधे कर्मप्रत्ययसमभिव्याहृत-धातुजन्योपस्थितिः कारणम्। किञ्च कर्तृप्रत्ययसमभिव्याहृतस्थले फलविशेषणकव्यापारविशेष्यकबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम् इति या आपत्तिः प्रदर्शिता सा नैव सम्भवति। प्राचीनमते सर्वत्रैव व्यापारमुख्यविशेष्यकशाब्दबोधो भवति। अतःएवम्भूतः दोषो नास्ति ।स्तोकं पचतीत्यादावपि प्राचीनमते एकदेशान्वयापत्तिर्नास्तीति। प्राचीनमते लाघवम् प्रतीयते । इति दिक्

**सन्दर्भग्रन्थसूची –**


- पाणिनि। अष्टाध्यायी। डा.नरेश झा। संस्कृतहिन्दीव्याख्याभूषिता। चौखम्बा सुरभारतीप्रकाशन वाराणसी। 2006
- पाणिनि। अष्टाध्यायी सूत्रपाठः। श्रीनारायणमिश्र। चौखम्बा पब्लिशर्स,वाराणसी। 2006
- नागेशभट्ट। परमलघुमञ्जूषा। नित्यानन्दपर्वतीयटिप्पणीसहिता। जयकृष्णदास-हरिदास गुप्तः।चौखम्बा संस्कृतसीरीज आफिस, विद्या विलास प्रेस ,बनारस सिटी 1946
- नागेशभट्ट। परमलघुमञ्जूषा। भावप्रकाशिका बालबोधिनी संस्कृतहिन्दीव्याख्या। डा.जयशङ्करलालत्रिपाठी। कृष्णदास अकादमी, वाराणसी 1985
- भर्तृहरि। वाक्यपदीयम् ब्रह्मकाण्डम्। भावप्रदीपव्याख्यान। शुक्ल,श्रीसूर्यनारायण। चौखम्बा संस्कृत सीरीज आफिस वाराणसी 1961
- भर्तृहरि। वाक्यपदीयम्।वाचस्पति सत्यकामवर्मा। नई दिल्ली, मुंशीराम मनोहरलाल, वर्षम् 1970
- एन एस रामानुजताताचार्यः। शाब्दबोधमीमांसा। INSTITUTE FRANCAIS DE PONDICHERY RASHTRIYA SANSKRIT SANSTHAN NEW DELHI
- वैयाकरणभूषणसारः। कौण्डभट्टः। सुबोधिनी। द्विवेदी, डा.चन्द्रिका। चौखम्बा सुरभारती प्रकाशन। 2001
- गदाधरभट्टाचार्यः। व्युत्पत्तिवादः। सुदर्शनाचार्यः। आदर्शटीका। राष्ट्रियसंस्कृतसंस्थानम् मानितविश्वविद्यालय नवदेहली। 2011
- भट्टोजिदीक्षित। प्रौढमनोरमा। त्रिपाठी, डा.जयशङ्करलाल। भावप्रकाशिका, भावबोधिनी। कृष्णदास अकादमी, वाराणसी 1986

# निम्बार्काचार्याणां द्वैताद्वैतदर्शनस्य च साम्प्रतिकसमाजे प्रासङ्गिकता

डा. शन्तनुः अयाचितः, सहायकप्राध्यापकः,
रामकृष्णमिशन् विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलूड मठः, पश्चिमवङ्गम्
shantanuoffice12119@gmail.com

**सारांशः-** अस्मिन् शोधपत्रे द्वैताद्वैतमतस्य साम्प्रतिकसमाजे प्रासङ्गिकता इति विचिकित्सायाः समाधानाय यत्नः कृतः वर्तते।

**द्वैताद्वैतदर्शनप्रणेता श्रीमन्निम्बार्काचार्यः ऐतिह्यं च -**

आचार्यस्य ऐतिह्यं पश्यामश्चेत् महाभारतकाले भगवतः श्रीकृष्णस्येहलोकयात्रा समाप्त्यनन्तरं साक्षादेव भगवतः हस्ते विराजमानस्य सुदर्शाभिधस्य चक्रस्यैव भगवतः अनुकम्पया लोकानुग्रहार्थं भुवमवतरणं समभवत्। अत एव श्रीमन्निम्बार्काचार्यरूपेण अवतीर्णं सुदर्शनाख्यं चक्रमेव लोकोपकारकं द्वैताद्वैतदर्शनं बोधयामास इति पारम्परिकानां महती श्रद्धा वर्तते। सनकसम्प्रदायः इति नाम्ना अप्येतं सम्प्रदायं पश्यामः। हंसरूपेणावतीर्णः भगवान् सनकादिभ्यः श्रुतिसारभूतं द्वैताद्वैतदर्शनं बोधयामास। तेभ्य एव श्रीमन्नारदः तां विद्यामधिगम्य तत्रैव द्वैताद्वैतदर्शननिरूपणे श्रुतीनां तात्पर्यम् अस्तीत्यवगम्य तदेव च तत्त्वं सुदर्शनावतारभूतं श्रीमन्निम्बार्काचार्यं बोधयामास इति पारम्परिकाः साम्प्रदायिकाः मन्यन्ते। अतः शङ्कराद्याचार्यप्रणीतेभ्योऽपि अद्वैतद्वैतादिसिद्धान्तेभ्यः प्राचीनतमताऽस्य मतस्य अवगम्यते। श्रीमन्निम्बाराकाचार्यैः विरचिता सामग्री तावत् ब्रह्मसूत्रभाष्यम् - वेदान्तपारिजातसौरभः, श्रीवेदान्तकामधेनुः, मन्त्ररहस्यषोडशी, प्रपन्नकल्पवल्ली,प्रातःस्तवः, श्रीराधाष्टकम् इत्यादिरूपा वर्तते।[1] अन्याः रचनाः अपि तेषामासन्, अधुना नोपलभ्यन्ते। अस्मिन् मते, श्रीमन्निम्बार्काचार्यैः निरूपिते द्वैताद्वैतदर्शने मुख्याः सिद्धान्ताः यथा-

1. द्वैताद्वैतसिद्धान्तः-
2. सर्वभिन्नाभिन्नसिद्धान्तः-
3. प्रेमविशेषलक्षणाभक्तिसिद्धान्तः-

अन्येऽपि विशेषाः अत्र यद्यपि सन्ति किन्त्वाधुनिककाले अपि कथमस्य दर्शनस्य प्रासङ्गिकता इति चिन्त्यः विषयः अतोऽत्रोपरि निर्दिष्टानामेव सङ्ग्रहः क्रियमाणः अस्ति।

**द्वैताद्वैतसिद्धान्तः-**

अस्य सिद्धान्तस्य तात्पर्यभूतः विषयः - श्रुतिः एव परमं प्रमाणमिति सर्वोऽपि मन्वते। किन्तु द्वैतवादोपस्थापकाः अथवा आस्तिकाः, अद्वैतवादोपस्थापकाः स्वेच्छया एकविधामेव श्रुतिमनुसृत्य एकविधमेव मतमुपस्थापितवन्तः। किन्तु तेन समानबलमादधानामपि द्विविधां विरोधार्थप्रतिपादनपरां श्रुतिं सन्दिग्धमनस्काः निरूपयितुं नाशक्नुवन्। अतः श्रीभगवान् निम्बार्कः परमकारुणिकः तुल्यबलवत्त्वादेव उभयश्रुतीनां द्वैताद्वैतयोः द्वयोरपि प्रतिपादनपराणां नान्यतरपक्षपातः युक्त इति आह। अतश्च स्वयमेव द्वैतश्रुतयः अद्वैतश्रुतयश्च अवश्यमेव तत्र प्रमाणभूताः भवन्ति। श्रुतित्वादेव तासां प्रामाण्यम्। श्रुतित्वादेव च परस्परबाध्यबाधकभावो वा गौणमुख्यभावो वा श्रुतिषु न कल्पनीयः। यदि श्रुतिरेव श्रुत्यन्तरबाधिका स्यात्तर्हि प्रमाणान्तरेण श्रुतेरपि बाधिता स्यात्। प्रमाणान्तरानपेक्षस्य वेदस्य स्वतःप्रमाण्यं रवेरिव रूपविषये सिद्धम्। अत एव श्रुतेः न श्रुत्या अपि बाधः। प्रमाणान्तरेण तु, न सुतरां बाधः, तस्य दूरनिरस्तत्त्वात्। अत एव द्वैताद्वैतवादिन्योः श्रुत्योः अबाधितरूपेण यथा तथा अन्वयः वक्तव्यः। तदर्थमेव द्वयोरपि श्रुत्योः प्रामाण्ये सिद्धे सर्वभिन्नाभिन्नत्वविषयकः सिद्धान्तः प्रथितः वर्तते।

अत एव अस्मिन् द्वैताद्वैतमते मतान्तरेभ्यः अन्योपि विशेषः दृश्यते। मतान्तरेषु भगवत्पादशङ्कराचार्यादिप्रतिपादितेषु तदुत्तरवर्तिषु च वेदान्तानां तात्पर्यनिर्णयविषयकः सिद्धान्तः अत्यन्तं महत्त्वमावहति। उपक्रमोपसंहारौ अभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च

---

1 https://hi.wikipedia.org/wiki/%E0%A4%A6%E0%A5%8D%E0%A4%B5%E0%A5%88%E0%A4%A4%E0%A4%BE%E0%A4%A6%E0%A5%8D%E0%A4%B5%E0%A5%88%E0%A4%A4

लिङ्गं तात्पर्यनिर्णये ।। इति प्रसिद्धश्लोकस्थानि तात्पर्यनिर्णायकानि लिङ्गानि आश्रित्य श्रुतीनां तात्पर्यनिर्णये प्रवृत्ताः दार्शनिकाः दृश्यन्ते। तमेव क्रममादाय यद्यपि शास्त्रतात्पर्यं ब्रह्मनिरूपणे इति निम्बार्काचार्याः अपि क्वाचित्कत्वेन बोधयन्ति। तथापि तेषां तात्पर्यनिरूपणे तात्पर्यं नास्ति इति दृश्यते। अत एव समन्वयसूत्रार्थनिरूपणकाले "तज्जिज्ञास्यं विश्वकारणं शास्त्रप्रमाणकं ब्रह्मैव न कर्मादि, तत्रैव प्रतिपादकतया कृत्स्नस्यापि वेदस्य समन्वयात् मुख्यया वृत्त्या अन्वयः समन्वयः तस्मात्। यद्वा वेदेषु तस्यैव प्रतिपाद्यमानतया समन्वयादिति संक्षेपः।"[1] इति आरम्भे उक्त्वा पुनरन्ते कथयन्ति "सर्वभिन्नाभिन्नो भगवान् वासुदेवो विश्वात्मैव जिज्ञासाविषयस्तत्रैव सर्वं शास्त्रं समन्वेतीत्यौपनिषदानां सिद्धान्तः।"[2] इति सर्वथापि शास्त्रस्य ब्रह्मणि समन्वयं दर्शयन्ति। न तु ब्रह्मणः निरूपाधिके वा सोपाधिके वा स्वरूपप्रतिपादने तात्पर्यमिति। अतः भक्तिसम्प्रदायरीत्या सर्वेषां भगवच्चरणयोः प्रीतिः भवतु इति धिया समारब्धं भाष्यम् अथवा भगवत्स्वरूपजिज्ञासोः बोधार्थमारब्धं भाष्यमित्यतः भगवतः स्वरूपे एव तात्पर्यं, न तु श्रुतीनां तात्पर्यनिरूपणे इति अत्र निम्बार्काचार्यमतं स्पष्टरूपेण दृश्यते। अतः अन्ततो गत्वा वेदप्रामाण्यनिरूपणे एव अत्र स्वारस्यं दृश्यते, न तु वेदतात्पर्यकथने इति गम्यते। तात्पर्यस्य वेदैश्च सर्वैरहमेव वेद्यः इति कथनात् पूर्वत एव सिद्धेः न तत् पृथग्वक्तव्यम् इति अभिप्रायः।

**सर्वभिन्नाभिन्नत्वसिद्धान्तः -**

परमेश्वरस्वरूपं जिज्ञास्यं, परमेश्वरः तावत् जिज्ञासासूत्रे भाष्यकृता रमाकान्तः पुरुषोत्तम[3] इत्यभिहितः। सामान्यतस्तु भगवान् श्रीकृष्ण एव अस्मिन् दर्शने परमेश्वरः जिज्ञास्यः इति कथ्यते। तत्र च वेदैश्च सर्वैरहमेव वेद्यः[4] इति भगवदुक्तेः प्रामाण्यं स्वीक्रियते। भगवता एव च ब्रह्मणो हि प्रतिष्ठाहम्[5] इति चोक्तं प्रमाणतः गृह्यते। स च भगवान् लौकिकरीत्या पूजनार्चनादिरूपभक्त्यर्थं कथं समाश्रयणीय इति अग्रे विचारयिष्यामः। प्रकृतं तावत् भगवानेव सर्वभिन्नाभिन्न इति।

सर्वं हि विज्ञानमतो यथार्थकं श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः।
ब्रह्मात्मकत्वादिति वेदविन्मतम् त्रिरूपतापि श्रुतिसूत्रसाधिता।। इति।[6]

वेदान्तकामधेनौ प्रोक्तं वर्तते। अतः द्वैताद्वैतप्रतिपादनं सर्वमपि संभवति। विज्ञानस्वरूपं ब्रह्म, तदात्मकं हि जीवजगतोः अस्तित्त्वम्। अतः ब्रह्मजीवजगतां त्रयाणामपि विज्ञानस्वरूपाणां सत्यत्वमपि सिद्ध्यति। विज्ञानस्वरूपत्त्वादेव याथार्थ्यम्। ततश्च द्वैतश्रुतयः जीवजगतोः परमात्मभेदं निरूपयन्ति। यथा 'द्वा सुपर्णा सयुजा सखाया' [7] 'ऋतं पिबन्तौ सुकृतस्य लोके' [8] इत्याद्याः जीवब्रह्मभेदग्राहिकाः सन्ति। ततश्च 'पराऽय शक्तिर्विविधैव श्रूयते, स्वाभाविक ज्ञान बल-क्रिया च'[9] 'सर्वांल्लोकानीशते ईशनीभिः'[10] 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभि संविशन्ति'[11] । 'नित्यो नित्यानां चेतश्चचेतनानामेको बहूनां यो विदधाति कामान् [12] अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।'[13] 'भोक्ता भोग्यं प्रेरितारं च मत्त्वा' इत्यादि श्रुतिः भोक्ताभोग्यप्रेरयितॄणां स्वरूपाधिगमात् मोक्षं निरूपयन्ती तावत् भोग्यभूतस्य प्रपञ्चस्य सत्तां पार्थक्येन गमयति। इत्थं जीवजगतोः ब्रह्मभेदः परमात्मभेदः श्रुतिसिद्धः। अद्वैतश्रुतिरपि जीवजगतोः ब्रह्माभेदं निरूपयति। जीवब्रह्मणोरभेदग्राहिकाः श्रुतयः- 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्याद्याः

1 वेदानतपारिजातसौरभे १.१.४
2 तत्रैव
3 वेदानतपारिजातसौरभे १.१.१
4 भ. गी. १५.१५
5 तत्रैव १४.२७
6 दशश्लोकी (वे. का. ७ )
7 मुण्डकोपनिषत् ३.१.१
8 कठोपनिषत् १.३.१
9 श्वे. उ. ६/८
10 (श्वे० ३/१)
11 (तै० ३/१/१)
12 (कठ० ५/१३)
13 (गीता १०/८)

सन्ति। जगद्ब्रह्मणोः अभेदोऽपि 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः' 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' [1] आत्मा वा इदमेकमासीत्'[2], तत्त्वमसि'[3] 'अयमात्मा ब्रह्म'[4] सर्वं खल्विदं ब्रह्म'[5] मयि सर्वमिदं प्रोतं सूत्रे मणि गणा इव'[6] इत्यादिश्रुतिवाक्यैः गम्यते। अतः जिज्ञासुः जिज्ञासा जिज्ञास्यः एतत् त्रितयमध्ये जिज्ञास्यात् प्रमेयभूतात् ब्रह्मणः जिज्ञासोः जिज्ञासायाः जीवस्य जगतः च अभेदः अपि अद्वैतश्रुतिसन्निधानात् सिद्धः।

अत एव द्वैताद्वैतयोः द्वयोरपि प्रतिपादकश्रुतीनां प्रामाण्येन सर्वभिन्नाभिन्नः ईश्वरः इति सिद्ध्यति। एतत्सिद्धये रविकिरणदृष्टान्तः एतस्मिन् शास्त्रे प्रसिद्धः अस्माभिः समादर्तव्यः। स च इत्थम्। रविः यथा स्वकिरणेभ्यः भिन्नः अभिन्नश्च वर्तते। रविकिरणाः रवेः सकाशात् स्वभावतो भिन्नाः किन्तु स्वातन्त्र्येण तैः किमपि कर्तुं न शक्यते। रवेरभावे तेषां स्थितिः नास्ति। तस्मात् रवेरभिन्नाः अपि सन्ति इति दृष्टान्तः। सिद्धान्तसमन्वयस्तु जीवा अपि ब्रह्मणो अंशभूताः अंशाो नानाव्यपदेशात्,[7] तत् एतत् सत्यं यथा सुदीप्तात् पावकात् सरूपाः विस्फुलिङ्गाः सहस्रशः प्रभवन्ते ह सौम्य विविधाः भावाः अक्षरात् प्रजायन्ते तत्र एव अपि यन्ति च ॥[8] इत्यादि सूत्रश्रुतिप्रामाण्यात्। ममैवांशो जीवलोके इति भगवदुक्तेश्च। अतः जीवानां भगवदंशभूतानां भगवतः सकाशात् पृथक् स्थितिः किन्तु भगवदिच्छां सङ्कल्पं वा विहाय न जीवसङ्कल्पाः सम्भवन्ति। अतः सर्वे जीवाः भगवदभिन्ना एव। अत्रेदमवधेयं यत् जीवा एव भगवदभिन्नाः न तु भगवान् जीवेभ्यः अभिन्न इति। भगवन्निष्ठतया एव सर्वस्य जीवजगद्रूपस्य प्रपञ्चस्य भिन्नाभिन्नत्वं श्रुतिभिः प्रतिपाद्यते। न तु जीवजगन्निष्ठतया। तस्मात् सर्वभिन्नाभिन्नः रमाकान्तः पुरुषोत्तमः भगवान् श्रीकृष्ण इति सिद्धम्। इदानीं भगवन्निम्बार्कप्रणीतस्य ब्रह्मसूत्रभाष्यस्य चतुस्सूत्र्यां विद्यमानान् मुख्यान् अंशान् ब्रह्मणः सर्वभिन्नाभिन्नत्वसाधनाय द्रक्ष्यामः।

प्रत्येकमपि ग्रन्थस्य अनुबन्धचतुष्टयं भवत्येव। तथाऽत्र द्वैताद्वैतप्रतिपादकस्य भाष्यस्य अपि अधिकारीविषयसम्बन्धप्रयोजनात्मकमनुबन्धचतुष्टयं वर्तते। तत्राधिकारिणः गुरूपसदनम् अतीव प्रमुखतया विहितमस्ति। तच्च तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् , तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया इति श्रुतिस्मृतिभ्यां विहितम्। साधनचतुष्टयसम्पन्नेन अधिकारिणा गुरुमार्गमुपगतेन मुमुक्षुणा जिज्ञासुना ब्रह्मजिज्ञासा एव कर्तव्या इति। जिज्ञासासूत्रार्थं वर्णयद्भिः निम्बार्कपादैः स्पष्टमेवागादि- मुमुक्षुणाऽनन्ताचिन्त्यस्वाभाविक-स्वरूपगुणशक्त्यादिभिर्बृहत्तमो यो रमाकान्तः पुरुषोत्तमो ब्रह्मशब्दाभिधेयस्तद्विषयिका जिज्ञासा सततं सम्पादनीयेत्युपक्रमवाक्यार्थः ॥ १ ॥[9] इत्यादिना। ततश्च जिज्ञास्यब्रह्मलक्षणे वक्तव्ये चिदचिद्रूपस्य विश्वस्य सृष्टिस्थितिलयाः यस्मात् सार्वज्ञ्याद्यनन्तगुणाश्रयात् ब्रह्मेशकालादिनियन्तुर्भगवतो भवन्ति तदेव ब्रह्म इति।[10] चोक्तम्। अनेन अवगम्यते यत् द्वैताद्वैतमते सृष्टिस्थितिलयकारणं श्रीपुरुषोत्तमो भगवान् कृष्ण इति। स एव च नारायणः सर्वेषामपि ब्रह्मेशकालादीनां नियन्ता इति च।

नान्या गतिः कृष्णपदारविन्दात् सन्दृश्यते ब्रह्मशिवादिवन्दितात्।
भक्तेच्छयोपात्त सुचिन्त्यविग्रहात् अचिन्त्यशक्तेरविचिन्त्यसाशयात्।।[11]

ईदृशे ब्रह्मस्वरूपनिरूपणे किं प्रमाणमिति शङ्कायां शास्त्रमेव प्रमाणमिति प्रोक्तं वर्तते। शास्त्रं तु भगवन्निश्वाससमम् अतः भगवतः अप्राकृतः नित्यश्च विग्रहः वेद इति तस्यैव प्रामाण्यं, नान्यस्य इति चिन्त्यते।[12] इति निम्बार्कपादवचनम्। ततश्च समन्वयाधिकरणे

1 (छा० ६/२/ १)
2 (तै०२/१)
3 (छा./१४/ ३)
4 (बृ० २/५/१६)
5 (छा. ३/१४/१)
6 (गी, ७/७/)
7 ब्र. सू. २.३.४३
8 मुण्डकोपनिषत् २.१.१
9 वेदानतपारिजातसौरभे १.१.१
10 वेदानतपारिजातसौरभे १.१.२
11 दशश्लोकी (वे. का. ८)
12 वेदानतपारिजातसौरभे १.१.३

स्ववचोभिरेवाचार्यैः सर्वभिन्नाभिन्नः ईश्वर इति प्रत्यपादि तद्यथा - सर्वज्ञः सर्वाचिन्त्यानन्तशक्तिर्विश्वजन्मादिहेतुर्वेदैकप्रमाणगम्यः सर्वभिन्नाभिन्नो भगवान् वासुदेवो विश्वात्मैव जिज्ञासाविषयः तत्रैव सर्वं शास्त्रं समन्वेतीत्यौपनिषदानां सिद्धान्तः।[1] इति। अस्य च निरूपणस्य मूलं नारदमहापुराणमित्यतः तद्गतमपि प्रामाण्यं साम्प्रदायिकाः यच्छन्ति। तद्यथा -

अन्तर्यामी जगद्रूपी सर्वसाक्षी निरञ्जनः।
भिन्नाभिन्नस्वरूपेण स्थितो वै परमेश्वरः।। [2]इति।

अत्र समन्वयश्च इत्थं - जीवः जगत् च ब्रह्मणः शक्तिरूपं वर्तते। शक्तिश्च अलुप्तस्वभावा अतः त्रयाणामपि ब्रह्मजीवजगतां पारमार्थिकत्वम्। शक्तिशक्तिमतोः भेदाभेदः सम्बन्धः। अतः ब्रह्मणः शक्तिमतः शक्त्याकारेण जीवेन जगता च साकं भेदाभेदः सम्बन्धः। स च नित्यः स्वाभाविकश्च। अत एव परमेश्वरः भिन्नाभिन्नरूपेण स्थितोस्ति इति सङ्गच्छते। तस्मात् ब्रह्मसूत्रदिशा, नारदमहापुराणदिशा अपि सिद्धं यत् सर्वभिन्नाभिन्नः परमेश्वर इति।

इदानीं जिज्ञास्य-भूतस्य ब्रह्मणः प्राप्तये उपायाः विचार्यन्ते। ते उपायाः भक्त्यादय एव सम्यक् अनुष्ठिताः साम्प्रतिककाले प्रासङ्गिकतां प्राप्नुवन्ति इति सिद्धं भविष्यति।

**प्रेमविशेषलक्षणाभक्तिसिद्धान्तः -**

भक्तिशास्त्रे अेनकानि भक्तिलक्षणानि अनेकैः दार्शनिकैः निरूपितानि सन्ति। तत्र अद्वैतिभिः स्वस्वरूपानुसन्धानं भक्तिः[3] इति कथितं वर्तते। किन्तु द्वैतमतानुसारेणैव भगवद्भक्तयोः भेदं प्रपश्यद्भिः निम्बार्काचार्यैः यद्यपि दासस्वामिभावः भगवद्भक्तयोः नादृतः तथापि अंशांशिभावमात्रमादायापि जीवब्रह्मभेदं प्रतिपादयद्भिः भगवद्भक्तिः कर्तव्या तदा एव मोक्षः सिद्ध्यति इति निरूपितं वर्तते। सा च भक्तिः प्रेम विशेषलक्षणा अभिप्रेता अस्ति। उक्तं च वेदान्तकामधेनौ -

कृपास्य दैन्यादियुजि प्रजायते यया भवेत्प्रेमविशेषलक्षणा।
भक्तिर्ह्यनन्याधिपतेर्महात्मनः सा चोत्तमासाधनरूपिकाऽपरा।। [4]

इयं प्रेमवात्स्यल्यादियुक्ता भक्तिः सकामबुद्ध्या क्रियमाणा सत्यपि श्रेष्ठा प्रमुखा वर्तते अतः अपरा भक्तिः इति कथ्यते। अत एव दैन्यादियुक्तः भगवच्छरणागतः भगवानेव मम आश्रयः। नान्यमाश्रयं समाश्रये इति यश्चिन्तयन्ति स अनन्यभक्तः तदुपरि भगवान् कृपां करोति तदा भगवतः विशेषभक्तिः जायते। सा कृपाजन्या भगवद्भक्तिः एव प्रेमविशेषलक्षणा उत्कृष्टा साधनरूपिका वर्तते। ततः परा प्रेमविशेषलक्षणा एव साध्यात्मिका अनन्यभावरूपा भक्तिः ज्ञानपूर्विका भवति। ज्ञानपूर्वकत्त्वादेव तस्याः परात्वं वर्तते। अनया एव भक्त्या सामीप्यसायुज्यसालोक्यसारूप्यादिरूपासु मुक्तिषु अन्यतमां, सायुज्यरूपां वा मुक्तिं लभते। जीवन्मुक्तिः अस्मिन् दर्शने नास्ति। देहपातानन्तरं मुक्तः ब्रह्मसमानमानन्दं लभते किन्तु ऐश्वर्यादेः समानतायामपि तत्र सृष्टिकर्तृत्वादिकं तस्य जीवन्मुक्तस्य न भवति। इति भक्तेः मुक्तिहेतुत्वं ज्ञात्वा, सा एव अनुष्ठेया इति भावः।

तस्मादाधुनिके साम्प्रतिके वा समाजे प्राचीनैः सत्पुरुषैः यद्भक्तिरूपं साधनं समाश्रयणीयतया प्रोक्तं तदेव प्राचीनकाले प्रोक्तमपि अधुनापि समानाकारेण फलं जनयति इत्यनुभववतां वाक्यम्। अतः तेषु शिष्टेषु विश्वासं कृत्वा भक्तिमार्गेणात्मकल्याणं सर्वैः सम्पादनीयम् इति हेतोः अपरा भक्तिः सर्वेषां सिद्ध्यतात् इति प्रयत्नः कार्यः।

लोककल्याणाय समाजोत्थानाय नैके यत्नाः सर्वदा प्रशासनद्वारेण क्रियमाणाः सन्त्येव किन्तु आधुनिककाले सर्वकारद्वारेण कर्तव्यः यत्नः अत्यन्तमल्पः क्रियमाणः दृश्यते। तस्यापि अपेक्षितस्यांशस्य पूर्तिः भगवद्भक्तानां चित्ते यदि स्वाभाविकी भक्तिरुदेति तर्हि भवत्येव इति दार्शनिकानां श्रद्धा । अतः निम्बार्कमतम् इदमतीव प्राचीनमपि साम्प्रतिकसमाजे भक्तिशास्त्रनिरूपणमुखेनोत्तमं स्थानमलङ्करोति इति शम्।

---

1 वेदानतपारिजातसौरभे १.१.४
2 नारदपुराणे
3 विवेकचूडामणिः ३२
4 दशश्लोकी (वे. का. ९)

**गुरुशिष्यपरम्परा -**

गुरुशिष्यपरम्परायाः अत्यन्तं महत्त्वं सर्वेषु सम्प्रदायेषु वर्तत एव। सर्वे अपि सम्प्रदायाः यस्मात् गुरोः आरब्धाः, स कीदृशीं दीक्षां लब्धवान्, कथं च सः स्वगुरुणा आदिष्टः सन् भगवत्प्राप्तिं कृतवान् इति इत्यादिकं विचारविषयतां प्राप्नोति। यतो हि येन मार्गेण आचार्यः उपदिशति तेनैव मार्गेण शिष्यः गच्छति। तमेव च मार्गं मोक्षप्रापकं स्वशिष्येभ्यः अपि निर्दिशति। अतः पम्परायाः आरम्भः कुतः इति ज्ञातव्यमेव। यद्यपि जात न पूछो साधु की पूछ लीजियो ज्ञान, न ऋषीनां कुलं पृच्छेत्, मूूलं नद्यास्तथैव च। इत्याभाणकं वर्तते, निन्दितमतिभ्यो ह्येवायं व्यपदेशः अतः अनिन्दितया बुद्ध्या तदन्वेषणं तूपयुक्तमेव भवति। अतः विचारयामः।

श्रीहंसभगवान् - सनकादयः आचार्याः- श्री भगवान् नारदः - ततश्च श्रीमन्निम्बार्काचार्यचरणाः इति क्रमः अत्र दृश्यते। श्रीहंसरूपेणावतीर्य भगवान् सनकादिभ्यः गीतोपदेशं कृतवान् इति महाभारतप्रामाण्यात् बुध्यते। श्रीहंसभगवता साध्यगणेभ्यः सनकादिभ्यः कृतः उपदेशः हंसगीतायां महाभारते वर्तते। तत्र नवनवत्यधिकद्विशततमे अध्याये शान्तिपर्वणि अयं संवादः वर्तते। भीष्म उवाच – अत्र ते वर्तयिष्येऽहम् इतिहासं पुरातनम्। साध्यानामिह संवादं हंसस्य च युधिष्ठिर॥२॥ हंसो भूत्वाथ सौवर्णस्त्वजो नित्यः प्रजापतिः। स वै पर्येति लोकांस्त्रीनथ साध्यानुपागमात्॥३॥ इति आरभ्यते। ततश्च ते एव सनकाद्याचार्याः सर्वज्ञाः नारदं प्रत्युपदेशमकार्षुः, स चोपदेशः श्रीमन्नारदीयमहापुराणे वर्तते - तद्यथा -

अन्तर्यामी जगद्व्यापी सर्वसाक्षी निरञ्जनः॥
भिन्नाभिन्नस्वरूपेण स्थितो वै परमेश्वरः॥ २६ ॥

अतः अखिलतत्त्वसाक्षिणे नारदाय भगवान् स्वकीयं भिन्नाभिन्नं स्वरूपं विज्ञापयामास। तमेवांशं मनसि निधाय नारदेन भगवता श्रीमन्निम्बार्काचार्यं प्रति भेदाभेदवादः समुपदिष्टः। अतः अद्वितीयं ब्रह्मैव भेदाभेदात्मना स्थितमस्तीति साम्प्रदायिकं मतं परिपोषितं भवति।

गुरुपम्परायाः इत्थमवगमे जाते, अवबुद्ध्यते यत् श्रीमन्निम्बार्काचार्यः भक्तिवेदान्तपरम्परायामेव प्राप्तः अतः भक्तिमेव द्रढयितुं तत्र तत्र भक्तैराराधनीयपरमात्मस्वरूपं बुबोधयिषुरेव सन् द्वैतमद्वैतं चोभयं समन्वयत् स्वशास्त्रमतं दृढीकृतवान् इति। कीर्तनपरम्परायाः आरम्भ एव भगवता नारदात् जातः। अतः भगवत्भक्तेः नवविधायाः अपि प्रबोधकः प्रवर्तको वा भगवान् नारदः, तच्छिष्यत्त्वादेव अत्र निम्बार्कसम्प्रदायस्यापि भक्तौ साग्रहं प्रवर्तनं दृश्यते। तत्रैव शङ्कराचार्याः भगवत्पादाः -

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रं पराशरं च।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्॥

इति प्रसिद्धपद्येनोक्तायां परम्परायां प्राप्नुवन्ति। तत्र यद्यपि भक्तेः गौरवपूर्णं स्थानमस्त्येव किन्तु ज्ञाननिष्ठायाः प्राधान्यमस्ति। अतः शास्त्रे भक्तिप्राधान्येन निरूपणं न दृश्यते अपि भक्तिरेव ज्ञानमिति भक्तेः अपि ज्ञानत्वसम्पादनपूर्वकं निरूपणं दृश्यते। अतः गुरुपरम्परायाः माहात्म्यं तत्कारणात् वैलक्षण्यं चात्र गम्यते। अत एव चाधिकारभेदेन आचार्यैः सर्वैरपि साधनानि प्रोक्तानि तत्र सामान्यं भक्तिरिति साधनं तु सर्वसम्मतमिति न शङ्कापि कार्या।

**शिष्यपरम्परा -** सर्वेषामपि सम्प्रदायानां यथा गुरुपरम्परा प्रमुखा वर्तते। गुरुणा यत्कार्यं स्वजीवने सम्पादितं तस्य कार्यस्य, तदुद्देश्यस्य अग्रे नयनं शिष्याः कथं कुर्वन्ति इति शिष्यपरम्परायाः वैभवेन अववगम्यते। अद्वैतपरम्परायां तु कर्तृत्वभावस्य त्यागेन एव आत्मनि स्थितेन आचार्येण भाष्यग्रन्थान् विरचय्य लोकोपकारः कृतः अतः आचार्यदृष्ट्या तु कर्तृत्वमेव नास्ति इथि कार्यस्य अग्रे नयनमित्यादिकं परमार्थतः विचारार्हमेव न भवति। अथापि शाङ्करसम्प्रदाये नैकाः टीकाः, टीकानां टीकाः इति विस्तरः बहूत्र आत्मसाक्षात्काराभावयुक्तैः एव कृतः दृश्यते। किन्तु भक्तिसम्प्रदाये मुक्तिः जीवन्मुक्तित्त्वेन नादृता। अतः भजनमेव जीवनस्य लक्ष्यमिति निश्चितं भवति। तदेव मनसि निधाय ये भक्ताः गुर्वाज्ञया प्रवृत्ताः., तैः च ये ग्रन्थाः स्वगुरोः पक्षरक्षणाय अथवा स्वाधीतसम्पद्विवेचनाय कृताः सन्ति, यथा वेदान्तपारिजातसौरभस्य वेदान्तकौस्तुभाख्यं व्याख्यानं श्रीनिवासाचार्येण कृतं दृश्यते। इत्थमनेके शिष्याः सर्वेषामपि सम्प्रदायानां परिपोषकाः वर्तन्ते इदमेव गौरवमस्माकं दार्शनिकजगतः वर्तत इति शम्।

# न धातुलोप इति सूत्रप्रत्याख्यानविमर्शः

डा.सुखदेवभट्टः
सहायकाचार्यः,संस्कृत एवं दर्शनविभागः
रामकृष्ण मिशन विवेकानन्द शैक्षणिक एवं शौध संस्थानम्
हावरा , बेलुर मठ
दूरवाणीसंख्या- 9901860092

**साङ्केतिकशब्दाः- बेभिदिता, मरीमृजकः, कुषुभिता, समिधिता, वैयाकरणः, लोलुवः,मरीमृजः ।**

**अवतरणम्-** भाष्यकारैः **न धातुलोप आर्धधातुके** इति सूत्रस्य प्रत्याख्यानाय वार्तिकमारब्धम् **अनारम्भो वा**[1] इति। तदा प्रश्नः जातः तर्हि कथं बेभिदिता, मरीमृजकः, कुषुभिता, समिधिता इत्यादिरूपेषु गुणो वार्यते इति। तदा उक्तं भाष्यकारैः अत्रापि अकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यत इति। इत्युक्तेऽयमभिप्रायः यथा बेभिद् य तृ इत्यवस्थायाम् **अतो लोपः**[2] इति सूत्रेण अकारलोपे ततो **यस्य हलः**[3] इति सूत्रेण य् इत्यस्य लोपे बेभिद् तृ इत्यवस्थायां गुणः प्राप्नोति तदा **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण परनिमित्तस्य (आर्धधातुकनिमित्तस्य) आदेशस्य (अल्लोपरूपादेशस्य) स्थानिवद्भावः क्रियते, स्थानिभूताद् अचः (अकाराद्) पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये गुणे कर्तव्ये। तथा च स्थानिभूतेन अकारेण मध्ये व्यवधानाद् आर्धधातुकप्रत्ययपरत्वाभावेन गुणावकाशो नास्ति इति न दोषः। तदुपरि पुनः भाष्यकारैः आक्षेपः कृतः तर्हि यत्र अज्झलोः लुगादेशो भवति तत्र **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण स्थानिवद्भावः न क्रियते। यथा लोलुव पोपुवः मरीमृजः सरीसृप इति। अत्र गुणवृद्धिवारणार्थमवश्यं सूत्रं वक्तव्यं खलु इति चेत्, तत्र पुनः अभिहितम्, अत्रापि अकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यत इति। इत्युक्ते पूर्ववद् अत्रापि लोलू य अ इत्यवस्थायाम् **अतो लोप** इति अल्लोपे पुनः **यस्य हलः** इति सूत्रेण य लोपे अल्लोपस्य **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण स्थानिवद्भावे च व्यवधानाद् एव गुणवृद्धी न भविष्यत इति। ननु अत्र लोलू य अ इत्यवस्थायां पूर्वमल्लोपो भवति, अथवा ततः प्राग् **यङोऽचि च** इति सूत्रेण समुदायरूपय इति शब्दस्य लोपो भवति इति प्रश्ने तत्र उक्तं परत्वादल्लोपः भवति। परन्तु नित्यो लुग् अल्लोपे कृतेऽपि प्राप्नोति अकृतेऽपि। तथा च कृताकृतप्रसङ्गित्वाल्लुकि प्राप्त उक्तं लुगपि अनित्यः कृते अन्यस्य प्राप्नोति अकृते अन्यस्य **शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति**[4] इति। पुनः उक्तम् अनवकाशस्तर्हि लुग् इति। **येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति**[5] इति न्यायेन **अतो लोपः** इति सूत्रेण नाप्राप्ते अल्लोपे **यङोऽचि च** इति यङो लुग् आरभ्यते अतोऽतो लोपः इत्यस्य बाधको भवति इति। तदनन्तरं उक्तं लुक् सावकाश इति। कुत्र इति चेद् अवशिष्टे, य् इत्यत्र इति। **अतो लोपः** इति सूत्रेण अल्लोपे सति तदनन्तरं यः य् इति अवशिष्यते तत्र **यङोऽचि च** इति सूत्रस्य चारितार्थ्यम्। तथा च **अतो लोपः** इति सूत्रस्य अकारे **यङोऽचि च** इति सूत्रस्य अवशिष्टे यकारे प्रवृत्तेः परस्परं विषयभेदाद् बाध्यबाधकभाव एव न भवति इत्यर्थः। एवञ्च परत्वादेव अतो लोप इति सूत्रेण पूर्वमल्लोपे ततो **यङोऽचि च** इति सूत्रेण यकारलोपे लोलुव इत्यादौ च न दोषः।

एवमग्रे भाष्ये पुनः अस्मिन्विषये विचारः कृतः, अथापि कथञ्चिदनवकाशो लुक् स्याद् इत्यादिना। यदि अल्लोपस्य य लोपोऽपवादो भवति तदापि न काचिद् क्षतिः। यतो हि अल्लोपे (अतो लोप इति सूत्राद् उत्तरसूत्रे **यस्य हलः**[6] इत्यत्र) योगविभागः क्रियते। यस्य इत्यत्र अत इत्यस्य अनुवृत्तिः भवति। तथा च यस्य अवयवस्य अकारस्य लोपो भवति इति सूत्रार्थः सिध्यति। योगविभागस्य इष्टसिद्ध्यर्थत्वेन च **यङोऽचि च** इति सूत्रस्य अनेन **यस्य** इति सूत्रेण बाधे सति तस्य अवशिष्टे यकारे प्रवृत्तिरिति नास्ति दोषावकाशः। तथा च भाष्यम् अथापि कथंचिदनवकाशो लुक् स्याद् एवमपि न दोषः। अल्लोपे योगविभागः

[1]महा.भा.पृ.सं.207
[2]अष्टा.6.4.48
[3]अष्टा.6.4.49
[4]परि.शे.परि.सं.44
[5]परि.शे.परि.सं.59
[6]अष्टा.6.4.49

करिष्यते **अतो लोपः।** ततः **यस्य,** यस्य च लोपो भवति। अत इत्येव किमर्थमिदम्? लुकं वक्ष्यति तद्बाधनार्थम्। ततो हलो हलुत्तरस्य च यस्य लोपो भवतीति।

**कैयटमतम्-** भाष्यकारैः **यङोऽचि च** इति सूत्रस्य अनवकाशत्वं विशङ्क्य तदनन्तरं सावकाशो लुग् अवशिष्टे यकारे तस्य चारितार्थ्याद् इति उक्तम्। तत्र उद्द्योतनकारैः उच्यते सावकाशो लुगिति भाष्यस्य अयमाशयः, यद्, भिन्नविषयौ लुग्लोपौ **अतो लोपः**[1] इति सूत्रेण अल्लोप सति तदनन्तरं यः य् इति अवशिष्यते तत्र **यङोऽचि च** इति सूत्रस्य चारितार्थ्यम्। तथा च **अतो लोपः** इति सूत्रस्य अकारे **यङोऽचि च** इति सूत्रस्य अवशिष्टे यकारे प्रवृत्तेः परस्परं विषयभेदाद् बाध्यबाधकभाव एव न भवति इति। यदि विषयभेदेऽपि बाध्यबाधकभावो वर्तते इति उच्यते, तर्हि अभवन् इत्यादौ झिप्रत्यये इकारस्य लोपः **इतश्च** इति प्राप्नोति। झ् इत्यस्य **झोऽन्तः** इत्यनेन अन्तादेशः प्राप्नोति। तथा च अत्र **इतश्च** इति सूत्रेण **झोऽन्तः** इति सूत्रमपि बाध्येत इति। अतः समानविषयकत्वे एव बाध्यबाधक इति वक्तव्यम्। अत एवाल्लोपस्य लुग् अपवादो नास्ति इति। तत्रैव यदा भाष्यकारैः अथापीत्यादिना यलोपस्य अनवकाशत्वम् आशङ्क्य योगविभागेन समाहितम्। तदा उद्द्योतनकारा वदन्ति यद्यपि अल्लोपे जाते यकारे लुकः प्रवर्तनाद् विषयभेदः वर्तते, तथापि **यङोऽचि च** इति सूत्रे यङ इति समुदायनिर्देशः वर्तते। तथा च यकाराकारसमुदायस्य यङः इति निर्दिष्टस्य विवक्षितत्वाद् अवयवे च यङ्व्यपदेशस्य गौणत्वाद् यकाराकारसमुदायस्य अर्धाधिकेन विकृते केवले यकारे **यङोऽचि च** इति सूत्रस्य अप्रवृत्तेः तस्य अनवकाशत्वमिति भाष्यं संगतमेव इति। योगविभागे कृते तु योगविभागस्य इष्टसिद्ध्यर्थत्वेन गौणेऽपि अर्धयकारे तस्य प्रवृत्तिः सामर्थ्यगम्या इति भावः।

**नागेशभट्टमतम्-**नाप्राप्ते लोपे लुगारम्भस्य करणाद् अनवकाशत्वं **यङोऽचि च** इत्यस्य आशङ्क्य अवशिष्ट अर्धयकारे सावकाशत्वं वदतो भाष्यकारस्य भिन्नविषयत्वेन बाध्यबाधकभावाभावे तात्पर्यमिति यदुच्यते तच्चिन्त्यम्। यतो हि भिन्नविषयस्थलेऽपि बाध्यबाधकभावो शास्त्रे बहुत्र प्रसिद्धः। यथा **व्यथो लिटि**[2] इति सूत्रस्य **हलादिः शेषः**[3] इति सूत्रबाधकता। **व्यथो लिटि** इति सूत्रेण व्यथ भयसंचलनयोः इति धातोः अभ्यासस्य संप्रसारणं भवति लिटि परे। यथा विव्यथे इति। अत्र व्यथ् व्यथ् ए इत्यवस्थायां **हलादिःशेषः** इति सूत्रेण यलोपः अपि प्राप्तः तत्रैव **व्यथो लिटि** इति सूत्रेण सम्प्रसारणमपि प्राप्तं यद्यपि वकारे **व्यथो लिटि** इति सूत्रस्य चारितार्थ्यं वर्तते, तथापि तेन **हलादिः शेषः** इति सूत्रस्य बाधो भवति। अत एव विव्यथ इति रूपं सिध्यति।अत्र **व्यथो लिटि** इति सूत्रस्य वकारे चारितार्थ्येऽपि हलादिशेषबाधकता दृष्टा। विषयभेदे न बाध्यबाधकभाव इत्यत्र भाष्याशयः इति न वाच्यम्। तथैव अन्यत्रापि यथा **मिदचोऽन्त्यात्परः** इति सूत्रस्य प्रत्ययपरत्वबाधकत्वम्। यथा श्नमादिप्रत्ययेषु प्रत्ययः परश्च इति सूत्राभ्यां प्रकृतेः परे श्नमादयः प्राप्नुवन्ति। तत्रैव **मिदचोऽन्त्यात्परः** इति सूत्रेण अन्त्यादचः परः प्राप्नोति, अपवादत्वाद् **मिदचोऽन्त्याद्** इति शास्त्रं **परश्च** इति शास्त्रं बाधते। अत्र यद्यपि उभयोः परस्परं विषये विभिन्नता दृश्यते, तथापि भाष्यकारैः अपवादत्वं समर्थितम्, आतश्च विषयभेदाद् बाध्यबाधकभावाभाव इति वचनं न युक्तम्।

अथ च अत्र अथापीत्यादिभाष्यसमर्थनाय यदुक्तम्, यद्यपि अल्लोपे जाते यकारे प्रवर्तनाद् विषयभेदो वर्तते तथापि **यङोऽचि च** इति सूत्रे यङ इति समुदायनिर्देशः वर्तते। तथा च यकाराकारसमुदायस्य यङः इति निर्दिष्टस्य विवक्षिततत्वाद् अवयवे च यङ्व्यपदेशस्य गौणत्वाद् अर्धयकारे **यङोऽचि च** इति सूत्रस्य अप्रवृत्तेः तस्य अनवकाशत्वमिति भाष्यं संगतमेव इति, तदपि चिन्त्यम्। **यङोऽचि च** इति सूत्रे यङ इति निर्देशः वर्तते, लक्ष्ये यङः अभावाद् एकदेशविकृतन्यायेन यङ्त्वमतिदिश्यते। यत्र च यकाराकारसमुदायस्य लुगुच्यते बोभवीतीन्यादौ, तत्रापि य इत्येतस्मिन् यङ्त्वे हि इत्संज्ञकङकारोपलक्षिततवज्ञानस्य दुर्वारत्वेन, तस्य च अतिदेशम् अन्तरा असिद्धेः अतिदेशस्य अवश्याश्रयणीयता तत्र। तथा च अतिदेशो मुख्याभावे प्रयुज्यते गौणे। तत्रच मुख्यातिदेशो गौणातिदेश इति व्यवहारस्य अभावाद् अतिदेशविषये गौणत्वाङ्गीकारे अतिदेशवैयर्थ्यापत्तेश्च यङ्त्वव्यपदेशस्य गौणत्वाद् अर्धयकारे **यङोऽचि च** इति सूत्रस्य अप्रवृत्तिरिति न युक्तम्। अपि तु कथञ्चिदित्यस्य असम्भवे एव बाधकत्वमिति वार्तिक-मतानुयायिना सावकाशो लुगिति उक्ते सति कृते चारितार्थ्येऽपि तत्प्राप्तिकालेऽवश्य प्राप्त्या विषयभेदेपि बाध्यबाधकभावो(अपवादत्वम्) भवत्येव।

---

[1]अष्टा.6.4.48

[2]अष्टा.7.4.68

[3]अष्टा.7.4.60

योगविभागेन यस्य इति सूत्रेण सर्वत्र यङ्स्थले अकारलोपो न भवति, अपि तु क्वचिदेव। एतच्च **भ्रस्जोरोपधयोरमन्यतरस्याम्**[1] इति सूत्राद् अस्मिन् सूत्रे मण्डूकप्लुत्त्या अन्यतरस्यामिति अनुवर्त्य तस्य च व्यवस्थितविभाषाश्रयणेन च सिद्ध्यति। ननु अस्मिन् सूत्रे अन्यतरस्यामिति अनुवर्तते इति उच्यते चेत्, तर्हि मरीमृजः इत्यादौ विकल्पेन गुणाभावः स्यात्, यस्मिन् पक्षे अल्लोपः तस्मिन् पक्षे गुणाभावः। यस्मिन् पक्षे समुदायलोपः तस्मिन् पक्षे गुणः इति, चेन्न तत्रापि व्यवस्थितविभाषाश्रयणाद् विकल्पो वारयितुं शक्यते। अथवा मरीमृजः इत्यादौ विकल्प इष्ट एव। तथा च सूत्रसत्त्वे एतादृशवैकल्पिकरूपस्य असिद्धेः तदर्थं योगविभागस्यावश्याश्रयणीयतया लाघवाद् सूत्रप्रत्याख्यानमेव युज्यते।

ननु लोलुवः इत्यादौ अल्लोपे, यलोपे च लो लू अ इति जाते **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इति सूत्रेण उवङादेशे लोलुव् अ इति जाते इदानीं **पुगन्तलघूपधस्य च** इति सूत्रेण गुणः प्राप्तः, तद्वारणाय अवश्यमेतद् सूत्रं वक्तव्यम्, न च कृतस्य अल्लोपस्य **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण स्थानिवद्भावेन इष्टसिद्धिः इति वाच्यम्, अनादिष्टादचः पूर्वविधिर्यत्र तत्रैव अस्य सूत्रस्य प्रवृत्तेः। यदि तस्मिन् सूत्रे अनादिष्टादचः पूर्वत्वेन दृष्टस्य विधौ एव स्थानिवद्भावः इति संकोचो न क्रियते तदा **वैयाकरणः** इति रूपसिद्धिः न स्याद्। तत्र विआकरण इत्यवस्थायाम् **इको यणचि** इति सूत्रेण यणादेशे व् य् आकरण इतिजाते **न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्**[2] इति सूत्रेण ऐजागमे व् ऐ य् आकरण इति जाते, इकारस्य स्थाने आदिष्टस्य यकारस्य स्थानिवद्भावेन अच्परकत्वाद् आयादेशो दुर्वारः स्याद्। अतोऽनादिष्टादचः पूर्वस्य इति वक्तव्यम्। तथा च अत्र अनादिष्टाद् इकारात् पूर्वत्वेन ऐकारस्य कदाप्यभावात् तत्रायादेशविधौ स्थानिवद्भावो न प्रवर्तते। तथैव अत्रापि अनादिष्टाद् अकारलोपात् पूर्वत्वेन दृष्टस्य उकारस्य अभावाद् स्थानिवद्भावो नास्ति इति चेन्न अनादिष्टादचः पूर्वस्य विधेः अभावेन स्थानिवत्त्वाभावेऽपि उपधागुणः न भवति, तस्मिन् एव सूत्रे पूर्वस्माद् विधिः पूर्वविधिः इति पञ्चमीसमासेन अत्र स्थानिवद्भावसौलभ्याद्। पञ्चमीसमासपक्षे **अचः परस्मिन् पूर्वविधौ** इति सूत्रस्य अयमर्थो भवति, परनिमित्तो अचः स्थाने आदेशः स्थानिवत्स्याद्। स्थानिभूतादचः पूर्वत्वेन दृष्टात्परस्य विधौ कर्तव्य इति। अत्र यथा स्थानिभूतोऽज् भूतपूर्वोऽकारः ततः पूर्वत्वेन दृष्टः लोल् इति ततः परस्य उकारस्य गुणे कर्तव्ये स्थानिवद्भावो भवति। तथा च अल्लोपस्य स्थानिवद्भावे मध्ये व्यवधानाद् आर्धधातुकप्रत्ययपरत्वाभावेन गुणो न भवति। ननु पञ्चमीसमासपक्षे पूर्वस्मादित्यस्य निमित्तत्वेन आश्रिताद् इत्यर्थः तथा च अत्र लोल् इत्यस्य निमित्तत्वेन आश्रितात् पूर्वत्र विद्यमानाभावात् कथं स्थानिवद्भाव इति चेद्, न पूर्वस्माद् इत्यस्य निमित्तत्वेन आश्रितादित्यर्थे प्रमाणाभावाद्। ननु निमित्तत्वेन आश्रितादित्यस्य अभावे हे गौः इत्यादौ सम्बुद्धिलोपः स्यात् खलु इति चेद्, अतिप्रसङ्गः पञ्चमीसमासस्य अनित्यत्वेन वारणीयः। ननु पञ्चमीसमासस्य नित्यत्वमेव भाष्यसम्मतमिति चेत्, तथापि पूर्वस्मात् परस्य अव्यवहितस्य एव स्वीकाराद्धे गौः इत्यादौ न दोषः। अत्र गोशब्दाद् सम्बुद्ध्येकवचने गो स् इति जाते **गोतो णित्** इति सूत्रेण स् इत्यस्य णिद्वद्भावे **अचो ञ्णिति**[3] इति वृद्धौ गौ स् इति जाते **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण औकारस्य स्थानिवद्भावेन एङ्त्वाद् **एङ्ह्रस्वाद् सम्बुद्धेः** इति सूत्रेण सम्बुद्धिलोपः प्राप्तो न भवति। स्थानिभूतादचोऽव्यवहितपूर्वत्वेनदृष्टात् परस्य विधेरभावाद्। अत्राव्यवधानञ्च अतिदेशप्रवृत्तिप्राक्कालिकं ग्राह्यम्।

**समीक्षा- न धातुलोप आर्धधातुके** इति सूत्रस्य प्रत्याख्यानाय भाष्याभिहिते अनारम्भो वा इति वार्तिके उद्द्योतनोद्द्योतकारयोः स्थलद्वये विरोधो दृश्यते। प्रथमं यदा भाष्यकारैः **अतो लोपः** इति शास्त्रापेक्षया **यञोऽचि च** इति शास्त्रस्य निरवकाशत्वमाशङ्क्य सावकाशो लुगुति उक्तम्, तदा उद्द्योतनकारैःअभिहितम्, सावकाशो लुगिति भाष्यस्य अयमाशयो यद्, भिन्नविषयौ लुग्लोपौ, **अतो लोपः** इति सूत्रेण अल्लोपे सति तदनन्तरं यः य् इति अवशिष्यते तत्र **यञोऽचि च** इति सूत्रस्य चारितार्थ्यम्। तथा च **अतो लोपः** इति सूत्रस्य अकारे **यञोऽचि च** इति सूत्रस्य अवशिष्टे यकारे प्रवृत्तेः परस्परं विषयभेदाद् बाध्यबाधकभाव एव न भवति इति।

तत्र उद्द्योतकारैः उक्तं विषयभेदाद् बाध्यबाधकभावो नास्ति इति तु न युक्तम्, यतो हि भिन्नविषयस्थलेऽपि बाध्यबाधकभावो शास्त्रे बहुत्र प्रसिद्धः। यथा **व्यथो लिटि** इति सूत्रस्य **हलादिः शेषः** इति सूत्रबाधकता। अथ च अन्यत्रापि यथा **मिदचोऽन्त्यात्परः** इति सूत्रस्य प्रत्ययपरत्वबाधकत्वम् भाष्यकारैः समर्थितम्। अतश्च तेषां मते विषयभेदाद् बाध्यबाधकभावाभावः इति

---

[1]अष्टा.6.4.47

[2]अष्टा.7.3.3

[3]अष्टा.7.2.115

वचनं न युक्तम्।

द्वितीयम् उद्द्योतनकारैः सावकाशो लुगित्यत्र भाष्ये विषयभेदाद् बाध्यबाधकभावो नास्ति इति उक्तम्, तदनन्तरं यदा भाष्यकारैः अथापीत्यादिना विषयभेदेऽपि बाध्यबाधकभावः स्वीकृतः तदा स्वसिद्धान्तरक्षणाय अथापीत्यादिभाष्यसमर्थनाय च उक्तम्, यद्यपि अल्लोपे जाते यकारे प्रवर्तनाद् विषयभेदो वर्तते तथापि **यङोऽचि च** इति सूत्रे यङ इति समुदायनिर्देशो वर्तते। तथा च यकाराकारसमुदायस्य यङः इति निर्दिष्टस्य विवक्षिततत्वाद् अवयवे च यङ्व्यपदेशस्य गौणत्वाद् अर्धयकारे **यङोऽचि च** इति सूत्रस्य अप्रवृत्तेः तस्य अनवकाशत्वमिति भाष्यं संगतमेव इति, तदपि न् नागेशसम्मतम्। यतो हि यदि अतिदेशविषयेऽपि गौणत्वमाद्रियते तदा अतिदेशस्यैव वैयर्थ्यापत्तिः स्याद् इति नागेशहृदयम्। अथ च एतेषां मते अथापि कथञ्चिदिति भाष्यस्य विषयभेदेऽपि बाध्यबाधकभावस्वीकार इत्यर्थः। तथैवात्र भाष्ये नागेशभट्टैः अस्मिन् सूत्रे भ्रभ्जोरित्यादितो अन्यतरस्यामित्यस्यापि अनुवृत्तिः स्वीकृता। तत्फलन्तु व्यवस्थितविभाषाश्रयणेन यस्य इति शास्त्रस्य क्वाचित्कत्वमेव। व्यवस्थितविभाषास्थलानाम्-

**देवत्रातो गलो ग्राह इति योगे च सद्विधिः।**
**मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः**[1] **॥**

इति भाष्ये परगणिततत्वेन च अत्र तस्याः आश्रयणस्य कर्तुमशक्यतया योगविभागसामर्थ्येन एव **यस्य** इत्यस्य क्वाचित्कत्वं समाहितम्। तथैव मरीमृज इत्यादौ विकल्पमाशङ्क्य विकल्पस्य इष्टतां प्रतिपादयन् प्रत्याख्यानमार्गस्य लाघवं प्रत्यपादयद्। लोलुवः इत्यादौ च भाष्यविरोधमाशङ्क्य पञ्चमीसमासेन भाष्यं च समाहितम्। उद्द्योतनकारैः तावद् एतादृशविचारा न कृता एव। अत्रेयं चिन्ता – अर्धाधिकविकारे एकादेशविकृतन्यायो न प्रवर्तते इति नागेशमतं, स्पष्टं चेदं पटि भाषेन्द्वादौ। तथा च यदि अकारनोपे अर्धाधिक क्विङविकारस्यैव सत्वेन तत्रायमतिदेशः कथं तेन आश्रयितुं शक्य इति। तत्समाधानं तु तादृशस्थले आनुमानिकस्थानिवद्भावस्य आश्रयणम् इति। सोऽप्यतिदेश एवेति न दोष इति।

**परिशीलितग्रन्थपञ्जिः**


नागेशभट्टः। *लघुशब्देन्दुशेखरः* (षट्टीकोपेतः अव्ययीभावान्तो भागः)। काशी: भार्गव पुस्तकालयः, 1992।

भट्टोजिदीक्षितः। *प्रौढमनोरमा* (शब्दरत्न-भैरवी-भावप्रकाश-सहिता)। सम्पा. पं. गोपालशास्त्री नेने। वाराणसी: चौखम्भा संस्कृत भवन, 2018।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्)। सम्पा. गोविन्दाचार्यः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2017।

महर्षिपतञ्जलिः। *महाभाष्यम्* (तृतीयं खण्डम्, प्रदीपोद्योतसहितम्)। सम्पा. श्रीभार्गवशास्त्री। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, 2014।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः)। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा। वाराणसी: मोतीलाल बनारसीदास, 2014।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (द्वितीयो भागः)। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा। वाराणसी: मोतीलाल बनारसीदास, 2014।

महर्षिपतञ्जलिः। महाभाष्यम् (तृतीयं खण्डम्, प्रदीपोद्योतसहितम्)। सम्पा. श्रीभार्गवशास्त्री। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, 2014।

नागेशभट्टः। *लघुशब्देन्दुशेखरः* (भावबोधिनी बालबोधिनी व्याख्याद्वयोपेतः)। सम्पा आचार्यः श्रीपाद सत्यनारयणमूर्तिः। प्रकाशकः आचार्य का ई गोविन्दन्। तिरुपतिः । राष्ट्रियसंस्कृतविद्यापीठम् । 2005

नागेशभट्टः। बृहच्छ *ब्देन्दुशेखरः*। सम्पा श्रीसीतारामशास्त्री । प्रकाशकः डाँ हरिचन्द्रमणित्रिपाठी । वाराणसी । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः। 1996

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तभूषणम्* (द्वितीयो भागः)। सम्पा. के वि रामकृष्णमाचार्यः। INSTITUT FRANCAIS DE PONDICHERY SHREE SOMNATH SANSKRIT UNIVERSITY । 2022


[1] महा.भा.शाच्छोरन्यतरस्याम्.पृ.सं.248

# केनोपनिषदि षड्विधतात्पर्यलिङ्गानां प्रयोगविमर्शः

डॉ. कार्तिकमेटे, Assistant Professor,
Department of Sanskrit
Government General Degree College, Kalna-1
Purba Bardhaman, Pin- 713405

**प्रबन्धसारः-** वेदान्तो नाम उपनिषत्प्रस्थानम् इत्यवगम्यते। उपनिषत्स्वेव आत्मतत्त्वस्य पराकाष्ठा सम्यक् प्रतिपादिता दृश्यते। सर्वासामुपनिषदां तात्पर्यं तु जीवब्रह्मणोः ऐक्यप्रतिपादन एव इति परिदृश्यते। एतच्च तात्पर्यम् उपक्रमोपसंहारादिषड्विधलिङ्गैः निर्धार्यते।

श्रोत्रस्य श्रोत्रमित्यादिभिः मन्त्रैः केनोपनिषद आद्ये खण्डद्वये निर्गुणं निर्विशेषं ब्रह्मतत्त्वं प्रतिपादितमिति परिलक्ष्यते। तृतीयचतुर्थयोस्तु सगुणब्रह्मतत्त्वं साधारणेभ्यः अधिकारिभ्यः सुखबोधाय प्रतिपादितम्। 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इति निर्गुणतत्त्वस्य सुलभेन बोधः अल्पधीमतां न भवति अतः अन्तिमखण्डद्वये आख्ययिकया ब्रह्मतत्त्वं प्रतिपादितम्। स्वबुद्धिकौशलेन यथामति अत्र केनोपनिषन्मन्त्रेषु उपक्रमादिलिङ्गानां सद्भावः प्रदर्शितः। अत्र प्रदर्शितान्मन्त्रान् विहाय अन्येष्वपि मन्त्रेषु कथं तात्पर्यलिङ्गानां प्रयोगो विद्यते तद्विचारयितुं शक्यते।

**कूटशब्दाः-** केनोपनिषद्, सगुणब्रह्म, निर्गुणब्रह्म, तात्पर्यलिङ्गम्, उपक्रमः, उपसंहारः, अपूर्वता, फलम्, अर्थवादः, उपपत्तिः।

**0.भूमिका-**अशेषवेदान्तानां परब्रह्मण्येव तात्पर्यम्। परब्रह्मणस्तु वेदान्तैकसमधिगम्यत्वमङ्गीक्रियते अद्वैतसम्प्रदाये। तथा चोक्तं भाष्यकारैः शङ्करभगवत्पादैः– 'योऽसौ उपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म उत्पत्त्याद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषो नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, स एष नेति नेत्यात्मा इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्। न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा। अतः स न केनचित्प्रत्याख्यातुं शक्यः विधिशेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः' इति[1] । वेदान्तो नाम उपनिषत्प्रस्थानम्। उपनिषत्स्वेव आत्मतत्त्वस्य पराकाष्ठा प्रतिपादिता। सर्वासामुपनिषदां तात्पर्यं तु जीवब्रह्मणोः ऐक्यप्रतिपादन एव। एतच्च तात्पर्यम् उपक्रमोपसंहारादिषड्विधलिङ्गैः निर्धार्यते। अत्रेदानीमस्माभिः केनोपनिषदि षड्विधतात्पर्यलिङ्गानां कथं प्रयोगस्तत्सार्थक्यञ्च प्रदर्श्यते।

**१.तात्पर्यशब्दार्थः-** तात्पर्यनिर्णायकलिङ्गं नाम किमिति जिज्ञासायामुच्यते लीनम् अर्थं गमयति बोधयतीति लिङ्गम्, तात्पर्यनिर्णयाय लिङ्गमिति तात्पर्यलिङ्गम्। किं नाम तात्पर्यलिङ्गमिति? तत् अर्थः, स परो यस्य स तत्पर इति बहुव्रीहिसमासेन अर्थपर इत्यर्थः प्राप्यते। तस्य भावः तात्पर्यमिति भावे ष्यञ्प्रत्ययः। शब्दो वाक्यं वा यदर्थपरं तत्प्रतीतिजननयोग्यत्वमेव तात्पर्यमिति व्युत्पत्त्या लभ्यते अयमर्थः तात्पर्यशब्दस्य। तात्पर्यमपि आकाङ्क्षावच्छाब्दबोधे सहकरोति। अद्वैतवेदान्ते अद्वितीये ब्रह्मण्येव अशेषवेदान्तानां तात्पर्यं तच्च उपक्रमोपसंहारादिलिङ्गैः निर्णीयते। अद्वैतवेदान्ते तात्पर्यं नाम तत्प्रतीतिजननयोग्यत्वमिति। अभिप्रेतस्यार्थस्य प्रतीतिजननसामर्थ्यमेव तात्पर्यमित्यर्थः। यथा गेहे घट इति वाक्येन गेहे घटसंसर्गप्रतीतिजननयोग्यत्वमेव प्रतीयते न तु पटसंसर्गप्रतीतिजननयोग्यत्वमिति। एवं गेहे घट इति वाक्यं घटसंसर्गपरमर्थात् घटसंसर्ग एव वाक्यमिदं तात्पर्यमावहति, न तु पटसंसर्गो। एवमेव शब्दस्य वाक्यस्य वा तादृशसामर्थ्यवशात् भोजनप्रकरणे सैन्धवमानयेत्यादिवाक्येन लवणानयनप्रतीतिर्भवति। ननु तदापि सैन्धवपदस्य अश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वेऽपि कथं पुनः लवणप्रतीतिरेव इति चेदुच्यते भोजनप्रकरणे

[1] वेदान्तदर्शनम्, पुटम् १८६-१८७।

सैन्धवशब्दात् अश्वादिसंसर्गज्ञानापत्तिर्मा भवतु इति इच्छावशाद् अश्वार्थप्रतीतिजननयोग्यतायामपि न अश्वार्थप्रतीतिः। अत एव न केवलं तदर्थप्रतीतिजननयोग्यतामात्रं तात्पर्यमपि तु तदितरप्रतीतीच्छया अनुच्चारितत्वे सति तत्प्रतीतिजननयोग्यत्वं तात्पर्यमिति। तथा च यद्वाक्यं यत्प्रतीतिजननयोग्यत्वे सति तदन्यप्रतीतीच्छया अनुच्चारितम्, तद्वाक्यं तत् संसर्गपरमित्युच्यते इति वेदान्तपरिभाषाया आगमप्रकरणे प्रोक्तम्। एतच्च तात्पर्यं वेदे मीमांसापरिशोधितन्यायादर्थाद् विचारेण निर्णीतन्यायद्वारा वेदवाक्यानां तात्पर्यनिश्चयः अवधार्यते। लोके तु तात्पर्यनिर्णयः प्रकरणादिना क्रियते। तथाहि अत्र वाक्यपदीयवचनं–

वाक्यात्प्रकरणादर्थादौचित्याद्देशकालतः।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात्॥ इति[1]

वैदिकवाक्यानां तात्पर्यनिर्णयः केषाञ्चिन्नये विषय-संशय-पूर्वपक्षोत्तरपक्ष-प्रयोजनात्मकेन अधिकरणेन, केषाञ्चिन्नये उपक्रमोपसंहारादिना क्रियते। प्रकृते त्वस्माभिः उपक्रमादिना तात्पर्यनिर्णयः क्रियते इत्यतः उपक्रमोपसंहारादितात्पर्यलिङ्गानां परिचयः प्रस्तूयते। उपक्रमादिलिङ्गानि तावत् बृहत्संहितायां श्लोकाकारेण प्रोक्तानि–

उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥ इति।

अद्वितीये ब्रह्मण्येव वेदान्तानां तात्पर्यम्। तच्च तात्पर्यम् उपक्रमोपसंहारौ, अभ्यासः, अपूर्वता, फलम्, अर्थवादः, उपपत्तिश्चेति षड्भिः एतैस्तात्पर्यलिङ्गैः अवधार्यते। उपक्रमादिलिङ्गानां स्वरूपं सामान्यतः प्रदर्श्यते–

(१) उपक्रमोपसंहारौ– प्रकरणप्रतिपाद्यस्य अर्थस्य तदाद्यन्तयोः उपपादनम् उपक्रमोपसंहारौ। यथा छान्दोग्योपनिषदः षष्ठे प्रपाठके आदौ 'एकमेवाद्वितीयम्'[2] अन्ते च 'ऐतदात्म्यमिदं सर्वम्'[3] इति अद्वयब्रह्मणः प्रतिपादनं दृश्यते।

(२) अभ्यासः– प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। यथा छान्दोग्ये एव अद्वितीयपरब्रह्मणः 'तत्त्वमसि' नवकृत्वः प्रतिपादनम्।

(३) अपूर्वता– प्रकरणप्रतिपाद्यस्य अर्थस्य प्रमाणान्तराविषयीकरणम् अपूर्वता, यथा छान्दोग्ये एव अद्वितीयवस्तुनः प्रत्यक्षादिमानान्तरागोचरत्वं प्रदर्शितम्।

(४) फलम्– प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं फलम्। यथा तत्रैव छान्दोग्ये 'आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये'[4] इति अद्वितीयपरमतत्त्वावाप्तिः प्रयोजनम्।

(५) अर्थवादः– प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् अर्थवादः। यथा छान्दोग्योपनिषदि 'उत तमादेशमप्राक्ष्यः, येन अश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'[5] इति अद्वितीयवस्तुनः प्रशंसनम्।

(६) उपपत्तिः– प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः। यथा छान्दोग्ये एव 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'[6] इत्यत्र अद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते। एवंप्रकारेण अस्माभिः वेदान्तसारोक्तानि तात्पर्यलिङ्गानि सोदाहरणानि सुखबोधाय उपस्थापितानि।

**२. केनोपनिषत्परिचयः-** सामवेदीयतलवकारब्राह्मणस्य जैमिनीयब्रह्मणस्य वा नवमः अध्यायः केनोपनिषन्नाम्ना प्रसिद्धः। उपनिषदियं केनशब्देन आरभ्यते इत्यतः अस्याः नाम केनोपनिषदिति। चतुर्षु खण्डेषु विभक्ता इयमुपनिषद्। अत्र प्रथमे खण्डे अष्टौ मन्त्राः, द्वितीये पञ्च, तृतीये द्वादश, चतुर्थे षट् मन्त्रा इत्येवं साकल्येन चतुस्त्रिंशन्मन्त्राः सन्ति।

---

[1] वाक्यपदीये वाक्यकाण्डम् २-३१४।
[2] छान्दोग्योपनिषत् ६-२-१।
[3] छान्दोग्योपनिषत् ६-८-७।
[4] छान्दोग्यपनिषत् ६-१४-२।
[5] छान्दोग्योपनिषत् ६-१-३।
[6] छान्दोग्योपनिषत् ६-१-४।

**३. केनोपनिषदः तात्पर्यविचारः-**केनोपनिषदि केनेति पदेन आरम्भेण ग्रन्थेन केन कर्त्रा समग्रं विश्वब्रह्माण्डं नियम्यते, सूर्यचन्द्रग्रहनक्षत्रादयश्च परिचाल्यन्त इति जिज्ञासायाः उत्तररूपेण अत्र विश्वस्य सृष्टिस्थितिलयकारणं जगदाधारं ब्रह्म कीर्तितम्। सामवेदीयस्य तलवकारब्राह्मणस्य अष्टसु अध्यायेषु कर्म प्रतिपादितम्। नवमे तु ज्ञानमालोच्यते। स एव ज्ञानप्रतिपादको नवमोऽध्यायः केनोपनिषदिति प्रसिद्धिं गतः। अत्रेदानीं प्रश्नः उदेति यत् ज्ञानकर्मणोः कः सम्बन्ध इति। ऐहिकपारत्रिकोभयविधफलेभ्यः विरक्तस्य निष्कामकर्मानुष्ठानेन शुद्धचित्तस्य साधनचतुष्टयसम्पन्नस्य पुरुषस्य ब्रह्मजिज्ञासा भवति। अतः कर्मकाण्डेन सह ब्रह्मकाण्डस्य सम्बन्धः विद्यते। एवं तलवकारब्राह्मणस्य कर्मप्रतिपादकैः अष्टभिरध्यायैः सह ज्ञानप्रतिपादकः नवमोऽध्यायः परस्परं सम्बन्धयुक्तः। एतयोः काण्डयोः अङ्गाङ्गिभावसम्बन्ध इत्येवं मन्तव्यम्। 'स्वाध्यायोऽध्येतव्यः' इति एकेनैव विधिना काण्डद्वयस्यापि अध्ययनं विहितम्। वेदाध्ययनाय विधिवाक्याभावात्तु न हि कश्चित् वेदपाठे अर्थात् कर्मकाण्डे ज्ञानकाण्डे वा प्रवृत्तो भवति। अत एव काण्डद्वयस्यापि स्वाध्यायविधिना लभ्यं फलं समानं स्यादिति। यदि च ज्ञानेन मोक्षः प्राप्यः स्यात्तर्हि कर्मणापि तदेव मोक्षरूपं फलं कथं न स्यात्? तथा च ज्ञानकर्मणोः समुच्चयेन अनुष्ठानेन मोक्षो भवतीति द्वैतवादी आशङ्कते। अत्र सिद्धान्तिभिः अद्वैतिभिः उच्यते यदेकविधिप्रयुक्तत्वेऽपि काण्डद्वयाध्ययनस्य, कर्मकाण्डेन लोकत्रयलाभरूपं पृथक् फलं बृहदारण्यकोपनिषदि सुस्पष्टं प्रोक्तं विद्यते। तच्च पुत्रेणायं लोकः, यागादिना कर्मणा पितृलोकः, उपासनारूपया विद्यया देवलोकः इति। एते च लोका अनित्या अनात्मलोकाः मोक्षेच्छूनां सर्वदैव अनभिप्रेताः। मोक्षार्थं ज्ञानमेव मुख्यमालम्बनम्। न हि केनचित्कर्मणा तल्लभ्यते। मोक्षेच्छूनां तेभ्यः अनित्यानात्मलोकेभ्यः पारिव्राज्यं निर्दिश्य श्रुतिः नित्यात्मलोकोऽन्वेष्टव्य इत्युपदिशति। अनित्या अनात्मलोका अज्ञानजन्या अज्ञाननाशेनैव निवृत्तिं यान्ति। अज्ञानं च ज्ञानेन नाश्यम्। ज्ञानेन अज्ञाने नाशिते अज्ञानजन्याः लोका अपि निवृत्ताः भवन्ति। तेन नित्यः मोक्षो लब्धो भवति। एवं ज्ञानेनैव मोक्षः, न तु कथमपि ज्ञानकर्मसमुच्चितेन। आत्मैकत्वविज्ञाने जाते 'अहं कर्ता एतत्फलमुद्दिश्य, इत्थम्, एतत्कर्म सम्पादयामि' इति क्रियाकारकादिभेदो नैव सम्भवति। अत एव ज्ञानकर्मसमुच्चयः असम्भवः।

एवञ्च निष्कामकर्मणामनुष्ठानेन चित्तशुद्धौ सत्यां तदनन्तरं ब्रह्मजिज्ञासा इत्येवंरूपेण कर्मकाण्डस्य ज्ञानकाण्डस्य च न सर्वथा विरोधः, अपि तु सोपानारोहणन्यायेन कर्मकाण्डमवलम्ब्य विशुद्धसत्त्वस्य भवति ज्ञानेऽधिकार इति तयोरुपकार्योपकारकभावः शक्यो वक्तुमिति।

किञ्च ज्ञानं वस्तुतन्त्रं, कर्माणि पुरुषतन्त्राणीति उभयोः स्वरूपे विद्यते महान् भेदः। विद्यमाने घटे घटज्ञानमेव जायते, नान्यत्। यदि जायेत, भ्रम एव स न तज्ज्ञानं प्रमा। अत एव ज्ञाने वस्तुनः प्राधान्यम्। कर्मसु तु पुरुषस्य प्राधान्यम्। तथा हि ग्रामान्तरगमने पुरुषस्यास्ति स्वातन्त्र्यं– गच्छेत्, न गच्छेत्, पद्भ्यां गच्छेत्, शकटेन, अश्वेन, अन्यथा वा इति कर्मणि अस्ति पुरुषस्य स्वातन्त्र्यम्, कुर्यान्न कुर्यात् अन्यथा वा कुर्यादिति स्वरूपभेदात् ज्ञानकर्मसुच्चयः सर्वथा नैव पदं लभते।

एवं ज्ञानकर्मसमुच्चयवादं निराकृत्य अद्वैतवादी वदति– कर्मसु वीतरागो भव अथवा निष्कामं कर्म कुरु इति तदनन्तरमेव ब्रह्मविद्यायामधिकारो भविष्यत्याशयः। एवं जैमिनीयब्राह्मणस्य अध्यायाष्टकेन सकामाय अधिकारिणे कर्म प्रतिपाद्य मोक्षार्थिने नवमे अध्याये ब्रह्मविद्यायाः प्रतिपादनं युक्तियुक्तमेव। अस्याश्च ब्रह्मविद्यायाः प्रतिपादनाय अस्यामुपनिषदि कथं तात्पर्यलिङ्गानां प्रयोगः कुत्र च इति इदानीम् आलोच्यते। प्रसङ्गेऽस्मिन् इदमपि ज्ञेयं यत् एकस्मिन्नेव मन्त्रे एकमेव लिङ्गं, क्वचित् प्रतिलिङ्गं मन्त्रभेदः, कुत्रचित् एकस्मिन्मन्त्रे कतिपयानि लिङ्गानि भवन्ति। इदानीं क्रमशः षड्विधलिङ्गैः कथमस्यां केनोपनिषदि आत्मतत्त्वमेव तात्पर्यत्वेन निर्धार्यते तद् विचिन्त्य आलोच्यते।

**३.१ उपक्रमोपसंहारौ-**केनोपनिषद आदौ तावत् पृच्छयते मनआदीनां प्रेरयिता क इति। अस्योत्तरत्वेन मनआदीनामिन्द्रियाणां प्रेषयिता श्रोत्रस्य श्रोत्रं, मनसो मन इत्यादिकमिति आत्मतत्त्वमेव उपक्रान्तम् अस्या उपनिषदः द्वितीये मन्त्रे। तथा हि मन्त्रः–

श्रोत्रस्य श्रोत्रं मनसो मनो यद्
वाचो ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः

प्रेत्यास्माल्लोकादमृता भवन्ति॥ इति।[1]

प्रथमे मन्त्रे संसारविरक्तेन शिष्येण आचार्यः पृष्टः यत् मनःप्रभृतीन्द्रियाणि कस्येच्छामात्रेण स्वस्वविषये प्रेरितानि भवन्तीति। एवं पृष्टे प्रेषयितृस्वरूपं प्रोक्तं यत् श्रोत्रस्य श्रोत्रं,मनसो मनः, वाक्यस्य वाक्यं, प्राणस्य प्राणः, चक्षुषः चक्षुः इति यत्तत्त्वं तद्विज्ञाय धीमन्तः श्रोत्रादिषु आत्मबुद्धिं परित्यज्य त्यक्तसर्वैषणा भुत्वा अमृतत्वं लभन्ते।

ननु अत्र किंस्वरूपः प्रेरयिता इति प्रश्नस्य असौ एवंविशिष्टः श्रोत्रादीनि प्रेषयति इत्युत्तरं स्यात्। अत्र तु तदनुल्लिख्य श्रोत्रस्य श्रोत्रमिति प्रतिवचनेन प्रश्नवैरूप्यं खलूत्तरस्य भवतीति जायते दोषः। अत्रोच्यते यदि प्रेषयिता जातिगुणक्रियासम्बन्धैः निर्देष्टुं शक्यः तदानीं तदाश्रयेण प्रेषयितुः स्वरूपं वक्तुं सुकरं स्यात् एतत्क्रियाविशिष्टः वा एतज्जातिमान् वा एतत्सम्बन्धयुक्तः पुरुष एव श्रोत्रादीनामिन्द्रियाणां परिचालकः इति। नैवायमेवं प्रेषयिता। अतोऽत्र अन्यथा प्रश्नोत्तरदानं न सम्भवतीति कृत्वा अननुरूपं प्रतिवचनमाह श्रोत्रस्य श्रोत्रमिति। सत्यां गतौ हि यत्र यो दोषः स न गत्यभावेऽपि पदं लभते। दात्रादिकरणेन तरुं यश्छेदयति तस्य छेदकस्य छेदनातिरिक्तः उद्यमननिपातनरूपः व्यापारोऽस्ति एव । अतस्तत्रोच्यते– उद्यमननिपातनव्यापारवान् खलु छेदक इति। अत्र तु नैवं वक्तुं शक्यं यदेतद्व्यापारगुणजातिसम्बन्धादिमान् मनआदीनां प्रेरयितेति, निर्धर्मकं हि तत्। यद्येवं श्रोत्रादीनां परिचालकस्य स्वरूपमेव वक्तुं न शक्यं तर्हि तस्यास्तित्वे किं मानमिति उच्यते श्रोत्रादीनां संहतानां परार्थत्वात् केनचनासंहतेन स्वप्रयोजनपूर्तये तेषां प्रयुक्तत्वमवश्यम्भावि। यथा लोके गृहादीनां संहतानां परार्थत्वं दृश्यते यतो हि तत् गृहस्वामिना उपभुज्यते। एवं श्रोत्रादिसंघातः यस्य प्रयोजनसाधकः अधीनो वा स चेतन इत्येव वक्तव्यमर्थात् श्रोत्रादीनां परिचालकः कश्चन चेतनः प्रेषयितेति स्वीकार्यम्।

विषयेण समनस्केन्द्रियसन्निकर्षे सिद्धे एव विषयस्य प्रकाशो भवति। अप्रकाशस्वरूपस्य विषयस्य योऽयं प्रकाशः स कस्य व्यापारप्रयुक्त इति प्रश्ने जडस्येन्द्रियस्येति उत्तरं नैव सम्भवति। श्रोत्रादीनामिन्द्रियाणां जडत्वात् तेषां व्यापारो नोपपद्यते। जडस्यापि व्यापारे स्वीकृते अचेतनस्य रथस्यापि सूताश्वाद्यधिष्ठानं विनैव व्यापार उपपद्येत। अतः श्रोत्रादीनां च व्यापारदर्शनात् कश्चन चेतनोऽधिष्ठाता स्वीकार्यः। यतो हि चेतनाधिष्ठिते सति अचेतनस्यापि व्यापारः दृश्यते। एवं श्रोत्रादीनामचेतनानामिन्द्रियाणां कश्चन परिचालकोऽवश्यं विद्यते, तस्य च व्यापारान्तराभावात् श्रोत्रस्य श्रोत्रमिति स निर्दिष्टः। अतोऽत्र अगतिकगतिकतया अनुरूपमेव प्रतिवचनं श्रोत्रस्य श्रोत्रमिति।

ननु अत्र श्रोत्रस्य श्रोत्रमित्यादेः कस्तावदर्थः? अत्रोच्यते– अप्रकाशस्य शब्दस्य प्रकाशनद्वारा खलु श्रोत्रस्य भवति श्रोत्रत्वम्। तदपि श्रोत्रमप्रकाशं जडमिति तदिन्द्रियमन्येन चेतनेन प्रकाशितम्। तस्य चेतनस्य प्रभावादिन्द्रियस्य प्रकाशस्तदन्तरं चेन्द्रियेण शब्दप्रकाश इति शब्दप्रकाशे चेतनस्यास्ति व्यापारः। अतः शब्दप्रकाशे श्रोत्रस्य व्यापाराद्यथा तस्येन्द्रियस्य श्रोत्रत्वं तथा श्रोत्रेन्द्रियप्रकाशे चेतनस्य व्यापारात्तस्यापि श्रोत्रत्वं भवेत्। तेन सुष्ठूक्तं यच्चेतनं ब्रह्म श्रोत्रस्य श्रोत्रमिति। अनेनैव न्यायेन मनसो मनः, वाचो वाक्, प्राणस्य प्राणः, चक्षुषश्चक्षुरिति सर्वमवगन्तव्यम्। एवमस्ति किमपि विद्वद्बुद्धिगम्यं सर्वान्तरतमं कूटस्थं निर्विकारमजरममृतमभयमजं श्रोत्रादेरपि श्रोत्रादि। अनेन श्रोत्रादीनां श्रोत्रादिकथनात् श्रोत्रादिग्राह्यत्वमात्मनः निरस्तम्। एवं श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्मैव आत्मेति ज्ञात्वा अमृतत्वमाप्नोति, अमरणधर्माणो भवन्तीत्यर्थः। एवमस्मिन्द्वितीये मन्त्रे आत्मतत्त्वप्रतिपादनात् दृश्यते आत्मतत्त्वस्य उपक्रमः। एवमात्मतत्त्वस्य उपसंहारोऽपि दृश्यते। उपसंहारो नाम विचार्यत्वेन प्रारब्धस्य विषयस्य ग्रन्थान्ते मध्यभागे वा समर्थनात्मकः भागः, न तु अन्तभागः, अन्तिमो मन्त्रो वा। प्रकृते तु उपक्रान्तस्य विषयस्य प्रतिपादकः मन्त्रः उपसंहारत्वेन स्वीक्रियते। अत्र 'प्रतिबोधविदितं मतम्' इत्यादिमन्त्रः उपसंहाररूपेण स्वीक्रियते साक्षादात्मतत्त्वप्रतिपादनात्। अन्येष्वपि मन्त्रेषु भागशः आत्मतत्त्वं यद्यपि प्रतिपाद्यते तथापि अस्मिन्मन्त्रे सुस्पष्टतया आत्मतत्त्वं प्रतिपाद्यते। अतोऽयं मन्त्रः उपसंहारत्वेन स्वीकृतः। तथाहि मन्त्रः–

प्रतिबोधविदितं मतममृतत्वं हि विन्दते।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्॥ इति।[2]

---

[1] केनोपनिषत् १-२।

[2] केनोपनिषत् २-४।

'अविज्ञातं विजानताम्' इति मन्त्रे विदुषामपि अविदितं ब्रह्म इत्युक्ते ज्ञानिनोऽपि जडवत्स्युः यतस्तेषामपि ब्रह्माविज्ञातमिति विदुषां ब्रह्मविदां लौकिकानां च को भेदः? अपि च 'अविज्ञातं विजानताम्' इति यदुक्तं तत् परस्परविरुद्धम्। अत्रोच्यते– प्रतिबोधविदितं मतमिति। बोधं बोधं प्रति विदितं प्रतिबोधविदितम्। सर्वेषु ज्ञानेषु विराजमानः सर्वज्ञानसाक्षी, तस्य प्रकाश एव यथार्थं ब्रह्मज्ञानम्। अस्य सर्वज्ञानसाक्षिणः नैव अनित्यत्वं सम्भवति। तथा सति साक्षिणः सर्वप्रत्ययसाक्षित्वं हीयेत। अयं साक्षी उत्पत्तिविनाशरहितः। न ह्ययं देहादिस्वरूपस्तथा सति देहादिभ्यः भेदाभावाद्देहादीनां साक्षी न स्यात्। एतस्य साक्षिणः ज्ञानसाक्षित्वेऽपि न ज्ञानाद्भेदस्तस्य ज्ञानस्वरूपत्वात्। एवं सति तस्य ज्ञानसाक्षित्वं कथमिति उच्यते– ज्ञानस्वरूपस्यैव अस्य साक्ष्यसापेक्षतया साक्षित्वम्, वस्तुतः अयं साक्षात्कारस्वरूपः यथा प्रकाशस्वरूपः सविता 'सविता प्रकाशते' इत्येवं प्रसिद्धः तथापि कदाचित् प्रकाश्यवस्तु अपेक्ष्य 'सविता प्रकाशकः' इत्युच्यते तद्वदत्रापि ज्ञेयम्। साक्ष्यस्य विलोपे तु साक्षी तथा द्रष्टा साक्षात्कारस्वरूपः दृष्टिस्वरूपो वा भवति। साक्षिणः विनाशो न कदापि सम्भवति। साक्षिणो द्रष्टृस्वरूपत्वमध्यस्तम् इति अनित्यं दृष्टिस्वरूपत्वं तु नित्यम्। तथा च श्रूयते श्रुतिः– 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति। सर्वविधः प्रकाशः साक्षिसापेक्ष इत्युक्तं श्रुतौ– 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इत्यत्र।

एवं सर्वज्ञानसाक्षि ब्रह्म साक्षात्कारवत एव अमृतत्वावाप्तिः। तेन मृत्युश्चातिक्रान्तो भवति। आत्मतत्त्वसाक्षात्काररूपेण यथार्थज्ञानेन अज्ञाननाशे सति अज्ञानजन्यस्य संसारस्यापि नाशादमृतत्वं लभ्यते। यथार्थज्ञानेन सह अमृतत्वलाभस्य कार्यकारणभावं द्योतयितुं प्रकृते 'अमृतत्वं हि विन्दते' इति मन्त्रे हेत्वर्थकः हिशब्दः प्रयुक्तः इति सम्प्रदायः। आत्मना अर्थात् स्वस्वरूपज्ञानेन वीर्यं लभ्यते। तेन चात्मज्ञानलब्धेन वीर्येण मृत्युञ्जयो भवति। मृत्यूत्तरणरूपं नित्यं फलं नित्येन ब्रह्मसाक्षात्कारलब्धेन वीर्येण साधनेन प्राप्तुं शक्यम्, न तु धनसहायमन्त्रौषधितपोयोगकृतेन वीर्येण। अतोऽत्र 'अमृतत्वं हि विन्दते' इति हेतुः सङ्गतार्थ एव। एवमस्यामुपनिषदि उपक्रमे उपसंहारे च आत्मतत्त्वप्रतिपादनात् अद्वैतब्रह्मणि एव अस्या उपनिषदस्तात्पर्यमिति आद्येन लिङ्गेन प्रदर्शितम्।

**३.२ अभ्यासः** अस्यामुपनिषदि 'यद्वाचानभ्युदितं येन वागभ्युद्यते' इत्यारभ्य 'यत्प्राणेन प्राणिति येन प्राणः प्रणीयते' इति पञ्चसु मन्त्रेषु 'तदेव ब्रह्म त्वं विद्धि' इत्यनेन वागादिप्रेरकस्य पौनःपुन्येन ब्रह्मतत्त्वबोधनेन अभ्यासलिङ्गस्य समावेशो दृश्यते। तथाहि मन्त्राः–

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यन्मनसा न मनुते येनाऽऽहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यच्चक्षुषा न पश्यति येन चक्षुंषि पश्यति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ इति।[1]

एषु च मन्त्रेषु चैतन्यस्वरूपस्य ब्रह्मणः अवाङ्मनसोगोचरत्वमेव प्रतिपादितम्। वागादीन्द्रियैरप्रकाश्यं ब्रह्म। ब्रह्मणा एव वागादीन्द्रियाणि चैतन्यज्योतिषा प्रकाश्यन्ते स्वविषयग्रहणसमर्थानि भवन्तीत्यर्थः। जिज्ञासुना शिष्येण सर्वोपाधिरहितं शुद्धं ब्रह्म अवगन्तव्यमिति अभिप्रायन्नाह गुरुः– 'तदेव ब्रह्म त्वं विद्धी'ति। चैतन्यस्वरूपादात्मनः अन्यद् यदनात्मस्वरूपं तन्न ब्रह्मेति उच्यते– 'नेदं यदिदमुपासते'। उपासनार्थमुपाधिसंयोग आवश्यकः इति हेतोरत्र नेदं यदिदमुपासत इत्यनेनोपाधियुक्तस्य अब्रह्मत्वं प्रतिपादितम्। एवमत्र पञ्चकृत्वः ब्रह्मतत्त्वस्य प्रतिपादनं दृश्यते।

[1] केनोपनिषत् १,४-८।

**३.३ अपूर्वता-** आत्मतत्त्वमुपनिषन्मात्रैकवेद्यम्। अन्येन मानान्तरेण न हीदं तत्त्वम् अवगन्तुं शक्यम्। ग्रन्थान्तरेष्वपि औपनिषदमेव जीवब्रह्मणोरैक्यरूपं तत्त्वं प्रतिपाद्यते अतस्ते ग्रन्थाः उपनिषत्प्रतिपाद्यस्य आत्मतत्त्वस्य उपकारकाः शारीरकसूत्रादयः। यद्यपि सम्पूर्णापि केनोपनिषत् आत्मतत्त्वमेव प्रतिपादयति तथापि 'उपनिषदं भो ब्रूहि'[1] इति मन्त्रे तु साक्षात् उपनिषदि प्रतिपादितं रहस्यभूतम् आत्मतत्त्वमेव आचार्येभ्यः ज्ञातुमिच्छति शिष्यः। अतोऽनेनापि अत्र आत्मतत्त्वस्य उपनिषन्मात्रवेद्यत्वं ज्ञातम्। एवम् अस्यां उपनिषदि अपुर्वतालिङ्गस्य सद्भावः विद्यते।

**३.४ फलम्-** आत्मतत्त्वसाक्षात्कारस्य फलं त्रिविधदुःखात् आत्यन्तिकमुक्तिः। अस्यामुपनिषदि 'अमृतत्वं हि विन्दते' इत्यनेन फलकीर्तनं कृतम्। अमृतत्वं लभते नाम मृत्युकवलीभुतो न भवतीत्यर्थः। तेन च अमृतत्वलाभेन निरतिशयानन्दावाप्तिः निश्चप्रचम्। अत्र च भाष्यं– 'आत्मना स्वेन रूपेण विन्दते लभते वीर्यं बलं सामर्थ्यं, धनसहायमन्त्रौषधितपोयोगकृतं वीर्यं मृत्युं न शक्नोत्यभिभवितुमनित्यवस्तुकृतत्वात्। आत्मविद्याकृतं तु वीर्यमात्मनैव विन्दते नान्येनेत्यतोऽनन्यसाधनत्वादात्मविद्यावीर्यस्य तदेव वीर्यं मृत्युं शक्नोत्यभिभवितुम्। यत एवमात्मविद्याकृतं वीर्यमात्मनैव विन्दतेऽतो विद्ययाऽऽत्मविषयया विन्दतेऽमृतम्, नायमात्मा बलहीनेन लभ्यः इत्याथर्वणे। अतः समर्थो हेतुः, अमृतत्वं हि विन्दते इति।'[2] तथा च 'भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति'[3] इत्यस्मिन्नपि मन्त्रे अमृतत्वप्राप्तिरूपं फलं प्रतिपादितम् आत्मसाक्षात्कारस्य। एवं फलरूपस्य तात्पर्यलिङ्गस्य सद्भावः अत्र दृश्यते।

**३.५ अर्थवादः-** आत्मज्ञानस्य प्रशंसा च अत्र 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।'[4] इत्यनेन मन्त्रेण प्रतिपादिता। ब्रह्म सत्यं जगन्मिथ्येति सर्ववेदान्तानां सनातनसिद्धान्तः। अज्ञानवशादेव प्राणिनः अनृतमपि जगत् सत्यमिति मन्यन्ते, ततश्च बहुविधं दुःखमपि सहन्ते। अज्ञानबन्धनोच्छेदेन एव ह्येतस्माद्दुःखात् निवृत्तिः। अज्ञाननाशश्च केवलं ब्रह्मज्ञानेन। यदि कोऽपि एतदात्मतत्त्वं जानाति तर्हि स परमसुखं लभते, न जानाति चेत्तदानीं जन्ममृतिप्रवाहरूपे संसारे अनन्तकालमावर्तते। अतः अस्मिन्नेव मानवजन्मनि चराचरेषु कृत्स्नेषु भूतेषु तदात्मतत्त्वं साक्षात्कुर्वन्ति ये धीमन्तः ते ममाहंभावव्यवहाररूपादेतस्मात् संसारात् व्यावृत्य अमृतत्वं भजन्ते इति आत्मविद्यायाः प्रशंसाप्रतिपादनेन अर्थवादलिङ्गस्यापि सद्भावोऽत्र उपनिषदि प्रदर्शितः।

**३.६ उपपत्तिः-** उपपत्तिलिङ्गमपि अस्यां विद्यते। तथाहि मन्त्रः– 'अन्यदेव तद्विदितादथोऽविदितादधि' इति।[5] प्रत्यक्षादिप्रमाणागम्यत्वेऽपि ब्रह्मण आगमवेद्यत्वमस्तीति ब्रह्मप्रतिपादकम् उपनिषद्वाक्यं तावत् 'अन्यदेव...' इत्यादि। सोऽयागमः आचार्यपरम्परया प्राप्यत इत्यत्र 'इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे' इति श्रुतिरत्र मानम्। ब्रह्म विदिताविदिताभ्यामन्यदित्युक्तं मन्त्रेऽस्मिन्। यद्धि विदितं तत् ज्ञेयं नामरूपात्मकञ्च। नामरूपविहीनं वस्तु नैव ज्ञानविषयो भवति। यदा किमपि वस्तु उत्पद्यते तदा तस्मिन् अभिनवनामरूपाणां समावेशो भवति। एवं नामरूपाभ्यां कार्यवस्तुनो व्याकृतिः। अतोऽत्र विदितपदेन नामारूपात्मकस्य कार्यस्यैव ग्रहणम्। कार्यवस्तुनः अनित्यत्वात् तत् हेयम्। ब्रह्मणश्च विदितभिन्नत्वात् न तत् हेयम्। नन्वेवं ब्रह्मणो विदितभेदादविदितत्वं स्यादिति। अत्रोच्यते– विदितं नाम व्याकृतं तच्च कार्यं तस्माद्व्याकृतादन्यद् अव्याकृतम् कारणं तत्। न च ब्रह्म अविदितं कारणरूपं भवितुमर्हति। तथा सति तस्य उपादेयत्वं स्यात्। कार्यकारणयोः परस्परं सापेक्षत्वं स्वीक्रियते। कार्यसाधनाय कारणमुपादीयते। न हि ब्रह्मणा किमपि कार्यं साध्यते येन तस्य उपादेयत्वं स्यात्। एवम् 'अविदितादधि' इत्यनेन ब्रह्मणः कारणभिन्नम् अनुपादेयत्वमेव प्रतिपादितम्। ब्रह्म च सर्वेषाम् आत्मा स च नित्यप्राप्तः। आत्मब्रह्मणोः अनन्यत्वात् न तत् हेयं न वा उपादेयम्। न हि कश्चित् स्वात्मनः प्राप्तये परित्यागे वा यतते। तथा च भाष्यं– 'कार्यार्थं हि कारणमन्यदन्येनोपादीयतेऽतश्च न वेदितुरन्यस्मै प्रयोजनायान्यदुपादेयं भवतीत्येवं विदिताविदिताभ्यामन्यदिति हेयोपादेयप्रतिषेधेन स्वात्मनोऽनन्यत्वात् अन्यब्रह्मविषया जिज्ञासा शिष्यस्य निवर्तिता स्यात्। न ह्यनस्य

---

[1] केनोपनिषत् ४-३२।

[2] उपनिषद्भाष्यम्, प्रथमः खण्डः, पुटम् २८।

[3] केनोपनिषत् २-५।

[4] केनोपनिषत् २-५।

[5] केनोपनिषत् १-३।

स्वात्मनो विदिताविदिताभ्यामन्यत्वं वस्तुनः सम्भवतीत्यात्मा ब्रह्मेत्येष वाक्यार्थः।'[1] 'अयमात्मा ब्रह्म' इति श्रुतिरत्र चरमप्रमाणम्। एवं 'अन्यदेव तद्विदितादथो अविदितादधि' इति आगमवाक्येन आत्मनः अहेयत्वमनुपादेयत्वं च प्रतिपादितम्। ब्रह्मण आत्मत्वप्रतिपादने श्रुत्यानया युक्तिः प्रतिपादिता। एवं विदिताविदिताभ्याम् अन्यद् ब्रह्मेति उपपत्तिलिङ्गस्य सद्भावोऽपि अत्र प्रदर्शितः।

**४. उपसंहारः-** अस्यामुपनिषदि आद्ये खण्डद्वये निर्गुणं निर्विशेषं ब्रह्मतत्त्वं प्रतिपादितम् श्रोत्रस्य श्रोत्रमित्यादिभिः मन्त्रैः। तृतीयचतुर्थयोस्तु सगुणब्रह्मतत्त्वं मन्दमतीभ्यः अधिकारिभ्यः सुखबोधाय प्रतिपादितम्। 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इति निर्गुणतत्त्वस्य सुलभेन बोधः अल्पधीमतां न भवति अतः अन्तिमखण्डद्वये आख्ययिकया ब्रह्मतत्त्वं प्रतिपादितम्। अस्माभिः सम्पूर्णाया उपनिषदः जीवब्रह्मैक्यरूपे आत्मतत्त्वे एव षड्विधलिङ्गानां तात्पर्यं प्रदर्शितम्। स्वबुद्धिकौशलेन यथामति अत्र केनोपनिषन्मन्त्रेषु उपक्रमादिलिङ्गानां सद्भावः प्रदर्शितः। अस्माभिः प्रदर्शितान्मन्त्रान् विहाय अन्येष्वपि मन्त्रेषु कथं तात्पर्यलिङ्गानां प्रयोगो विद्यते तद्विचारयितुं शक्यते। एवं केनोपनिषदस्तात्पर्यम् अद्वैतब्रह्मण्येव इति निश्चप्रचम्।

## उपयुक्तग्रन्थसूची


१. जोयिस्, कृष्ण. *शाङ्करदर्शनमर्मप्रकाशः.* एम्.एल्. नरसिंहमूर्तिः (सम्पा.). तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, १९९६.

२. *केनोपनिषत्.*/गोस्वामी, सीतानाथ (सम्पा.). ३८ विधान सरणि कलकाता-६ : संस्कृतपुस्तकभाण्डार, २००६.

३. *उपनिषद्भाष्यम् प्रथमः खण्डः.* शास्त्री एस. सुब्रह्मण्य (सम्पा.). वाराणसी : श्री दक्षिणामूर्तिमठ प्रकाशन, २०१२.

४. *उपनिषद्भाष्यम् द्वितीयः खण्डः.* शास्त्री, एस. सुब्रह्मण्य (सम्पा.). वाराणसी : श्री दक्षिणामूर्तिमठ प्रकाशन, २०१२.

५. सदानन्दयोगीन्द्र. *वेदान्तसारः दशमसंस्करणम्.* पाल विपदभञ्जन (सम्पा.). ३८ विधान सरणि कलकाता-६ : संस्कृतपुस्तकभाण्डार, २०१६.

६. *वेदान्तदर्शनम्.* पुरी चिद्घनानन्द (सम्पा.). १ उद्बोधन लेन बागबाजार कलकाता ७००००३ : उद्बोधन कार्यालय, २०१४.

७. धर्मराजाध्वरीन्द्रः. *वेदान्तपरिभाषा।* भट्टाचार्य, पञ्चानन (सम्पा.)। ३८ विधान सरणि कलकाता-६ : संस्कृतपुस्तकभाण्डार, १३७७ बङ्गाब्दः.

८. भर्तृहरिः. *वाक्यपदीयम् (वाक्यकाण्डम्-द्वितीयो भागः).* तिवारी हरिनारयण (सम्पा.). वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, २०१५.


[1] उपनिषद्भाष्यम् प्रथमः खण्डः, पुटम् २२।

# अथर्ववेदानुसारं कृषेः मूलभूततत्त्वानां महत्त्वपूर्णानां विश्लेषणम्

डॉ. बिकाश मण्डलः, संस्कृतविभागः
मालदा, पश्चिमबङ्गः, 732203,
दूरवाणीसंख्या- 9944991682
अणुसङ्केतः- bikashmandal250@gamil.com

**प्रबन्धसारः-** प्राचीनकालादेव भारतीयाः कृषिभूमित्वेन कृषिभूमिरिति महत्त्वमवगता आसन्। भूमिः कृषिकार्यस्य मुख्यकारकोऽस्ति। मनुष्याणां दीर्घकालं यावत् पौष्टिकं आयुर्भवितुं पौष्टिकभोजनस्योत्पादनं पूर्वापेक्षास्ति। आधुनिकयुगे हरितक्रान्तिद्वारा मुक्तमधिकं कृषि उत्पादनं भवति चेदपि कृषि उत्पादनेषु पोषणस्य गुणवत्तायामत्यन्तं न्यूनताभवत् फलतोमानवस्य स्वास्थ्यस्य नित्यं क्षीणं भवति। सम्प्रत्याधुनिककृषिविज्ञानेन रासायनिक-उर्वरक-कीटनाशकान्यविवेकीरूपेणोपयुज्यन्ते। एवं समुचितपोषणेन कृषिउत्पादनं वर्धमानमस्ति। अत आधुनिककृष्योत्पन्ना एतादृशाः प्राणघातकाः समस्याः मानवसंस्कृतीनां क्षयस्य विनाशस्य वा घातककारणानां मध्य एकं कारणं दृश्यन्ते। अपरपक्षे कृषिक्षेत्रे एतादृशानामाधुनिकप्रौद्योगिक्याः वैज्ञानिकप्रगतेरत्यधिकप्रसारणेन बहवोदुष्टपरिणामा अस्तित्वं प्राप्नुवन्ति। वैदिकग्रन्थेषु वयं विविधकृषिविग्रहसमाधानार्थं कृषिविशेषज्ञानाम्, शोधकर्तृणां च प्रसङ्गानां सम्मुखीभवन्ति। कृषिकार्यस्य कृते महत्त्वपूर्णेषु प्राकृतिकतत्त्वेषु वा अवयवेषु वा अन्यतमं एकं जलमस्ति। यथा भूमिरहितकृषेरचिन्त्यम्, तथैव जलं विना कृषिः कर्तुं सर्वथा असम्भवः। वैदिकग्रन्थेषु जलम्, आपो, सलिलम् इत्यादयः सम्बोधिताः सन्ति। अथर्ववेदः प्राचीनतमः वैदिकः ग्रन्थः अस्ति यस्य सामाजिकं, धार्मिकं तथा वैज्ञानिकं विश्लेषणं कृषेः क्षेत्रे अपि दृश्यते। कृषिः मानवजीवनस्य आधारः इत्येव अथर्ववेदे विशेषं उद्घाटितमस्ति। कृषेः मूलतत्त्वानि यथा पृथिवी, जलं, बीजानि, पर्यावरणसमंवयः च अथर्ववेदे विविधानि सूक्तानि रूपेण विवरणानि सन्ति।

अथर्ववेदः कृषेः संरक्षणस्य पर्यावरणसन्तुलनस्य च पारमर्जनं करोति, येन कृषिः प्रकृतिसंरक्षणेन सह दीर्घकालीनं स्यात्। वैदिकयुगे जलस्य महत्त्वमपारमासीत्। कृषिविज्ञानं वैदिकसंस्कृतेर्जीवनरेखासीत्। कृषिवैज्ञानिकैः विस्तृतरूपेण सूचिताः वर्तमानकृषेः समस्याः वैदिककालस्य कृषिविधिभिः व्यवस्थिताः कर्तुं शक्यन्ते। अतोवैज्ञानिकविधिः सदा गहनस्य ज्ञानस्य प्रतिबिम्ब एव भवति। प्राचीनवैदिकयुगेषु प्रचलितानां कृषितन्त्राणां, जनादेशानां च समीक्षात्मकदृष्टिकोणेन मूल्याङ्कनेन च भविष्यत्कृषिनीतिनां कार्यान्वयनेन सह वर्तमानकृषिसमस्यानां अस्माकं जनादेशं संशोधितुं शक्नुमः।

**कुञ्चीशब्दाः -** वैदिकग्रन्थः, मानवसंस्कृतिः, कृषिः, अथर्ववेदः, भूमिः, जलम्।

**प्रस्तावना** -मानवजीवने दीर्घायुषः कृते पौष्टिक आहारोऽत्यावश्यकोऽस्ति। अद्यतनयुगे कृषिक्षेत्रे हरितक्रान्तिस्य फलस्वरूपं कृषिस्योत्पादनस्तरोवर्धितः, परन्तु कृषिजन्यपदार्थानां गुणवत्तार्थात् पोषणगुणवत्ता न्यूनीभूतास्ति। अस्य कारणात् निरन्तरं आत्मनोऽवनतिर्भवति। अद्यत्वे प्रगतिशीलकृषौ रासायनिक-उर्वराणां कीटनाशकानां च बहूपयोगोभवति। क्रियमाणः फलतोऽपोषककृषिपदार्थानाम् उत्पादनं भवति। एवं प्रगतिशीलकृषावेवं उत्पद्यमानाः समस्याः भविष्ये मानवसंस्कृतेर्विनाशस्य कारणेष्वन्यतमा भवितुमर्हन्ति। अस्याः प्रगतिशीलकृष्याः माध्यमेन मानवसभ्यतायां बहवोदुष्टा आगच्छन्ति।

प्राचीने निहितं कृषिप्रज्ञा भारतीयशास्त्राणि अत्यन्तं प्रासंगिकानि सन्ति आधुनिकस्य स्थायिकृषेः सन्दर्भः। एतेषु ग्रन्थेषु महत्त्वे बलं दत्तम् अस्ति जैविककृषिः, सस्यपरिवर्तनं, जलं च संरक्षणम्-अधुना अत्यावश्यकाः अभ्यासाः लचीलकृषिव्यवस्थानां निर्माणार्थम्। इत्यनेन इत्यस्मिन् प्राप्तानां सिद्धान्तानां अध्ययनं प्रयोगं च प्राचीनग्रन्थाः यथा - ऋग्वेदः, अर्थशास्त्रः, तथा बृहत् संहिता, आधुनिक कृषकाः शक्नुवन्ति स्थायित्वस्य विषये बहुमूल्यं पाठं ज्ञातुं, पर्यावरणस्य प्रबन्धनं, दीर्घकालीनञ्च कृषिसिद्धिः।

अथर्ववेदः कृषेः क्षेत्रे भूमेः, जलस्य, बीजानां, सूर्यकिरणानां, वायोः च मूलभूततत्त्वानां महत्त्वं प्रतिपाद्य कृषिविज्ञानस्य प्राचीनतमं स्रोतं वर्तते। जलस्य संरक्षणम् अपि अत्यावश्यकं, यतः वर्षाजलं कृषिफलवृद्धये मौलिकं स्रोतः। उच्चगुणयुक्तानि बीजानि कृषेः सफलतायाः निरूपकानि सन्ति। अतः तस्य संरक्षणं तथा संरक्षणविधयानि अथर्ववेदे प्रतिपद्यन्ते। सूर्यकिरणाः जीवशक्तिं यच्छन्ति,

वायुः च कृष्ये अनिवार्यः जीवनदायकः कारणः अस्ति। जैविक खादानाम् उपयोगेन भूमेः उर्वरता वर्ध्यते, कृषेः उत्पादनं च सुगमतया सम्पद्यते। अथर्ववेदः कृषेः संरक्षणं, पर्यावरणसन्तुलनं च प्रवृत्तये प्रेरयति, यतः प्रकृतिसंरक्षणेन कृषि दीर्घकालं फलदायिनी भवति। अतः आधुनिककाले अपि अथर्ववेदस्य कृषिशास्त्रं सम्यक् अध्ययनं कृषिशिक्षायां, संरक्षणे च अत्यन्तं आवश्यकम्। अथर्ववेदानुसारं कृषेः मूलभूततत्त्वानां कृषिक्षेत्रे स्थैर्यं, समृद्धिं च सुनिश्चितुं आधारं ददाति। जैविकखादानां उपयोगः भूमेरस्य उर्वरता संवर्धयति, यत् कृषेरधिकर्थं शरीरसमृद्धिं वर्धयति।

प्राचीनकालादेव भारतीयाः भारतस्य कृषिराष्ट्रत्वेन भूमिमहत्त्वस्य विषयेऽवगता आसन्। भूमिः कृषिकार्यस्य मुख्यो घटकोऽस्ति। अत एव यजुर्वेदे - **'भूमिरापनं महत्'**[1] इत्युक्तम्। अर्थात् भूमिः कृष्याः महान् स्थानोऽस्ति, भूमेः यजुर्वेदे प्रशंसितास्ति - **'नमो मात्रे पृथिव्यै नमो मात्रे...कृशौ त्वा क्षेमया त्व रय्यै त्वा पोषाय त्वा'।**[2] भूमेः महत्त्वमथर्ववेदेऽपि व्यज्यते। अस्यार्थववेदस्य पृथिवीसूक्तं भूमिसूक्तं वा प्रथमोदाहरणं पृथिव्याः माहात्म्यम्, यत्र ऋषिः पृथिव्याः पुत्रं वा पृथिवीं च पृथिवीं च मातेति स्वयमेव निर्दिशति। अस्मिन् सन्दर्भ उक्तं भवति - **'माता भूमिः पुत्रो अहं पृथिव्याः'।**[3] पुनोऽर्थवेदे पृथिवी मातृत्वेन स्वीकृता - **'विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम्'।**[4] भूम्यधिकारः कृषिप्रगतेः सह सर्वदाविच्छिन्नरूपेण सम्बद्धोऽस्ति।

**कृषिभूमेरधिकारोविभागोमापनञ्च** -प्राचीनकाले भूमिविषये साम्प्रदायिकोऽधिकार आसीत्, तस्मात् भूमित उत्पन्नञ्च साम्प्रदायिकरूपेण वितरितं स्यात्। अन्येषां राज्यानां स्वभूमिरक्षणार्थं सस्यानां करं ग्रहीतुं अधिकार आसीत्। अनेन राज्ञो भूमेरधिकारस्य सार्वभौमत्वं स्वीकृतम्। राज्ञ इच्छानुसारं ब्राह्मणेभ्यः क्षत्रियेभ्यः मन्दिरेभ्यः विहारेभ्यः च भूमिदानं कृतवन्तः। एतादृशेन भूमिदानेन तस्य भूमि-स्वामित्वं व्यज्यते। पश्चात् परिवारविभाजनेन भूमि-स्वयंस्वामित्वं जातम्। एवं प्राचीनभारते भूमिस्वामित्वस्य त्रीणि अवधारणाः प्रचलिताः आसन्। यथा - १. सामूहिको भूस्वामित्वम् २. स्वयं भूस्वामित्वम् ३. राज्यस्य राज्ञो वा भूस्वामित्वम्। प्राचीनभारते भूमिविषये यथार्थतया कस्याधिकार आसीत्? अस्मिन् विषये स्पष्टतया किमपि वक्तुं न शक्यते, यत एतेषां त्रयाणां भूमेरधिकारस्य कृते बहु सूचना न प्राप्यते। अत एवास्मिन् विषय इतिहासकारानाम् मध्ये पर्याप्तं मतभेदोऽस्ति। भूमेरधिकारपरम्पराणां प्रारम्भिकाः सन्दर्भाः वैदिकसाहित्येषु दृश्यन्ते, तत्सम्बद्धाः नियमाः प्रथमं धर्मसूत्रेषु दृश्यन्ते, येषां पश्चात् स्मृतिकरैः, भाष्यकारैः, लेखकैः च संशोधनं विस्तारं च कृतम्। राज्यानां वा राजानां वोत्पत्तिपूर्वं प्रकृत्या प्रदत्तानां प्राकृतिकसंसाधनानामुपरि सम्पूर्णसमाजस्याधिकार आसीत्। प्रकृत्या प्रदत्तानि सर्वाणि नद्यः सरसस्तडागो वनानि भूमिः पर्वताः मार्गाः गोचराश्च समानरूपेण हर्षिताः आसन्। परन्तु क्रमेण तस्मिन् व्यक्तिगतमूल्यानि स्थापितानि भवन्ति। शतपथे ब्राह्मणे[5] उक्तं यत् - न कोऽपि राजा स्वपरिजनानामनुज्ञां विना भूमिं दातुं न शक्नोति। धर्मसूत्रेषु, अर्थशास्त्रेषु च गोचरभूमिः सर्वेषां ग्रामजनानामुपयोगितायाः विषयत्वेन स्वीक्रियते। ऋग्वेदमन्त्रे[6] ग्रामे सर्वेषां पशूनामेकेन व्यक्तिना पालनमपि च चरने गवां चरनञ्चोक्तम्। कृषिदृष्ट्या भूमिविभागः महत्त्वपूर्णः विषयोऽस्ति। वेदे भूमिः द्विधा विभक्ता - १. कृष्टपच्या २.अकृष्टपच्या। यर्जुवेदे कृषिजन्यः प्रौढाहारः कृष्यात् कृषितश्च बहिष्कृतोऽस्ति। उत्पन्नं पौष्टिकं अन्नं अकृष्टपच्यमिति। अस्मिन् सन्दर्भ उच्यते - **'कृष्टपच्याश् च मेऽकृष्टपच्याश् च मे...'।**[7] ऋग्वेदे भूमिः त्रिधा विभक्ता - **'स हि शर्धो न मारुतं तुविष्वणिरप्न-स्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः'।**[8] १. अप्नस्वती २. उर्वराः ३. आर्तना। अपरपक्षे यजुर्वेदे भूमिं पर्वतमृत्तिकावालुका-शिलावनस्पतयः इत्यादयः वर्णिताः सन्ति। वैदिकग्रन्थेषु भूमिविवादानां निराकरणाय च कृषिविशेषज्ञाः निर्दिश्यन्ते। ऋग्वेदे कृषिविशेषज्ञः 'क्षेत्रवित्' इति उच्यते। यः व्यक्तिरेतत् विज्ञानं न जानाति स्म सः 'अक्षेत्रवित्' इत्युच्यते स्म। अत

[1] शु. य. - २३.४६
[2] शु. य. - ९.२
[3] अ. वे. - १२.१.१२
[4] अ. वे. - १.२.१
[5] श. ब्रा. - ७.१.१.४
[6] ऋ. वे. - १०.१९.३-४
[7] शु. वे. - १८.१४
[8] ऋ. वे. - १.१२७.६

ऋग्वैदिककाले भूमिः परिमातासीत्। भूमिं परिमितं पृथक् पृथक् भूखण्डेषु विभज्य कृषकैः कृषिकार्यं कृतम्। भूमिर्मापनपट्टिकाया अथवा मापदण्डेन मापितासीत्। अस्मिन् सन्दर्भ उल्लिखिता - **'क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम्'**[1] इति। परन्तु तस्मिन् समये भूमिमापनस्य एककं किम् आसीत् इति न ज्ञायते। अस्य विषयस्य प्रारम्भिकाः सन्दर्भाः पाणिनेः अष्टाध्याय-धर्मसूत्रेषु, बौद्धसाहित्येषु च प्राप्यन्ते।

**भूमेः महत्वम्-**अथर्ववेदः भूमेः महत्त्वं प्रकटीकरोति, **'माता भूमि पुत्रोऽहं पृथिव्या'**[2] इति सूक्तेन भूमिः जनानां जीवनस्य मूलाधारः घोषितः। भूमेर् पोषणं, उर्वरता च कृषि सिद्धेः प्रथमार्थं मत्वा क्षेत्रस्य रक्षणं सम्यक् विधातव्यम्।

**जलसिञ्चनन्नियमा उपयोगाश्च -**कृष्याः मुख्यप्राकृतिकसिद्धान्तेषु जलस्य महत्तमपारमस्ति। यथा भूमिं विना कृषिः कल्पयितुं न शक्यते, तथैव जलं विना कृषिः सर्वथा असम्भवः योजना अस्ति। वैदिकसाहित्ये जलं, अप्, वारि, नीरं, सलिलः, वर्षा, अंबु इत्यादय उच्यन्ते। वैदिकयुगे जलस्य गुरुत्वाकर्षणमपारमासीत्। यजुर्वेदस्यैकस्मिन् मन्त्रे स्पष्टतया उक्तम् – **"सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः। सोऽहं वाजं सनेयमग्ने"॥**[3] पुन ऋग्वेदे ऋषिर्जलदेवीमातमरक्षणार्थं प्रार्थयति - **'आपो देवीरिह मामवन्तु'।**[4] वर्षाकाले मेघवृष्ट्या अधिकं जलं प्राप्यते। अत एव ऋषिः यजुर्वेदे वर्षाऋतुं प्रणम्य - **'नमो वः पितरो जीवाय...'**[5] इति। अस्मिन् मन्त्रे सयाणाचार्यः 'जीवाय' इत्यस्यार्थः 'जीवनहेतुभूताय वर्षाभ्यो' इति व्याख्यायते। ऋग्वेदः, यजुर्वेदः, अर्थववेदः च सिञ्चनार्थं प्रयुक्तानां जलस्य विविधानां स्रोतानां निर्दिशन्ति। सेचनार्थं प्रयुक्तजलस्य चतुर्विधं ऋग्वेदे उल्लिखितम् अस्ति - १. दिव्याः आपः - मेघाभ्यां वर्षेण प्राप्तं जलम्। २. खनित्रिमा आपः - उत्खननेन उत्पन्नं भूजलं व्युत्पन्नं भूजलं च। ३. स्वयंजा आपः - स्रोतानां जलम्। ४. समुद्रार्थ आपः - समुद्रं मिलित्वा नद्यः जलम्। अथर्ववेदे[6] कृषिक्षेत्रे सेचनाय प्रयुक्तानि जलस्रोतानि त्रीणि भिन्नानि वर्णितानि सन्ति। उदाहरणतया- १. धन्वन्याः आपः - मरुप्रदेशे जलं प्राप्तम्। २. अनुप्या आपः - तडागनहरादिभ्यः प्राप्तं जलम्। ३. खनित्रिमा आपः - भूमिगतकूपजलाशययोः प्राप्तं जलम्। ४. कुम्भे आभृताः - जलं घटे आनयत्। ५. वार्षिकीः आपः - मानसूनैः प्राप्तं जलम्। ६. सिन्धुभ्यः - नदीजलम् ७. हैमवती आपः - हिमाच्छादितपर्वतेभ्यः जलम्। ८. उत्स्याः ते शं उ सन्त - प्रवाहाभ्यां जलम्। ९. सनिष्यदा आपः - वेगेन प्रवाहमानं जलम्। अत एतेषां सर्वेषां प्रमाणानामाधारेण सहजतया कल्पयितुं शक्यते यत् इदानीं यथा वर्तते तथा तेषु कालेषु प्राकृतिकं कृत्रिमञ्च जलं कृषिकार्याय प्रयुक्तमासीत्।

**कृषिकार्ये जलस्य आवश्यकता -**जलम् अस्माकं जीवनस्य मूलाधारः अस्ति। अथर्ववेदे जलस्य महत्त्वं विविधैः मन्त्रैः प्रतिपादितम् अस्ति। जलम् एव स्वास्थ्यस्य, समृद्धेः, शक्तेः च मूलतत्त्वम्। कृषिकर्मणि जलम् अतीव आवश्यकम् अस्ति। अथर्ववेदे जलम् न केवलं पीत्वा शरीरस्य पुष्टये, किन्तु रोगनिवारणाय, भूमि-सींचनाय, उद्योगाय, धार्मिककृत्येषु च आवश्यकं इति प्रतिपाद्यते। जलस्य शुद्धता अपि अत्र अनिवार्या उल्लेखिता अस्ति। सस्येः वृद्धिः, भूमेः हरितिमा, अन्नस्य उत्पादनम्, औषधीयवर्गः च केवलं पर्याप्तेन जलप्रवृत्त्या साध्यन्ते। अथर्ववेदे अपि विषक्तस्य जलस्य उपयोगः निषिद्धः - शुद्धोदक-मूलकः उत्पादनमेव आरोग्याय हितकरम्।

जल जीवनस्य मुख्यतत्त्वम् अस्ति। अतः अथर्ववेदीय पृथ्वीसूक्ते जलस्य महत्वं निरूपितम् अस्ति। **'शुद्धा न आपस्तन्वे क्षरन्तु'**[7] इति मन्त्रे जलस्य शुद्धता स्वास्थ्याय आवश्यकत्वम् प्रति प्रकाशः कृतः अस्ति। जलस्य सन्तुलनात् भूमौ सरसता, हरीतिमा, वातावरणे उत्साहः, सर्वेषां प्राणिनां जीवनम् सुखमयं भवति। जल से पृथ्वी पर सौम्यता आती है - **'वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामनि धामनि'।**[8]

---

[1] ऋ. वे. - १.११०.५
[2] अ. वे. - १२.१.१२
[3] य. वे. - १८.३५
[4] ऋ. वे. - ७.४९.१-४
[5] शु. वे. - २.३२
[6] अ. वे. - १.४.१-४, १९.२.१-२, १.६.४
[7] अ. वे. - १२.१.३०
[8] अ. वे. - १२.१.५२

**अथर्ववेदे जलमहोत्सवः** -अथर्ववेदे जलस्य उपयोगः न केवलं पीत्वा, किन्तु सीचनाय, भूमेः उर्वरतासंज्ञकाय, एवं बीजानां वृध्दये अपि महत्त्वपूर्णः अस्ति। स्रोतस्थ जलस्य निदेशकः अथर्ववेदस्य मन्त्रेषुजलस्य विविध स्रोताः - नद्याः वर्षादि - कृष्यां आवश्यकत्वेन निर्दिष्टाः। यः कृषकः एतेभ्यः जलस्य उचितं प्रबन्धं करोति, सः सदा समृद्धिं प्राप्नोति। यो वर्षस्य जलं नद्याः, कूपस्य, नहरस्य वा कृषि कार्ये पिबति, तस्य कृषिः सदा फलवती भवति।

**'शै त आपो हैमवतीः शमु ते सन्तृत्स्याः।**
**शं ते सनिष्यदा आपः शमु ते सन्तु वर्ष्याः॥'**[1]

अयं मन्त्रः दर्शयति यत् जलम् शुभकारी, शीतलकरं, जीवनदायकं च अस्ति।

**जलस्य प्रधानत्वम् -**

**"विद्या शरस्य पितरं पर्जन्यं भूरिधायसम्।**
**विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम्॥"**[2]

एषः मन्त्रः सूचयति यत् पर्जन्यः (वर्षा) सर्वं पोषयति, औषधीनां रक्षणं करोति च।

**जलस्य गुणाः -** अथर्ववेदीय मन्त्रेषु जलामृतत्वं, जलस्य औषधिगुणः, तस्य शुद्धता, जीवनाय आवश्यकत्वं च सुप्रष्टम् उपदिष्टम् अस्ति–

**"अप्स्वऽनन्तरमृतमप्सु भेषजम्।**
**अपामृत प्रशितिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनी॥"**[3]
**"ता अपः शिवा अपोऽयक्ष्मंकरणीरपः।**
**यथैव तप्यते मयस्तास्त आ दत्त भेषजीः॥"**[4]

एषु मन्त्रेषु जलस्य शुद्धता, जीवनदायिनी शक्तिः, औषधीयगुणः, शीतलता च वर्ण्यते।

**सीञ्चनस्य विधिः** -अथर्ववेदे कृत्रिमसाधनैः, जलनालिका-निर्माणेन अपि सीञ्चनस्य उपायाः वर्णिताः। भूमेः उर्वरता वर्षाजलात् सीचनात् च वर्धते। फसलस्य उत्तमवृद्धये शुद्धं सीचनं आवश्यकम्। कृषेः तृणधान्यवृद्धये वर्षा-जलस्य अथवा सीञ्चनस्य प्रधानता वक्तव्या। जलसंपदा संजोक्तव्या यत् कृषेः उत्पादनं सुसम्पन्नं भवति।

**समापनम्** –यः अस्माकं जीवनं सरसयति, प्रकृतिं रक्षति, कृषिम्, उद्योगं, स्वास्थ्यं च वर्धयति, तस्मै जलाय अथर्ववेदे अतिविशिष्टं स्थानं दत्तम् अस्ति। जलस्य सततं संरक्षणम् अस्माकं परमकर्त्तव्यं इति।

**प्रकाशस्य, वायोः च योगदानम्-**प्रकाश (सूर्यरश्मयः) तथा वायुः कृषेः फसलोत्पादने अत्युत्तमा भूमिका वहन्ति। अथर्ववेदे वर्णितं यत् **"अविर्वै नाम देवतार्तेनास्ते परीवृता। तस्या रूपेणेमे वृक्षा हरिता हरितस्रजिः॥"**[5] अवितत्त्वस्य (Chlorophyll) कारणेन वृक्षाणां हरितत्वं संभवति। वायु, सूर्यरश्मी, जलः इत्येतैः संयुक्ते प्रकाशसंश्लेषणविधिः (Photosynthesis) सिद्ध्यति।

**कृषन्तो वा भूमिकर्षणविधिः** -कृषिः प्रथमा एव विधिः भूमिकर्षणम्। भूमिकर्षणेन कृष्या भूमिः कृषियोग्यः क्रियते। कर्षणं विना भूमिकृषिः प्रायोऽसम्भवः। वैदिकसाहित्ये बहुषु स्थानेषु कृषिकार्यप्रयुक्तानां विविधानां यन्त्राणामुल्लेखः सन्ति। एतेषु साधनेषु हलः प्रमुखेषु उपकरणेषु अन्यतममस्ति। ऋग्वेदयजुर्वेदाथर्ववेदेषु अनेकेषु मन्त्रेषु हलस्य उल्लिखितः।

**बीजानां गुणवत्ता-**अथर्ववेदे उच्चगुणयुक्तस्य बीजस्य उपयुक्तता प्रतिपादिता अस्ति। बीजवृद्ध्यर्थं मन्त्रेषु प्रार्थना दृश्यते - **'सद्यः शीघ्रं बीजं वर्धय'**। उचितबीजप्रयोगः कृषेः सफलतां सुनिश्चितयति।

[1] अ. वे. - १९.२.१
[2] अ. वे. - १.२.१
[3] अ. वे. - १.४.४, १.६.२
[4] अ. वे. - १९.२.५
[5] अ. वे. - १०.८.३१

**जैविक खादः उपयोगः**-अथर्ववेदे गौमूत्रस्य, गोबरस्य, क्षीरस्य, घृतस्य, च शर्करायाः मिश्रणेन क्षेत्रस्य पोषणं वर्णितम् - **'घृतेन सीता मधुना समञ्ज्यताम्...।'**[1] इति। खादस्य उपयुक्तात्वेन फसलोत्पादनं वर्धते।

**कृषेः संरक्षण एवं पर्यावरण सन्तुलनम्** -भूमेः उर्वरता, जलसंपदा, गुणवत्तायुक्तं बीजं, जैविक खादः च कृषेः मूलभूततत्त्वानि सन्ति। एषां समुचितसंरक्षणं कृषेः चिरस्थायित्वं तथा पर्यावरणसंतुलनं सुनिश्चितयन्ति। एवं, अथर्ववेदः कृषेः वैज्ञानिकं, पर्यावरणीयं सामाजिकं च दृष्टिकोणं विस्तीर्णरूपेण प्रतिपादयति, यत् आधुनिककाले अपि अत्यन्तं प्रासंगिकमस्ति।

**वपन्तो वा रोपणनियमाः** -कृषिकार्यस्य द्वितीयः महत्त्वपूर्णः नियमः वपन्तोऽथवा रोपणनियमाः। वैदिकसाहित्ये 'वपन्ता'[2], 'वपत'[3], 'वपन्तः'[4] इत्यादीनि पदानि वपनार्थं रोपणार्थं वा प्रयुज्यन्ते। पुनश्च यः रोपयति सः 'वपम्'[5] इत्युच्यते। यजुर्वेदे '**कृते योनौ वपतेह बीजम्**'।[6] इत्यत्र स्पष्टतयोपदिश्यते यत् बीजं भूमिं शोधयित्वैव वपनीयमित्यभिप्रेतं कीट-अङ्कुर-विहीनं वप्यते।

**"या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा।**
**मन्दामि बभ्रूणामहं शतं धामानि सप्त च॥"**[7]

अश्विनीदेवाः मनुं बीजवपनकलामुपदिष्टवन्त इत्यृग्वेदे[8] उल्लेखोऽस्ति।

**लुनन्तो नियमाः** -सस्यवनस्पतिः पूर्णतया वर्धितः सस्यः पूर्णतया परिपक्वः भवति तदा कटनं वा कटनं वा क्रियते।
शतपथब्राह्मणे अस्य नियमस्य वाचकार्थे लुनन्तः शब्दः प्रयुक्तः। फलानां कटनीकाले बहवः धार्मिकानुष्ठानानि अक्रियन्त।
वैदिककाले मृख्याशनं सङ्ग्रेण वा हेसोना वा छेदनार्थं प्रयुज्यते स्म। अथर्ववेदे[9] कृषकस्य फलानां कृषकस्य आनन्दस्य सजीवं वर्णनं भवति। कटितसस्यानि लघुमुष्टिषु बद्ध्वा कृषिक्षेत्रं प्रति नीतानि आसन्।[10]

**मृणन्तो विधिः** -कटितसस्यं कृषिक्षेत्रे स्तम्भेभ्यः पृथक् कर्तुं मर्दनं अभवत्। शतपथे ब्राह्मणे[11] मृणान्तः शब्दः झरशब्दे प्रयुक्तः। सम्भवतः शिलासु पुनः पुनः प्रहारेन सस्यानि मर्दितान्यासन्। अथर्ववेदे एकस्मिन् स्थाने उक्तं यत् सस्यं मुसलेन, उलूखलेन च मर्दितमासीत्।[12] मर्दनानन्तरं तृणं तृणं च छाननेन वा फूत्कारेण वा विच्छिन्नम्।[13] यः एतत् कार्यं अकरोत्, सः धान्यकृत[14] इति उच्यत। तदा फलानां गृहं केनचित् धार्मिकानुष्ठानेन सह नीत्वा तौल्य सुरक्षितस्थाने स्थापितं अभवत्। उर्दारनाम्ना पात्रेण मापनं कृतम्।[15] अन्नं सुरक्षितं स्थापयितुमन्नगरानिर्मिताः, ऋग्वेदे[16] एतत् स्थिविरुच्यते।

**कृषिक्षेत्रे उर्वरकप्रयोगः** -कृषिक्षेत्रस्य जलस्य च मुख्यप्राकृतिकसिद्धान्तद्वयस्य चर्चां कृत्वाधिकसस्यानामुत्पादनार्थं भूमावुर्वरकं प्रयुक्तम्। पशव इव वनस्पतयोऽपि जलस्य, अन्नस्य च आवश्यकतामनुभवन्ति। यथा प्राकृतिकं कृत्रिमञ्च जलस्य स्रोतोऽस्ति तथा प्राकृतिकं कृत्रिमञ्चाहारस्यार्थात् उर्वरकस्य स्रोतोऽप्यस्ति। वनस्पतिनां भोजनं प्राकृतिकस्रोताभ्यां भवति, यथा सूर्यप्रकाशः, वायुः,

---

[1] य. वे. - १२.७०
[2] ऋ. वे. - १.११७.२१
[3] अ. वे. -३.१७.२
[4] श. ब्रा. - १.६.१.३
[5] तै. ब्रा. - ३.४.३.१
[6] शु. वे. (वा. सं.) - १२.६८
[7] तै. सं. -४.२.६.१
[8] ऋ. वे. - १.११२.१६
[9] अ. वे. - ३.१७.५
[10] ऋ. वे. - १०.८४.७, अ. वे. - ८.६.१५
[11] श. ब्रा. - १.६.१.३
[12] अ. वे. - ९.६.१४
[13] अ. वे. - ९.६.१६
[14] ऋ. वे. - १०.९८.१३
[15] ऋ. वे. - २.१४.११
[16] ऋ. वे. - १०.६८.३

मृत्तिकाजैविकपदार्था इत्यादयः। मानवनिर्मितं भोजनं कृत्रिमस्रोताभ्यां भवति, यथा विविधप्रकारस्योर्वरकस्य (रासायनिकं जैविकञ्च)। प्रकृतेः सूर्यप्रकाशः, वायुश्च कृषिक्षेत्रेऽत्यन्तं महत्त्वपूर्णाः कारकाः सन्ति। यद्यावश्यकं सूर्यप्रकाशं न प्राप्यते तर्हि वनस्पतिवृद्धिः स्थगिता भवति। सूर्यकिरणाः बीजानामुत्पत्तिवृद्धेः कारणमिति यजुर्वेदे उक्तम् - **'तस्यां नो देवः सविता धर्म साविषत्'।**[1] अपि चान्यो मन्त्रः कृषिसंवर्धनार्थमग्निसाहाय्यं याचते। अस्मिन् सन्दर्भे उच्यते - **'विश्वे भवन्त्वग्नयः समिद्धाः'।**[2] सूर्यस्य किरणाः न केवलं वनस्पतयोऽन्नं प्रयच्छन्ति, अपितु कृषिवृष्टिमप्युत्पादयन्ति - **'स्वाहा सूर्यस्य रश्मये वृष्टिवनये'।** [3] प्राचीनकाले भूमेरुर्वरतावर्धनार्थं जैविक-उर्वराणां प्रयोगस्य विषये मानवजातिः सुविदित आसीत्। अस्य प्राचीनतमं ज्ञानं वेदेषु प्राप्यते, यत्र गोवृषभमहिषगोबरमत्यन्तं लाभप्रदं ज्ञायते। ऋग्वेदे क्षेत्रसाधस इति क्षेत्रसाधशब्दो निषेचनार्थं प्रयुक्तः - **'ते नो व्यन्त वार्यं देवत्रा क्षेत्रसाधसः'।**[4] 'क्षेत्रसाधसः' शब्दस्य अर्थः - भूमिस्य उत्पादकशक्तिं वर्धयन्तः पदार्थाः। अथर्ववेदे पशूनां प्राकृतिकगोबरस्य महत्त्वं दत्तम् अस्ति - **'करीषिणीं फलवतीं स्वधामिरां च नो गृहे'।**[5] कस्यापि परियोजनायाः सफलता तस्मिन् परियोजनायां प्रयुक्तसामग्रीणां उपरि निर्भरं भवति। अधिकसामग्रीणां उपयोगेन आकर्षणस्य गुणवत्ता, वेगः च वर्धते। अतः कृषि इत्यादिषु महत्त्वपूर्णक्षेत्रेषु विभिन्नसामग्रीणां प्रयोगः स्वाभाविकः एव। अथर्ववेदसंहितायां कृषिकार्याय उपयोगिनो मुख्यसाधनानाम् सूचनाः प्राप्यन्ते। सीरा, हलम्, फालम् इत्यादीनि सामग्रीः वैदिककालात् एव कृषिक्षेत्रे प्रयुक्ताः सन्ति। तेषां चर्चा अधो लिखिताऽस्ति -

**सीरा -** वैदिकसंहितासु प्रायः हलः सीरा (सि + रक्)[6] इति उच्यते। कृषकाणां एकादशाधिकाः, सम्भवतः षट् यावत् हलाः आसन् - **'षड्योगं सीरमन्...'**।[7] लाङ्गलम् (लङ्ग + कलच्)[8] इत्यपि कथ्यते। कर्षणार्थं हलान् कर्षन्ति, वृषाणाम् स्कन्धेषु पृथक् पृथक् 'युगा' स्थापयन्ति इति मन्त्रे उक्तम्।[9] हलस्य दीर्घं वेणुं बद्धं यस्मिन् युगा स्थापयति स्म, यस्मिन् रज्जुभिः (वरत्राः) वृषस्य कण्ठं बद्धं भवति स्म - **'शुनं वरत्रा बध्यन्ताम्...'**।[10] हलस्य वज्रवत् कठिनः (पवीरवत्), कृषकस्य संचालनं सुखदः (सुशीमम्), सायणस्य मते च 'सोमसत्सारुः' (सोमयज्ञः करणं) इति उपनामानि व्रीह्यादि संस्कारद्वारा दत्तानि सन्ति, ये सर्वे तस्य स्वभावस्य उद्दीपकाः सन्ति हलः सुखेन क्षेत्राणां कृषिं कर्तुं समर्थः भवेत् इति ऋषिः कामयते । सायनस्य अनुसारं स्निग्धहस्तस्य वा इति अर्थे दत्तम् अस्ति, ये सर्वे तस्य स्वरूपस्य सूचकाः सन्ति - **'लाङ्गलं पवीरवत् सुशीमं सोमसत्सरु'**।[11] हलः सुखेन कृषिं कुर्यात् इति कामयते मुनिः - **'शुनं कृषतु लाङ्गलम्'**।[12] 'शुनासीर' इति मन्त्रेषु कृषिद्वयदेवता इति आह्वानम्।[13] तेन सन्तुष्टाः हविभिः व्रीहि-यवादीं स्वादिष्टं कर्तुं प्रार्थिताः - **'शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तमस्मै'**।[14] सायनाचार्येन अपि एतत् देवयुगलं 'वाय्वादित्यौ' इति अर्थः इति मन्यते, परन्तु विकल्परूपेण 'शुनः' इति 'सुखकरो देवः', 'सीरा' इति 'लाङ्गलभिमणि देवः' च इत्यर्थे अपि गृहीतम् अस्ति।[15] अवश्यं हलं

---

[1] वा. सं. - १८.३०
[2] वा. सं. - १८.३१
[3] वा. सं. - ३८.६
[4] ऋ. वे. - ३.८.७
[5] अ. वे. - १९.३१.३
[6] ऋ. वे. - १०.१०१.३-४, अ. वे. - ३.१७.१-२
[7] अ. वे. - ८.९.१६
[8] ऋ. वे. - ४.५७.४, अ. वे. - २.८.४
[9] सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्। अ. वे. - ३.१७.१
युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम्। अ. वे. - ३.१७.२
[10] अ. वे. - ३.१७.६
[11] अ. वे. - ३.१७.३
[12] अ. वे. - ३.१७.६
[13] शुनासीरेह स्म मे जुषेथाम्। अ. वे. - ३.१७.७, ऋ. वे. - ४.५७.५, ८
[14] अ. वे. - ३.१७.५
[15] ऋ. सं. भा. - ३.१७.५, ४.५७.४, ४.५७.५

आर्याणां पूज्यं यन्त्रम् आसीत्। कृषिक्षेत्रे मृत्तिकायाः कर्षणेन निर्मिता रेखा 'सीता' (सि+त) इति उच्यते।[1] आचार्यः सायणः स्वयमेव 'लाङ्गल-पद्धतिः' इति आह्वयत्।[2] सीतां स्तुवन् मन्त्रः कथयति- हे सीते! वयं त्वां भजामः। हे महाभाग! अस्माकं प्रति मुखं कुरुत। अस्माकं कृते सुखी भव, अस्माकं कृते फलप्रदः भव - **'सीते वन्दामहे त्वार्वाची सुभगे भव। यथा नः सुमना असो यथा न सुफला भुवः'॥**[3] वयं तां प्रार्थयामः यत् सः सर्वतः भक्तानाम् उपरि जलं वा दुग्धं वा वर्षयेत् - **'सा नः सीते पयसाभ्याववृत्स्व...'।**[4]

**हलम् -** हलस्य वेदेषु महत्त्वपूर्णं आवश्यकं च औजारं इति प्रारम्भिकं वर्णनं विविधमन्त्रेषु प्राप्यते। प्रायः कृषिक्षेत्रे कृषिः प्रथमं सोपानं भवति। वैदिककाले वर्तमानकालवत् हलवृषभसाहाय्येन कृषिः अक्रियते। अस्मिन् सन्दर्भे खगवेदे स्पष्टतया उक्तः -

**"उतो स मह्यमिन्दुभिः षड्युक्ताँ अनुसेषिधत्। गोभिर्यवं न चर्कृषत्"॥**[5]

सम्भवतः अत एव कृषिक्षेत्रे हलस्य अनिवार्यतां दृष्ट्वा गृहसूत्रेषु गृहसम्बद्धानां सर्वेषां धर्मसुधारानाम्, प्राङ्गणे हलस्य कस्यचित् भागस्य उपासना, पूजा च व्यवस्था अस्ति। एवं प्रकारेण कृषिप्रारम्भे हलपूजनानियमः क्रमेण समाजे प्रसृतः। हलविषये बहु सूचना वैदिकसाहित्ये प्राप्यते। ऋग्वेदस्य एकः मन्त्रः वदति -

**"युनक्त सीरा वि युगा तनध्वं कृते योनौ वपतेह वीजम्।**
**गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमेयात्"॥**[6]

अत्र 'सीरा' इति पदं हलस्य वा हलस्य वा अर्थे प्रयुक्तम्। 'युग' शब्दस्य अर्थः 'युगः' यः हलस्य मुख्यः भागः अस्ति। अतः युगे वृषभं योजयित्वा कर्षणं क्रीयते इति अस्मिन् मन्त्रे उक्तम्। सायणाचार्यः एव एतदर्थं दत्तवान्। सूक्तस्य अन्यः मन्त्रः पुण्यकर्षणं कथयति। अस्मिन् सन्दर्भे उच्यते - **'सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्'**[7] पुनः अथर्ववेदे उक्तं यत् पृथु वैन्यः प्रथमः कृषिद्वारा मानवजातेः सस्यानां उत्पादनं कृतवान् - **'ते कृषिं च सस्यं च मनुष्या उप जीवन्ति...'।**[8] सम्पूर्णे वैदिकसाहित्ये हलम् (लाङ्गलम्) इति पदं क्रमेण प्रयुक्तम् - सीरा, हलम्, लाङ्गलम् आदि। वैदिककाले लाङ्गलं मुख्यं कृषिसाधनमासीत्। हलेन उत्पद्यमानस्य अन्नस्य प्रचुरता परिवारस्य, कुटुम्बस्य, गोवृषभस्य, अश्वस्य इत्यादीनां पोषणं करोति - **'लाङ्गलं पवीरवत्सुशीमं सोमसत्सरु'।**[9]

**फालः -** हलस्य तलभागे यः तीक्ष्णः भागः, यः मृत्तिकां प्रविश्य मृत्तिकां भङ्गयति, सः फालः इति कथ्यते - **'शुनं सुफाला वितुदन्तु भूमिं शुनं कीनाशा अनु यन्तु वाहान्'।**[10] वैदिकभाष्यकारैः फालं तीक्ष्णधारयुक्तस्य हलस्य अधोभागः इति परिभाषितः। भाष्यकारः सायणाचार्यः अथर्ववेदे फालः पदस्य व्याख्यां करोति यत् - **'सुफालाः शोभनानि लाङ्गलमुखानि'।**[11] अर्थात् फालं हलस्य अलङ्कारिकं मुखं वा अग्रभागं वा यत् मृत्तिकां गभीरं प्रविश्य मृत्तिकां विभजति।

**खननम् -** हलस्य अतिरिक्तं कुदालं, फाल्तुम्, सेबलं, पश्नी, पेटी इत्यादीनि साधनानि कृषिकार्यं कर्तुं प्रयुज्यन्ते। एतानि सर्वाणि द्रव्याणि वैदिकसाहित्ये धातुः इति सामूहिकरूपेण निर्दिश्यन्ते। भूमिखननार्थं ऋवेदिकेषु मन्त्रेषु खिनित्रः उल्लिखितः अस्ति -

**"अगस्त्यः खनमानः खनित्रैः प्रजामापत्यं वलमिच्छमानः।**
**उभौ वर्णावृषिरूग्रः पुपोष सत्या देवेष्वाशिषो जगाम्"॥**[12]

---

[1] ऋ. वे. - ४.५७.६, ७
[2] अ. वे. - ३.१७.४
[3] अ. वे. - ३.१७.८
[4] अ. वे. - ३.१७.९
[5] ऋ. वे. - १.२३.१५
[6] ऋ. वे. - १०.१०१.३
[7] य. वे. - १२.६७, अ. वे. - ३.१७.१
[8] अ. वे. - ८.१०.१२
[9] अ. वे. - ३.१७.३
[10] अ. वे. - ३.१७.५
[11] अ. वे. (सा. भा.) - ३.१७.५
[12] ऋ. वे. - १.१७९.६

**निष्कर्षः** -अथर्ववेदे कृषेः मूलभूततत्त्वानि - भूमिः, जलं, बीजानि, सूर्यकिरणाः, वायुः, जैविकखादाः च संयुक्ते चिरस्थायित्वस्य आधारं निर्मीयन्ते। आधुनिककाले अपि एतानि तत्त्वानि कृषिक्षेत्रे अनुसृत्य सततम् उपरि अवलम्बनीया भवन्ति। एतेषां तत्त्वानां गहनं अध्ययनं कृषिविज्ञानं समृद्ध्यै शाश्वतारोग्यसम्पन्नजीवनाय च आवश्यकम्। एतत्प्रकारेण, अथर्ववेदस्य कृषिशास्त्रे अतीव विस्तृतं ज्ञानं विद्यमानं, यत् कृषेः सम्यक् परिचालनं तथा संरक्षणं बोधयति। एतेन, अथर्ववेदः कृषेः क्षेत्रे न केवलं प्राचीन वैदिक दृष्टिकोणं प्रतिपादयति, अपि तु सततश्च पर्यावरणसम्मतश्च कृषि नेतृत्वं उद्घाटयति, यत्र भूमि, जल, बीज, सूर्यः, वायुश्च सम्यक् संरक्षणेन कृषिविज्ञानस्य अनन्त संभावनाः सन्ति। यः कृषेः समग्रविचारः अथर्ववेदे दृष्टः सः आधुनेषु अपि कृषेः स्थिरप्रगत्यै पर्यावरणसम्यगनुरूपता च प्रदर्शयति। अतः एतेन विद्यमानेन वैदिकज्ञानस्य प्रकाशेन कृषेः विज्ञानं सततं संवर्धनीयं।

अथर्ववेदे कृषेः विविधमूलभूततत्त्वानां स्पष्टं निरूपणं दृश्यते। अत्र भूमेः पावित्र्यम्, जलस्य महत्त्वम्, सूर्यप्रकाशस्य प्राभवशक्ति च विषदतया वर्णितानि सन्ति। कृषेः सफलतायै केवलं बीजानां रोपणं न पर्याप्तं, किन्तु प्रकृत्या सह सम्यक् सम्वेदनशीलं च सम्बन्धं अपेक्ष्यते। अथर्ववेदे प्रदत्तानि मन्त्राः कृषकानां मनोबलवर्धनाय, भूमेः संरक्षणाय च प्रेरयन्ति। एतेषां तत्त्वानां ज्ञानं न केवलं आध्यात्मिकदृष्ट्या, अपि तु वैज्ञानिकदृष्ट्या अपि अतीव मूल्यवन्ति। अतः स्पष्टं यत्, अथर्ववेदः केवलं धार्मिकग्रन्थः न, अपि तु कृषि-जीवनस्य एकः दृढ आधारशिलाऽपि अस्ति।


**सन्दर्भग्रन्थसूचीः -**

**मूलग्रन्थाः -**

1. अथर्ववेद - सायण-भाष्य सहित, सम्पा, प. रामस्वरूप शर्मा गौड, चौखम्बा विद्याभवन, वाराणसी, 2003
2. आपस्तम्ब गृह्यसूत्र - हरदत्त एवं सुदर्शाचार्य टीका सहित, हिन्दी अनुवाद, उमेशचन्द्र पाण्डेय, चौखम्बा सीरीज आफिस, वाराणसी, 1971
3. ऋग्वेद - स्वामी दयानन्द-भाष्य, वैदिक पुस्तकालय, दयानन्द आश्रम, केशरगञ्ज, आजमेर, 2021
4. ऋग्वेद - सायण-भाष्य सहित, अनुवाद प. रामगोविन्द त्रिवेदी, चौखम्बा विद्याभवन, वाराणसी, 2007
5. ऐतरेय ब्राह्मण - सायणाचारयकृत वेदार्थ भाष्य सहित, सुधाकर मालबीय, प्राच्य भारतीय ग्रन्थमाला-14, वाराणसी, 1990
6. तैत्तिरीय ब्राह्मण - सायण-भाष्य सहित, प्रोः पुष्पेन्द्र कुमार, नाग प्रकाशन, दिल्ली, 1998
7. यजुर्वेद - स्वामी दयानन्द सरस्वती भाष्य, श्रद्धानन्द अनुसन्धान प्रकाशन केन्द्र, गुरुकुल काँकडी विश्वविद्यालय, दरिद्वार, 2009
8. वाजसनेयी संहिता - माध्यन्दिन शाखा (हिन्दी अनुवाद), ड. रामकृष्ण शास्त्री, चौखम्बा विद्याभवन, वाराणसी, 1962
9. शुक्लयजुर्वेद-संहिता: - पाण्डेयः, मनीषचन्द्रः, चौखम्बा संस्कृत प्रतिष्ठान, नई दिल्ली, 2024
10. शतपथ-ब्राह्मण - माध्यन्दिनी शाखा (संस्कृत एवं हिन्दी अनुवाद), सरस्वती, स्वामी सत्यप्रकाश:, विजयकुमार गोविन्दराम हासानन्द, 2014

**सहायकग्रन्थावली -**

1. गुप्ता, देवेन्द्रकुमार, वैदिक कृषि विज्ञान, प्रतिभा प्रकाशन, दिल्ली, 2012
2. द्विवेदी, कपिलदेव, अथर्ववेद का सांस्कृतिक अध्ययन, विश्वभारती अनुसन्धान परिषद, ज्ञानपुर, वाराणसी, 1988
3. शर्मा, नीरज, संस्कृत कृषि शास्त्र, लिट्रेरी सर्किल, जयपुर, 2013

# महाकवि-कालिदास-दृष्ट्या परमतत्त्वस्य स्वरूप-विमर्शः

डॉ. सुरेश्वर मेहेरः
सहायकाचार्यो मुख्यश्च, स्नातकोत्तर-संस्कृतविभागः,
राजधानी-महाविद्यालयः (उत्कल-विश्वविद्यालयः)
भुवनेश्वरम्, ओड़िशा
ईमेल: sureshjnu@gmail.com

**शोधसारः**- ऊर्णनाभो यथैव स्व-शरीरात् क्षण-मात्रेण सूक्ष्म-सूत्राणि परिसृज्य बृहज्जालं निर्माति, तथैव कविः निज-मानस-पटलादङ्कुरिते बीजे नाना-भावना-कल्पनानां समावेशं विधाय नवीनं साहित्यं विरचयति। कविः स्वयमेव सारस्वत-प्रजापतिः। साहित्ये यथैव भवति रस-स्थितिः (*'रसो वै सः'*) *तथैव दर्शने ब्रह्मस्थितिः* (*'अहं ब्रह्मास्मि'*)। अतः साहित्य-दर्शनयो-र्मध्ये विद्यते अभिन्न-सम्बन्धः। दर्शनस्य अथवा आध्यात्मिकतायाः परा काष्ठा परमतत्त्वस्य प्राप्तिः। जगति विराजते परमतत्त्वस्य सर्वत्र निदर्शनम्। उपनिषदि साधु उच्यते - *"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्"*।

परमसत्तायाः परमतत्त्वस्यानुग्रहं प्राप्य कविः स्व-कृतिं संसार-सरोवरे सरोजवत् प्रस्फुटितां कर्त्तुं प्रयतते, पुनः हृदयग्राहि-सौरभेण सर्वान् नितरामामोदयति। अस्माकं भारतीय-संस्कृतिः मुख्यतः आध्यात्मिकता-प्रधाना। कविषु भ्राजते ललामभूतो कालजयी विश्वकविः कालिदासः, यस्य कृतिषु वर्णन-प्रसङ्गानुसारं दार्शनिक-लौकिक-संघटनयो-र्मधुरं सामञ्जस्यं परिलक्ष्यते। वस्तुतः कालिदासस्य सम्पूर्णं दार्शनिकं विज्ञानं परमतत्त्व-स्वरूपान्तर्गतमेव।

वेदान्त-प्रतिपादितस्य ब्रह्मणः परमतत्त्वस्य प्रख्यापनं कालिदासस्य रचनासु अनेकशः समुपलभ्यते। अद्वैततत्त्वस्य विचारणायां विक्रमोर्वशीय-नाटकान्तर्गतः *"वेदान्तेषु यमाहुरेक-पुरुषम्"* इत्यादिकः श्लोकः उल्लेखनीयः। शिवस्य अर्धनारीश्वर-रूपवर्णनायां रघुवंशोक्तं पद्यमाद्यं प्रणिधेयम् *"वागर्थाविव सम्पृक्तौ वागर्थ-प्रतिपत्तये; जगतः पितरौ वन्दे पार्वती-परमेश्वरौ"*इति। शिवस्य अष्टमूर्त्ति-स्वरूपं वर्णितमस्ति शाकुन्तल-नाटकस्य *"या सृष्टिः स्रष्टुराद्या"* इत्यादिके प्रथम-श्लोके तथा मालविकाग्निमित्र-नाटकस्य आदौ *"अष्टाभि-र्यस्य कृत्स्नं जगदपि तनुभि-र्बिभ्रतो नाभिमानः"*इत्यादौ पद्ये। रघुवंश-कुमारसम्भवादिषु काव्येषु ब्रह्म-विष्णु-महेश-रूपाणां त्रिदेवानाम् एकरूपत्वम् इत्यादयः परमतत्त्व-सम्पृक्ताः अनेके विषयाः दृग्गोचराः भवन्ति। एवंविधया शोधपत्रेऽस्मिन् कालिदासदृष्ट्या परमतत्त्वस्य स्वरूपविमर्शविषयाः समुपस्थाप्यन्ते।

**कूटशब्दाः**- कालिदासः, परमतत्त्वम्, शिवः, ब्रह्म, अद्वैतम्, शक्तिः, त्रिमूर्त्तिः, अष्टमूर्त्तिः, साधनम्

**उपक्रमः**- समय-स्रोतसि गतिशीलानसंख्य-मृद्-रेणु-समूहान् समाहृत्य नूतन-मूर्त्ति-निर्माणार्थं यः क्षमो भवेत्, सः वै विधातुः सृष्टि-सम्भारेषु विद्यमानः एको विशिष्टः शिल्पी। ऊर्णनाभो यथैव स्व-शरीरात् क्षण-मात्रेण सूक्ष्म-सूत्राणि परिसृज्य बृहज्जालं निर्माति, तथैव कविरपि निज-मानस-पटलादङ्कुरिते बीजे नाना-भावना-कल्पनानां समावेशं कृत्वा नवीनं साहित्यं विरचयति। कविः स्वयमेव विराजते सारस्वत-प्रजापतिः। कवे-र्धातृत्व-विषये यथार्थमुक्तम्-

> *"अपारे काव्य-संसारे कविरेव प्रजापतिः।*
> *यथा वै रोचते विश्वं तथैतत् परिवर्त्तते॥"*[1]

दर्शनं साहित्ये विशिष्टं पदं लभते, यद्यपि तत् कल्पनां परित्यज्य अन्वेषणं करोति वास्तविकतायाः। दर्शनं मूलतः तथ्य-प्रधानम्, परन्तु साहित्यं भावना-प्रधानम्। दर्शनस्य अन्तिमं लक्ष्यं निःश्रेयस-प्राप्तिः, किन्तु साहित्यं प्रददाति जनानां कृते अलौकिकानन्दम्। अलौकिकानन्दं तदेव यस्मिन् संवेदनशीलता, मानसिकी कल्पना, सूक्ष्मता अनिर्वचनीयता च विराजन्ते। दर्शने मोक्षावाप्तिरलौकिकी,

[1] अग्नि. ३३९/१०

किन्तु अवर्णनीया। साहित्ये यथैव भवति रस-स्थितिः[1] तथैव दर्शने ब्रह्मस्थितिः[2] । अतएव साहित्य-दर्शनयो-र्मध्ये विद्यते परस्परमन्तःसम्बन्धः । दर्शनस्य अथवा आध्यात्मिकतायाः परा काष्ठा भवति परमतत्त्वोपलब्धिः । जगति विराजते परमतत्त्वस्यैव सर्वत्र निदर्शनम् । उपनिषदि तत्परमतत्त्वस्य विश्व-व्यापकत्वं साधु उच्यते - *"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।"*[3]

सञ्जायते कवेर्वर्णन-कल्पना परमतत्त्व-सान्निध्यादथवा ईश्वरं प्रति प्रीति-कारणात् सफलीभूता । ईश्वरानुग्रहं सम्प्राप्य कविः स्व-कृतिं संसार-सरोवरे सरोजवत् प्रस्फुटितां कर्त्तुं प्रयतते, पुनः हृदयग्राहि-सौरभेण सर्वान् नितरामामोदयति । अस्माकं भारतीय-संस्कृतिः मुख्यतः आध्यात्मिकता-प्रधाना । साहित्य-सङ्गीत-दर्शन-कलादिषु विभिन्न-क्षेत्रेषु तस्य परम-तत्त्वस्यैव चर्चा दरीदृश्यते । वाङ्मयस्य आदिकवेः वाल्मीकेः समारभ्य अद्य यावत् बहूनां कवीनां रचनासु समुपलभ्यन्ते विविधाः दार्शनिक-भावाः । तेषु कविषु भ्राजते ललामभूतो कालजयी विश्वकविः कालिदासः, यस्य कृतिषु वर्णन-प्रसङ्गानुसारं दार्शनिक-लौकिक-संघटनयो-र्मधुरं सामञ्जस्यं परिलक्ष्यते । साधारणतः कविः स्वकीय-ग्रन्थस्य प्रारम्भेऽथवा अन्तिमे स्वकीय-साध्यस्य ध्येयस्य इष्टदेवस्य ईश्वरस्य स्तुतिगानं करोति अथवा आशीर्वाद-प्राप्त्यर्थं विदधाति वन्दनाम्, येन साधक-कवेः आराध्यः साध्यो देवः परिज्ञायते । साधक-साधना-साध्य-रूपिण्यां त्रिपुट्यामेव समन्वयतायाः समग्रतायाः भावः सन्निहितो वर्तते । एतद्दिशायां कविकुलगुरुः कालिदासो निज-रचनासु स्वाराध्यं देवाधिदेवं भगवन्तं शिवं वर्णयति, प्रसङ्ग-क्रमेण परमतत्त्वं च सूचयति । वस्तुतः कालिदासस्य सम्पूर्णं दार्शनिकं विज्ञानं परमतत्व-स्वरूपान्तर्गतमेव । शोधपत्रेऽस्मिन तस्य परम-तत्त्वस्य स्वरूपं तत्संपृक्तां कतिपय-दिशाञ्च विवेचयितुं कृतोऽस्ति प्रयासः ।

**महाकवि-कालिदासदृष्ट्या परमतत्त्वस्य विविधं स्वरूपम् :**

- **अद्वैत-स्वरूपम् :** मूलतः कालिदासो अद्वैतवादी । वेदान्त-प्रतिपादितं ब्रह्म तेन परमतत्त्व-शिव-रूपेण निरूपितम् । ब्रह्मणः शिव-संज्ञा वेदेष्वपि परिलक्ष्यते । यथा -

*"नमः शम्भवाय च मनोभवाय च नमः शंकराय च मयस्कराय च*
*नमः शिवाय च शिवतराय च ॥"*[4]

अत्र शिव-तत्त्वस्य शम्भु-शंकर-मयस्कर-मयोभवादीनि नामानि समुल्लिखितानि । बृंहणत्वात् ब्रह्म । तस्य ब्रह्मणः परम-तत्त्वस्य वाचकः प्रणवः ॐकारः। तदक्षरं परमतत्त्वं ब्रह्माऽधिगन्तुं साधकाः योगिनः कठोरं तपश्चरणं कुर्वन्ति । एतद्विषये कठोपनिषदि सम्यक्तया वर्णितमस्ति ।[5]

शिवस्य एवम्भूतं स्वरूपं महाकविना कालिदासेन सुप्रतिपादितम् । परमतत्त्वस्य अखण्ड-सत्ता कविना संकेतिता । 'विक्रमोर्वशीय'-नाटके तेन निगदितम् –

*"वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी*
*यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।*
*अन्तर्यश्च मुमुक्षुभि-र्नियमित-प्राणादिभि-र्मृग्यते*
*स स्थाणुः स्थिरभक्ति-योगसुलभो निःश्रेयसायाऽस्तु वः ॥"*[6]

वेदान्तेषु उपनिषत्सु वा एकमेव ब्रह्मतत्त्वं प्रतिपादितम् । द्युलोकं भूलोकं च वितत्य स परमपुरुषः विराजते । यत् सर्वं परिव्याप्नोति अथवा सर्वतः परिव्याप्तं तदेव ब्रह्म । तस्य ब्रह्मणः परम-तत्त्वस्य विचारणा अलौकिकी । ईश्वर-शब्दः तस्मिन् महादेवे एव सार्थकत्वं

---

[1] रसो वै सः, तैत्ति.उप. २/७
[2] अहं ब्रह्मास्मि, बृह.उप. १/४/१०
[3] ईश.उप. १
[4] यजु.१६/४१
[5] *सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति ।*
*यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥ कठ.उप. १/२/१५*
*एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ कठ.उप. १/२/१६*
[6] विक्रमोर्वशीयम्, नान्दी

भजते । संयतेन्द्रियाणां संसार-बन्धनात् मुक्ति-कामानां योगिनां कृते स परमाराध्यः । हृदयस्य दृढ़-भक्त्या तस्य महेश्वरस्य पावनं दर्शनमवाप्यते । एवंरूपायां वर्णनायां कालिदासीया लेखनी साध्य-शैव-चेतनायाः विशिष्टतां गृह्णाति ।

- **द्वैत-अर्धनारीश्वर-स्वरूपम् :** भारतीय-परम्परायां शिव-शक्त्योः अर्धनारीश्वररूपं सुप्रसिद्धमेव । परम-तत्त्व-रूपेण लोके सम्पूज्यते शिवो महादेवः । स स्वशक्त्या मिलित्वा जगत्कार्यं सम्पादयति । यत्र शिवः, तत्र शक्तिरपि वर्त्तते । वेदान्तानुसारं माया ब्रह्मणोऽनिर्वचनीया शक्ति-र्भवति, यया सृष्टि-स्थिति-प्रलय-कार्याणि सम्पद्यन्ते । अद्वैत-वेदान्ती आदिशङ्कराचार्यः स्वकीये ग्रन्थे माया-विषयकं तथ्यं उदाहरति - '*अव्यक्त-नाम्नी परमेष्ठी शक्तिः*'[1] इति । पुनश्च स्व-प्रणीते हरगौर्यष्टक-स्तोत्रे स उमा-महेश्वरौ विश्वस्य मातापितरौ इति वर्णयन् प्रस्तौति ।[2]

एवंभूतं शक्ति-संयुक्तं शिव-रूपं कालिदासस्य लेखन्यां महत्त्वपूर्णं स्थानमर्हति । यत्र विद्यते वाणी, तत्र अर्थोऽपि नूनं विद्यते तया सार्धमभिन्नतया संश्लिष्टः । भाषा-भावयोः रूपं परस्पर-सम्मिलितमेव । एतयोः द्वयोः पृथक्करणं कदापि न संभवति । तथैव शिवः शक्तिश्च उभौ अभिन्नौ; सर्वदा तयोः संयुक्त-रूपं सुप्रतिपन्नम् । रघुवंश-महाकाव्यस्य आद्य-पद्ये कालिदासः नमस्क्रिया-रूपं ग्रन्थारम्भं कुर्वन् कथयति ।[3] भाषा-भावयोः ज्ञानोपलब्धि-निमित्तं भाषा-भाववत् एकत्र-स्थितौ जगतां जननी-जनक-स्वरूपौ पार्वती-महेश्वरौ प्रणमामि इति शिव-भक्तः कविः वर्णयति ।

मालविकाग्निमित्र-नाटकस्य मङ्गलाचरण-श्लोकेऽपि शक्ति-सम्मिलितं शिव-रूपं व्याख्याय कविः कथयति –

*"कान्ता-सम्मिश्र-देहोऽप्यविषय-मनसां यः परस्ताद् यतीनाम् ।"*

एकस्मिन्नेव शरीरे नारी-पुरुषयोः शक्ति-शिवयोः समन्वयः। पार्वती शक्ति-स्वरूपा, परमेश्वरः शिवः परमतत्त्वं वेति शक्तिमान् । शक्तिमतः ईशरस्यैव शक्तिरस्ति; यदि शक्तिर्नास्ति तदा शिवः शव-रूपः। विश्वकार्य-संपादनार्थं शक्ति-शक्तिमतोः उभयोः स्थितिरावश्यकी । अतः शिवस्य अर्ध-नारीश्वर-रूपं समीचीनं यथार्थतया सुप्रतिष्ठितम् ।

- **त्रिमूर्त्ति-स्वरूपम् :** परमतत्त्वभावेन शिवो जगन्मङ्गलकारि-तत्त्वस्य सामान्याभिधानम् । विश्वस्य प्रत्येक-कणः सूचयति तस्य सत्तां महत्त्वञ्च । यद्यपि कालिदासः शिवतत्त्वस्य उपासकः, किन्तु विष्णु-ब्रह्मणोरपि श्रद्धादरभावाः दृश्यन्ते तस्य । परमतत्त्वस्य मूर्त्तिः स्वरूपमथवा एकमेव, परन्तु गुण-वैषम्याद् ब्रह्म-विष्णु-शंकररूपाणि ध्रियन्ते । वस्तुतः तत्त्वमेकमेव, त्रिविधं रूपं तु केवलमुपाधिजन्यम् । एतेषु त्रिदेवेषु ज्येष्ठ-कनिष्ठ-भावादि गौणम् । कदा हरिः (विष्णुः) शंकरे, कदा हरः (शंकरः) हरौ (विष्णवि) तथा कदा ब्रह्मा हरिहरयोः विराजमानो भवति। अतः कस्याऽपि एकस्य देवस्य अपराभ्यां द्वाभ्यां समुत्कर्षोऽथवा न्यूनता न गण्यते। अतः महाकविना निःसंशयं कुमारसम्भव-महाकाव्ये वर्ण्यते ।

*"एकैव मूर्त्ति-र्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।*
*विष्णो-र्हरस्तस्य हरिः कदाचिद् वेधास्तयोस्तावपि धातुराद्यौ ॥"*[4]

वास्तवेन ब्रह्मा संसारस्य सृष्टि-सर्जनकारि तत्त्वम्, विष्णुः पालनकारि तत्त्वं तथा शंकरो विध्वंसकारि तत्त्वम् । जगन्निमित्तं एतेषां त्रयाणां तत्त्वानां विद्यतेऽनिवार्यता । एवं च एतत् सृष्टि-स्थिति-विनाशकारि तत्त्वत्रयम् एकस्यैव परम-तत्त्वस्य ईश्वरस्य उपाधित्रयं सत्त्व-रजस्तमोरूपेण ।

अम्बरात् निर्झरमानं वर्षाकालीनं जलं भवति एकरसमेव । परन्तु यत्स्थानेषु तन्निपतति, तत्स्थान-वैशिष्ट्यात् नाना-रसान् प्राप्नोति। परमतत्त्वं तद्वत् सम-रसम् । तस्मिन् काश्चिदपि विकृतयो न समुत्पद्यन्ते । केवलं तु सत्त्व-रजस्-तमो-गुणत्रय-संयोगेन विविध-कार्य-निर्वहणार्थं तदीशतत्त्वं ब्रह्म-विष्णु-शंकर-नामानि बिभर्त्ति । कविः कथयति -

---

[1] विवेक.

[2] *जगज्जनन्यै जगदेक-पित्रे नमः शिवायै च नमः शिवाय ।*

[3] *वागर्थाविव संपृक्तौ वागर्थ-प्रतिपत्तये । जगतः पितरौ वन्दे पार्वती-परमेश्वरौ ॥ रघु. १/१*

[4] कु.सं. ७/४४

*"रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।*
*देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥"*[1]

शिव-विष्णु-ब्रह्मणां यत् पृथक् पृथग् वर्णनं कालिदासेन कृतम्, तत्र अन्योन्य-संक्रमित-भावः पदञ्च परिलक्ष्येते । परमतत्त्वस्य अद्वैत-स्वरूपं कुमारसंभव-काव्यस्य अनेकेषु श्लोकेषु वर्णितं दृश्यते ।[2] पुनश्च महाकविना कालिदासेन स्वयम्भूः (ब्रह्मा), विष्णुः शिवश्च त्रिमूर्त्तेः अद्वैतभावश्च प्रतिपादितः । ब्रह्मणः परमतत्त्वस्य वा वर्णनायां तेन स्पष्टं कथितं यत् सः शिव-ब्रह्म-विष्णुषु कमपि भेदं न स्वीकरोति । कवेर्भाषायाम् - *"नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।*
*गुणत्रय-विभागाय पश्चाद् भेदमुपेयुषे ॥"*[3]

कालिदासस्य दार्शनिक-मते एकमखण्डं शुद्धमद्वैतं ब्रह्म एव परमं तत्त्वम् । तत्कृताः त्रिदेवानां स्तुतयः उपनिषत्तुल्यं ब्रह्मणः सरसं प्रतिपादनं कुर्वन्ति । रघुवंशे क्षीर-सागराधिष्ठितम् अवाङ्-मानस-गोचरं शेषासीनं भगवन्तं विष्णुं प्रणम्य देवाः स्तुवन्ति ।[4] पुनश्च शिवोऽस्ति विश्वगुरोः गुरुः, विश्वात्मा, त्रैलोक्य-वन्द्यः, तमोविकारैः अनपहतश्च । कालिदासस्य लेखन्याम् - *"सुता-सम्बन्ध-विधिना भव विश्वगुरो-र्गुरुः ।"*[5]

तत्छिवः कस्याऽपि स्तुतिं न करोति, किन्तु सर्वे तं स्तुवन्ति । सः कस्याऽपि वन्दनां न करोति, परन्तु सर्वे तमीशं वन्दन्ते । उच्यते- *"अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।"*[6] स जगतोऽध्यक्षः तथा मनोरथानाम् अविषयः अगोचरो वा ।

कालिदासस्य कृतौ – *"यदध्यक्षेण जगतां वयमारोपितास्त्वया ।*
*मनोरथस्याविषयं मनोविषयमात्मनः ॥"*[7]

वाणी-मनो-बुद्धीनां तद्विषये प्रवेशो नास्ति । तत् परमतत्त्वं को वा जानाति? विषयेऽस्मिन् कविः निगदति –

*"किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् ।*
*अथ यस्तस्य संहर्त्ता भागः कतम एष ते ॥"*[8]

परमतत्त्वममेयम् । तस्य मानं न ज्ञायते । कालिदासेन एतत्कारणात् परमतत्त्वस्य समत्वं कृतमम्बुधिना । समुद्रेण सर्वा दिशः परिव्याप्ताः । स भिन्न-भिन्न-समये नानावस्थां प्राप्य तिष्ठति । अतः तस्य रूपं प्रमाणं वा नाऽवबुध्यते । परमतत्त्वस्य विष्णु-मूर्त्तिः नाना-स्थावर-जङ्गमानां रूपं धारयित्वा स्व-महिम्ना समग्रं विश्वं परिव्याप्नोति । बुद्ध्या तस्य रूपं नाऽवगम्यते ।[9]

परमतत्त्वं नित्यं परिपूर्णम् । अतः तन्निमित्तं किमपि वस्तु अप्राप्तं प्राप्तव्यं वा न भवति । यो मनुष्यः पूर्णो न भवति, सः नाना-प्रकाराणां वस्तूनां कामनां करोति । परन्तु यः स्वयं सर्वसमः सर्वरसः, तदर्थं कस्याऽपि वस्तुनः कामना नाऽपेक्षते । पृथिव्याम् परम-ईश्वर-तत्त्वस्य जन्म तथा कर्म-सम्पादनं केवलं लोकानुग्रह-निमित्तमेव, यत् महाकविना स्पष्टतया अभिहितम् –

*"अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते ।*
*लोकानुग्रह एवैको हेतुस्ते जन्म-कर्मणोः ॥"*[10]

---

[1] रघु. १०/१७

[2] *कलितान्योन्य-सामर्थ्यैः पृथिव्यादिभिरात्मभिः । येनेदं ध्रियते विश्वं धुर्यै-र्यानमिवाध्वनि ॥" कु.सं. ६/७६*

[3] कु.सं. २/४

[4] *नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।" रघु. १०/१६, सर्व-प्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥" रघु. १०/२०*

[5] कु.सं. ६/८३, ६/८८, ७/५४, ७/४८

[6] कु.सं. ६/८३

[7] कु.सं. ६/१७

[8] कु.सं. ६/२३

[9] *तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ।*
*विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥ रघु. १३/५*

[10] रघु. १०/३१

श्रीमद्भगवद्गीतायामपि सम्यक्तया महर्षि-व्यासदेवेन श्रीकृष्ण-मुखे निगदितमेव -

*"न मे पार्थाऽस्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन ।*
*नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि ॥"*[1]

- **अष्टमूर्त्ति-स्वरूपम् :** परमेश्वरः सर्वेषां लोकानामधिष्ठाता, यस्य आत्मशक्तिः स्व-गुणैर्युक्ता सती प्रकृतिः सर्जन-विसर्जन-कर्माणि विदधाति । स एव अव्ययात्मा, अजः, स्वयम्भूः भूतपतिः, महेशः तथा च अष्टमूर्त्तिः । परमतत्त्वस्य अष्टमूर्त्ति-भावना अत्यन्तं महत्त्वपूर्णा । परमतत्त्वस्य शिवस्य अष्टमूर्त्ति-विषये विष्णुपुराणे वायुपुराणे च वर्णितमस्ति ।[2]

कालिदासस्य रचनासु परमतत्त्वस्य एवंभूतम् अष्टमूर्त्तेर्वर्णनं दर्शनीयमेव । अभिज्ञानशाकुन्तल-नाटकस्य प्रारम्भे नान्दी-श्लोके महाकविना विहिताऽस्ति परमेश-तत्त्वस्य अष्ट-स्वरूपाणामवतारणा ।

*"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री*
*ये द्वे कालं विधत्तः श्रुतिविषय-गुणा या स्थिता व्याप्य विश्वम् ।*
*यामाहुः सर्व-बीज-प्रकृतिरिति यया प्राणिनः प्राणवन्तः*
*प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥"*[3]

स्रष्टुः आद्या सृष्टिः विद्यते सलिल-रूपा तनुः शिवस्य । यागादौ विधिपूर्वकं समर्पितं हविर्द्रव्यं वहति अनल-रूपा तनुः । हवनं विदधाति होतृ-रूपा तनुः । काल-विधानं करोति सूर्य-चन्द्र-रूपा तनु-द्वयी; सूर्यः दिवा-कालं निरूपयति, चन्द्रश्च रजनी-कालम् । शब्द-गुणा आकाश-रूपा तनुः विश्वव्यापिनी । समस्त-बीजानां मूल-स्वरूपतया प्रथितास्ति पृथिवी-रूपा तनुः । सकल-प्राणिनां प्राण-सञ्चारकारिणी वर्त्तते पवन-रूपा तनुः । इत्थं महेश्वरस्य अष्ट-संख्याकाः प्रत्यक्षाः तनवः अर्थात् मूर्त्तयः कविना विशदीकृताः ।
मालविकाग्निमित्र-नाटकस्य आरम्भेऽपि आशीर्वादात्मक-मङ्गलाचरणं विधाय कविः वर्णयति -

*"एकैश्वर्ये स्थितेऽपि प्रणत-बहुफले यः स्वयं कृत्तिवासाः*
*कान्ता-सम्मिश्र-देहोऽप्यविषय-मनसां यः परस्ताद् यतीनाम् ।*
*अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभि-र्बिभ्रतो नाभिमानः ।*
*सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥"*[4]

अष्टाभिः तनुभिः समस्तं जगत् धारयन्नपि महेश्वरस्य अभिमानो नास्ति इति कवेः कालिदासस्य वर्णना ईश-तत्त्वस्य महिमानं प्रख्यापयति । जलम्, अग्निः, होता, सूर्यः, चन्द्रः, आकाशः, पृथिवी, वायुश्च- एतैः अष्टैः प्रत्यक्ष-रूपैः ईशः जगति परिदृश्यते अर्थात् ईशतत्त्वस्य सत्ता सर्वत्र एव परिव्याप्ता । संसारेऽस्मिन् किमपि वस्तु नास्ति यत्र ईशतत्त्वस्य आभासो न मिलति । सर्वेषु स्थानेषु तस्यैव आधिपत्यम् । पञ्चमहाभूतानि ईश-तत्त्वस्य स्वरूपाणि, यैः दृश्यमतो जगतः स्थितिरनुभूयते ।
श्रीमद्भगवद्गीतायामुल्लिखिता अष्ट-स्वरूपायाः प्रकृतेः वर्णना प्रसंगेऽस्मिन् प्रणिधेया ।[5] सा प्रकृतिः भगवतो माया-शक्तिरिति विविच्यते।

- **परमतत्त्वाधिगम-साधनम् :** संसाराद् आत्यन्तिक-दुःख-निवृत्त्यर्थं साधकाः निरन्तरं चेष्टन्ते । यतोहि अस्मिन् दुःखमये जगति स्थितिरपि दुःख-दायिनी । जन्म-मरण-बन्धन-चक्रे आवर्त्तनं सर्वदा प्रचलति । अतः परमतत्त्वमेव एकमात्रमाश्रयः, यं लब्ध्वा

---

[1] गीता. ३/२२

[2] *सूर्यो जलं मही वायु-र्वह्निराकाशमेव च । दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥ विष्णु. १/८/८*
*भूमिरापोऽनलो वायुरात्मा व्योम रविः शशी । इत्यष्टौ सर्वलोकानां प्रत्यक्षा हर-मूर्त्तयः ॥ वायु.*

[3] *शाकुन्तलम्, नान्दी*

[4] *मालविकाग्निमित्रम्, नान्दी*

[5] *भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ गीता. ७/४*

दुःखानां सर्वतोभावेन परिसमाप्ति-र्भवति। कालिदासेन यथार्थं कथितम्-

*“त्वय्यावेशित-चित्तानां त्वत्समर्पित-कर्मणाम् ।*

*गतिस्त्वं वीतरागाणामभूयः संनिवृत्तये ॥“*[1]

परमेशतत्त्व-प्राप्त्यर्थं मुख्यतः त्रीणि साधनानि दृश्यन्ते ।

(क) परमतत्त्वे चित्त-निवेशः

(ख) तस्मिन् सर्व-कर्म-समर्पणम्

(ग) जगतः सर्वेभ्यो विषयेभ्यो राग-रहिता स्थितिः ।

योग-विधिना चित्तम् एकाग्रीकृत्य परमतत्त्वे संयोजयेत् । योग-माध्यमेनैव परमतत्त्वस्य उपलब्धिः संभवति । महाकवि-कालिदासोक्त्या –

*“योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्त्तिनम् ।*

*अनावृत्ति-भयं यस्य पदमाहु-र्मनीषिणः ॥”*[2]

पुनश्च परमतत्त्वे ईश्वरे कर्म-समर्पणमपि आवश्यकम् । यदा कर्मफलानि तस्मिन् समर्प्यन्ते, तदा तानि बन्धन-रूपाणि न भवन्ति, अपितु मोक्षाधिगम-निमित्तं सहायक-भूतानि सञ्जायन्ते । संसारस्य विषयेषु प्रेमभावो भवति बन्धन-स्वरूपः । अतएव परमतत्त्वस्य उपलब्धये वैराग्यमत्यन्तमावश्यकम् । महर्षिणा पतञ्जलिना चित्त-निरोधोपायेषु वैराग्यस्य महत्त्वं प्रतिपादितम् –

“*अभ्यास-वैराग्याभ्यां तन्निरोधः ॥”*[3]

तत्त्वमिदं व्यासदेवेन व्याख्यातम् –

*“असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।*

*अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।”*[4]

एतैरुपायैः परमतत्त्वस्य ईशस्य उपलब्धि-र्भवति, यस्मात् सद्यः मोक्षोदयः । शास्त्रागमैः सिद्धिलाभार्थं विविध-मार्गाः प्रदर्शिताः; किन्तु सर्वमार्गाणां चरमं लक्ष्यं शिवरूपं परमतत्त्वमेव । गङ्गाधारा यथा बहुमार्गेषु प्रवहन्ती लक्ष्यभूते पयोधौ एव प्रविशति, स्व-जीवनस्य साफल्यं च लभते, तथैव यः परमतत्त्व-प्राप्ति-मार्गे गच्छति, सः नूनं तमधिगच्छति । कालिदासः स्वयमेव मुक्त्यर्थं तस्मै परमात्मने ईशाय निवेदयति – “ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगत-शक्तिरात्मभूः॥”[5]

- **<u>उपसंहारः</u>-** एवंरूपेण महाकविना कालिदासेन स्वप्रणीतासु कृतिषु परमतत्त्वस्य ईश्वरस्य माहात्म्य-प्रतिपादनार्थं आध्यात्मिकतया काव्यिकः सफलः प्रयासः कृतः । वेदेषु प्रतिपादितं परमतत्त्वमेव सर्वेषां जनानाम् अनुभवनयोग्यं तथा च तत्प्राप्तिनिमित्तं बहुविधाः उपायाः अपि निर्देशिताः । यदि मानवः एतत् सम्यक्तया ज्ञात्वा पुरुषाथं करिष्यति तदा तु निश्चितमेव तस्य जीवनं सफलं सार्थकं च भविष्यति । अतः सर्वेषां काव्यनिर्माणकारिणां कवीनां कृतिषु परमतत्त्वस्येव विभिन्नानि स्वरूपाणि अभीष्टतया प्रख्यापितानि। येन माध्यमेन भिन्नतायाम् अभिन्नानुभूतिः, विविधेषु ऐक्य-दर्शनं चेत्यादयः ऐशाः उदात्तभावाः अधिगृहीताः भविष्यन्ति इति शम् ।

**ग्रन्थपञ्जी**

1. *कालिदास-ग्रन्थावली*, संपा. सीताराम चतुर्वेदी, भारत प्रकाशन मन्दिर, अलीगढ़, 1963.
2. *अग्निपुराणम्*, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, 1966.

---

1 रघु. १०/२७

2 कु.सं. ६/७७

3 यो.सू. १/१२

4 गीता. ६/३५

5 शाकुन्तलम्, ७/३५

3. *यजुर्वेद-संहिता,* संपा. एस. डी. सातवलेकर, स्वाध्याय मण्डल, पारडी, 1949.

4. *शङ्कराचार्य-ग्रन्थमाला,* संपा. सुदर्शन नन्दशर्मा, उत्कल साहित्य प्रेस, कटक, 1920.

5. *पातञ्जल-योगदर्शनम्,* संपा. सुरेशचन्द्र श्रीवास्तव, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2002.

6. *श्रीमद्भगवद्गीता,* गीता प्रेस, गोरखपुर, 2000.

7. *विष्णुपुराणम्,* गीता प्रेस, गोरखपुर, 2000.

8. *वायुपुराणम्,* नाग पब्लिशर्स, दिल्ली, 1983.

9. *विवेक-चूड़ामणिः,* संपा. स्वामी माधवानन्द, अद्वैत आश्रम, कलकत्ता, 1978.

10. *एकादशोपनिषद्,* गीता प्रेस, गोरखपुर, 2000.

11. उपाध्याय, बलदेव, *संस्कृत साहित्य का इतिहास,* शारदा निकेतन, वाराणसी, 2001.

# उद्धवगीतायां आत्मज्ञानवतः साधकस्य स्वरूपम्

डा० सुजित-परामानिकः
सहायकाध्यापकः, संस्कृतविभागः,
नेताजी महाविद्यालयः, आरामवागः, हुगली, पश्चिमबङ्गः

**प्रबन्धसारः-** पुराणेषु सर्वोत्तमं भक्तिरसयुक्तम् भगवद्दिव्योज्ज्वलज्ञानोपदेशवद्धम् अमलपुराणं भवति श्रीमद्भागवतम्। श्रीमद्भागवते बह्व्यो गीता उपलभ्यन्ते। तेषु अन्यतमा उत्कृष्टा भगवदन्तिमशिक्षायुक्ता उद्धवगीता। उद्धवद्गीतायां भगवान् वासुदेवः अति माहात्म्येन भक्तोद्धवं प्रति बहून् विषयान् विवृतवान्। तेषु कश्चन विषयो भवति आत्मज्ञानवतः साधकस्य स्वरूपम्। साधारणजनापेक्षया आत्मज्ञानवतः साधकस्य स्वरूपम् आचरणञ्च भिन्नं भवति। आत्मज्ञानवान् साधकः स्वात्मानं तत्त्वतया विजानाति। ज्ञानी गुणदोषरहितः, ज्ञानिनां सकाशे इन्द्रियादिविषयः स्वप्नवत् मिथ्या , ज्ञानिसाधकस्य जीवनचरित्रम् बालकवत्, ज्ञानी देहाद्यभिमानो रहितः इत्येते विषयाः "उद्धवगीतायां आत्मज्ञानवतः साधकस्य स्वरूपम्" इत्यस्मिन् प्रबन्धे वर्णिताः सन्ति। ज्ञानिनां सकाशे सर्वं गुणदोषरहितं भवति। यतो हि ज्ञानी तु सर्वत्र समदर्शी भवति "शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" (श्रीमद्भगवद्गीता ५/१८) इति स्मृतेः। शत्रुमित्रयोः स समदर्शी भवति।। बालकानां जीवनचरित्रं यथा साधारणं, सरलं भवति, सदा उन्मुक्ततया विचरन्ति तद्वत् ज्ञानिनामपि जीवनचरित्रम् अतीव साधारणं सरलं भवति, तेऽपि सर्वत्र उन्मुक्ततया मुक्तभावेन विचरन्ति। जाग्रतकाले स्वप्नदृष्टवस्तु यथा मिथ्यारूपेण प्रतिभासते तद्वत् एवमेव ज्ञानिनः सकाशेऽपि व्यवहारिकविषयाः स्वप्नवत् मिथ्यारूपेण प्रतिभासन्ते। ज्ञानी तु सर्वदा आत्मज्ञाने पारमार्थिकावस्थायां स्थितो भवति। साधारणजनाः यथा देहाद्यभिमानिनो इन्द्रियादिविषयेषु वासनारागयुक्ता भवन्ति, किन्तु ज्ञानी सर्वदा देहाद्यभिमानरहितः इन्दियादिविषयेषु वासनारागवियुक्तो भवतीत्येते विषयाः उद्धवगीतायाम् आत्मज्ञानवतः साधकस्य स्वरूपम् इति शीर्षकप्रबन्धे संक्षिप्तरूपेण वर्णिताः सन्ति।

**उपोद्घातः -** पुराणं पुरातनमाख्यानमुच्यते। पुरेतिवृत्तो यत्र वर्तते तत् पुराणमिति कथ्यते। पद्मपुराणस्य सृष्टिखण्डे उक्तमस्ति यत् "पुरापरम्परां व्यक्तिं पुराणं ते वै स्मृतम्[1]"। पुराणं किन्तु सर्वदा नवीनमिव प्रतिभाति। मूलपुराणानि अष्टादश सन्ति किन्तु उपपुराणान्यपि बहूनि सन्ति। पुराणेष्वपि अतिमाहात्म्यपूर्णं, श्रेष्ठं, भक्तिपूर्णं पुराणं भवति द्वादशस्कन्दसमायुक्तं श्रीमद्भागवतं पुराणम्। यत्र भगवतः पुरुषोत्तमस्य श्रीकृष्णस्य जीवनचरित्रोपदेशोऽतिमाहात्म्यत्वेन वर्णितोऽस्ति। भगवतश्चरित्रं, तस्य कृपा, लीला सर्वं भक्तिभावेन वर्णितमस्ति। अतो भक्तानां तथा वैष्णवानां समीधे ग्रन्थोऽयमति पवित्रतमः। अत्र नाना कथा, जीवनचरित्रम् उपाख्यानमुपदेशं वर्णितमस्ति। श्रीमद्भागवतेऽपि बह्व्यो गीता उपलभ्यन्ते यथा भिक्षुगीता, परमहंसगीता, गोपीगीता, उद्धवगीता, अवधूतगीता, हंसगीता, भूमिगीता इत्यादयः। भक्तमुद्धवमुपलक्ष्य साधारणमानवोद्देश्ये श्रीकृष्णेन प्रदत्ता अन्तिमशिक्षा (The last message of Sri krishna) उद्धवगीता इति नाम्ना प्रख्यातमस्ति। श्रीउद्धवः श्रीकृष्णस्य आत्मीयो. बन्धुस्तस्य परामर्शदाता चासीत्। स अतीव बुद्धिमान् पराक्रमी चासीत्। भगवतः श्रीकृष्णस्य नरलीलासंवरणाभिप्रायं ज्ञात्वा तम् उद्धरणाय स श्रीकृष्णं प्रार्थितवान्। किन्तु भगवान् तं निःस्पृहः सर्वभूतेषु समदर्शी सन् अनासक्तजीवनयापनस्योपदेशं प्रदत्तवान्। एतत्सम्बन्धिः उद्धवेन साकं कृष्णस्य यत्कथोपकथनं सञ्जातं तदेव उद्धवगीता इति नाम्ना प्रख्यातमस्ति। अस्या गीतायाः श्रीमद्भागवते एकादशस्कन्दे षष्ठाध्यायत एकोनत्रिंशाध्यायं पर्यन्तं व्याप्तिः। तदेव श्रीमद्भागवते उपसंहारे श्रीकृष्णोद्धवसंवादसम्बन्धे उक्तमस्ति यत् "यत्रात्मा विद्या ह्यखिला प्रोक्ता धर्मविनिश्चयः" इति। उद्धवगीतायां आत्मज्ञानये भगवत्प्राप्तये बहूनि साधनानि विवृतानि सन्ति। सम्यक् साधनेन साध्यं सिध्यति। साधनेन आत्मज्ञानवतः सिद्धस्य साधकस्य स्वरूपं जगति साधारणजनापेक्षया भिन्नं भवति। आत्मज्ञानवान् साधकः कीदृशो भवति। तस्य चारित्रिकवैशिष्ट्यं किं दृश्यते, तस्य आचरणं कीदृशं भवति, सं किं भाषते, स व्रजति किं वा इति प्रश्नाः मनसि समागच्छन्ति। एतादृशाः प्रश्नाः श्रीमद्भगवद्गीतायामपि भक्तार्जुनेन स्थितप्रज्ञविषये श्रीभगवान् पृष्टः इति दरीदृश्यते। यथा —

"स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।

[1] मिश्रः आचार्यरामचन्द्रः। संस्कतसाहित्येतिहासः। चौखम्बा विद्याभवन : वाराणसी।२०१०। पृ. ४४।

स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्॥" [श्रीमद्भगवद्गीता २/५४] इति।

जगति बहवो जनाः सन्ति। सर्वेषां चारित्रिकवैशिष्ट्यं भिन्नं भिन्नं दृश्यते। एवमेव य आत्मज्ञानं प्राप्नोति तस्य आत्मज्ञानवतः साधकस्य चारित्रिकवैशिष्ट्ये भिन्नता दृश्यते। तस्य आचरणमपि भिन्नं भवति। आत्मज्ञान् पुरुषः कीदृशो भवतीति तस्य स्वरूपविषये उद्धवगीतायां भगवान् वासुदेवः भक्तोद्धवं प्रति वक्ति। "उद्धवगीतायां आत्मज्ञानवतः साधकस्य स्वरूपम्" इत्यस्मिन् शीर्षकप्रबन्धे एतद्विषये आलोचनं कर्तुं किञ्चित् प्रयत्नो विधीयते।

**कुञ्चीशब्दा-** पुराणम्, गीता, आत्मज्ञानम्. ज्ञानी, शरीरम्, साधकः।

**साधको ज्ञानी गुणदोषरहितः** – साधकज्ञानिनः सर्वत्र समदर्शिनो भवन्ति। सर्वेषु भूतेषु तेषां समदर्शित्वम् अस्ति। तेषाम् अन्तःकरणाद्भेदभावः सम्पूर्णरूपेण अपगच्छति। भेदभावेन पुरुषस्य मनसि नाना भावा उत्पद्यन्ते। यदा पुरुषस्य वस्तुषु भेदभावो भवति तदैव वस्तुनो गुणदोषभाव उपपद्यते। किन्तु सर्वात्मदर्शी ज्ञानी तु गुणातीतावस्थां प्राप्नोति। गुणावस्थायामेव नाना वैचित्र्यं भेदभावो भवति। ज्ञानिनस्तु समदर्शित्वात् गुणातीतत्वात् स गुणदोषभावान्मुक्तोऽतीतो भवति। यद्यपि ज्ञानी समदर्शी भवति तथापि निषिद्धकर्मणो निवर्तते पूर्वसंस्कारातो न तु दोषबुद्ध्या। वस्तुनो दोषबुद्ध्या न निवर्तते। ज्ञानी यत् शास्त्रविहितं शुभकर्मानुष्ठानं करोति तदपि प्राक्तनसंस्कारात् न तु गुणबुद्ध्या स्वर्गादिफलोद्देश्येन। इदं उत्तमं कर्म कर्तव्यमिति भावना चिन्तनं तस्य मनसि नायाति। कारणं हि ज्ञानिनः सकाशे गुणदोषस्तु सर्वं समानं भवति। यथा अर्भको बालो गुणदोषरहितः संकल्पविकल्परहितश्च भवति। बालानां मनः अत्यन्तं सरलं निर्मलं भवति। किं गुणयुक्तं किं दोषयुक्तं ते सम्यक्तया न विजानन्ति। ते बाला अपि स्वबुद्ध्या कस्मिंश्चित् कार्ये प्रवर्तन्ते कुतश्चिन्निवर्तन्ते च तद्विदिति। यथा भगवता उच्यते –

"दोषबुद्ध्योभयातीतो निषेधान् न निवर्तते।
गुणबुद्ध्या च विहितं न करोति यथार्भकः॥" [उद्धवगीता ११/०७/११] इति।

ज्ञानी सर्वेस्मिन् कार्ये समर्थवान् भवति। सर्वेस्मिन् कार्ये तस्य सामर्थ्यं विद्यते। सामर्थ्यमस्ति चेदपि संसारेऽस्मिन् स उन्मत्तवत् पिशाचवत् आचरणं करोति। ज्ञानी पारमार्थिकं विना सर्वेस्मिन् जागतिककार्ये सर्वदा उदासीनतया तिष्ठति। ज्ञाने एव तस्य निष्ठा भवति न तु अज्ञाने। स तु कल्पः न कस्यचित् कर्मणः कर्ता न च किमपीहसे इति तस्य न त्वसामर्थ्येन। स कविर्ज्ञानी, दक्षश्चतुरः, सुभगः सुरूपः, अमृतमिव मधुरं भाषणं इत्यमृतभाषणम्। जगति मूको वधिरः इत्यादयः पुरुषाः सामर्थ्याभावे कार्ये उदासीना भवन्ति। गुणसामर्थ्यम् अस्ति चेत् पुरुषाः संसारे साफल्यं प्राप्नुवन्ति। ते गुणाः ज्ञानिनां भवन्ति। किन्तु ज्ञानिनस्तु सामर्थ्यमस्ति चेदपि कस्मिंञ्चिदपि कार्ये स न प्रवर्तते। कस्यचित् कर्मणः कर्तापि न भवति निवृत्ताहङ्कारत्वात्। यच्छरीरनिर्वाहर्थं करोति तदपि अकर्तृबुद्ध्या निरासक्तभावेन। तेषां ज्ञानिनाम् आचरणं साधारणतः उन्मत्तवत्, जडवत्, पिशाचवत्, बालकवच्च भवति। ते ज्ञानिनः एतैः चतुर्भिः भावैः तिष्ठन्ति। कस्मिंश्चित् कर्मण्यपि न प्रवर्तते, किञ्चिद्वस्त्वपि न ईहसे। ज्ञानी त्रिगुणान्मुक्तोऽवधूत इव आचरणं करोति। तदेव ब्राह्मणम् अवधूतं प्रति यदुः वक्ति यत् –

"त्वं तु कल्पः कविर्दक्षः सुभगोऽमृतभाषणः।
न कर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत्॥" [उद्धवगीता ११/०७/२८] इति।

**बालकवत् ज्ञानिजीवनचरित्रम्** – ज्ञानिनां चरित्रं बालकवत् भवति। यथा –

"न मे मानावमानौ स्तो न चिन्ता गेहपुत्रिणाम्।
आत्मक्रीड आत्मरतिर्विचरामीह बालवत्॥" [उद्धवगीता ११/०९/३] इति।

बालकानां जीवनचरित्रम् अतीव सरलं साधारणं भवति। कस्मिंश्चित् विषये तेषां दायित्वं न भवति। यथा परिणतपुरुषाणां मानापमानबोधो भवति किञ्च वासभोजनादिविषये तेषां चिन्ता भवति। गृहं कीदृशमस्ति क्व वसामि, अद्य किं खादामि श्वः किं खादिष्यामि इत्यस्मिन् विषये चिन्ता सर्वदा गृहस्थपुरुषस्य भवति। किन्तु बालकानां तथा न भवति। तेषां मानापमानबोधोऽपि न भवति, वासभोजनादिविषये चिन्तापि न भवति। ते सर्वदा उन्मुक्ततया मुक्तभावेन संसारे विचरन्ति। एवमेव ज्ञानिनामपि जीवनचरित्रं बालानामिव भवति। ते ज्ञानिनोऽपि मानापमानयोः समाना भवन्ति "मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः" (श्रीमद्भगवद्गीता

१४/२५) इति स्मृतेः। माने न हर्षति अपमानेऽपि न क्रुध्यति। द्वन्द्वविषयेषु सर्वत्र तेषां तितिक्षाभावो भवति। गृहस्थानामिव तेषां ज्ञानिनामपि वासभोजनादिविषये चिन्ता न भवति। बालकवत् ज्ञानी अपि संसारे उन्मुक्ततया आनन्देन विचरति। स ज्ञानी आत्मक्रीडो भवति आत्मना सह क्रीडा यस्य। आत्मरतिर्भवति आत्मनि रतिः प्रीतिर्यस्य। आत्मा एव तस्य सर्वं भवति, आत्मनि स सर्वदा तृप्तः सन्तुष्टो भवति। स आत्मकामः आप्तकामः अकामो भवति। अतः तस्य आत्मा विहाय जगति अन्यस्मिन् कस्मिन्नपि विषये कार्यं न विद्यते। यथा गीतायामुच्यते भगवता –

"यस्त्वात्मरतिरेव स्यात् आत्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते।।" [श्रीमद्भगवद्गीता ३/१७] इति।

**ज्ञानी देहाद्यभिमानरहितः -** ज्ञानी संसारे अस्ति चेदपि सर्वदा देहाभिमानरहिततया वासनारहिततया तिष्ठति। तस्य देहेन्द्रियेषु मे शरीरं मे इन्द्रियमित्याद्यभिमानो न भवति। स सर्वदा देहेन्द्रियाध्यासान्मुक्तो भवति। जीवस्य कलेवरमिदं पूर्वसंस्कारात् कर्मणा परिचालितं भवति। संस्कारेण चोदितः सन् आनिपातात् मरणपर्यन्तं कर्म करोति। कर्मफलेन लाभालाभादिना जीवो हर्षविषादादिरूपं नानाविधं विकारं प्राप्नोति। पुण्यकर्मणा पुरुषः हर्षरूपं विकारं प्राप्नोति। पापकर्मणा विषादरूपं विकारं प्राप्नोति। किन्तु ज्ञानी सर्वस्मात् विकारात् निर्लिप्ततया तिष्ठति। यथा गीतायां श्रीमद्भगवता स्थितप्रज्ञविषये उक्तं यत्-

"यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।" [श्रीमद्भगवद्गीता २/५७] इति।

कारणं हि स अनासक्तभावेन देहयात्रानिर्वाहार्थं कर्म करोति। संसारस्य आसक्त्या पुरुषः सुखदुःखादिरूपं नानाविधं विकारं प्राप्नोति। संसारस्य देहेन्द्रियाणां सर्वासक्तिः सर्वतृष्णा विदुषो ज्ञानिनः सर्वम् अपगच्छति। तेन स वैराग्यस्य पराकाष्ठरूपं प्राप्नोति। स ज्ञानी वैराग्येण स्वात्मनि रमते स्वात्मनि विचरति आत्मानन्दञ्च लभते। कारणं हि आत्मानन्द एव प्रकृतानन्दो न तु देहेन्द्रियसुखमिति सम्यक्तया ज्ञानी विजानाति। अतो विद्वान् ज्ञानी देहे शरीरे स्थितोऽपि देहनिर्वाहकं कर्म करोति चेदपि न केनचित् विक्रियते विकारं न प्राप्नोति। निवृत्ततृष्णत्वात् स्वरूपानन्देन स्थितः संसारस्य जननमरणचक्रे न पुनः संसरति। तथा हि भगवता उच्यते –

"करोति कर्म क्रियते च जन्तुः
केनाप्यसौ चोदित आनिपातात्।
न तत्र विद्वान् प्रकृतौ स्थितोऽपि
निवृत्ततृष्णः स्वसुखानुभूत्या।।" [उद्धवगीता ११/२८/३०] इति।

आत्मज्ञानिनः अहं शरीरं, मे शरीरं वा इत्यभिमानं न भवति। अतः शरीरेण यत् कर्म क्रिया सम्पाद्यते तेन कर्मणा तेन न लिप्यते। यथा उच्यते –

"तिष्ठन्तमासीनमुत व्रजन्तं शयानमुक्षन्तमदन्तमन्नम्।
स्वभावमन्यत् किमपीहमानमात्मानमात्मस्थमतिर्न वेद।।" [उद्धवगीता. ११/२८/३१] इति।

शरीरं निर्वाहार्थम् आत्मस्थमतिः ज्ञानी सर्वं करोति। किन्तु शरीरेण साकं तस्य अनहङ्कारत्वात् ममत्वरहित्वात् नाहं किञ्चित्करोमीति अभिमन्यते ज्ञानी। स देहस्थोऽपि देहं नानुसन्धत्ते। स गमनं, आसीनं, शयनं, अशनं, दर्शनं, श्रवणं इत्यात्माकं नाना क्रियां करोति चेदपि तत्सर्वं शरीरेण सम्पादितं न तु मया सम्पादितमिति तेन अनुभूयते। स सदा स्वात्मनि स्थित्वा आत्मानन्दं लभते। आत्मस्थमतिर्ज्ञानी तत्त्ववित् सर्वेषां कर्मणां अकर्ता इति मन्यते। यथा वदति श्रीमद्भगवद्गीतायां -

"नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन्।।" [श्रीमद्भगवद्गीता ५/८] इति।

स ज्ञानी कर्मणां भोक्तापि नाभिमन्यते। अपि तु वदति सर्वेषां कर्मणां कर्ता भोक्ता च ईश्वरो भगवान्। वस्तुतः ईश्वरः एव सर्वेषां कर्मणां कर्ता भोक्ता च "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" (श्रीमद्भगवद्गीता ९/२४) इति स्मृतेः। किन्तु मायया अज्ञानेन आवृतो जीवोऽहं सर्वकर्मणां कर्ता, भोक्ता प्रभुरेव च इति मिथ्या अभिमन्यते। एवं मिथ्या अभिमानेन मायाबद्धो जीवः संसारस्य जननमरणचक्रे

पुनः पुनः आवर्तते। ज्ञानी सर्वदा स्वात्मस्वरूपे स्थित्वा देहेन साकं सम्बन्धं नानुभवति। अतः स सर्वबन्धनात् मुक्तो भवति।

**ज्ञानिनां सकाशे इन्द्रियादिविषयः स्वप्नवत् मिथ्या** – इन्द्रियम् अस्ति चेत् विषयसमूहानाम् अनुभवो न भवतीति सिद्धान्तः कदापि युक्तियुक्तो न भवति। अस्य संशयस्य उत्तरत्वेन उच्यते यत् निद्राभङ्गकाले तत्क्षणैव स्वप्नदृष्टविषयाः तिरोहिता लुप्ता भवन्ति। स्वप्नदर्शनकाले ये विषया सत्यरूपेण आभासन्ते, ते विषया जाग्रतकाले पुरुषो मिथ्या इति अभिमन्यते। वस्तुतः स्वप्नदृष्टविषयस्य चिरन्तनं सत्यत्वं नास्ति तद्वस्तु तत्क्षणैव सत्यम्। अतो जाग्रतपुरुषः स्वप्नदृष्टविषयस्योपरि सत्यत्वं नारोपयति। एवमेव ज्ञानिनः सकाशेऽपि व्यवहारिकविषयाः स्वप्नवत् मिथ्यारूपेण प्रतिभासन्ते। ज्ञानी तु सर्वदा आत्मज्ञाने पारमार्थिकावस्थायां स्थितो भवति। यदि कदाचित् समाधिभङ्गे मनीषी ज्ञानी नानाविधम् असदिन्द्रियार्थं विषयजालं पश्यति तथापि कार्यं कारणाभिन्नं पटवत् इत्यनुमानेन विरुद्धं बाधितं सत् अन्यत् आत्मव्यतिरिक्तं वस्तुतया न मन्यते। आत्मैव तस्य सकाशे सत्यवस्तु तद्भिन्नम् अन्यत् सर्वं मरीचिकावत् मिथ्या अनृतम्। अतो ज्ञानी व्यवहारकाले यत् यत् आत्मव्यतिरिक्तम् अनात्म विषयम् अनुभवति तेषां विषयानां बाधितत्वात् ते विषया मिथ्या इति अभिमन्यते। स तु सर्वदा आत्मस्वरूपे स्थित्वा आत्मानन्दं लभते। यथा –

"यदि स्म पश्यत्यसदिन्द्रियार्थं नानानुमानेन विरुद्धमन्यत्।
न मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानम्॥" [उद्धवगीता ११/२८/३२] इति।

**उपसंहारः** – जगति बहवो जनाः सन्ति। सर्वेषां स्वरूपं समानं न भवति। अतः आत्मज्ञानिनोऽपि स्वरूपमपि किञ्चित् भिन्नं भवतीति प्रबन्धेऽस्मिन् आलोचितम्। मायायाः गुणेषु यथा देहाद्यभिमानः पुरुषः संस्पृष्टो भवति तथा आत्मज्ञानिसाधकः मायायाः सर्वेभ्यो गुणेभ्यः संस्पृष्टो न भवति। कस्मिंश्चित् विषयेऽपि स आत्मानं नावृणोति। स सर्वदा सर्वेभ्यो विषेभ्यो निर्लिप्ततया तिष्ठति। स स्वात्मानं भगवति परमात्मनि वासुदेवे समर्पयति। कारणं हि वासुदेवः परा गतिः इति सम्यक्तया स विजानाति। अतः आत्मज्ञानिसाधको जगतः सर्वस्मात् विषयात् निर्लिप्तः सन् स्वात्मनि रमते। स्वात्मनि एव परानन्दं प्राप्नोति। लोकसंग्रहेण प्रारब्धकर्मवशेन वा आत्मज्ञानी जीवन्मुक्तः किञ्चित् क्षणकालं यावत् जगति तिष्ठति। किन्तु प्रारब्धकर्मणि नष्टे सति स परमानन्दलोकं विष्णुलोकं विदेहमुक्तिं वा विन्दतीति शिवम्।

## अनुशीलितग्रन्थसूची


शास्त्री पौराणिकः आचार्यः प०. श्रीराममूर्तिः (सम्पादकः)। श्रीमद्भागवतमहापुराणम् (गूढार्थदीपिनी संस्कृतटीकायुतम्)। चौखम्बा विद्याभवन्- वाराणसी। १९९३।

श्रीमद्भगवद्गीता विष्णुसहस्रनामसहित। गीताप्रेस : गोरखपुर। (सं० २०६६)।

श्रीमद्भगवद्गीता (शाङ्करभाष्य, हिन्दी-अनुवाद-सहित)। गीताप्रेस : गोरखपुर। सं० २०७०।

मुण्डकोपनिषद् (सानुवाद शाङ्करभाष्यसहित)। गीताप्रेस : गोरखपुर । सं० २०६४।

तैत्तिरीयोपनिषद् (सानुवाद शाङ्करभाष्यसहित)। गीताप्रेस : गोरखपुर। सं० २०६६।

कठोपनिषद् (सानुवाद शाङ्करभाष्यसहित)। गीताप्रेस : गोरखपुर। सं० २०६९।

ईशावास्योपनिषत् (सानुवाद शाङ्करभाष्यसहित)। गीताप्रेस : गोरखपुर। सं० २०७०।

मिश्रः आचार्यरामचन्द्रः। संस्कतसाहित्येतिहासः। चौखम्बा विद्याभवन : वाराणसी।२०१०।

चट्टोपाध्यायः श्रीअमूलपदः। अद्वैतामृतवर्षिणी। ब्रह्मज्ञकवि श्रीअमूलपदस्मृतिसंघ : कलकाता। (ब. १३५९)।

गोस्वामी महाराजः श्रीमद्भक्तिविवेकभारती (सम्पादकः)। श्रीउद्धवसंवादः (श्रीलविश्वनाथचक्रवर्ती-ठाकुरकृतसारार्थदर्शिनी टीका समेता)। श्रीसारस्वत गौडीय आसन ओ मिशन : कलकाता। २०१०।

वेदान्तनन्द स्वामी (सम्पादकः)। श्रीउद्धवगीता। उद्बोधन कार्यालय : कलकाता। २०१४।

# न धातुलोप आर्धधातुके इति सूत्रविमर्शः

डा. राधा शर्मा, व्याकरणाचार्या
सर्वकारीयसंस्कृतमहाविद्यालयः, तुङ्गेशः
शिमला, हिमाचलप्रदेशः
सम्पर्कसूत्रम्- 9901860092

**साङ्केतिकशब्दाः - उपेद्धः, प्रेद्ध, अक्षद्यूः , अधीत्य , प्रेत्य, संचस्करतुः, बहिरङ्गम् , अन्तरङ्गे**

**अवतरणम्-** भाष्यकारैः **न धातुलोप आर्धधातुके**[1] इति अस्मिन् सूत्रे आर्धधातुक इति एतत् पदं क्व विशेषणं भवितुमर्हति? धातुलोप इत्यत्र अथवा अनुवृत्तगुणवृद्धिपदयोः इति विचार आरब्धः। यदि आर्धधातुकमिति लोपविशेषणं तदा आर्धधातुकप्रत्ययनिमित्तकधात्वंशलोपे इको गुणवृद्धी न भवत इति। यदा तु आर्धधातुक इति गुणवृद्धिविशेषणं तदा सूत्रार्थो भवति **धात्वंशलोपे सति इकः आर्धधातुकनिमित्तकगुणवृद्धी न भवत** इति। प्रथमपक्षे यदा लोपविशेषणत्वं तदा भाष्यकारैः उक्तम् उपेद्धः प्रेद्धः इत्यत्रापि प्राप्नोति इति। तत्र उपप्रोपसर्गपूर्वक इन्ध् दीप्तौ धातुः। तस्मान् **निष्ठा** इति सूत्रेण निष्ठासंज्ञकक्तप्रत्यय उप इन्ध् त, प्र इन्ध् त इति जाते क्तप्रत्ययस्य कित्त्वात् 'अनिदिताम् अङ्गानां हलन्तानाम् उपधायाः नकारस्य लोपो भवति क्ङिति प्रत्यये परतः' इत्यर्थकेन **अनिदितां हलः उपधायाः क्ङिति** इति सूत्रेण धातोः नकारस्य लोपे जश्त्वादिकार्ये सति उप इद्धः, प्र इद्धः इति जात **आद् गुणः** इति सूत्रेण गुण उपेद्धः, प्रेद्धः इति रूपद्वयं सिद्ध्यति। अत्र इदानीम् आर्धधातुकनिष्ठाप्रत्ययनिमित्तकधात्वंशस्य नस्य लोपः वर्तते तथा च **आद्गुणः** इत्यनेन प्राप्तस्य गुणस्यापि निषेधः स्याद्। तथा च उपेद्धः प्रेद्ध इति रूपद्वयं च न सिद्ध्येत। तत्र भाष्यकार कथयति बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। **असिद्धं बहिरङ्गमन्तरङ्गे**[2] इति। तथा च अन्तरंगे निषेधे कर्तव्ये गुणस्य बहिरङ्गत्वात्, निषेधविधायकशास्त्रदृष्ट्या निषेध्यस्याभावेन तत्र गुणः प्रवर्तते इति इष्टं सिद्धयति।

**कैयटमतम्-** भाष्यकारैः उक्तं यद् बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेध इति तद् बहिरङ्गः प्रतिषेधोऽन्तरङ्गः गुण इत्यस्यापि उपलक्षणम्। यतो हि पूर्वं धातुः उपसर्गेण युज्यते पश्चाद् साधनेन इति पूर्वं धातुः साधनेन युज्यते पश्चाद् उपसर्गेण इति च पक्षद्वयमपि सिद्धांतसम्मतं वर्तते। तथा च धातुः येन पूर्वं युज्यते तत्कार्यं भवतीति पूर्वोपस्थितिनिमित्तकत्वेन तस्यान्तरङ्गत्वं सिद्ध्यति। यदा तु **धातुः पूर्वं साधनेन युज्यतेपश्चाद् उपसर्गेण**[3] इति पक्षः तदा क्तप्रत्ययनिमित्तकं कार्यं गुणनिषेधो भवति। अतः पूर्वोपस्थितिनिमित्तकत्वेन प्रतिषेधोऽन्तरङ्गो भवति। गुणश्च उपसर्गावयवनिमित्तक इत्यतः (उपसर्गयोगस्य च पश्चाज्जायमानत्वात्) तस्य बहिरङ्गत्वं भवति। तथा च प्रतिषेधदृष्ट्या प्रतिषेध्यस्याभावान् नात्र उपेद्धः प्रेद्ध इत्यादौ विप्रतिपत्तिः। अथ च यदा पूर्वं धातुः उपसर्गेण युज्यते पश्चाद् साधनेन इति पक्षः तदा यद्यपि गुणः पूर्वोपस्थितिनिमित्तकत्वेन अन्तरङ्गः तथापि प्रतिषेधस्य परोपस्थितिनिमित्तकत्वेन बहिरङ्गत्वात् पूर्वमेव गुणो भवति, पुनः जातस्य निवृत्त्ययोगात्, परं प्रतिषेधो न प्रवर्तत इति उभयपक्षेऽपि इष्टसिद्धिः।

ननु **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः**[4] इति परिभाषया अच्निमित्तके न धातुलोप आर्धधातुक इति सूत्रेण निषेधे कर्तव्ये बहिरङ्गपरिभाषायाः निषेधात् कथं भाष्ये **असिद्धं बहिरङ्गमन्तरङ्गे** इति चेत् तत्र उच्यते अनया **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः** इति परिभाषया तत्रैव **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषायाः निषेधः क्रियते यत्र कार्यविधौ आनन्तर्येण अचोः आश्रयणं भवति। यथा अक्षद्यूः इति। अक्षैः दीव्यति इत्यर्थे क्विपि तस्य सर्वापहारलोपे अक्षदिव् इति जाते सतुक्कस्य च्छस्य वस्य च क्रामाच् श ऊठ् इत्यादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति इत्यर्थकेन **च्छ्वोः शूडनुनासिके च**[5] इति सूत्रेण वकारस्य स्थान ऊडादेश

[1]अष्टा.1.1.4
[2]परि.शे.परि.सं.51
[3]महा.भा.पञ्च.भा.सुट्कात्पूर्वः.पृ.सं.137
[4]परि.शे.परि.सं.52
[5]अष्टा.6.4.19

अनुबन्धलोप अक्षदिऊ इति। जाते इदानीम् **इको यणचि** इति सूत्रेण इकारस्य स्थाने यणादेशः कर्तव्यः। परन्तु **इको यणची** त्येतच्छास्त्रदृष्ट्या निमित्तं यदुकारः स वत्वेनैव वर्तते न तु ऊत्वेन। यतो हि **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषया **इको यणचि** इत्येतच्छास्त्रीयनिमित्ताद् बहिर्भूतनिमित्तकस्य **च्छ्वोः शूडनुनासिके च** इति शास्त्रीयकार्यस्य असिद्धत्वं विहितं वर्तते। तथा च एतच्छास्त्रदृष्ट्या तत्र वकार एव वर्तते न तु अज्रूप ऊकारः। एवञ्च निमित्ताभावात् तत्र यणादेशो न स्याद्। तत्र अनया **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः** इति परिभाषया अचोः आनन्तर्यमाश्रित्य यण्विधानरूपं कार्यविधानं वर्तते (यथात्र इको यणचीति) तत्र बहिरङ्गत्वप्रयक्तासिद्धत्वं न भवति इति। अत्र बहिरङ्गपरिभाषाया अप्रवृत्तौ **इको यणचि** इति शास्त्रदृष्ट्या तत्र ऊकारस्य सत्त्वेन यणादेशो भवति इति अक्षद्यूः इत्येतद् रूपं सिद्ध्यति।

अत्र उपेद्धः प्रेद्ध इत्यादौ यद्यपि **न धातुलोप आर्धधातुके** इत्यनेन विधीयमानः प्रतिषेधः अजुद्देश्यको वर्तते परन्तु सः अचोः आनन्तर्यनिमित्तको नास्ति। यतो हि आर्धधातुकप्रत्ययं निमित्तीकृत्यानेन प्रतिषेधो विधीयते। स चात्र 'क्विप्' इति तत्र अच्त्वं नास्ति। इत्थं चात्र **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः** इति परिभाषाया अप्रवृत्तौ बहिरङ्गपरिभाषायाः प्रवृत्तौ गुणप्रतिषेधाभावाद् गुण उपेद्धः प्रेद्ध इति रूपे सिद्ध्यत इति भाष्यं सुसंगतमेव।

**नागेशभट्टमतम्-** नागेभट्टास्तु एवं मन्यन्ते, आर्धधातुक इत्यस्य लोपविशेषणत्वे उपेद्धः प्रेद्ध इत्यादौ प्रसक्तस्य गुणप्रतिषेधरूपदोषस्य वारणार्थं भाष्यकारैः यदुक्तं बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेध इति तस्य बहिरङ्गः प्रतिषेधोऽन्तरङ्गो गुण इति पूर्वोक्तार्थ उपलक्षणत्वं तु न युक्तम्। यतो हि उपलक्षणवादिभिः यदुक्तं भाष्यकारैः अभिहितं बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। इति तत् पूर्वं धातुः साधनेन युज्यते पश्चाद् उपसर्गेण इति न्यायमाश्रित्य उक्तम्। परन्तु तथैव अपरोऽपि न्यायो वर्तते **पूर्वं धातुः उपसर्गेण युज्यते पश्चात् साधनेन**[1] इति। तथा च अस्मिन् पक्षे गुणः पूर्वोपस्थितिनिमित्तिकत्वेन अन्तरङ्गः प्रतिषेधस्य परोपस्थितिनिमित्तकत्वेन बहिरङ्गत्वात्, पूर्वमेव गुणो भवति इति। अतो बहिरङ्गः प्रतिषेधोऽन्तरङ्गोगुण इत्यत्रापि भाष्यतात्पर्यमिति तत्तु भ्रान्त्यैव। यतो हि सिद्धान्ते केवलं **पूर्वं धातुः साधनेन युज्यते पश्चाद् उपसर्गेण**[2] इत्येव न्यायः युक्ततरो वर्तते न तु पूर्वं धातुः उपसर्गेण युज्यते पश्चात् साधनेन इति। तस्य न्यायस्य भाष्यकारैः **सुट्कात्पूर्वः**[3] इति सूत्रे भाष्ये दूषित्वाद्।

अथ चात्र प्रदीपकारेण यन् नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति परिभाषया अच्निमित्तके न धातुलोप आर्धधातुक इति सूत्रेण निषेधे कर्तव्ये बहिरङ्गपरिभाषायाः निषेधमाशङ्क्य 'अक्षद्यूः' इत्यादाविव यत्र कार्यविधौ आनन्तर्येण अचोः आश्रयणं भवति तत्रैवास्याः परिभाषायाः प्रवृत्तिरित्युक्त्वा, अत्र तथाऽभावाद् भाष्यं समाहितं तदपि न नागेशभट्टानामभीप्सितम्। ते तु वदन्ति अस्याः परिभाषायाः प्रवृत्तौ 'कार्यविधौ आनन्तर्येण अचोः आश्रयणम् 'एव नापेक्षितम् अपि तु उद्देश्यत्वेन अथवा निमित्तत्वेन अच आश्रयणमेव पर्याप्तम्। अत्र च हेतुः ज्ञापकभूमिरेव। एषा परिभाषा **षत्वतुकोरसिद्धः**[4] इति सूत्रेण ज्ञापिता। एतच्च अतिदेशशास्त्रम्। अनेन शास्त्रेण षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्धो भवति 'इति अतिदिश्यते। उदाहरणं यथा 'अधीत्य' 'प्रेत्य' इत्यादि। अत्र अधि इति उपसर्गपूर्वकाद् इण्गतोः धातुः 'समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्याद् इत्यर्थकेन **समानकर्तृकयोः पूर्वकाले** इति सूत्रेण क्त्वाप्रत्यये तस्य स्थाने 'अव्ययपूर्वपदे अनञ्समासे क्त्वो ल्यबादेशः स्याद् इत्यर्थकेन **समासेऽनञ्पूर्वे क्त्वो ल्यप्** इति सूत्रेण ल्यबादेशे, सवर्णदीर्घे 'अधी य' इति जाते इदानीम् 'पिति कृति परतो ह्रस्वान्तस्य धातोः तुगागमो भवति' इत्यर्थकेन **ह्रस्वस्य पिति कृति तुग्** इति सूत्रेण तुगागमः कर्तव्यः परन्तु अत्र धातुः ह्रस्वान्तो नास्ति सवर्णदीर्घेण दीर्घान्तो वर्तते। तर्हि कथं तुगागम इति चेत् तत्र **षत्वतुकोरसिद्धः** इति अनेनातिदेशशास्त्रेण तुकि कर्तव्य एकादेशोऽसिद्धो भवति। इति अतिदेशनात् तत्र इण्गतौ इति धातुघटक एव ह्रस्व इकारो लभ्यत इति तुक् सुसाध्यः। तत्र प्रश्नो भवति ननु अधीत्य प्रेत्य इत्यादौ दोषवारणाय **षत्वतुकोरसिद्धः** इति शास्त्रं किमर्थं तत्तु बहिरङ्गगपरिभाषयाऽपि साधयितुं शक्यते। यतो हि 'अधि इ य' इत्यवस्थायाम् पूर्वं तुग् भवति अथवा सवर्णदीर्घ

---

[1]महा.भा.पञ्च.भा.सुट्कात्पूर्वः.पृ.सं.137

[2]महा.भा.पञ्च.भा.सुट्कात्पूर्वः.पृ.सं.137

[3]अष्टा.6.1.135

[4]अष्टा.6.1.86

इति प्रश्ने पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वेन सवर्णदीर्घो बहिरङ्गः। एकपदसम्बन्धिप्रकृतिप्रत्यय-निमित्तकत्वेन तुगागमोऽन्तरङ्ग इति **असिद्धं बहिरङ्गमन्तरङ्ग** इति परिभाषया तुगागमस्य बलवत्त्वबोधनात्, पूर्वमेव तुगागमस्य प्रवृत्तौ अनन्तरं सवर्णदीर्घे अधीत्य प्रेत्य इत्यादिरूपाणि सिद्ध्यन्ति। तर्हि सूत्रं किमर्थमिति चेत् **षत्वतुकोरसिद्धः** इति सूत्रं व्यर्थीभूय ज्ञापयति एनां परिभाषां **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः** इति। तथा च अनया परिभाषया तत्र बहिरङ्गपरिभाषाया निषेधात् पूर्वं **विप्रतिषेधे परं कार्यम्** इति शास्त्रबलेन सवर्णदीर्घे तदनन्तरं कृतस्य दीर्घस्य **षत्वतुकोरसिद्धः** इति अतिदेशेन असिद्धत्वात् तुगागमः सिद्ध्यति इति ज्ञापनस्य स्वांशे चारितार्थ्यं सिद्ध्यति। अन्यत्र प्रयोजनं यथा 'अक्षद्यूः' इत्यादि। इत्थञ्च तुगागमशास्त्रस्य अचोरानन्तर्यनिमित्तकत्वाभावात् कार्यविधौ आनन्तर्येण अचोः आश्रयणम्' यत्र तत्रैव परिभाषाप्रवृत्तिरिति संकोचे न मानम्।

ननु तर्हि नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति परिभाषया बहिरङ्गपरिभाषायाः निषेधात् कथं बहिरङ्गोगुणोऽन्तरङ्गः प्रतिषेधः। असिद्धं बहिरङ्गमन्तरङ्गे। इति भाष्यं संगच्छेत इति चेत् तत्र उच्यते वस्तुतस्तु **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः** इत्येषा परिभाषा नास्त्येव। केवलं **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषाया अनित्यत्वानुवादिका। कथमिदं ज्ञायते इति चेद् एषा परिभाषा भाष्यकारैः केवलं **विप्रतिषेधे परं कार्यम्**[1] इति सूत्र एव अभिहिता न त्वन्यत्र **षत्वतुकोरसिद्धः** इत्यत्रापि।( यथा बहिरंगपरिभाषा वाह ऊठ् सूत्रेऽपि उक्ता तथा नात्र इत्यभिप्रायः)। तथा च इष्टस्थल **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषायाः प्रवृत्तौ अत्र उपेद्धः प्रेद्ध इत्यादौ सुव्यवस्था जायते। पूर्वोक्तभाष्यं च न विरुद्ध्यत इति सर्वेष्टसिद्धिः।

**समीक्षा-** न धातुलोप आर्धधातुक इति अस्मिन् सूत्रे बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। असिद्धं बहिरङ्गमन्तरङ्गे। इति भाष्यप्रतीक उद्द्योतनोद्द्योतकारयोः परस्परं स्थलद्वये विरोधः परिलक्ष्यते। प्रथमम् उद्योतनकारैः आर्धधातुक इत्यस्य लोपविशेषणत्वे उपेद्धः प्रेद्ध इत्यादौ प्रसक्तस्य गुणप्रतिषेधरूपदोषस्य वारणार्थं भाष्यकारैः उक्तं यद् बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेध इति तद् बहिरङ्गः प्रतिषेधोऽन्तरङ्गोऽगुण इत्यस्यापि उपलक्षणम् इति उक्तम्। तेषामयमाशयो भाष्यकारैः उक्तं बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधोऽसिद्धं बहिरङ्गमन्तरङ्ग इति तु यद्यपि पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण इति न्यायमाश्रित्य। परन्तु अवश्यं **पूर्वं धातुः उपसर्गेण युज्यते पश्चात् साधनेन**[2] इति न्यायोऽङ्गीकर्तव्योऽन्यथा अनुभूयत इत्यादौ कर्मणि लकारो नोत्पद्यते। धातुः पूर्वं साधनेन युज्यत इति उच्यमाने सत्तार्थकभूधातुवत् कर्मणि लकारः (साधनम्) न स्याद्। अतोऽवश्यं पूर्वं धातोः उपसर्गयोगो वक्तव्यः। अतः **पूर्वं धातुः उपसर्गेण युज्यते पश्चाद् साधनेन** इत्यपि न्यायोऽङ्गीकर्तव्यः। तथा च विनिगमकाभावाद् भाष्यस्य उभयपक्षेऽपि तात्पर्यं ज्ञायते इति। परन्तु परे तु मतानुसारिणः **पूर्वं धातुः उपसर्गेण युज्यते पश्चाद् साधनेन** इति न्यायस्य **सुट्कात्पूर्वः** इति भाष्यप्रामण्येन दूषितत्वं मत्वा उपलक्षणत्वं नाङ्गीकुर्वन्ति। ननु तर्हि तेषां मते अनुभूयत इत्यादौ पूर्वं धातोः साधनेन योगसत्त्वात् कथं कर्मणि लकारः इति चेत् तत्र उपसर्गाणां द्योतकत्वेन उपसर्गद्योत्यार्थान्तर्भावेण धातोरेव कर्मणि लकारः सिद्ध्यति इति।

प्रसङ्गात् सुट्कात्पूर्वः सूत्रस्य भाष्यमपि उदाह्रियते। तत्र हि उक्तं युक्तमिह द्रष्टव्यं किमन्तरङ्गं किं बहिरङ्गमिति। धातूपसर्गयोः कार्यं यत्तदन्तरङ्गम्। कुत एतद्? पूर्वं हि धातुरुपसर्गेण युज्यते, पश्चात्साधनेनेति। नैतत्सारम्। पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि। अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम्। सत्यमेवमेतद्। परत्वाद् धातूपसर्गकार्यस्यान्तरङ्गत्वाच्च सुटि द्विर्वचनादौ रूपं सिद्ध्यति अडभ्यासयोरन्तरङ्गत्वं च लक्ष्यते। अङ्ग्रहणं व्यर्थम्, अग्रे संचस्करतुः इत्यस्यैवोदाहरणाद्। किन्च विकरणविशिष्टस्याङ्गस्याटि व्यवधानात्सुट्प्राप्तिरेव न, द्वित्वस्य तु स्थाने द्विर्वचनत्व पक्षे तत्र कृते प्राप्तिरिति बोध्यम्। पूर्वं धातुः साधनेन युज्यते इति पक्षे इदम्। 'मन्यते' इत्यनेनास्यासिद्धान्तत्वं दर्शयति कैयटोऽपि इति नागेशभट्टो वदति। इत्थम् उभयपक्षालोचनेन **सुट्कात्पूर्वः** इति भाष्यप्रामाण्याच्च परेतुमतमेव साध्विति प्रतिभाति।

द्वितीयम् कैयटेन उपेद्धः, प्रेद्ध इत्यादौ **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः** इति परिभाषया अचोः निमित्तकतया प्राप्तस्य आद्गुण इति गुणस्य **न धातुलोप आर्धधातुके** इति सूत्रेण निषेधे कर्तव्ये बहिरङ्गपरिभाषायाः निषेधमाशङ्क्य 'अक्षद्यूः' इत्यादाविव

[1]अष्टा.1.4.2

[2]महा.भा.पञ्च.भा.सुट्कात्पूर्वः.पृ.सं.137

यत्र'कार्यविधौ आनन्तर्यम् अचोः आश्रीयते। तत्रैवास्याः परिभाषायाः प्रवृत्तिरित्युक्त्वा, अत्र तथाभावाद् भाष्यं समाहितम्, तदपि नागेशभट्टानां न सम्मतम्। ते तु ज्ञापकभूमिविरोधात् 'कार्यविधौ आनन्तर्येण अचोः आश्रयणस्थल एव प्रवृत्तिः इति प्रकृते तथाऽभावाच्छङ्कासमाधानस्यैव अयुक्ततां प्रतिपादयन्ति। च तेषां मते एषा परिभाषा नास्त्येव।

अत्रापि नागेशभट्टानां मतं युक्ततरं प्रतिभाति। यतो हि प्रदीपकारादिभिः प्रमाणं विनैव परिभाषाप्रवृत्तिनिमित्तसंकोचः कृतः। उद्द्योतकारैः धर्मिग्राहकमानेन **कार्यविधौ उद्देश्यत्वेन निमित्तत्वेन वा, उभयथा वायत्र अचः आश्रयणं तत्र स्थले** अस्याः प्रवृत्तिः स्वीकृता। अथ च अस्याः परिभाषायाः अभावे तैः प्रदर्शितः हेतुरपि युक्ततर एव भाति, अन्यथा **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः** इति परिभाषायाः सत्त्वे तु **वाह ऊठ्** इति सूत्रे बहिरङ्गपरिभाषाया इव **षत्वतुकोरसिद्ध** इति सूत्र अस्या उल्लेखं कुर्याद् इति।

**परिशीलितग्रन्थपञ्जिः**


नागेशभट्टः। *लघुशब्देन्दुशेखरः* (षट्टीकोपेतः अव्ययीभावान्तो भागः)। काशी: भार्गव पुस्तकालयः, 1992।

भट्टोजिदीक्षितः। *प्रौढमनोरमा* (शब्दरत्न-भैरवी-भावप्रकाश-सहिता)। सम्पा. पं. गोपालशास्त्री नेने। वाराणसी: चौखम्भा संस्कृत भवन, 2018

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्)। सम्पा. गोविन्दाचार्यः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2017।

महर्षिपतञ्जलिः। *महाभाष्यम्* (तृतीयं खण्डम्, प्रदीपोद्योतसहितम्)। सम्पा. श्रीभार्गवशास्त्री। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, 2014।

भट्टोजिदीक्षितः ।*वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः)। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा। वाराणसी: मोतीलाल बनारसीदास, 2014।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (द्वितीयो भागः)। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा। वाराणसी: मोतीलाल बनारसीदास, 2014।

प्रदीपोद्योतसहितं महाभाष्यम्,चौखम्बा सुरभारतीप्रकाशनम, 2021

महर्षिपतञ्जलिः। महाभाष्यम् (तृतीयं खण्डम्, प्रदीपोद्योतसहितम्)। सम्पा. श्रीभार्गवशास्त्री। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, 2014।

नागेशभट्टः। *लघुशब्देन्दुशेखरः* (भावबोधिनी बालबोधिनी व्याख्याद्वयोपेतः)। सम्पा आचार्यः श्रीपाद सत्यनारयणमूर्तिः।प्रकाशकः आचार्य काई गोविन्दन् । तिरुपतिः । राष्ट्रियसंस्कृतविद्यापीठम् । 2005

नागेशभट्टः। बृहच्छ*ब्देन्दुशेखरः*। सम्पा श्रीसीतारामशास्त्री । प्रकाशकः डाँ हरिचन्द्रमणित्रिपाठी। वाराणसी। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः। 1996

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तभूषणम्* (द्वितीयो भागः)। सम्पा. के वि रामकृष्णमाचार्यः।
INSTITUT FRANCAIS DE PONDICHERY SHREE SOMNATH SANSKRIT UNIVERSITY । 2022

# आयुर्वेदशिक्षणविधिविमर्शः

Dr. Tapas Barman, Assistant Professor,
Tufanganj Mahavidyalaya,
Phone no. 7980995598,
Email: tapasbarmancu@gmail.com

**शब्दसंकेतः** *आयुर्वेदः, वैद्यः, भेषजम्, परिचारकरः, रोगी, शास्त्रपरीक्षा, आचार्यपरीक्षा, शिष्यपरीक्षा, अध्ययनम्, अनुशासनम्।*

**शोधसारः** आयुर्वेदस्य आधारग्रन्थो वेदः। वैदिकसाहित्येऽस्मिन् मान्त्रिकप्रक्रियाया उपलम्भेऽपि केवलभेषजप्रक्रियाया वर्णना न तु अल्पा न वा साधारणाः, अपि तु असाधारणा बहुशो विषया दृश्यन्ते। वेदे शारीरकाणि, ओषधयः, शास्त्रवैद्यकविषयाः, रोगनिर्देशाः, रोगोपचाराश्च इत्येतादृशा भैषज्यविषया ओताः प्रोताश्चेति वर्णिताः सन्ति। चिकित्साशास्त्रस्य कर्मसाधकहेतवः चत्वारः, यथा- वैद्यः, भेषजम्, उपचारकः, रोगी चेति। वैद्यादीन् अन्तरेण चिकित्साकार्यं भवितुं नार्हति। चिकित्याकार्याय तु आयुर्वेदीयं ज्ञानमावश्यकम्। आचार्यः कथं कस्मै कुत्र ज्ञानमिदं प्रयच्छति, कः योग्योऽयोग्यो वा, शिष्योऽपि कम् वैद्याचार्यं शिक्षकेण वृणोति, चिकित्सकस्य नैतिकदायित्वं किम् भवेच्च एषामालोचना प्रस्तुयतेऽस्मिन् शोधसारे।

वेदो नाम आर्याणां सर्वादिमो ज्ञानविज्ञानराशिः। अत्रैव पूर्वपुरुषाणां ज्ञानानि विज्ञानानि च सम्भृतानि। आर्याणां तपःप्रणिधानालोकोज्ज्वलेषु हृदयेषु प्रतिभप्रकाशरूपेण वर्तमानाव्याहतस्वरूपा ज्ञानसम्पद्वेदशब्देन व्यवह्रियते। संस्कृतसाहित्ये आर्याणां सभ्यता संस्कृतिश्च वेदानाधारीकृत्य विराजते। साहित्येऽस्मिन् वेदानां स्थानं सर्वोपरि वर्तते। भारतीयदर्शनस्य धर्मस्य च जीवनं वेदे एव प्राप्यते। वेदेषु ज्ञानविज्ञानधर्मदर्शनसदाचारसंस्कृतिसामाजिकराजनैतिकज्योतिषशास्त्रव्याकरणशास्त्र-चिकित्साविज्ञानप्रभृतीनां जीवनोपयोगिविषयाणां सन्निवेशोऽस्ति। तेन वेदशब्दस्यार्थो ज्ञानमिति। यद्यपि विद्धातुरनेकर्थकः। दिवादिगणीयो विद्धातुः सत्तार्थकः, अदादिगणीयो विद्धातुः ज्ञानार्थकः, रुधादिगणीयो विद्धातुः विचारार्थकः, तुदादिगणीयश्च विद्धातुः लाभार्थकः चेति। अतो येन धर्मादिपुरुषार्थचतुष्टया ज्ञायन्ते लभ्यन्ते विचार्यन्ते च ते एव वेदाः। अत्र प्रेयशास्त्रं श्रेयशास्त्रञ्चोभयं समभावेन समेधितम्। सर्वाङ्गपूर्णतया मानवजीवनोद्देश्यभूताः सर्वेऽपि विषयाः साधु विवेचिताः सन्ति। तेषु भैषज्यज्ञानरूपम् आयुर्वेदशास्त्रमपि समुपलभ्यते। आयुर्वेदस्यास्याधारग्रन्थो वेदः। लोकानां श्रेयःसाधनताया हितावहेषु विविधेषु ज्ञानविज्ञानप्रभेदेषु सर्वोपजीव्यं यद्विज्ञानरत्नं तदेवायुर्वेदविज्ञानमुच्यते। आयुरनेन विद्यते ज्ञायते विचार्यते वेति आयुर्वेदः। आयुरस्मिन् विन्दति प्राप्नोति वैति आयुर्वेदः। एतदीयं विज्ञानं न केवलं स्वस्यैकव्यक्तिमात्रस्य वोपकृतये, अपि तु कुटुम्बस्य समाजस्य देशस्यापि उपकृतये समुन्नतये च विज्ञेयम्। आयुषः स्वरूपम्, तत्र हिताहिते, पथ्यापथ्ये, तत्फलीभूते सुखदुःखे, आयुषः तत्तदवस्थारूपाणि लक्षणानि च यो वेदयति ज्ञापयतीति स आयुर्वेदः। तदुच्यते सुश्रुतसंहितायाम्- "आयुरस्मिन् विद्यतेऽनेन वायुर्विन्दतीत्यायुर्वेदः"[१] इति। प्राणिनो नानाविधैः रोगैः शतधा प्ररोहन्ति। ते शतशो रोगा नैकेनोपायेन उपदेशेने वा परिहरणीया भवन्ति। तेषां निवृत्तयेऽनुत्पादाय च चिकित्साशास्त्रे उपयाः प्रदीयन्ते। वातपित्तश्लेष्मणां धातुत्रयाणां वैषम्येणोद्भूतं व्याधिं प्रतीकाराय वैद्यभेषजातुरपरिचारकादीनां प्रचेष्टा आयुर्विज्ञाने चिकित्सानाम्नाभिधीयते।

अस्याः चिकित्सायाः पादचतुष्टयं समुपलभ्यते। तेषु गुणवान् वैद्यः (PHYSICIAN), गुणयुक्तं भेजषम् (DRUG), गुणवान् परिचारकः (NURSING STUFF), गुणवान् रोगी (PATIENT) चेति वर्तते। एतानि चत्वारि रोगिणो रोगोपशान्तये कारणानि भवन्ति। एते वैद्यादयः सदा विकारोपशमने न तु हेतव एव। कदाचिद्वैद्यादीन् प्रत्याख्यायापि रोगिणां लघुरोगोपशमो भवति। किन्तु महारोगे पादचतुष्टयस्य प्रयोजनमावश्यकम्। तदुक्तं- "वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः। एते पादाश्चिकित्सायाः कर्मसाधनहेतवः॥ गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक्। व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥"[२] इति। इत्येवं चिकित्सायाः चत्वारः पादा यदा सम्यगुपपद्यन्ते तदा व्याधिः नातिवर्तते।

पुरा रोगोपशान्तको वैद्यनाम्ना परिचीयते। सुतीर्थः, न्यायेनार्षज्ञानप्राप्तः, विज्ञानवान्, अनेकशो दृष्टकर्मा, विदितसिद्धयोगः,

दक्षः, दक्षिणः, शुचिः, अनुद्धतवेषः, सर्वभूतेषु बन्धुभूतः, सिद्धिमान्, धर्मार्थदर्शी, सत्यदयादानार्जवनिरतः, देवद्विजगुरुसिद्धानां पूजकः, उत्तरोत्तरवर्धितरोगोपशान्तये कुशलः, गुरुवृद्धसेवी, न्यायवान्, निर्भीकोऽलोभी, शान्त, सत्यवादी, सुमुखी, रोगमुक्तश्च गुणवान् नरो भवेद्वैद्यः। वैद्यो रोगपरीक्षायामौषधनिर्माणे औषधप्रयोगे चानेकशो दृष्टकर्मा बभुव। अनेन प्रकारेणाभिज्ञो वैद्यः दुरारोग्यं व्याधिमुपशमितुं समर्थो बभुव। सुवैद्यस्य चतस्रः वृत्तयो आसन्। एताः वृत्तयः- रोगिणे मैत्रीभावः, आर्ताय कारुण्यम्, साध्यरोगिणे प्रीतिः, असाध्यरोगिषु अनुपेक्षा चेति। वैद्य एवौषधस्य विज्ञाता, परिचारकस्य शासिता, आतुरस्य रोगानुसारेणौषधदाता चेति। एवं वैद्यपराधीनानां भेषजादीनां प्रवृत्तिः भवति। तेषु वैद्यस्तु स्वतन्त्रः, ततश्च वैद्यः प्रधानः इत्याशयः। रन्धनाय पात्रेन्धनानलाः पाचकस्य यथा हेतवो भवन्ति; युद्धक्षेत्रे विजयाय विजेतुः यथा भूमिसेनास्त्रशस्त्राणि कारणानि भवन्ति; तथा वैद्योऽपि चिकित्सासिद्धौ भेषजरोगिपरिचारकाश्च हेतुभूताः भवन्ति। यथा मृद्दण्डसूत्रादौ स्थितेऽपि कुम्भकारेण विना कुम्भं न भवति तथैव भेषजातुरपरिचारकादौ विद्यमाने अपि वैद्येन विनारोग्यप्राप्तिः न भवत्यातुरस्य। तस्माद्योग्यवैद्येन चिकित्सा करणीया। अयोग्यवैद्येन कृता चिकित्सा आत्मानमग्नौ निक्षिप्ता इव।

भेषजं द्रव्यमित्यादिनाम्नापि परिचीयते। भेषजमिदं सुभूमौ जातम्, यथाकाले उद्धृतम्, यथासमये उत्पन्नमविकारि, अग्निजलजन्तुमलमूत्रादिभिः अनुपहतम्, रोगप्रतीकाराय समर्थम्, क्रमेण विधिवदुपपादितञ्चेति भवति। अनेकभेषजगुणयुक्तं व्याधिनाशसमर्थञ्च द्रव्यमेव भेषजपदवाच्यमेव। तदुक्तम्- "प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम्। युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम्।। दोषघ्नमग्लानिकरमविकारि विपर्यये। समीक्ष्य दत्तं काले च भेषजं पाद उच्यते।।"[3] इति।

परिचारको वैद्यस्य कार्यसहायकः। स परिचारको विपक्वकषायता, रोगमुक्तः, बलवान्, भर्तृभक्तः, उपचारज्ञता, दक्षः, पवित्रः, आशुकारी, सर्वकर्मकुशलः, अघृणी, उत्तमवंशजः, सहिष्णुः, क्रोधहीनः, जितेन्द्रियश्चेति गुणवान् भवति। यद्यपि अधुना परिचारकादृतेऽपि परिचारिकयैव चिकित्सकः चिकित्साकार्यं करोति। तदानीन्तकाले तु चिकित्साक्षेत्रे स्त्रीणां परिचारिकारूपेण भूमिका नासीत्। तेन सर्वत्रैव केवलं परिचारकस्योल्लेखोऽस्ति।

रोगी आयुष्मान्, सत्त्ववान्, साध्यो, धनवान्, विश्वासी, आस्तिकः, वैद्यवाक्यवाधितः, विनयी, यथोक्तकारी चेति गुणयुक्तो भवति। आतुरव्यक्तिः स्पष्टतया स्वस्य रोगस्य यादृशीं वर्णनां वैद्याय प्रयच्छति तदनुसारेण वैद्यौ भेषजप्रयोगं करोति। अतो वैद्याचार्यस्य चिकित्सायां यादृशी भूमिकास्ति, तादृशी भूमिकास्ति रोगिणश्चैव। प्राचीनभारतवर्षस्य चिकित्साया इत्येवं सुदृढव्यवस्था सम्प्रति नोपलभ्यते। आधुनिकचिकित्सकाः केवलमर्थाय चिकित्साकार्यं कुर्वन्ति। तेषां समीपे रोगी धनपतिः कुवेरः। यस्य धनं नास्ति, चिकित्सकः तस्मै चिकित्सां न प्रयच्छति। स चिकित्साभावेन शनैः शनैः प्राणं त्यजति। आयुर्वेदचिकित्साशास्त्रे वैद्यस्तु रोगिणं प्रतीत्येवं व्यवहारं नाकरोत्। सम्यगायुर्वेदज्ञानलब्धः शिष्यस्तु गुरूपदिष्टेन मार्गेण द्विजगुरुदरिद्रमित्रादीनां तथा नम्रतयागतानां साध्वनाथाभ्यागतानाञ्च स्वभेषजैः चिकित्सामकरोदिति।

बालकस्योत्पत्तेः पूर्वं यथा स्तन्योद्गमनं भवति तथा सृष्टेः प्रथमत आयुर्विज्ञानं स्वरसतोऽपि सम्भवति। स्रष्ट्रा स्वयम्भूः ब्रह्मा रोगोपचारेण विनष्टानां प्राणिनां कृते आयुर्वेदशास्त्रं विरचयत्। येन ते चिरां सत्तां प्राप्नुवन्ति। सत्तां लब्धवन्तोऽपि विकलाङ्गाः कार्यं कर्तुं न समर्थाः। तस्मात् प्रजासृष्टेः प्राक् स्वयम्भूः ब्रह्मायुर्वेदशास्त्रमसृजत्। तस्यायुर्वेदस्य ज्ञानं गुरुशिष्यपरम्परयाद्यापि हितसाधनाय नियोजितम्। आयुर्वेदज्ञानं प्राप्तुमिच्छुः मनुष्योऽग्रे स्वमेधया शास्त्रं विचार्य गुरुं परीक्षेत। तदनन्तरं गुरोऽपि शिष्याय परीक्ष्यायुर्ज्ञानम् अयच्छत्। अनया गुरुशिष्यपरम्परया जगति सुवैद्यः मनुष्याणां सुजीविताय रोगनिरोधाय च कार्यमतिवाहयति। अत आयुर्वेदपाठदानादाने गुरुशिष्यपरम्परेत्थं भवतीति- शास्त्रपरीक्षा ⇨ आचार्यपरीक्षा ⇨ शिष्यपरीक्षा ⇨ अध्ययनम् ⇨ अध्यापनम् ⇨ शिष्यानुशासनम्।

पुरा वैद्याचार्यो भवितुमिच्छुः पुरुषोऽग्रे कार्यगौरवं, कार्यलाघवं, शुभाशुभकर्मफलञ्च विदित्वा सम्यग्युक्तिदर्शनैः शास्त्रं परीक्षामास। यतो हि जगत्यस्मिन् वैद्याचार्याणां बहूनि शास्त्राणि सन्ति। तेषु यच्छास्त्रं विद्वद्भिः जनैः सेवितम्, आप्तजनैः पूजितम्, उत्तममध्यमाल्पबुद्धिविशिष्टेभ्यः शिष्येभ्यो लाभप्रदम्, पौनरुक्तदोषेण रोहितम्, सुरचितसूत्रभाष्यसंग्रहयुक्तम्, ग्राम्यदोषवर्जितम्,

स्वार्थविशिष्टम्, कष्टशब्दवर्जितम्, क्रमागतार्थम्, अर्थतत्त्वविनिश्चयप्रधानम्, संगतार्थम्, आशुबोधार्थकम्, लक्षणवच्चोदाहरणवच्च तदेव शास्त्रं शिष्याः चिक्युः।

अध्येतव्यं शास्त्रमित्येवं परीक्ष्य भिषग्भवितुमिच्छुः आचार्यं परीक्षामास। शास्त्राणां मर्मार्थैः अर्जितज्ञानयुक्तम्, तीक्ष्णबुद्धिविशिष्टम्, सर्वकर्मकुशलम्, पवित्रम्, जितहस्तम्, सर्वेन्द्रियोपपन्नम्, प्रकृतिस्थम्, प्रतिपत्तिज्ञम्, अविकृतविद्यम्, निरहङ्कृतम्, अनिन्दुकम्, अक्रोधिनम्, चतुरञ्चाचार्यं गुरुरूपेण शिष्यः स्वीचकार। ईदृशः ज्ञानवतः वैद्याचार्यस्य समीपमागम्यायुर्वेदचिकित्साज्ञानं प्राप्तमिच्छुः शिष्यः अग्निवद् देववद् राजवद् पितृवच्च आचचार। एवंरूपेण प्रसन्नगुरोः सम्पूर्णं शास्त्रं शिष्येभ्यो ददौ।

अथ आयुर्वेदज्ञो वैद्याचार्यो गुरुः शिष्यं परीक्ष्य तस्मै विद्यां प्रददौ। धार्मिकः, सत्यवादी, अहिंसकः, शान्तः, कल्याणकारी, दक्षः, क्षमाकारी, चतुरः, अनुकूलः, पवित्रः, अलोभी, ईर्षाहीनः, सर्वेन्द्रियवशी च शिष्यः आयुर्वेदशास्त्राध्ययनस्य योग्यो मेन्ये। तद्विपरीताः शिष्यास्तु गुरोः त्यजनीयाः। अनुपयुक्तेभ्यो विद्यार्थिभ्यो यदि वैद्याचर्यो चिकित्साविद्यां प्रयच्छेत्तर्हि हितविपरीतोऽपि भवितुमर्हति। तस्मात् पूर्वं परीक्षेत ततः प्रयच्छेदिति नियमो प्रचलति तदा। चरकसंहितायां एवंगुणोपेतानां सर्वेषां मनुष्याणाम् आयुर्वेदचिकित्साग्रहणेऽधिकारः आसीत्। वेदपाठे तु केवलं ब्राह्मणक्षत्रियवैश्यानाम् एवाधिकारः आसीत्। यतो हि उपनयनसंस्काराभावात् शूद्राणां वेदपाठे आयुर्विद्याग्रहणे च नासीदधिकारः। सुश्रुतमते शिष्याणां वाह्यिकसौन्दर्यमपि आवश्यकमासीद् आयुर्वेदाध्ययने। तन्मते ब्राह्मणक्षत्रियवैश्यानां कूले उत्पन्नाः सुशीलाः शौर्यगुणयुक्ता ऋजुमुखाक्षिनासिकाविशिष्टाः शिष्या आयुर्विद्याग्रहणेऽधिकारिण आसन्। तदुक्तं- "ब्राह्मणक्षत्रियवैश्यानाम् अन्यतममन्वयवयःशीलशौर्य- शौचाचारविनयशक्तिबलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्ताग्रमृजुवक्त्राक्षिनासं प्रसन्नचित्तवाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत्"[४] इति। एतद्विपरीतगुणयुक्तान् विद्यार्थिनो गुरुः सदा परित्यजेत्। यद्यपि सुश्रुतसंहितायां ब्राह्मणक्षत्रियवैश्यानां वर्णत्रयाणामेवायुर्वेदशिक्षणे अधिकारोऽस्तीत्येवमुक्तम्; तथापि शूद्रकुलोत्पन्नः सर्वगुणसम्पन्नो जनोऽपि अधिकारी आसीदिति सुश्रुतेन उच्चैः घोषितम्- "शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्जम् अनुपनीतम् अध्यापयेदित्येके"[५] इति।

महार्णमिवायुर्वेदशास्त्रं सम्यग्ज्ञातुं शिष्यो विधिपूर्वकम् अध्ययनं करणीयमासीत्। येन स रोगिणं यथोपदिष्टेन चिकित्सामार्गेण रोगोपशान्तोपायं प्रदातुं शक्नोति। आयुर्वेदशिक्षार्थी ऊषाकाले मध्याह्ने सायाह्ने रात्रौ च भूयो भूयोऽर्थतत्त्वं विज्ञायायुर्वेदसूत्राण्यभ्यसेत्। स प्रातः उत्थायावश्यकं शौचदिकर्म कृत्वा समे शुचौ देशे सुखोपविष्टः एकाग्रमनसा स्वकीयाध्ययनदोषं परित्यज्य परकीयाध्यायनदोषप्रमाणार्थञ्चायुर्वेदशास्त्रं पठेत्। एवंरूपेणाध्ययनेन शिक्षितो भिषगाचार्यो रोगिणो रोगोपशान्तये सुष्ठुजीवनप्राप्तये च नियोजितः आसीत्। अलसो वैद्याचार्यस्तु रोगिणे आसन्नमृत्युतुल्यः। अतो रोगी सुवैद्यात् सुचिकित्सां गृह्णीयात्।

सुश्रुतमते तु आयुर्वेदार्थिनं सर्वगुणसम्पन्नं शिष्यं वैद्याचार्यो गुरुः प्राक् स्वाहाकारं कारयेत्। स्वाहाकारिणं शिष्यमपि वैद्याचार्यो गुरुः स्वाहाकारं कारयेत्। स्वाहाकरणादनन्तरं शिष्यः शुभतिथौ प्रशस्तदिश्युक्तं पवित्रं समतलस्थानञ्च गमयेत्। तस्मिन् स्थाने चतुर्हस्तं चतुष्कोनविशिष्टं स्थण्डिलमुपस्थाप्य गोमयेनोपलिप्य दर्भैः संतीर्य्य च देवान् विप्रान् भिषजश्च पूजयेत् शिष्यः। तस्मिन् स्थण्डिले ब्रह्माणं स्थापयित्वाग्निं प्रज्वालयेत्। प्रज्वलिताग्नौ घृतमुत्सृज्य ओङ्कारपूर्वकां महाव्याहृतिमनूच्य सर्वेषां देवानामृषीणाञ्च नामोच्चारणं कृत्वा पुनः स्वाहाकारं काययेत्। ततोऽग्नौ आहुतिप्रदानात्परं गुरुः शिष्यायायुर्वेदज्ञानं प्रयच्छेत्। चरकमतेनापि भिषगाचार्यो गुरुः शुचिवस्त्रं परिधायोद्धतहस्तो भूतः शुचौ देशे अथशब्दमोङ्कारं वाग्रे प्रयुज्य महाव्याहृतीः अनूच्य कमपि गायत्रीमन्त्रम् उच्चार्य ततः शिष्येभ्य आयुर्वेदज्ञानं ददौ। शिष्योऽपि गृहितमुपदेशं भूयो भूयो बभ्यसे। अनेन विद्यार्थी निखिलं शास्त्रमधीत्य स्वयमपि सुवैद्याचार्यो बभूव।

गुरुः पीडाकाले, सायाह्ने, विद्युत्पतने, उक्लापतने, अत्यधिकवर्षणसमये, मेघाच्छन्नदिवसे, महोत्सवसमये, अद्भूतवस्तुदर्शने, अमावस्यायाम्, पूर्णिमायाम्, आत्मपीडायाञ्चेति शिष्येभ्य आयुर्वेदशास्त्रं न ददौ। तदुक्तम्- "न विद्युत्स्वनार्तवेषु नाभ्युदितासु दिक्षु

नाग्लिसंप्लवे न भूमिकम्पे न महोत्सवे नोल्कापाते न महाग्रहोपगमने न नष्टचन्द्रायां तीथौ न सन्ध्ययोर्नामुखाद् गुरोर्नावपतितं नातिमात्रं न तान्तं न विस्वरं नानवस्थितपदं नातिद्रुतं न विलम्बितं नातिक्लीवं नात्युच्चैर्नातिनीचैः स्वैरैरध्ययनमभ्यसेत्"[६] इति। सुश्रुतमतेनापि सूर्योदयास्तकाले, राष्ट्रराजयोः विपत्काले, श्मशाने, यात्राकाले, वधस्थाने, युद्धसमये, महोत्सवे, विद्युत्मेघगर्जनभूमिकम्पादीनामुत्पातकाले, अपवित्रावस्थायाञ्च विद्यार्थिभिः शिष्यैः अध्ययनं करणीयं नासीत्। विद्यादानाय विद्याग्रहणाय च गुरुशिष्ययोः चित्तस्यैकाग्रता प्रयोजनीया। एकाग्रचित्तमन्तरेण कोऽपि जनः साफल्यी भवितुं नार्हति। असाफल्यी वैद्याचार्यस्तु रोगिणो रोगोपशान्तये सम्पूर्णरूपेणासमर्थः। तस्माद्धेतोः द्वयोराचार्ययोः मतेनायुर्वेदस्याध्ययनं विघ्नवहिते काले करणीयमिति।

सम्यगायुर्वेदज्ञानलब्धः शिष्यः द्विजगुरुदरिद्रमित्रादीनां तथा नम्रतयागतानां साध्वनाथाभ्यागतानाञ्च स्वभेषजैः चिकित्सां चकार। व्याधशाकुनिकाचारभ्रष्टपापकारिणां तु चिकित्सा न कर्तव्या। शिष्यः सदा कामक्रोधमानमदहर्षत्यागपूर्वकं चिकित्साकार्यं निर्वहेत्। असत्यमालस्यञ्च परित्यज्य क्षौरक्रियां समाधाय कषायवस्त्रं परिधाय चातुराणां रोगोपशान्तये सदा सचेष्टो भवेच्छिष्यः। एतद्विपरीतानां जनानां कृते विद्या सदा निष्फला जायते। आयुर्ज्ञानवान् शिष्यो ब्रह्मचारी, श्मश्रुधारी, सत्यवादी, निरामिषभोजी च भवेत्। इहलोके यशसं परलोके स्वर्गं प्राप्तेच्छुः शिष्यः गोब्राह्मणादिभिः सह सर्वेषां प्राणिनां सेवां कुर्यात्। जीविकाय वैद्याचार्यैः रोगिणं प्रति कदापि द्रोहो न करणीयः। परवधूं परधनञ्च प्राप्तुमिच्छन् शिष्योऽसत्कार्यं न कुर्यात्। न केवलं पाठदाने शिष्याणामेव कर्तव्यकर्मबोधोऽस्ति; अपि तु आचार्यस्यास्त्येव। आचार्यो यदि शिष्येभ्यः सम्यग्रूपेण विद्योपदेशं न प्रयच्छेत्तर्हि तस्य विद्यापि निष्फला भवति। तस्मादुक्तं सुश्रुतेन- "अहं वा त्वयि सम्यग्वर्तमाने यद्यथादर्शी स्याम्, एनोभाग्भवेयमफलिविदश्च"[७] इति।

पुरा गुरुशिष्यपरम्परायामुभावपि स्वतन्त्रावास्ताम्। शिष्यः स्वेच्छया गुरुं विचार्य यथायुर्वेदविद्यां जग्राह तथा गुरुरपि स्वेच्छया शिष्यं परीक्ष्य विद्यादानं चकार। उभयोः मतानैक्ये विद्यादानग्रहणकार्यं न सम्भवति स्म। गुरुशिष्याणामेवंरूपं स्वातन्त्र्यं प्राचीनविद्याशिक्षायाः ऐतिह्यं प्रकाशति। अत्र शिष्येणैव स्वशक्त्या शास्त्रं विचार्य गुरुं परीक्ष्य चाध्ययनमारम्भं कृतम्। गुरुणापि यथासामर्थ्यं शिष्येभ्यः आयुर्ज्ञानं प्रदत्तम्। अतस्तदानीन्तकाले गुरुशिष्ययोः स्वकर्तव्यपालने या दृढतासीत् सात्यन्ता प्रशंसनीयासीत्।

## आयुर्वेदज्ञानस्य दानादानप्रक्रिया

शास्त्रपरीक्षा
⇓
आचार्यपरीक्षा
⇓
शिष्यपरीक्षा
⇓
अध्ययनम्
⇓
समावर्तनम्
⇓
अध्यापनम्
⇓
शिष्यानुशासनम्

**तथ्यसूत्रम्**

१. सुश्रुतसंहिता, सूत्रस्थानम्- १
२. तदेव- ३४
३. तत्रैव
४. सुश्रुतसंहिता, सूत्रस्थानम्- २
५. तदेव।
६. चरकसंहिता, विमानस्थानम्- ८
७. सुश्रुतसंहिता, सूत्रस्थानम्- २

**ग्रन्थपञ्जी**


काश्यप, *काश्यपसंहिता,* हेमराजशर्मा (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २००८.

गुप्त, शङ्करप्रसाद, *नवरूपे कायचिकित्सा,* कोलकाता : श्रीमती वीना गुप्त प्रकाशन, १९८४.

गुप्ता, हरीशचन्द्र, *व्यवहारायुर्वेद या विधि आयुर्वेद,* वाराणसी : चौखाम्बा संस्कृत भारती, २०११.

गौड, बनवारीलाल, *संस्कृतायुर्वेदसुधा,* वाराणसी : चौखाम्बा ओरियण्टालिया, २०१३.

चरक, *चरकसंहिता,* काशीनाथ शास्त्री (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २०१३.

चरक, *चरकसंहिता,* गङ्गासहायपाण्डेय (सम्पा.), वाराणसी : चौखाम्बा प्रकाशन, २०१३.

चरक, *चरकसंहिता,* गङ्गासहायपाण्डेय (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २०१२.

चरक, *चरकसंहिता,* श्रीगङ्गाधरकविराज (सम्पा.), दिल्ली : चौखाम्बा ओरियण्टालिया, २०११.

चौधरी, प्रवीणकुमार, *आयुर्वेद बृहत्त्रयी मञ्जुषा,* वाराणसी : चौखाम्बा सुरभारती प्रकाशन, २०१८.

त्रिपाठी, भागीरथप्रसाद, *धात्वर्थविज्ञानम्,* वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, २०१६.

पारीक, गोविन्द, *आयुर्वेद संग्रह,* वाराणसी : चौखाम्बा सुरभारती प्रकाशन, २०१७.

भण्डारी, चन्द्रराज, *वनौषधि चन्द्रोदय,* वाराणसी : चौखाम्बा संस्कृत संस्थान, २००४.

भावमिश्र, *गुणरत्नमाला,* कैलाशपतिपाण्डेय, (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, १९९८.

भेल, *भेलसंहिता,* श्रीगिरिजादयालुशुक्ल, (सम्पा.), वाराणसी : चौखाम्बा भारती अकादमी, २००६.

मादव, *मादवनिदानम्,* विजयरक्षित (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २००६.

यादव, जयराम, *आयुर्वेदीय शरीर क्रिया विज्ञान,* वाराणसी : चौखाम्बा ओरियण्टालिया, २०१०.

राइ, शक्तिराज, *आयुर्वेद जिज्ञासा,* वाराणसी : चौखाम्बा सुरभारती प्रकाशन, २०१६.

राय, प्रभाकर, *भैषज्य कल्पना विज्ञान,* दिल्ली : भारतीय चिकित्सा केन्द्रिय परिषद्, २००१.

राय, विजयकुमार, *पञ्चकर्म चिकित्सा विज्ञान,* वाराणसी : चौखाम्बा संस्कृत संस्थान, २००३.

वन्द्योपाध्याय, उदयचन्द्र, *वेदसंकलन,* कोलकाता : संस्कृत वुक डिपो, २००४.

वन्द्योपाध्याय, धीरेन्द्रनाथ, *संस्कृतसाहित्येर इतिहास,* कोलकाता : पश्चिमबङ्ग राज्यपुस्तक पर्षत्, २०१३.

वाग्भट, *अष्टाङ्गहृदयम्,* बनवारीलालगौड (सम्पा.), वाराणसी : चौखाम्बा ओरियण्टालिया, २००८.

वाग्भट, *रसरन्तसमुच्चयः,* इन्द्रदेव त्रिपाठी (सम्पा.), वाराणसी : चौखाम्बा संस्कृत भारती, २०११.

शर्मा, अजयकुमार, अगदतन्त्र-विषचिकित्सा, वाराणसी : चौखाम्बा सुरभारती प्रकाशन, २०१४.

शर्मा, नितिन, *अगद तन्त्र,* दिल्ली : भारतीय चिकित्सा केन्द्रिय परिषद्, २०११.

शर्मा, प्रियव्रत, *आयुर्वेद का वैज्ञानिक इतिहास,* वाराणसी : चौखाम्बा ओरियण्टालिया, २०१४.
शर्मा, प्रियव्रत, *द्रव्यगुणसूत्रम्,* वाराणसी : चौखाम्बा संस्कृत संस्थान, २०१०.
शर्मा, रघुवीरशरण, *धन्वन्तरिपरिचय,* वाराणसी : चौखाम्बा ओरियण्टालिया, २०१४.
शार्ङ्गधर, *शार्ङ्गधरसंहिता,* परशुरामशास्त्री (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २००७.
शुक्ल, सुधाकरवर्द्धन, *आयुर्वेद दर्शन,* वाराणसी : चौखाम्बा औरियण्टालिया, २००२.
*शुक्लयजुर्वेदसंहिता,* रामकृष्ण शास्त्री (सम्पा.), वाराणसी : चौखाम्बा विद्याभवन, २०१५.
श्रीवास्तव, शैलजा, *आयुर्वेदीय पदार्थ विज्ञान,* वाराणसी : चौखाम्बा ओरियण्टालिया, २०१०.
साक्सेना, ओमप्रकाश, *आयुर्वेद भास्कर,* वाराणसी : चौखाम्बा संस्कृत भारती, २०१४.
*सामवेदसंहिता,* सत्यव्रत सामश्रमी भट्टाचार्य (सम्पा.), कोलकाता: मुनसिराम मनोहरिलाल, १८७१.
सिंह, महेन्द्र, *आयुर्वेदीय शरीर रचना विज्ञान,* वाराणसी : चौखाम्बा ओरियण्टालिया, २०११.
सुश्रुत, *सुश्रुतसंहिता,* अम्बिकादत्त शास्त्री (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २०१४.
सुश्रुत, *सुश्रुतसंहिता,* यादवत्रिक्रम (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २००८.
सुश्रुत, *सुश्रुतसंहिता,* यादवशर्मा (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २०१४.
सुश्रुत, *सुश्रुतसंहिता,* श्रीगयदासाचार्य (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २०१४.
सुश्रुत, *सुश्रुतसंहिता,* श्रीहाराणचन्द्र चक्रवर्त्ती (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २०००.
सोढल, *गदनिग्रहः,* गङ्गासहाय पाण्डेय, (सम्पा.), वाराणसी : चौखाम्बा संस्कृत संस्थान, २००५.

# नास्तिकदर्शनसिद्धान्तेषु नञर्थविचारः

Dr. Sankar Mondal
Assistant Professor, Department of Sanskrit
A.B.N Seal College, Cooch Behar-736101
Email: sankarmondal109@gmail.com

**शोधसारः**– संस्कृतवाङ्मये चतुर्विधेषु पदेषु निपातो भवति अन्यतमः। निपातेषु आन्यतम्यमयते नञ्। तस्य च नञः पर्युदासप्रसज्यात्मकौ अर्थौ प्रसिद्धौ। पर्युदासे पुनः सादृश्यादयः षडर्थाः प्रसिद्धाः। भारतीयदर्शनेषु ये वेदप्रामाण्ये न विश्वसन्ति ते हि नास्तिकाः। नास्तिकदर्शनानि त्रीणि। तेषु दर्शनेषु बहवः सिद्धान्ता वर्तन्ते ये नञर्थेन घटिताः सन्ति। तेषु सिद्धान्तेषु नञः कीदृगर्थः अभिप्रेतः, तस्यान्यार्थग्रहणे का हानिः को वा लाभः इत्येतत्सर्वं विचारयिष्यतेऽत्र।

**कुञ्चिशब्दाः**– नञ्, प्रसज्यः, पर्युदासः, अभावः

शास्त्रं भवति शब्दात्मकम्। समग्रेऽस्मिन् संस्कृतवाङ्मये चतुर्विधं पदं राजते – नाम आख्यातमुपसर्गो निपातश्चेति। तत्र "उच्चावचेष्वर्थेषु निपतन्ति"[1] इति निपातलक्षणं लक्षितं यास्काचार्येण। केषाञ्चिन्नये निपाता अर्थस्य द्योतका भवन्ति, अपरेषां नये तेऽर्थस्य वाचका भवन्ति, अन्ये तु निपाताः सम्भूयार्थद्योतका इति प्रतिपादयन्ति। निपातेष्वान्यतम्यं तथा प्राधान्यं भजते "नञ्" इति। नञर्थो ह्यभावः। स चाभावो द्विविधः संसर्गाभावोऽन्योन्याभावश्चेति। संसर्गाभावः पुनस्त्रिविधः प्रागभावः प्रध्वंसाभावः अत्यन्ताभावश्चेति। नञर्थः प्रतिषेधः प्राधान्येन द्विविधः पर्युदासः प्रसज्यश्चेति। तत्र पर्युदासो भवति सदृग्ग्राही, प्रसज्यस्तु निषेधकृत्। पर्युदासे विधेः प्राधान्यं, प्रसज्ये तु निषेधस्यैव प्राधान्यम्। अत एव कथितं-

प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्॥ इति।

एवं च प्रसज्यपर्युदासयोरपि अत्यन्ताभावान्योन्याभावयोरेव पर्यवसानम्। अन्यत्रापि नञः षडर्थाः उक्ताः। तद्धि-

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः"[2]॥ इति।

नास्तिका हि वेदनिन्दकाः। अर्थाद् ये दार्शनिका वेदस्य प्रामाण्ये न विश्वसन्ति ते हि नास्तिकदार्शनिकाः। भारतीयसम्प्रदाये नास्तिकदर्शनानि त्रीणि- चार्वाकदर्शनं, बौद्धदर्शनम्, आर्हतदर्शनं चेति। तत्र त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः, यावज्जीवेत्सुखं जीवेत् ऋणं कृत्वा घृतं पिवेत् इत्यादिचारुवादिनो हि चार्वाकाः इत्युच्यन्ते। चारु वाक् चार्वाक्। तेषां यद्दर्शनं तद्धि चार्वाकदर्शनम्। चार्वाकदर्शनस्य प्रसिद्धाः ग्रन्थाः नोपलभ्यन्ते। *बार्हस्पत्यसूत्रं* हि तेषाम् आकरग्रन्थः इति लोकप्रसिद्धिः। वस्तुतः विविधग्रन्थेषु पूर्वपक्षरूपेण प्राप्तं चार्वाकमतं संगृह्य *सर्वदर्शनसंग्रहस्य* चार्वाकदर्शने उपस्थापितम्। भूतचैतन्यवादः, प्रत्यक्षैकप्रमाणवादः, आकस्मिकतावादः च इत्यादयः तेषां प्रमुखाः सिद्धान्ताः।

नास्तिकदर्शनेषु सर्वापेक्षया प्रसिद्धं सुग्रथितं च दर्शनं हि बौद्धदर्शनम्। भगवतः बुद्धस्य उपदेशान् स्वस्वमत्यनुसारम् अवधार्य तस्य शिष्याः तेषां यथा व्याख्यानं कृतवन्तः तेन बौद्धदर्शनस्य चत्वारः सम्प्रदायाः जाताः। तथा हि- शून्यवादिनो माध्यमिकाः नागार्जुनशान्तरक्षितबुद्धपालितप्रमुखाः। विज्ञानवादिनो योगाचाराः मैत्रेयनाथदिङ्नागधर्मकीर्तिप्रमुखाः। बाह्यार्थानुमेयवादिनो

[1] *निरुक्तम्, प्रथमाध्यायः*। सम्पा. तारकनाथ अधिकारी, २०१६, पृ.७५
[2] *वैयाकरणभूषणसारः*। सम्पा. नन्दिकिशोर शास्त्री, २०१२, पृ.४३८

सौत्रान्तिकाः कुमारलातयशोमित्रश्रीनाथप्रमुखाः। बाह्यार्थप्रत्यक्षवादिनो वैभाषिकाः कात्यायनी-वसुबन्धुप्रमुखाः।

अपरो नास्तिकदर्शनसम्प्रदायो हि आर्हतदर्शनम्। अर्हत् नाम जिनः, तस्य दर्शनम् आर्हतदर्शनं जैनदर्शनमिति नाम्ना अपि प्रसिद्धम्। जैनसम्प्रदाये चतुर्विंशतिः तीर्थङ्कराः सन्ति। तत्र आदिमो हि ऋषभदेवः अन्तिमश्च महावीरः। जैनदार्शनिकाः पुनः श्वेताम्बरदिगम्बरभेदेन द्वैविध्यं गताः। जैनानामादिमग्रन्थाः प्रायः प्राकृतभाषायामेव लिखिताः। आचार्येण उमास्वातिना विरचितं तत्त्वार्थसूत्रं हि तेषां प्रथमः संस्कृतग्रन्थः यत्र जैनानां सर्वेषामेव सिद्धान्तानामेव आलोचना वर्तते। पुनश्च तेनैव *तत्त्वार्थाधिगमसूत्र*मपि लिखितम्। एतद्विहाय सिद्धसेनस्य *न्यायावतारः*, हेमचन्द्रस्य *प्रमाणमीमांसा*, प्रभाचन्द्रसूरिणः *प्रमेयकमलमार्तण्डः* च इत्यादयः प्रमुखाः ग्रन्थाः वर्तन्ते। स्याद्वादः, सप्तभङ्गीनयः, अनेकान्तवादः, त्रिरत्नं च इत्यादयः तेषां प्रमुखाः सिद्धान्ताः।

एतेषु नास्तिकदर्शनेषु बहुत्र नञर्थेन घटिताः सिद्धान्ताः दृश्यन्ते। तेषां मध्ये केषाञ्चन सिद्धान्तानाम् अधस्तात् आलोचना विधास्यते। नञः पर्युदास-प्रसज्यनञोः मध्ये कः अर्थः अत्र कथं च अभिप्रेतः, तत्र अन्यार्थग्रहणे का हानिः को वा लाभः इत्येतत्सर्वम् आलोचयिष्यतेऽत्र।

**चार्वाकदर्शने नञर्थघटितसिद्धान्ताः**

➢ **अकस्माद् भवति**

कुत इयं विसृष्टिः इत्ययं प्रश्नो हि सर्वेषामेव दार्शनिकानाम्। तत्र केचन ब्रह्मकारणवादिनः, केचन प्रकृतिकारणवादिनः, अन्ये शून्यवादिनः, अपरे परमाणुवादिनः इति बहुविधाः सन्ति। किन्तु तेषां सर्वेषामेव सिद्धान्तानां स्थापनाय कार्यकारणवादः अङ्गीकार्यः अधिकरणसिद्धान्तत्वेन। प्रत्यक्षैकप्रमाणवादिनो हि चार्वाकाः कार्यकारणसिद्धान्तं न अभ्युपगच्छन्ति, तत्र अन्वयव्यतिरेकव्यभिचारदोषदर्शनात्। ननु तर्हि कुतः कार्योत्पत्तिः इति चेदुच्यते – 'अकस्माद् भवति' इति। इदमेव मतं पूर्वपक्षरूपेण प्रस्तुतं *न्यायसूत्र*कृता – "अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्"[1] इति।

अकस्मात् इत्यत्र नञर्थः कः, तस्य कुत्र अन्वय इति विचार्यः। न कस्मात् अकस्मात्। अत एव कार्यं न कस्मात् भवति। अत्र किंशब्दः कारणपर्यायः, तस्य पञ्चम्येकवचने कस्माद् इति। तन्नाम कारणात्। अत्र नञः प्रसज्यरूपार्थेऽङ्गीकृते अर्थः स्यात् – **कारणाद् न भवति** इति। नञः पर्युदासरूपार्थेऽङ्गीकृते अर्थः भवति – **कारणव्यतिरिक्ताद् भवति**। प्रसज्यपक्षे यः अर्थः तस्य पुनः अर्थद्वयं –

- कारणस्य निषेधः
- उत्पत्तेः निषेधः

पर्युदासपक्षे यः अर्थः, तस्य पुनः अर्थत्रयं सम्भाव्यते –

- स्वस्माद् भवति
- अलीकाद् भवति
- स्वभावाद् भवति

अत्र सर्वेषु अपि अर्थेषु दोषः सञ्जायते इति *न्यायकुसुमाञ्जलि*काराणामुदयनाचार्याणां मतम्। अत एव तेन लिखितं –

"हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः"[2]।। इति।

अत एव कार्यं कारणाद् न भवति इति न नियतावधिककार्यदर्शनात्। तथा हि कार्यं हि सापेक्षं कादाचित्कं वा। अर्थाद् कार्यस्य स्थितिर्हि कालनियता। कार्यं सर्वदा न तिष्ठति। एकस्मिन् क्षणे तस्य उत्पत्तिः, किञ्चित्कालपर्यन्तं स्थितिः, पुनश्च एकस्मिन् क्षणे ध्वंसः

[1] *न्या.सू.*- ४/१/२२।
[2] *न्या.कु.*– १/५।

भवति। कार्यस्य इत्थं कादाचित्कत्वं नियतावधिकत्वं वा कारणसामर्थ्यादेव भवति। पुनश्च उत्पत्तिनिषेधोऽपि न, नियतावधिककार्यदर्शनात्। तथा हि अनुत्पन्नं कार्यं नित्यं, तद्धि चिराय तिष्ठति। किन्तु दृश्यते हि कार्यं नियतावधिकम्, अत एव उत्पन्नमेव।

यद्युच्यते स्वस्माद् भवति, अलीकाद्भवति अथवा स्वभावाद्भवति, तर्हि कार्यस्य कदापि नाशः न स्यात्। तथाहि कारणनाशादेव कार्यनाशः भवति। किन्तु स्वस्य, अलीकस्य तथा स्वभावस्य कथं नाशः स्यात्? अत एव अत्रापि कार्यस्य नियतावधिकत्वव्याकोपः स्यात् इति 'अकस्मात् कार्योत्पत्तिर्भवति' इति मतम् असङ्गतमेव इति उदयनाचार्यप्रमुखानां मतम्।

किन्तु चार्वाकाणां पक्षतः अत्र इदं वक्तुं शक्यते यत्तैः कारणस्य सर्वथा निषेधः न क्रियते। वस्तुतः जगत्सृष्टिविषये ते कथयन्ति यत् – पृथिवी जलं तेजः वायुः चेति चत्वारि भूतानि। एतेषां परमाणूनां संयोगादिक्रमेण जगत उत्पत्तिः भवति। वैशेषिकाणाम् अपि इदमेव मतम्। किन्तु ते तत्र निमित्तकारणरूपेण ईश्वरं तथा अदृष्टं स्वीकुर्वन्ति। चार्वाकास्तु ईश्वरादृष्टयोः प्रत्यक्षप्रमाणागोचरत्वात् कारणकोटौ तेषाम् अन्तर्भावं नाङ्गीकुर्वन्ति। अत एव 'अकस्मात्' इत्यस्य अर्थः 'न अदृष्टकारणात्' इति। अत्र किंशब्दः अनिर्ज्ञातस्वरूपपरः। अनिर्ज्ञातस्वरूपः च प्रत्यक्षप्रमागोचरः। तादृशात् कारणात् जगत उत्पत्तिः तैः निषिध्यते।

ननु चेतनस्य तथा अदृष्टादेः अभावात् कथंकारं परमाणुषु क्रिया भवति संयोगार्थमिति चेदुच्यते तैः – 'स्वभावात्' इति। अत एवोक्तं *सर्वदर्शनसंग्रहे*चार्वाकदर्शनविवरणे – "ननु अदृष्टानिष्टौ जगद्वैचित्र्यम् आकस्मिकं स्यादिति चेत् न तद् भद्रम्। स्वभावादेव तदुपपत्तेः। तदुक्तं-

अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिः"[1]।। इति।

स्वभावः पदार्थानां प्रतिनियता शक्तिः। स्वभावादेव जगद्वैचित्र्यस्य उत्पत्तिः, स्थितिः लयश्चेति। स्वभावो जगतः कारणम्। स्वाभाविकं जगदिदम्। ननु कथंकारं स्वभावस्य सृष्टिः इति चेदुच्यते स्वभाववादिभिः – यतो हि कार्यकारणसम्बन्धः सव्यभिचारी, तस्मात् सर्वेषामेव कार्याणां कारणमस्ति इति न। कारणम् अनपेक्ष्यापि कार्यस्य उत्पत्तिः दृश्यते। अग्नेः औष्ण्यस्य, जलीयशैत्यस्य, कण्टकतैक्ष्ण्यस्य विसृष्टिः कुतः? कस्मादपि न। अत एव स्वभाव एव जगद्वैचित्र्यस्य नियामकः, किन्तु स्वभावस्य कोऽपि नियामकः नास्ति।

*तत्त्वसंग्रह*कृता शान्तरक्षितेन स्वभाववादिनोऽपि द्विधा विभक्ताः। तत्र स्वभावो हि जगत्कारणम् इति वदताम् एकः पक्षः। तेषां मते यद्यपि स्वभावः अन्यकार्यकारणं भवति, तथापि स्वभावो न कारणजन्यः – "स्वतो भावे ह्यहेतुत्वं ..."[2] इति। अपरपक्षस्तु स्वभावमपि कारणं नेति वर्णयन्ति – "ते हि नाहुः स्वमपि कारणं"[3] इति। अस्य भावस्तु परिष्कृतः टीकायां – "त एवमाहुर्न स्वतः नापि परतः भावानां जन्म, किं तर्हि? सर्वहेतुनिराशंसं – स्वपरकारणनिरपेक्षम् इत्यर्थः। ननु ये स्वत एव भावा भवन्ति इति वर्णयन्ति तेभ्यः एषां को भेद इत्याहुः – ते हि इत्यादि। ते स्वभाववादिनः, स्वमिति। स्वरूपम्। अपिशब्दात् पररूपमपि। पूर्वकास्तु स्वभावं कारणमिच्छन्ति। एते तमपि नेच्छन्ति इति भेदः"[4] इति।

अत एव स्वभाववादिनाम् अयं द्वितीयः पक्षः यदृच्छावादः आकस्मिकतावादः इत्यपि वक्तुं शक्यते। एतेषां मते कारणव्यतिरिक्तमेव कार्यस्य उत्पत्तिः भवति –

राजीवकेसरादीनां वैचित्र्यं कः करोति हि।
मयूरचन्द्रकादिर्वा विचित्रः केन निर्मितः।।[5] इति।

---

[1] *स.द.सं.*। सम्पा. वासुदेवशास्त्री, प्राच्यविद्या संशोधन, निर्णयसागर प्रेस, १९२४, पृ.१३।

[2] *तत्त्वसंग्रहः*। कारिका – १०७।

[3] *तत्त्वसंग्रहः*। कारिका- ११०।

[4] शान्तरक्षितः। *तत्त्वसंग्रहः*। सम्पा. एम्बर कृष्णमाचार्यसम्पादितः, वरोदा सेन्ट्राल लाइब्रेरी, १९२६, पृ.६२।

[5] *तत्त्वसंग्रहः*। कारिका – १११।

आचार्येण मधुसूदनसरस्वतिनापि *गीताभाष्ये* स्वभाववादमेव समर्थयता निगदितं – "अदृष्टाङ्गीकारेऽपि क्वचिद् गत्वा स्वभावे पर्यवसानात् स्वाभाविकमेव जगद्वैचित्र्यमस्तु दृष्टे सम्भवति अदृष्टकल्पनानवकाशात्। अतः काम एव प्राणिनां कारणम् नान्यत् दृष्टेश्वरादि इत्याहुरिति लोकायतिकदृष्टिरियम्" (*श्रीमद्भगवद्गीता* १६/८) इति।

**बौद्धदर्शने नञर्थघटितसिद्धान्ताः**

- **असपक्षः**

श्रीमता धर्मकीर्तिना प्रणीते *न्यायबिन्दु*ग्रन्थे 'अनुमानं द्विधा'[1] इत्यादिसूत्रेणानुमानस्य द्वैविध्यं प्रतिपादितं – स्वार्थानुमानं परार्थानुमानं चेति। तत्र स्वार्थानुमानं ज्ञानात्मकं, परार्थानुमानं शब्दात्मकम्। तत्र स्वार्थानुमानस्य किं लक्षणमिति जिज्ञासायामुक्तं तेन – "तत्र स्वार्थं त्रिरूपाल्लिङ्गाद्यदनुमेये ज्ञानं तदनुमानम्"[2] इति। त्रिरूपात् लिङ्गात् इत्युक्तं तेन। अतः हेतोः रूपत्रयं स्यात्। कानि च तानि इत्याह सूत्रत्रयेण-

लिङ्गस्य अनुमेये सत्त्वमेव निश्चितम् (*न्यायबिन्दुः* २/५) = पक्षसत्त्वम्

सपक्षे एव सत्त्वं निश्चितम्(*न्यायबिन्दुः* २/६) = सपक्षसत्त्वम्

असपक्षे च असत्त्वमेव निश्चितम्(*न्यायबिन्दुः* २/७) = विपक्षासत्त्वम्

अत्र उक्तम् असपक्षे असत्त्वं हेतोः रूपम्। असपक्षो नाम न सपक्षः। तथा च सूत्रं – न सपक्षोऽसपक्षः, "ततोऽन्यस्तद्विरुद्धस्तदभावश्चेति"[3] इति। आचार्येण धर्मोत्तरेण अस्य टीकायामुक्तं – सपक्षो यो न भवति सोऽसपक्षः इति। अत्र नञः क्रियया सहान्वयः प्रदर्शितः। अतोऽत्र प्रसज्यप्रतिषेधः। 'प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्' इति। समासश्च 'असूर्यम्पश्या' इत्यादिवत्। प्रसज्यप्रतिषेधश्च निषेधप्रधानः। अतः सपक्षाभाव एव गम्यते। किन्तु अत्र असपक्षपदेन सपक्षादन्यः सपक्षविरुद्ध इत्यनयोः अपि ग्रहणं भवति। अत उक्तं – ततोऽन्यः, तद्विरुद्धः, तदभावश्चेति असपक्षः। असपक्षपदस्य सपक्षाभावरूपव्याख्यानं तु प्रसज्यनञा एव भवति। किन्तु सपक्षान्य-सपक्षविरुद्धरूपव्याख्यानार्थं पर्युदासाश्रयणं कर्तव्यम्। यद्यपि तत्रापि अभावरूपोऽर्थोऽस्ति तथापि सोऽत्र गौणः, तद्विशिष्टः अन्यविरुद्धरूपः विधिरूपः एवार्थः प्रधानम्। पर्युदासस्यैव च विधिप्राधान्यम्।

अत एव धर्मोत्तरेण तदीय*न्यायबिन्दु*टीकायाम् असपक्षपदस्य द्विविधा व्युत्पत्तिः प्रदर्शिता –" न सपक्षः असपक्षः"[4] इति। "सपक्षो यो न भवति सोऽसपक्षः"[5] इति। पुनः उक्तं तेन – "कश्च सपक्षो न भवति। ततः सपक्षादन्यः। तेन च विरुद्धः। तस्य च सपक्षस्य अभावः"[6] इति। अत्रायं भावः यत् असपक्षशब्दार्थः एकेन शब्देन उच्यते चेत् सपक्षाभाव इत्येवं कथ्यते। तस्यार्थो भवति साध्यधर्मवत्त्वाभाव इति। किन्तु सूक्ष्मेक्षिकया दृश्यते चेत् असपक्षपदस्य भेदत्रयं वर्तते।

**प्रथमतः** – सपक्षस्य अभावमात्रम्। इदं क्षणिकं सत्त्वात् – अत्र यन्न क्षणिकं न तत् सत्, यथा शशविषाणम्। अत्र शशविषाणम् असपक्षः, यतः तत् क्षणिकत्वधर्मविशिष्टक्षणिकवस्तुनः अभावमात्रं, तस्य स्वकीयं किमपि रूपं नास्ति। तुच्छं हि तत्।

**द्वितीयतः** – तदन्यः = सपक्षान्यः।

यथा – इयं पृथिवी गन्धवत्त्वात्। अत्र यन्न पार्थिवं न तद् गन्धवत्, यथा जलम्। अत्र जलं हि असपक्षः, गन्धधर्मविशिष्टसपक्षभिन्नं वस्तु, न तु पूर्ववदभावमात्रम्।

**तृतीयतः** – तद्विरुद्धः = सपक्षविरुद्धः।

यथा – पर्वतो वह्निमान् धूमात्। अत्र यन्न वह्निमत् न तद् धूमवत्, यथा जलह्रदः। अत्र जलह्रदः असपक्षः, यस्तु

---

[1] *न्या.बि* - २/१।

[2] *तदेव* - २/३।

[3] *तदेव* - २/१०।

[4] धर्मोत्तरः। *न्यायबिन्दुटीका* सम्पा. श्रीनिवास शास्त्री, मेरठ साहित्य भाण्डार, १९७५, पृ.११४।

[5] तत्रैव

[6] तत्रैव

अग्निधर्मविशिष्टसपक्षविरुद्धः। अत्र तदन्ये तथा तद्विरुद्धे च सपक्षान्यत्वस्य सपक्षविरोधस्य च यथा प्रतीतिः भवति तथैव अर्थतः सपक्षाभावस्यापि प्रतीतिर्भवति, न तु साक्षात्। अत एव असपक्षपदे त्रिरूप एवार्थः स्वीकर्तव्यः। तदर्थं च नञः द्विविधः (पर्युदासप्रसज्यरूपः) अर्थः अत्र ग्राह्यः।

➢ **अतत्स्वभावस्यातदुत्पत्तेश्च तत्राप्रतिबद्धस्वभावत्वात्**

अविनाभावस्य दुर्बोधतया नानुमानाद्यवकाश इत्यादिकथनैः चार्वाकैः अनुमानस्य प्रामाण्यं दूरे प्रक्षिप्तम्। किन्तु तत्प्रतिपक्षैः बौद्धैः तादात्म्यतदुत्पत्तिभ्याम् अविनाभावस्य सुज्ञानत्वं प्रतिपादितम्। तथा हि उक्तं माधवाचार्येण – "यदभ्यधायि अविनाभावो दुर्बोध इति तदसाधीयः, तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्" [1] इति। तथाहि सूत्रितं धर्मकीर्तिना – "वस्तुतस्तादात्म्यात्साध्यादर्थादुत्पत्तेश्च"[2] इति। तादात्म्यं नाम तत्स्वभावत्वम्, तस्माद्धेतोः। यतः साध्यस्वभावं साधनं, तस्मादत्र स्वभावप्रतिबद्धम्। न केवलं तादात्म्यादपि तु साध्याद् अर्थाद् उत्पत्तेः लिङ्गस्य। "तदुत्पत्तेश्च स्वभावप्रतिबन्धो लिङ्गस्य"।[3] ननु कस्मादेतस्मात् निमत्तद्वयादेव स्वभावप्रतिबन्धो लिङ्गस्य, नान्यस्मात – इत्याशंकायाम् आह धर्मकीर्तिः - "अतत्स्वभावस्य अतदुत्पत्तेश्च तत्र अप्रतिबद्धस्वभावत्वात्"[4] इति।

- अतत्स्वभावः = स स्वभावोऽस्य सोऽयं तत्स्वभावः, न तत्स्वभावः, अतत्स्वभावः = तत्स्वभावभिन्नः (पर्युदासपक्षे)। अत्र तत् = साध्यम्

∴ अतत्स्वभावो नाम साध्यस्वभावभिन्नः।

- अतदुत्पत्तिः = तस्मादुत्पत्तिः अस्य सोऽयं तदुत्पत्तिः, न तदुत्पत्तिः अतदुत्पत्तिः = तदुत्पत्तिभिन्नः।

∴ अतदुत्पत्तिः नाम साध्योत्पन्नभिन्नः

अत्र उभयत्रापि पर्युदासः।

तथा च असत्स्वभावस्य अतदुत्पत्तेश्च तत्र नाम अतत्स्वभावे अनुत्पादके च 'अप्रतिबद्धस्वभावत्वम्' ।

प्रतिबद्धस्वभावः = व्याप्यः, प्रतिबद्धस्वभावत्वम् = व्याप्यत्वम् = व्याप्तिः, प्रतिबद्धस्वभावत्वस्य अभावः अप्रतिबद्धस्वभावत्वम् = व्याप्त्यभावः।

अथवा, प्रतिबद्धस्वभावो न भवति इति अप्रतिबद्धस्वभावः नाम अव्याप्यः, तस्य भावः अप्रतिबद्धस्वभावत्वम् नाम अव्याप्यत्वं नाम व्याप्त्यभावः, तस्मादिति।

∴ अतत्स्वभावस्य (तत्स्वभावभिन्नस्य) अतदुत्पत्तेः (तदुत्पत्तिभिन्नस्य), तत्र अतत्स्वभावे (अनुत्पादके) अप्रतिबद्धस्वभावत्वात् व्याप्त्यभावात् तादात्म्यतदुत्पत्तिभ्यामेव स्वभावप्रतिबन्धः लिङ्गस्य नान्यस्मात्।

ननु दृश्यते एवमपि स्थलं यत्र तादात्म्यतदुत्पत्त्यभावेऽपि स्वभावप्रतिबन्धः अस्ति। यथा, चन्द्रोदयदर्शनात् समुद्रवृद्ध्यनुमाने, तथा शरदि निर्मलजलदर्शनात् अगस्त्यनक्षत्रोदयानुमाने चन्द्रोदयसमुद्रवृद्ध्योः तथा शरत्कालीननिर्मलजल-अगस्त्यनक्षत्रोदययोः न तादात्म्यं न वा तदुत्पत्तिः। अत एव तत्र भूयः साहचर्यदर्शनादेव स्वभावप्रतिबन्धः (व्याप्तिः) अङ्गीकार्यः इति चेन्न, तत्रापि तदुत्पत्तिस्वभावः साक्षात् परम्परया वा वर्तते एव। तथा हि – शरत्कालीनजलनैर्मल्यम् अगस्त्यनक्षत्रोदयस्य कार्यमेव भवति। अत एव तत्र कार्यलिङ्गकमनुमानं भवति। पुनः, यद्यपि समुद्रविकासः चन्द्रोदयस्य साक्षात् कार्यं न भवति तथापि तयोः

[1] *स.द.सं* प्रागेव, पृ.१६।

[2] *न्या.वि* - २/२३।

[3] प्रतिबन्धः = अविनाभावः = व्याप्तिः।

प्रतिबद्धः = व्याप्तियुक्तः = व्याप्तः।

[4] *न्या.वि* – २/२४।

(चन्द्रोदयसमुद्रविकासयोः) एकसामग्र्यधीनत्वात्[1] अत्रापि परम्परया तदुत्पत्तिः वर्तते एव। अत एव तादात्म्यतदुत्पत्ति-अन्यतरः एव स्वभावप्रतिबन्धनियामकः। तद्भिन्नः कोऽपि न इति बौद्धाभिमतम्। अत उक्तं –

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्।। इति।

➢ **अपोहवादः**

"यत् सत् तत् क्षणितं यथा जलधरः सन्तश्च भावा अमी"[2] इत्याद्यनुमानेन बौद्धाः सर्वेषामेव भावानां क्षणिकत्वम् अभ्युपगच्छन्ति। तत्र सत्त्वं नाम अर्थक्रियाकारित्वमिति बौद्धैः पारिभाषितम्। ननु सत्त्वं सत्तासामान्ययोगित्वमिति चेन्न, विविधदूषणग्रस्तत्वात् सामान्यमप्रामाणिकम् इति बौद्धैः प्रतिपादितम्। ननु तर्हि अनुवृत्तप्रत्ययः किमालम्बन इति चेत् "अन्यापोहालम्बन एव सन्तोष्टव्यम्"[3] इति। अपि च, कस्यापि शब्दस्य अर्थः कः इति जिज्ञासायां कश्चित् जातिः, कश्चित् व्यक्तिः, कश्चित् जातिविशिष्टव्यक्तिः, कश्चिद् उपाधिः इत्याह। बौद्धास्तु वदन्ति – अपोह एव शब्दार्थः। अपोहो नाम अतद्व्यावृत्तिः। न तत् अतद् = तद्भिन्नः (पर्युदासः)। तस्य व्यावृत्तिः = निषेधः।

∴ शब्दो हि निषेधवाचकः। तथा हि गोशब्दे उच्चारिते गोशब्दः गोभिन्नस्य व्यावृत्तिमेव बोधयति।

"अतद्व्यावृत्तिरपोहः पदार्थ इति क्षणभङ्गवादिनः, तन्मते स्थिरस्य सामान्यस्य अभावात् अपोहमात्रेणानुगतव्यवहार इति तत्रैव शक्तिः"[4]।

किन्तु अयमपोहवादः विरुद्धैः बहुधा खण्डितः। नञर्थद्वैविध्यमुखेन खण्डनमत्र प्रस्तूयते। तथा हि – अपोहलक्षणं सामान्यं वाच्यत्वेनाभिधीयमानं पर्युदासलक्षणं (विधिरूपं) प्रसज्यलक्षणं (निषेधरूपं) वा अभिधीयते? पर्युदासपक्षे सिद्धसाधनता। तथा हि यदेव हि अगोनिवृत्तिलक्षणं सामान्यं गोशब्देन उच्यते भवता तदेव अस्माभिः गोत्वाख्यं भावलक्षणं सामान्यं गोशब्दवाच्यम् इत्यभिधीयते, अभावस्य भावान्तरात्मकत्वेन[5] व्यवस्थिततत्वात्। प्रसज्यपक्षे तु न किञ्चिद्वस्तु वाच्यं शब्दानामिति। अतः अप्रवृत्तिनिवृत्तिप्रसङ्गः। तुच्छरूपाभावस्य च अनभ्युपगमान्न प्रसज्यप्रतिषेधाभ्युपगमो युक्तः, परमतप्रवेशानुषङ्गात्।। इति।

**आर्हतदर्शने नञर्थघटितसिद्धान्ताः**

➢ **अविनाभावः**

हेमचन्द्रेण स्वकीय*प्रमाणमीमांसा*ग्रन्थे स्वार्थानुमानस्वरूपवर्णनावसरे उक्तं – "स्वार्थं स्वनिश्चितसाध्याविनाभावैकलक्षणात् साधनात् साध्यज्ञानम्"[6] इति। साध्यं विना अभवनं साध्याविनाभावः, स्वेनात्मना निश्चितः, साध्याविनाभावः एवैकं लक्षणं यस्य तत् स्वनिश्चितसाध्याविनाभावैकलक्षणम्, तस्मात् तथाविधात् साधनाल्लिङ्गात्, साध्यस्य लिङ्गिनो ज्ञानं स्वार्थम् अनुमानम्।

ननु असिद्धविरुद्धानैकान्तिकहेत्वाभासनिराकरणार्थं हेतोः पक्षधर्मत्वं, सपक्षे सत्त्वं, विपक्षाद्व्यावृत्तिरिति त्रैलक्षण्यम् आचक्षते भिक्षवः। तथा हि – "अनुमेये धर्मिणि लिङ्गस्य सत्त्वमेव निश्चितम् इत्येकं रूपम्। सपक्षे एव सत्त्वं निश्चितमिति द्वितीयं रूपम्। विपक्षे तु असत्त्वमेव निश्चितमिति तृतीयं रूपम्। तदेवं त्रैरूप्यमेव हेतोः असिद्ध्यादिदोषपरिहारक्षममिति तदेव अभ्युपगन्तुं युक्तमिति किमेकलक्षणकत्वेन इति चेन्न, अविनाभावनिश्चयादेव दोषत्रयपरिहारोपपत्तेः। अविनाभावो हि अन्यथा अनुपपन्नत्वम्। तच्चासिद्धस्य विरुद्धस्य व्यभिचारिणो वा न संभवति। त्रैरूप्ये तु सत्यपि अविनाभावाभावे हेतोः अगमकत्वदर्शनात्, यथा स श्यामो मैत्रीतनयत्वात्

---

[1] एकस्मादेव महाभूतविशेषात् चन्द्रोदयस्य तथा समुद्रविकासस्य उत्पत्तिः भवति।

[2] *स.द.सं* प्रागेव, पृ.२६।

[3] *तदेव*, पृ.२८।

[4] मम्मट। काव्यप्रकाशः। सम्पा. थानेश्वन्द्र उप्रैति, परिमल पाब्लिकेशन, २०१२, पृ.३८।

[5] अगोनिवृत्तिलक्षणोऽभावः, भावान्तरेण गोत्वेन व्यवतिष्ठते। अगोनिवृत्तिः= गोत्वम्। अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वात्।

[6] *प्र.मी* - १/२/९।

इतरमैत्रीपुत्रवत् इत्यत्र”।

अविनाभावो हि व्याप्त्यपरपर्यायः। विना भवति इति विनाभावः। न विनाभावः अविनाभावः। भावो नाम वृत्तित्वम्। नञर्थस्य वृत्तित्वे अन्वयः। वृत्तित्वाभाव इत्यर्थः। तेन प्रसज्यप्रतिषेधः। तथा च साध्यं विना हेतोः अवृत्तित्वम् >अभावः > वृत्तित्वाभावः?

अत्र अविनाभावशब्दस्य अनेकधा व्याख्यानं सम्भवति।

विना = अभाववान् (साध्याभावाधिकरणम्), भावः = वृत्तित्वम्, न = अभावः।

अत्र साध्याभावाधिकरणपदार्थस्य वृत्तित्वे निरूपितत्वसम्बन्धेन अन्वयः, वृत्तित्वस्य च स्वप्रतियोगिकत्वसम्बन्धेन अभावे अन्वयः।




तेन च अविनाभावो नाम साध्याभावाधिकरणनिरूपितवृत्तित्वाभावः इत्यन्वयव्याप्तिः प्राप्यते।

विना = अभावः (= साध्याभावः), न भावः = अभावः (= हेत्वभावः)

अत्र प्रथमाभावस्य व्यापकत्वसम्बन्धेन द्वितीयाभावे अन्वयः।




तेन च अविनाभावो नाम साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकव्याप्तिः प्राप्यते। अविनाभावस्य लक्षणमुक्तं *प्रमाणमीमांसायां* – सहक्रमभाविनोः सहक्रमभावनियमोऽविनाभावः[1] इति।

सहभाविनोः एकसामग्र्यधीनयोः फलादिगतयोः रूपरसयोः व्याप्यव्यापकयोश्च शिंशपात्ववृक्षत्वयोः, क्रमभाविनोः कृत्तिकोदयशकटोदययोः, कार्यकारणयोश्च धूमधूमध्वजयोः यथासंख्यं यः सहक्रमभावनियमः सहभाविनोः सहभावनियमः, क्रमभाविनोः क्रमभावनियमः, साध्यसाधनयोः इति प्रकरणाल्लभ्यते, सोऽविनाभावः।

- **अनेकान्तवादः**

आर्हतानां प्रमुखसिद्धान्तेषु अपि प्रामुख्यं भजते अनेकान्तवादः। भारतीयदार्शनिका हि द्विविधाः – एकान्तवादिनः अनेकान्तवादिनश्च। जैनव्यतिरिक्ताः सर्वे एव एकान्तवादिनः। जैनाश्च अनेकान्तवादिनः। एकः अन्तः निश्चयः सीमा वा इति एकान्तः इति वाचस्पत्यम्। अत एव एकान्तो नाम एकनिश्चयः। न एकान्तः अनेकान्तः इति नञ्तत्पुरुषसमासः। तस्यार्थो हि न एकनिश्चयः अर्थात्

---

[1] *प्र.मी* - १/२/१०।

अनिश्चयः।

यद्यत्र नञर्थः पर्युदासः तर्हि एकान्तभिन्नः निश्चयभिन्नः संशयरूप एव जैनानाम् अनेकान्तवाद इति आपद्यते। किन्तु जैनानां स्याद्वादः न संशयवादो भवितुमर्हति। यतः, संशयवादः ज्ञानस्य सम्भावनायामेव संशयमुत्पादयति। किन्तु आर्हताः ज्ञानस्य सम्भावनायां निश्चयमतयः। साधारणज्ञानसम्भावनायां स्याद्वादो न संशयितः। अतः स्याद्वादः सन्देहवाद इति वक्तुं न उचितः।तेन अत्र प्रसज्यप्रतिषेधः ग्राह्यः। तेन निश्चयाभाव इत्यर्थः समायाति। सोऽर्थः अनेकान्तवादसिद्धान्तमनुकरोति इति प्रतीयते। तथा चोक्तं *दर्शनाङ्कुरे* – "स्वकीयैर्द्रव्यादिभिरस्तीति विधिकल्पनया, परकीयैर्द्रव्यादिभिः नास्तीति निषेधकल्पनया च सर्वे पदार्थाः भावाभावात्मका अनैकान्तिकाः। एकान्तो निश्चयः। सत्त्वस्य असत्त्वस्य वा निश्चयो नास्ति। एतादृशा एव सर्वे पदार्था इत्यर्थः"।[1] इति।

**निष्कर्षः**

नास्तिकशिरोमणिनां चार्वाकाणां मते जगदिदम् अकस्माद् भवति। अत एव त आकस्मिकतावादिनः। तत्राकस्माद् इत्यत्र किंशब्दः कारणपर्यायः, नञोऽर्थो यदि प्रसज्यः तर्हि अर्थो भवति कारणात् न भवतीति, यदि पर्युदासः तर्हि अर्थो भवति कारणव्यतिरिक्ताद् भवति इति। तत्र प्रसज्यपक्षे योऽर्थस्तस्य पुनः अर्थद्वयं- कारणस्य निषेधः, उत्पत्तेः निषेधश्चेति। पर्युदासपक्षे योऽर्थस्तस्य पुनः अर्थत्रयं सम्भाव्यते- स्वस्मात् भवति, अलीकात् भवति, स्वभावात् भवति चेति। एते पञ्च अपि पक्षा *न्यायकुसुमाञ्जलि*कृता उदयनाचार्येणैकयैव कारिकया खण्डिताः। तथा हि –

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः।। इति।

किन्तु अत्र चार्वाकाणां पक्षत इदं वक्तुं शक्यते यत्तैः कारणस्य सर्वथा निषेधो न क्रियते। वस्तुतः जगत्सृष्टिविषये ते कथयन्ति यत् – पृथिवी जलं तेजः वायुः चेति चत्वारि भूतानि। एतेषां परमाणूनां संयोगादिक्रमेण जगत उत्पत्तिः भवति। वैशेषिकाणाम् अपि इदमेव मतम्। किन्तु ते तत्र निमित्तकारणरूपेण ईश्वरं तथा अदृष्टं स्वीकुर्वन्ति। चार्वाकास्तु ईश्वरादृष्टयोः प्रत्यक्षप्रमाणागोचरत्वात् कारणकोटौ तेषाम् अन्तर्भावं नाङ्गीकुर्वन्ति। अत एव 'अकस्मात्' इत्यस्य अर्थः 'न अदृष्टकारणात्' इति। अत्र किंशब्दः अनिर्ज्ञातस्वरूपपरः। अनिर्ज्ञातस्वरूपः च प्रत्यक्षप्रमागोचरः। तादृशात् कारणात् जगत उत्पत्तिः तैः निषिध्यते।

ननु चेतनस्य तथा अदृष्टादेः अभावात् कथंकारं परमाणुषु क्रिया भवति संयोगार्थमिति चेदुच्यते तैः – 'स्वभावात्' इति। अत एवोक्तं *सर्वदर्शनसंग्रहे* चार्वाकदर्शनविवरणे –"ननु अदृष्टानिष्टौ जगद्वैचित्र्यम् आकस्मिकं स्यादिति चेत् न तद् भद्रम्। स्वभावादेव तदुपपत्तेः। तदुक्तं–

अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिः"।।[2] इति।

बौद्धदर्शनाचार्येण धर्मकीर्तिना हेतोः रूपत्रयकथनावसरे असपक्षे असत्त्वं भवति हेतोः रूपमिति प्रतिपादितम्। तत्र असपक्षपदे नञः प्रसज्यार्थः ग्रहणे सपक्षाभावः भवति, पर्युदासे सपक्षभिन्नः सपक्षविरुद्धः वा भवति। अत्र तु उभयथापि अर्थः ग्राह्यः इति मे मतिः यतो हि *न्यायविन्दौ* एव असपक्षः नाम ततोऽन्यस्तद्विरुद्धस्तदभावश्च इति प्रतिपादितम्। किञ्च तेषु अपि दृष्टान्तेषु अनुमानपि दृश्यते-

- इदं क्षणिकं सत्त्वात्
  यन्न क्षणिकं तन्न सत् यथा शशविषाणम् – सपक्षाभावः
- इयं पृथिवी गन्धवत्त्वात्
  यन्न पार्थिवं तन्न गन्धवत् यथा जलम् – सपक्षभिन्नः

---

[1] *स.द.सं*। प्रागेव, पृ.८३।
[2] *स.द.सं* प्रागेव, पृ.१८।

- पर्वतो वह्निमान् धूमवत्त्वात्

  यन्न वह्निमत् न तत् धूमवत् यथा जलहृदः – सपक्षविरुद्धः

जैनदर्शनाचार्यस्य हेमचन्द्रस्य *प्रमाणमीमांसा*ग्रन्थे हेतोः असिद्ध्यादिदोषपरिहाराय अविनाभाव इत्येकः एव धर्मः अलमिति कथितम्। विना भवति इति विनाभावः, न विनाभावः अविनाभावः। भावः नाम वृत्तित्वम्। नञर्थस्य वृत्तित्वे अन्वयः। वृत्तित्वाभावः इत्यर्थः। तेन तु प्रसज्यप्रतिषेध एव। अत्र नञः प्रसज्यपक्षे व्याख्याने अविनाभावशब्दात् अन्वयव्याप्तिः लभ्यते तथा हि-

विना = अभाववान् = साध्याभावाधिकरणम्, भावः = वृत्तित्वम्, न = अभावः

अत एव साध्याभावाधिकरणनिरूपितवृत्तित्वाभावः = अन्वयव्याप्तिः।

किन्तु अविनाभावशब्दात् व्यतिरेकव्याप्तिलाभार्थं तस्य पर्युदासपक्षे व्याख्यानं कर्तव्यम्। तथा हि- विना = अभावः (साध्याभावः), न भावः = भावभिन्नः = अभावः।

प्रथमाभावस्य द्वितीयाभावे व्यापकत्वसम्बन्धेन अन्वयः। तेन साध्याभावव्यापकीभूताभावप्रतियोगित्वम् = व्यतिरेकव्याप्तिः इति मे विचारः।

इत्थमेव तेषाम् अनेकान्तवादसिद्धान्ते नञः अर्थः यदि प्रसज्यः तर्हि अर्थः एकनिश्चयाभावः, यदि पर्युदासः तर्हि एकनिश्चयभिन्नसंशयरूप एव। किन्तु जैनानां स्याद्वादः न संशयवादो भवितुमर्हति। अतः अत्र नञर्थः प्रसज्य एव ग्राह्यः। इत्थंकारं नास्तिकदर्शनेषु ये नञर्थघटिताः सिद्धान्ता वर्तन्ते तेषां काञ्चन विषयानधारीकृत्य नञर्थस्यालोचना विहिता। वस्तुतस्तु तादृशाः सिद्धान्ता बहवो वर्तन्ते। अत्र तु स्थालीपुलाकन्यायेन दिङ्मात्रं प्रदर्शितमिति शम्।

## ग्रन्थपञ्जी

1. धर्मोत्तरः। *न्यायविन्दुटीका।* सम्पा. श्रीनिवास शास्त्री। मेरठ :साहित्य भाण्डार, १९७५।

2. न्यायरत्न, महेश चन्द्र। *नव्यन्याय भाषा प्रदीप।* सम्पा. उज्ज्वला झा। पुणे :श्रुतभवन संशोधन केन्द्र, २०१८।

3. प्रभाचन्द्रः। *प्रमेयकमलमार्तण्डः।* सम्पा. महेन्द्र कुमार शास्त्री। मुम्बाई :निर्णय सागर प्रेस, १९४१।

4. शान्तरक्षितः। *तत्त्वसंग्रहः।* सम्पा. एम्बार कृष्णमाचार्य। वरोदा :सेन्ट्राल लाइब्रेरी, १९२६।

5. हेमचन्द्रः। *प्रमाणमीमांसा।* सम्पा. सुखालालजी संघवी तथा महेन्द्र कुमार शास्त्री। आहमेदावाद :सरस्वती पुस्तक भाण्डार, १९८९।

6. Matilal, Bimal Krishna. *The Navya Nyāya Doctrine of Negation.* Cambridge: Harvard University Press, 1968.

7. কর, গঙ্গাধর। *নাস্তিক দর্শনে প্রমাণতত্ত্ব।* কোলকাতা: সেন্টার অফ এডভান্সড্ স্টাডি ইন ফিলসফি যাদবপুর বিশ্ববিদ্যালয়, ২০২১।

8. যাস্ক। *নিরুক্ত।* সম্পা. তারকনাথ অধিকারী। কোলকাতা: সংস্কৃত বুক ডিপো, ২০১৬।

9. সাহা, বিশ্বরূপ। *নাস্তিক দর্শন পরিচয়।* কোলকাতা: সদেশ, ২০০৬।

# परमाणुवादखण्डनप्रसङ्गे वेदान्ते आत्मतत्त्वसिद्धिः

Dr. Rajesh Pramanik, Guest Faculty
Dept. of Sanskrit Studies
University of Hyderabad
pramanikr071@gmail.com

**शोधसारांशिका -**

जाग्रदवस्थायां विषयाननुभवितुं, स्वप्नावस्थायां वासनया कर्तारं संस्रष्टुं, सुषुप्तावस्थायां च स्वस्मिन्नेव स्वस्य लीनीकर्तुं यः समर्थः, पुनश्चैतासामवस्थानां द्रष्टृत्वेन नित्यतत्त्वस्वरूपः स एव आत्मेति शब्दवाच्यः। स्वस्वरूपत्वादेवात्मा नित्यत्वं प्राप्नोति। तेन च आत्मप्राप्तिर्नाम तद्विषयकज्ञानस्य प्रापणम्। ब्रह्मणः व्यक्तेः पृथक्कीकरणे हेतुभूतस्याज्ञानस्य नाशनमेव तत्प्राप्तिः। सैव प्राप्तिरस्ति यत्प्राप्तव्यमेव। यस्य वस्तुनो लाभः क्षणिकत्वेन भवति, तन्न ऋणभिन्नं किञ्चिदन्यमिति विज्ञेयम्। अनित्यत्वेन कालान्तरे ग्रसितत्वेन चास्मिन् जगति सर्वेऽपि पदार्थाः, सर्वाण्यपि वस्तुनि क्षणमात्रस्थितानि। पदार्थप्राप्तिः ऋणमात्रस्वरूपैवास्ति। परन्त्वेतेभ्यः भिन्नः यः नित्यस्वरूपः, यस्य प्राप्तिश्चाचला तदात्मतत्त्वस्य प्राप्तिरेव मूलप्राप्तिः। तदात्मतत्त्वलाभेनैव सम्भवत्यखिलासम्पूर्णतायाः दूरीकरणम्। आत्मकामी तथात्मप्राप्तिरेवाखिलकामनातीतो भवितुमर्हतीत्यतस्तस्यात्मज्ञस्य न पुनर्विद्यते किञ्चित्साधनाय। एषैव सर्वप्रकारप्राप्तिषु श्रेष्ठप्राप्तिः। एतदर्थमेवापस्तम्भादीनां धर्मसूत्रादिरचनायां प्रवृत्तिर्दृश्यतेऽसकृत्। अथवा मुनिः यः मननशीलपरमहंसः सः तदात्मतत्त्वलाभमेव श्रेष्ठतमं मत्वा तदवगमनाय तत्प्राप्त्यर्थं च सर्वं परित्यजति।

**कुञ्चिकाशब्दाः -** आत्मा, ब्रह्म, कारणम्, जगत्, परमाणुवादः, पदार्थः।

आत्मास्य जगतोऽभिन्नं निमित्तोपादानकारणमिति प्रसिद्धिर्वेदान्ते। कुत्रचिद्वैदिकसिद्धान्तं निराकृत्यात्मतत्त्वभिन्नतत्त्वं सत्यत्वेन जगत्कारणरूपेण चोपपादितम्। जगत्सत्यवादिनः परमाणुवादिनः कणादादिमहर्षयः द्वैतवादिन एवं मन्यन्ते यत्, परमसूक्ष्मनिरवयवद्रव्यविशेषाः एव परस्परसम्मेलनेन समस्तस्य सावयवकार्यरूपस्य जगतः पदार्थसमूहान् उत्पादयन्ति। एतन्मतमान्यताधुनिकभौतविज्ञानेऽप्यस्ति। द्रव्यगुणकर्मसामान्यविशेषसमवायाः इति वैशेषिकदर्शने षट्पदार्थाः स्वीकृताः। एतेषु नित्यद्रव्याणि च (परमाणुः, आकाशादिः) नित्यगुणसामान्यविशेषसमवायाः कारणेन नोत्पद्यन्ते। अनित्यद्रव्याणि च परमाणुनोत्पद्यन्ते। अनित्यगुणश्चानित्यद्रव्ये विद्यते इत्यत एवानित्यगुणः द्रव्ये कारणाधीनत्वेन तिष्ठति। क्रियायाश्चापि द्रव्यसत्तात्मकत्वेन तदधीनत्वं ज्ञायते। पदार्थस्य मौलिकोपादानभूतश्च परमाणुः। अस्यैव पारस्परिकविन्यासेन मौलादीनां सृष्टिः। परमाणूनां च परस्परसम्मेलनेनाणूनां सृष्टिः। येन च जलवायुखाद्यादिरूपेणासंख्यानां पदार्थानां सृष्टिः सम्भवति। एवंरूपेणाकृतित्वात्परिवर्तितत्वाच्च पदार्थेषु रसजविक्रियायां सत्यां जगतः प्रकृतेश्च सर्वानां परिवर्तनं विघटते। पुनश्च एतेषां परमाणूनां सम्मेलनेनैव संसाररूपि कारणं संसृष्टं भवति। यच्च कारणं स्वयमेव कार्यात्मकत्वेन परिणमते तदेवोपादानकारणम्। तद्यथा मृदा निर्मीयते घट इत्यतः घटोपादानकारणं मृदेव। वैशेषिकनये परमाणुः जगदुपादानकारणेन स्वीकृतः। प्रत्येकं परमाणुः स्वस्मिन् स्वगुणं निर्वहति, तद्गुणेनैव जागतिकवस्तुसमूहे तद्गतगुणोद्रेको भवति। एतस्मादेव जगत्, तद्गतगुणाः जगदाकारश्च परमाणुत एव सृष्टः। स्वभावत एव परमाणुः स्थितिशीलोऽचलश्च। जगतोऽस्य सर्वेऽपि भौतिकपदार्थाः सावयवाः उत्पत्तिविनाशशीलाः नित्यपरमाणुविभिन्नसंयोगसंसृष्टाः। तस्मादेव पदार्थोत्पत्तिर्नाम परमाणूनां संयोगः, विनाशो नाम परमाणुसंयोगविभाग एव। सृष्टेश्च मूलतत्त्वस्वरूपः परमाणुः नित्यः। भौतिकपदार्थावयवाः विभाज्याः, पुनश्चैतेषां विभक्तावयवानामन्यावयवरूपेण विभागोऽपि सम्भवति।

इत्थञ्चानवस्थादोषपरिहारायान्तिमावयवं स्वयं निरवयवमविभाज्यमिति स्वीकर्तव्यम्। परमाणुरेवातीन्द्रियः निरवयवोऽविभाज्यो नित्यभौतिकद्रव्यस्वरूपः। परमाणोश्च चत्वारः विभागाः दृश्यन्ते पार्थिवजलीयतैजसवायवीयरूपेण। आधुनिकविज्ञाने एतैः परमाणुभिरेव विविधपदार्थानां सृष्टिरिति निभण्यते। विभु नित्यं आकाशं परमाणोः संयोगविभागविषयेऽवकाशं प्रददाति। प्रत्येकं नित्यपरमाणौ यत्स्वकीयत्वं वर्तते तदेव स्वकीयत्वं नित्यत्वेनान्यपदार्थव्यवर्तकत्वेन च तस्मिन् विद्यते। एतदतिरिच्य परमाणौ गुणभेदः

संख्यागतप्रभेदश्च विद्यते। वायुपरमाणुः सूक्ष्मतमः, यस्मिन्स्पर्शगुणो विद्यते। एवमेव तैजसपरमाणौ रूपस्पर्शौ विद्येते। जलपरमाणौ च रसरूपस्पर्शगुणाः विद्यन्ते। पार्थिवे च परमाणौ तेनैव रूपेण गन्धरसरूपस्पर्शाश्चत्वारः गुणाः विद्यन्ते। सावयवपदार्थे गुणाः तन्निर्णायकपरमाणुरूपेण गुणे तिष्ठति। एते च स्वभाविकतया निस्पन्दाः क्रियाशून्या भवन्ति। जगत्सृष्टिः तदैव सम्भवति यदा तस्मिन्नचलपरमाणौ कस्यचिन्नाद्यस्पन्दनस्याद्यगतेश्च सञ्चारः सम्भवति। आद्यस्पन्दनञ्चेदमीश्वरप्रदत्तप्राथमिकगतिरूपेणापि कथितम्। एतच्चाद्यस्पन्दनं गतिर्वेश्वरसञ्चालिताददृष्टादागच्छति, यस्माद्भौतिकसृष्टेः प्रारम्भो भवति। प्रत्येकं संसार्यात्मादृष्टो भवति, यच्च तस्मिन्संयुक्तो भवति, यस्मिन् तद्धर्माधर्मरूपकर्मसंस्कारः सञ्चितो भवति। आत्मकर्मफलत एव सृष्टिर्भवति। कुत इति चेदात्मानं विहाय शरीरमिन्द्रियं मनसः भोगश्च न संसिद्धति। प्रतेकं संसारिणात्मना सह मनः संयुज्यते। परन्तु, भोगायतशरीरस्य भोगसाधनेन्द्रियस्योत्पादनार्थं भौतिकसृष्टेरावश्यकतास्ति। परमाणुसमूहे आद्यस्पन्दनादनन्तरमेव कश्चन परमाणुः अपरपरमाणुना सह संयुज्य द्व्यणुकमुत्पादयति। आदौ च सर्वेऽपि परमाणवः द्व्यणुके परिणमन्ति, ततस्तद्व्यणुकैः सृष्टिः प्रावर्तते। त्रिभिर्द्व्याणुकैस्त्र्यणुकश्चतुर्भिस्त्र्यणुकैश्च चतुरणुकस्योत्पत्तिर्भवति। इत्थञ्च क्रमोपक्रमैः स्थूलभूतादीनां संसृष्टिः। सततञ्चोपादानकारणं कार्ये एव तिष्ठति, तत्प्रतीतिरपि सुस्पष्टैव। तद्यथा- घटस्य मृत्तिका पटस्य वा सूत्रकणिका। संसारे पदार्थः शश्वदेवाचेतनसंयुक्तरूपेण प्रतीयते। फलस्वरूपेणोपादानकारणस्याचेतनतत्त्वत्वेनैव भवितव्यं, न तु चेतनस्वरूपेश्वरत्वेन। तथा हि न कोऽपि पदार्थः ईश्वरे आत्मनि वा समन्वितो भवितुमर्हति। यच्चानेनानुमानेन बोधयितुं शक्यम्- जगत्पदार्थाः, अचेतनोपदानकाः अचेतनान्विततया भासमानत्वात्, यः स्वसत्तायां यदन्वितो नियमेन भासते स तदुपमृदानको दृष्टः, यथा मृदन्विततयावभासमानो घटो मृदुपादानकः, तथा चेमे, तस्मात्तथेति।

यो गुणः कारणपरमाणौ विद्यते, सः एव गुणः कार्ये समरूपमेव गुणमुत्पादयति तन्तुगतवर्णस्य पटगतवर्णस्य कारणवत्। परमाणुः निर्गुणत्वेन स्वीक्रियते चेत् कार्ये गुणोत्पत्त्यर्थं कालान्तरं स्वीकार्यम्। किन्तु, परमाणुः सगुणस्वरूपः। यद्यपि सगुणताव्यक्तरूपेणैव तिष्ठति तथापि। परमाणुसंयोगे सत्येषा सगुणता व्यक्तीभवति।

विशेषगुणाभिप्रायानुसारेणेदमुच्यते- सः समजातीयमेव गुणमुत्पादयति। यतो हि तन्मतानुसारेणापि परमाण्वादौ स्थितसंख्यात एव द्व्यणुकादयः परिणामस्वरूपाः परत्वापरत्वयोः दिक्कालरूपपदार्थस्य संयोगकारणरूपेण स्वीकृताः। कणादमते तु, पटगतवर्णः तन्तुगतवर्णश्च परस्पराद्भिन्नः गुणः। तन्तुगतवर्णात्पटगतवर्णस्योद्भवः इत्यतस्तयोर्जन्यजनकभावसम्बन्धः प्रतिष्ठितः। जन्यजनकसम्बन्धो नाम येन सम्बन्धविशेषेण कारणात्कार्यमुत्पद्यते। अर्थात्, यदा किमपि वस्तु कापि वा प्रक्रियापरस्योत्पत्तेः कारणस्वरूपत्वेन विद्यते तदा तयोर्मध्ये जन्यजनकभावः विद्यत इति कथ्यते। तन्तुगतवर्णः यदा पटरूपाकारे समाहितो भवति तदा तत्तन्तुगतवर्णेन पटगतवर्णस्योत्पत्तिः सम्भवति। एवञ्च तन्तुगतवर्णः जनकः, पटगतवर्णश्च जन्यः। इत्यवस्थायां च भिन्नगुणरूपेणास्य प्रसिद्धिः। समानजातीयत्वकथने इदं तात्पर्यमस्ति यत्, नात्यन्तभिन्नस्य रूपरसादेर्हेतुर्भवति। परमाणुस्तद्गतगुणश्च निखिलजागतिकपदार्थानामुत्पादनेन सहैव तद्गतगुणान्नप्युत्सृजति। इत्थञ्चोपादानकारणं जगतः परमाणुः एव। प्रत्येकं च परमाणुः रूपरसगन्धस्पर्शरूपेण विद्यमानान् गुणान् स्वस्मिन् धरति वहति च। परमाणुसम्मेलनेन दृश्यमानपदार्थानां घटपटादीनामुत्पत्तौ सत्यां तत्पदार्थगतगुणा अपि तदाधारभूतेभ्यः परमाणुगतगुणेभ्यः निसृताः भवन्ति। ईश्वरस्य जगत्कारणत्वेन स्वीकारे वैशेषिकनये इयं समस्या प्रादुर्भवति- उपादानकारणं नाम यस्मात्पदार्थसम्भवस्तत्। किन्तु, जगतः पदार्थस्तु परमाणुत एवागच्छति, तद्गतगुणाः अपि तत्परमाणुत एवागच्छन्ति। येनेश्वरस्योपादानकारणं न सिध्यति। इदानीं कारणतायां लोकप्रसिद्धस्य वेदोक्तस्य वेश्वरस्य स्वीकारे का समीचीना युक्तिरिति प्रश्ने समाददति कणादानुयायिनः " वैदिकत्वान्निमित्तकारणता परमेश्वरस्य। वेदान्तानुसारेण सांख्यदर्शनानुसारेण वा न स्वांशात्सः जगत्सृजति। परमाणूनां सञ्चालनेन संयोगेन विन्यासेन च तत्फलस्वरूपतया तस्येश्वरस्य जगत्सृष्टौ कारणत्वम्।

वैशेषिकन्यायनये कारणं त्रिविधम्। तत्र वैशेषिकसम्मतं समवायिकारणं वेदान्तोक्तोपादानकारणम्। तत्र च वैशेषिकनये समवायिकारणं नाम परमाणुस्वरूपं तन्तुरूपमात्रमेव भौतकारणम्, यच्च कार्यमध्येऽपि तिष्ठति। वेदान्तिनस्तु समवायिकारणप्रसङ्गे उपादानकारणप्रसङ्गे वा ब्रह्मैवाकर्षन्ति, यच्च ब्रह्म स्वयमेव जगद्रूपेण प्रकाशितम्। तथा च मृदैव सर्वदा घटस्य निर्माणः दृश्यते, मृद्भिन्नत्वेन नैवास्ति घटस्य पृथक्सत्ता। यदि घटात् मृत्तिकापसार्यते तर्हि तन्न घटः। पुनश्च यत्र समवायिकारणं नास्ति

तत्रासमवायिकारणमस्तीत्यर्थप्रत्यये निमित्तकारणस्यार्थता सिद्ध्यति। तत्र च निमित्तकारणं दण्डचक्रादि कार्यरूपश्च घटः पृथक्त्वेनैव तिष्ठति। कार्योत्पत्त्यर्थमावश्यकं निमित्तकारणं किन्तु कार्यस्थितौ नास्ति तस्यावश्यकता-

यत्र समन्वेति कारणं समवायितत्।
चक्राद्यं साधनं यत्तु तु घटस्यासमवायितत्॥

वस्त्रे समवायिकारणं तन्तौ तन्तुसंयोगे तिष्ठति, तेन तत्तन्तुसंयोगोऽसमवायिकारणम्। अपरत्र तन्तौ समवायिकारणं तन्तुसमूहे तिष्ठति। तन्तुसमूहस्य वर्णो वस्त्रसमूहवर्णस्यासमवायिकारणम्। यतो हि तन्तुगतवर्णः वस्त्रगतवर्णमुत्पादयति, तच्च तन्तौ तिष्ठति यच्च वस्त्रस्य समवायिकारणम्। वस्त्रं च वस्त्रवर्णस्य समवायिकारणं वस्त्रस्य वर्णः सर्वदा वस्त्रे एव तिष्ठतीत्यतः। "तन्तुत्वं वगैरः अन्यथासिद्धकारणम्" इति असमवायिकारणरूपेण न स्वीकृतं, किन्तु, कार्यार्थमावश्यकम्। तेनानन्यथासिद्धमप्यसमवायिकारणं भवितुमर्हति-

समवायिनि तिष्ठेद्यत् समवाय्याश्रये तथा।
कार्येऽवधृतसामर्थ्यङ्कल्प्यतेऽसमवायितत्॥

इत्थञ्च कारणभेदत्रयेणेश्वरस्य कारणतोक्तेवंप्रकारेण- अन्यनिमित्तकारणसत्त्वेऽपि कार्यमात्रे ईश्वरस्य निमित्तकारणता। अस्य च कारणं चेतनेन विनाचेतने प्रवृत्तिसम्भावाभावात्। ईश्वरस्य निमित्तकारणत्वेन स्वीकारे लोकसंगतत्वं वेदप्रसिद्धसंगतत्वमपि भवितुं योग्यम्। वेदान्तिनां केवलेश्वरस्य सर्वकारणवादः सर्वानुभवविरुद्धत्वाच्च त्याज्यः इत्यपि गोचरीभूतो भवति। वैदिकसिद्धान्तवादे चैतन्निमित्तकारणवादस्य संसारे सर्वत्राङ्गीकारो दृश्यते। ईश्वरसिद्धिप्रसङ्गेऽप्येतदनुरूपमेवास्ति। यत्कार्यमुपादानकारणेनोत्पन्नो भवति तत्कार्यमुपादानकारणे सर्वदा विद्यते। तद्यथा मृत्तिकया घटस्तन्तुना वस्त्रं हेमेन चाङ्गुरीयकं निर्मीयते,इत्येवंक्रमं वैशेषिकाः नैयायिकाश्च स्वीकुर्वन्ति किन्तु न प्रतिपादयन्ति।

वैशेषिकमतनिराकरणप्रसङ्गे वेदान्तिनो वदन्ति-

यत्कार्यञ्जायते यस्मात्तस्मिन् तत्प्रतितिष्ठति॥
मृत्तिकायाङ्घटस्तन्तौ पटस्स्वर्णेऽङ्गुलीयकम्।
इति वैशेषिकाः प्राहुस्तथा नैयायिका अपि॥

अङ्कुरादिफलपर्यन्तेषु सर्वेषु कार्येषु सत्ता स्वीक्रियते चेत्, वटबीजे तत्परमाणुः कुतः सम्बन्धितः स्यात्?

यतो हि कार्येऽन्वितरूपेण यत्सम्मिलति तदुपादानकारणमिति सर्वजनसम्मतमस्ति। सर्वेषु कार्येषु सत्तान्वितत्वात् सद्रूपब्रह्मैवोपादानकारणमिति स्वीकरणीयम्। परमाणवः न क्वापि समन्वितत्वेनोपलभ्यन्त इत्यतस्ते केनोपायेन कारणत्वेन स्वीकर्तुं योग्याः? द्व्यणुकान्प्रति तेषां कारणत्वं स्यात्, किन्तु कार्यं प्रति न तस्य कारणत्वम्। परमाणवः सन्त्यतीन्द्रियाः इत्येस्मात् कार्येष्वप्यतीन्द्रियत्वं स्यात्, न त्विन्द्रियगम्यतेत्येतदेव साक्षात् विरुद्धम्। वेदान्ते तु ब्रह्मणोऽतीन्द्रियस्य सत्ता पारमार्थिकत्वेनोक्ता, तस्मिन् कल्पितजगत्सत्ता तु व्यवहारिकीत्यतो नास्ति दोषलेशमात्रमपि।

यदि कार्येऽभीष्टप्रमुखरूपेण यस्य ग्रहणं क्रियते तदुपादानकारणत्वेनापि स्वीक्रियते तथापि फलाकाङ्क्षी बीजमेव गृह्णाति, न तु परमाणुम्। पुनश्च यदि परम्परानुसारेण परमाणुसमूहग्रहणमिति वदेत्तर्हि ब्रह्मविवर्तबीजग्रहणेन साकं ब्रह्मणोऽपि ग्रहणं स्यात्। सद्रूपब्रह्म त्वनुभवसिद्धं, न तु परमाणुसिद्धम्। अत एवैवं वक्तुं योग्यं यत्, परमाणुकारणवादः प्रबलप्रमाणसमूहसापेक्षः न इति। परमाणोरुपादानकारणत्वेनास्वीक्रियते चेति पूर्वकार्यस्यमुत्तरकार्यं प्रति कुतो नोपादानमित्याकाङ्क्षा जायते। ब्रह्मणोऽन्तिमोपादानकारणत्वेन स्वीकारे सति सर्वकार्यं प्रत्यपादानभावस्याभावो न भवति येनोच्यते उपादानकारणगतगुणाः समानजातीयगुणान् कार्येषूत्पादयन्ति। यथा रक्तवर्णयुतात् पशमात् रक्तवर्णस्य एव शीतवस्त्रस्य निर्माणः दृश्यते। तथैव पुष्पफलादिषु पुष्पफलयोर्गुणोऽतीवैव भिन्नः भवति। दुग्धं तरलं सुमिष्टं च, परन्तु, दधि अम्लं सान्द्रञ्च इत्येतत्सत्त्वेऽपि कथमेतेषामुपादानकारणत्वम्? आत्मन आकाशः संभूतः, आकाशाद्वायुः इत्यादौ श्रुतौ च केवलं क्रमविवक्षा परिलक्ष्यते, न तूपादानकारणस्य प्रतिपादनम्। निश्चप्रचेन कार्ये पूर्वभावः विद्यते परन्तूपादानकारणत्वं तु ब्रह्मणः एव। पुनश्च ब्रह्म वास्तविकतयोपादानकारणमिति वेदान्तिभिः नाङ्गीक्रियते,

मायिकोपादानमेव तत्र स्वीकृतम्। अत एवामूर्तत्वादिदोषभियोच्यते- कारणं बीजम्, कार्यं चाङ्कुरः, अंशस्तन्तुः, अंशी वस्त्रम्, गोत्वादि जातिः, गवादि व्यक्तिः, गुणः श्वेतः, गुणी च कमलम्, क्रिया गतिः, वान् च क्रियावान्- इतीत्थम्प्रकारेण विशेषादिज्ञानं कल्प्यते, रूपान्तरं क्रियते, व्यवहार्यते च। विशेषविशेषी, समवायसमवायी, सदृशसदृशीत्यत्र बोद्धव्यम्। तदखण्डप्रकाशस्य सर्वेऽप्येते काल्पनिकरूपमात्रमेव। यथा चैकेनैव मेघेनाश्वहस्तिराक्षसादीनां कल्पना क्रियते। आरभ्यवादः, तथा च कार्योत्पत्तिपूर्विकासत् तथा च कार्योत्पत्तेः पूर्वं कार्यं कारणे न विद्यते इति मते कार्यं नूतनतयोत्पद्यते। नूतनतयैव तत्सत्तायाः प्रारम्भो भवति। अनेनैव हेतुनासत्कार्यवादः आरम्भवादः इति नाम्नाप्यभिधीयते। परिणामवादे च कार्यकारणभावो वास्तविकतया न सिद्ध्यति। अस्माद्भिन्नः कोऽपि प्रधानवाद्यपि नास्तीत्यतः विवर्तवादः स्वतः सिद्धः। एतं च शिष्टं न्यायं भगवान् गौडपादाचार्यः स्वीचकार। एतद्विहायापि 'स एषोऽणिमैतदात्म्यमिदं सर्व' 'तम आसीत्तमसा गूढमग्रे' च श्रुतिषु परमाणुः प्रधानञ्च जगत्कारणरूपेणोक्तम्। अतोऽनुमानसिद्धप्रकाशरूपतायाः जगत्कारणत्वेन स्वीकारे वादिनं यदि वेदाश्रितत्वेन स्वीकारे आशङ्क्यते तर्हीदं ज्ञातव्यं यत्, वैशेषिकसांख्याभ्यां परमाणुप्रधानयोर्जडत्वेनैव स्वीकारो दृश्यते। वैशेषिकमतानुसारेण त्वात्मा जडस्वरूपः, ज्ञानगुणः आत्ममनःसंयोगेनोत्पद्यते।

सांख्ये चेतनः पुरुषः, प्रकृतिस्तु सर्वथा भिन्ना जडस्वरूपा च प्रतिपन्ना। वेदप्रमाणेन तु चैतन्यसिद्धिः बहूदूरेऽस्ति, जगत्कारणतापि तेन न सिद्ध्यति। यच्च ब्रह्मसूत्रे ईक्षत्यधिकरणे प्रतिपादितमस्ति। सामवेदे छान्दोग्योपनिषदि च 'तदैक्षत बहुस्यां प्रजायेय' स्पष्टतयेदं प्रदर्शितं यत्, आत्मरूपिणः जगत्कारणत्वे विचारः बहुभवनञ्चोभावुक्तौ। तस्माच्चानात्मपदार्थः कारणत्वेन श्रुत्या न प्रतिपादितः। एतेनैव पुनर्निमित्तकारणवादस्यावैदिकत्वमपि सिद्ध्यति। ज्ञानं क्रिया चेति द्वयमचेतनद्रव्यमतिरिच्य चेतनसम्बन्धे न द्रष्टव्यं भवति। वेदान्तशास्त्रे कूटस्थेनेश्वरस्य स्वीकारोऽस्ति। तेन तस्मिन् कर्तृत्वज्ञातृत्वादीनामतितुच्छत्वेनैव प्रतिभानं स्यात्। यद्यपीश्वरः स्वरूपतोऽव्ययोऽपरिणाम्यक्रियः सर्वासम्बद्धश्च सन् स्वमायाशक्त्येक्षणसृजनादिमत्त्वात् सर्वज्ञः सर्वक्रियमाणः इत्येवंरूपेणापि तस्य स्वीकारो दृश्यते।

तस्यामेव मायाशक्तौ सर्वं कार्यकारणात्मकं जगदव्यक्तरूपेण वर्तमानमस्ति। श्रुतिषु चैनं सर्वशक्तिमन्तमीश्वरं विश्वस्याभिन्ननिमित्तोपादानकारणमित्युक्तमस्ति। यथा च कार्यकारणभूतोपाध्यावेशेन कुम्भकारजीवे ज्ञानक्रिया दृश्यते, तथैव कार्यकारणतत्संस्काररूपमायोपाध्यावेशेन परमेश्वरे ज्ञानक्रियारूपशक्तिः स्वीकर्तव्या। इत्थञ्च परमेश्वरस्य जगदुपादानकारणत्वं न केवलं वेदान्तप्रसिद्धमपि त्वनुभवसिद्धमपि। पुनश्च प्रामाणिकत्वेनैतदथर्ववेद कृष्णयजुर्वेदा ष्वप्युक्तमस्ति, अपरत्र वेदान्तसूत्रेऽपि सम्यक्तया साध्यत एतन्मुनिना।

**उपसंहारः**

वैशेषिकदर्शने परमाणोः जगत्कारणत्वेन स्वीकारः दृश्यते, परमाणुः नित्योऽचलोऽविभाज्यो निरवयवस्वरूपश्च मौलिकपदार्थः; तत्संयोगविभागाभ्यामेव अणुः द्व्यणुकः त्र्यणुकः इत्यादीनां निर्माणं सम्भवति, जडस्य जगतः उत्पत्तिविनाशौ सिध्यतश्च। तस्मादेव वैशेषिकमतानुसारेणेश्वरस्योपादानकारणत्वं न स्वीक्रियते, अपि तु केवलमाद्यस्पन्दनप्रदानेन निमित्तकारणत्वेन स्वीकारः परिलक्ष्यते। किन्तु वेदान्तिनस्त्वभिप्रायं भिन्नमेवास्ति । तन्मते तु ईश्वर एव जगतः अभिन्नकारणम्। परमाणुरूपेण प्रधानरूपेण वा नास्ति कस्यचित् पृथगस्तित्वम्।सर्वव्यापि ब्रह्मैव जगतः एकमात्रत्वेनाभिन्नेन चोपादानकारणम्। वेदान्तोक्तः ईश्वरः स्वस्वरूपेऽपरिणाम्यक्रियोऽपि सन् स्वमायाशक्त्येक्षणसृजनस्थितिपालनलयरूपं कार्यं करोति।सर्वशक्तिमान् सर्वज्ञः सर्वव्यापी च कारणरूपेण प्रतिष्ठापयति। वेदोपनिषत्साक्षिभिः प्रतिपादयति च — आत्मैव ब्रह्मस्वरूपं जगतः अभिन्नं निमित्तोपादानकारणमिति। यथा मृदाविच्छिन्नेन घटः तन्त्ववच्छिन्नेन वस्त्रं तद्वत्समग्रजगदेव ब्रह्मणि सत्तारूपेण निहितमस्ति। एवञ्च वैशेषिकमते जगतः कारणं परमाणवः (जडाः, नित्याश्च), ईश्वरस्तु निमित्तकारणमात्रम्। वैशेषिकमते, परमाणुः द्रव्यं वा समवायिकारणत्वेन स्वीकृतम्। वेदान्तमते तु, ईश्वर एव जगतोभिन्नकारणमस्ति सममेवेश्वरो निमित्तोपादानोभयकारणात्मकः। तत्समवायिकारणमेवोपादानकारणम्, पुनश्च,तदेव ब्रह्मस्वरूपः परमात्मेति। वेदान्तप्रस्थाने ईश्वरः सर्वशक्तिमान् सर्वज्ञः सर्वव्यापीत्येवंक्रमेण कारणरूपेण प्रतितिष्ठति, वेदोपनिषत्साक्ष्यप्रमाणेन च प्रतिपादयति यत्, आत्मा वा ब्रह्म वास्य जगतोऽभिन्नं निमित्तोपादानकारणमिति शिवम्।

**परिशीलितग्रन्थाः-**


1. गिरिः, महेशानन्दः, मानसोल्लासः (श्रीमत्सुरेश्वराचार्य-विरचितः) तद्व्याख्या च माधुरी, श्रीदक्षिणामूर्तिमठः, डी 49/9, मिश्रपोखरा, (तृतीयः संस्करणम् – 2002 ई.), वाराणसी – 221010।

2. शास्त्री, उदयवीरः, वैशेषिकदर्शनम् (अभिनवरीतिपरिष्कृत-विद्योदयभाष्यसहितम्), विजयकुमारगोविन्दरामहासानन्दः, (प्रथमः संस्करणम् – 2010), 4408, नई-सड़कः, दिल्ली – 110006।

3. शर्मा, चक्रधरः, भारतीय-दर्शनम् (आलोचनम् अनुशीलनञ्च), मोतीलाल-बनारसीदासः, चौक, वाराणसी – 221001।

4. मिश्रः, शिवशेखरः, मानसोल्लासः – एक-सांस्कृतिक अध्ययनम् (सोमेश्वरकृतः), चौखम्बा-विद्याभवन-वाराणसी, विद्याविलास-प्रेसः, (प्रथम-संस्करणः – 2023 (संवत्)), वाराणसी – 1।

5. शास्त्री, श्रीकृष्णपन्त, भगवत्पादः, श्रीरामानन्दः, ब्रह्मसूत्रम् (शाङ्करभाष्य-रत्नप्रभा), श्रेष्ठिप्रवर-श्रीगौरीशङ्करः गोयनका, अच्युतग्रन्थमाला-कार्यालयः, काशी।

6. Nikhilananda, Swami, Vedantasara (English Translation and Comments), Advaita Ashrama, Mayavati, Almora, Himalayas, 1931.

# ‘कर्तुरीप्सिततमं कर्म’ भोजरीत्या अध्ययनमेकम्

Dr. Krishna Gopal Patra, Guest Faculty,
Biswa Bangla Biswabidyalay, Bolpur, Birbhum
Mb-9547070349
Gmail- krishnagopalpatranitya@gmail.com

**शोधसारः-** शब्दसाधुत्वप्रतिपादके शब्दशास्त्रे कारकप्रक्रिया नितान्तं महत्त्वपूर्णा वर्तते। शाब्दिकनिकाये कारकाणां षड्विधत्वं सुप्रसिद्धम्। एतेषु षट्सु कारकेषु अन्यतमं कर्मकारकं प्रकृतशोधलेखस्य विषयः अस्ति। विशेषतः महर्षिपाणिनेः अष्टाध्यायीं तथा महाराजभोजस्य सरस्वतीकण्ठाभरणम् चेति ग्रन्थद्वयं समाश्रित्य कर्मसंज्ञा विमृश्यते। पाणिनीयतन्त्रे अपाणिनीयतन्त्रे च ‘कर्तुरीप्सिततमं कर्म’ इति सूत्रं समानरूपेण एव उपलभ्यते। अत्र शोधलेखे सूत्रस्य पदविन्यासः, व्याख्यानपद्धतिः, उभयोः आचार्ययोः मतवैषम्यं साम्यं च सविस्तरं प्रतिपादितम्। पाणिनेः मते ‘कारके’ इति अधिकारसूत्रात् कारकपदस्य अनुवृत्तिः भवति, यदा तु भोजमते ‘क्रियानिमित्तं कारकम्’ इति स्वतन्त्रं संज्ञासूत्रं वर्तते। अस्मात् कारणात् सूत्रार्थे किञ्चित् शब्दगतं वैलक्षण्यं दृश्यते, परन्तु फलतः उभयत्रापि अर्थसाम्यमेव— कर्ता क्रियया यत् अतिशयेन प्राप्तुमिच्छति, तत् कारकं कर्म भवति इति। ततश्चेदमपि स्पष्टं यत् महाराजभोजः पाणिनिपरम्परायाः महान् संवर्धकः आसीत्। तेन स्वव्याकरणे वार्तिक-गणपाठादीनां समावेशं कृत्वा सारल्यसम्पादनस्य प्रयत्नः कृतः। यद्यपि विषयगाम्भीर्यात् तथा च वाक्यपदीयसदृशदार्शनिकग्रन्थानां प्रभावात् कुत्रचित् काठिन्यं प्रतीयते, तथापि कर्मसंज्ञाविषये भोजस्य दृष्टिः पाणिनेः अनुगामिनी एव वर्तते। अतः भोजव्याकरणं पाणिनीयपरम्परायाः परिष्कृतं रूपमिति वक्तुं शक्यते।

**कूटशब्दाः-** कारकम्, कर्म, कर्तुरीप्सिततमम्, कर्मभेदः, भोजः, सरस्वतीकण्ठाभरणम्।

**उपोद्घातः-** ‘नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्’ इति गीतावचनात् क्रियाशीलाः जीवा इति निश्चप्रचम्। क्रिया च कारकाधीना।

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणे इत्याहुर्कारकाणि षट्।।

इति कारकषट्कं सुप्रसिद्धं शाब्दिकनिकाये। तेषु च षट्सु कारकेष्वन्यतमं कर्मकारकम्। यद्यपि कर्मसंज्ञाविधायकानि नैकानि सूत्राणि विद्यन्ते तथापि अत्र ईप्सिततमस्य कर्मसंज्ञाविधायकं सूत्रं तावत् ‘कर्तुरीप्सिततमं कर्म’ इति एकमेव। इदं हि सूत्रं पाणिनीयतन्त्रे अपाणिनीयतन्त्रे च समानतयैव परिलक्ष्यते। तद्यथा भोजपरम्परायां सुप्रसिद्धे सरस्वतीकण्ठाभरणाख्यशाब्दिकग्रन्थेऽपि सममेव सूत्रस्वरूपम्। समानसूत्रस्वरूपविधाने स्यादेव किञ्चिद्बीजम्। तथैव सत्यपि समानसूत्रस्वरूपे व्याख्यानपद्धतौ भवेदेव वैमत्यं साम्मत्यं वा। अत्र च प्रबन्धे पाणिनिनये प्रकृतसूत्रार्थः कः? भोजमते वा कः? कश्च तयोर्विशेषः? कुत्र वा भेदस्तयोः इतीमे विषयाः सविस्तरं विमृश्यन्ते।

**कर्मसंज्ञा-** डुकृञ् करणे इत्यस्माद्धातोः मनिन्प्रत्यये कर्म इति पदं निष्पद्यते। कर्मशब्दोऽयं दर्शनान्तरेषु पारिभाषिको दृश्यते। इहास्मिन् शाब्दिकनिकाये कर्तुः क्रियया यद्व्याप्यते तद्वा क्रियाव्याप्यं कर्मेति उच्यते। तच्च षट्कारकान्तर्गतकारकविशेष इति सर्वैरपि शब्दशास्त्रधुरन्धरैः उररीक्रियते। किन्तु तत्स्वरूपविषये क्वचित् भेदो परिलक्ष्यते। कर्ता क्रियया यदतिशयेन आप्तुमिच्छति तत् कर्म इति खलु कर्मस्वरूपं शाब्दिकसम्प्रदायप्रसिद्धम्। फलाश्रयं कर्म इत्यपि तत्स्वरूपम्। धातोः वस्तुतः अर्थद्वयं फलं व्यापारश्च। व्यापाराश्रयः कर्ता फलाश्रयं च कर्म।

सरस्वतीकण्ठाभरणे कर्मसंज्ञाविधायकानि तन्निषेधकानि वा सूत्राणि तावत् ‘कर्तुरीप्सिततमं कर्म’ [भोजसूत्रम्—१/१/३८][1], ‘तथायुक्तं चानीप्सितम्’ [भोजसूत्रम्—१/१/३९], ‘अकथितं च’ [भोजसूत्रम्—१/१/४०],

1 सर्वत्रैव सूत्रसंख्या हृदयहारिणीवृत्तिसहितग्रन्थानुसारमेव समुल्लिखिता, टि.आर्.चिन्तामणिसम्पादिते मूलग्रन्थे तु सूत्रसंख्या भिन्ना एव निर्दिष्टा।

'क्रियाविशेषणकालभावगन्तव्याध्वदेशाश्च' [भोजसूत्रम्—१/१/४१], 'गतिज्ञानप्रत्यवसानार्थशब्दक्रियाकर्मक-श्रुदृशीनामणिकर्ता स णौ' [भोजसूत्रम्—१/१/४२], 'हृक्रोर्वा' [भोजसूत्रम्—१/१/४३], 'दृश्यभिवाद्योरात्मनेपदे' [भोजसूत्रम्—१/१/४४], 'न नीखाद्यादिह्वायशब्दायक्रन्दाम्' [1] [भोजसूत्रम्—१/१/४५], 'वहेरनियन्तृकर्तृकस्य' [भोजसूत्रम्—१/१/४६], 'भक्षेरहिंसार्थस्य' [भोजसूत्रम्—१/१/४७], 'अधिशीङ्स्थासामाधारः' [भोजसूत्रम्—१/१/४८], 'उपान्वध्याङ्वसः' [भोजसूत्रम्—१/१/४९], 'उपवसेरभोजनार्थस्य कालः' [भोजसूत्रम्—१/१/५० ], 'अभिनिविशो वा' [भोजसूत्रम्—१/१/५१], 'दिवः करणम्' [भोजसूत्रम्—१/१/५२], ' क्रुधद्रुहोरुपसृष्टयोः सम्प्रदानम्' [भोजसूत्रम्—१/१/५३], 'यजेश्च कर्मणः करणत्वे' [भोजसूत्रम्—१/१/३३८५४] इत्येतानि। किन्तु एषु ईप्सिततमस्य कर्मसंज्ञाविधायकं सूत्रं हि 'कर्तुरीप्सिततमं कर्म' [भोजसूत्रम्—१/१/३८] इत्येव।

निबन्धेऽस्मिन् तस्य ईप्सिततमस्य कर्मसंज्ञाविधायकं 'कर्तुरीप्सिततमं कर्म' [भोजसूत्रम्—१/१/३३८] इति सूत्रस्य भोजरीत्या अध्ययनं प्रस्तूयते। भोजव्याकरणपरम्परायां कथं अस्य सूत्रस्य व्याख्यानं मूलकृता टीकाकृता च व्यधायि तत्सर्वमिह प्रतन्यते। पुनश्च कर्मणो विभागाः ये खलु प्रसिद्धाः व्याकरणदर्शने भर्तृहरिप्रभृतिभिः स्वग्रन्थेषु स्वच्छन्दं वर्णितास्तेऽप्यत्र टीकायां टीकिताष्टीकाकृता दण्डनाथनारायणेन। तेषामपि हरिग्रन्थादिभिस्सह यथामत्यालोचनं विधास्यते।

**भोजनये सूत्रार्थः-** कर्मसंज्ञां प्रतिपादयितुकामः सूत्रं सूत्रयामास सूत्रकारः भोजराजः कर्तुरीप्सिततमं कर्म इति। पदत्रयात्मकं सूत्रमिदम्। तत्र कर्तुः इति षष्ठ्यन्तं पदम्, ईप्सिततमम् इति प्रथमान्तम्, कर्म इत्यपि प्रथमान्तम्। अतिशयेन ईप्सितम् इति अर्थे इति तमप्प्रत्यये ईप्सिततमम् इति रूपम्। अत्र सूत्रे 'क्रियानिमित्तं कारकम्' [भोजसूत्रम्—१/१/३२] इति पूर्वसूत्रात् कारकम् इति पदम् अनुवर्तते। एवञ्च कर्तुः ईप्सिततमं कारकं कर्म इत्येवं सूत्रान्वयः। ईप्सितशब्दोऽत्र क्रियापरः आप्तुमिष्टः इत्यर्थबोधकः, नैव च अभिप्रेतः इति रूढिपरः। ईप्सिततमं कस्य इति चेत् कर्तुरेव। केनाप्तुमिति चेत् कारकापदानुवृत्तेः क्रियया इति लभ्यते। एवञ्च कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं भवति इति सूत्रार्थः सम्पद्यते। सूत्रार्थं प्रतिपादयति वृत्तिकारः दण्डनाथनारायणः— "कर्ता क्रियया यदतिशयेनाप्तुमिच्छति तत् कारकं कर्मसंज्ञं भवति" [2] इति। एवञ्च स्वनिष्ठव्यापारप्रयोज्यफलेन कर्तुः सम्बन्धुमिष्यमाणं यत् कारकं तत् कर्म इति फलति।

धात्वर्थः फलं व्यापारश्च। व्यापाराश्रयः कर्ता, फलाश्रयं च कर्म। तस्य च कर्तुः अतिशयेन आप्तुमिष्यमाणं कारकं कर्म इत्यर्थः। कर्त्रा स्वनिष्ठव्यापारप्रयोज्यफलेन सम्बन्धुमिष्यमाणं यत् तत्कर्म इत्याशयः। एवञ्च वाक्ये प्रयुक्तः यः धातुः तदर्थः यः व्यापारः तत्प्रयोज्यफलाश्रयं यत् तस्य अत्र कर्मसंज्ञा विधीयते प्रकृतसूत्रेण इत्यवगन्तव्यम्।

उदाहरणे सूत्रार्थसमन्वयो विधीयते। तथाहि रामो ग्रामं गच्छति। अत्र ग्रामस्य कर्मत्वं साध्यते। अत्र कर्ता रामः। गम्धात्वर्थश्च उत्तरदेशसंयोगानुकूलव्यापारः। कर्तुः गमनक्रियया आप्तुमिष्टतमः ग्रामः। अतस्तस्य कर्मसंज्ञा। कर्ता रामः तन्निष्ठव्यापारः उत्तरदेशसंयोगानुकूलव्यापारः, तत्फलं च उत्तरदेशसंयोगः। एवञ्च स्वनिष्ठोत्तरदेशसंयोगानुकूलव्यापारप्रयोज्यफलेन सम्बन्धुमिष्यमाणः ग्रामः, अतः तस्य प्रकृतसूत्रेण कर्तुरीप्सिततमं कर्म इत्यनेन कर्मसंज्ञा ततश्च 'कर्मणि द्वितीया' [भोजसूत्रम्—३/१/२०२ ] इति सूत्रेण द्वितीयायां ग्रामम् इति रूपं जायते।

**पाणिनिनये सूत्रार्थः-** कर्मसंज्ञाविधायकं पाणिनीयसूत्रं तावत् 'कर्तुरीप्सिततमं कर्म' [पाणिनिसूत्रम्—१/४/४९]। त्रिपदात्मकं सूत्रम्। कर्तुः इति षष्ठ्यन्तम्, अतिशयेन ईप्सितमिति ईप्सिततमम् इति प्रथमान्तम्, कर्म इत्यपि प्रथमान्तं पदम्। 'कारके' [पाणिनिसूत्रम्—१/४/२३] इति सूत्रमत्र अनुवर्तते। तच्च कारकमिति प्रथमान्ततया विपरिणमते। आप्तुमिष्यमाणमीप्सितम्। आप्लृ व्याप्तौ इति अस्मात् सन्नन्तात् धातोः' मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रेण वर्तमाने क्तप्रत्ययः। तथा च अतिशयेनेप्सितमीप्सिततमम्। धात्वर्थव्यापाराश्रयश्च कर्ता। ईप्सिततमम् इति उक्तम्, किन्तु केन आप्तुमित्याकाङ्क्षायां 'कारके'

1 न निखाद्यादिह्वायशब्दायक्रन्दाम् इति सूत्रस्वरूपं सवृत्तिके सरस्वतीकण्ठाभरणे।

2 हृदयहारिणीसहितं सरस्वतीकण्ठाभरणम् पृ.-१२-१३।

[पाणिनिसूत्रम्—१/४/२३ ] इत्यधिकाराबलात् क्रियया इति लभ्यते। सम्बन्धश्चात्र आप्तिः। तथा च कर्तुः स्वनिष्ठव्यापारप्रयोज्यफलेन सम्बन्धुमिष्यमाणं कारकं कर्मसंज्ञं भवतीति सूत्रार्थः जायते। उदाहरणं तावत् देवदत्तः ग्रामं गच्छति इति। अत्र कर्ता देवदत्तः, सः स्वनिष्ठव्यापारप्रयोज्यफलेन ग्रामं सम्बन्धुमिच्छति अतः ग्रामस्य प्रकृतसूत्रेण कर्मत्वम्।

**कर्मप्रभेदाः-** कर्म द्विविधम्, ईप्सितम्, अनीप्सितञ्च। तत्र तावत् ईप्सिततमस्य कर्मविधायकं सूत्रमिदमेव 'कर्तुरीप्सिततमं कर्म' इति। अनीप्सितकर्मविधायकं सूत्रं तावत् 'तथायुक्तं चानीप्सितम्' इति। कर्म त्रिविधमिति सरस्वतीकण्ठाभरणटीकाकृत् दण्डनाथनारायणः। वस्तुतः कर्म त्रिविधम् इत्यस्य ईप्सितकर्म त्रिविधमिति तात्पर्यम्। एवञ्च तन्नये कर्मणो हि त्रयो भेदाः। ते च यथा- निर्वर्त्यं विकार्यं प्राप्यं चेति। एतेषां त्रिविधकर्मणां स्वरूपं वृत्तिकारः दण्डनाथनारायणः[1] अपि सुष्ठु वर्णितवान्। तत्त्वञ्चेदमेव यद् टीकाकारः दण्डनाथनारायणः हरिप्रदर्शितमार्गेणैव कर्मभेदस्वरूपं निर्णितवान्। तद्यथा—

यदसज्जायते सद्वा जन्मना यत् प्रकाशते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्॥
प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्।
किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्॥
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते॥

अत्र श्लोकरूपेण प्रतिपादितानां त्रिविधकर्मणां स्वरूपं विस्तरशः आलोच्यते।

**निर्वर्त्यं कर्म-** तत्र तावत् आद्यं निर्वर्त्यं कर्म। तस्य लक्षणं उक्तम्— यदसज्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वर्त्यम् इति। निर्वर्त्यते निष्पाद्यते यत् तन्निर्वर्त्यम्। अर्थात् यत् पूर्वं नासीत् असद् एव परं उत्पद्यते, सद्रूपेण प्रकाशते तन्निर्वर्त्यम्। उदाहरणं यथा कटं करोति। असद्भूतं कटं सद्रूपेण प्रकाशयति। तस्मादिदं निर्वर्त्यकर्म। एवमस्मिन् उदाहरणे कटम् इति यत् पदं तदिह निर्वर्त्यं कर्म। एवमेव पुत्रं प्रसूते। जन्मना पुत्रस्य प्रकाशः अतः तस्यापि निर्वर्त्यकर्मत्वम्।

**विकार्यं कर्म-**द्वितीयं तावत् विकार्यं कर्म। एतत्कर्मणः अवान्तरभेदद्वयं विद्यते। तद्यथा प्रकृत्युच्छेदसम्भूतम्, गुणान्तरोत्पत्त्या इति। तत्र प्रकृत्युच्छेदसम्भूतं विकार्यं कर्म यथा प्रकृतेः उच्छेदात् नाशात् सम्भूतं जातं कर्म। यथा काष्ठं दहति। यत्र च कर्मणः किञ्चित् गुणपरिवर्तनं दृश्यते तद्भवति गुणान्तरोत्पत्त्या विकार्यं कर्म। यथा काण्डं लुनाति। प्रकृत्युच्छेदसम्भूतस्य दृष्टान्तस्तावत् काष्ठं दहतीति उक्तमेव। तत्र प्रकृतिः काष्ठमेव। तस्य च काष्ठस्य नाशात् भस्म जायते। तेनैतद्रूपं कर्म विकार्यं कर्म इति ज्ञेयम्। गुणान्तरोत्पत्त्या जायमानं कर्म काण्डं लुनाति। वृक्ष एव गुणान्तरेण काण्डत्वेन परिणमते। तस्य च विकार्यकर्मत्वं तस्मादेव।

**प्राप्यं कर्म-** तृतीयश्च विभागो भवति प्राप्यं कर्म। एतल्लक्षणं च क्रियाकृतविशेषाणां दर्शनादनुमानाद्वा यत्र सिद्धिर्न गम्यते तत् प्राप्यं कर्म। अर्थात् यत्र कर्मणि दर्शनात् अनुमानाद्वा क्रियाकृतविशेषता परिवर्तनं न गम्यते तत् कर्म प्राप्यं कर्म। एवमत्र दर्शनेन अनुमानेन वा क्रियायां वैशिष्ट्यं परिवर्तनं वा नावगम्यते। यथा— आदित्यं पश्यति, ग्रामं गच्छति। अत्र उदाहरणे दर्शनक्रियया गमनक्रियया वा आदित्यस्य ग्रामस्य वा किमपि परिवर्तनं न जायते। अत इह दर्शनेन अनुमानेन वा आदित्यस्य ग्रामस्य च क्रियाकृतविशेषतानवगमात् प्राप्यकर्मत्वम्।

**सूत्रे पदसार्थक्यम्-** कर्तुरीप्सिततमं कर्म इति तावत् भोजनये ईप्सितकर्मसंज्ञाविधायकं सूत्रम्। तत्र प्रश्नः समुदेति यत् सूत्रेऽस्मिन् कर्तुरिति पदं किमर्थम्? 'क्रियानिमित्तं कारकम्' इति सूत्रात् कारकपदानुवृत्तेः,तस्य च षष्ठ्यन्ततया विपरिणामेन कारकस्य ईप्सिततमं कर्म इति सूत्रार्थलाभात् पुनः कर्तुरिति पदं मास्तु। तेन च ईप्सिततमं कर्म इति सूत्रस्वरूपं सम्पद्यते। परमेवं सूत्रस्वरूपं नाम सूत्रे यदि कर्तुरिति पदं न स्यात्तर्हि माषेष्वश्वं वध्नाति इत्युदाहरणे माषाणामपि कर्मसंज्ञा स्यात्। तथाहि अत्र देवदत्तः माषेषु अश्वं बध्नाति। ईप्सिततमं कर्म इति सूत्रस्वरूपे कर्तृपदाभावे यस्य कस्यापि कारकस्य यद् ईप्सिततमं तस्यैव कर्मसंज्ञा भवति।

1 अस्यैव सूत्रस्य व्याख्याने टीकाकारः दण्डनाथनारायणः।

प्रकृतोदाहरणे च अश्वरूपस्य कर्मकारकस्य ईप्सिततमभूतानां माषाणामपि कर्मसंज्ञा प्राप्नोति। किन्तु तन्मा भूत् इत्येवमर्थं सूत्रे कर्तुरिति पदमावश्यकम्। कर्तृपदोपादाने च कर्तुः ईप्सिततमस्यैव अत्र कर्मसंज्ञा नतु यस्य कस्यचित् कारकस्य ईप्सिततमस्य। तेन माषाः यद्यपि अश्वस्य ईप्सिततमाः किन्तु नैव कर्तुः देवदत्तादेः। अतः कर्मणः ईप्सिततमत्वात् न माषाणां कर्मत्वमपि तु कर्तुः देवदत्तादेः ईप्सिततमत्वात् अश्वस्यैव कर्मत्वं सम्पद्यते। एवमत्र माषाणां कर्मसंज्ञा कथञ्चिदपि न जायते।

पुनश्च प्रश्नः भवति यदत्र सूत्रे तमब्ग्रहणं किमर्थम्? अर्थात् अत्र कर्तुरीप्सितं कर्म इत्येव तावत् सूत्रमस्तु तमब्ग्रहणं सूत्रे मास्तु। तथा चेत् उच्यते पयसा ओदनं भुङ्क्ते इत्यत्र पयसः यथा कर्मसंज्ञा न स्यात् तदर्थं सूत्रे तमब्ग्रहणम्। अन्यथा पयस अपि ईप्सितत्वात् तस्यापि प्रकृतसूत्रेणैव कर्मत्वं स्यात्। परन्तु अत्र ओदनं एव ईप्सिततमं संस्कारकं पयस्तु ईप्सितमात्रमतः तस्य कर्मत्वं यथा न स्यात् ओदनस्यैव च यथा स्यात् तदर्थं सूत्रे तमब्ग्रहणम्।

एवञ्च तमब्ग्रहणात् पयसा ओदनं भुङ्क्ते इत्यादौ पयसः न कर्मत्वम्। केषाञ्चन मते तमब्ग्रहणस्य फलं भिन्नमेव। तथा हि यदि सूत्रे तमब्ग्रहणं न स्यात्तर्हि कर्तुरीप्सितं कर्म इति सूत्रस्वरूपे 'वारणार्थानामीप्सितः' [भोजसूत्रम्-१/१/६९ ] इति सूत्रं प्रकृतसूत्रस्य अपवादभूतमेव स्यात्। तेन च वारणार्थकधातूनां प्रयोगे ईप्सितमात्रस्य अपादानसंज्ञा स्यात्। किञ्च ईप्सिततमस्यापि ईप्सितत्वात् यवेभ्यः गां वारयति इत्यादौ स्थले गोः अपि अपादानसंज्ञा आपद्येत। किन्तु सूत्रे तमब्ग्रहणात् वारणार्थकधातूनां प्रयोगे ईप्सितानां यवानाम् अपादानसंज्ञा, ईप्सिततमस्य च गोः कर्मसंज्ञा। एवम् ईप्सितस्य ईप्सिततमस्य च भिन्नविषयत्वात् नात्र बाध्यबाधकभावः। तेन च 'वारणार्थानामीप्सितः' [भोजसूत्रम्-१/१/६९ ] इति सूत्रं कर्तुरीप्सिततमं कर्म इति सूत्रस्य अपवादसूत्रमपि भवितुं नार्हति। एवञ्चात्र भट्टनागेशमते ईप्सितस्य ईप्सिततमस्य च विषयविभागार्थं प्रकृतसूत्रे तमब्ग्रहणं विधेयमिति।

**कर्मप्रदेशः-** प्रकृतसूत्रेण कर्मसंज्ञा विधीयते। कर्मसंज्ञायाः प्रयोगस्थलं यथा 'कर्मणि द्वितीया' [भोजसूत्रम्-३/१/२०२ ] इति। तेन च कर्मसंज्ञायां सत्यां 'कर्मणि द्वितीया' [भोजसूत्रम्-३/१/२०२ ] इति सूत्रेण द्वितीया विभक्तिः विधीयते।

**विमर्शः-** कर्मसंज्ञाविधायकं सूत्रं 'कर्तुरीप्सिततमं कर्म' । अनेन च ईप्सिततमस्य कर्मसंज्ञा विधीयते। पाणिनिपरम्परायां भोजपरम्परायां च सूत्रस्वरूपं समानमेव दरीदृश्यते। अतः सूत्रस्वरूपे उभयत्रापि नास्ति कोऽपि भेदः। एवं यथा सूत्रस्वरूपं समानं तथैव सूत्रव्याख्यानपद्धतिरपि समानैव। पाणिनिसम्प्रदाये कारके इति अधिकारसूत्रम्। अत्र च भोजनिकाये क्रियानिमित्तं कारकम् इति संज्ञासूत्रम्। तत्सूत्रात् कारकपदानुवर्तनात् कर्तुः क्रियया ईप्सिततमं कारकं कर्म इति सम्पद्यते। पाणिनिनये अत्र कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं भवतीति सूत्रार्थः वर्तते। तत्रैव भोजमते कर्ता क्रियया यदतिशयेनाप्तुमिच्छति तत् कारकं कर्मसंज्ञं भवति इति तत्सूत्रार्थः सम्पद्यते। प्रकृतसूत्रप्रसङ्गे पाणिनेः अष्टाध्याय्यां या दिक् प्रादर्शि सा एव भोजस्य सरस्वतीकण्ठाभरणे। एवमत्र भोजनये पाणिनिनये च सूत्रस्वरूपे व्याख्यानपद्धतौ च नास्ति कश्चित् तथाविधः भेदः विशेषो वा। पाणिनिपरम्परायाः सम्वर्धकः भोजः इति अस्मात् सुष्ठु ज्ञायते।

सारल्यसम्पादनाय व्याकरणान्तराणि प्रमथ्य भोजव्याकरणमिदं विरचितम्। वार्तिकपाठगणपाठादिकं सूत्रशरीरे संयोज्य शब्दशास्त्रमिदं नितान्तं सरलं सञ्जातम्। तथा च कारकप्रभृतीनि नैकानि तत्त्वानि स्पष्टं प्रतिपादितान्यत्र। क्वचित् ग्रन्थान्तरस्य कारिकाभिः उदाहरणैर्वा विषयं स्फुटं प्रत्यपादयत् दण्डनाथनारायणः। तेन यथा दुरूहविषयेषु स्फुटता जायते तथैव बहुत्र स्थलेषु वाक्यपदीयादिग्रन्थान्तरोद्धरणेन काठिन्यमपि अनुभूयते। वस्तुतो व्याकरणेऽस्मिन् शाब्दिकप्रक्रियया सह दार्शनिकतत्त्वान्यपि बहुत्र वर्णितानि। एवं विषयगाम्भीर्यवशादेव काठिन्यं प्रतीयते इति तु कर्मप्रभेदवर्णनावसरे एव द्रष्टुं शक्यम्। प्रकृते च सारल्यसम्पादनमस्य व्याकरणस्योद्देश्यमतस्तत्क्वचित् व्याहतमपि दृश्यते।

**उपसंहारः-** क्रियानिष्पत्तिकारणं कर्त्रादि कारकसंज्ञं भवतीति कारकपदार्थः भोजराजाभिप्रेतः। तत्र कारकषट्के अन्यतमं कर्मकारकम्। तस्य च ईप्सिततमस्य कर्मणः स्वरूपं वैशिष्ट्यं प्रभेदाश्च सोदाहरणं शोधप्रबन्धेऽस्मिन् भोजराजरीत्या यथामति प्रस्तुताः। एवं प्रचलितेऽस्मिन् कालेऽपि भोजवाक् पुनरुज्जीविता भवेत्प्रकृतप्रबन्धपठनेनेति आशास्महे।

**सहायकग्रन्थाः**

पतञ्जलिः, *महाभाष्यम्(भाष्यप्रदीपोद्योतसमुल्लसितम्), भार्गवशास्त्री जोशी* (संशोधकः), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१८।

पाणिनिः, *अष्टाध्यायी,* चौखम्बा सुरभारती प्रकाशन, वाराणसी २०१३।

भोजः, *सरस्वतीकण्ठाभरणम् (अलङ्कारशास्त्रीयम्),* कामेश्वरनाथमिश्रः(सम्पा.), चौखम्बा ओरियन्टलिया, वाराणसी, २००६।

भोजः, *सरस्वतीकण्ठाभरणम् (मूलमात्रम्)* , टि. आर् चिन्तामणिः (सम्पा.), मद्रास विश्वविद्यालयः,१९३७।

भोजः, *सरस्वतीकण्ठाभरणम् (प्रथमभागः),* शाम्बशिव शास्त्री (सम्पा.), अनन्तशयन विश्वविद्यालयः, त्रिवन्दम्, १९३५।

भट्टोजीदिक्षितः, *वैयाकरणसिद्धान्तकौमुदी(बालमनोरमातत्त्वबोधिनीसहिता),* गिरिधरः शर्मा(सम्पा.), मोतीलाल बनारसीदासः, दिल्ली, २०१०।

भर्तृहरिः, वाक्यपदीयम्(प्रकाश-अम्बाकर्त्रीव्याख्यासहितम्) तृतीयं काण्डं, द्वितीयो भागः, भागीरथप्रसादः त्रिपाठी (सम्पा.), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९७९।

मीमांसकः युधिष्ठिरः, *संस्कृत व्याकरणशास्त्र का इतिहास (प्रथमः भागः)* , हरियाणा।

वामनजयादित्यौ, *काशिका(न्यासपदमञ्जरीभावबोधिनीसहिता)* , जयशङ्करलालः त्रिपाठी (सम्पा.), तारा बुक एजेन्सी, वाराणसी २०१६।

शास्त्री विश्वनाथ, *सरस्वतीकण्ठाभरण का समीक्षात्मक इतिहास* , परिमल पाब्लिकेशन्स, दिल्ली १९९६।

# 'शाम्भवी' गीतिकाव्ये सांस्कृतिकविषयाणां समीक्षात्मकमध्ययनम्

डॉ.निशिकान्तपाण्डेयः,
नव्यव्याकरणविभागः, कैकला-आदर्शसंस्कृतमहाविद्यालयः

**शोधसारांशः** – संस्कृतकाव्यस्य चर्चा प्राचीनकालादेव भारतवर्षे प्रचलिताऽस्ति । आधुनिककालेऽपि भारतराष्ट्रस्य संस्कृतकवयः विविधप्रान्ते काव्यविरचनं कुर्वन्ति । संस्कृतसाहित्ये 'शाम्भवी' इति नामकं काव्यं सुप्रसिद्धमस्ति । तथापि अस्य काव्यस्य चर्चा प्रायशः बहुत्र न भवति इति कारणवशात् अयं प्रबन्धः निर्मातुं मम मनसि अभीप्सा जायते कश्चित् । अस्य काव्यस्य रचयित्री महामहोपाध्यायाचार्यापुष्पादीक्षितमहोदया । अत्र त्रयस्त्रिंशत् संख्यकाः कविताः विद्यन्ते । एतत् अभिनवं गीतिसंकलनम् । शाम्भव्यां संकलितेषु त्रयस्त्रिंशत् कवितासु प्रायेण बहुसांस्कृतिकविषयाः प्रयुक्ताः सन्ति यथा – इति शोचति भारतभूमिरियम्, यतन्ते के, लोकोऽयम्, ग्रामवधूटी च। प्रबंधेऽस्मिन् दीक्षितमहोदये विरचिते "शाम्भवी" इति गीतिकाव्ये प्रयुज्यमानकवितासु सांस्कृतिकविषयाणां समीक्षात्मकमध्ययनम् आलोकपातकरणार्थमत्र लघुप्रयासमेकं कृतम् ।

**विशेषशब्दः (Keywords)**– 'शाम्भवी' , सांस्कृतिकी परम्परा।

**भूमिका**–प्राचीनकालादेव भारतवर्षे संस्कृतस्य प्रभावः परिलक्ष्यते । बहवः प्राच्याः पण्डिताः, विचक्षणविद्वांसः नवनवावधारणाः दत्तवन्तः। प्राचीनमहिलासु काश्चनेव प्रसिद्धाः भवन्ति । अतिविशाले वैदिकवाङ्मये गार्गी-मैत्रेयी-लोपामुद्रादीनां नामानि उल्लेखयोग्यानि । गङ्गा देवी, तिरुमलाम्बा, क्षमाराव , कमलापाण्डेयः इत्यादि कवयित्रीणां नामानि आधुनिकयुगे सम्पूर्णरूपेण उपलब्धानि भवन्ति इति महदानन्दस्य विषयः । विंशतिशतिकाया एका प्रमुखा आधुनिकी कवयित्री अस्ति पुष्पादीक्षितमहोदया , तत्र कोऽपि संशयो नास्ति । सा न केवलं कवयित्रीरूपेण व्याकरणशास्त्रे पारंगतरूपेणापि परिचिता । भारतवर्षस्य सर्वत्रैव सा संस्कृतस्य प्रचारसेवा कुर्वती अस्ति । सा "सौन्दर्यलहरी" इति ग्रन्थस्य संस्कृतानुवादिका, व्याख्याकर्ती तथा 'अग्निशिखा' 'शाम्भवी' च इति गीतिकाव्यग्रन्थस्य रचनां च कृतवती ।

असाधारणा काव्यप्रतिभा, गहनं शास्त्रीयं ज्ञानम् – एतत् सर्वं मिलित्वा साहित्यस्य व्याकरणस्य च जगति प्रशंसितम् अद्वितीयं स्थानं निर्मान्ति पुष्पादीक्षितमहाभागाः ।

महामहोपाध्यायाचार्या पुष्पादीक्षित अन्तर्राष्ट्रीयख्यातिसम्पन्ना व्याकरणविदूषी तथा साहित्यिक-कवयित्री च , हिन्दी-संस्कृत-भोजपुरी-आङ्ग्लभाषायां काव्य-नाट्य-कथा-समीक्षायाः च लेखिकाऽस्ति । तस्याः ज्ञानं यथा गभीरम्, तस्याः काव्यरीति अपि प्रभावशालिनी, बोधगम्या च । तस्याः कृतयः जनानां मनांसि असीमितं प्रभावम् उत्पादयन्ति ।

पुष्पादीक्षितमहोदया स्वकीये 'शाम्भवी' इति गीतिकाव्ये विविधसांस्कृतिकविषयाणां सजीवचित्रणं करोति । वस्तुतः 'शाम्भवी' नाम लोकप्रियगीतिकाव्यं समसामयिकसामाजिक-चित्राणि समुद्घाटयति । प्रायः सर्वाः कविताः सामाजिकव्यवस्थायां व्याप्तानां प्रवृत्तीनां परिदशानां च सजीवचित्राणि उपस्थापयन्ति ।

पुष्पादीक्षितमहोदयायाः काव्ये सांस्कृतिकविषयादिकं समुचितविम्बैः उद्भासितं क्रियते । अतः गीतिकाव्येऽस्मिन् प्रतिफलितानां विविधसांस्कृतिकविषयाणां समीक्षणम् उपस्थाप्यते ।

**सांस्कृतिकविषयः**– पुष्पादीक्षितमहोदयया यत् गीतिकाव्यं विरचितं तस्य समसामयिकं सांस्कृतिकमहत्त्वं दरीदृश्यते । "शाम्भवी" गीतिकाव्यस्य परिशीलनेन विषयोऽयं स्पष्टो भवति यत् अस्माकं राष्ट्रस्य विशाला सुसमृद्धा सांस्कृतिकी परम्परा वर्तते । कवेः दृष्टिपथि एतत् सम्प्रति क्षीयमाना प्रतिभाति । काव्येऽस्मिन् अधिककवितायां सांस्कृतिकमूल्यानां यशोगानं कृत्वा अपि सांस्कृतिकवमूल्यनस्य चित्रम् अङ्कितमस्ति । यथा - "इति शोचति भारतभूमिरियम्" इति कवितायाम् उपलभ्यते–

**"समिदाहरणाय समाकुलिता असुभिर्गुरुभिर्बहुधा तुलिताः**
**न मनोरथमत्तगजाकुलिता अनवाप्तिशुचापि न ये लुलिताः ।**
**मनसस्ततमञ्चसमाकुलितैर्नहि कामपिशाचनटैर्वलिताः ।**
**वटवः पटवो मम कुत्र गता इति शोचति भारतभूमिरियम् ॥"[1]**

अत्र कवयित्री भारतवर्षस्य सांस्कृतिकपरम्परां स्मरणं कृत्वा व्याकुलिता भवति । यतो हि प्राचीनकाले भारतवर्षे गुरुकुलपरम्परा आसीत्, यत्र गुरोपदेशं स्वीकृत्य शिष्याः समिदाद्याहरणाय गच्छन्ति । परन्तु कस्मिन् कार्ये यदि असफलता आयाति तर्हि शिष्यानां मनसि दुःखं जायते । परन्तु साम्प्रतिककाले शिष्याः गुरो उपदेशं न स्वीकुर्वन्ति । एवमेव प्राचीनभारतवर्षे आश्रमव्यवस्था प्रचलिता आसीत् । कालिदासस्य रघुवंशे प्रथमसर्गे वर्णितमस्ति –

**"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥"[2]**

प्राचीनभारतवर्षे राजानः प्रजानां पितृतुल्याः आसन् । यथा –

**"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।**
**स पिता पितरस्तासां केवलं जन्महेतवः ॥"[3]**

अस्य कथनस्य तात्पर्यमस्ति – ब्रह्मचर्यावस्थायाम् इन्द्रियनिग्रहाः ब्रह्मचारिणः विद्यां लभन्ते स्म । गृहण्यः स्वकीयपतिमेव दृष्ट्वा निरन्तरमाह्लादिता अभवन् , ते स्वयमेव सर्वकार्यं सम्पादयन्ति स्म । ते सत्चरित्राः सन्तः सर्वान् धर्मोचिताचरणं कुर्वन्ति स्म । वाणप्रस्थाश्रमे मुनिवत् आचरन्ति स्म । सन्यासाश्रमे वितरागः सन् योगानुसारं कषायवस्त्रं धारयित्वा तनुं त्यजन्ते स्म । राजानः औरसपुत्रमिव सर्वान् पालयन्ति स्म । किन्तु कवयित्री वर्तमानसमये एतत् सर्वं न विलोकयति परन्तु सर्वत्र विपरीतरूपं दृष्ट्वा क्षोभं प्रकाशयति । यथोक्तम् –

**"गृहिणः क्व गता निजदारपरा**
**इति शोचति भारतभूमिरियम् ॥**
**यदशान्तमतिर्यतिरभ्रगतिर्न विवेकजबोधकृते रमते ।**
**नहि पुत्रकलत्रकुटुम्बकुलं तदपीह मुधा यशसे यतते ॥**
**विगतज्वरता न निमेषमिता**
**किमितीह कषायपटं दधते ॥"[4]**

'भारतस्य प्रतिष्ठे द्वे - संस्कृतं सस्कृतिस्तथा' जयघोषोऽयं सर्वत्र गुञ्जीतोऽस्ति । कवेरभिप्रायः यत् तद् गुञ्जनं वर्तमानकालेऽपि सर्वदा हृदयेषु धारणीयम् । एतादृशे संस्कृतसंस्कृतिमये भारतवर्षे यदि संस्कृतस्य राष्ट्रभाषात्वेन प्रतिष्ठापयितुम् ऐतिह्यपूर्णभारतीय-संस्कृतिप्रतिष्ठाय च यदि सफलप्रयासो न क्रियते तर्हि दुर्भाग्यस्य विषयः। अनेन वातावरणेन कवयित्री क्षोभिता भूत्वा स्वविचारं प्रकटयति –

**"निलीना भारतीया संस्कृतिर्यत् पश्चिमध्वान्ते ।**
**तदुद्धाराय खे मार्तण्डवद् भातुं यतन्ते के ॥**
**भवेद् राष्ट्रस्य भाषा संस्कृतं वेदः सदाचारः।**

---

[1] शा.,पृ.२
[2] र.व.,१/८
[3] तदेव,१/२४
[4] शा.,पृ.४

**अखण्डं भारतं भूयादिति ध्यातुं यतन्ते के ॥"[1]**

एवम् अस्मिन् काव्ये कवयित्री समाजे प्रतिफलितायाः सांस्कृतिकावस्थायाः चित्राङ्कणं कृतवती। साम्प्रतिककाले अतीव वेदनाप्रदायका कथा 'शाम्भवी' नामके गीतिकाव्ये प्रतिफलिताऽस्ति। कविः कथयति यत् गृहेषु किं शान्तिप्रदायकं किं वा नास्ति तत् आधुनिकव्यस्तजीवने निमग्नाः पुत्रादय अनुभवं कर्तुं न शक्नुवन्ति। ते निसङ्गजनं प्रत्यपि विद्वेषाचरणं कुर्वन्ति। यथोक्तम् –

**"किं करोमि मदीयगेहे कोऽपि मां नहि परिचिनोति।**

**क्षीरजलधौ कौस्तुभं मीनो न किं बहुधा धुनोति ॥"[2]**

**"योऽयमेकाकी चरन् विश्वं कुटुम्बं स्वीकरोति।**

**तमपि निःसङ्गं जनं लोको मदेन तिरस्करोति ॥"[3]**

'लोकोऽयम्' कवितायां कवयित्री कथयति यत् यदि कोऽपि जनः धर्मोपदेशप्रदानं करोति तदा तस्य कृते अपमानं प्रदर्शितमस्ति । यथोक्तम् –

**"जगद् यत् पूर्वभुक्तं तत् परप्रीत्या पुनर्भुञ्जन्।**

**अहो धर्मोपदेशे सर्वदा निद्राति लोकोऽयम् ॥"[4]**

'ग्रामवधूटी' शीर्षककवितायां नवविवाहितायाः ग्रामवधूनां मार्मिकं चित्रणं दृश्यते। ग्रामवधूनां विरहवेदनायाः चित्रणं कृत्वा कवयित्री वर्णयति –

**"उल्बणैः सायकैर्मर्मसु क्षोभिता साहमेषा मृशन्ती मनःपीडनम्।**

**वायुना नीयमानेव कादम्बिनी प्रेममर्यादया भिन्नधैर्या सखे ॥"[5]**

अस्मिन् श्लोके उक्तमस्ति यत् कामिन्याः हृदयेषु उल्बणैः सायकैः यथा प्रहारः क्रियते तथा कामवाणैः नववध्वः क्षोभिताः भवन्ति। एषा मनोवेदना यथा तथा सहमाना वर्तते। नववधूनां स्थितिः वायुवेगेन नीयमाना कादम्बिनी इव प्रतिभाति। प्रेममर्यादया ग्राम्यवातावरणेन च ते मनोवेदनां न प्रकटयन्ति। ग्रामवधूः स्वप्रियं पतिं सम्बोधयति – **"चन्दनैश्चर्चितं ते वपुर्दृश्यते व्योममध्यस्थिते शीतरश्मेस्तनौ। हन्त! हस्तौ प्रसार्योपतिष्ठे यदा मेघमालाभिराच्छाद्यते तत् सखे ॥"[6]**

अर्थात् "हे सखे ! चन्दनचर्चितं तव शरीरं तथैव प्रतिभाति यथा चन्द्रस्य शरीरमेव। अहं यावदेव हस्तौ प्रसार्य तं स्वीकर्तुमिच्छामि तावदेव तद् शरीरं मेघमालाभि आच्छादितं भवति। "एतदेव मम दुर्भाग्यम्।"

सा पत्युः प्रवासगमनं निन्दां करोति। सा स्पष्टरूपेण प्रकाशयति यत् यस्मिन् गृहे प्रियतमो नास्ति तद् प्रकृतगृहं नास्ति। यद्यपि नववधू नानाविधगृहकार्येषु संलग्ना भवति तथापि प्रियतमं न विस्मरति। वध्वाः कामिन्याः स्थितिः गृहे तथैव अस्ति यथा पञ्जरबद्धस्य शुकस्य अस्ति। यथोक्तम् –

**"तदगृहं नास्ति यस्मिन् न ते संस्थितिर्व्यापृता गेहकार्ये न ते विस्मृतिः।**

**पञ्जरे चेष्टतेऽसौ शकुन्तो भृशं धिग् धिगस्ति त्वदीयं प्रवासं सखे ॥"[7]**

---

[1] तदेव,पृ.१८
[2] शा.,पृ.२२
[3] तदेव,पृ.२४
[4] तदेव,पृ.९
[5] शा.,पृ.३०
[6] तदेव,पृ.३१
[7] शा.,पृ.३१

'ग्रामवधूटी' इति कवितायां समसामयिकपरिदशायाः चित्रणं द्रष्टुं शक्यते । 'ग्रामवधू' या अद्यतनीया गृहवधू इव अस्ति सा दूरवाणीयन्त्रेण स्वकीयं मनोभावं प्रियतमं प्रकाशयितुं न पारयति । अतः कवयित्री कथयति –

**"वाचनं नैव जाने न वा लेखनं सम्भवेद् भावनानां कथं प्रेषणम्**

**आगतं श्रावणे भावि ते निश्चितम् ज्ञापिका मन्मनोवेदनयं सखे ।।"[1]**

कथनस्य तात्पर्यमस्ति यत् ग्रामवधू लज्जावरणेन सदैव आच्छादिता भवति । अतः स्वकीयमनोभावं प्रकाशयितुं न शक्यते। सा लेखनमपि न जानाति, अतः समाजे प्रचलिता निरक्षरता हि सूच्यते । यतो हि श्रावणमासे प्रियतमस्य आगमनं सुनिश्चितं भवति, अतः नववधूनां महदानन्दस्य विषयोऽस्ति ।

मेघदूतस्य पूर्वमेघे श्लोकोऽयं प्राप्यते –

**"प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी।**
**जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।**
**स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै**
**प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहारः ।।"[2]**

'शाम्भवी' इति गीतिकाव्यस्य परिशीलनेन ज्ञायते यत् अस्मिन् गीतिकाव्ये विभिन्नाभिः कविताभिः समाजेषु राष्ट्रेषु च प्रचलितानां कुव्यवस्था- कुप्रवृत्तिदीनां प्रति कवेः महान् क्षोभः प्रस्फुटितो वर्तते । अस्माकं समाजव्यवस्था भारतीयसंस्कृत्यनुगुणं पालिता संबर्धिता संरक्षिता च भवेत् । परन्तु समाजे तद् विपरीतं रूपं दृष्ट्वा कवयित्र्याः मनः व्यथितो भवति । अत्र प्रायः सर्वाः कविताः कवयित्र्याः अन्तर्वेदनायाः मूर्तस्वराः सन्ति । समाजे भारतीयसांस्कृतिकैतिह्यस्य क्षीयमानं स्वरूपं दृष्ट्वा कवयित्री व्यथयति। अतः एव कवयित्री आक्षिपति –

**"भावकर्मणोर्यङः फलं परार्थता कुतः ।**
**आत्मनेपदेन यैः सदा पदं निधीयते ।।**
**यङ्लुकं प्रपद्य धातुभिः परार्थमाप्यते ।**
**आत्मनः पदं तथैव किञ्जनैर्न हीयते ।।**
**पूर्ववत्सना समो जनोऽपि नैव दृश्यते ।**
**व्यत्ययो न येन कस्यचित् पदे विधीयते ।।**
**पञ्चसंख्यया यथा मुधैव षट्त्वमाप्यते ।**
**अग्रगण्यता तथाद्य दुर्जने निधीयते ।।"[3]**

कवयित्री भारतवर्षे प्राचीनगुरुकुलशिक्षाप्रणालीं संस्थापयितुम् अभिलषति । सा आधुनिकतायाः विरोधीनि नास्ति । किन्तु राष्ट्रीयतायाः संस्कृतसेवायाः च समुन्नतिम् अभिलषति । उपयुक्तपरिशीलनेन वक्तुं शक्यते यत् जनेषु नवजागरणसृष्टौ शाम्भवीकाव्यस्य महत्त्वं सर्वदा स्वीकरणीयम् ।

**ग्रन्थपञ्जी**

दीक्षित, पुष्पा। शाम्भवी। राष्ट्रीयसंस्कृतसंस्थानम्, २०१२

मिश्रः, धारादत्तः अनुवादकः सम्पादकश्च। रघुवंशमहाकाव्यम्। मोतीलालबनारसीदास, 1983

पाण्डेयः जनार्दनशास्त्री अनुवादकः सम्पादकश्च। मेघदूतम्। मोतीलालबनारसीदास, २०१३

[1] तदेव,पृ.३१
[2] मे.दू.पू.मे.,४
[3] शा.,पृ.५७

# बौद्धज्ञानपरम्परायां नित्यानित्यविनिर्मुक्तः शुद्धशून्यवादः

डा. शान्तनुकुमारचक्रवर्ती
अतिथि-अध्यापकः, बौद्धदर्शनविभागः
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः

**शोधतत्त्वसारः**– शून्यवादमङ्गीकुर्वतां दार्शनिकानां माध्यमिकख्याया समाख्यातिरिति सुविदितं सर्वेषाम् । महायानसाम्प्रदायिकग्रन्थेषु प्रज्ञापारमित्यादिष्वितस्ततो विक्षिप्त एव शून्यवादः समलक्ष्यते । सर्वं क्षणिकं क्षणिकम्, दुःखं दुःखम्, स्वलक्षणं स्वलक्षणम्, शून्यं शून्यमिति उपदेशचतुष्टये चरमोपदिष्टं यत् सर्वं शून्यं शून्यमिति तदेव प्रकृतं तथागताभिप्रेतमिति ये बौद्धाः मन्यन्ते, ते एव शून्यवादिनो माध्यमिका इति प्रसिद्धिः । तथा च यत् किञ्चिदवलोक्यते, यदनुभूयते वा, तत् सर्वं न सत् नाप्यसदिति भावाभावविलक्षणो मध्यमः पन्थाः यतो गृहीतस्तस्मादेव ते माध्यमिका इत्युच्यन्ते ।

जीवति तथागते न बौद्धदर्शनं प्रवर्तितमिति परिज्ञातं सर्वैः। दर्शनाकारेण च बौद्धमतेषु शून्यवादस्यैव प्रथमतः प्रवर्त्तनमित्यप्यैतिहासिकानां सिद्धान्तः। तत्राचार्यप्रवरेण महामतिना नागार्जुनेन शून्यवादस्य प्रसिद्ध एव दार्शनिकग्रन्थो माध्यमिककारिकासङ्गकः। श्लोकाकारेण व्यरचि । ततः प्रभृत्येव शून्यवादस्य दार्शनिकमर्यादापरिप्राप्तस्य बाहुल्येन प्रचारः समवृत्तः।

कूटशब्दाः – माध्यमिकः, नागार्जुनः, चतुष्कोटिविनिर्मुक्तः, प्रतीत्यसमुत्पादः, निःस्वभावः, संवृतिः, परमार्थः, निर्वाणम्, प्रज्ञापारमिता।

## भूमिका –

**शून्यज्ञानमयी देवीं शून्यानां शून्यसाक्षिणीम् ।**
**वन्दे शिवमयीं शक्तिं शून्यारण्यविहारिणीम् ।**

परमकारुणिकेन भगवता वूद्धेन स्वमुखारविन्देनैव यन्माध्यमिकमतं प्रतिपादितं तस्माद् विनिर्गतमिदं माध्यमिकसिद्धान्तसम्वलितं अभिमतं दार्शनिकतत्त्वगवेषकाणां कृतेऽतीव महत्त्वपूर्णं वर्त्तते । अनेनैव भगवता बुद्धेन जगन्मङ्गलनिदानभूतस्यार्याष्टाङ्गिकमार्गस्योपदेशः कृतस्तस्यैव वुद्धोपदेशस्य समालोचनं प्रकुर्वाणैर्बौद्धशिष्यैः स्व-स्व प्रतिभया नानार्थभेदान् कल्पयित्वा कालान्तरे स्व-स्वमतानि प्रतिष्ठापितानि तेन बौद्धसम्प्रदायस्याष्टाद-शविभागाः जाताः। अष्टादशसम्प्रदायानामाकलितदार्शनिक-सिद्धान्तानामालोड़नप्रत्यालोड़-नादाचार्यैर्विद्वद्भिश्चत्वारो दार्शनिकसम्प्रदायाः प्रकल्पितास्तु एव च मुख्यतमाः । एतेषु चतुर्षु दार्शनिकसम्प्रदायेषु माध्यमिकदर्शनं शून्यत्वपदवाच्यतामारुरोह ।

सर्वं शून्ये प्रतिष्ठितमिति सिद्धान्तात् शून्यता इति पदेन अभावत्वं न ग्राह्यम्, यतो अभावो हि सापेक्षः शून्यता च निरपेक्षा, शून्यत्वं चतुष्कोटिविनिर्मुक्तत्वमिति माध्यमिकाः वदन्ति ।

**न सद् नासद् न सदसद् न चाप्यनुभयात्मकम् ।**
**चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥**[1]

भारतीयज्ञानपरम्परायां नागार्जुनः शङ्कराचार्यश्च द्वावुपासकौ दिशोविदिशश्च विजेतुमिमं भारतभुवंपरिक्रम्य स्वस्वप्रतिभाकौशलेनास्मान् कृतार्थौ कृतवन्तौ। यद्यप्याचार्यशङ्करः निरीश्वरवादं शून्यवादञ्च निराञ्चक्रे तथापि मायावादस्यानिर्वचनीयतां प्रतिपादयता तेन सौगतमतस्यानिर्वचनीयताङ्गीकृता । अतएव विशिष्टाद्वैतिनः शङ्कराचार्यं प्रच्छन्नबौद्धः इति प्रतिपादयन्ति। मन्मते नायमाचार्यशङ्करो प्रच्छन्नबौद्धः, परं नागार्जुन एव प्रच्छन्नवैदिक इत्येवं वाच्यम् । शक्तेः सत्ता द्विविधरूपेण प्रविभक्ता, शून्यरूपा, अशून्यरूपा च वेदारूपा, अवेदरूपा, विज्ञानरूपा, अविज्ञानरूपा वा, अजा अनजा चेत्यादयोऽस्यैवार्थान्तराणि। इयं शक्तिर्या आद्या शक्तिरित्युच्यते सा तां स्वयमुद्घोषयति 'अहं ब्रह्मस्वरूपिनी मत्तः प्रकृतिपुरुषात्मकं जगत् शून्यमशून्यञ्चायमानन्दा-

[1]मा.वृ.च.की.प्र.

नन्दौ, अहं विज्ञानाविज्ञाने अहमखिलं जगत्। शून्योऽहमशून्योऽहम्, वेदोऽहमवेदोऽहम्, अजाहमनजाहमधश्चोर्ध्वाश्च तीर्यक् चाहम्।'[1] उभावाचार्यो शक्तेरूपासकावास्ताम्, नागार्जुनः शून्यरूपायाः शङ्करश्चाशून्यरूपायाः । ये शून्यमुपासते ते वेदविरुद्धा सन्तोपि शून्यवादानुयायिनोबौद्धा वस्तुतोऽध्यात्मविद्यारहस्योपासका एव । वैदिकधर्मावलम्बिनः शङ्करमतानुयायिनोऽद्वैतवेदान्तिनो वा अनिर्वचनीयरूपा या पारमार्थिकसत्ता तस्या उपासका एव । नागार्जुनः यथा सद्, असद्, सदसद्, सदसद्भिन्नत्वरूपेण चतुष्कोटिविनिमुक्तत्वरूपां शून्यतां प्रतिपादयति, एवमेव भगवता शङ्करेणापि सद् असद् सदसद् भिन्नतादिविलक्षणरूपेयं माया वर्त्तत इत्युक्तम्।

आचार्यशङ्करस्य माया नागार्जुनस्य शून्यता च एकात्मिका शक्तिः सा चावयवावयवि-भावरूपा आद्यायामेव शक्तावधिष्ठिता, माया अव्यक्तरूपेण तिष्ठति साचेन्द्रियैरगम्या चक्षुषा वाचा तपसा कर्मणा वा अग्राह्या। अतएव मुण्डकोपनिषदि "न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा"[2] इत्युक्तम्। वृहदारण्यकेऽपि "अगृह्यो न हि गृह्यते"[3] इति प्रतिपादितम्, एवमेव माध्यमिककारिकायाम् –

**अपर प्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम्।**
**निर्विकल्पमनानार्थम् एतत् तत्त्वस्य लक्षणम्।**[4]

अत्र नास्मिन् परप्रत्ययोऽस्तीति अपरप्रत्ययम्, परोपदेशागम्यम्, स्वयमेवाधिगन्तव्यम् इत्यर्थः। अपरप्रत्ययं भावानां यत् स्वरूपं तत् तत्त्वम्। प्रपञ्चः हि वाक्, प्रपञ्चयति अर्थान् इति कृत्वा, प्रपञ्चैः अप्रपञ्चितं वाग्भिः अव्याहतमिति। विकल्पः चित्तप्रचारः। तद् रहितत्वात् तत् तत्त्वं निर्विकल्पम्। नानार्थं भिन्नार्थम्, न नानार्थम् अनानार्थम्, अभिन्नार्थमित्यर्थः।

विन्दुरूपा शून्या एकात्मिकाशक्तिः सा वैदिकावैदिकमतपक्षपातिभिश्च सेव्यमानेति-मत्वा शून्याशून्ययोर्विवादः परिहर्तव्यः। वेदे न सद् नासद् इत्यादिरूपेण नासदीयसूक्ते यत् प्रतिपादितं तदेव बौद्धाश्चतुष्कोटिविनिर्मुक्तत्वरूपां शून्यतामुदघोषयन्ति। सृष्टे प्रागिदं जगन्महाप्रलयेऽन्तर्लीनम्, तदानीं न सद् नासद् न सदसदासीत्परं किमप्यव्यक्तं तत्त्वमन्तर्हितम्। आचार्यनागार्जुनः शून्यतां सदसद्भिन्नां प्रतिपादयति । आचार्यशङ्करश्च सदसद्भिन्नत्वादिविलक्षणरूपेयं माया वर्तत इति प्रतिपादयति । शून्यता च माया चानिर्वचनीयेत्यनेनाव्यक्तरूपा महाप्रलयन्तर्गतकालीना या शक्तिः सैव ग्राह्या नान्येतिकृत्वा शून्यता माया चैकस्या एव शक्तेर्वोधिका।

यदि युक्त्या नोपपद्यते इति कृत्वा सर्वमिदं वाह्यमाध्यात्मिकं भावजातं शून्यमिति प्रतिपादितम्। ननु च एवं सति वहवश्च महान्तश्च दोषा आपद्यन्ते । कथं कृत्वा ? यदि सर्वमिदं शून्यं स्यात्, तदा यच्छून्यं तन्नास्ति, यच्च नास्ति, तदविद्यमानत्वाद् वन्ध्यापुत्रवन्नैवोत्पद्यते न चापि निरुध्यते इति न कस्यचित् पदार्थस्य उदयो व्ययश्च । तदभावाच्च चतुर्णामार्यसत्यानामभावः ते शून्यवादिनः प्रसज्यते। कथं कृत्वा ? इह हि पूर्वहेतुजनिताः प्रतीत्यसमुत्पन्नाः पञ्चोपादानस्कन्धाः दुःखतया विपरिणामदुःखतया च संस्कारदुःखतया च प्रतिकूलवर्तिताच्च पीड़ात्मकत्वेन दुःखमित्युच्यते। एतच्च दुःखमार्या एव विपर्यासप्रहाणे सति दुःखमिति सञ्जानते, न अनार्याः, विपर्यासानुगतत्वात्, यथादर्शनं च पदार्थस्वभावव्यवस्थानात्। यथा हि विपर्यस्तेन्द्रियाणां मधुरस्वभावमपि गुड़शर्करादिकं तिक्ततया उपलभ्यमानानां ज्वरादिरोगातुराणां तिक्ततैव सत्यं तज्ज्ञानापेक्षया, न माधुर्यम्, तेनात्मना तस्य वस्तुनोऽनुपलभ्यमानत्वात्, एवमिहापि यद्यपि पञ्चोपादानस्कन्धा दुःखस्वभावा भवन्ति, तथापि ये एतान् दुःखात्मकान् पश्यन्ति, तेषामेव दुःखं व्यवस्थाप्यते, न विपर्यासानुगमादन्यथोपलभ्यमानानामिति, अतः आर्याणामेव दुःखात्मता सत्यमिति कृत्वा दुःखमार्यसत्यमित्युच्यते।

**शून्यतायाः प्रयोजनम्-** यदि सर्वमेव शून्यं तदा सर्वेषामभावे सिद्धे इष्टानिष्टफलानि धर्माधर्मादीनि तथा लौकिकव्यवहाराश्च न सिद्ध्येयुरिति किं वा शास्त्रेण ? यतो नास्त्युपदेष्टा, न चाप्युपदेशः, न वा उपदेष्टव्यः, अतः कस्मै केनेदं शास्त्रमुपदिश्यत इति शून्यवादिनामपि वचनं निरर्थकमेव। तथाचोक्तं मध्यमकशास्त्रे पूर्वपक्षाभिप्रायव्याख्यानावसरे –

---

[1]अथर्वशीर्ष मू. रहस्य

[2]मु. उ.

[3]वृ. उ.

[4]मः, शाः १८/९

**शून्यतां फलसद्भावमधर्मं धर्ममेव च।**
**सर्वसंव्यवहारांश्च लौकिकान् प्रतिवाधसे ॥**[1]

शून्यतां व्रुवाण इत्यनेन सम्बन्धः । यदा सर्वमिदं शून्यम्, यदा सर्वमेव नास्ति, तदा सर्वान्तःपातित्वाद्धर्माधर्मौ तद्धेत्युकेन इष्टानिष्टफलेन न सम्भवतः । सर्व एव चामी लौकिका व्यवहाराः – कुरु, पच, खाद, तिष्ट, गच्छ, आगच्छ इत्येवमादयोऽपि सर्वान्तर्गतत्वात् सर्वधर्माणां च शून्यत्वात्रैव युज्यन्ते इति, अतो नायं यथापवर्णितो न्यायो ज्यायानिति ॥[2]

त्तत्रेदं प्रत्युच्यते शून्यवादिभिः – शून्यताप्रयोजनं शून्यतास्वरूपं च सम्यगपरिजानता प्रतिवादिना एवमाक्रोशः क्रियते। यतः सर्वं नास्तीत्युक्त्या उच्छेदवाद एव सूच्यते । न तु वयमुच्छेदवादिनः । शून्यतावादस्य च प्रागेववार्थावधारणं कृतमिति न पुनरिहोच्यते । अथ शून्यतायां किं प्रयोजनं तदप्युक्तमात्मपरीक्षाप्रकरणे –

**कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशा विकल्पतः।**
**ते प्रपञ्चात् प्रपञ्चस्तु शून्यतायां निरूध्यते ॥**[3]

तस्मात् सर्वेषां प्रपञ्चानां निरवशेषोपशमार्थं शून्यता समुपदिष्टा । अतः प्रपञ्चोपशम एव शून्यतायाः प्रयोजनम् । प्रतिवादिना पुनर्नास्तित्वमेव शून्यतार्थं परिकल्पयता प्रपञ्च एव परिवर्ध्यते। न तु शून्यत्वं ज्ञायते तेन। अत एवात्मपरीक्षाप्रकरणे प्रतिज्ञयोमुक्तम्–

**अपरप्रत्ययं शान्तमिति ।**[4]

शून्यताया निर्वाणहेतुत्वम् – विना शून्यतया शून्यतामन्तरेण चित्तं विज्ञानं सालम्वनं वद्धं संयतम् आलम्वनासङ्गपाशेन । समाधिवलात् कियत्कालं निवृत्तमपिपुनरुत्पत्तिमद् भवति। समापद्यमानानां तावत्कालं चित्तचैत्तनिरोधेऽपि पुनस्तदुत्पत्तिः स्यात्, तथा अन्यत्रापि इत्यर्थः, उपलक्षणं चैतद् । तथा निरोधसमापत्तिरिति । यतः शून्यतामन्तरेण न भिक्षुता न निर्वाणमुपपद्यते, ततः शून्यतैव भावनीयमिति । येन कारणेन विना शून्यताया चित्तं वद्धमुत्पद्यते, तेन कारणेन निर्वाणाद्यर्थी शून्यतामेव भावयेत् । तद्भावना हि क्लेशप्रहाणं निर्वाणं चाधिगमयति। न केवलैव सत्यादिभावनेति यावत्, सालम्वनत्वात् । भगवानाह –'बोधिसत्त्वेन महासत्त्वेन एवमप्रतिष्ठितं चित्तमुत्पादयितव्यम्, न क्वचित् प्रतिष्ठितं चित्तमुत्पादयितम् रूपप्रतिष्ठितं चित्तमुत्पादयितव्यम्, न शब्दगन्धरसस्प्रष्टव्यप्रतिष्ठितं चित्तमुत्पादयितव्यम् इति ।'

प्रपञ्चनिवृत्तिस्वभाव एव शून्यतापदार्थः – इति सर्वेषां नास्तित्वं निर्दिशता प्रतिवादिना शून्यतैव न ज्ञायते । एवं भगवतो गाथावचनं विद्यते –

**यः प्रत्ययैर्जायति स ह्यजातौ**
**न तस्य उत्पादु स्वभावतोऽस्ति।**
**यः प्रत्ययाधीनु, स शून्यु उक्तो**
**यः शून्यतां जानाति सोऽप्रमत्तः ॥**[5]

**शून्यताया सत्यद्वयव्यवस्था –**

**मध्यमकशास्त्रे सत्यद्वयव्यवस्था वर्तते। यथा –**
**द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना।**
**लोकसंवृतिसत्यञ्च सत्यञ्च परमार्थतः ॥**[6]

आचार्यशान्तिदेवेनोक्तम् –

---

[1]म. सं १४/६
[2]प्रः.पः.टी.
[3]मः, शा. २५/२
[4]मः, शाः, १८/९
[5]मः, शाः,२४/७, प्रसन्नपदा।
[6]मः, शाः, २४/८

**संवृतिः परमार्थश्च सत्यद्वयमिदं मतम् ।**
**वुद्धेरगोचरस्तत्त्वं वुद्धिः संवृतिरुच्यते ॥**[1]

लोकसंवृतिसत्यमाश्रित्य भिक्षुभिरष्टाङ्गमार्गानुशीलनक्रमेण परमार्थसत्यं प्रत्येतव्यम् । परमार्थसत्यं च प्रतीत्यसमुत्पादाख्यं शून्यत्वमिति ।

भगवतां वुद्धानां सत्यद्वयमाश्रित्य धर्मदेशना प्रवर्तते । **'स्कन्धात्मा लोक आख्यातस्तत्रलोको हि निश्रितः'**इति वचनात् पञ्च स्कन्धानुपादाय प्रज्ञप्यमानः पुद्गलः **'लोक'** इत्युच्यते । समन्ताद्वरणं संवृतिः । अज्ञानं हि समन्तात् सर्वपदार्थत्त्वावच्छादनात् संवृतिरित्युच्यते । परस्परं सम्भवनं वा संवृतिरन्योन्यसमाश्रणेत्यर्थः । अथवा संवृतिः संकेतो लोकव्यवहार इत्यर्थः । स चाभिधानाभिधेयज्ञानज्ञेयादिलक्षणः । लोके संवृतिर्लोक संवृतिः ।

परमः उत्तमः अर्थः परमार्थः, अकृत्रिमं वस्तुस्वरूपम्। सर्वधर्माणां निःस्वभावता, शून्यता, तथता, भूतकोटिः, धर्मधातुरित्यादिपर्यायाः। सर्वस्य हि प्रतीत्यसमुत्पन्नस्य पदार्थस्य निःस्वभावता पारमार्थिकं रूपम्, यथा प्रतिभासं सांवृतस्यानुपपन्नत्वात् । अतएवोक्तमार्यलङ्कावतारे –

**स्वभावानुत्पत्तिं सन्धाय महामते सर्वधर्माः शून्या इति मया देशिताः ।**[2]

अतएव प्रकृतं मोक्षस्वरूपं शून्यवादमाश्रित्य प्रतिविधीयते । उक्तं च सोपाधिशेषं निरुपाधिशेषं चेति द्विधा प्रकल्पितं निर्वाणम् । तत्रेदमाशङ्कितम् - यदि क्लेशानां स्कन्धानञ्च सत्स्वभावत्वं न भवेत्, तदा शून्यतावादिमते नैव किञ्चिदुत्पद्यते । नापि किञ्चिन्निरुध्यत इत्यङ्गीकारेण क्लेशानां स्कन्धानाञ्च स्वभावराहित्यात् तन्निरोधस्याप्य –सम्भवेन निर्वाणमेव न सिध्येत् । यदि सत्स्वभावत्वमेव स्यात्तर्हि सतो निरोधास्कन्धानाञ्च निरोधमन्तरेण निर्वाणं परिनिष्पद्येत । उक्तं च –

**यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।**
**प्रहाणाद्वा निरोधाद्वा कस्य निर्वाणमिष्यते ॥**[3]

क्लेशानां स्कन्धानां संवृतिसत्यानां मृगतृष्णिकादिवत् स्वप्नवच्च प्रतीयमानानां निःस्वभावत्वं यन्निश्चितं तदेव निर्वाणमिति न कापि हानिः । एवं संसारादीनां संवृतिसत्यतयैव विद्यमानतया न तत्रापि काप्यनुपपत्तिः सम्भाव्यते । एतदेव निर्वाणं भगवता उपदिष्टम्। सर्वेषां प्रपञ्चानां य उपशमोऽप्रवृत्तिरिति यावत् तन्निर्वाणम् । उक्तं च मध्यमकशास्त्रे –

**सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः ।**
**न क्वचित् कस्यचित् कश्चिद्धर्मो बुद्धेन देशितः ॥**[4]

शून्यतापदेन धर्मशून्यता ग्राह्या, अष्टसाहस्रिकप्रज्ञापारमितायां तस्या वर्णनमुपलभ्यते । सर्वधर्माणां योऽनुपलम्भः सैव प्रज्ञापारमिता, येन शून्यता अधिगता तेन प्रज्ञापारमिता समुपलव्धेत्यष्टसाहस्रिकायामुक्तम् । प्रज्ञापारमितायाः ज्ञानं तदैव भवति यदा भावनामुत्पत्तिः न स्वतः नैव परतः न चोभयतः न चाहेतुतो जायते । पारमितायां समुपलब्धायां सत्यां न कश्चिद् व्यवहारः सम्पद्यते किन्तु परमार्थसत्यस्यैव प्रतीतिर्भवति । दृग्गोचरीभूतं सर्वं भावजातं वस्तुभूतं मायासदृशं स्वप्नवत् प्रतिविम्वमिवानीकं मिथ्याभूतञ्च प्रतीयते। व्यवहारदशायामेव सर्वेषां पदार्थानां सत्यत्वम् । प्रतीक्षीभूतानां सर्वेषां पदार्थानां स्वरूपं साम्वृतमिति उद्भासितो भवति । अयं लोकप्रवाहः यथाभूतदर्शनेनैव साम्वृतं प्रतीयते । प्रतीत्यसमुत्पन्नरूपेयं शून्यतापि व्यवहारदशायां सत्तारूपेणावभासते । वस्तुतः पारमार्थिक दृष्ट्या धर्मशून्या एव । परमार्थतः भावानां सत्ता नास्ति परं धर्मशून्यततैवैतेषां स्वकरणीया । सर्वधर्मशून्यताया अङ्गीकरणं यदा भवति तदा सर्वलोकव्यवहारा शून्या, अतएव अनिर्वचनीयरूपेयं शून्यतेत्युच्यते ।

---

[1]वोः, चः, वेः ९/२
[2]लङ्कावतारसूत्रम्
[3]मः, शाः, २५/२
[4]मः, शाः, २५/२४

**निर्यासः –** बहुषु अर्थेषु शास्त्रे शून्यशब्दप्रयोगः दृश्यते। अभावार्थे शून्यशब्दस्य प्रयोगो लोके प्रसिद्धः। धनशून्यम् धनाभाव इत्यर्थः। नास्तित्यनेन योऽर्थः प्रतिपद्यते, शून्यशब्दस्य तथाविधार्थोऽपि क्वचिद् परिलक्ष्यते। यथा **अपुत्रस्य गृहं शून्यं सर्वशून्यता दरिद्रता।**[1] तथा च पुत्रकलत्रादिसमन्वितगृहमेव गार्हस्थ्यधर्मानुकूलतया गृहपदवाच्यमित्यपुत्रस्य गृहपदवाच्यं यत्तन्नास्तीत्यर्थः। एवं सर्वशून्या दरिद्रतेत्यत्रापि दरिद्रस्य किमपि नास्तीत्यर्थः। अत्राप्यभाववाचक एव शून्यशब्दः। अपि च किञ्चित् स्वरूपनिर्धारणानर्हं शून्यमित्यपि शास्त्रे व्पदिश्यते। तथाहि गणितशास्त्रादौ किञ्चित् संख्याया अनिरूपणसूचनार्थमेव विन्दुरित्यपरनामकं संकेतविशेषमेव शून्यं व्यवहरन्ति गणितविदः। एवं साधारणस्वरूप-निर्धारणानर्हतया पुनराकाशमपि शून्यशब्देन परिचीयते। इत्थं च माध्यमिकशास्त्रेऽपि किञ्चित्स्वरूपनिरूपणानर्हतैव शून्यतेति विचारविद्भिर्विद्वद्वरैराख्यायते। तथाहि, क्रियाकारकादिसमन्वितानां सर्वेषां व्ववहाराणां सत्त्वं वाऽसत्त्वं वा यतो निरूपयितुमशक्यम्। अतएव सर्वं शून्यमित्युपदेशो भगवतो बोधिसत्त्वस्य। तथाचोक्तं लङ्कावतारसूत्रे –

**न सन्नासन्न सदसद् यदा लोकं प्रपश्यति।**
**तदा व्यवर्तते चित्तं नैरात्म्यं चाधिगच्छति।**[2]

एवं नागार्जुनीयमध्यमकशास्त्रेऽपि –

**सन्नासन्न सदसन् धर्मो निवर्तते यदा।**
**कथं निर्वर्तको हेतुरेवं सति हि युज्यते॥**[3]

प्रतीत्यसमुतपादशब्देन च माध्यमिकनये एवंभूता शून्यता परिलक्ष्यते। तदुक्तं विग्रहव्यावर्तन्याम् –**यश्च प्रतीत्यभावो भावानां शून्यतेति सा ह्युक्ता।**[4]

अतएव बौद्धदार्शनिकैः समुद्भावितयुक्तिजालैः सिद्धान्तरूपेण बौद्धज्ञानपरम्परायां नित्यानित्यविनिर्मुक्तः शुद्धशून्यवादः प्रतिष्ठापितमिति॥

## सन्दर्भग्रन्थसूची –


आचार्यार्यनागार्जुनः। मध्यमकशास्त्रम्। मोतिलाल वनारसीदासः, दिल्ली, १९८८

डा. श्रीआदित्यनाथभट्याचार्यः। सौगतशाङ्काद्वैतवादसमीक्षा, चन्दननगर-सर्वकार- महाविद्यालयः, १९९४

आचार्यनागार्जुनः। मध्यमकशास्त्रम्। बौद्धभारती, वाराणसी,१९८९

आर्यशान्तिदेवः। वोधिचर्यावतारः। बौद्धभारती, वाराणसी,२००१

डा. विजयकुमारचौधुरी, मध्यान्त-विभाग-भाष्य, केपि जयसओयाल रिसार्च इनस्टिटिउट्, पाटना,२००६

नागार्जुनः। शून्यतासप्ततिः। क्रेन्द्रीय उच्चतिब्बति-शिक्षा-संस्थानम्, सारनाथ, वाराणसी,१९८५


[1] मृःकटिकम्,

[2] लङ्कावतारसूत्रम्, ३/२२

[3] मः शाः १/९

[4] विग्रहव्यावर्तनीका २२

# भारतीयज्ञानपरम्परानुसारेण सम्वत्सर-अयन-ऋतु-मासानां परिचयः

डॉ. ख्यालानन्दः, सहायकाचार्यः (अतिथिः),
ज्योतिषविभागः,
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः, कोलकाता
Gmail- vivek93192@gmail.com

**शोधसारः-** ज्योतिषशास्त्रं कालविज्ञानमस्ति। सम्वत्सर-अयन-ऋतु-मासा: कालगणनाया अवयवा: सन्ति। अस्माकं जीवने संस्कृति-प्रकृतिभ्यां सह सामञ्जस्यं कर्तुम् एतेषामवयवानां महती आवश्यकता भवति। समयस्य गणना, उत्सवानां शुभाऽशुभमुहूर्त-निर्धारणे स्मृद्धि-आध्यात्मिकविकासार्थं वैज्ञानिकम् आधार: वर्तते। एतेषां सम्बन्ध: सृष्ट्यादित: सर्वेषां धार्मिकक्रियाकलापानाम् आधार: अस्ति। संक्षेपेण वक्तुं शक्यते यत् भारतीयपरम्परायां कालज्ञानाय, धार्मिकानुष्ठानार्थं, प्रकृत्या सह सामञ्जस्यं च कर्तुम् एते अतीव महत्वपूर्णा: सन्ति। एवं वैदिकसंहितासु, गृह्यसुत्रेषु, महाभारते, पुराणेषु च उपलब्धतथ्यानामाधारेण सिध्यति यत् प्राचीनकालेऽपि एवमेव एतेषामवयवानां प्रचलनमासीत् इत्यलं विस्तरेण॥

**सम्वत्सरविचारः-** सम्वत्सरः संस्कृतशब्दः, यस्यार्थः वर्षः। सम्वत्सरः पञ्चविधः। सावनसम्वत्सरः, सौरसम्वत्सरः, चान्द्रसंवत्सरः, नाक्षत्रसंवत्सरः, बार्हस्पत्यसम्वत्सरश्च। एषु नाक्षत्रबार्हस्पत्यसम्वत्सरयोः उपयोगः ज्योतिषविषयकगणनायां प्रामुख्येन भवति। सावन-चान्द्र-सौरसम्वत्सराणां विवरणं निम्नलिखितमस्ति।

**सावनवर्षः - "उदयादुदयं भानोर्भूमिसावनवासरः।"**[1]अर्थात् सूर्यस्य उदयकालमारभ्य अव्यवहित-तदुदयकालपर्यन्तं यः कालः सः भूसम्बन्धः एकसावनदिवसो भवति। एवं षष्ट्युत्तरत्रिशतदिवसैः (360) एकसावनवर्षः भवति। सम्वत्सरस्य स्थूलगणना एतद् अनुसारेण भवति। एतस्मिन् एकमासः त्रिंशद्दिवसात्मको भवति।

**चान्द्रवर्षः- "भवन्ति शशिनो मासाः सूर्येन्दुभगणान्तरम्।"** [2] अमान्तादमान्तं यावत् कालश्चान्द्रमासो भवति। चान्द्रवर्षे षष्ट्युत्तरत्रिशतचान्द्रदिवसेषु (360) प्रायशः चतुःपञ्चाशदुत्तरत्रिशत (354) सावनदिनानि भवन्ति। अधिकमासस्य निर्धारणम् अनेन एव सम्वत्सरानुसारेण मन्यते। अधिकमासे सति एतस्मिन् त्रयोदशमासाः नो चेद् द्वादशमासाः भवन्ति। एतस्मिन् एकमासः शुक्लप्रतिपदातः अमावस्यां यावत् वा कृष्णप्रतिपदातः पूर्णिमां यावत् मन्यते। आदिमः अमान्तमासः अपरश्च पूर्णिमान्तमासः कथ्यते। दक्षिणभारते अमान्तमासः तथा च उत्तरभारते पूर्णिमान्तमासः प्रचलति।

**सौरवर्षः - "संक्रान्त्या सौर उच्यते।"**[3] अर्थात् संक्रान्त्याः संक्रान्त्यवधिकेन कालेन सौरमासः। एवं द्वादशभिः मासैः एकवर्षम्। षष्ट्युत्तरत्रिशतदिवसेषु (360) प्रायशःपञ्चषष्ट्युत्तरत्रिशतसावनदिवसाः (365) भवन्ति। अयं मेषसंक्रान्तितः प्रारभ्यते तथा च पुनः मेषसंक्रान्तिं यावत् चलति। सूर्यस्य दैनिकी गतिः एकांशात्मिका। सूर्यस्य एकांशस्य भोगकालः एकसौरदिनं भवति। भारतस्य व्रतोत्सवादिषु प्रायश: चान्द्रसंवत्सर एव उपयुज्यते, किन्तु बङ्गप्रदेशे, नेपालदेशे तथा च कुत्रचित अन्यत्र सौरवर्षः अपि व्यवह्रियते। भारतदेशे प्रायशः चान्द्रसौरसंवत्सरयोरेव प्रयोगो भवति। स्थूलदृष्ट्या षष्ट्युत्तरत्रिशत (360) दिवसैः एकसंवत्सरस्य चर्चा क्रियते, किन्तु व्यवहारे प्रायशः अस्योपयोग: नैव भवति। यतो हि व्यवहारे दिवसरूपेण सावनदिनस्य तथा च वर्षरूपेण सौरवर्ष एव उपयुज्यते। अत

---

[1]सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लो.- 36
[2]सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लो.- 35
[3]सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लो.- 13

एव एकस्मिन् वर्षे सावनदिवसानां संख्या पञ्चषष्ट्युत्तरत्रिशत (365) दिनानि, षोडश (16) घटय इति। **"सम्वसन्ति ऋतवोऽस्मिन् संवत्सर:"** तथा च **"संवत्सर: सम्वसन्तेऽस्मिन् भूतानि।"**[1] निरुक्तस्य उपर्युक्तव्युत्पत्ययो: अनुसारेण ऋतूनां परिवर्तनं संवत्सर: वत्सर वा कथ्यते। अर्थात् सर्वे ऋतव: यदा एकावृत्तिं पूरयन्ति तथा च यदा द्वितीया आवृत्ति: आरभ्यते, तदा एकसम्वत्सरस्य पूर्तिर्भवति, अपरस्य संवत्सरस्य च प्रारम्भो भवति।

एवं वक्तुं शक्यते यत् एकसम्वत्सरान्तर्गताः सर्वा: ऋतव: भवन्ति। सर्वेषां प्राणिनां वयसः गणना अपि एतै: सम्वत्सरै: भवति। अत एव उक्तमस्ति यद् यस्मिन् सर्वे प्राणिन: निवसन्ति तं कालविभागं **सम्वत्सर** इत्युच्यते। वस्तुतस्तु यदि मानव: सम्वत्सरस्य विषये न जानाति तदा स: प्राणिनां वयसः गणनां तथा च ऋतुविभागं नावगन्तुं शक्नोति।

अयं संवत्सरः सूर्यस्य परिभ्रमणेन सम्बद्धः। सूर्यस्य परिभ्रमणविषये मतभेदः अस्ति। आधुनिकविद्वांसः मन्यन्ते यत् पृथिवी सूर्यं परितः परिभ्रमति। तथापि सूर्य एव पृथिवीं परिभ्रमति इति प्राचीनविद्वांसः मन्यन्ते स्म। अत एव संस्कृतकोषग्रन्थेषु पृथिव्याः अचला, स्थिरा इत्यादय: पर्यायवाचका: शब्दाः प्राप्यन्ते। भारतीयज्योतिषशास्त्रे उभयदृष्टिः दृश्यते। एवं सूर्यस्य परिभ्रमणं पृथिव्याः सूर्यं परितः परिभ्रमणम् इति व्याख्यानेन उभयदृष्टिकोणयोः सामञ्जस्यं भवति। सूर्यः संवत्सरस्य कालस्य वा अध्यक्षः। यतः यदि सूर्यः न स्यात् तर्हि न स्यात् संवत्सरः न च कालविभागः। यथोक्तम् ऋग्वेदसंहितायाम्-

**सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।**
**त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः॥**[2]

सर्वव्यापकः सूर्यः सप्तरश्मिभ्यः रसं स्वीकुर्वन् सप्तर्षिभिः स्तूयमानः गच्छति। ग्रीष्म-वर्षा-हेमन्तनाभियुक्तः, अजीर्णः तथा च न कस्मिंश्चित् आश्रितः संम्वत्सरः अस्ति। सर्वे लोकाः सूर्ये एव स्थितास्सन्ति। ऋग्वेदस्य उपर्युक्तमन्त्रस्य पूर्वार्धे सूर्यस्य तथा च उत्तरार्धे सम्वत्सरस्य वर्णनं प्राप्यते। सौर-चान्द्रवर्षमिव भारतीये ज्योतिषे बृहस्पतेः गतिकारणादेक-बार्हस्पत्यवर्षमपि मन्यते। दैनिकव्यवहारे अस्य वर्षस्य महत्त्वं नास्ति। तथापि संहिता-प्रकरणदृष्ट्या वर्षस्य शुभाशुभस्य निर्धारणे बार्हस्पत्य-सम्वत्सरस्य विशेषोपयोगो भवति। बार्हस्पत्य-संवत्सराणां नामानि निम्नलिखितानि सन्ति।

| | | | |
|---|---|---|---|
| 1. विजयः | 16. कीलकः | 31. रूधिरोद्गारी | 46. बहुधान्यः |
| 2. जयः | 17. सौम्यः | 32. रक्ताक्षः | 47. प्रमाथी |
| 3. मन्मथः | 18. साधारणः | 33. क्रोधनः | 48. विक्रमः |
| 4. दुर्मुखः | 19. विरोधकृत् | 34. क्षयः | 49. वृषः |
| 5. हेमलम्बः | 20. परिधावी | 35. प्रभवः | 50. चित्रभानुः |
| 6. विलम्बः | 21. प्रमादी | 36. विभवः | 51. सुभानुः |
| 7. विकारी | 22. आनन्दः | 37. शुक्लः | 52. तारणः |
| 8. शर्वरी | 23. राक्षसः | 38. प्रमोदः | 53. पार्थिवः |
| 9. प्लवः | 24. नलः | 39. प्रजापतिः | 54. व्ययः |

[1]निरुक्त:, अ.- 4 पा. ख- 26
[2]ऋग्वेद: - 2/264/2

| | | | |
|---|---|---|---|
| 10. शुभकृत् | 25. पिङ्गलः | 40. अंगिरा | 55. सर्वजित् |
| 11. शोभनः | 26. कालयुक्तः | 41. श्रीमुखः | 56. सर्वधारी |
| 12. क्रोधी | 27. सिद्धार्थी | 42. भावः | 57. विरोधी |
| 13. विश्वावसुः | 28. रौद्रः | 43. युवा | 58. विकृतः |
| 14. पराभवः | 29. दुर्मतिः | 44. धाता | 59. खरः |
| 15. प्लवङ्गः | 30. दुन्दुभिः | 45. ईश्वरः | 60. नन्दनः |

सम्प्रति सम्वत्सराणां गणना **प्रभव** इति सम्वतसरतः भवति।

**अयनविचारः-** अयनम् इति शब्दस्य मूलार्थः गतिः, मार्गः गमनम् वास्ति। अयनं स कालः अथवा मार्गः अस्ति, यस्मिन् सूर्यः स्वस्य अधिकतमाम् उत्तरदिशम् अथवा दक्षिणदिशं प्रति गमनं करोति, येन पृथिव्याम् ऋतवः परिवर्तन्ते। अयने द्वे भवतः। उत्तरायणं दक्षिणायनञ्च।

**उत्तरायणम्-** उत्तरस्यदिशि अयनम् (गमनम्) उत्तरायणम्। यदा सूर्यः मकर-राशिं प्रविशति (प्रायेण जनवरी-मासस्य चतुर्दशे दिनाङ्के) अनन्तरं च उत्तरं प्रति गच्छन् कर्क-रेखां यावत् प्राप्नोति, स कालखण्ड उत्तरायणम् इति कथ्यते। एषः देवानां दिवसः मन्यते। अस्मिन् काले दिनानि बृहन्ति/दीर्घानि भवन्ति तथा शुभ-कार्याणां, तपस्यायाः, धार्मिक-अनुष्ठानानाञ्च कृते एषः अति-पवित्रः फलदायकश्च समयः भवति।

**दक्षिणायनम्-** दक्षिणस्यां दिशि अयनं गमनं वा दक्षिणायनम्। यदा सूर्यः कर्क-राशिं प्रविशति (प्रायेण जुलाई-मासस्य षोडशे दिनाङ्के) अनन्तरञ्च दक्षिणं प्रति गच्छन् मकर-रेखां यावत् प्राप्नोति, स कालखण्ड: दक्षिणायनम् इति वदन्ति। एष: देवानां रात्रिः इति मन्यते। अस्मिन् काले रात्र्यः बृहत्यः भवन्ति। कतिपयानां धार्मिक-कार्याणां कृते एषः समयः वर्जितः भवति, किन्तु कानिचन विशिष्ट-कार्याणि (यथा तन्त्र-साधना) अस्मिन्नेव समये क्रियन्ते। यथोक्तं सूर्य-सिद्धान्ते मानाध्याये-

**भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम्।**
**कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्।।**[1]

तैत्तरीय-संहितायामप्युक्तम्- **तस्मादादित्य षण्मासो दक्षिणेनैति षडुत्तरेण।।**[2]

यथा कोष्ठकेन प्रदर्शयते-

| | | | | | | |
|---|---|---|---|---|---|---|
| **उत्तरायणम्** | मकरराशि: | कुम्भराशि: | मीनराशि: | मेषराशि: | वृषराशि: | मिथुनराशि: |
| **दक्षिणायनम्** | कर्कराशि: | सिंहराशि: | कन्याराशि: | तुलाराशि: | वृश्चिकराशि: | धनुराशिश्च। |

[1]सूर्यसिद्धान्त:, मानाध्याय:, श्लोकसंख्या – 9
[2]तै.संहिता, 6/5/3

**ऋतु-विचार:-** संवत्सरस्य प्रकरणे लिखितमस्ति यत् ऋतूनां परिवर्तनं नाम संवत्सरः। तात्पर्यमिदं यत् ऋतव एव संवत्सरस्य अथवा कालस्य परिज्ञानं कारयन्ति। वस्तुतः ऋतूनां ज्ञानं विना कालस्य परिज्ञानम् असंभवप्रायं भवति। अतः इदं कथनं यथार्थमस्ति यत् ऋतुरेषः हि समयस्य स्वरूपं लक्षणं वा अस्ति। ऋतु: शब्दः ऋ-धातोः तुन् प्रत्ययेन च निष्पन्नः। अमरकोशस्य टीकाकारः क्षीरस्वामी कथयति यत् **"इयर्ति ऋतु"** इति। पाणिनेरुणादिप्रकरणानुसारम् **"अर्तेश्च तुः।"** एवं प्रकारेण व्युत्पन्नः ऋतुशब्दः। एवमेव ऋग्वेदस्य **त्रिनाभिचक्रम्-** अस्य अंशस्य व्याख्या निरुक्ते कृता अस्ति। **"ऋतुः संवत्सरः ग्रीष्मो वर्षा हेमन्त इति।"** अर्थात् संवत्सरे त्रयः ऋतवः सन्ति- ग्रीष्मः, वर्षा हेमन्तश्च। वस्तुतः ऋतवः त्रयः एव सन्ति। कालान्तरेण एते त्रयः षट् ऋतुषु विभक्ताः अभवन्। यथा- वसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः शिशिरश्च। वेदेषु क्वचित् पञ्च ऋतवः अपि स्वीकृताः। यथा- **"पञ्चारे चक्रे परिवर्तमाने"**[1] इति पञ्चर्तुतया। **"पञ्चर्तवः संवत्सरस्येति च ब्राह्मणम्। हेमन्तशिशिरयोः समासेन"**[2] **"पञ्च शारदीयेन यजेत। पञ्च वा ऋतवःसंवत्सरः।"**[3] पञ्च ऋतूनां गणनायां हेमन्तशिशिरयोः संयुक्त-नाम हेमन्त इति मन्यते। किन्तु एतयोः पृथग्वैशिष्ट्यात् उभयोः पृथग्गणना आरब्धा। चैत्रवैशाखौ द्वौ मासौ वसन्तः, ज्येष्ठाषाढौ ग्रीष्मः, श्रावणभाद्रपदौ वर्षाः, आश्विनकार्तिकौ शरद्, मार्गशीर्षपौषौ हेमन्तः, माघफाल्गुनौ च शिशिरः कथ्यन्ते। ऋतूनां कारणेन एव वस्तूनां परिणामः ज्ञातः। प्रत्येकं प्राणी, वृक्षः, लता इत्यादीनां विकासः ऋतुतः एव भवति। अतः वैज्ञानिकदृष्ट्या विचार्यमाणे, ऋतूनां कालस्य लक्षणज्ञानं यथार्थम् अवलोक्यते। वेदेषु चन्द्रमा ऋतूनां विधाता इति उक्तः।

**पूर्वापरं चरतो माययैतो शिशू क्रीडन्तौ परियातो अध्वरम्।**
**विश्वान्यन्यो भुवनानि चष्टे ऋतूरन्यो विदधज्जायते पुनः॥**[4]

उपर्युक्तं मन्त्रानुसारेण सूर्य-चन्द्रौ ऋतूनां विधातारौ स्तः। वस्तुतः चन्द्रः भूमेः उपग्रहः। अतः चन्द्रस्य गत्यनुसारेण धरां प्रतिदिनं सोमरसः समानरूपेण प्राप्नोति, परञ्च सूर्यस्य प्रभावः पृथिव्यां सदैव समानः न भवति। उत्तरायणे सूर्यस्य किरणाः पृथिव्यां साक्षात् पतन्ति, तेन शीतस्य प्रभावः क्रमेण क्षीणो भवति। अतः उष्णतायाः वृद्धिः भवति। उष्णतायाः शीतस्य च न्यूनत्वस्य आधिक्यस्य च कारणेन एव ऋतुः जायते। वयं यदा वर्षे त्रीन् ऋतून् गृह्णीमः, तदा एकैकः ऋतुः चतुर्मास-कालिको भवति। फाल्गुनत: ज्येष्ठमासपर्यन्तं ग्रीष्मर्तुः, आषाढत: आश्विनपर्यन्तं वर्षर्तु: तथा च कार्तिकत: माघपर्यन्तं हेमन्तर्तु: भवति। यस्मिन् ऋतौ सूर्यस्य किरणाः रसान् शुष्यन्ति, सः ग्रीष्मः कथ्यते। यदा मेघाः वर्षन्ति, सः कालः वर्षा कथ्यते। यस्मिन् ऋतौ हिमं तिष्ठति, सः हेमन्तः कथ्यते। निःसन्देहं यत् कालपरिणामेन वर्षे विविधानि परिवर्तनानि भवन्ति, तस्य परिणामरूपा ऋतवः भवन्ति। यदा कालः स्वीयस्वरूपं प्रकटयन् जगतां पुनरुत्पत्तिं करोति, तदा ऋतुविशेषाः प्रादुर्भवन्ति, नवोऽपि संवत्सर आरम्भं प्राप्नोति। अतः कालस्य नैसर्गिकगुणरूपेण ऋतवः उत्पद्यन्ते। अत एव भारतीयव्रतोत्सवेषु ऋतूनां प्राधान्यं वर्तते। वर्तमानकाले मकरराशिं यदा सूर्यः प्रविशति ततः राशिद्वयेन नूतनस्य ऋतोः गणना प्रारभ्यते। एवं शिशिरादय: षड् ऋतव: भवन्ति। यथा कोष्ठकेन प्रदर्शयते-

| मकर-कुम्भराश्योः | मीन-मेषराश्योः | वृष-मिथुनराश्योः | कर्क-सिंहराश्योः | कन्या-तुलाराश्योः | वृश्चिक-धनुराश्योः |
|---|---|---|---|---|---|
| शिशिरर्तु: | वसन्तर्तु: | ग्रीष्मर्तु: | वर्षार्तु: | शरद्-ऋतु: | हेमन्तर्तु: |

**मासविचार:-** समय: मानवजीवनस्य एकः निर्णायकः पक्षः अस्ति। समयस्य अवगमनाय तथा च व्यवस्थित्यै विविधाः एककाः निर्मिताः सन्ति। एतादृशः एकः एककः मास इति कथ्यते। वर्षे द्वादशमासाः भवन्ति, ये अस्माकं दैनन्दिनकार्यक्रमेषु, ऋतुषु, उत्सवेषु,

[1]ऋग्वेद:, 1/164-13
[2]निरुक्तः, 4/4/26
[3]तैत्तरीयब्राह्मणः, 2/3/10
[4]ऋग्वेद 10-85-90, उद्धृत:, सं.वा.बृहत् इतिहास:, षोडशखण्ड:

कृषिकार्येषु च समन्वयं कर्तुं साहाय्यं कुर्वन्ति। पञ्चाङ्गे प्रत्येकं मासः चन्द्रस्य चरणाधारितः अस्ति, अतः चन्द्रमासः इति कथ्यते। मास इति शब्दस्य अर्थोऽस्ति चन्द्रसम्बन्धी। अमरकोशस्य टीकाकार: श्रीक्षीरस्वामी कथयति **"माश्चन्द्र: तस्यायं मास:"** अर्थात् मा = चन्द्रस्य यो भवेद् स मास इति कथ्यते। चन्द्रत: एव मासस्य ज्ञानं भवति। एवं चान्द्रमास: एव मुख्य:। एतदेव कारणमस्ति यत् मासानां चैत्रादय: प्रचलित-नामानि पूर्णिमां यस्मिन् नक्षत्रे चन्द्रस्य स्थिति: भवति, तस्यैव अनुसारेण भवति। अमरकोशस्य निम्नलिखित श्लोकेन तथ्यमिदं स्पष्टं भवति।

**पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।**
**नाम्ना स पौषो माघाद्या श्चैवमेकादशापरे।।**[1]

अर्थात् यस्यां पूर्णिमायां चन्द्रमा पुष्य-नक्षत्रे भवति, तस्या: पूर्णिमाया: नाम पौषी इति। एवं सा पूर्णिमा यस्मिन् मासे भवेत् स पौष इति कथ्यते। पाणिनेः सूत्रम् **"सास्मिन् पौर्णमासीति"**[2] इत्यादिना पौषीत: अण् प्रत्यये सति पौष इति शब्द: निष्पन्न:। एवमेव माघादय: एकादश-मासा: अपि भवन्ति। द्वादशमासानां नामानि अधोलिखितानि सन्ति-

चैत्र-वैशाख-ज्येष्ठ-आषाढ-श्रावण-भाद्रपद-आश्विन-कार्तिक-मार्गशीर्ष-पौष-माघ-फाल्गुनाख्या: द्वादशमासा: भवन्ति। मासानां यदुक्तं विवरणं पूर्णिमायाः दिवसे विभिन्नेषु नक्षत्रेषु चन्द्रस्य स्थित्यानुसारमेव भवति। किन्तु वैदिकविज्ञानस्य मतानुसारं मासानां वर्णनं किञ्चित् भिन्नप्रकारेण दृश्यते। यथा तैत्तिरीयसंहितायाम् एतेषां नाम्नां निरूपणं निम्नप्रकारेण कृतम्-

**मधुस्तथा माधवसंज्ञकश्च शुक्रः शचिश्चाथ नभो नभस्यौ।**
**तथेष ऊर्जश्च सहः सहस्यौ तपस्तपस्याविति ते क्रमेण।।**

अर्थात् मध्वादयः द्वादशवैदिकमासाः भवन्ति। यथा- मधुः - चैत्रमासः, माधवः - वैशाखः, शुक्रः - ज्येष्ठः, शुचिः - आषाढः, नभः – श्रावणः, नभस्यः - भाद्रपदः, ईशः - आश्विनः, ऊर्जः - कार्तिकः, सहः - मार्गशीर्षः, सहस्य - पौषः, तपः - माघः, तपस्यः - फाल्गुनमास इति। वैदिक मासानां विवरणं निम्नलिखितं वर्तते। यथा-

**चैत्रमासः (मधुः)-** चित्रा + अण् प्रत्यये कृते सति चैत्र इति शब्द: निष्पद्यते। चैत्र: इति एकचान्द्रमासस्य नाम वर्तते। यस्मिन् मासे चन्द्रः चित्रा इति नक्षत्रे तिष्ठति, तस्य मासस्य नाम मधुः। अस्मिन् मासे मधुरसस्य उत्पत्तिः भवति, येन वृक्षादयः पुष्प-फलयुक्ताः भवन्ति। यथोक्तम्-

**"वसन्तु ऋतु: क्व नु हृदयङ्गमः सखा कुसुमायोजितकार्मुको मधुः।।"**[3]

**वैशाखमासः (माधव :)-** वैशाखमासस्य वैदिकनाम माधवः। मधुशब्दात् अण् प्रत्यये कृते सति माधव इति शब्द: निष्पन्नो भवति। यस्यार्थोऽस्ति मधुमिव मधुरम्। यतोहि कालेऽस्मिन् चैत्रमासे उत्पन्नमानमधुररसस्य परिपाको भवति। यथोक्तं **"भास्करस्य मधुमाधवाविव।"**[4]

**ज्येष्ठमासः (शुक्रः)-** ज्येष्ठमासस्य वैदिकनाम शुक्रः। शुच् + रक्, नि. कुत्वं करणे सति शुक्र: इति शब्द निष्पन्नो भवति।[5] अस्मिन् मासे सूर्यस्य उष्णता अधिका भवति।

**आषाढमास: (शुचि:)-** शुचि: अर्थात् निर्मल: विशुद्ध: वा। अस्मिन् मासे सूर्यस्य तापेनोत्पन्नपरिणामस्य प्रतीतिर्भवति। कालेऽस्मिन्

[1]उद्धृत:, सं.वा.बृहत् इतिहास:, षोडशखण्ड:,पृष्ठसंख्या- 122
[2]अष्टा., 4/2/21
[3]कुमार-4/24-25
[4]रघु.- 11/7, उद्धृत:, हिन्दी-संस्कृत शब्द कोष, वामन शिवराम आप्टे, पृष्ठसंख्या- 762
[5]उद्धृत:, हिन्दी-संस्कृत शब्द कोष, वामन शिवराम आप्टे, पृष्ठसंख्या- 980

आम्रादिनि फलानि पक्वानि भवन्ति, उष्णता च अधिका भवति। फलस्वरूपत: वृष्टेरारम्भकालस्य भानं भवति।

**श्रावणमास: (नभस्)**-श्रावणमासस्य वैदिकनाम नभः। अस्मिन् मासे प्राय: सर्वत्र वृष्टि: भवति।

**भाद्रपदमास: (नभस्य:)**- भाद्रपदमासस्य वैदिकनाम नभस्य:। मासेऽस्मिन् वर्षर्तो: समाप्ति: भवति।

**आश्विनमास: (इष:)**- आश्विनमासस्य वैदिकनाम इष:। अस्मिन् मासे नवीनानि अन्नानि पक्वानि भवन्ति।

**कार्तिकमास: (ऊर्ज:)**- कार्तिकमासस्य वैदिकनाम ऊर्ज:। अस्मिन् मासे अन्न-तृणादिभि: गो-इत्यादिप्राणिषु घृत-दुग्धादिरसानां परिपाक: भवति।

**मार्गशीर्षमास: (सहस्)**- मार्गशीर्षमासस्य वैदिकनाम सहस्। अस्मिन् काले बलाभिवृद्धि: भवति।

**पौषमास: (सहस्य:)**- पौषमासस्य वैदिकनाम सहस्य। अस्मिन् मासे प्राणीनां बलं स्थिरं भवति।

**माघमास: (तपस्)**- माघमासस्य वैदिकनाम तपस्। अस्मिन् मासे शीतकालीन-सस्यानां परिपाक: आरभ्यते।

**फाल्गुनमास: (तपस्य:)**- फाल्गुनमासस्य वैदिकनाम तपस्य इति। अस्मिन् मासे यवादिधान्यानां परिपाक: भवति।

## संकेताक्षरसूची

1. अष्टा. : अष्टाध्यायी
2. कुमार. : कुमारसम्भवम्
3. तै. : तैत्तिरीय:
4. रघु. : रघुवंशम्
5. वा. : वाङ्गमय:
6. सं. : संस्कृत

## सन्दर्भग्रन्थसूची


1. अष्टाध्यायी
2. ऋग्वेद:
3. कुमारसम्भवम्
4. निरुक्त:
5. सूर्यसिद्धान्त:, रामचन्द्रपाण्डेय:
6. संस्कृत वाङ्गमय का बृहद् इतिहास, षोडशखण्ड।
7. हिन्दीसंस्कृत शब्दकोष:, वामनशिवराम आप्टे।

# भारतीयज्ञानपरम्परायां ज्योतिषशास्त्रस्य योगदानम्

सुश्रीसरितामहापात्रः
सहायिकाचार्या (अतिथि)
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः, कोलकाता

**भूमिका-** भारतीयज्ञानपरम्परायां ज्योतिषशास्त्रस्य महत्त्वपूर्णं स्थानं विद्यते। इदं शास्त्रं केवलं ग्रहाणां गतिं न निरूपयति, अपितु मानवालोकस्य दैनन्दिनजीवनं,ऋतुपरिवर्तनं, धार्मिककर्माणि च नियन्त्रयति। भारतीयसंस्कृतेः प्रत्येकं कार्यं मुहूर्तनिर्धारणेन अनुष्ठीयते। अतः ज्योतिषशास्त्रस्य योगदानं बहुपरिमाणे अस्ति।

**ज्योतिषशास्त्रस्य मूलस्वरूपम्-** भारतीयज्योतिषशास्त्रे प्रमुखौ द्वौ विभागौ स्तः-

**1. गणितज्योतिषम्** – यत्र ग्रहाणां गतिः, नक्षत्राणां स्थितिः, कालगणनाञ्च विश्लेष्यते। भास्कराचार्यस्य मते सिद्धान्तस्कन्धः त्रुट्यादितः प्रलयान्तो यः कालः तस्य गणना परामर्शः,सौरचान्द्रादिमानानां प्रकर्षेण भेदः,ग्रहचारस्य नियमविषये सम्यक् विचारः, व्यक्ताऽव्यक्तात्मकं द्विविध गणितयोः वर्णनम् , भूगोल-खगोल ग्रहाणां तेषां या संस्थितिस्तस्याः निरूपणं, दिग्देशकालज्ञानस्य साधनाभूतानि , वेधयन्त्राणां विषये स बुधैः उदाहृतः। इत्थं यत्र गणितबन्धने खेटगतयो विचार्यन्ते स सिद्धान्तेति पर्यवसितो भवति सिद्धान्तलक्षणम्[1]। बृहत्संहितायां सिद्धान्तलक्षणस्य वर्णनं वर्तते यत् यस्मिन् स्कन्धे युग-वर्ष-ऋतु-अयन-मास-पक्ष-अहोरात्र-याम-मुहूर्त-नाड़ी-प्राण-त्रुटिनां-चतुणाञ्च मानानां (सौर-सावन-नाक्षत्र चान्द्राणाम्) दृक्-ग्रहगति-भूभ्रमण-भगण-छाया-करणप्रभृतिषु ज्ञानं सिद्धान्तैव सन्ति।

सिद्धान्तपक्षोऽपि समृद्धः अस्ति। फलितेन सह, गणितस्य गणितेन सह फलितस्य च सैव सम्बन्धः यो हि शरीरेऽस्मिन् विद्यमानेन जीवनेन सह प्राणादिवायोः तस्य चात्र शरीरे वर्त्तमानस्य जीवस्य प्राणवायुना इति।

**2. फलितज्योतिषम्** – यत्र जातकस्य जीवनस्य प्रभावः, ग्रहयोगः, दैवज्ञानेन विश्लेषणं क्रियते। ज्योतिषस्य होरास्कन्धः यज्योतिषस्य हि सन्ति तत्र त्रयः स्कन्धाः सिद्धान्तः, संहिता होरा चेति। तत्र प्रतिष्ठायात्राविवाहादीनां लग्नवशेन शुभाशुभफलं जगति यया निश्चीयते सा होरा इति भट्टोत्पलः[2] । तस्याः होरायाः प्रशस्तिः एवं निरूपितम् -

**"तत्र त्रिस्कन्धं ज्योतिषं होरा गणितं संहितेति च।**
**एतेष्वपि त्रिषु श्रेष्ठा होरेति श्रूयते मुने**[3]**॥**

इत्येवं पराशरहोरायां दृश्यमानेन मैत्रेयवचनेन होरास्कन्धः एव श्रेष्ठतमः इति ज्ञायते। "आयुश्च लोकयात्रा च द्वे शास्त्रेऽस्मिन् प्रयोजने"[4] इत्यतः आयुर्निरूपणं वा जनजीवनयात्रानिरूपणम् अनेनैव स्कन्धेनेति आदेशप्रधाने शास्त्रे स्कन्धस्यास्य प्राधान्यविचारः समेषां स्फुट एव। साऽपि पञ्चपदा जातकताजिकरमलप्रश्नस्वरप्रभेदात्। कालनिर्धारणं यस्मिन् शास्त्रे स्कन्धे वा जन्मकालिकग्रहस्थितितिथिनक्षत्रादिद्वारा मनुष्यस्य तत् यत्र सुखदुखाद्यवाप्तिः होराशास्त्रमित्युच्यते। होराशब्दो हि अहोरात्रशब्दस्य आद्यन्ताक्षरविलोपेन निष्पन्न इति केचिद्वदन्ति। यथा पराशरमते -

**"अहोरात्रस्य पूर्वान्त्यलोपाद्धोराऽवशिष्यते"**[5]

शब्दोऽयं वयं तु फलितज्योतिषार्थ रूढ इति मन्यामहे सौकर्यात्। वराहमिहिरमते -

**"होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्"**[6]

---

[1] त्रुट्याद्यिप्रलयान्तकालकलना................विबुधाः सिद्धान्तहीनं जगुः। सि.शि.1/६-८

[2] वृ.सं १.९

[3] बृहत्पोराशरहोराशाखम् सृष्टिक्रमकथनाख्यः प्रथमाध्यायः २,३।

[4] प्रत्रमार्गः ९.१५। "आयुरिति जातस्य जीवितकालनिर्णयः, यात्रा नाम जीवितकाले वर्तनम् इति प्रत्रमार्गव्याख्या।

[5] होराशाखम् - ४/१

[6] बृह. १/३

**आद्यन्तवर्णलोपाद्धोराऽस्माकं भवत्यहोरात्रात्।**

**तत्प्रतिषिद्धः सर्वो ग्रहभगणश्चिन्त्यते यस्मात् ॥** [1]

अस्यार्थस्तु लग्नं राश्यर्द्धं रेखाशास्त्रभेदश्चेति मेदिन्याम्।

**लग्नेऽर्थे होरा यथा संज्ञा वेश्माष्टमयोश्चतुरस्त्रं वै तपश्च नवमस्य।**

**होरास्तदशजलानां चतुष्टयं कण्टकं केन्द्रम्॥**[2]

**होरादयस्तनुकुटुम्बसहोत्यबन्धुसुत्रारिपनिमरणानि शुभास्पदायाः। रिःफारव्यमित्युपचयान्परिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न नित्यमेके ॥**[3]

**राश्यद्धेऽर्थे होरा यथा विषमर्केषु प्रथमहोराः स्युश्चण्डरोचिषः।**

**द्वितीया शशिनो युक्षु व्यत्ययाद् गणयेत् सदा ॥**[4]

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव॥** [5]

ननु शुभस्य अशुभस्य वाऽवश्यम्भाविनः किं व्यनक्तीत्यपेक्षायामुच्यते द्विविधं शुभाशुभं दृढकर्मोपार्जितमदृढकर्मोपार्जितञ्च। तत्र दृढकर्मोपार्जितस्य दशाफलं पाकक्रमेण व्यनक्ति। अशुभं दशाफलं ज्ञात्वा यात्रादेः परिहारः कर्तव्यः। शुभं ज्ञात्वा प्रवृत्तिः। यदा हि पूर्वजन्मकर्मार्जितं शुभाशुभफलं व्यञ्जयन्तीत्येतस्य कवनस्यायमेवाशयो यद्यस्य यादृक् सञ्चितं कर्म स तदनुकूले समये जन्म लभत इति। ग्रहनक्षत्राण्यपि तथैव यथायोगमनुकूलाः प्रतिकूला वा भूत्वा शुभमशुभं वा प्रकटयन्ति च। शुभाशुभाज्ञानानन्तरं नरः शान्त्यादिविविधोपायेन शुभं परिहर्तुं प्रभवेदिति फलादेशस्य महत्त्वम्। यस्य जन्मनि यस्य यस्य ग्रहादेः प्राबल्यं स तत्समानप्रकृतिक एव भवतीति मेलापकादावस्य सुमहत्प्रयोजनम्। अत एवोक्तं त्रिस्कन्धज्ञो नावसीदतीति। तस्मात् स्थितमेतत् अस्यावश्यकता यथाऽऽह -

**अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः।**

**यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ॥**

केचन आचार्याः कथयन्ति यत् ज्योतिषशास्त्रं प्रश्न वास्तुसंज्ञकयोः स्कन्धयोः मिश्रणेन पञ्चस्कन्धात्मकमस्ति । वर्तमानसमये ज्योतिषशास्त्रस्य विषयक्षेत्रं बहुविस्तृतमस्ति। ज्योतिषशास्त्रस्य क्षेत्रे सिद्धान्त संहिता होरा प्रश्न वास्तु शकुनानैस्सह - गतिविज्ञान- स्थितिविज्ञान-अन्तरिक्षविज्ञान पदार्थविज्ञानादयो नैके विषयाः अपि अधीयन्ते ।

**वेदेषु ज्योतिषशास्त्रस्य स्थानम्-** वेदेषु ज्योतिषशास्त्रं प्राचीन भारतस्य अत्यन्तं महत्वपूर्णं अंगं आसीत्। वेदाङ्गेषु षड्वेदाङ्गानि प्रसिद्धानि, तेषु एकं ज्योतिषशास्त्रम्। एषः शास्त्रं यज्ञानुष्ठानस्य कालनिर्णयाय, ऋतुकालज्ञानाय, च खगोलविज्ञानस्य प्राचीनरूपाय प्रतिष्ठापितम्। विस्तृतं विवेचनं यथा:

- वेदाङ्ग ज्योतिषं यज्ञकर्मणां समयनिर्णयार्थं रचितम्। यज्ञेषु उचितं मुहूर्तं निर्धातुं सूर्य, चन्द्र, नक्षत्राणां च गतिं, स्थितिं च गणितीयं रूपेण जानाति।
- उदाहरणार्थ, तिथयः, नक्षत्राणि, ऋतवः च उपयुक्ता यज्ञकार्याणां अनुष्ठानाय निर्णयाय।
- ऋग्वेदादिषु ऋतूनां, कृषिसमयस्य च ज्ञानं ज्योतिषाधारेण स्थापितम्। उदाहरणतः वर्षाकाल, शीतकाल, वसन्तकाल इत्यादीनां स्पष्ट निर्णयं ज्योतिषज्ञानस्य फलम्।

---

1 सारावली कल्याणवर्मा

2 साराबल्याम्

3 बृहज्जातक १/१५

4 भावकुतूहल १-८

5 लघुजातकम्

**वास्तुशास्त्रे ज्योतिषशास्त्रस्य प्रयोगः-** वास्तुशास्त्रं भारतीयपरम्परायां एकं प्राचीनं विज्ञानं भवति, यस्य आधारः पंचमहाभूतानि भूमिः, जलम्, अग्निः, वायुः, आकाशःतथा दिशासूत्रम् अस्ति। वास्तुशास्त्रे ज्योतिषस्य महत्त्वपूर्णं योगदानं अस्ति , यतः गृहस्य निर्माणे, स्थाननिर्धारणे, दिशानिर्णये, ऊर्जासंतुलने च ग्रहाणां प्रभावः समीक्षितः भवति।

**"ग्रहाणां बलमासाद्य भवनं शुभदं भवेत्।**
**दोषयुक्ते तु गृहे वासः, न स्यात् सुखकरः कदा॥"**

वर्तमानयुगे जनसंख्याधिक्येन यत्र तत्र सर्वत्र गृहनिर्माणकार्यं प्रचलति । भूम्याः केचनभागाः एव अवशिष्टाः दृश्यन्ते, अधिकांशभागेषु तु नैकैः भवनतलैः युक्तानि विशालभवनानि व्याप्तानि । जनाः अधिकं न विचार्य धनसंचयार्थ, निवासार्थ, अधिकसमृद्ध्यर्थं च कुत्रापि भूमिं क्रयित्वा भवनं निर्मायन्ते । एवं तद्योग्यमपि वर्तते, यथा कथ्यते -

**कोटिघ्नं तृणजे पुण्यं मृण्मये दशसङ्गुणम् ।**
**ऐष्टिके शतकोटिघ्नं शैलेअनन्तं फलं गृहे ॥**[1]

श्लोकानुसारं तु पर्णशाला निर्माणात् कोटिगुणाधिकं पुण्यं, मृण्मयगृहनिर्माणात् दशकोटिगुणाधिकं पुण्यं, इष्टिकागृहनिर्माणात् शतकोटिगुणितं पुण्यं तथा च पाषाणगृहनिर्माणात् अनन्तकोटिगुणितं पुण्यं मनुष्याः लभन्ते । इत्थं गृहनिर्माणं तु समेषामेव जीवधारिणां कृते प्राथमिकी-आवश्यकता कथितुं शक्यते । परं शास्त्रेषु यथा उत्तमाधममध्यममनुष्याणां, पशूनां, पक्षीणाञ्च लक्षणानि निर्धारितानि तथैव भूम्याः, गृहाणां, भवनानां, प्रासादानाञ्च उत्तमाधममध्यमलक्षणोपेतं वर्णनं विद्यते । जनाः निवासाय, लोभपूर्त्यर्थं, व्यापाराय, धनसञ्जयाय च गृहाणि कारयन्ति, परमज्ञानवशात् ते न जानन्ति यत् 'गृहनिर्माणानेन मम शुभं भविष्यति अशुभं वा' । पूर्वोक्तेषु प्रकरणेषु भूम्यादीनां शुभाशुभलक्षणानि प्रोक्तानि । तदनुसारं विचार्यते यत् वास्तुशास्त्रदृष्ट्या यदि भूमिचयनं, भूशोधनं, शुभमुहूर्ते गृहारम्भम्, गृहप्रवेशच क्रियते, तह्येव ते जनाः शान्त्या सुखेन वा निवसन्ति । अन्यथा गृहं तु तत्रैव स्थास्यति परन्तु तस्य मनुष्यस्य पार्श्वे यत्किमपि अवशिष्टं भवति तस्य सर्वस्य नाशं प्रादुर्भूयते । अनुचितस्थाने गृहनिर्माणेन गृहपतिः विविधान्यशुभफलानि यथा व्याधिः, अकालमृत्युः, अग्निभयं, चौरभयं, राजभयं, कुलनाशेत्यादीनि प्राप्स्यति ।

**दिशानिर्धारणे ग्रहाणां प्रभावः-** प्रत्येकग्रहः विशेषदिशायां प्रभावं करोति। ग्रहसन्तुलनेन भवननिर्माणं सम्यक् भवति।

| **ग्रहः** | **संबद्धदिशा** | **प्रभावः** |
|---|---|---|
| सूर्यः | पूर्वदिशा | तेजः, ऐश्वर्यं, नेतृत्वम् |
| चन्द्रमाः | उत्तरदिशा | शीतलता, मानसिकसंतुलनम् |
| मंगलः | दक्षिणदिशा | शक्तिः, साहसम्, रक्षणम् |
| बुधः | उत्तरपश्चिमदिशा | बुद्धिः, व्यावसायिकसिद्धिः |
| गुरुः | उत्तरपूर्वदिशा | ज्ञानम्, अध्यात्मिकता, समृद्धिः |
| शुक्रः | पश्चिमदिशा | ऐश्वर्यं, सुखसमृद्धिः |
| शनिः | दक्षिणपश्चिमदिशा | दीर्घायु, धैर्यं, स्थिरता |
| राहुः | वायव्यदिशा | अप्रत्याशितपरिणामाः |
| केतुः | ईशानकोणः | मोक्षः, आध्यात्मिकशक्तिः |

**वृक्षायुर्वेदशास्त्रे ज्योतिषशास्त्रस्य प्रयोगः-** प्रकृतिः संसारस्य समस्तपदार्थानां मूलकारणं वर्तते। एषा प्रधानं तथा च त्रिगुणात्मिकाऽस्ति । सत्वरजसतमत्रयाणां गुणानां साम्यावस्था एव प्रकृतिः अस्ति। एषु त्रिषु गुणेषु क्षोभोत्पन्नेन तथा च प्रकृतिपुरुषत्तत्त्वसंयोगेनैव

[1] बृहद्वास्तुमाला लोक - ५ पृष्ठ संख्या - २

व्यक्तजगत् अर्थात् दृश्यमानप्रकृतिः दृष्टिगोचरः भवति। अनेनैव क्रमेण सर्वप्रथमं प्रकृतेः महत् महतात् अहंकारः अहंकारात् षोडशतत्त्वानां समूहः (पञ्चज्ञानेन्द्रियः, पञ्चकर्मेन्द्रियः, पञ्चतन्मात्राः च मनः) उत्पद्यते। पञ्चतन्मात्राभिः क्रमशः शब्दस्पर्शरूपरसगन्धाः तन्मात्राः उत्पद्यन्ते। तन्मात्रायाः क्रमशः आकाशः, वायुः, तेजः, आपः, भूमिं पञ्चमहाभूतानामुत्पत्तिर्भवति।

तदन्तरं समस्तवृक्षाणां जीवजन्तूनामुत्पतिर्भवति। किन्तु मानवः स्वयमेव प्रकृतेः पृथक् नास्ति। विविधरूपप्रकृतिः मानवाय नैकप्रकारान् पदार्थान् ददाति। मानवः स्वज्ञानविज्ञानेनैव एतान् पदार्थान् उपयोगार्थ सुकरं करोति। केषां पदार्थानां प्रयोगः मानवः प्राकृतिकरूपेण करोति, किन्तु कतिपयपदार्थानां संशोधितपरमार्जितरूपेण उपयोगं करोति।

अनेनैव प्रकारेण प्रकृतिमानवयोः द्वयोरेव साहचर्यसम्बन्धः अस्ति यतोहि मानवः प्रत्यक्षपरोक्षरूपेण अनेकेषां क्रियाकलापानां प्रकृतेः प्राङ्गणे करोति। शरीरं रोगरहितकर्तुम् आयुर्विज्ञानस्य तथा च निवासस्थानं सुखपूर्वकं व्यवस्थितं च स्थापनाय वास्तुशास्त्रस्य उद्भवः सञ्जातः। विज्ञानस्य समस्तविधयः वैदिकवाङ्गमयात् स्पष्टयन्ति यत् आर्यजनाः गणितज्योतिषकृषिरसायनायुर्वेदादिसमस्तावरधारणाभिः सुपरिचिताः आसन्। एतेषु क्षेत्रेषु विशिष्टज्ञानं सम्पादयन्ति स्मा

कालागुणं विस्तृतज्ञानम् अस्माकं सम्मुखे ज्ञानविज्ञानयोः विशिष्टशाखायां निर्माय प्रस्तुतम्। आरोग्यप्रदानाय आयुर्विज्ञानस्य प्रादुर्भावः सञ्जातः। संस्कृतीनां सम्पर्केण स्पष्टं भवति यत् मानवः स्वयमेव समष्टिगतप्रकृतेः अंशः विद्यते अपि च समस्तज्ञानविज्ञानञ्च अस्य जगतः अन्तर्भूततत्त्वानि सन्ति।

**वराहो वेद वीरूधं नकुलो वेद भेषजीम्।**
**सर्पा गन्धर्वा या विदुस्ता अस्मा अवसे हुवे ॥**
**वयांसि हंसा या विदुर्याश्च सर्वे पतत्रिणः ।**
**मृगा या विदुरोषधीस्ता अस्मा अवसे हुवे॥"**[1]

आयुर्वेदेन शरीरस्य स्वास्थ्यरक्षणमलनिवारणादिना सह प्राकृतिकरीत्या मूलतो रोगाः निवार्यन्ते। किञ्च आयुर्वेदेन समूलं सर्वेऽपि रोगाः विकाराः च अपगच्छन्ति। आयुर्वेदेन ऋत्वनुगुणं व्यक्तेः रोगस्य च प्रकृत्यानुगुणं रोगनिदानं प्राकृतिकौषधिभिः ज्ञायते। येन सम्पूर्णस्वास्थ्यचिन्तनं जायते। सामान्यतया तु वनस्पतिविज्ञानस्य अन्तर्गतवृक्षादीनां जीवनसम्बद्धविकासक्रियायाः अध्ययनं भवति।

संहिताग्रंथेषु औषधिः वनस्पतिः शब्दद्वयं प्राप्यते। औषधेः मुख्यरूपेण द्वौ भेदौ स्तः वनस्पतिः औषधिः च। ऋग्वेदे वृक्षवनस्पतिशब्दाभ्यां वनिन् शब्दस्य प्रयोगः मिलति। वनस्पतिः देवरूपेण स्वीक्रियते। वनस्पतीनां नृपः सोमः मन्यते।

**पुष्पं विना जायमानफले।**[2]
**फलीत्वेव वनस्पतिः।**[3]
**वनस्पतिर्वक्षमात्रे।**[4]

सामान्येन वनस्पत्याः अभिप्रायः पृथ्व्याम् उत्पन्नाः समे उद्भिजाः। ऋग्वेदस्य अनेकेषु मुक्तेषु एतेषां महिम्नः वर्णनमस्ति। अथर्ववेदेऽपि वनस्पतयः देवसदृशाः विज्ञाय धनादेः कामनां कुर्वन् आहुतेः विधानमस्ति।

आयुर्विज्ञानस्य ग्रन्थेषु वनस्पतिः शब्दस्यार्थद्वयः प्राप्नुवन्ति। प्रथमे यस्मिन् वृक्षे पुष्पेण बिना फलमागच्छति स वृक्षः वनस्पतिरिति कथ्यते। यथा अश्वत्थवटवृक्षादयः। अपरं यत्र वृक्षे पुष्पेण सह फलमागच्छति सैव वनस्पतिरिति कथ्यते।

**आधुनिक-आयुर्विज्ञानस्याधारेण-** वनस्पतिविज्ञानस्य आङ्ङ्गलभाषायां Botany इति कथ्यते यथा-'BOTANY' ग्रीकशब्दः यथा

[1] अथर्व.स. ८.७.२३.२४
[2] वा.प. पू. सं. १६४
[3] * वैजयन्तीकोष, ३.३.६
[4] 'श.र.स.को.पू. सं. १६४

'BOTANIKH'[1] इत्यस्मात् निर्मीयते यस्याऽर्थोऽस्ति वृक्षाः। 'BOTANY' शब्दस्यार्थोऽस्ति वृक्ष वनस्पतीनामध्ययनम्। शास्त्रोऽयम् स्थावरविद्या औषधिविद्या वृक्षलतातृणादिविद्या तथा च वृक्षायुर्वेदनाम्नापि उच्यते।

**आधुनिकज्योतिषे भारतीयपरम्परा-** आधुनिककाले भारतीयज्योतिषं वैज्ञानिकदृष्ट्या पुनः परीक्षितं भवति। NASA, ISRO इत्यादीनां गणनासु आर्यभट्टस्य गणितमूलकसिद्धान्ताः प्रयुक्ताः।

- NASA, ISRO इत्यादीनां खगोलशास्त्रेषु भारतीयगणनापद्धतिः प्रयुज्यते।
- MIT, Stanford, Harvard इत्यादयः विश्वविद्यालयाः ज्योतिषस्य वैज्ञानिकतत्त्वं शोधयन्ति।
- आधुनिककाले ज्योतिषीयसॉफ्टवेयरप्रयुक्तानि – यथा Kundli, Astro Sage, Astro talk, Jagannatha Hora इत्यादयः।

**उपसंहारः**

भारतीयज्योतिषशास्त्रं तत्त्वज्ञानं, विज्ञानं, दर्शनं च समाहितं प्राचीन विद्या अस्ति। एषः केवलं भविष्यवाणी-प्रणाली न, अपितु जीवनस्य सामान्यावस्थानाम् परिपालनाय मार्गदर्शनं ददाति। अद्यापि अस्य महत्वं नष्टं न भवति।

**प्रमुखसन्दर्भग्रन्थाः**


*आचार्य भास्करः, (२०१०)। सिद्धान्तशिरोमणिः। सम्पादक, डॉ. मुरलीचतुर्वेदः। सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी।

* आचार्यः वराहमिहिरः, (२००४)। लघुजातकम्। चौखम्भासुरभारती वाराणसी।

* ओझा, गोपेशकुमारः, (२००३)। फलदीपिका। मोतीलालबनारसीदास वाराणसी।

* चतुर्वेदी, डॉ. शुकदेवः, (२००४)। ज्योतिषशास्त्र में रोग विचारः। मोतीलालबनारसीदास नवदेहली।

* चतुर्वेदी, प्रो. शुकदेवः, (२००७)। ग्रहदोष कारण एवं निवारण। इंडिकापब्लिकेशन नवदेहली।

* चतुर्वेदी, डॉ. गणेशदत्त, (२०१९)। वास्तुशास्त्रे विन्यासविचारः। अभ्युदयप्रकाशनम् नवदेहली-११००४५/

* जैमिनिः, महर्षिः, (२००७)। जैमिनिसूत्रम्। रज्जनपब्लिकेशन नवदेहली।

* झा, डॉ. सुरकान्त (२००६)। भारतीय ज्योतिष विज्ञान। चौखम्बा कृष्णदास अकादमी, वाराणसी।

* शर्मा, डॉ. बिहारी लाल, (२०१५)। भैषज्यज्योतिषम्। भारतीयविद्याप्रकाशन दिल्ली वाराणसी।

* शर्मा, डॉ. रामरङ्ग, (२००२)। ज्योतिष एवं आयुर्वेदिक चिकित्सा। भारतीय विद्या संस्थान वाराणसी- २२१००२।

* त्रिपाठी, डॉ. देवीप्रसाद, (२००६)। वास्तुसारः। परिक्रमा प्रकाशन शाहदरा दिल्ली।

* त्रिपाठी, पं. अवधबिहारी, (२००६)। बृहदवकहोडाचक्रम्। चौखम्भाविद्याभवन वाराणसी।

* देव, श्रीभोजः, (२०११)। समराङ्गणसूत्रधार। सम्पादकः, डॉ. श्रीकृष्ण जुगनूः। चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।

* दैवज्ञः, गणेशः, (२००८)। जातकालङ्कारः। सम्पादकः, डॉ. सत्येन्द्र मिश्रा चौखम्भा सुरभारतीप्रकाशन वाराणसी।

* दैवज्ञः, रामः, (२००२)। मुहुर्त्तचिन्तामणिः। रञ्जनपब्लिकेशन नवदेहली।

* दैवज्ञः, वासुदेवः, (१९९७)। वास्तुप्रदीपः। सम्पादकः विंध्येश्वरीप्रसाद द्विवेदी। चौखम्बा संस्कृत सीरिज ऑफिस वाराणसी।

* दैवज्ञः, जीवनाथः, (२००९)। वास्तुरत्नावली। जुगनुः श्रीकृष्णः। दिल्ली ऑरियेन्टलिया चौखम्भा।

* दैवज्ञ, दुण्डिराजः, (२००८)। जातकाभणम्। चौखम्भा अमरभारती।

* दैवज्ञरामः, (२०२०)। मुहूर्तचिन्तामणिः। व्याख्याकारः। श्रीविन्ध्येश्वरीप्रसादद्विवेदी। सम्पादकः।


[1] Currentaffairs.org

# श्रीसारदादेव्याश्चरितचिन्तनम्

डॉ. शान्तिघोषः,
सहायकाध्यापकः (अतिथिः), अद्वैतवेदान्तविभागः,
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः, कोलकाता- 35
दूरवाणीसंख्या- 7596859526
ईमेल्- shantighoshvedvid@gmail.com

**शोधनिबन्धसारः** – करुणाघनविग्रहः साक्षादीश्वरः कलौ श्रीरामकृष्णपरमहंसरूपेण अवततार। तदीयमवतारत्वं तदानीन्तनाः योगिनो ज्ञानिनो महात्मानो विद्वद्वराश्च मुक्तकण्ठं गीतवन्तः। श्रीमद्-विवेकानन्दस्वामिपादैः अन्यैश्च सन्न्यासिशिष्यपुङ्गवैः भक्तवरैश्च तदवतारतत्त्वं भूयो भूयः समदर्शि। भगवतः श्रीरामकृष्णपरमहंसस्य शक्तिस्वरूपिणी श्रीसारदादेवी।

वङ्गेषु बाँकुडामण्डलस्य जयराम्बाटीग्रामे सात्त्विक-ब्राह्मण-दम्पत्योः रामचन्द्रमुखोपाध्याय-श्यामासुन्दर्योः दिव्यप्रकारेण श्रीसारदा समजनि। श्रीसारदायाः वास्तवं स्वरूपं प्रकाशयता श्रीरामकृष्णदेवेन भणितम् "सा सारदा सरस्वती, ज्ञानं वितरितुम् अवतीर्णा" इति। अत एव श्रीरामकृष्णभगवत्पादः साधनानुष्ठानावसरे दक्षिणेश्वरे धर्मपत्नीं तां षोडशीरूपेण समभ्यर्च्य स्वानुष्ठिततपसः फलं जपमालाञ्च तत्पादयोः समर्पयामास। तपोऽनुष्ठाने भर्त्तुः श्रीरामकृष्णस्य आदरातिशयं पश्यन्ती श्रीसारदापि स्वं समग्रं जीवनं तपोमयम् आपादयत्। अन्तरेण श्रीरामकृष्णपरमहंसदेवं देव्याः सारदायाः को वा गुरुः भवितुम् प्रभवेत्। एकदा लोके जनानां दुःखातिशयं स्वहृदये अनुभवन् व्याकुलीभूतः श्रीरामकृष्णपरमहंसः सहधर्मचारिणीं श्रीसारदाम् आदिदेश – कलिकातास्थजनाःऽ कीटा इव दुःखार्णवावर्त्ते सततं बम्भ्रम्यन्ते निर्मोक्षञ्च न लभन्ते, तेषाम् उद्धाराय त्वं किमपि कुरु इति। एवं श्रीसारदायाः अवतरणस्य लक्ष्यं तत्सिद्धौ उपायांश्च प्रदर्श्य श्रीरामकृष्णपरमहंसदेवः महासमाधौ अलीयत। सद्गुणनिधेः श्रीसारदायाः तपोऽनुष्ठानं लब्धोदया चन्द्रलेखा इव दिने दिनेऽवर्धत। शास्त्रोक्ततपसः अनुष्ठानम्, जपः, ध्यानम्, समाधिः तस्याः प्रात्यहिकजीवनं समन्ततः व्याप्नोत्। अत एव श्रीसारदया क्वचित् स्वयमेव उदीरितम् "आदर्शप्रतिष्ठापने यावद् इष्यते ततोऽधिकं सम्पादितं मया"[1] इति।

लोकोत्तरं तदीयं तपोऽनितरसाधारणम्। परब्रह्मशक्तेः तस्याः तपसः औपम्यं तदीयम् तप एव स्यात्, नान्यत्। एवमनन्यालङ्कारेण व्याहरणं विना नान्यः प्रकारः बुद्धिम् अध्यास्ते। श्रीसारदीयम् आचरणम्, वचः, चिन्तनम् इत्येतत्सर्वं "स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते"[2] इत्युक्तिदिशा जनानां प्रमाणभूतम् अभवत्। नारदभक्तिसूत्रे "सुकर्मीकुर्वन्ति कर्माणि" इति यद्गीतं तस्य समुज्ज्वलं निदर्शनं श्रीसारदायाः जीवनम्। तदत्र संक्षेपेण उच्यते।

**कूटशब्दाः** – तपः, निःश्रेयसम्, भक्तिः, ज्ञानम्, ध्यानम्, समाधिः, जपः, पातिव्रत्यम्।

**प्रवृत्तिनिमित्तम्** –

नवयुगावतारः भगवान् श्रीरामकृष्णपरमहंसदेवः तस्य शक्तिस्वरूपा श्रीसारदा च ज्ञानिभिः, योगिभिः, यतिवरैः, विद्वत्प्रवरैश्च भक्त्या वन्दन-स्तवन-पूजनादिभिः समाराधितौ। तत्र श्रीसारदादेव्याः तपसः चिन्तनम् अनुसन्धित्सितम् अत्र प्रबन्धे।

विविधैः प्रयोजनैः जनाः तपसि प्रवर्तन्ते। लोको हि भिन्नरुचिः। विद्यार्थिनः अध्ययनरूपे तपसि प्रवर्तन्ते विद्यार्जनाय, गृहमेधिनः धर्मसम्पादनाय, प्रौढाः तत्त्वज्ञानाय, चरमाश्रमिणः ब्रह्मानुभवाय, राजर्षयः प्रजानां योगक्षेमाय युद्धादौ विजयाय वा, रोगिणः निरामयाय, आर्ताः दुःखविमोचनाय, धनार्थिनः सम्पदे, जिज्ञासवः ज्ञानलाभाय इत्येवं नाना लक्ष्यम् अभिलक्ष्य जनाः तपसि प्रवृत्ताः परिलक्ष्यन्ते। किन्तु श्रीसारदायाः तपः एषु प्रकारेषु न क्वापि अन्तर्याति दिव्यस्वरूपत्वात् तस्याः। वयं तु श्रीसारदायाः तपसः चिन्तनं दुःसाध्यं जानन्तः अपि "परं जाने मातस्त्वदनुसरणं क्लेशहरणम्" इत्युक्तदिशा अत्र प्रवृत्ताः।

**नवयुगावतारतत्त्वम्** – पुरा असुराः सशरीरा भुवि व्यचरन्। कलौ युगे तु आसुरी प्रवृत्तिः समाक्रम्य मनः सूते अनर्थसन्दोहम्। अन्तःकरणे

[1] श्रीमा सारदा देवी, पृष्ठाङ्कः ४७

[2] गीता ३/२१

प्रचलन् शुभाशुभयोः संघर्षः बहिर्युद्धादपि घोरतरः। अत्र अन्तश्शत्रूणां[1] विजयेन हेतुना भगवदवतरणं समभवत् इति विशेषः। शत्रुविजयः बहिः अन्तश्चेति द्वेधा शक्यते। बहिः पापिनाम् असुराणां सम्मर्देन आद्यः। सद्गुणैः सद्धर्मैश्च दोषाणाम् उपमर्दः अन्त्यः। द्वितीये भगवान् स्वलीलया जनानां चेतः स्वं प्रति समाकृष्य सद्गुणान् उद्भाव्य पापप्रवृत्तिं निहन्ति। लोके धर्मो हि परमः। धर्मश्च सत्ये प्रतिष्ठितः। अत एव गौतमबुद्ध-शङ्करभगवत्पाद-चैतन्यमहाप्रभु-रामकृष्णपरमहंसैः अहिंसा-सत्यादिधर्मसंस्थापनद्वारा लोककल्याणं संसाधितम्।

**ब्रह्मशक्तिः सहचारिणी** – भगवति नरशरीरेण धरणीम् अवतीर्णे शक्तिः नारीरूपेण आगम्य भगवतः कार्याणि सम्पादयति। अन्यथा शक्तिविधुरो भगवान् अकिञ्चित्कर एव स्यात्। अत एव श्रीरामचन्द्रेण सह सीतायाः, श्रीकृष्णेन सह राधिकायाः, बुद्धेन सह यशोधरायाः, श्रीचैतन्येन सह विष्णुप्रियायाः आविर्भावः समभवत्।[2] तदुक्तं श्रीमच्छङ्करभगवत्पादैः "शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि"[3] इति।

यः त्रेतायां रामात्मना द्वापरे च कृष्णात्मना धर्मं स्थापयामास स एव भगवान् अस्मिन् नवयुगे श्रीरामकृष्णपरमहंसरूपेण धर्मसंस्थापनाय समवतीर्णः। तस्य च शक्तिः श्रीसारदामणिदेवी।

**जन्मतिथिप्रभृतयः** – वङ्गराज्यस्य बाँकुडामण्डले जयराम्बाटीग्रामे १२६० बङ्गाब्दे श्रीसारदा अवततार। ख्रिस्ताब्दे तु १८५३ -तमे संवत्सरे डिसेम्बर्-मासस्य द्वाविंशे दिवसे तज्जन्म। मासः पौषः, वासरः बृहस्पतिः, तिथिः कृष्णपक्षीयसप्तमी, नक्षत्रम् उत्तरफाल्गुनी, चरणं प्रथमम्, योगः आयुष्मान्, करणं बवः।

जन्मपत्रिकानुसारं श्रीसारदायाः राश्याश्रितं नाम श्रीमती ठाकुरमणि देवी। लोके तु सारदामणिदेवी इति नाम एव प्रसिद्धिम् आगमत्। श्रीसारदा आसीत् पित्रोः प्रथमदुहिता। तस्याः मातृप्रदत्तं नाम क्षेमङ्करी। सारदा इति नामापि पश्चात् मात्रा एव प्रदत्तम्।[4]

**जन्मलीला** – वृक्षलतागुल्मादिपरिशोभिते पतत्रिकुलकलरवमुखरे मनोऽभिरामे जयराम्बाटीग्रामे श्रीरामचन्द्रमुखोपाध्यायः श्यामासुन्दरीदेवी इति सात्त्विकप्रकृती दम्पती आस्ताम्। धर्मनिष्ठा-श्रद्धा-भक्तिवतोः तयोः सदने श्रीसारदा आविर्बभूव। आचारनिष्ठः सद्ब्राह्मणः श्रीरामचन्द्रः कुलदेवतायाः श्रीरामचन्द्रस्य परमभक्तः आसीत्। श्यामासुन्दरी प्रकृत्या सरला देवद्विजगुरूणां सेवापरायणा च आसीत्। बहुजन्मकृतसुकृतसन्दोहेन तौ साक्षाद् जगन्मातरं श्रीसारदां दुहितृरूपेण अलभताम्। दिव्यप्रकारेण देवशिशुं स्वाङ्के लभमानौ तत्पितरौ आत्मानं धन्यम् अमन्येताम्। श्रीसारदा एकदा पित्रोः महत्त्वविषये एवमवादीत् "पिता मे श्रीरामचन्द्रस्य परमभक्तः परोपकारतत्परः, माता च अतीव दयालुः। अतो मया तद्गृहे अजनिषि"[5] इति। समग्रः जयराम्बाटीग्रामः एव देव्याः जन्मना लीलया च पवित्रीकृतः सम्प्रति भुवि महातीर्थक्षेत्रत्वेन संशोभते।

**बाल्यलीला** – श्रीसारदायाः बाल्यलीला विशिष्टा आसीत्। दैवी सम्पद् मानुषरूपेण भुवमलञ्चकार। तस्यां प्रकाशमानैः दैवीगुणैः ग्रामजनाः उल्लसितमानसाः समपद्यन्त। स्वभावेन सारदा सरला शान्ता कुशाग्रमतिः च। बाल्याद् एव तस्यां दयायाः स्रोतः अप्रतिहतं वहति स्म। तद्यथा, १८६४ -१८६५ ख्रिस्ताब्दयोः बङ्गराज्ये महत् दुर्भिक्षम् अभवत्। निरन्ने ग्रामे क्षुधिताः जनाः प्राणधारणे अक्षमाः अभवन्। स्वभावतः दयालुः रामचन्द्रः बुभुक्षितान् मनुष्यान् भोजयितुं स्वगृहे एव अन्नसत्रम् आरब्धवान्। नैके बुभुक्षिताः भोजनार्थं प्रत्यहं तत्र आगच्छन्। अत्युष्णं भोजनं भुञ्जतः जनान् बालापि श्रीसारदा व्यजनवातेन असेवत। स्वभावतः एव सा एतादृशे सेवाकर्मणि निरता।

यदा श्रीसारदायाः कोमलविटपानुकारिणौ पेलवौ बाहू कठिनकर्म कर्तुम् अक्षमौ तत्कालतः एव सा गृहस्य अनेकविधकर्मसु

---

[1] अन्तश्शत्रवः इत्यनेन पदेन कामप्रभृतयः षट् रिपवः ग्राह्याः।

[2] श्रीमा सारदा देवी, पृष्ठाङ्कः १

[3] सौन्दर्यलहरी- १

[4] श्रीसारदादेव्याः मातृष्वसुः सारदेति कन्या आसीत्। सा दैवात् अकालमृत्युवशं गता। कालेन यदा रामचन्द्रश्यामासुन्दर्योः श्रीसारदा समजनि तदा सा मातृष्वसा प्रार्थयामास यत् श्यामासुन्दर्याः शिशोः सारदा इति नाम भवतु इति। इमं नामकरणवृत्तान्तं श्रीसारदा पश्चात् स्वयं स्वशिष्यं यतिं गौरीश्वरानन्दस्वामिनम् अश्रावयत्। (श्रीमा सारदा देवी, पृष्ठाङ्कः १६)

[5] श्रीमा सारदा देवी, पृष्ठाङ्कः १६५

पित्रोः साह्यम् आचरत्। कृषिभूमौ सञ्जातात् कार्पासात् यज्ञोपवीतं निर्माय व्यक्रीणात्। भ्रातृणां परिपालनमपि सा सनिष्ठम् अकरोत्। सा सहोदरान् स्नापयितुं प्रतिदिनम् आमोदरनदीं[1] नयति स्म। गवां परिपालनार्थं सा तृणादिकमपि संगृह्णाति स्म। क्षेत्रे कर्मरतानां कृषकाणां कृते भोजनमपि सा नयति स्म। एवं सर्वविधगृहकर्मसु श्रीसारदायाः नैपुण्यम् बाल्यादेव परिलक्ष्यते स्म। क्रीडनवेलायां बालाः परस्परं कलहायन्ते। श्रीसारदा क्रीडाद्यवसरे बान्धवैः साकं कदापि कलहं न करोति स्म। बान्धवेषु परस्परं कलहे समुद्भूते सैव आदौ निवारयति स्म। बाल्ये तस्याः प्रियतरं क्रीडनम् आसीत् देवपूजनम्।[2] बाल्यप्रभृतिः श्रीसारदा अन्यस्य कस्यचित् दोषं नैव पश्यति स्म। श्यामासुन्दरी पुत्रीम् अतीव स्निह्यति स्म। सा दैवगुणसम्पन्नां श्रीसारदां देवी इत्येव भावयति स्म। अतः जन्मान्तरेष्वपि सारदावत् कन्यका भवतु इति तन्माता ऐच्छत्।[3]

**युगावतारस्य लीलासहचारिणी** – भक्तानुजिघृक्षया यदा परं ब्रह्म प्रवर्तते तदा स अवतारः कथ्यते। पूर्वं त्रेतायां कौसल्यात्मजत्वेन, द्वापरे देवकीनन्दनत्वेन अवतीर्णः स एव भगवान् कलौ युगे श्रीरामकृष्णात्मना भुवम् अलञ्चकार। भगवतः श्रीरामकृष्णपरमहंसस्य लीलासहचारिणी श्रीसारदा। अग्नेः दाहिकाशक्तिरिव श्रीरामकृष्णेन अभिन्ना शक्तिः श्रीसारदा। शक्तिमृते अवतारस्य कार्यजातम् असम्पूर्णं लोकस्यापि अवेद्यं भवति। ब्रह्मस्वरूपिणी आदिशक्तिरेव अस्मिन् कालखण्डे युगावतारस्य सहधर्मिणीत्वेन अवतीर्य परमपुरुषस्य लीलाम् अपूरयत्। श्रीरामकृष्णपरमहंसैः स्वयम् इदं कीर्तितम् "सा साक्षात् सारदा, सरस्वती - ज्ञानं प्रदातुम् आविर्भूता। सम्प्रति स्वरूपम् आवृत्य समागता"[4] इति। पुनश्च उक्तं "सा ज्ञानदायिनी, महाबुद्धिमती। सा न सामान्या, मम शक्तिस्वरूपा" इति।

श्रीसारदायाः मातुलालयः शिहड्[5] इति ग्रामे आसीत्। तत्रैव भगवतः श्रीरामकृष्णस्य भागिनेयस्य हृदयरामस्य वेश्म आसीत्। तत्र उत्सवम् उपलक्ष्य कीर्तनम्, नाट्यं च अभिनीयते स्म। तदुपलक्ष्य आत्मीयैः सह श्रीसारदापि प्रतिवर्षं तत्र गच्छति स्म। श्रीरामकृष्णभगवत्पादोऽपि उत्सवम् उपलक्ष्य तं ग्रामम् उपातिष्ठत। तस्मिन्नेव अवसरे बाल्ये एव श्रीसारदायाः स्वयंवरः अभवत्। गीतवाद्यानुष्ठाने समाप्ते महिलासु काचित् ताम् अपृच्छत् "अत्र एतावन्तः जनाः उपस्थिताः सन्ति, एतेषु कं पतित्वेन त्वं वरितुम् इच्छसि"[6] इति। तत्क्षणे द्वौ हस्तौ प्रसार्य स्वपतिम् अङ्गुलीनिर्देशपूर्वकम् अवृणोत् श्रीसारदा। सः संकल्पः श्रीरामकृष्णेन अचिरादेव रक्षितः। यदा विवाहस्य प्रस्तावार्थं कालः समुपागतः तदा स्वसहधर्मिणीं संकेतपूर्वकं संसूच्य आह "जयराम्बाटीं गत्वा रामचन्द्रमुखोपाध्यायस्य गृहे पश्य, वधूः तत्रैव निश्चयेन लप्स्यते"[7] इति।

श्रीरामकृष्णभगवतः प्रेमनैर्भर्यं श्रीसारदया प्रतिक्षणम् अनुभूयमानम् अपि लज्जापटेन आवृतं तल्लोकदृग्गोचरं नैव आसीत्। तयोः दिव्यदम्पत्योः अध्यात्मं प्रेम लोकोत्तरम् अनितरसाधारणं च। तत्रेदम् उदाहरणत्वेन दर्श्यते - प्रथमवारं दक्षिणेश्वरम् आगत्य श्रीसारदा अष्टौ मासान् यावत् पत्या सहैव न्यवसत्। ग्रामे वासकाले पतिनिन्दया लोकापवादेन च कर्णकुहरे या असह्यपीडा आरब्धा सा पतिप्रेम्णा अलीयत। भगवतः विविधलीलायाः साहचर्यम् अपि अकरोत् सा। पतिमुखात् सा लौकिकाचारम् आध्यात्मिकरहस्यं च समकालमेव अशिक्षत। शनैः भगवतः दिव्यस्वभावः तन्मानसे संक्रमितः। नहबत्-गृहे श्रीसारदा विविधतपसि निमग्ना आसीत्। तदीयाध्यात्मिकमार्गे भर्तुः औत्सुक्यं विलोक्य सापि तपस्यायाम् अतन्द्रा आसीत्। अतः प्रात्यहिककार्यं समाप्यापि भगवत्पूजाम्, लक्षशः भगवन्नामजपम्, ध्यानं च निष्ठया आचरति स्म।

---

[1] 'आमोदर' इति जयराम्बाट्यां समीपे पश्चिमदिशः प्रवहमाना क्षीणतोया तटिनी। श्रीसारदा तां स्वच्छतोयां तटिनीं गङ्गातुल्यां मन्यते स्म। अतः पुण्यदिवसेषु तत्रैव गङ्गास्नानं समापयति स्म।

[2] बालाः क्रीडनसमये मृदादिना देवमूर्तिं निर्माय पूजयन्ति। बङ्गराज्ये इयं क्रीडा पूर्वम् अदृश्यत।

[3] श्रीमा सारदा देवी, पृष्ठाङ्कः २१

[4] श्रीमा सारदा देवी, पृष्ठाङ्कः ९२

[5] शिहड्- इत्ययं लघुग्रामः जयराम्बाटीग्रामस्य पश्चिमस्यां दिशि नातिदूरे अवस्थितः। तस्मिन्नेव ग्रामे हृदयरामस्यापि गृहम् आसीत्। हृदयरामः भगवतः श्रीरामकृष्णस्य भागिनेयः।

[6] श्रीमा सारदा देवी, पृष्ठाङ्कः २२

[7] श्रीमा सारदा देवी, पृष्ठाङ्कः २२

"द्वे विद्ये वेदितव्ये इहि स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च"[1] इति उपनिषदुपदिष्टः साधनमार्गः। श्रीरामकृष्णपरमहंसः लीलासहचारिण्यै श्रीसारदायै द्विविधामपि विद्याम् उपदिदेश। तस्यै संसारस्य अनित्यतां बोधयित्वा निर्वेदोदयाय अप्रैणीत्। स्वकीयसाधनमार्गे यथा ते अतन्द्रा आसन् तथैव सहधर्मिण्याः साधनविषयेऽपि। श्रीसारदायाः कथनानुसारं परमहंसः सदैव प्रफुल्लवदनः आसीत्। भगवत्कल्पात् पत्युः व्यवहारशिक्षां धर्मोपदेशं च अधिगम्य स्वभावशान्ता परमपवित्रा धर्मप्राणा पतिव्रता श्रीसारदा परमानन्दम् अन्वभूत्। दक्षिणेश्वरे नीवासकाले प्राप्तां तां परमानन्दानुभूतिं श्रीसारदा महिलाभक्ताभ्यः इत्थं न्यवेदयत् "हृदये आनन्दस्य पूर्णघटः संस्थापितः आसीत्, तदा एवम् अन्वभुवम्। तेन दिव्यानन्देन हृदयं कियत् पूरितं तद् अनिर्वाच्यम् आसीत्"[2] इति।

**पातिव्रत्यम्** – सनातनसंस्कृतौ स्त्रीणां पातिव्रत्यं परमं तपः। अरुन्धती-सती-सावित्र्यनसूया-सीता-द्रौपदी-प्रमुखानां नारीमणिनां चरितं पतिसेवायाः प्रकृष्टम् निदर्शनम्। नवयुगेऽस्मिन् पतिप्राणायाः श्रीसारदायाः चरितम् अपि उच्चकोटिक-निदर्शनतां भजते। "दैवतेष्वपि सर्वेषु भर्ता मे दैवतं परम्"[3] इत्युक्तदिशा श्रीसारदा पतिसेवामेव परं धर्मं मेने। सश्रद्धं सनिष्ठं च तया प्रतिदिनं पतिसेवायाम् एव सुदीर्घं कालः नीयते स्म। युगावतारस्य श्रीरामकृष्णपरमहंसस्य दक्षिणेश्वरजीवनं साधनानुष्ठानैः पर्युपयुक्तम् अभूत्। साधनान्ते तदीयं वपुः कृशं कोमलं च अभवत्। पचनशक्तिः अपि क्षीणा। एतदवधाय श्रीसारदा यथोचितसेवया पत्युः उल्लाघतां शरीरपुष्टिं च यत्नेन समपादयत्। सा स्वानुकूल्यम् अविगणय्य पतिसेवायां बद्धादरा शुश्रूषया एव परमं शर्म लेभे। भगवतः पादसंवाहनम्, स्नानात् पूर्वम् अङ्गेषु तैलमर्दनम्, देहस्थितिं समीक्ष्य उचितपथ्याहारादिप्रबन्धनम् इत्यादीनि तस्याः प्रात्यहिकं कर्म आसीत्। नितान्तं विरक्तेन समाहितस्वभावेनापि श्रीरामकृष्णभगवता श्रीसारदादेव्याः अनुत्तमसेवा सूक्ष्मेक्षिकया पर्यलक्षि, मुक्तकण्ठं प्राशंसि च। तद्यथा एकदा तैः सारदायाः समक्षम् एवम् अवादि "पश्य पश्य, त्वया पक्वं भुञ्जानस्य मे शरीरं कथं स्वस्थम् अस्ति"[4] इति।

श्रीसारदायाः पतिसेवापाटवम् अपूर्वम् आसीत्। अवतारपुरुषाणां सेवाभारं न सर्वे भर्तुं शक्नुयुः। मनुष्याणां देवतानाम् अन्येषां च महीयसां परिचर्या उचितपद्धत्या सम्पादनीया। देवमानवस्य तु सेवा न सर्वजनसाध्या। देवमानवी एव तत्र प्रभवेत्। श्रीसारदा पत्युः मनोगतं हृदा अनुसन्धाय मुख्यवृत्त्या सेवते स्म। तत्रेदं निदर्शनमुद्रया दर्श्यते - एकदा १८८५ संवत्सरे पानिहाटि इत्यत्र पृथुक-महोत्सवदर्शनार्थं श्रीरामकृष्णभगवता सह अनेके भक्ताः प्रस्थिताः आसन्। तेषु बहवः नारीमणयः अपि बभूवुः। आनन्दस्य परिवेशः उत्पन्नः आसीत्। नौकया प्रयाणम्, तत्रापि आनन्दमूर्तेः श्रीरामकृष्णस्य सान्निध्यम् इत्यतः सर्वे नितान्तं गमनोत्सुकाः आसन्। प्रस्थानात् पूर्वं श्रीसारदा आत्मनः तत्र गमनं स्यात् न वा इति ज्ञातुं श्रीरामकृष्णदेवस्य सकाशं काञ्चित् भक्तमहिलां प्रैषयत्। अचिरादेव सा भक्ता प्रत्यागम्य भगवता उक्तं न्यवेदयत् - "भवत्यः गच्छन्त्यः खलु, तस्याः यदि स्पृहा स्यात् आयातु नाम" इति। एतद्वचनश्रवणमात्रेण श्रीसारदया पत्युः आशयः विदितः। आत्मनः गमने पत्युः सहमतिः चेद् अभविष्यत् "नूनम् आगच्छेत्" इत्येवमादि विधिमुखेन असन्दिग्धम् अवदिष्यत्। तथा अकृत्वा कामाचारानुज्ञया गमनागमननिर्णयः आत्मनि एव विन्यस्तः इत्यतः नायं पत्युः हृदयेन अभ्युपगमः इति विविच्य श्रीसारदया उत्सवं प्रति गमनं निरस्तम्। अत्र केचन तन्निर्णयसाधुत्वे सन्दिहानाः भवेयुः। तत्र समाधानं श्रीरामकृष्णदेवस्य प्रशंसावचनम् एव। उत्सवात् प्रत्यागम्य श्रीरामकृष्णदेवैः उदीरितम् "अहो सम्मर्दः ! तत्रापि भावसमाधिं प्राप्ते मयि जनाः सर्वे माम् एव निरीक्षमाणाः! तया (सारदया) अनागम्य साधु समाचरितम्। अन्यथा आवयोः साहचर्ये जनाः 'हंसहंस्यौ इहागतौ' इत्यादि अवाच्यं ग्राम्यं भाषेरन्। नूनं सा कुशाग्रमतिः।" एवं रामकृष्णगतप्राणा सारदा नित्यव्यवहारे अपि भर्तुः मनोवृत्तानुसारिणी भूत्वा शास्त्रोदितं "तत्सुखसुखित्वम्" इत्यादिवचनं आचारेण निदर्शयन्ती विजयते।[5]

**अवतारकार्यसंसाधनम्** – शास्त्रविदिता परमा प्रकृतिः महामायेति सर्वभूतैराराधिता देवी कलौ मानवीं तनूं प्रपेदे अवतारवरिष्ठस्य श्रीरामकृष्णस्य सहायिकारूपेण। अवतारस्य भुवि समागमः महते प्रयोजनाय भवति। न केवलं धर्मस्य संरक्षणम् अपि तु प्रतियुगं धर्मस्य

[1] मुण्डकोपनिषत् १/१/४

[2] श्रीरामकृष्णलीलाप्रसङ्गः, साधकभावः, पृष्ठाङ्कः ३४३

[3] महाभारतम्, वनपर्व १९७/२९

[4] श्रीमा सारदा देवी, पृष्ठाङ्कः ७१

[5] श्रीमा सारदा देवी, पृष्ठाङ्कः ८२

नवतासम्पादनम्। परमहंसस्वामिनां सर्वधर्मसमन्वयवार्ता कलौ जेगीयते। अयम् अवतारः त्यागस्य पराकाष्ठाभूतः, निःस्वार्थप्रेम्नः प्रचारकः, सार्वात्म्यदर्शी, परमकृपालुः, व्यवहारवेत्ता च।

निर्वासनं मनः आत्मदर्शने क्षमम्। साधनेन भगवद्भक्त्या च मनसः नित्यं निर्मलता विधेया। तदैव त्यागस्य वैराग्यस्य च प्रकाशः निवातस्थदीप इव एकशिखः प्रज्वलति। संसारिषु वासना सुलभा। परन्तु श्रीसारदायाः संसारः नाम भगवद्भक्तस्य एव। अतः वासनाविर्भावस्य अवसरोऽपि नास्ति। तथापि विचिकित्सतां बुद्धिपरिपाकाय उच्यते यथा सुवर्णघटः संस्कारं नापेक्षते तथैव निरासक्तस्य चेतः साधनानि नापेक्षते। एकदा श्रीरामकृष्णपरमहंसः स्वसहधर्मिणीम् अपृच्छत् यत् 'किं त्वं मां संसारमार्गे समाकर्ष्टुं समागता असि' इति। श्रीसारदायाः प्रत्युत्तरम् आसीत् "न, कथमहं त्वां संसारचक्रे आकर्षेयम्? तवाभीष्टे मार्गे साह्यम् आचरितुमेव समागता अस्मि"[1] इति। एतद्वचनम् तस्याः अवतारकार्यसंसाधनं प्रति प्रमाणं भवति।

मोक्षः तेषां करामलकवत् हस्तगतः। अत आत्मोद्धारः अवतारपुरुषस्य अभीष्टं भवितुं नार्हति। लोककल्याणाय तेषां जीवितम् उत्सर्जनीयम्। परमहंसकामितं लोककल्याणव्रतं सफलयितुम् एव श्रीसारदायाः धरणीतले समागमोऽभवत्। परमहंसकार्यस्य नारीदेहेन कियद्वा कर्तुं शक्यते इति श्रीसारदया आक्रमितः श्रीरामकृष्णः उत्तरति अनेन शरीरेण यावत् संपादितं तदपेक्षया शतगुणितं साधनीयं भवत्या इति। मध्ये मध्ये सहधर्मिणीं प्रतिबोधयति स्म "न केवलं ममैव दायित्वं तवापि अस्ति महत् दायित्वम्"[2] इति। मया परहिताय कियत् वा साधितं त्वया अधिकमेव साधनीयम् अस्ति इति उवाच भगवान् श्रीरामकृष्णपरमहंसः। तदुक्त्वा च श्रीसारदादेव्यां भक्तानां भारं समर्पयामास। कलिकलङ्कम् अपनेतुं सदैव तां प्रत्यबोधयत्। तथाहि तद्वचनं "पश्य, कलकातास्थाः मानवाः अज्ञानतमसि कीटवत् बंभ्रम्यन्ते, तेषु कृपादृष्टिं कुरु"[3] इति। कलकातेति नामग्रहणं समग्रजगतः कृते उपलक्षणम्।

अवितथम् एतद्यत् मर्त्यलीलायां श्रीसारदया यावत् साधितं तस्य इयत्तापि कर्तुं न शक्यते। एकदा श्रीसारदा स्वयम् अवादीत् "आदर्शं स्थापयितुं यावत् सम्पादनीयम् आसीत् तदतिक्रम्य एव साधितम्" इति।

ननु साधनं विना आत्मसाक्षात्कारः सुदुर्लभः। श्रूयते च "दुर्गं पथस्तत्कवयो वदन्ति"[4] इति। अवतारवरिष्ठः साधकशिरोमणिः श्रीरामकृष्णपरमहंसः यां सहधर्मिणीत्वेन स्वीचकार तस्याः जीवनचरितं किं साधनविरहितं स्यात्। साधनस्य पराकाष्ठाभूतम् आसीत् श्रीसारदायाः जीवनचरितम्। श्रीसारदा शैशवे, दक्षिणेश्वरजीवने, श्यामापुकुरे यादृशं दैहिकं कष्टं सोढवती तत् तितिक्षायाः कृते न पर्याप्तं वा। तस्याः परमपूतं चरितं व्यनक्ति यत् सा शास्त्रोक्तविधिं नापेक्षते। तथापि लोकस्य शास्त्रे श्रद्धोत्पादनाय पञ्चाग्नितपः, सावित्रीव्रतं च तया अनुष्ठितम्।

'नेयं सज्जनसङ्गे चित्तम्' इति श्रीशङ्करभगवत्पादवचनम्। दक्षिणेश्वरे सा साधकानां सिद्धानां सतां च सङ्गतिम् अवाप्नोत्। भगवतः श्रीरामकृष्णात् अध्यात्मसाधनम् अशिक्षत। परमहंसचरणोऽपि ध्यानार्थं जपार्थं च तां प्रावर्तयत। ब्राह्मे मुहूर्ते समुत्थाय भगवन्नामजपः ध्यानञ्च तस्याः प्रात्यहिकं कर्म आसीत्। भगवतः श्रीरामकृष्णात् तत्त्वोपदेशं, भागवतीं वाणीं च अशृणोत्। एवम् अध्यात्मसाधनं श्रीसारदायां सहजतया अदृश्यत। तदीयतपस्यायां यथा विघ्नः न स्यात् तद्विषये सदा जागरूकः आसीत् परमहंसः श्रीरामकृष्णः।

**वराभयकरी** – दुर्गासप्तशत्यां "दुर्गे स्मृता हरसि भीतिमशेषजन्तोः"[5], "भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते"[6] इत्यादिना देव्याः अभयं प्रार्थ्यते। "लोकत्रयेऽपि फलदा ननु देवि"[7], "सर्वोपकारकरणाय सदार्द्रचित्ता"[8] इत्यादिभिश्च देव्याः वरदानकौशलं स्तूयते। तत्सर्वं

---

[1] श्रीमा सारदा देवी, पृष्ठाङ्कः ३८

[2] श्रीमा सारदा देवी, पृष्ठाङ्कः ९६

[3] श्रीमा सारदा देवी, पृष्ठाङ्कः ९६

[4] कठोपनिषत् १/३/१४

[5] दुर्गासप्तशती ४/१७

[6] दुर्गासप्तशती ११/२४

[7] दुर्गासप्तशती ४/१६

[8] दुर्गासप्तशती ४/१७

सा दुर्गा अस्मिन् युगे श्रीसारदारूपेण पुनरवतीर्य अनुजग्राह। अत एव श्रीमद्विवेकानन्द-स्वामिचरणैः सतीर्थ्याः सन्न्यासिनः उक्ताः – श्रीसारदा जीवन्ती दुर्गा इति। जगन्मातरं श्रीसारदां प्रपन्नाः शिष्याः शोकसागरम् उत्तीर्णाः। अत्रार्थे अनेके वृत्तान्ताः प्रामाण्यम् आवहन्ति।

सुरेन्द्रनाथरायः वरिशालमण्डलवास्तव्यः वैद्योत्तमः। श्रीसारदायाः मन्त्रदीक्षाम् अवाप्नोत्सः। यक्षारोगग्रस्तान् रोगिणः चिकित्सिन् स्वयमेव रुग्णः संवृत्तः। प्रत्यासन्नं मरणमिति मत्वा मातृदर्शनाकांक्षी सः पत्रे अलिखत् - माता अत्र आगत्य मां सकृत् पश्यतु। श्रीसारदा तस्मै स्वचित्रम् उद्बोधनपत्रिकां च संप्रेष्य प्रत्युत्तरे लिखितवती "वत्स, भयं मास्तु, तव रोगः उपशमिष्यति। तावद्दूरं गन्तुं नाहं शक्ता अस्मि। मदीयं चित्रं पश्य उद्बोधनपत्रिकां च पठ।" क्रमशः रोगः उपशान्तः"[1] इति।

**जगज्जननी** – मातृशक्तिरेव जगति सर्वोत्तमा। मातुः विकल्पः भुवनत्रयेऽपि विरलः। निःस्वार्थं प्रेम मातर्येव परिलक्ष्यते। मातृप्रेम उपनिषत्सु दृष्टान्तत्वेन उच्यते। तथाह्याम्नातम् "अरण्योर्निहितो जातवेदाः गर्भ इव सुभृतो गर्भिणीभिः"[2] इति। शङ्करभगवत्पादैरपि भणितं "तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति"[3] इति।

श्रीसारदा साधकानां हृत्सु साक्षाद्भगवत्याः मूर्तिः। भक्तहृदये श्रीसारदा गुरुः जननी च। रामकृष्णशिष्यमण्डलीषु सा संघजननी। तदीयं कठोरं साधनमेव तां जगन्मातृपदे विभूषितवत्। एकदा जयराम्बाटीग्रामे भोजनात् परं स्वामी विश्वेश्वरानन्दः उच्छिष्टं परिष्कर्तुं सिद्धः। तदा श्रीसारदा स्वयं स्थालिकां हस्ते नीतवती। कथं भवती नयति अहमेव नयामि इति उक्ते सति श्रीसारदया प्रत्युत्तरितम् "मया किं वा कृतम्? मातुः अङ्के पुत्रः मलमुत्सृजति, किं किं न करोति? यूयं भगवतः दुर्लभसम्पत्तयः"[4] इति। एतदृशम् अनेकं प्रत्युत्तरं तस्याः मुखारविन्दात् निःसृतम्। यथा वा – "अहं माता। माता चेत् पुत्रार्थं न श्राम्यति, कोऽन्यः कुर्यात्?"[5] इति।

आब्रह्मकीटजननी श्रीसारदा। स्वभावतः मातृप्रेम स्वसुतेष्वेव परिमीयते। जगन्मातरि श्रीसारदादेव्यां प्रेम्णः अतिरेकः दृष्टः। तदीया प्रेमसुधा प्राणिमात्रैः आस्वादिता। प्रेमशब्दः आनन्दे पर्यवस्यति। परप्रेमास्पदं ब्रह्म इति शास्त्रसमयः। सर्वभूतेषु आत्मभावम् अकरोत् श्रीसारदा। तत्रायं दृष्टान्तः राधाराणी[6] एकं मार्जारम् अपालयत्। श्रीसारदा तस्य भोजनविषयेऽपि अचिन्तयत्। कोलकातागमनात् प्राक् सा ज्ञानमहाराजम्[7] आहूय अवदत् मार्जारानपि भोजयतु यथा ते अन्यत्र न गच्छेयुः। ज्ञानमहाराजः मार्जारं दृष्ट्वा स्वभावतः कुप्यति स्म। एकदा ताडनाय उद्यतं महाराजं निवारयन्ती सा अवदत् "ज्ञान, मार्जारान् मा ताडय। तेषु अहमेव विरेजे"[8] इति। रासविहारिमहाराजः[9] एकदा श्रीसारदाम् अपृच्छत् "किं भवती सर्वभूतजननी ? श्रीसारदा अवदत् "नूनं तथा" इति। पुनश्च महाराजस्य प्रश्नः "एतेषाम् इतरप्राणिनां जन्तूनाम् अपि माता?" तदुत्तरम् "आम्, तेषां सर्वेषाम्"[10] इति।

**लीलासंवरणम्** – कर्तृत्वबुद्धिरेव संसारभावम् आपादयति। सर्वभूतसाक्षिभूत ईश्वर एव कर्ता इति यस्य भावः सः सर्वं कृत्वापि तत्फलं न प्रार्थयति। श्रीसारदायाः चरितं तथाभूतम् आसीत्। सांसारिकं सर्वविधं कर्म कुर्वन्ती अपि शास्त्राचार्योपदेशसंस्कृतमनसा अत्युच्चं स्तरम् आरूढवती। संसारः तदीयं लीलाक्षेत्रमात्रम्। स्वस्वरूपे ब्रह्मणि तदीयं चित्तं सदैव निमग्नम्। पद्मपलाशसमः निर्लिप्तः तदीयः स्वभावः तदुक्तात् वचनात् अपि ज्ञायते। एकदा तया उक्तम् "अहं मायायाः वशवर्तिनी अस्मि किम्? अधुनैव बन्धनं छेत्तुं प्रभवामि। कदाहं कर्पूरवत् उड्डयिष्ये, तन्नैव अनुभविष्यति"[11] इति।

---

[1] श्रीश्रीसारदादेवी, पृष्ठाङ्कः १०३-१०४

[2] कठोपनिषत् २/१/८

[3] देव्यपराधक्षमापनस्तोत्रम् ४

[4] श्रीमा सारदा देवी, पृष्ठाङ्कः २७९

[5] श्रीमा सारदा देवी, पृष्ठाङ्कः २७९

[6] श्रीसारदादेव्याः भ्रातुष्पुत्री। राधुः इति नाम्ना समधिकः ख्यातः।

[7] तुरीयाश्रमे स्वामी ज्ञानानन्द इति नाम।

[8] श्रीमा सारदा देवी, पृष्ठाङ्कः २८१

[9] तुरीयाश्रमे स्वामी अरूपानन्दः इति नाम।

[10] श्रीमा सारदा देवी, पृष्ठाङ्कः २८१-२८२

[11] श्रीमा सारदा देवी, पृष्ठाङ्कः १५०

महासमाधेः पूर्वतनदिनेषु श्रीसारदा अत्यल्पां वाचम् अवाक्, सदैव स्वात्मनि अरमत। संसारात् परिपूर्णः विरागः स्पष्टतया अलक्ष्यत। वदनसरोजे चिरप्रशान्तिः अलक्ष्यत। एवं १९२० ख्रिस्ताब्दस्य जुलाइमासस्य एकविंशे दिनाङ्के मङ्गलवासरे मध्यरात्रौ श्रीसारदा महासमाधौ निमग्ना।

**अभयवाणी** – 'सर्वगुणदोषसम्बन्धवर्जितं ब्रह्म' इत्याह शङ्करभगवत्पादः श्रीमद्भगवद्गीताभाष्ये। अतः औपनिषदं ब्रह्म समम् एकं च। तत् प्रकृतमात्मानं विशुद्धचिद्रूपं सर्वभूतेषु नियततया यः पश्यति सः अभयं पदं विन्दते। आत्मनः अन्यत् द्वितीयं पश्यतो भीतिः भवति। ब्रह्मवित् सार्वात्म्यदर्शनहेतुना सर्वबन्धेभ्यो विमुच्यते। वेदान्तशास्त्रस्य अयं डिण्डिमः श्रीसारदायाः अभयवाणीषु प्रतिध्वन्यते। तद्यथा- श्रीसारदादेव्याः इहलोकयात्रायाः अन्तिमदिवसेषु जातुचित् काचित् महिला[1] तद्दर्शनार्थम् उपागता। श्रीसारदा तां यदवादीत् तत् सर्वलोकस्य मातुः अन्तिमोपदेशत्वेन प्रसिद्धः। तथाहि तद्वाणी –

"वत्से, शान्तिं चेद् इच्छसि, न कस्यापि दोषं पश्येः। दोषं पश्येः आत्मनः। सर्वान् निजान् आपादयितुं शिक्षस्व। नास्ति कोऽपि परः, वत्से! त्वदीयम् इदं जगत्"[2] इति। अस्यां दिव्यवाण्यां वेदान्तस्य सर्वात्मैकत्वं पुनरेकवारं स्फुटम् आविरासीत्। समदर्शित्वमेव आत्यन्तिकसुखप्राप्तेः सर्वोत्कृष्टं साधनम्। सार्वात्म्यदर्शित्वादेव आत्मविदः दोषगन्धमात्रमपि न स्पृशति। शान्तिमिच्छता दोषदृष्टिः वर्जनीया इति शम्।

*****

**ग्रन्थसूची**

१. मन्त्रपूष्पम्। २००७। स्वामी, देवरूपानन्दः (सम्पादकः)। मुम्बाई : रामकृष्णमठः।

२. श्रीमा सारदा देवी। २००४। स्वामी, गम्भीरानन्दः (सम्पादकः)। कलकाता : उद्बोधनकार्यालयः।

३. श्रीश्री सारदादेवी। २०२४। ब्रह्मचारी, अक्षयचैतन्यः (सम्पादकः)। कलकाता : क्यालकाटा बुक् हाउस्।

४. श्रीश्रीरामकृष्णलीलाप्रसङ्गः (प्रथमो भागः)। २००२। स्वामी, सारदानन्दः (सम्पादकः)। कलकाता : उद्बोधनकार्यालयः।

५. श्रीशंकरभगवत्पादः। २०१८। उपनिषद्भाष्यम् (खण्डः १,२,३)। शास्त्री, एस्, सुब्रह्मण्यः (सम्पादकः)। वाराणसी : श्रीदक्षिणामूर्ति मठ प्रकाशन।

६. श्रीसदानन्दयोगीन्द्रः। २०१३। वेदान्तसारः। वाराणसी : चौखम्बा कृष्णदास अकादमी,

७. श्रीशंकरभगवत्पादः। २०१५। श्रीमद्भगवद्गीताष्यम् (खण्डः १,२,३)। शास्त्री, श्रीमणिद्राविडः (सम्पादकः)। वाराणसी : श्रीदक्षिणामूर्ति मठ प्रकाशन।

८. श्रीमन्महर्षिवेदव्यासः। २०१५। महाभारतम् (द्वितीयखण्डः)। गोरखपुर : गीताप्रेस।

९. श्री दुर्गा सप्तशती (हिन्दी अनुवाद तथा पाठविधि)। २०००। प. ज्वालाप्रसाद चतुर्वेदी (अनुवाद एवं सम्पादन)। हरिद्वार : रणधीर प्रकाशन।

१०. श्रीशंकरभगवत्पादः। २०१२। सौन्दर्यलहरी। डॉ. सुधाकर मालवीयः (सम्पादकः)। वाराणसी:चौखम्बा संस्कृत प्रतिष्ठान।

[1] अन्नपूर्णा-नामधेया काचित् भक्ता आसीत्। तस्याः माता यदा श्रीसारदादर्शनार्थम् आगता तदा संवृत्तमिदम्।
[2] श्रीमा सारदा देवी, पृष्ठाङ्कः ३९४

# बेनेदेत्तक्रोचेदृष्ट्या काव्यस्वरूपविमर्शः

डॉ. शुभेन्दु घोषः,
अतिथि-अध्यापकः, साहित्यविभागः
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः

**शोधसारः-** काव्यस्य स्वरूपं किम् इति विषयमवलम्ब्य यथा प्राच्यैः बहुधा सिद्धान्तितम्, पाश्चात्यैः अपि तथैव बहुधा विचिन्तितम्। वैलक्षण्यम् अत्रैव यत् तैः शब्दार्थौ अवलम्ब्य अपि आलोचना न विहिता। केवलं तैः अर्थतत्त्वम् आदाय एव शिल्पं लक्षितम्। पाश्चात्त्यालंकारिकेषु अन्यतमः बेनेदेत्तः शिल्पं सर्वसाधारणप्रतीतिविषयं कथं भवति इत्येतद्विषये यथा आलोचयामास, तत् बहुधा प्राच्यसिद्धान्तेन साम्मत्यम् एति। प्रबन्धेऽस्मिन् बेनेदेत्तेन प्रतिपादितं शिल्पतत्त्वं सयुक्ति विश्लेषितम्। स्वज्ञा एव शिल्पम् इति तत्त्वप्रतिपादनवेलायां च तेन यथा पूर्वदार्शनिकानां मतानि सूक्ष्मरूपेण खण्डितानि, तद् अपि अत्र सयुक्ति प्रदर्शितम्।

**कुञ्चीपदानि** – स्वज्ञा, शिल्पम्, वृत्तिः, प्रकाशनम्

**मूलप्रबन्धः-** आत्मनः वृत्तिः द्विधा विभज्यते – ज्ञानवृत्तिः कर्मवृत्तिश्चेति। तत्र ज्ञानवृत्तिरपि द्विधा विभक्ता - स्वज्ञात्मिका यौक्तिकी चेति। यौक्तिकी वृत्तिरेव अस्माकं व्यवहारिकजीवने प्रत्यहं व्यवह्रियते। यौक्तिकी वृत्तिश्च संज्ञां(Concept) जनयति। परन्तु स्वज्ञात्मिका वृत्तिः स्वज्ञां प्रतिभानं(Intuition) वा जनयति। यद्यपि स्वज्ञा संज्ञामिश्रिता भवितुमर्हति, संज्ञा च स्वज्ञामिश्रिता भवितुमर्हति। परन्तु संज्ञालेशविनिर्मुक्तापि स्वज्ञा अस्माभिः उपलभ्यते। सा स्वज्ञा एव प्रकृततया प्रधानरूपा, यद्यपि व्यवहारप्राचुर्यात् लोके संज्ञा एव प्रधानतया मन्यते। परन्तु स प्रत्ययस्तु भ्रम एव। स्वज्ञा एव वस्तुस्वरूपसाक्षात्कारात्मिका। एषा स्वज्ञा एव शिल्पत्वेन वेनेदेत्तेन उद्घोषितम्। परन्तु न तत् सर्ववादिसम्मतम्। केचन आमनन्ति यत् शिल्पं नाम स्वज्ञा इति तु सत्यम्, परन्तु यावत्स्वज्ञा कथमपि शिल्पं भवितुं नार्हति। शैल्पिकी स्वज्ञा तु काचिद्भिन्ना एव भवति। क्रोचे तु स्वज्ञामात्रमेव शिल्पत्वेन अङ्गीकरोति, तत्रैव प्रत्यवतिष्ठते पूर्वपक्षी। बेनेदेत्तस्तु अस्या समस्याया इत्थं समाधानं प्रदर्शयति यत् अद्यावधि केनापि शैल्पिक्यां स्वज्ञायाम् इतरस्वज्ञावैलक्ष्यण्यं किमस्ति तत् न प्रदर्शितम्, धर्मव्यतिरिक्ततया तु धर्मिणोऽवस्थानम् असम्भवमिति यावत् तादृशं वैलक्षण्यं पूर्वपक्षिभिः न प्रदर्श्यते, तावत् विलक्षणस्वज्ञा शिल्पम् इति चित्कारेण अलम्। पूर्वपक्षी पुनरपि इत्थम् आशंकते – न हि शिल्पम् प्रकाशनमात्रम्, अपि तु प्रकाशनस्य प्रकाशनम् यथा विज्ञानं नाम संज्ञायाः संज्ञा इति। वस्तुतः अत्र इत्थं कथनेन पूर्वपक्षी प्रकाशनस्य विलक्षणतां लोकोत्तरतां वा प्रतिपादयितुमीहते। परन्तु क्रोचे तन्नाङ्गीकरोति। स कथयति यत् सत्यमेतत् यत् विज्ञानं सयुक्ति कस्यापि वस्तुनः स्वरूपं निर्धारयति, प्रचलितां संकीर्णां संज्ञां परित्यज्य व्यापिकां संज्ञां समुपस्थापयति। परन्तु साधारणानां जनानां मस्तिष्केषु यथा संज्ञाया विन्यासो भवति, तथैव वैज्ञानिकानामपि। तारतम्यं तु केवलं बुद्धेर्व्याप्तौ। साधारणजनापेक्षया वैज्ञानिकानां बुद्धिर्व्यापिका भवतीति ते ईदृशसंज्ञानिर्धारणे समर्था भवन्ति। तेन अत्र पार्थक्यं न लौकिकालौकिकसमाश्रितम्, अपि तु व्याप्तिगतमेव केवलम्। शिल्पविषयेऽपि स्वज्ञायाः तथैव स्थितिः। शिल्पिनां स्वज्ञा अधिकव्यापिनी भवति, सूक्ष्मातिसूक्ष्मोऽपि विषयः तेषां स्वज्ञाया अगोचरो न तिष्ठति, साधारणास्तु न तत्र अलम्। परन्तु एतेनैव केवलेन स्वज्ञाया लोकोत्तरता लौकिकता वा न सिध्यति इति बेनेदेत्तस्य आशयः। उक्तं च तेन – '…it cannot be admitted that intuition, which is generally called artistic, differs from ordinary intuition as to intensity… The whole difference,…, is quantitative.' इति। प्रकाशनविषयकं यावदेव कर्म शिल्पमेव कथ्यते। तथापि यदि कथ्यते यत् यदि सर्वमेव प्रकाशनात्मकं कर्म शिल्पमेव स्यात् तर्हि यत्किमपि व्यवहारकालप्रयुक्तवाक्यादीनामपि शिल्पत्वं स्यात्, तथात्वे तु अनिष्टापत्तिः स्यात्। वस्तुतः एषा हि गठनवाद(Formalism)- इति मतमाश्रित्य समुस्थापिता आपत्तिः। तेषां गठनवादिनां मते तु तादृशमेव वाक्यजातं शिल्पपदवीमधिरोहति यत् खलु कवेरसाधारणवचोविन्यासदाक्ष्येण संगठितम्। वेनेदेत्तोऽपि तत्सिद्धान्तं समर्थयति एव। सोऽपि कथयति स्वज्ञा तादृशी एव शिल्पं स्यात् या खलु सृजनात्मिका भवेत्। तेन या कापि स्वज्ञा शिल्परूपा स्यादिति तेनापि प्रकारान्तरेण वारितमेव। अतः पूर्वोत्थिता आपत्तिः शान्ता एव।

ननु वेनेदेत्तेनापि स्वज्ञाया सृजनात्मिकात्वावच्छेदेन किञ्चिद्विशिष्टता कांक्षिता, तर्हि कथं स्वज्ञाया लोकोत्तरत्त्वं तेन न

स्वीक्रियते? अत्रोच्यते तेन यत् यदि इत्थं लोकोत्तरत्वं स्वज्ञायाः स्वीक्रियते तर्हि शिल्पं नाम केवलं विशिष्टस्यैव कस्यचित् सम्प्रदायस्य क्रीडनकमिव स्यात्। परन्तु स्वज्ञा-प्रकाशनादिः आत्मिका वृत्तिरेव, न तु तद्भिन्ना काचित्। आत्मिका वृत्तिस्तु सर्वस्मिन्नेव चेतने तिष्ठति, तेन शिल्पकर्म सर्वैरेव शक्येत कर्तुमिति शिल्पस्य सर्वसाधारण्यप्रतिपादनाय एव तेन स्वज्ञाया लौकिकालौकिकभेदः न कृतः इति ध्येयम्। अतः स्वज्ञामात्रमेव शिल्पमिति तेन कथितम्। यथा प्रस्तरखण्डं यदुपादानेन गठितम्, तदुपादानेनैव प्रस्तरात्मकं पर्वतमपि संगठितमिति वैज्ञानिकं तथ्यं संश्रुत्य यथा कोऽपि विस्मितो न भवति, तथैव शिल्पिनां सृजनात्मिका आत्मिकी वृत्तिः यथा शिल्पकर्मणि सहायिका स्यात्, तथैव साधारणानामपि स्यादिति किमत्र चित्रमिति बेनेदेत्तस्य आशयः। ननु तर्हि कथं न सर्वे एव यत्किञ्चित्संसृज्य कविरित्युपाधिभाग् न भवति, किमस्ति तत्र पार्थक्यमिति चेदुच्यते पार्थक्यं तु केवलं सृजनात्मिकाया स्वज्ञाया मात्राकृतम्, न तु गुणागुणकृतमिति। ननु कथं मात्राकृतमेव पार्थक्यमत्रेति चेदेतद्वक्तुं शक्यते यत् शिल्पिनिष्ठा स्वज्ञा यदि साधारणजननिष्ठस्वज्ञापेक्षया विलक्षणगुणविशिष्टा स्यात्, तर्हि शिल्पिना प्रकाशितं कर्म अस्माभिर्न कथमपि अनुधावितुं शक्येत। पुनश्च ये च बाह्यज्ञानविरहत्वं शिल्पस्य आवश्यिकशर्तरूपेण अङ्गीकुर्वन्ति, तेऽपि शिल्पं साधारणसंस्पर्शाद् ऊर्ध्वं स्थापयितुमिच्छन्ति। अतः वेनेदेत्तः तेषामपि मतं नाङ्गीकरोति।

**३.१) स्वज्ञातः प्रतीतेः(Perception) पार्थक्यम् –** प्रतीतिर्नाम प्रत्यक्षम् इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं वा। तेन प्रतीतौ अर्थस्य सत्ता आवश्यिकी। तथाहि भूतले घटे सत्येव घटविषयिणी प्रतीतिः सम्भवति। असति च घटे तत्प्रतीतिरपि न भवति। स्वज्ञास्थले तु तथा न भवति। सति असति वा घटे घटविषयिणी स्वज्ञा भवितुमर्हति। तेन एतदेवायातं यत् व्यवहारिकसत्ता स्वज्ञाविषये नाद्रियते। न च ईदृशं ज्ञानं मिथ्येति वक्तव्यम्, बाधकालिकेच्छाजन्यज्ञानविषये सत्यमिथ्यात्वं न विचार्यते इति हेतोः। अत एव च अनुमानप्रत्यक्षसामग्र्योः विद्यमानत्वे प्रत्यक्षस्य बलवत्तात् प्रत्यक्षमेव भवतीति सत्यम्, परन्तु यत्र सिषाधयिषा विद्यते, तत्र प्रत्यक्षसामग्र्यां समुपस्थितायामपि अनुमानं सम्भवति। इत्थं च प्रतीतौ सत्यमिथ्यात्वविचारः, स्वज्ञायां सत्यमिथ्यात्वविचाराभावः इत्येव उभयोः पार्थक्यमिति ध्येयम्। उक्तं च वेनेदेत्तेन – 'Certainly perception is intuition: the perceptions of the room in which I am writing, of the ink-bottle and paper that are before me, of the pen I am using, of the objects that I touch and make use of as instruments of my person, which, if it write, therefore exists; - these are all intuitions. But the image that is now passing through my Brain of me writing in another room, in another town, with different paper, pen and ink, is also an intuition. This means that the distinction between reality and non-reality is extraneous, secondary, to the true nature of intuition.'[1] इति।

**३.२) समाबन्धनतः(Association) स्वज्ञायाः स्वातन्त्र्यम् –** समाबन्धनं स्वज्ञा च परस्परं भिन्नम्। कथमिति चेत् आदौ समाबन्धनं नाम किमिति ज्ञेयम्। समाबन्धनशब्दस्य अर्थद्वयं सम्भवति। प्रथमं तावत् यत् खलु न गृहीतम् इतोऽपि ज्ञानविषयतया, तसय् सर्वस्य स्मृतिविषयीकरणम्। मन्ये, एतत् खलु पुनर्जन्मवादमङ्गीकुर्वाणस्य वादिनो मतमनुसृत्य चिन्तितम्। परन्तु एषोऽर्थो न समीचीन इति प्रत्याख्यातः। यतः संस्कारजन्यं ज्ञानं भवति स्मृतिः। संस्कारश्च अनुभवजन्य एव स्वीकृतः, न तु ज्ञानजन्यः। उक्तं च वेनेदेत्तेन – 'Association is understood, either as memory, mnemonic association, conscious recollection, and in that case is evident the absurdity of wishing to join together in memory elements which are not nitrified, distinguished, possessed in some way by the spirit and produced by consciousness'[2] इति। द्वितीयश्च अर्थः भवति अज्ञातविषयाणां सामूहिकं ज्ञानं समूहालम्बनात्मकं ज्ञानं वा। परन्तु तादृशोऽपि अर्थो न ग्राह्यः। यतः तथात्वे तु प्रतीत्यवस्थायामेव पूर्ववत् स्थितिरिति स दोषः तदवस्थ एव। उक्तं च तेन – '…or it is understood as association of unconscious elements. In this case we remain in the world of sensation and of nature'[3] इति। यदि च समाबन्धनं

[1] *Aesthetic as science of expression and general linguistic*, Trans. Douglas Ainslie, p. 3.

[2] *Ibid,* p. 7.

[3] Loc. cit.

नाम सृजनात्मकज्ञानमिति पारिभाषिकः अर्थः स्वीक्रियते, तर्हि तु स्वज्ञा-समाबन्धनयोः तात्त्विकः कोऽपि भेदः न स्यात्। नाम्नि भेदे च न कापि महती हानिः। कथयति च वेनेदेत्तः – '… we speak of an association which is neither memory nor flux of sensations, but is a *productive* association (formative, constructive, distinguishing); then we admit the thing itself and deny only its name'[1] इति।

**३.३) रूपोपस्थापनतः(Representation) स्वज्ञायाः पार्थक्यम्** – ननु रूपोपस्थापनतः स्वज्ञायाः पार्थक्यमस्ति न वा इति पूर्वपक्षत्वेन आक्षेपं समुत्थाप्य बेनेदेत्त इत्थं समादधति यत् रूपोपस्थापनं नाम किम्? रूपोपस्थापनं नाम किं यथा प्रत्यक्षीकरणम्, तथैव समुपस्थापनम्? यदि तथा स्वीक्रियते, तर्हि तु अस्ति एव उभयोः पार्थक्यम्। यदि तु यथाभूतस्य पदार्थतत्त्वजातस्य संगतिपूरितं चमत्कारजनकतया समुपस्थापनम्, तथात्वे तु नास्ति उभयोः किमपि पार्थक्यमित्येवाशयः ग्रन्थकर्तुः बेनेदेत्तस्य। समान एव आक्षेपः समुत्थापितः प्राच्येण वक्रोक्तिजीवितकारेणापि। तेनापि इत्थं पदार्थस्वरूपवर्णनकारीन् स्वभावोक्तिवादीति वक्रोक्तिवादीति च द्विधा विभज्य स्वभावोक्तिवादीन् काव्यरसज्ञविहीना इति प्रतिपाद्य वक्रोक्तिपक्षे एव स्वसारस्यं सूचयामास। स्वभावोक्तिपक्षे तु काव्यतः इतिहासादेः भेदाभावात् काव्यं शिल्पं वा सर्वथा समुच्छेद्यत। अत उक्तं वेनेदेत्तेन – 'If by representation be understood something detached and standing out from the psychic base of the sensations, then representation is intuition. If, on the other hand, it be conceived as a complex sensation, a return is made to simple sensation, which does not change its quality according to its richness or poverty, operating alike in a rudimentary or in a developed organism full of traces of past sensations. Nor is the equivoque remedied by defining representation as a psychic product of secondary order in relation to sensation, which should occupy the first place. What does secondary order mean here? Does it mean a qualitative, a formal difference? If so, we agree: representation is elaboration of sensation, it is intuition'[2] इति।

**३.४) स्वज्ञा-प्रकाशनयोः (Expression) ऐक्यम्** – प्रकाशनशब्दः अत्र न तावत् केवलं तेन वाचनिकप्रकाशनतया व्यवहृतः, अपि तु रूपशब्दालेखादिभिः यैः कैश्चिदपि प्रकाशनमाध्यमैः प्रकाशनमत्र प्रकाशनशब्दस्य तात्पर्यम्। तन्मते तावत्, यत्र यत्र स्वज्ञा अस्ति, तत्र तत्र प्रकाशनमवश्यमेव अस्ति। स्वज्ञा नास्ति चेत् प्रकाशनं नैव स्यात्। अतः स कथयति – 'Every true intuition or representation is also expression. That which does not objectify itself in expression is not intuition or representation'[3] इति। ननु इत्थमन्वयव्यतिरेके सिद्धे कथं च न सर्वे एव शिल्पिनः? कथं न सर्वेषां शिल्पं समानतयाय आद्रियते? आकाङ्क्षायामस्यां स्वज्ञातारतम्यमेव उत्तररूपेण गृहीतुं शक्यते। यावत् स्वज्ञा जायते, तावदेव प्रकाशनमपि। वस्तुतः स्वज्ञा सर्वस्मिन्नेव अस्तीति सर्व एव प्रकाशने समर्थाः। ननु तर्हि कालिदास-शेक्सपियर-माइकेलएञ्जेलो-लिओनार्दो-द-भिञ्चि इत्येतेषाम् इतरस्मात् को भेदः स्यात्। अत्र च वेनेदेत्तेन स्पष्टं कथितं यत् साधारणैः जनैः प्रतीतिः(Perception) एव स्वज्ञात्वेन चिन्त्यते। अत एव च एषा भ्रान्तिः समुपस्थिता भवति यत् सर्व एव स्वज्ञाश्रया इति सर्व एव प्रकाशनक्षमाः। न हि प्रतीतितः सर्वस्मिन्नेव स्वज्ञा सम्भवति, अथवा सर्वस्मात् प्रतीतितः स्वज्ञा भवति। यथा सर्वं ज्ञानं संस्कारं जनयितुं न शक्नोति, तथैव सर्वा प्रतीतिः स्वज्ञां न जनयति। न च ज्ञानमात्रमेव संस्कारजनकमिति वाच्यम्, उपेक्षात्मकज्ञानस्य निर्विकल्पकज्ञानस्य संस्कारजनकत्वाभावात्। औदासीन्यवशादेव उपेक्षात्मकज्ञानं संस्काराजनकं भवति। निर्विकल्पकज्ञाने तु विशेष्यविशेषणज्ञाने सत्यपि तयोः सम्बन्धो न विषयीभवति। स्मृतौ तु सम्बन्धोऽपि उभयोरवभासते एव। यतश्च अनुभवाविषयीभूतः अर्थः स्मृतौ न विषयीभवति, निर्विकल्पकज्ञाने च विशेष्यविशेषणसम्बन्धो न विषयीभवति, अतः विशेष्यविशेषणतदुभयसम्बन्धात्मिकां स्मृतिं प्रति निर्विकल्पकज्ञानस्य कारणत्वं नाङ्गीक्रियते। यथा वा अनुव्यवसाये यद्बाह्यविषयकं ज्ञानं प्रथमतो जायते, तद्विषयके अनुव्यवसायकाले तद्वस्तुनः बाह्यिकस्थितिः

---

[1] Loc. cit.

[2] Loc. cit.

[3] *Ibid,* p. 8.

नापेक्ष्यते, तथैव स्वज्ञायामपि यद्विषयिणी स्वज्ञा, तस्य बाह्यिकस्थितिः नापेक्ष्यते। यथा वा विज्ञानवादिनये बाह्यवस्तुजातं सर्वमेव दृश्यमानादि ज्ञानरूपमेव, तेन पृथक्तया तेषां बाह्यिकस्थितिः नास्ति। मन्ये स्वज्ञाविषयेऽपि समानमेव चिन्तनं बेनेदेत्तस्य। अत एव स कथयति– 'Intuition is the undifferentiated unity of the perception of the real and of the simple image of the possible'[1] इति।

ननु किं सर्वस्मिन् स्वज्ञा नास्ति इति चेदुच्यते सर्वस्मिन् एव स्वज्ञा भवितुं नार्हति। न च इत्थं चिन्तनीयं यत् यावती स्वज्ञास्थितिः प्रकाशनाय कारणम्, तावती नास्ति इति कृत्वा प्रकाशनं न सम्भवति इति, यथा दृश्यते अस्माभिः मङ्गलाचरणविषये यत् सत्यपि मङ्गलाचरणे विघ्नस्य बाहुल्याद् मङ्गलस्य च अल्पत्वात् ग्रन्थसमाप्तिः न भवति। स्वज्ञा तु वस्तुगत्या सर्वस्मिन्न भवति। यदि च स्वज्ञा अस्ति, तर्हि तत्प्रकाशनमपि। यथा वैयाकरणैः उच्यते – 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते' इति, तथैव बेनेदेत्तस्यापि आशयः। अतः स कथयति – '. One often hears people say that they have in their minds many important thoughts, but that they are not able to express them. But if they really had them, they would have coined them into just so many beautiful, sounding words, and thus have expressed them. If these thoughts seem to vanish or to become few and meagre in the act of expressing them, the reason is that they did not exist or really were few and meagre'[2] इति।

ननु किं तर्हि अस्माभिः प्रकाशनं नैव भवति? नेति वक्तव्यम्, सर्वैरेव क्वचित् किञ्चिद् अलौकिकं प्रकाशितमेव दृश्यते, परन्तु इतस्ततो विक्षिप्तमेव भवति तत्। असंगतस्य असम्पूर्णस्य तादृशस्य प्रकाशनस्य प्रकाशनत्वावच्छिन्नत्वेऽपि शैल्पिकं मूल्यं किमपि नास्ति। यथा रन्धनाय एकत्रीकृतानामुपकरणानां परिवेषणयोग्यत्वम् आस्वादयोग्यत्वं तावन्नायाति, यावन्न सर्वाणि उपादानानि एकैकशः पृथक्पृथक्तया पक्वानि अपि साकल्येन परस्परं मिलितानि भवन्ति। तथात्वे एव रन्धनस्य परिपूर्णत्वम् आस्वादयोग्यत्वं च। तथैव अत्रापि शिल्पविषये बोध्यम्। उक्तञ्च वेनेदेत्तेन – 'The world which as a rule we intuit is a small thing. It consists of little expressions, which gradually become greater and wider with the increasing spiritual concentration of certain moments. They are the words we say to ourselves, our silent judgments: "Here is a man, here is a horse, this is heavy, this is sharp and these please me" etc. It is a medley of light and colour, with no greater pictorial value than would be expressed by a haphazard splash of colours, from among which one could barely make out a few special, distinctive traits.'[3] इति।

अपि च प्राथमिकी या प्रतीतिः, सा शिल्पविषये अकिञ्चित्करी एव। न हि तया प्रतीत्या शिल्पं सम्भवति। निरन्तरमनुध्यानमेव शिल्पिनो मनसि तत् शिल्पचित्रमाविर्भावयति। विषयेऽस्मिन् दर्शनीयं रसगङ्गाधरकारस्यापि मतम्। काव्यनिष्ठरमणीयत्वस्य कारणत्वेन भावनां सूचयामास सः। उक्तं च तेन – 'रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वं चाह्लादगतः चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः। कारणं च तदवच्छिन्ने भावनाविशेषः पुनःपुनरनुसन्धानात्मा'[4] इति। प्राच्यसाहित्याङ्गने प्रज्ञाख्यं कुसुममेकं विद्यते, या खलु नवनवोन्मेषशालिनी इति साहित्यतात्त्विकरूपोद्यानपालकैः समाख्यातम्। यत्खलु साधारणैः न दृश्यते, तद्धि शिल्पिनः अनुभवगोचरं भवति। एतदेव लोकतः शिल्पिनः अतिशयः। चिन्त्यतां तावत्, पथि तावत् दृष्टं कस्याश्चन कमलनयनायाः मनोहारि स्मितम्। परस्मिन् च तदेव स्मितं साधारणैः वर्णयितुं न शक्यते। परन्तु शिल्पी यदा तद् वर्णयति, तत्खलु पूर्ववत् चारु भवति, क्वचिच्च प्रकृतमपि अतिशेते। तथाहि पर्वतप्रदेशे लग्नम् अम्बुवाहं सर्वैरेव दृश्यते, परन्तु कविरेव केवलं तं वप्रक्रीडापरिणतगजरूपेण कल्पयितुं शक्नोति। तथाहि उक्तं कालिदासेन –

---

[1] *Ibid,* p. 4.

[2] *Ibid,* p. 9.

[3] Loc. cit.

[4] Jagannatha, *Rasagaṅgādharaḥ (Part First),* Ed. Sāhityācārya Śri Madhusūdan Śātrī, p. 14.

'आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥'[1] इति।

प्रख्यातेन शिल्पिना माइकेल-एञ्जेलो-महाभागेन कथितं – 'A man paints with his brain, not with his hands'[2] इति। उक्तं च वेनेदेत्तेन – 'The person to be painted stands before the artist like a world to discover. Michael Angelo said, "One paints, not with the hands, but with the brain". Leonardo shocked the prior of the Convent of the Graces by standing for days together gazing at the "Last Supper", without touching it with the brush. He remarked of this attitude: "The minds of men of lofty genius are most active in invention when they are doing the least external work". The painter is a painter, because he sees what others only feel or catch a glimpse of, but do not see.'[3] इति। अस्यार्थः खलु एवम् – चित्रकरसम्मुखस्थो जनः आविष्करणीयं जगदिव राजते। माइकेल-एञ्जेलो इत्यनेन कथितं यत् 'चित्रकरः तदीयमस्तिष्केन चित्रम् आलिखति, न तु हस्ताभ्याम्।' लिओनार्दो द भिञ्चि इत्ययं The Last Supper इति चित्रयितुं दिवसान् व्याप्य निर्निमेषदृष्ट्या तच्चित्रं केवलं पश्यन्नेव स्थितः, न तेन तुलिकास्पर्शलवोऽपि संम्पादितः। मठाध्यक्षश्च एतद्दर्शनेन नितरामाश्चर्यचकितोऽभूत्। परस्मिन् च भिञ्चिमहोदयः एतद्विवृण्वन्नाह यत् शिल्पिनां सुकुमारमतीनां मतः तदैव सर्वापेक्षा सक्रिया तिष्ठति यदा खलु शिल्पिनः निष्क्रिया इव तिष्ठन्ति। चित्रकरः तदैव सार्थकः चित्रकरो भवति यदा अन्यैः यथाकथञ्चिदाभासतया गृहीतमर्थं स दिवालोकवत् प्रत्यक्षीकरोति, अनुभवति न तु पश्यति इति।

इत्थममन्ततो गत्वा तेन प्रकाशनमेव स्वज्ञात्वेन अङ्गीकृतम्। उक्तं च तेन – 'We may thus add this to the various verbal descriptions of intuition, noted at the beginning : intuitive knowledge is expressive knowledge.'[4] इति। एतच्च तेन कार्यकारणयोः अभेदमुपचर्य्य एव सिद्धान्तितम्। शुद्धा लक्षणलक्षणा ह्येषा। यथा आयुर्घृतम् इत्यादौ। स्वज्ञाप्रकाशनयोश्च जन्यजनकभावोऽत्र सम्बन्धः। स्वज्ञा जनकम्, प्रकाशनं च जन्यम्। अव्यभिचरितत्वख्यापनं च प्रयोजनम्। कथयति वेनेदेत्तः – 'To intuit is to express ; and nothing else (nothing more, but nothing less) than to express.'[5] इति।

इत्थं च कविनिष्ठप्रतिभानतः साधारणनिष्ठप्रतिभानस्य, अथवा परस्परनिष्ठप्रतिभानयोः पार्थक्यं केवलं मात्राकृतं परिमाणकृतं वा। तत्त्वतः तु प्रतिभानं सर्वनिष्ठं समानमेव। प्रतिभानतारतम्यवशादेव कवयः मानवान् साधारणान् अन्यान् वा कवीन् अतिशेरते। उक्तं च तेन– 'But since the artistic function is extended to wider fields, yet does not differ in method from ordinary intuition, the difference between them is not intensive but extensive. The intuition of the simplest popular love-song, which says the same thing, or very nearly, as any declaration of love that issues at every moment from the lips of thousands of ordinary men, may be intensively perfect in its poor simplicity, although it be extensively so much more limited than the complex intuition of a love-song by Leopardi.'[6] इति। ननु कथमेवं सिद्धान्तितमिति चेत् यदि अस्मासु अपि प्रतिभा स्वज्ञा वा न तिष्ठेत्, तर्हि कविवर्णितं वस्तु कथम् अस्माकमपि अनुभवविषयं भवेत्। इत्थं च वर्णनीयतन्मयीभवनयोग्यत्वमेव सूचयति स्वज्ञायाः मात्राकृतं तारतम्यम्। कथयति ग्रन्थकारः – 'Great artists are said to reveal us to ourselves. But how could this be possible, unless there were identity of nature between their imagination and ours, and unless the difference were only one of quantity?'[7]

---

[1] *Meghdūtam,* sloka- 2.

[2] Link - https://philosiblog.com/2013/03/06/a-man-paints-with-his-brains-and-not-with-his-hands/

[3] *Aesthetic as science of expression and general linguistic,* Op. cit., p. 10.

[4] *Ibid,* p. 11.

[5] Loc. cit.

[6] *Ibid,* p. 13.

[7] *Ibid,* p. 14.

## Bibliography

Bosanquet, Bernard. *Croce's Aesthetic.* London: Oxford University Press, 1919.

Butcher, S.H., *The Poetics of Aristotle.* London: Macmillan and co. Limited, 1922

Carr, H. Wildon. *The Philosophy of Benedetto Croce.* London: Macmillan and co. Limited.

Croce, Benedetto. *Aesthetics as Science of Expression and General Linguistics.* Ed. Douglas Ainslie. New York: The Noonday Press, 1965.

-, -. *The Essence Of Aesthetics.* Trans. & Ed. Douglas Ainslie. London: William Heinemann, 1921.

Hegel, G.W.F. *The philosophy of Fine Art. Trans. F. P. B.* Osmaston. London: G. Bell and Sons, 1920.

Khadye, K. M. *Benedetto Croce's Aesthetic Applied to Literary Criticism.* Poona: Aryabhushan Press, 1922.

Nandi, Sudhir Kumar. *Nandantattva.* Kolkata: Sahityalok, 1958.

-,_. *Crocer Nandantattva.* Kolkata: Paschimbanga Rajya Pustak Parsad, 2006.

William K. Wimsatt Jr. & Cleanth Brooks. *Literary Criticism: A Short History.* New Delhi: Oxford & IBH Publishing Co. Pvt. Ltd, 2017.

# सृष्टिधराचार्यदिशा इको गुणवृद्धी इति सूत्रविचारः

डॉ. शङ्खशुभ्र-गच्छितः,
अतिथि-अध्यापकः, व्याकरणविभागः,
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः, कोलकाता
अणुसङ्केतः Sankhasubhra96@gmail.com

**शोधसारः-** भगवन्तं चन्द्रशेखरं प्रसाद्य तदनुग्रहेण मन्त्ररूपं वर्णसमाम्नायम् अवाप्य महता प्रणिधानेन सूत्रमयीम् अष्टाध्यायीं व्यररचत् पाणिनिमहर्षिः। अस्याञ्च अष्टाध्याय्यां प्रायः चतुस्सहस्राणि सूत्राणि विद्यन्ते। तेषां च सूत्राणाम् अर्थप्रतिपादनाय पाणिन्युत्तरवर्त्तिभिः बहुभिः शाब्दिकमूर्धन्यैः नैकाः व्याख्याः वृत्तयश्च प्राणायिषत। तासु अत्यन्तं सरला संक्षिप्ता च वर्तते पुरुषोत्तमदेवविरचिता भाषावृत्तिरिति वृत्तिः। अत्र अष्टाध्यायीक्रमेण लौकिकसूत्राण्येव पर्य्यालोचयिषत। वैदिकसूत्राणाम् अर्थप्रतिपादनमत्र न दृश्यते। एवमेव अस्याः भाषावृत्तेः अत्यन्तं प्रसिद्धा विस्तृता च व्याख्या वर्तते भाषावृत्त्यर्थविवृतिरिति। अस्याः व्याख्यायाः कर्ता सृष्टिधराचार्यः। सम्प्रति अस्मिन् शोधप्रबन्धे सृष्टिधराचार्यदिशा "इको गुणवृद्धी (१.१.३)" इति सूत्रस्य विमर्शात्मकं व्याख्यानं क्रियते।

**सारिष्ठाः शब्दाः-** अष्टाध्यायी, भाषावृत्तिः, भाषावृत्त्यर्थविवृतिः, सृष्टिधराचार्यः, इको गुणवृद्धी।

**उपक्रमः-** शब्दशास्त्रनदीष्णैः बङ्गीयवैयाकरणैः पुरुषोत्तमदेवैः अष्टाध्याय्याः सूत्रार्थबोधनाय भाषावृत्तिरित्याख्या एका लघुवृत्तिः व्यरचि। वैदिकसूत्राणि विहाय केवलं लौकिकसूत्राणामेव अर्थविवरणं ग्रन्थकृद्भिरत्र कृतम्। बङ्गप्रदेशस्य अध्ययनाध्यापनपरम्परायाम् अस्य ग्रन्थस्य विशिष्टं किञ्चित् स्थानमासीत्। अस्याश्च भाषावृत्तेः व्याख्याचतुष्टयमिति आसीदिति प्राचीनग्रन्थेभ्यः विज्ञायते।[1] तासु भाषावृत्त्यर्थविवृतिः इति मुख्या प्रसिद्धा च व्याख्या विद्यते। भाषावृत्तिग्रन्थस्य प्रधानव्याख्यारूपेण अस्याः व्याख्यायाः नामोल्लेखः बहुषु प्राचीनग्रन्थेषु उपलभ्यते। अस्याश्च व्याख्यायाः कर्ता वर्तते श्रीसृष्टिधराचार्यः। सम्प्रति सृष्टिधराचार्यस्य तत्कृतेः भाषावृत्त्यर्थविवृतेश्च सामान्यपरिचयः प्रस्तूयते।

**सृष्टिधराचार्यस्य तत्कृतेश्च परिचयः-** पुरुषोत्तमदेवविरचितायाः भाषावृत्तेः कश्चन व्याख्यात्मको ग्रन्थो भवति भाषावृत्त्यर्थविवृतिरिति। अस्य सृष्टिधरस्य सृष्टिधरचक्रवर्ती सृष्टिधराचार्यः सृष्टिधरशर्मा चेति अपराभिधानानि सन्ति। यथा- भाषावृत्त्यर्थविवृतेः कासुचित् मातृकासु सृष्टिधरचक्रवर्ती[2], क्वचित् सृष्टिधराचार्यः[3], क्वचित् सृष्टिधरशर्मा[4] चेति नाम उपलभ्यते। अस्य देशविषये स्पष्टं किमपि नोपलभ्यते। बङ्गप्रदेशस्य उत्तरप्रान्ते एव अस्याः व्याख्यायाः आधिक्येन प्रचारः प्रभावश्च आसीत् इत्यतः स बङ्गीयः इति तत्त्वविदः वदन्ति। अस्याः व्याख्यायाः नैकाः मातृकाः बङ्गप्रदेशेषु एव सम्प्राप्ताः इत्यतः सः बङ्गीयः इत्यपि वक्तुं शक्यते। किञ्च बङ्गीयब्राह्मणानां चक्रवर्ती इति पदवी विद्यते। अस्यापि चक्रवर्ती इति पदवी आसीत् इत्यतः सः बङ्गीयः इति कथयितुं शक्यते।[5] अस्य कालविषये तु विप्रतिपत्तयः सन्ति विद्वन्मण्डलेषु। श्रीशचन्द्रचक्रवर्तिमहोदयस्य सुशीलकुमारदे-महाभागस्य च मते सृष्टिधराचार्यस्य समयः प्रायः सप्तदशशतकमिति।[6] किन्तु दीनेशचन्द्रभट्टाचार्यस्य मते तु सृष्टिधराचार्यस्य कालः पञ्चदशशतकस्य अन्तिमभागः इति।[7] सृष्टिधराचार्यस्य भाषावृत्त्यर्थविवृतिः इत्येका एव कृतिरस्ति इति प्राप्तसामग्रीवशात् वक्तुं शक्यते। सम्प्रति अस्याः भाषावृत्त्यर्थविवृतेः सामान्यस्वरूपं प्रकाश्यते।

पुरुषोत्तमदेवविरचितायाः भाषावृत्तेः व्याख्या भवति सृष्टिधराचार्यैः विरचिता भाषावृत्त्यर्थविवृतिः इति। व्याख्यायां स लिलेख- "नत्वा गुरून् विचार्य्य प्राचीनसंग्रहकृताच्च मतानि। श्रीसृष्टिधराचार्य्यो लघुवृत्तेः गौरवं कुरुते॥" इति।[8] प्रत्येकं पादस्य अत्र व्याख्यानम् उपलभ्यते। अस्मिन् व्याख्याग्रन्थे काशिकाव्याख्यानस्य न्यासस्य महान् प्रभावः परिलक्ष्यते। तस्मात् एव ग्रन्थारम्भे सृष्टिधराचार्यैः उच्यते-"न्यासग्रन्थार्थतात्पर्य्यपर्य्यालोचनशालिभिः। शोध्योऽयं करुणावद्भिः कृतिभिर्म्मे परिश्रमः॥"[9] इति। अद्यत्वे सम्पूर्णा भाषावृत्त्यर्थविवृतिः नैव सम्प्राप्यते। १९१२-तमे शतके कलिकाता-एशियाटिक्-सोसाइटि इति संस्थातः पण्डितगिरिशचन्द्रवेदान्ततीर्थैः सम्पादिता भाषावृत्त्यर्थविवृतिसहिता भाषावृत्तिः इत्येको ग्रन्थः प्रकाशितः।[10] तत्रापि भाषावृत्त्यर्थविवृतेः प्रथमाध्यायस्य प्रथमपादस्य प्रारम्भभागात् "न पदान्तद्विर्व्वचनवरेयलोपस्वरसवर्णानुस्वार-दीर्घजश्चर्व्विधिषु

(१.१.५८)" इति सूत्रं यावत् सम्पूर्णं व्याख्यानम् उपलभ्यते।[11] ततः परं "द्विर्वचनेऽचि (१.१.५९)" इति सूत्रस्य सम्पूर्णं व्याख्यानं नैव प्राप्यते।[12] तत्रापि प्रकाशितग्रन्थस्य अत्यन्तं प्राचीनत्वात् बहुत्र पाठास्पष्टता दृश्यते। अतः पाठनिर्णये महान् क्लेशः अनुभूयते। किञ्च इमं ग्रन्थं विहाय भाषावृत्त्यर्थविवृतेः अन्यः कश्चन ग्रन्थः अद्यत्वे नैव प्राप्यते। १९१८ तमे शतके श्रीशचन्द्रचक्रवर्तिमहोदयैः सम्पादिते भाषावृत्तिग्रन्थस्य भूमिकाभागे भाषावृत्त्यर्थविवृतिग्रन्थस्य आद्यन्तभागस्य निदर्शनं प्राप्यते। तत्र भूमिकाभागे ११तमे पत्रे आदिमभागः इत्थं सूचितः-

"ओँ नमो गणेशाय।

अथ भाषावृत्त्यर्थविवृति।

सुरमथनं पुरमथनं मारमणमुमारमणम्।

फणधरतल्पं फणाधरतल्पं वन्दे वाणारिमसमवाणारिम्॥

नत्त्वा गुरून् विचार्य्य प्राचीनसंग्रहकृताच्च मतानि।

श्रीसृष्टिधराचार्य्यो लघुवृत्तेर्गौरवं कुरुते॥...

स्वाभीष्टदेवतानतिरूपं मङ्गलं शिष्यशिक्षार्थमुपनिबन्धन् प्रयोजनार्थिनः प्रेक्षावतः प्ररोचयन् ग्रन्थारम्भे वृत्तिकृत्पद्यमेकं समुदा जहार- नम इति।..."[13]। इति। अस्य ग्रन्थस्य भूमिकाभागे १९ तमे पत्रे भाषावृत्त्यर्थविवृतिग्रन्थस्य अन्तिमभागस्य निदर्शनं प्राप्यते- "अ अ इति (८.४.६८)। आद्यो विवृतो द्वितीयः संवृतः ।...

भाषावृत्त्यर्थविवृतावष्टमाध्यायसङ्गतः।

चतुर्थो विवृतः पादः श्रीसृष्टिधरशर्मणा॥

इति श्रीसृष्टिधरचक्रवर्तिकृता भाषावृत्त्यर्थविवृतिः समाप्ता। श्रीरामः। श्रीः।"[14]

अस्मिन् ग्रन्थे अष्टाध्याय्याः सूत्रक्रमेण कानिचित् संज्ञासूत्राणि, कानिचन विधिसूत्राणि, कतिचन परिभाषासूत्राणि, कानिचित् निषेधसूत्राणि, कतिचन च अतिदेशसूत्राणि स्वशैल्या व्याख्यातानि सन्ति। सम्प्रति सृष्टिधराचार्यदिशा "इको गुणवृद्धी (१.१.३)" इति परिभाषाशास्त्रस्य व्याख्यानं प्रस्तूयते।

**इको गुणवृद्धी (१.१.३)-** षड्विधसूत्रेषु इदं परिभाषासूत्रम्। इकः गुणवृद्धी इति पदच्छेदः। गुणश्च वृद्धिश्च इति गुणवृद्धी। गुणवृद्धिशब्दयोः यत्र विधेयसमर्पकत्वं तत्र स्थानिविशेषानभिधाने इक इति षष्ठ्यन्तं पदं स्थानिसमर्पकम् उपस्थितं बोध्यम्। भाषावृत्तौ अस्य सूत्रस्य अर्थो न्यरूपि- "अनुक्तस्थाने ये गुणवृद्धी ते इक एव स्थाने वेदितव्यो।"[15] तत्र परिभाषायाः व्युत्पत्तिः व्याख्याकृता प्रादर्शि- "परि सर्वत्र शास्त्रे उपयुक्ता भाषा भणितिः, परिभाषा"[16] इति। सा च परिभाषा द्विविधा- लिङ्गवती विध्यङ्गशेषभूता चेति। तत्र या लिङ्गद्वारेण चिह्नद्वारेण एकभागेन विधिसूत्रे उपयुज्यते सा लिङ्गवती परिभाषा इत्युच्यते। या च सकलेनैव विधिवाक्ये उपयुज्यते सा परा, विध्यङ्गशेषभूता परिभाषा भवति। विधिसूत्रस्य अङ्गभूता भवति परिभाषा। यां परिभाषां विना विधिशास्त्रं नैव प्रवर्तते। यथा- "आदेः परस्य (१.१.५४)" इति सूत्रं विना "ईदासः(७.२.८३)" इति सूत्रस्य प्रवृत्तिः नैव भवति। आसः परस्य आनस्य ईकारादेशः भवति इति "ईदासः(७.२.८३)" इति सूत्रस्य अर्थः। तत्र आसीनः इति रूपसिद्धिप्रक्रियायां आसधातोः शानचि, आस् आन इति स्थिते, "ईदासः(७.२.८३)" इत्यनेन आसः परस्य आनस्य ईदादेशे कृते, सम्पूर्णस्य आनस्य स्थाने ईकारादेशे प्राप्ते, "आदेः परस्य (१.१.५४)" इत्यनेन परिभाषासूत्रेण केवलम् आकारस्य स्थाने एव ईकारादेशः भवति। एवम् आसीनः इति रूपं सिद्ध्यति। अतः "ईदासः(७.२.८३)" इति विधिशास्त्रस्य अङ्गभूतम् आदेः परस्य इति परिभाषासूत्रम्। काचित् परिभाषा विधिशेषभूता च वर्तते। वृक्षेषु इति अविरोधस्थले "बहुवचने झल्येत् (७.३.१०३)" इति सूत्रेण एत्वे कर्तव्ये न किमपि बाधकम्। किन्तु वृक्षेभ्यः इति "बहुवचने झल्येत् (७.३.१०३)" "सुपि च (७.३.१०२)" इत्यनयोः सूत्रयोः विरोधविषये तु "विप्रतिषेधे परं कार्यम् (१.४.२)" इति परिभाषासूत्रं परं कार्यं कारयति इति एत्वविधायकशास्त्रस्य परत्वात् "बहुवचने झल्येत् (७.३.१०३)" इत्येव अत्र प्रवर्तते। एवमेव गुणशब्दं वृद्धिशब्दं च लिङ्गत्वेन प्रकल्प्य इक इति सूत्रस्य एकदेशेन उपयुज्यते इति लिङ्गवती इयं परिभाषा। "आद्गुणः (६.१.८७)" इत्यस्मिन् सूत्रे "इको यणचि (६.१.७७)" इत्यस्मात् सूत्रात् अचि इत्यनुवृत्तेः, "वृद्धिरेचि (६.१.८८)" इत्यत्र च आत् इत्यनुवृत्तेः स्थाननिर्देशे सति अनया प्रक्रियया किमित्याह-

अनुक्तस्थाने इति। न उक्तं स्थानं ययोः ते अनुक्तास्थाने इति। एवकारः वृत्तौ प्रयुक्तः। तद्विषये उच्यते- यतः एवकारः ततः अन्यत्र नियमः अवधारणं वा इति। तेन अत्र गुणवृद्धी एव नियम्येते न तु इक् इति नियमार्था इयं परिभाषा। अन्यथा "न धातुलोप आर्धधातुके (१.१.४)" इति सूत्रेण सह अस्य सूत्रस्य एकवाक्यता सम्पत्स्येत। अनेन पृथक् सूत्रेण किमिति प्रश्ने उच्यते- याति शङ्कते इत्यत्र गुणाभावः एव अत्र प्रयोजनम्। नियमाभावे सति आन्तरतम्यात् आकारस्य स्थाने गुणः अकारः एव स्यात्। ककारस्य च कण्ठत्वात् आन्तरतम्यात् अकारश्च स्यात्। पृथक्सूत्रसामर्थ्यात् तन्न जायते। "गापोष्टक् (३.२.८)" इत्यस्मिन् सूत्रे टकः कित्त्वम् आतः गुणाभावस्य ज्ञापकं भवतु, तदा उच्यते- तन्न। श्रवणार्थत्वस्यापि सम्भाव्यत्वात् इति। टकः कित्त्वं न आतः गुणाभावस्य ज्ञापकं भवितुमर्हति। तच्च कित्त्वम् उत्तरार्थम्। "तुन्दशोकयोः परिमृजापनुदोः (३.२.५)" इत्यस्मिन् सूत्रे कित्त्वात् गुणः न प्रसज्येत इत्यतः एव कप्रत्ययस्य कित्त्वं सम्पादितम्। "सप्तम्यां जनेर्डः (३.२.९७)" इत्यत्र डविधानमपि व्यञ्जनस्य गुणाभावे ज्ञापकं न भवति। आन्तरतम्यात् जनः नकारस्य अकारः स्यात् इति तु असम्भवः। यतो हि तत्र नकारेण व्यञ्जनेन सह सादृश्यम् अकारस्य एकारस्य ओकारस्य च वर्तते। केवलं नकारस्य गुणे अकार एव भवति इतरौ न भवतः इत्यत्र न किञ्चित् मानं विद्यते। यद्युच्यते- आन्तरतम्यात् अर्धमात्रिकस्य व्यञ्जनस्य नकारस्य स्थाने अर्धमात्रिकः अकार एव भवति द्विमात्रिकः एकारः ओकारो वा न भवति इति। तदोच्यते- तथात्वे तु आन्तरतम्यात् नकारस्य स्थाने अनुनासिकस्य अकारस्य एव प्राप्तिः स्यात्। ततश्च पररूपे शुद्धाकारः भवति। एवञ्चेत् गमः अपि डकारविधानं वक्तव्यम्। किञ्च गमः मकारस्य गुणे मकारस्य स्थाने आन्तरतम्यात् ओकारः एव प्राप्तः स्यात्। तेन च इष्टरूपासिद्धिः स्यात्। अतः इदं ज्ञापकमिति वक्तुं न शक्यते। "सार्वधातुकार्धधातुकयोः (७.३.८४)" इत्यस्मिन् सूत्रे अङ्गस्य इत्यधिक्रियते। "इको गुणवृद्धी (१.१.३)" इत्यस्मात् सूत्रात् इकः इति पदमुपतिष्ठते। "येन विधिस्तदन्तस्य (१.१.७२)" इत्यनेन इगन्तस्य अङ्गस्य इत्यर्थः प्राप्यते। तेन चिधातोः तृचि प्रकृतसूत्रेण गुणे चेता इति रूपं सिद्ध्यति। यत्र तु अङ्गम् इगन्तं न भवति तत्र अङ्गस्य इति इकः इति विशेषणीयम्। यथा- मिदेर्गुणः (७.३.८२), मृजेर्वृद्धिः (७.२.११४) इत्यादौ। "सिचि वृद्धिः परस्मैपदेषु (७.२.१)" इति सूत्रेण इडादिसिच्प्रत्यये परे वृद्धिः विधीयते। सा च वृद्धिः स्थानिविशेषणाश्रयणेन इकः अनिकश्च प्राप्नोति। तत्र सिचि परे इकः प्राप्त्यर्थम्, अनिकः निवृत्त्यर्थं च प्रकृतसूत्रे एव वृद्धिग्रहणस्यावश्यकता। कृते च वृद्धिग्रहणे गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते, तत्र इकः इति षष्ठ्यन्तपदस्योपस्थितेः "सिचि वृद्धिः परस्मैपदेषु (७.२.१)" इति सूत्रेण विहिता वृद्धिरपि इक एव भवति, न तु अनिकः इति वृद्धिग्रहणं प्रकृतसूत्रे आवश्यकम्। तत्र पूर्वपक्षी शङ्कते- "सिचि वृद्धिः परस्मैपदेषु (७.२.१)" इति सूत्रेण विहिता वृद्धिः अनिकः न भवतु इत्यतः सूत्रे वृद्धिग्रहणं कृतम् इत्युक्तम्। परन्तु कस्य अनिकः वृद्धिः प्राप्नोति, कस्य वा वृद्धिः अत्र निवार्यते अनेन वृद्धिग्रहणेन। तत्रोच्यते- अकारस्य वृद्धिः प्राप्नोति, इग्ग्रहणेन च सा वार्यते तद्यथा- अचिकीर्षित्, अजिहीर्षित्। चिकीर्ष इति सन्नन्तात् लुङि अडागमे, सिचि, इडागमे, इतश्च इति इकारलोपे, "अस्तिसिचोऽपृक्ते (७.३.९६)" इति ईडागमे, अचिकीर्ष इस ईत् इति स्थिते आकारस्य वृद्धिः "सिचि वृद्धिः परस्मैपदेषु (७.२.१)" इत्यनेन प्राप्नोति। वृद्धौ कृतायाम् अचिकीर्षित् इति रूपं न सिद्ध्यति। एवमेव अकारस्य वृद्धिवारणाय इक एव वृद्धिसिद्ध्यर्थं वृद्धिग्रहणम् आवश्यकम्। तत्र पुनः आक्षिप्यते- अचिकीर्ष इस् ईत् इति दशायाम् "सिचि वृद्धिः परस्मैपदेषु (७.२.१)" इत्यनेन वृद्धिः, "अतो लोपः (६.४.४८)" इत्यनेन च अकारलोपोऽपि प्राप्नोति। तत्र "ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन" इति वार्तिकेन पूर्वविप्रतिषेधेन "अतो लोपः (६.४.४८)" इत्यकारलोपे अचिकीर्षत् इति रूपं सिद्ध्यति। अत्राकारस्य वृद्धिवारणाय इग्ग्रहणं नावश्यकम्। तत्र समाधीयते- अयासीत्, अवासीत् इत्यादौ आकारस्य तर्हि प्राप्नोति। या प्रापणे इति धातोः लुङि तिपि अडागमे सिचि इतश्च इतीकारलोपे, ईडागमे, याधातोः अनिट्कत्वात् इडभावे अ या स् ईत् इति दशायाम्, "सिचि वृद्धिः परस्मैपदेषु (७.२.१)" इत्यनेन आकारस्य वृद्धिः प्राप्नोति। प्राप्तवृद्धिवारणाय, इक एव सा वृद्धिर्भवति इति बोधनाय च वृद्धिग्रहणम् आवश्यकम्। यदि एवमुच्यते अत्र आकारस्य वृद्धौ कृतायाम् अकृतायां च आकार एव अवशिष्यते, फलान्तरं नास्ति एव। अतः इदं न वृद्धिग्रहणस्य प्रयोजनं भवितुमर्हति। तत्र समाधिरुच्यते- सन्ध्यक्षरस्य वृद्धिः प्राप्नोति इति। सिचि परे सन्ध्यक्षराणां वृद्धिवारणाय वृद्धिग्रहणं कृतम्। तत्र "आदेच उपदेशेऽशिति (६.१.४५)" इति सूत्रेण उपदेशवेलायामेव एचः आत्वविधानात् वृद्ध्यर्थं सन्ध्यक्षरं धातोरन्ते नोपलभ्यते। अतः सन्ध्यक्षरस्य वृद्धिनिवारणाय वृद्धिग्रहणं नापेक्षितमिति। तत्र पुनराक्षिप्यते- उदवोढाम्, उदवोढम् इत्यत्र ढलोपात् परं अन्तिमं सन्ध्यक्षरं विद्यते इति। यथा- उदुपसर्गकात् वह प्रापणे इति धातोः लुङि, तसि, अडागमे, सिचि, तामादेशे, ढलोपादीनाम् असिद्धत्वात्

हलन्तलक्षणावृद्धौ, “झलो झली (८.२.२६)”ति सकारलोपे, “हो ढः (८.२.३१)” इति ढत्वे, “झषस्तथोर्धोऽधः (८.२.४०)” इति धत्वे, “ष्टुना ष्टुः (८.४.४१)” इति धस्य ढत्वे, ढकारलोपे, “सहिवहोरोदवर्णस्य (६.३.११२)” इत्याकारस्य ओकारे उदवो ढाम् इति रूपं भवति। उदवो ढाम् इत्यत्र लुप्तं सिच्प्रत्ययं निमित्तीकृत्य अन्त्यस्यौकारस्य वृद्धिवारणाय इग्ग्रहणं कर्तव्यम् इति चेत् आह- तन्न। वृद्धौ कर्तव्यायां ढलोपः असिद्धः। तस्य असिद्धत्वात् नैतत् अन्त्यं भवति। पुनः संशयो जायते- गो शब्दात् आचारक्विपि अगवीत् इति रूपं भवति। तत्र सन्ध्यक्षरम् अन्ते वर्तते। तस्य किमर्थं न वृद्धिरिति। तदुच्यते- सिचि वृद्धिरिति सूत्रे “ऋत इद्धातोः (७.१.१००)” इत्यस्मात् सूत्रात् धातुपदम् अनुवर्तते। सिचैव धातोः आक्षेपे लब्धे पुनः अनुवर्तमानम् इदं धातुपदं व्यर्थमेव। व्यर्थीभूय ज्ञापयति- औपदेशिकधातूनां विषये एव वृद्धिः प्रवर्तते, नान्येषामिति। तत्रोच्यते- अभैत्सीत्, अच्छैत्सीत् इत्यत्र भिदधातोः लुङि, तिपि, अडागमे, सिचि अ भिद् स् ईत् इति स्थिते, “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इत्यनेन प्राप्ता वृद्धिः भिद्धातोः अन्त्यस्य व्यञ्जनस्य प्राप्नोति। “इको गुणवृद्धी (१.१.३)” इति सूत्रे वृद्धिग्रहणे कृते सति सा वृद्धिः इक एव भवतीत्यनेन व्यञ्जनस्य वृद्धिनिवारणं जायते। अभैत्सीत् इत्यत्र “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इति प्राप्तां वृद्धिं प्रबाध्य “वदव्रजहलन्तस्याचः (७.२.३)” इत्यनेन वृद्धिः भविष्यति। अतः नात्र दोषः। किञ्च पुनराशङ्क्यते- “वदव्रजहलन्तस्याचः (७.२.३)” इति सूत्रविहिता वृद्धिः “नेटि (७.२.४)” इति सूत्रेण निषिध्यते। तत्र अकोषीत् अमोषीत् इत्यादौ “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इति सूत्रेण षकारस्य वृद्धिनिवारणाय सूत्रे इग्ग्रहणं कर्तव्यम् इति चेत् न, “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इति सूत्रविहिता वृद्धिरपि “नेटि (७.२.४)” इत्यनेन निषिध्यते। तत्रोच्यते- “नेटि (७.२.४)” इति सूत्रविहितनिषेधः “वदव्रजहलन्तस्याचः (७.२.३)” इति सूत्रेण विहितायाः वृद्धेरेव भवति, न तु “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इति सूत्रविहितवृद्धेः। तत्र च क्रमः- “सिचि वृद्धिः परस्मैपदेषु (७.२.१)”, “अतो ल्रान्तस्य (७.२.२)”, “वदव्रजहलन्तस्याचः (७.२.३)”, “नेटि (७.२.४)” इति। अत्र “नेटि (७.२.४)” निषेधः अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा इति न्यायमनुसृत्य अनन्तरस्य “वदव्रजहलन्तस्याचः (७.२.३)” इत्यस्यैव भवति, न तु व्यवहितस्य “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इत्यस्य इति चेत्तन्न, “नेटि (७.२.४)” इति निषेधः “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इत्यत्रापि प्रवर्तते। तत्र “नेटि (७.२.४)” इति सूत्रं बाध्यसामान्यचिन्तया सामान्यरूपेण “वदव्रजहलन्तस्याचः (७.२.३)”, “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इत्युभयोः विषये एव समानरूपेण प्रवर्तते इति “नेटि (७.२.४)” इति निषेधः सिचि वृद्धिरित्यस्यापि स्यात्। अतः प्रकृते अकोषीत् अमोषीत् इत्यत्र “नेटि (७.२.४)” इति सूत्रेण यथा “वदव्रजहलन्तस्याचः (७.२.३)” इति सूत्रं बाध्यते एवमेव “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इति सूत्रमपि बाध्यते। तत्र उच्यते- अत्र वृद्धिग्रहणं तु उत्तरार्थम् इति। उत्तरसूत्रं वर्तते “क्ङिति च (१.१.५)” इति। अस्मिन् सूत्रे विद्यमानं वृद्धिपदम् उत्तरसूत्रे “क्ङिति च (१.१.५)” इत्यत्र अनुवर्तते इति स निषेधः इग्लक्षणो भवति। सिचि वृद्धिरिति वृद्धिः अविशेषेण विधीयते। सा च क्ङिति इको मा भूत् इति बोधनाय “इको गुणवृद्धी (१.१.३)” इति सूत्रे वृद्धिग्रहणं कृतम्। यथा न्यनुवीत्, न्यधुवीत्। अत्र निपूर्वकनुधातोः लुङि तिपि अडागमे, सिचः ङित्त्वे, सिचि वृद्धिरित्यादिसूत्रेण प्राप्ता वृद्धिः सिचः ङित्त्वात्, “क्ङिति च (१.१.५)” इत्यनेन वार्यते। अयं च वृद्धिनिषेधः इको भवति इति अयम् इग्लक्षणः। एवं च वृद्ध्यभावे न्यनुवीत्, न्यधुवीत् इति रूपाणि भवन्ति। एवं “क्ङिति च (१.१.५)” इति अनुवृत्त्यर्थम् अत्र इग्ग्रहणमिति चेत् न। अन्तरङ्गत्वात् अत्र उवङादेशे कृते, अनन्त्यत्वात् वृद्धिः न प्राप्नोति। उवङादेशः सिचमेव अपेक्षते इति अन्तरङ्गः, वृद्धिस्तु परस्मैपदपरं सिचमिति बहिरङ्गः। तत्र पुनः उच्यते- सिचि वृद्धिं प्रबाध्य अन्तरङ्गमेव पूर्वं प्रवर्तते चेत् अकार्षीत्, अहार्षीत् इत्यत्र अ कृ स् ईत् इति स्थिते अन्तरङ्गत्वात् गुणे, रपरत्वे, अकर् सीत् इति जाते, अनन्त्यत्वात् सिचि वृद्धिरिति वृद्धिः न प्राप्नोतीति। तत्र समाधीयते- अकर् सीत् इत्यत्र “वदव्रजहलन्तस्याचः (७.२.३)” इति हलन्तत्वात् वृद्धिः क्रियते, तेन अकार्षीत् इति रूपं भवति। तदा पुनरुच्यते- न्यस्तारीत्, न्यदारीत् इत्यत्र तु निपूर्वकस्तॄधातोः लुङि तिपि अडागमे सिचि इडागमे नि अस्तॄ इस् ईत् इति जाते अन्तरङ्गत्वात् गुणे रपरत्वे च कृते न्यस्तर् इस् ईत् इति स्थिते, अनन्त्यत्वात् वृद्धिरेव न प्राप्नोति। हलन्तलक्षणायाः वृद्धेः “नेटि (७.२.४)” इत्यनेन प्रतिषेधः भवति। तत्र समाधत्ते- एवं मा भूत्। “अतो ल्रान्तस्य (७.२.२)” इति वृद्धिः भविष्यति। एवमुच्यमाने सति अयावीत्, अलावीत् इत्यत्र युधातोः लुङि तिपि अडागमे सिचि इटि, अयुइस् ईत् इति दशायाम्, वृद्धिं प्रबाध्य अन्तरङ्गत्वात् गुणे अवादेशे अयव् इ स् ईत् इति स्थिते, “सिचि वृद्धिः परस्मैपदेषु (७.२.१)” इति वृद्धिः अनन्त्यत्वात् नैव प्राप्नोति, हलन्तलक्षणावृद्धेः “नेटि (७.२.४)” इति निषेधः, रेफलकारान्तो नास्ति इति “अतो ल्रान्तस्य (७.२.२)” इति न प्रवर्तते

इत्यवस्थायां कथम् अयावीत् इति रूपं सिद्ध्यति। तदोच्यते- अत्रापि "अतो ल्रान्तस्य (७.२.२)" इत्यनेनैव वृद्धिः भविष्यति। ल्रान्तस्य इत्यत्र वकारो निर्दिश्यते। तस्य च "लोपो व्योर्वलि (६.१.६६)" इति लोपः। एवम् अयावीत् इत्यत्र "अतो ल्रान्तस्य (७.२.२)" इत्यनेनैव वृद्धिः। तत्र पुनः शङ्काम् उत्थापयति- "अतो ल्रान्तस्य (७.२.२)" इत्यत्र वकारस्य प्रश्लेषे सति मा भवान् अवीत्, मा भवान् मवीत् इत्यत्र अव् मव् धात्वोरपि वकारान्तत्वात् "अतो ल्रान्तस्य (७.२.२)" इति वृद्धिः भविष्यति इति चेन्न। "ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् (७.२.५)" इति सूत्रे णिश्विग्रहणमपनीय अविमवीप्रतिषेधार्थम् इति पठ्येते इति मा भवान् अवीत्, मवीत् इत्यत्र वृद्धिः निषिध्यते। एवं णिश्व्योः प्रतिषेधः न वक्तव्यो भवति। गुणे कृते, यादेशे च यान्तानां न इत्यवे प्रतिषेधो भविष्यति। तत्रोच्यते- "अतो हलादेर्लघोः (७.२.७)" इत्यकारग्रहणेन ज्ञापकेन सिच्यन्तरङ्गप्रवृत्तिः वार्य्यते। अत्र अकारग्रहणस्य प्रयोजनं वर्तते- अकोषीत् अमोषीत् इत्यत्र उभयोः धात्वोः वृद्धिवारणम्। यदि सिच्यन्तरङ्गं स्यात्, अकारग्रहणं तर्हि अनर्थकम्। अकुष् इ स् ईत् इति दशायाम्, गुणे कृते अलुघत्वात् न वृद्धिः। अतः न सिच्यन्तरङ्गं भवतीति अकारग्रहणं करोति आचार्यः। पुनः आक्षेपः क्रियते- एतत् न ज्ञापकम्। अस्य प्रयोजनान्तरं विद्यते। यत्र गुणस्य प्रतिषेधः क्रियते न्यकुटीत् न्यपुटीत् इत्यादौ "गाङ्कुटादिभ्योऽञ्णिन्ङित् (१.२.१)" सूत्रेण ङित्त्वात्, नि अकुट् इस् ईत् इति स्थिते, अन्तरङ्गतया प्राप्तस्य गुणस्य निषेधे, वृद्धिबाधनाय अतः इति आवश्यकमेव। अतः सिच्यन्तरङ्गं न भवतीति इति ज्ञापनाय अकारग्रहणं न अलम् इति। तत्र समाधत्ते- "ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् (७.२.५)" इति सूत्रे णिश्व्योः वृद्धिप्रतिषेधः एव बोधयति अत्र अन्तरङ्गं नास्ति इति। तद्यथा- अश्वयीत् इत्यादिषु श्विधातोः लुङि तिपि अडागमे सिचि अश्वि इस ईत् इति जाते, वृद्धिं प्रबाध्य अन्तरङ्गे गुणे कृते, अयादेशे च अश्वय् इस् ईत् इति जाते, यान्तत्वादेव धातोः वृद्धिनिषेधे सिद्धे णिश्विग्रहणं व्यर्थम्, व्यर्थीभूय अन्तरङ्गं प्रथमतः न प्रवर्तते इति बोधयति। किञ्च "अतो हलादेर्लघोः (७.२.७)" इति सूत्रे लघोः इति पदेनैव लघोः ह्रस्वाकारस्य ग्रहणे सिद्धे पुनः अतः इति पदं व्यर्थम्, एवं व्यर्थीभूय ज्ञापयति सिच्यन्तरङ्गं न भवतीति। एवं च न्यनुवीत् इत्यादौ उवङं प्रबाध्य प्राप्तायाः वृद्धेः निषेधाय इग्लक्षणा सिचिवृद्धिरित्येव आश्रयणीयम्। "क्क्ङिति च (१.१.५)" इति उत्तरसूत्रे अनुवृत्तम् इहार्थं चापि "इको गुणवृद्धी (१.१.३)" इति सूत्रे वृद्धिग्रहणमावश्यकमेव इति सिद्धान्तितम्। एवमेव "इको गुणवृद्धी (१.१.३)" इति सूत्रे इग्ग्रहणं क्रियते चेत् द्यौः, सः इत्यादिष्वपि तत्तत्कार्याणि इकः प्राप्नुवन्ति। तद्यथा- "दिव औत् (७.१.८४)" इति सूत्रेण औकारो विधीयते, स च इक एव प्राप्नोति। स इत्यत्र त्यदादीनामः (७.२.१०२) इति सूत्रेण विहितः अकारः तच्छब्दे इकः अभावात् कस्यापि न प्राप्नोति एते दोषाः भवन्ति। तत्रोच्यते- अस्मिन् सूत्रे "वृद्धिरादैच् (१.१.१)" इति सूत्रात् वृद्धिरिति, "अदेङ्गुणः (१.१.२)" इति सूत्रात् गुण इत्यनुवर्तते। तेन गुणपदेन यत्र गुणो विधीयते, एवं वृद्धिपदेन यत्र वृद्धिर्विधीयते तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते इति सूत्रार्थः। अथवा गुणवृद्ध्यनुवृत्त्यैव सिद्धे पुनः गुणवृद्धिग्रहणं यत्र गुणशब्दमुच्चार्य, एवं वृद्धिशब्दमुच्चार्य गुणवृद्धी विधीयेते तत्रैव इक इत्युपस्थितं भवति इति द्यौरित्यादौ दोषो वार्यते।

**उपसंहारः-**अस्य शोधप्रबन्धस्य प्रारम्भे उपक्रमभागे शाब्दिकेन पुरुषोत्तमदेवेन विलिखितायाः भाषावृत्तेः सामान्यपरिचयः, भाषावृत्त्यर्थविवृतेः प्राधान्यं चेत्यादयः सामान्यविषयाः उपपादिताः सन्ति। ततश्च सृष्टिधराचार्यस्य तत्कृतेः भाषावृत्त्यर्थविवृतेश्च परिचयः प्रदत्तः। तदनु सृष्टिधराचार्यदिशा इको गुणवृद्धी (१.१.३) इति सूत्रं सविशदं व्याख्यातम्। अस्मात् शोधप्रबन्धात् व्याख्याकृद्भिः भाषावृत्त्यर्थविवृतौ कीदृशी व्याख्यानशैली समाश्रिता, पुरुषोत्तमदेवेन प्रतिपादिताः सूत्रार्थाः कथमत्र विशदीकृताः इत्यादयो बहवो विषयाः सुष्ठुतया बुद्ध्यारूढाः भवन्ति। एवम् अनेन शोधप्रबन्धेन नूनमेव शाब्दिकानां महान् लाभो भविष्यति इत्याशास्य इहैव विरम्यते।

## सन्दर्भाः


1. भाषावृत्तिः (सम्पादकः- स्वामी द्वारिकादासशास्त्री), सम्पादकीयम्, पत्रम्- ९।
2. भाषावृत्तिः, भूमिका, पत्रम्- ९।
3. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- १।
4. भाषावृत्तिः, भूमिका, पत्रम्- ९।
5. संस्कृत-व्याकरणशास्त्र-का-इतिहास, युधिष्ठिर-मीमांसकः, पत्रम्- १७५।

6. The Bhashavrittivivaranapanjika of Visvarupa, The First Adhyaya and a detailed examination, pp-167
7. Paninian Studies in Bengal, Dineshchandra Bhattacharyya, pp-204
8. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिः), पत्रम्- १।
9. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), भूमिका, पत्रम्- ११।
10. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), भूमिका।
11. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- ९५।
12. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- ९६।
13. भाषावृत्तिः, भूमिका, पत्रम्- ११।
14. भाषावृत्तिः, भूमिका, पत्रम्- १९।
15. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- २०।
16. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- २०।

## परिशीलितग्रन्थसूची

1. पुरुषोत्तमदेवः। (१९१२)। *भाषावृत्तिः* (सृष्टिधराचार्य-कृत-भाषावृत्त्यर्थविवृतिसहिता) । चन्द्रः, गिरीशः (वेदान्ततीर्थः) (सम्पादकः)। कलिकाता : एशियाटिक्-सोसाइटि-अफ्-वेङ्गल।

2. पुरुषोत्तमदेवः। (१९१८)। *भाषावृत्तिः*। चक्रवर्ती, श्रीशचन्द्रः (संस्कर्ता, सम्पादकः) । राजशाही (बांला-देशः) : वरेन्द्र-रिसर्च-सोसाइटि।

3. मीमांसकः, युधिष्ठिरः। (२०२०)। *संस्कृत व्याकरण शास्त्र का इतिहास*। त्रिपाठी, रामनाथः (सम्पादकः)। वाराणसी : चौखम्भा-पब्लिशर्स।

4. शर्मा, लेखराजः। (१९९७)। *भाषावृत्ति का विवेचनात्मक एवं तुलनात्मक अध्ययन*। हिमाचलप्रदेशः : ज्ञानाशीष-प्रकाशनम्।

5. पुरुषोत्तमदेवः। (१९७१)। *भाषावृत्तिः*। द्वारिकादासशास्त्री, स्वामी (सम्पादकः)। वाराणसी : तारा पब्लिकेशन्स।

6. Das, Swyambha. (2017). A Fundamental Discussion About the Commentaries on Bhāṣāvṛtti. International Journal of Research and Analytical Reviews, Volume 4, Issue 4, Oct-Dec.

7. Bhattacharyya, Dineshchandra. (1922). Paninian Studies in Bengal. Sir Asutosh Mookerjee Silver Jubilee Volumes, Vol. III, Part-1, Calcutta : Calcutta University Press.

# सांख्यवेदान्तमते चैतन्यसिद्धान्तपरीक्षणम्

**कृष्णेन्दु-बेरा:[1], डा. शन्तनु-अयाचित्[2]**

**शोधसारः (Abstract)**— भारतीयदर्शनपरम्परायां परमसत्यत्वेन अङ्गीकृतस्य चैतन्यस्यैव क्वचित् ज्ञानम्, पुरुषः, अन्तरात्मेत्येते शब्दाः व्यपदिश्यन्ते। सांख्यवेदान्तमते चैतन्यस्य कीदृक्स्वरूपता इत्येतत्सर्वं विचार्यते निबन्धेऽस्मिन्। अपि च अद्वैतवेदान्तस्य मुख्यप्रतिपक्षत्वेन सांख्यदर्शनमस्तीति शङ्करभगवत्पादैः असकृदुक्तम्। सांख्यदर्शने पञ्चविंशतितत्त्वेषु पुरुषः अन्यतमः, स च पुरुषः चेतनः अर्थात् साक्षित्वेन स्थितः द्रष्टा अकर्ता भोक्ता च। अद्वैतवेदान्ते तावत् ब्रह्मैव चैतन्यं नित्यशुद्धबुद्धमुक्तस्वरूपं सर्वव्यापकञ्च।

**कुञ्चिकाशब्दाः**— ब्रह्म, चैतन्यम्, पुरुषः, माया, सांख्यदर्शनम्, वेदान्तदर्शनम्।

**१. भूमिका**— भारतीयास्तिकदर्शनसमप्रदायेषु सांख्यदर्शनम् अन्यतमं स्थानं भजते। दर्शनेऽस्मिन् सर्वकारणस्वरूपा सत्त्वरजस्तमोरूपा गुणत्रयात्मिका मूलप्रकृतिरेव अनन्तावयवविशिष्टस्य ब्रह्माण्डस्य रचनां कृतवती। प्रकृतिस्तु अचेतनात्मिका, मूलप्रकृतौ ज्ञस्वरूपस्य चैतन्यस्य पुरुषस्य समावेशादेव प्रकृतिस्थगुणानां परस्परवैषम्यात् सृष्ट्यारम्भः। प्रकृतिपुरुषयोः विवेकज्ञानेन कैवल्यप्राप्तिः इति सांख्याः मन्यन्ते। अत्र तावत् अचेतनप्रकृतेः सृष्टिस्थितिलयाः भवन्ति। अद्वैतवेदान्ते खलु ऊर्णनाभिदृष्टान्तेन[3] सर्वज्ञात् सर्वशक्तिमतः चेतनाद्ब्रह्मणः सकाशादेव जगत् समुत्पद्यते। अतश्च ब्रह्मैव समग्रस्य प्रपञ्चस्य उत्पत्तिस्थितिलयकारणम्। सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमिति[4] श्रुत्या नामरूपात्मकस्यास्य जगतः उत्पत्तेः पूर्वम् सद्रूपं चिन्मात्रमेकं निरवयवं कालत्रयाबाध्यं ब्रह्मैवासीत्। एवञ्च, सांख्यदर्शनस्वीकृतस्य अनुभयरूपस्य नाम उदासीनस्य पुरुषस्य चैतन्यशक्तिमादाय प्रकृतिः सृजति चेत् अचेतनात्मिकायाः प्रकृतेः कथं सृष्टिः स्यादिति प्रश्नः, अद्वैतमते तु जगतः अभिन्ननिमित्तोपादानकारणं चिद्रूपं ब्रह्मैव।

**२. सांख्यमते पुरुषस्वरूपम्**— सांख्यमते पुरुषः निर्गुणः निष्क्रियः असङ्गः भोक्ता, ननु निगुर्णस्य असङ्गस्य च पुरुषस्य कथं भोक्तृत्वं सम्भवति। भोग्याः दृश्याः पदार्थाः सन्ति, द्रष्टा च आत्मास्ति। द्रष्टृदृश्ययोः अविनाभावसम्बन्धः, द्रष्टृदृश्ययोः परस्परं सापेक्षत्वात्। द्रष्टा सर्वथा चेतन एव, सांख्यमते प्रकृत्यादिभ्यो भिन्नाः पुरुषाः बहवः भवन्ति। अयं च पुरुषः प्रतिशरीरं भिन्नः इत्यस्य कारणं भवति जननमरणकरणानां प्रतिनियमत्वमिति, एकस्य कस्यचित् एकस्मिन् काले जन्म भवति तस्मिन्नेव समये अपरस्य मरणं भवतीति चक्षुरादिसमग्रेन्द्रियसमुदायानां प्रतिशरीरं भिद्यमानत्वात् प्रतिशरीरमात्मा च भिन्न इति ।

**३. वेदान्तमते ब्रह्मस्वरूपम्**— सत्यं ज्ञानमनन्तं ब्रह्म[5] इत्यादिश्रुतिभिः ब्रह्मणः स्वरूपं निश्चितमिति। सत्यं नाम येन रूपेण यन्निश्चितमस्ति, तद्रूपस्य व्यभिचारः न सम्भवति चेत्तत्सत्यम्[6]। तद्भिन्नं च असत्यम्। अर्थात् कालत्रयाबाध्यत्वं हि सत्यत्वमिति। पुनश्च ज्ञानस्वरूपं ब्रह्मेति भावप्रत्ययेन निष्पन्नस्य ज्ञानपदस्यार्थः अवबोधः न तु ज्ञानकर्तृ इति[7]। तच्च ब्रह्म नित्यं सर्वगतं शुद्धं चेतनम् अजम् आनन्दरूपमिति। प्रत्यक्षेण दृश्यमानस्य नामरूपात्मककार्यप्रपञ्चस्य जगतः तदेव कारणं परं ब्रह्म। परमार्थतः कारणात् कार्यप्रपञ्चस्य अनन्यत्वे कारणव्यतिरेकेण कार्यस्याभाव इति गम्यते[8]। तत्र दृष्टान्तमुखेनोच्यते—यथा एकस्यां मृदि ज्ञातायाम् अन्यत्सर्वं मृदा निर्मितं

[1]शोधकर्ता, वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२, Email:srimankrishnendu@gmail.com.

[2] सहायकाध्यापकः, वेलुडमठस्थितस्य रामकृष्णमिशन्- विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२, Email:shantanuoffice12119@gmail.com.

[3] यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्।। (मुण्डकोपनिषदि प्रथममुण्डकस्य प्रथमखण्डे सप्तमः मन्त्रः)।

[4] छान्दोग्योपनिषदि षष्ठाध्यायस्य द्वितीयखण्डे प्रथमः मन्त्रः।

[5] तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां प्रथमानुवाके प्रथमो मन्त्रः।

[6] सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति, तत्सत्यम्। यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरति, तदनृतमित्युच्यते।

[7] ज्ञानं ज्ञप्तिः अवबोधः—भावसाधनो ज्ञानशब्दः—न तु ज्ञानकर्तृ, ब्रह्मविशेषणत्वात्सत्यानन्ताभ्यां सह। (तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याः प्रथमानुवाके शङ्कराचार्यकृतप्रथममन्त्रभाष्ये).

[8] ब्रह्मसूत्रशाङ्करभाष्ये द्वितीयाध्यायस्य प्रथमपादे आरम्भणाधिकरणे स्पष्टम्। ('तदनन्यत्वमारम्भणशब्दादिभ्यः' २-१-६-१४)

विकारजातं घटशरावादिकं ज्ञातं भवति। किञ्च, नामधेयमात्रं सर्वं विकारभूतं वस्तु अनृतमस्ति मृत्तिकेत्येव सत्यमिति तद्वत् आत्मनि विज्ञाते अन्यत्सर्वं नामरूपात्मकवस्तुजातं विज्ञातं भवति।

**४. समीक्षा—** ईश्वरकृष्णप्रोक्तसांख्यकारिकायाः एकादशतमे श्लोके व्यक्ताव्यक्तयोः साधर्म्यं निरुपितम्। ततश्च पुरुषात् तयोः वैधर्म्यमुखेन पुरुषस्य स्वरूपं निरूपितमस्ति, तत्र व्यक्तं नाम प्रकृतिपुरुषभिन्नं महदाद्यारभ्य पृथिवीपर्यन्तं त्रयोविंशतितत्त्वमिति, अव्यक्तं तावत् प्रधानमिति। तथा च कारिका—

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।११।**

व्यक्ताव्यक्तयोः साधर्म्यं हि- गुणत्रययुक्तं तदुभयं भवति। गुणाः नाम सत्त्वरजस्तमांसि, ते च गुणाः क्रमेण प्रीत्यप्रीतिविषादात्मकाः सन्ति। सत्त्वगुणः प्रीत्यात्मकः अस्ति, तत्र प्रीतिर्नाम सुखं प्रसन्नात्मकता, रजोगुणः अप्रीत्यात्मकः दुःखात्मकः, विषादात्मकस्तमोगुणः। अव्यक्तं प्रधानम् अविवेकि अर्थात् भेदज्ञानरहितमित्यर्थः, पुनः सामान्यमिति सर्वे व्यक्ताव्यक्तादयो विषयाः जडाः चिद्भिन्नाः अचेतनाः सन्ति। एवम्प्रकारेण व्यक्ताव्यक्ताभ्यां विलक्षणः पुरुषः।

सांख्यमते पुरुषोऽस्तीत्यत्र पुरुषस्य सद्भावावबोधिनी कारिका तावत्—

**सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।।१७।**

अव्यक्ताख्यस्य प्रधानस्य प्रवृत्तिर्भवति पुरुषायैव। पुरुषास्तित्वसिद्धये केचन हेतवः उच्यन्ते—सङ्धातपरार्थत्वात्, त्रिगुणादिविपर्ययाद्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेश्च। सङ्घातः संहन्यन्ते एकत्रीभवन्ति यत्रासौ सङ्घातः प्रधानादिजडप्रपञ्चः, स च सङ्घातः परार्थः अर्थात् सङ्घातभिन्नः यश्चेतनः आत्मास्ति तस्य कृते भोगापवर्गौ भवतः। भोगापवर्गौ जडे अचेतने न सम्भवतस्तस्मात् चेतनोऽयं पुरुष इति। यथा शयनासनादीनां जडसमुदायानां सङ्घातत्वमिति तच्च कस्यचित्पुरुषस्य उपभोगायैव अवकल्पते[1]। गुणत्रयात्मकाः पदार्थाः सर्वेऽपि संहतत्वेन व्याप्ताः सन्ति, असंहतश्चायं पुरुषः गुणत्रयरहितः विवेकी अविषयी अप्रसवधर्मोपेतः। त्रिगुणात्मकसुखदुःखमोहस्वरूपाणां महदादिजडपदार्थानां किञ्चित् अधिष्ठानं भवत्येव। तच्चाधिष्ठानं चेतनमेव स्यात्। यथा रथादयः स्वयं जडाः तेषामधिष्ठानत्वेनास्ति कश्चन चेतनः सारथिरिति। यस्य अधिष्ठीयमानत्वे सति जडानामपि प्रवृत्तिर्दृश्यते। तथा चोक्तं तत्त्ववैशारद्याम्- त्रिगुणात्मकानामधिष्ठीयमानत्वात्। यद्यत्सुखदुःखमोहात्मकं तत्सर्वं परेणाऽधिष्ठीयमानं दृष्टम्, यथा रथादि यन्त्रादिभिः। पुनरपि भोक्ता चायं पुरुषः सुखदुःखयोः, समेषां महदादीनां त्रिगुणात्मकभोग्यपदार्थानां भोक्ता चेतन एव स्यात्। एवञ्च, प्रवृत्तिः सर्वदा प्रयत्नरूपा भवति, अचेतनपदार्थेषु प्रवृत्तेः असार्थक्यमेवातः कैवल्यार्थमेव प्रवृत्तिरागमानां, तच्च कैवल्यं पुरुषस्य सम्भवति, न तु अचेतनस्य महदादेरत एवास्ति बुद्ध्यादिव्यतिरिक्तः कश्चित् चेतनः आत्मेति।

सांख्यमते पुरुषाः बहवः भवन्ति, पुरुषबहुत्वे तैः सांख्याचार्यैः त्रयो हेतव उच्यन्ते- जननमरणकरणानां प्रतिनियमात्, अयुगपत्प्रवृत्तेः, त्रैगुण्यविपर्ययात् इत्येते। ततश्च पुरुषस्य स्वरूपमुच्यते—

**तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य।**
**कैवल्यं माध्यस्थं द्रष्टृत्वमकर्तृभावश्च।।२१।।**

कारिकायामस्यां प्रोक्तेन तस्मादिति पदेन त्रिगुणमविवेकि इत्यादिकारिकोक्तधर्माणां ग्रहणं कार्यम्, विपर्यासात् इत्युक्ते विपरीतात् अर्थात् त्रिगुणरहितत्वम्, विवेकित्वम्, अविषयित्वम्, असाधारणत्वम्, चेतनत्वम्, अप्रसवधर्मित्वम् इति अस्य सांख्याभिमतसिद्धपुरुषस्य साक्षित्वं निश्चप्रचम्। तत्र चेतनत्वेनायं पुरुषः द्रष्टा, अविषयित्वादयं साक्षीति। पुरुषस्य साक्षित्वं पुनः कथं सम्भवतीति निरूप्यते तत्त्ववैशारद्यां श्रीवाचस्पतिमिश्रपादैः- 'एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी। न

[1] तत्त्ववैशारद्यां सप्तदशश्लोकस्य कारिकाव्याख्यायाम्—अव्यक्तमहदङ्कारादयः परार्थाः, संघातत्वात्, शयनासनभ्यङ्गादिवत्, सुखदुःखमोहात्मकतया सर्वे सङ्घाताः।

चाऽचेतनो विषयो वा शक्यो विषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी, अत एव द्रष्टापि भवति[1]'।

वेदान्तमते नित्यः चैतन्यस्वरूपोऽयमात्मा अकर्ता अभोक्ता सर्वभूतेषु स्थितः एकः नित्यशुद्धबुद्धमुक्तस्वरूपः। यद्यपि चेतनोऽयमात्मा तथापि तस्य चैतन्यं कीदृशमिति पृष्टे सति कणादीयदर्शनसिद्धान्तिनः आगन्तुकचैतन्यात्मकः उत सांख्यदर्शनमिव नित्यचैतन्यस्वरूप इति संशयजनिका विरुद्धार्थप्रतिपादकपक्षद्वयरूपा विप्रतिपत्तिर्दृश्यतेऽत्र। तत्र यदि आगन्तुकचैतन्यात्मनः स्यात् तर्हि अग्निघटयोः संयोगेन यथा घटे लोहित्यादिगुणोत्कर्षः भवति तथैव आत्ममनःसंयोगेन आगन्तुकचैतन्यं भवतीति अङ्गीकर्तव्यम्। यदि नित्यचैतन्यमङ्गीक्रियते तर्हि स्वापावस्थायां मूर्छावस्थायां चैतन्य स्यात् न तथा दृश्यते। तर्हि आत्मनः चैतन्यं कीदृशमिति प्रश्ने महर्षिबादरायणप्रणीतब्रह्मसूत्रे अस्य समाधानं विद्यते। सूत्रं हि तत्र—**ज्ञोऽत एव**[2]। अयमात्मा नित्यचैतन्यरूपः, यतो हि आत्मायं नोत्पद्यते सर्वविकाररहितः, उपाधिसम्पर्कवशादेव जीवात्मना अवतिष्ठते। परस्य ब्रह्मणः एव चैतन्यरूपत्वं द्योतितं श्रुतिषु— "विज्ञानमानन्दं ब्रह्म[3]", "कृत्स्नः प्रज्ञानघन एव[4]।" सैन्धवघनवत् आत्मायमेकः चिन्मात्रस्वरूपकः स्वयंज्जोतिरूपः आनन्दरूपः इति।

**५. उपसंहारः**— सांख्यदर्शने तावत् पुरुषाणां बहुत्वमङ्गीक्रियते, पुनश्च अचेतनायाः प्रकृतेः स्वतन्त्रता अभ्युपेयते। चेतनः पुरुषः यद्यपि स्वीक्रियते तथापि पुरुषे भोक्तृत्वम् आरोप्यते। वैदान्तिकमतमिव सांख्यदर्शनेऽपि पुरुषः नित्यशुद्धबुद्धमुक्तस्वभावोऽस्तीति प्रतिपाद्यते। तच्च महर्षिकपिलप्रोक्तं सांख्यसूत्रं तावत्—"न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते[5] ।"

वेदान्तमते च तस्य भासा सर्वमिदं विभाति[6], तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय[7] इत्यादिश्रुतिषु यस्य पुरुषस्य विज्ञानेन सर्वदुःखप्रहाणिर्भवति स परमात्मा एको नित्यचैतन्यरूपः अकर्ता अभोक्ता, उपाधिभेदेन जीव-ईश्वरभेदेन व्यपदिश्यते।

## Bibliography


1. आचार्यः, शङ्कर; *ब्रह्मसूत्रशाङ्करभाष्यम्* (श्रीगोविन्दानन्दकृतया भाष्यरत्नप्रभया श्रीवाचस्पतिमिश्रविरचितया भामत्या श्रीमदानन्दगिरिप्रणीतेन न्यायनिर्णयेन समुपेतम्); आचार्यजगदीशशास्त्री(सम्पादकः); मोतिलाल बनारसीदास; देहली; २०१८
2. मिश्रः, श्रीवाचस्पतिः; *सांख्यतत्त्वकौमुदी* ('कृष्ण'-संस्कृत-हिन्दीव्याख्याद्वयोपेता); श्रीज्वालाप्रसाद-गौढः; श्रीवसन्तत्र्यंम्बक-हेवडे; चौखम्बा सुरभारती प्रकाशन; वाराणसी; २०१९.
3. मुनिः, कपिलः; *सांख्यदर्शनम्* (श्रीविज्ञानभिक्षुविरचितसांख्यप्रवचनभाष्यस्य 'प्रदीप' हिन्दीव्याख्योपेतम्); डा. गजाननशास्त्री वैद्योपनामकोमुसलगाँवकरः; चौखम्भा संस्कृत संस्थान; वाराणसी.
4. आचार्यः, शङ्कर; *श्रीबृहदारण्यकोपनिषत्* (उपनिषद्भाष्यम्-खण्डः-३); श्री एस्. सुब्रह्मण्यशास्त्री; श्री दक्षिणामूर्तिमठ प्रकाशन; वाराणसी.
5. https://advaitasharada.sringeri.net/


[1] सांख्यतत्त्वकौमुद्याः नवदशकारिकायां तत्त्ववैशारदीटीका।
[2] ब्रह्मसूत्रशाङ्करभाष्ये द्वितीयाध्यस्य तृतीयपादस्य द्वादशतमे अधिकरणे विलसति सूत्रमिदम्।
[3] बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य नवमे ब्राह्मणे अष्टाविंशतितमे मन्त्रे।
[4] बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य पञ्चमबाह्मणस्य त्रयोदशतममन्त्रे।
[5] कपिलमुनिकृतसांख्यदर्शने प्रथमाध्यायस्य ऊनविंशतितमं सूत्रम्।
[6] कठोपनिषदः द्वितीयाध्यायस्य द्वितीयवल्याः पञ्चदशमन्त्रः।
[7] श्वेताश्वेतरोपनिषदः षष्ठाध्यायस्य पञ्चदशतममन्त्रः।

# समाजचरित्रयोः साधुत्वे नीतिशतकस्य माहात्म्यम्

**अभिजित् दासः[1], ब्रह्मचारी लोकेशचैतन्यः[2]**

**शोधसारः—** नीतयः अस्मज्जीवनस्य आधारभूताः भवन्ति। नैतिकजीवनेनैव सर्वतः शान्तिः लभ्यते मनुष्यैः। जनानां समन्वयेनैव जायते सुमहान् समाजः। एवञ्च कथं वयं सज्जनाः सन्तः एतादृशस्य समाजस्य कल्याणसाधने प्रवृत्ता भवेम इति नीतिशतकादिग्रन्थानां सम्यक् पर्यालोचनेन सुष्ठु ज्ञायते। तस्माद् नीतिशतकदिशा समाजे वर्तमानानां क्लेशानां कारणानि समाधानानि च शोधेऽस्मिन् विचारितानि। अत्रोक्तनीतयः कथं दृष्टानां विपदां दूरीकरणे योग्याः इत्यपि विचारितम्।

**कूटशब्दाः—** सद्गुणः (*sadguṇaḥ*), विवेकः (*vivekaḥ*), विनयः (*vinayaḥ*), विद्या (*vidyā)*, मैत्री *(maitrī*), धैर्यम् (*dhairyam*), सज्जनः (*sajjanaḥ*), धीरः (*dhīraḥ*), विश्वासः (*viśvāsaḥ*), चरित्रम् (*caritram*), समाजः (*samājaḥ*)

**१. उपक्रमः (Introduction)—** संस्कृतनभसि प्रसिद्धस्य विदुषः भर्तृहरेः शतकत्रये नीतिशतकं प्रमुखं स्थानं भजते। सुभाषितसम्प्रदाये नीतिशतकस्य नाम समुज्ज्वलं प्रभासते। शतकत्रये आदिममिदं शतकम्। ततश्च द्वितीयं शृङ्गारशतकं तृतीयं वैराग्यशतकञ्च विराजते। नीतिशतके सुमधुरश्लोकेन सर्वासां नीतीनां सन्निवेशं कुर्वन् ग्रन्थकारः सद्गुणानाम्, सत्पुरुषाणां चरित्रं, कर्तव्यञ्चेत्यादिकं प्रत्यपादयत्। न केवलमेतद् अपि तु, विचित्रस्यास्य संसारस्य सामान्यं स्वरूपमपि तैः चारु दर्शितम्। जीवनधारणे उपयोक्तव्यानां मार्गाणां प्राप्तिः ग्रन्थस्यास्य पठनेन जायते इत्यत्र सन्देहावकाशो नास्ति। अस्मिन् समाजे विद्यमानानां समस्यानां फलं तापत्रयं दुःखत्रयं वेति। न खलु लोके दुःखमिच्छति कर्हिचित् कोऽपि। तथाहि उक्तं भगवता ईश्वरकृष्णेन सांखकारिकायां— **"दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ"**[3] इति। तस्मात्तेषां दूरीकरणाय कीदृश्यः नीतयः जीवने परिपालनीयाः इति तदेव इदानीं पश्यामः।

**१.१. ग्रन्थकर्तुः परिचयः कृतयश्च—** वाक्यपदीयादिग्रन्थानां रचयितुः आचार्यस्य भर्तृहरेः कालविषये मतभेदसत्त्वेऽपि आचार्योऽयं पञ्चमशतकात् पूर्ववर्ती इति स्वीक्रियते। एतेषां प्रमाणभूतानाम् आचार्याणां देशविषयेऽपि वक्तुम् अशक्ता वयम्। एतेषां विदुषां स्थानकालादिविवरणमपि मतभेदोपेतम्। नीतिशतकं व्यतिरिच्य महाभाष्यस्य दीपिकाख्या टीका, वाक्यपदीयम्, वाक्यपदीयस्य स्वोपज्ञवृत्तिनाम्नी टीका, शब्दधातुसमीक्षेत्यादयः ग्रन्थाः महाभागेनानेन विरचिताः।

**१.२. ग्रन्थनाम्नः व्युत्पत्तिः—** नीयन्ते अनेनेति विग्रहे प्रापणार्थकात् णीञ्-धातोः[4] "स्त्रियां क्तिन्"[5] इति सूत्रेण करणे क्तिन्-प्रत्यये सुबुत्पत्तौ स्त्रियां निष्पन्नोऽयं नीतिशब्दः। शतं परिमाणमस्येति विग्रहे 'संख्याया अतिशदन्तायाः कन्'[6] इति सूत्रेण शतशब्दात् कन्-प्रत्यये व्युत्पन्नोऽयं विशेष्यनिघ्नः शतकशब्दः। नीतीनां शतकं नीतिशतकमिति "षष्ठी शेषे"[7] इति सूत्रेण षष्ठीतत्पुरुषसमासः।

**२. शोधसमस्या (Research Problem)—** साम्प्रतिके समाजे मनुष्याः स्वार्थम् अन्विषन्तः कार्ये रताः। स्वार्थरहितकार्यकरणे न ते केऽपि इच्छुकाः। फलरूपेण सूक्ष्ममपि विषयम् आश्रित्य प्रायः सर्वत्रैव दृश्यन्ते विवादाः। एवंरूपेण न तथा उन्नतिम् आप्नुवन्ति स्वजीवने मानवाः। इयं नास्माकं संस्कृतिः। वयं भारतीयाः तु प्राचीनकालादेव अस्मद्व्यतिरिक्तानां देशानां धर्मीयाणां वा आदर्शरूपेण

[1]शोधकर्ता, वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२, Email: dasavi82934rkmveri@gmail.com

[2] सहायकाध्यापकः, वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२, Email: shubhadip@gm.rkmvu.ac.in

[3] दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॥ इति।—(*साङ्ख्यकारिका*, १)

[4] णीञ् प्रापणे [भ्वादिः उभयपदी द्विकर्मकः अनिट् , कौमुदीधातुः ९०१]—(*अष्टाध्यायी*, ०१.१०४९)

[5] *अष्टाध्यायी*, ३.३.९४

[6] *अष्टाध्यायी*, ५.१.२२

[7] *अष्टाध्यायी*, २.३.५०

स्थिताः। परन्तु साम्प्रतिक्याः एतादृश्याः स्थितेः सत्यामपि केन प्रकारेण प्राचीनं गौरवम् अस्मासु पुनः प्रतिष्ठापयामः इत्यस्य चिन्तने प्रवृत्तौ च वयमशक्ताः। किं तादृशं किमपि नीतिमूलकम् अध्ययनम् अस्मभ्यं प्रदेयं येनाध्ययनेन सा प्राचीना संस्कृतिः पुनः प्रतिष्ठिता स्याद्, अस्माकं समृद्धिश्च स्यादित्येव संशयस्य विषयः, इयमेव च प्रकृतशोधस्य समस्या। संशयस्यास्यैव उत्तरं प्राकाश्यम् आनेतुं मया नीतिशतकम् आधारीकृत्य विवेचना प्रबन्धेऽत्र क्रियते।

**३. शोधप्रविधिः (Research Methodology)**— शोधसंशयमिदं निराकर्तुं प्रबन्धेऽस्मिन् एका प्रक्रिया स्वीकृता। प्रथमं जनार्दनशास्त्री पाण्डेयः इत्याख्येन सम्पादितम् अन्वय-पदार्थ-व्याख्या-भावार्थ-भाषार्थ-सहितं भर्तृहरेः नीतिशतकमिति पुस्तकं सम्पूर्णं अधीतवान्। ततः श्लोकेषु विद्यमानानां सूक्ष्मानाम् आवश्यकानाञ्च तथ्यानां सङ्ग्रहणम् अकरवम्। समाजे समस्यानां कारणानि ग्रन्थदिशा उपस्थाप्य सङ्गृहीतानि तानि तथ्यानि समाजे भूयमानानां समस्यानां निराकरणे कथं समर्थानि इति उपस्थापितवान्। ततश्च प्रकृतग्रन्थोक्तनीतीनां सुष्ठु पालनेन चरित्रनिर्माणं भवति तादृशेन च चरित्रेण कथं समाजस्य अभिवृद्धिः भवति इति प्रतिपादितवान्।

**४. समाजस्य साम्प्रतिकी स्थितिः**— व्यष्टिः समष्टिश्च प्रसिद्धं हि शब्दद्वयं जगत्यस्मिन्। शिष्टपरम्पराम् अनुसरन्तः वयं भारतीयाः सर्वेषाम् आदर्शस्वरूपाः। परन्तु अद्यत्वे तत्सर्वां परम्परां विस्मृत्य मिथः सङ्ग्रामे समाघाते अपकार्ये च रता वयम्। फलरूपेण लोके सर्वत्र वैक्लव्यहननादीनां विपाकानां व्याप्तिः वर्धमाना एव समस्यां जनयति। अस्याः समस्यायाः कारणं वयमेव। जनानाम् अविवेकः, विनयाभावः, सद्गुणेषु अनासक्तिः, स्वभावातिरिक्तम् आत्माभिमानमित्येतत् सर्वम् अस्मासु असुरसदृशम् आचरणम् उत्पादयत् समाजस्यैव हानिं करोति। तेन समाजस्य अभ्युदयः समृद्धिश्च बाधिता भवति।

**५. ग्रन्थदिशा कारणानामालोचनं समाधानञ्च**—

**५.१. अविवेकः विनयाभावश्च**—

**५.१.१.** अहमेव सर्वशास्त्रविज्ञाता सर्वकार्यविदिति भ्रमः सततम् अस्मान् भ्रामयति। कार्यकाले तु सामर्थ्यहीनाः वयमित्येव परिणतिः। तदेव नीतिशतके साधु भणितम् -

**"यदा किञ्चिज्ज्ञोऽहं द्विप[1] इव मदान्धः समभवं तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।**
**यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥"[2]** इति।

श्लोकस्यास्य भावार्थः गजो यथा मत्तो भूत्वा हानिं जनयति तद्वद् मन्दबुद्धिः सर्वज्ञोऽहमिति चिन्तयन् सदसतोः भेदम् अविगणय्य समाजस्य अनिष्टं सम्पादयति।

**५.२.२.** विवेकाभावकारणादसौ स्वाभिमानी पुरुषः सामर्थ्याभावेऽपि तत्तत्कार्यं कर्तुं यतते। यथा—

**"सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषास्तान्प्रत्येषविशेषविक्रमरुची राहुर्न वैरायते।**
**द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्करौ भ्रातः! पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः॥"[3]** इति।

अर्थात् शिरोहीनः दुर्बलः राहुः बृहस्पतीत्यादिदेवसत्त्वेऽपि सूर्यचन्द्रमसोरेव अरित्वेन उपतिष्ठतेऽन्ततः पराजितश्च भवति। एवमेव समाजेऽपि दुर्बलाः मन्दबुद्धयः केचन उत्तमैस्सह निरर्थकं वैरित्वम् इच्छन्ति। फलरूपेण स्वस्यैव समयहानिर्जायते।

**५.२.३.** परिस्थितिवशात् कदाचिद् जनाः असहायाः सन्तः अनुचितमाचरन्ति। तेन च स्वतः एव विपदाम् आह्वानं क्रियते। परिणतिरपि ग्रन्थेऽस्मिन् उक्तम् —

**"शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।**
**अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा विवेकभ्रष्टानां भवति विनिपातः शतमुखः॥"[4]** इति।

अस्य भावार्थः, जननी गङ्गा यथा स्वर्गात् पतिता सती शम्भोः शिरं प्राप्य हिमालयं स्पृष्ट्वा भूमिभागं प्राप्नोति, ततश्च समुद्रं प्राप्नोति

---

[1] 'गज इव' इति पाठभेदः।

[2] *नीतिशतकम्*, ८

[3] *नीतिशतकम्*, ३४

[4] *नीतिशतकम्*, १०

तथैव अविवेकिनां बहुधा अधोगमनं भवति।

**समाधानम्**— अविवेकविनयाभावयोः फलमेव एतादृशी स्थितिः। अस्याः दूरीकरणाय नीतिशतके पन्थानः उपदिष्टाः। तथाहि—

**"गुणवदगुणवद्वा कुर्वता कार्यजातं परिणतिरवधार्या यत्नतः पण्डितेन।**
**अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः॥"**[1] इति।

अर्थात् परिणतिं विचिन्त्य विवेकविनयाभ्यां सह कार्ये प्रवृत्तिः करणीया। अन्यथा अविवेकेन मदेन वा कार्यकरणे कष्टमेव अनुभवेत्। विवेकेन कार्यकरणे चरित्रे एको विशिष्टो गुणोऽपि समुत्पद्यते। स्वहृदि अनुसन्धानेन तादृशः गुणः ज्ञेयः। तथाहि नीतिशतके—

**"मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**
**परगुणपरमाणून्पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥"**[2] इति।

ग्रन्थानुसारं भावार्थस्य परिशीलनेन एवमर्थः आयाति यत् ये मनसा वचसा कायेन च उपकारं कुर्वन्तः परेषाम् अनुपरिमाणं गुणं पर्वतपरिमाणं मत्वा स्वजीवनं यापयन्ति ते सन्तः। सतां लक्षणं विनयः। तेनैव अद्भुतं सुन्दरं जीवनं यापयितुं शक्यते। समाजेऽपि एवंभुतानां विनयिनां विवेकिनाञ्च सदाचारेण विपाको दूरीभवति।

**५.२. विद्याग्रहणाभावः**— विद्या इत्युक्ते यथार्थविद्यायाः एव प्रसङ्गः अत्र आलोच्यः। विद्यासत्त्वे एव कर्तव्याकर्तव्यादिकं झटिति वाढं च स्फुरति। अन्यथा भुवि भारभुता एव भवेम। तद्यथा —

**"येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति॥"**[3] इति।

ये तावद् विद्यादिगुणरहिताः तेषां तु मृगत्वेन वर्णनमेव ज्ञापयति विद्यादीनां माहात्म्यम्। तेषामभावे सति शिष्टसम्मतम् आचरणं व्यवहारश्च भवितुं नार्हति। तेन च समाजे शिष्टव्यवहारस्य प्रादुर्भावो भवति। ततश्च सर्वत्र विवादाः आरभन्ते।

**समाधानम्**— विवादः विपत्तिर्वा नागच्छेत् तदर्थं यथासामर्थ्यं विद्याग्रहणं कर्तव्यम् । तदा ज्ञानेन बुद्धिः शुद्धा भवति। उक्तं हि—

**"हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदाप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम्। कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते॥"**[4] इति।

विद्यायाः धनरूपेण स्तुतिः अत्र क्रियते। विद्या तादृशं धनं यस्य प्रदानेन विद्यार्थिनाम् अभिवृद्धिः भवति। एतद्धनं चौरः स्वीकर्तुं न शक्नोति, सर्वदैव एतत् सुखं प्रददाति निरन्तरं तिष्ठति च। तात्पर्यं तावद् विद्यादयो गुणा अवश्यं मानवे स्युः। अन्यथा उच्यते हि —

**"विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं विद्या राजसु पूज्यते न हि धनं विद्या विहीनः पशुः॥"**[5] इति।

मनुष्यस्य रूपं, गुप्तं धनं, सुखदायिनी, गुरुः, बन्धुः इत्येतानि विद्यायाः अन्वर्थानि नामानि। एवंभूता विद्या अस्मासु भवतु यतो हि किञ्चिद् वैलक्षण्येन भवितव्यं येन पश्वादिभ्यः अस्माकं व्यावृत्तिः स्यात् । एतादृशानां गुणानां सत्त्वे एव शिष्टः व्यवहारः यथावत् परिपाल्यते चरित्रनिर्माणञ्च साधु भवति।

**५.३. दुर्जनसंसर्गः**—

**५.३.१.** संसर्गः स्वाभाविकः नियतः प्रवाहमानश्च। परन्तु सः संसर्गः कीदृशः इत्यत्र ध्यानेन भाव्यम्। सम्प्रति समाजेऽस्मिन् दृश्यन्ते बहवः कुमार्गगामिनः। तेषां संसर्गं प्राप्य अन्येऽपि कुमार्गम् अनुसरन्तः स्वचरितस्य समाजस्य च क्षतिं जनयन्ति। उक्तं हि भर्तृहरिणा—

---

[1] *नीतिशतकम्*, ९९
[2] *नीतिशतकम्*, ७९
[3] *नीतिशतकम्*, १३
[4] *नीतिशतकम्*, १६
[5] *नीतिशतकम्*, २०

'मणिना भूषितोऽपि सर्पः यथा भीष्म दारुणो वा तद्वदेव दुर्जनोऽपि भयङ्करः। तथाहि—**'मणिना भूषितः सर्पः किमसौ न भयङ्करः"**[1] अर्थादवश्यमेव भयङ्करः इति।

**५.३.२.** करुणाभावः, कारणाभावेऽपि विरोधः, परेषां द्रव्ये अभिलाषः, परयोषिति स्पृहा, बन्धुषु अतितिक्षेत्यादिगुणोपेताः दुर्जनाः। एतेषां संसर्गे जनैस्सह कोलाहलः विशृङ्खला चोद्भवति। तथाहि नीतिशतकम् —

**"अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा।**
**स्वजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम्॥"**[2] इति।

एवंविधाचरणेन चरित्रस्य नीचता साक्षात् प्रतीयते। समाजे द्वन्द्वम्, मित्रतायाः अभावो वर्धते।

**५.३.३.** नीचाश्रयः समाजे कष्टमेव जनयति। यथा—

**"उद्भासिताऽखिलखलस्य विशृङ्खलस्य प्राग्जातविस्तृत[3]निजाधमकर्मवृत्तेः।**
**दैवादवाप्तविभवस्य गुणद्विषोऽस्य नीचस्य गोचरगतैः सुखमास्यते[4] कैः॥"**[5] इति।

अत्र श्लोके उच्यते ये तावत् स्वदुष्कर्मणा कार्यं कुर्वतां खलानां स्वामिनाम् अधीनस्थाः ते न कदापि सुखमनुभवन्ति। एवंभूतानां दुर्जनसंसर्गेण समाजे विशृङ्खला, सर्वक्षेत्रेषु अपकर्माणि वर्धन्ते।

**समाधानम् —** अस्याः समस्यायाः समाधानरूपेण आचार्यैः सत्सङ्गतिरुपदिष्टा। तथाहि —

**"जाड्यं धियो हरति सिञ्चति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्संगतिः कथय किं न करोति पुंसाम्॥"**[6] इति।

सताम् आश्रये स्थित्वा जनः निसर्गत एव कुशलो भूत्वा विविच्य साधु कर्म कुरुते। सत्सङ्गत्या जनानां जडता अपगच्छति, ऋतं वचनं स्फुरति, मानं वर्धते, पापमपगच्छति, मनः प्रफुल्लं तिष्ठति, यशश्च वर्धते। तथाभूतो मनुष्यः अवश्यमेव समाजस्य रत्नमिवेत्यत्र संशयो नास्ति।

**५.४. न्याय्याद् विचलनम्—** न्यायोपेतं कार्यम् नः परममिष्टम्। परन्तु दौर्भाग्यात् ततो विपरीतं प्रवृत्तिर्दृश्यते नराणाम्। परिणामस्वरूपेण समाजे विपाक एव वर्धते। सम्प्रति सर्वे उन्नतेः सरलं पन्थानम् अन्विषन्तः कुमार्गे पतन्ति। राजनैतिकस्तरेऽपि तथा व्यवस्था स्याद् यया प्रजानाम् अर्थात् साधारणानां जनानां हानिर्न स्यात्। हरिः वदति खलु—

**"राजन्! दुधुक्षसि यदि क्षितिधेनुमेतां तेनाद्य वत्समिव लोकममुं पुषाण।**
**तस्मिंश्च सम्यगनिशं परिपोष्यमाणे नानाफलैः फलति कल्पलतेव भूमिः॥"**[7] इति।

तात्पर्यं तावद् हे राजन्, त्वं पृथिव्यां सुष्ठु प्रजापालनेनैव त्वं गोसदृश्याः भूम्याः सुफलं कृष्यादिरूपं प्राप्स्यसि नान्यथा। अयं श्लोकः स्वधर्मे अविचलितः सन् अस्माभिः कार्येषु प्रवर्तनीयः इति शिक्षयति।

धीराः कदापि न्याय्यात् न विचलन्ति इत्यत्रापि प्रमाणम्—

**"निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा न्यायात्पथः प्रविचलन्ति पदं न धीराः॥"**[8] इति।

---

[1] दुर्जनः परिहर्त्तव्यो विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥—(*नीतिशतकम्*, ५३)

[2] *नीतिशतकम्*, ५२

[3] 'प्रोद्गाढविस्मृत' इत्यपि पाठभेदो लभ्यते।

[4] 'सुखमाप्यते' इति पाठभेदः।

[5] *नीतिशतकम्*, ५९

[6] *नीतिशतकम्*, २३

[7] *नीतिशतकम्*, ४६

[8] *नीतिशतकम्*, ८४

ये तावत् कुशलाः मनस्विनः ते निन्दायां, लक्ष्म्याः अप्राप्तौ, मरणे वा सर्वदैव सत्यमार्गे तिष्ठन्ति। न्याय्याभावे सति सर्वेषु कुमार्गे प्रवृत्तिर्जायते ततश्च परिणामरूपेण सर्वे मिथः प्रतारिताः भवन्ति।

**समाधानम्**— अस्याः समाधानरूपेण वयं तथा भवेम येन अस्माकं सकाशात् सर्वेषामभिवृद्धिः मङ्गलञ्च स्यान्न तु क्षयः । तथाहि—

**"किं तेन हेमगिरिणा रजताद्रिणा वा यत्राश्रिताश्च तरवस्तरवस्त एव।**

**मन्यामहे मलयमेव यदाश्रयेण कङ्कोलनिम्बकुटजा अपि चन्दनाः स्युः॥"**[1] इति।

सुमेरुपर्वते कैलासपर्वते वा तरवः तथैव साधारणा भवन्ति। मलयपर्वते तु तत्प्रकृतिवशादेव निम्बादिवृक्षाणां चन्दनसदृशं सुगन्धत्वं सम्पद्यते। एवमेव मानवेषु तथा चरित्रं व्यवहारश्च स्याद् येन सम्बद्धानाम् अन्येषां साधुत्वं भवेत्।

पुनश्च न्याय्ये मार्गे अस्माकं प्रवर्तना स्यात्। प्राणाघाते निवृत्तिः, चौरकार्ये निवृत्तिः, सत्यभाषणं, सामर्थ्यानुसारं दानं, युवतिजनानां विषये मौनतावलम्बनं, लोभाभावः, ज्येष्ठेषु गुरुषु च विनयः, जनेषु दयेत्यादिविषयाः न्याय्याः पन्थान इति ज्ञात्वा प्रवर्तना स्यात्। तदेव कथयति भर्तृहरिः—

**"प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम्। तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्था॥"**[2] इति।

एतेषु प्रवृत्त्या समाजे स्वतः अपकर्मणाम् आधिक्यं न्यूनं कर्तुं शक्यम्।

**५.५. मैत्र्यभावः**— सम्प्रति जनेषु मैत्र्यभावः सुप्रसिद्धा समस्या। अस्याः कारणस्वरूपं गुणसत्त्वेऽपि परदोषाविष्करणम्[3], अपरिमिता वाक्, उग्रता[4], अहितस्य सम्पादनमित्येते विषयाः मित्रतायां बाधकरूपेण स्थिता भवन्ति।

**समाधानम्**— मिथः हितसम्पादनं, सहसा साहाय्ये सति तदनुकूलाचरणमित्यादिरेव मित्रतायाः बीजम्। मित्रता जलदुग्धवत् स्यात्। दुग्धे जलमिश्रिते सति जलं दुग्धप्रकृतिं स्वीकरोति। एवञ्च वह्नौ दुग्धस्य अधिश्रयणे सति पूर्वकृतोपकारं स्मृत्वा दुग्धं रक्षितुं जलं शुष्यति। ततश्च दुग्धमपि जलं रक्षितुं पतितुम् आरभते। एतादृशी एव मित्रता जनेष्वपि स्यात्। तथाहि —

**"क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः।**

**गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी॥"**[5] इति।

एवं शोभनया उपमया मित्रता सुष्ठु प्रतिपादिता ग्रन्थकारेण। इयं च मित्रता मैत्री वा सज्जनैरेव कर्तव्या। उक्तं हि नीतिशतके—

**"आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।**

**दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥"**[6] इति।

श्लोकस्यास्य तात्पर्यं तावद् आलोकस्य छाया दिनस्य पूर्वार्धे आदौ दीर्घा परञ्च लघ्वी भवति , परन्तु उत्तरार्धे आदौ लघ्वी परञ्च दीर्घा भवति। एवमेव खलानां मित्रता आदौ प्रबला, अन्ते च क्षीयते। सज्जनानां मित्रता तु आदौ स्वल्पा भवति ततश्च सम्यक् परिज्ञाते सति निरन्तरं वर्धते एव । तस्मादस्माभिः सज्जनैस्सह एव मैत्री सम्पादनीया। तदा एव क्लेशानाम् उद्भव एव न स्यात्।

**५.६. आत्मानवलोकनम्**— विविधगुणसत्त्वेऽपि आत्मनि अवलोकनाभावे दूष्परिणामः एव । अध्ययनात् परं यथा ज्ञानस्थितेः परीक्षणार्थं नियमानुसारं परीक्षा क्रियते, तथैव आत्मन्यपि परीक्षणं कर्तव्यम्। अन्यथा प्रतिनियतं जनाः गर्वसहिताः पुरतः गम्यमानाः आत्मनि अवलोकनाभावे परीक्षणाभावे कर्तव्याकर्तव्यादिविषये सन्दिहानाः सन्तः पुनः विपरीतं कुर्युः । एतादृशा ये परीक्षणं न कुर्वन्ति

---

[1] *नीतिशतकम्*, ८०

[2] *नीतिशतकम्*, २६

[3] जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि।
तेजस्विन्यवलिप्तता मुखरिता वक्तर्यशक्तिः स्थिरे तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः॥—(*नीतिशतकम्*, ५४)

[4] न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम्।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः॥—(*नीतिशतकम्*, ५७)

[5] नीतिशतकम्, ७६

[6] नीतिशतकम्, ६०

ते तु स्वेच्छया गर्वेण वा तथा आचरन्ति। परन्तु इयं मौर्ख्यवृत्तिः। अस्माच्च समाजस्य स्वचरित्रस्य च अधोगमनमेव। उच्यते च सुभाषितेषु 'प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः। किन्नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥'

**समाधानम्**— प्रत्यहम् आत्मावलोकनेन स्वजीवनमार्गपरीक्षणेन च कार्ये प्रवृत्तिः करणीया। तथाहि नीतिशतके —

**"परिवर्तिनि संसारे मृत: को वा न जायते। स जातो येन जातेन याति वंश: समुन्नतिम् ॥"**[1] इति।

सद्गुणसहितेन आत्मावलोकनेनैव वंशः समुन्नतिं प्राप्नोति । तस्मात् तथा अवलोकनं विधेयम्।

**५.७. सद्गुणे अनादरः**— केचन मन्दबुद्धयः असकृदुच्यमानेऽपि सद्गुणप्रकाशे लाभो नास्ति इति विचिन्त्य असद्गुणेषु आकृष्टा भूत्वा पापमाचरन्ति। तेन स्वस्य समाजस्य च क्लेशः उत्पद्यते। उच्यते हि—

**"लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकै: सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।**
**सौजन्यं यदि किं गुणै: सुमहिमा यद्यस्ति किं मण्डनै: सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना॥"**[2] इति।

श्लोकस्यास्य भावार्थस्तावत् लोभः चेत् दोषो नापेक्ष्यते, खलता चेत् कुकर्म नापेक्ष्यते। एतद्वयमेव दोषकुकर्मणोः प्रेरकम्। अतः सत्यादीनां सद्गुणानाम् आश्रयः स्वीकरणीयः अन्यथा विपत्तिरेव।

**समाधानम्**— क्लेशस्यास्य निराकरणत्वेन कतिपयश्लोकैः हरिणा उक्तम् —

**"वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम्।**
**भक्ति: शूलिनि शक्तिरात्मदमने संसर्गमुक्ति: खले येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नम:॥**
**विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रम:।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्॥**
**प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधि: प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृते:।**
**अनुत्सेको लक्ष्म्यां निरभिभवसारा: परकथा: सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥**
**करे श्लाघ्यस्त्याग: शिरसि गुरुपादप्रणयिता मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम्।**
**हृदि स्वच्छा वृत्ति: श्रुतमधिगतं च श्रवणयोर्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्॥"** इति।

[नीतिशतकम्, श्लोकः ६२-६५]

एतेषां चतुर्णां श्लोकानां भावार्थः सम्प्रति उपस्थाप्यते। तथाहि महतां साधुजनानां वा के गुणाः कथं च तेषां यशांसि सम्भवन्ति इति श्लोकचतुष्टये सम्यक् प्रतिभाति। आत्मनियन्त्रणं, सत्सङ्गतौ आसक्तिः, गुरौ नम्रता, विद्यायाम् आसक्तिः, खलानामुपेक्षेत्यादि यशस्विनां लक्षणम्। ये अभ्युदयेऽपि शान्ताः, आपदि धीराः, परिषदि सुमधुरवाचकाः, शास्त्रेषु सदा स्थिता ते यशसः अधिकारिणः। अतिथिसत्कारः, परोपकारः, यशसि अभिरुचिः , परप्रशंसेत्यादिषु च कुशलाः ते समाजस्य रत्नस्वरूपाः। अतः अस्माभिरपि तथा तादृशाः सद्गुणाः अर्जनीयाः। एतेषां गुणानां सत्त्वे एव समाजे मानवाः सुपुरुषाः तेषां समन्वये च समष्टिरूपः समाजः अभ्युदयं प्राप्नोति।

**५.७. भगवति अविश्वासः**— सत्कर्मणि सदाचारे कुशलोऽपि भगवति श्रद्धायाः अभावः विश्वासाभावश्च इष्टं न प्रापयति। यतो हि एवंविधाचरणेन भगवान् कुपितः भवति। सम्प्रति वैदेशिकम् आचरणम् अनुसरन्तः जनाः पाश्चात्यदर्शनोत्सुकाः स्वधर्मम् आदर्शञ्च विस्मरन्ति। परिणामस्वरूपेण इष्टं फलं न लभ्यते। तदा ते उन्मादाः सन्तः यत् किमपि आचरन्तोऽन्येषां क्लेशं जनयन्ति।

**समाधानम्**— भगवतः आराधना तस्मिन् विश्वासश्च सर्वमिष्टं प्रापयति। तथाहि —

**"सूनु: सच्चरित: सती प्रियतमा स्वामी प्रसादोन्मुख: स्निग्धं मित्रमवञ्चक: परिजनो निष्क्लेशलेशं मन: ।**
**आकारो रुचिर: स्थिरश्च विभवो विद्यावदातं मुखं तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना॥"**[3] इति।

हरौ तुष्टे अर्थादुपलक्षणेन भगवत एव सन्तोषः ग्रन्थकर्तुराशयः। अस्यार्थस्तावद् जगतः त्राणकर्तरि भगवति सन्तुष्टे सति एव पतिव्रता

[1] नीतिशतकम्, ३२
[2] नीतिशतकम्, ५५
[3] नीतिशतकम्, २५

पत्नी, चरित्रवान् पुत्रः, स्नेहोपेतं मित्रम्, अवञ्चकः परिजनः, सुन्दरं रूपम्, सम्पत्तिः, विद्यया आह्लादितं मुखञ्चेत्यादीनि प्राप्यन्ते।

**५.८. व्यसने अनुरागः—** धनागमे सति व्यसनं कर्तव्यम् इति विचारः सदा भ्रामयति। ततश्च समयहानिः द्रव्याणां धनानां च दुर्व्यवहारः सम्पद्यते। दुर्बलेषु जुगुप्सां दर्शयन् अग्रगतिम् इच्छन्ति धनशालिनः। इदं शिष्टेभ्यो विपरीतम् आचरणम्। स्थितिः या कापि भवतु सदा स्वमूलभूता प्रकृतिः न विस्मर्तव्या। तथाहि उच्यते —

**"यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम्।**
**तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥"**[1] इति।

विधिना यल्लिखितं ललाटे तदेव प्राप्यते अतः अधिकव्यसनार्थम् इतोऽपि धनागमः स्यादिति लोभः कृपणवृत्तित्वेन गण्यते। तेन धनामत्तः असत्कार्ये रतो भवति।

**समाधानम्**— अस्या समाधानत्वेन नीतिशतके उक्तम्—**"हे साधो ! व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः॥"**[2] इति। अर्थात् तेषु गुणेषु न मतिः देया येन व्यसनं स्यात्। यतोहि सर्वं नश्वरमस्मिन् जगति। अतः सत्कर्मणैव सर्वमर्जनीयम्।

**५.९. धैर्याभावः—** कार्यकरणे आलस्यं धैर्याभावश्च आधुनिके समाजे फलाप्राप्तौ प्रधाने कारणे। शरीरस्थो महान् रिपुः आलस्यम्[3] इति च प्रसिद्धिः। अपि च धैर्यं संस्थाप्य उद्यमसहितं कार्यं न सम्प्रति दृश्यते लोके। तेन च सरलमार्गे सर्वेषां प्रवृत्त्या कार्ये विलम्बः, समयहानिः, मिथः विवादश्च भवन्ति।

**समाधानम्**— काले फलति सौभाग्यम् इति लोकश्रुतिः। तस्मादस्माभिः धीराः भवनीयाः। उक्तं हि हरिणा—

**"कान्ताकटाक्षविशिखा न लुनन्ति यस्य चित्तं न निर्दहति कोपकृशानुतापः।**
**कर्षन्ति भूरिविषयाश्च न लोभपाशैर्लोकत्रयं जयति कृत्स्नमिदं स धीरः॥"**[4] इति।

यः कोपेन विचलितः न भवति, कान्तायाः कटाक्षः यं छेत्तुं नार्हति, विषयाणां लोभैश्च यो बद्धो न भवति स एव धीरः जगति सुफलम् आप्नोतीति श्लोकस्यास्य तात्पर्यम्।

**६. शोधनिष्कर्षः—** ननु कस्मिन्नपि एतादृशानां गुणानां समवायः कलांशो वा तथा भवितुमर्हति वेति चेत् आदर्शभूता विवेकानन्दस्वामिचरणा आसन् एतैः सद्गुणैः परिपूर्णाः। तेषां जीवनम् आदर्शश्च सततम् अस्मान् स्मारयति यत् सन्मार्गे स्थित्वा जीवनयापनेनैव समाजस्यास्य अभिभवः शक्यः। साधु हि भणितम् ग्रन्थकर्त्रा— **"एकेनापि हि शूरेण पादाक्रान्तं महीतलम्। क्रियते भास्करेणेव स्फारस्फुरिततेजसा॥"**[5] इति। अर्थाद् एकेन सूर्येण यथा समग्रं जगत् प्रकाश्यते, तद्वदेव कश्चिद् धीरः जगदिदं स्वायत्तं कर्तुं शक्नोति। तथाभूताः इमे विवेकानन्दस्वामिपादाः स्वतेजसा सूर्यवद् जगदिदं प्रकाशितवन्तः। दुःखमोचनोपायान् उक्त्वा ते अस्मान् संस्कृतेः स्मरणं कारितवन्तः। एवं स्वजीवने प्रकृतग्रन्थस्यापि नीतीनां कतिपयांशस्य परिपालनेनापि साधु चरित्रं भविष्यत्येव। अपि च प्रतिजनम् इदमाचरणम् अवश्यमकेम् आदर्शभूतं समाजं कर्तुं प्रभवतीत्यत्र नास्ति सन्देहः इति मम विचारः।

**७. उपसंहारः (Conclusion)—** साक्षादुपदेशापेक्षया लौकिकजीवनस्यैव उपमया सरलेन व्यपदेशः कार्याय भवतीति ग्रन्थस्यास्य पठनेन सम्यक् परिज्ञायते। ग्रन्थमिममाश्रित्य जनानां तत्कालिकस्थितेरपि विश्लेषणं शोधरूपेण उपस्थापयितुं शक्यते।

शोधस्यास्य पठनेन क्षयशीलेऽस्मिन् जगति सदाचार एव पुण्यदायको नान्यः इत्यपि अवश्यं बुद्धौ समारूढो भविष्यतीति शम्।

---

[1] नीतिशतकम्, ५०

[2] या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात्। तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं हे साधो ! व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा माकृथाः॥ (नीतिशतकम्, ९८)

[3] आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।—(नीतिशतकम्, ८६)

[4] नीतिशतकम्, १०६

[5] नीतिशतकम्, १०७

## सहायकग्रन्थसूची

१. भर्तृहरिः; *नीतिशतकम् (अन्वय-पदार्थ-व्याख्या-भावार्थ-भाषार्थ-सहितम्)*; जनार्दनशास्त्री पाण्डेयः (सम्पादकः); तृतीयं संस्करणम्; मोतीलाल बनारसीदास; वाराणसी; २०१८

२. भर्तृहरिः; *नीतिशतकम्;* डा. शिवबालक द्विवेदी (सम्पादकः व्याख्याकारश्च); चौखम्भा पब्लिशर्स; वारीणसी; २०२२

३. भर्तृहरिः; *भर्तृहरि-शतकत्रयम्*; दामोदर धर्मानन्द कोसंबी (सम्पादकः); मुंशीराम मनोहरलाल पब्लिशर्स प्रा. लि.; देहली; २००२

४. ईश्वरकृष्णः; *साङ्ख्यकारिका (गौडपादभाष्यसमन्विता अभिनवराजलक्ष्मी संस्कृत-हिन्दीव्याख्योपेता)*; प्रथमं संस्करणम्; चौखम्बा सुरभारती प्रकाशन; वाराणसी; २००९

५. पाणिनिः, महर्षिः; *अष्टाध्यायी* (पदच्छेद-वृत्ति-वार्तिक-टिप्पणी-सहिता); प्रो. गोपालदत्तपाण्डेयः (सम्पादकः); चौखम्बा सुरभारती ग्रन्थमाला -१९; चौखम्बा सुरभारती प्रकाशन; वाराणसी; २०१५

६. पाणिनिः, महर्षिः; *अष्टाध्यायी (प्रथमो भागः); चौखम्बा सुरभारती प्रकाशन; वाराणसी; २००६*

७. पाणिनिः, महर्षिः; *अष्टाध्यायी (दीक्षितपुष्पाकृतप्रकरणनिर्देशसमन्वितः); संस्कृतभारती; नवदेहली; २०१०*

८. कृष्णाचार्य, टि. आर्; *बृहद्धातुरूपावली*; नागराजभट्टः (सम्पादकः); श्रीशङ्कर अद्वैतशोधकेन्द्रम्; शृङ्गेरी; २०११

# व्युत्पत्तिवादस्य अवतरणपङ्क्तेः विमर्शः

नारायण-चन्द्रः मेट्याः[1], डा. नीरज-कुमार-भार्गवः[2]

**शोधसारः**— प्रकारतावादिनः मीमांसकाः एकपदार्थस्य अपरपदार्थे कथमन्वयो भवतीति विषये मतमुपस्थापितवन्तः। तन्मतं नाङ्गीकुर्वन्तो नैयायिकाः अन्यत् मतं प्रतिष्ठापयितुं यतन्ते। तदेव नैयायिकमतम् उपस्थापयितुं व्युत्पत्तिवादनामको ग्रन्थो लिखितः श्रीमता गदाधरभट्टाचार्येण। श्रीमद्गदाधरभट्टाचार्यः कथं सङ्गतिं कृतवान् उक्ते प्रसङ्गे इत्येव प्रकृतप्रबन्धे लिख्यते।

**कूटशब्दाः**— व्युत्पत्तिवादः (*vyutpattivādaḥ*), शाब्दबोधः *(śābdabodhaḥ)*, संसर्गः *(saṃsargaḥ)*, प्रतियोगित्वम् *(pratiyogitvam)*, अनुयोगित्वम् (*anuyogitvam*), अन्वयः *(anvayaḥ)*, व्यापारः *(vyāpāraḥ)*, फलम् *(phalam)*।

**१. भूमिका**— प्रकारतावादिनां मीमांसकानां मतं खण्डनाय गदाधरभट्टाचार्येण व्युत्पत्तिवादनामकः ग्रन्थः लिखितः। तत्रत्या प्रथमा पङ्क्तिर्भवति—"शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते"[3] इति। अस्याः पङ्क्तेरर्थः विविधैः टीकाकृद्भिः विविधप्रकारेण प्रतिपादितः अस्ति। इयं प्रथमा पङ्क्तिरतीव क्लिष्टा गम्भीरा चास्ति। अतः अस्याः पङ्क्तेः प्रामाणिको बोधो यथा स्यात् तदर्थम् अस्मिन् प्रबन्धे इयं पङ्क्तिः मया विमृश्यते।

**२. शोधसमस्या**— प्रथमायां पङ्क्तौ षष्ठ्यर्थः प्रतियोगित्वम्, सप्तम्यर्थश्च अनुयोगित्वम् अस्ति। एवं ये पदार्थाः सन्ति तेषां कुत्र अन्वयः, एकपदार्थस्य अपरपदार्थे अन्वयः कथमस्ति इति निर्धारणम् अपेक्षितम् अस्ति। एवं परस्परं समुपस्थितानां पदार्थानां कथम् अन्वयः अस्ति इति महती समस्या वर्तते बोधविषये। अतः तस्याः समस्यायाः निराकरणम् अस्मिन् प्रबन्धे क्रियते।

**३. शोधपद्धतिः**— एवं संशये प्रकृतप्रबन्धे मया काचित् प्रक्रिया अवलम्बिता। तत्र प्रथमं समूलः व्युत्पत्तिवादनामको ग्रन्थः अधीतः। ततः प्रसिद्धाः केचन टीकाग्रन्थाः अधीताः। ततः तेषु टीकाग्रन्थेषु परस्परं वैमत्यं किम् इति दृष्टम्। ततो गुरुभिरुपदिष्टं मतं प्रकृते प्रबन्धे विमृष्टं मया।

**४. मूलशोधः**— शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति भवति ग्रन्थमूलम्। अत्रादौ प्रश्नः समुदेति— गदाधरभट्टाचार्येण अस्य शास्त्रस्य प्रणयनं किमर्थं कृतम् इति। तदधः आलोच्यते—

नैयायिकैः शाब्दबोधप्रक्रियायामुच्यते—

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥"[4] इति।

तेन शाब्दबोधं प्रति पदज्ञानं करणमस्ति, पदजन्यपदार्थस्मरणं व्यापारः अस्ति, शाब्दबोधः फलमस्ति, शक्तिज्ञानञ्च सहकारिकारणमस्ति। एवं चेत् घटपदात् यथा घटविषयको बोधो भवति तथैव आकाशविषयकस्य बोधस्यापि आपत्तिर्भवति। यतो हि नियमो वर्तते—"एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयति"[5] इति। अर्थात् घटशब्दस्य यथा घटरूपः अर्थः सम्बन्धी अस्ति तथैव आकाशोऽपि सम्बन्धी अस्ति। अतः घटपदज्ञाने सति यथा घटार्थस्य स्मरणं भवति तथैव आकाशार्थस्यापि स्मरणं भवति। ततश्च घटपदेन आकाशविषयकस्य बोधस्य आपत्तिरस्ति। घटपदेन आकाशविषयको बोधो नेष्टः। अतः परिष्कारः उच्यते— तत्पदजन्यतद्विषयकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतद्विषयकोपस्थितिः कारणम् इति। एवं नैयायिकैः कार्यकारणभावः

---

[1] शोधकर्ता, वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२, Email: narayanchandrametya@gmail.com

[2] सहायकाध्यापकः, वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२, Email: neerajbhu85@gmail.com

[3] व्युत्पत्तिवादः, आदर्शटीका; पत्रसंख्या-१

[4] *न्यायप्रवेशिका*, पत्रसंख्या ८१

[5] *न्यायसिद्धान्तमुक्तावली*, किरणावली; पत्रसंख्या-२९३

स्वीक्रियते। एवञ्च घटपदनिष्ठवृत्तिज्ञानेन आकाशस्य उपस्थितिर्न भवति। तस्मात् घटपदात् आकाशविषयकबोधस्य आपत्तिर्नास्ति। किन्तु एवं सति नीलो घटः इत्यादौ नीलाभिन्नो घटः अथवा अभेदसम्बन्धेन नीलविशिष्टो घटः इत्याकारको बोधो भवति। अस्मिन् बोधे नीलस्य प्रतीतिरस्ति, घटस्य प्रतीतिरस्ति किञ्च अभेदस्यापि प्रतीतिरस्ति। किन्तु अभेदस्य प्रतीतिः कस्यापि पदस्य वृत्तिज्ञानेन नास्ति। नीलपदनिष्ठवृत्तिज्ञानेन अभेदस्य उपस्थितिर्न भवति, घटपदनिष्ठवृत्तिज्ञानेनापि अभेदस्य उपस्थितिर्न भवति। यतो हि तत्र नीलपदस्यापि शक्तिर्नास्ति, घटपदस्यापि शक्तिर्नास्ति। ततश्च वृत्तिज्ञानेन अनुपस्थितस्यापि अभेदस्य शाब्दबोधे भानं भवति इति व्यभिचारः समायाति। तदर्थं मीमांसकाः सम्बन्धेषु अपि तत्तत्पदानां वृत्तिं स्वीकुर्वन्ति। किन्तु नैयायिकैः तथा नाङ्गीक्रियते। ततश्च नैयायिकानां मते व्यभिचारः यथावत् अस्ति। तदर्थं नैयायिकैः उक्तम्—यथा घटपदेन घटत्वप्रकारकस्य घटविशेषकस्य बोधस्य उपपत्तिः तथैव वैपरीत्यं कुतो न? अर्थात् घटप्रकारकस्य घटत्वविशेषकस्य बोधः कुतो न इति। घटपदात् घटत्वप्रकारको घटविशेष्यको बोधो भवति। किन्तु कस्यापि जनस्य घटप्रकारको घटत्वविशेष्यको बोधो न भवति। एवं कुतो न? यतो हि घटत्वस्यापि उपस्थितिरस्ति घटस्यापि उपस्थितिरस्ति। अतो विशेष्यविशेषणभावे कदाचित् वैपरीत्यं स्यात्। किन्तु तथा कुतो न भवति? एवं घटपदेन कदापि घटप्रकारकः घटत्वविशेष्यकः बोधो न स्यात्। तदर्थं नैयायिकैः पुनः कार्यकारणभावे परिष्कारः क्रियते—तत्पदजन्यतत्प्रकारकतद्विशेष्यकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीन- तत्प्रकारकतद्विशेष्यकोपस्थितिः कारणम्। एवञ्च येन पदेन यत्प्रकारकयद्विशेष्यकोपस्थितिर्भवति तत्र तत्प्रकारकः तद्विशेष्यकः एव बोधो भवति अन्यप्रकारकः अन्यविशेष्यको बोधो न भवति। घटपदेन घटत्वप्रकारकघटविशेष्यकोपस्थितिर्भवति। अतः घटत्वप्रकारको घटविशेष्यक एव बोधो भवति। किन्तु यदि कस्यचित् शक्तिज्ञाने भ्रमः सञ्जातः चेत् घटपदं घटविशिष्टे घटत्वे शक्तम् इत्याकारकं तर्हि तस्य पुरुषस्य तु घटपदात् घटप्रकारको घटत्वविशेष्यको बोधो भवत्येव तच्च इष्टमेव। एवं च सति नोलो घटः इत्यत्र प्रतीयमानो यः अभेदः अस्ति सः प्रकारोऽपि नास्ति विशेष्योऽपि नास्ति किन्तु संसर्गः अस्ति। वृत्तिज्ञानाधीनपदजन्यपदार्थोपस्थितिः प्रकारविषयकबोधं प्रति विशेष्यविषयकबोधं प्रति च कारणमस्ति। किन्तु संसर्गविषयकबोधं प्रति कारणं नास्ति। अतः वृत्त्या अनुपस्थितस्यापि संसर्गस्य शाब्दबोधे भानं भवति चेत् व्यभिचारो नास्ति। प्रकारकरूपस्य अर्थस्य वृत्त्या अनुपस्थितस्य शाब्दबोधे भानं भवितुं नार्हति, विशेष्यकरूपस्य अर्थस्य वृत्त्या अनुपस्थितस्य शाब्दबोधे भानं भवितुं नार्हति। किन्तु संसर्गस्य भाने क्लेशो नास्ति। पुनः प्रश्नः समुदेति—नीलो घटः इत्यत्र अभेदस्यैव संसर्गस्य भानं कुतः, भेदस्य भानं कुतो न इति। राज्ञः पुरुषः इत्यत्र भेदस्यैव संसर्गस्य भानं कुतः, अभेदस्य भानं कुतो न इति। अतः शाब्दबोधे प्रतीयमानानां संसर्गाणां भाननियामिका या सामग्री अस्ति तां प्रतिपादयितुं गदाधरभट्टाचार्येण व्युत्पत्तिवादस्य प्रणयनं कृतम्। तत्र अर्थात् व्युत्पत्तिवादे प्रथमा पङ्क्तिः—"शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते"[1] इति। अत्र एकपदार्थे इति सप्तम्यन्तं पदम्। सप्तम्याः अनुयोगित्वम् अर्थः। तत्र प्रकृत्यर्थस्य एकपदार्थस्य निष्ठत्वसम्बन्धेन अन्वयः। ततश्च एकपदार्थे इत्यस्य अर्थो भवति—एकपदार्थनिष्ठानुयोगित्वम् अथवा एकपदार्थनिष्ठानुयोगिता। अनुयोगितायाश्च प्रथमार्थे संसर्गे निरूपकत्वसम्बन्धेन अन्वयो भवति। ततश्च एकपदार्थनिष्ठानुयोगितानिरूपकः इति। अपरपदार्थस्य इति षष्ठ्यन्तं पदम्। अपरपदार्थस्य इत्यत्र या षष्ठी अस्ति तस्याः प्रतियोगित्वम् अर्थः। तत्र च प्रकृत्यर्थस्य अपरपदार्थस्य निष्ठत्वसम्बन्धेन अन्वयो भवति। तेन अपरपदार्थस्य इत्यस्य अर्थो भवति— अपरपदार्थनिष्ठप्रतियोगिता। प्रतियोगितायाश्च निरूपकत्वसम्बन्धेन प्रथमान्तार्थे संसर्गे अन्वयो भवति। तेन अपरपदार्थनिष्ठप्रतियोगितानिरूपकः इत्यर्थः समायाति। शाब्दबोधे इत्यस्य अर्थो भवति— शाब्दबोधनिरूपितत्वम्। निरूपितत्वस्य च भास्-धात्वर्थविषयतायां स्वरूपसम्बन्धेन अन्वयो भवति। ततः पदम् अस्ति— संसर्गमर्यादया इति। संसर्गमर्यादया इत्यस्यार्थो हि आकाङ्क्षया। अस्य तृतीयान्तपदस्य च आकाङ्क्षाप्रयोज्यत्वम् अर्थः। प्रयोज्यत्वस्यापि भास्धात्वर्थविषयतायां स्वरूपसम्बन्धेन अन्वयः। तेन आकाङ्क्षाप्रयोज्यविषयता। विषयतायाश्च आश्रयतासम्बन्धेन प्रथमान्तार्थे संसर्गे अन्वयो भवति। ततश्च अस्याः पङ्क्तेः अर्थो भवति—एकपदार्थनिष्ठानुयोगितानिरूपकः अपरपदार्थनिष्ठप्रतियोगितानिरूपको यः संसर्गः स शाब्दबोधनिरूपिता आकाङ्क्षाप्रयोज्या च या विषयता अस्ति तद्वान् भवति। अनुयोगिता इत्यस्य अर्थः विशेष्यतापि भवति,

[1] *व्युत्पत्तिवादः*, आदर्शटीका; पत्रसंख्या १

प्रतियोगिता इत्यस्य अर्थः प्रकारतापि भवति। ततश्च प्रकारान्तरेणापि वक्तुं शक्यते—एकपदार्थनिष्ठविशेष्यतानिरूपकः अपरपदार्थनिष्ठप्रकारतानिरूपको यः संसर्गः स शाब्दबोधनिरूपिता आकाङ्क्षाप्रयोज्या च या विषयता अस्ति तद्वान् भवति, यथा—नीलो घटः इत्यस्मात् वाक्यात् अभेदसंसर्गकः नीलप्रकारकः घटविशेष्यको बोधो भवति। अर्थात् अभेदसम्बन्धेन नीलविशिष्टो घटः इति बोधो भवति। नीलघटयोः मध्ये अभेदः संसर्गः अस्ति। अत्र नीलः प्रकारः अस्ति, घटो विशेष्यः अस्ति। तस्मात् एकपदार्थो घटरूपः पदार्थः, तन्निष्ठविशेष्यता अस्ति, तन्निरूपकः संसर्गः अस्ति अभेदः। अपरः पदार्थः अस्ति नीलरूपः, तन्निष्ठा प्रकारता अस्ति, तन्निरूपकः अयम् अभेदः अस्ति। तस्मात् अयम् अभेदः शाब्दबोधे आकांक्षया भासते। अर्थात् द्वयोः पदयोः समभिव्यहारवशादेव अस्य प्रतीतिर्भवति, तत्र कस्यापि पदस्य वृत्तिस्वीकारस्य आवश्यकता नास्ति। अनेन प्राप्तं यद्—एकपदार्थनिष्ठानुयोगितानिरूपकः अपरपदार्थनिष्ठप्रतियोगितानिरूपको यः संसर्गो भवति तस्य वृत्त्या भानं न भवति किन्तु आकाङ्क्षयैव सर्वत्र भानं भवति।

कदाचित् एकस्यैव संसर्गस्य वृत्त्या आकाङ्क्षया च भानं भवितुम् अर्हति। यथा घटः इति पदम् अस्ति। घटः इत्यस्मात् एकत्ववान् घटः इति बोधो भवति। तत्र घटेन साकम् एकत्वस्य समवायसंसर्गः अस्ति, घटत्वस्यापि घटेन साकं समवायसंसर्गः अस्ति। घटघटत्वयोर्यः समवायः अस्ति स वृत्तिभास्यः अस्ति, किन्तु एकत्वघटयोर्यः समवायः अस्ति स आकाङ्क्षाभास्यः अस्ति—एवम् अस्ति नैयायिकानां व्यवस्था। तस्मात् नैयायिकाः वाक्यार्थे प्रतीयमानेषु संसर्गेषु वृत्तिं नैव स्वीकुर्वन्ति अपि तु आकाङ्क्षाबलात् तेषां भानं स्वीकुर्वन्ति इति।

अत्र प्रश्नः समुदेति—एकपदार्थे अथ च अपरपदार्थस्य इति यद् उक्तं तत्र एकत्वस्य क्व अन्वयः विवक्षितः पदे पदार्थे वेति? एकं यत् पदं तदर्थनिष्ठानुयोगितानिरूपकः अपरं यत् पदं तदर्थनिष्ठप्रतियोगितानिरूपको यः संसर्गः स शाब्दबोधे आकाङ्क्षया भासते इत्यर्थो विवक्षितो वा? यद्ययमर्थो विवक्षितः अर्थात् एकत्वस्य पदे अन्वयः अस्ति अपरत्वस्य च पदे अन्वयः अस्ति, तदा पचति इत्यादौ नैयायिकानां मते विक्लित्त्यनुकूलव्यापारानुकूलकृतिमान् इति बोधो भवति। नैयायिकानां मते धातोः फलं व्यापारश्च अर्थद्वयम् किञ्च तिङर्थः कृतिरस्ति। तत्र पुनः फलस्य व्यापारे अनुकूलत्वसम्बन्धेन अन्वयो भवति। सः अनुकूलत्वसम्बन्धः वृत्तिभास्यो नास्ति किन्तु आकाङ्क्षाभास्यः अस्ति। व्यापारस्य कृतौ अन्वयो भवति अनुकूलत्वसम्बन्धेन। सः अनुकूलत्वसम्बन्धः अपि आकाङ्क्षाभास्यः अस्ति वृत्तिभास्यो नास्ति। अत्र पच्-पदेन फलव्यापारयोरुपस्थितिर्भवति, तस्मात् एकं पदं पच् इति, तदर्थः व्यापारः, तन्निष्ठा विशेष्यता चास्ति, तन्निरूपकः संसर्गः अस्ति अनुकूलत्वसंसर्गः। अपरं पदमत्र नास्ति, एकेनैव पदेन द्वयोः अर्थयोरुपस्थितिर्भवति। तयोर्मध्ये परस्परम् अनुकूलत्वसम्बन्धेन विशेष्यविशेषणभावः अस्ति। सः अनुकूलत्वसम्बन्धः आकाङ्क्षाभास्यः अस्ति। एकत्वस्य अपरत्वस्य च पदे अन्वयः क्रियते चेत् यत्र भिन्नेन भिन्नेन पदेन द्वयोः अर्थयोरुपस्थितिर्भवति तयोर्मध्ये प्रतीयमानः संसर्गः आकाङ्क्षाभास्यो भवितुमर्हति, किन्तु एकेन पदेन उपस्थापितयोरर्थयोर्मध्ये प्रतीयमानस्य संसर्गस्य संसर्गमर्यादया भानं भवितुं नार्हति किन्तु पचति इत्यादिपदजन्यबोधे प्रतीयमानस्य अनुकूलत्वस्यापि संसर्गमर्यादया एव भानं भवति। यतो हि अनुकूलत्वे संसर्गे केनापि धातूनां वृत्तिः नाङ्गीक्रियते। तस्मात् एकत्वस्य अपरत्वस्य च पदे अन्वयः इति वक्तुं न शक्यते।

एवं तर्हि पदार्थे अन्वयो भवतु। पदे अन्वयः क्रियते चेत् अनुगतं लक्षणं वक्तव्यं भवति, तदनुगतं लक्षणञ्च भवति 'पदविशिष्टः संसर्गः संसर्गमर्यादया भासते' इति। वैशिष्ट्यञ्च—स्वप्रयोज्यविशेष्यतानिरूपकत्वम्, स्वभिन्नपदप्रयोज्यप्रकारतानिरूपकत्वम् इति उभयसम्बन्धेन। नीलो घटः इत्यत्र प्रकृतस्य समन्वयो यथा—नीलघटयोर्मध्ये प्रतीयमानः अभेदः संसर्गः पदविशिष्टः अस्ति चेत् तस्य संसर्गमर्यादया भानं स्वीकर्तुं शक्यते। तत्र प्रथमः संसर्गो भवति—स्वप्रयोज्यविशेष्यतानिरूपकत्वम् इति। अत्र स्वं घटपदम्, तत्प्रयोज्यविशेष्यता घटार्थे, तन्निरूपकत्वम् अभेदे। द्वितीयः संसर्गो भवति—स्वभिन्नपदप्रयोज्यप्रकारतानिरूपकत्वम् इति। अत्र स्वं घटपदम्, तद्भिन्नपदं नीलपदम्, तत्प्रयोज्यप्रकारता, तन्निरूपकत्वमपि अभेदे अस्ति। तस्मात् नीलो घटः इत्यत्र प्रतीयमानः अभेदः घटविशिष्टः अस्ति। अतः तस्य संसर्गमर्यादया भानं स्वीकर्तुं शक्यते। किन्तु पचति इत्यत्र फलव्यापारयोर्मध्ये प्रतीयमानो यः अनुकूलत्वसम्बन्धः अस्ति स पदविशिष्टो नास्ति। कुतः इति चेत्—स्वं पचतिपदम्, तत्प्रयोज्यविशेष्यता व्यापारनिष्ठा, तन्निरूपकत्वम् अनुकूलत्वे अस्ति। पुनः स्वं पचतिपदम्, तद्भिन्नं पदं नास्ति। अतः अर्थात् स्वभिन्नपदाभावात् फलव्यापारयोर्मध्ये प्रतीयमानः अनुकूलत्वसम्बन्धः पदविशिष्टो नास्ति। तस्मात् तस्य आकांक्षया

भानं न स्यात्, किन्तु आकाङ्क्षयैव भानं भवति इति अव्याप्तिरूपो लक्षणदोषः। अतः अयं पक्षः त्यज्यते।

इदानीं पदार्थे अन्वयः स्वीक्रियते चेत् अर्थो भवति—एकः यः पदार्थः तन्निष्ठा या विशेष्यता तन्निरूपकः यः संसर्गः, अथ च तद्भिन्नः यः पदार्थः तन्निष्ठा या प्रकारता, तन्निरूपकः यः संसर्गः स संसर्गमर्यादया भासते। अनुगततया वक्तव्यमस्ति चेत्—पदार्थविशिष्टः यः संसर्गः स संसर्गमर्यादया भासते। वैशिष्ट्यञ्च स्वनिष्ठविशेष्यतानिरूपकत्वम् स्वभिन्नपदार्थनिष्ठप्रकारतानिरूपकत्वम् इति उभयसम्बन्धेन। अधुना पचति इत्यत्र क्लेशो नास्ति। पचति इत्यत्र प्रतीयमानयोः फलव्यापारयोर्मध्ये यः अनुकूलत्वसम्बन्धः अस्ति स पदविशिष्टस्तु नास्ति किन्तु पदार्थविशिष्टः अस्ति। प्रकृते—पदार्थो व्यापाररूपः, तन्निष्ठा विशेष्यता अस्ति, तन्निरूपकत्वम् अनुकूलत्वे अस्ति। तेन स्वं व्यापाररूपः पदार्थः, तद्भिन्नः पदार्थः फलरूपपदार्थः, तन्निष्ठप्रकारता अस्ति, तन्निरूपकत्वमपि अनुकूलत्वे अस्ति। तस्मात् फलव्यापारयोर्मध्ये यः अनुकूलत्वसम्बन्धः अस्ति स पदार्थविशिष्टः अस्ति। अतः तस्य संसर्गमर्यादया भानं सर्वैरपि स्वीक्रियते। किन्तु एवं स्वीकारे सति पुनः नीलो घटः इत्यत्र आपत्तिर्भवति। यतो हि—नीलो घटः इत्यत्र पदद्वयं तु अस्ति किन्तु पदार्थस्तु एक एव। अर्थात् य एव नीलः स एव घटः, यश्च घटः स एव नीलः। पदार्थः एकः अस्ति तस्मात् अभेदः अप्यस्ति। यदि पदार्थयोर्मध्ये भेदः स्यात् तर्हि अभेदः संसर्गो न स्यात्। तस्मात् नीलो घटः इत्यत्र पदभेदसत्त्वेऽपि पदार्थे भेदो नास्ति। एवञ्च नीलो घटः इत्यत्र प्रतीयमानः अभेदः पदार्थविशिष्टो न भवति चेत् तस्य संसर्गमर्यादया भानं न स्यात्। अतः पदार्थे अन्वयः अपि स्वीकर्तुम् अशक्यः अस्ति। तस्मात् न पदे नापि पदार्थे अन्वयः।

तर्हि क्व अन्वयः इति चेत्—पदार्थतावच्छेदके अन्वयः। यदा एकत्वस्य अपरत्वस्य च पदार्थतावच्छेदके अन्वयः स्वीक्रियते तदा तस्यार्थो भवति—एकं यत् पदार्थतावच्छेदकं तदवच्छिन्नविशेष्यतानिरूपकत्वम्, अपरं यत् पदार्थतावच्छेदकं तदवच्छिन्नप्रकारतानिरूपकत्वम् यस्मिन् संसर्गे अस्ति स संसर्गः आकाङ्क्षया भासते। अनुगततया वक्तव्यमस्ति चेत्—पदार्थतावच्छेदकविशिष्टः संसर्गः संसर्गमर्यादया भासते। वैशिष्ट्यञ्च—स्वावच्छिन्नविशेष्यतानिरूपकत्वम्, स्वभिन्नधर्मावच्छिन्नप्रकारतानिरूपकत्वम् इत्युभयसम्बन्धेन।

एतस्य नीलो घटः इत्यत्र समन्वयः क्रियते—नीलो घटः इत्यत्र यद्यपि पदार्थः एकः अस्ति तथापि पदार्थतावच्छेदकं घटत्वं नीलत्वं चास्ति। एवञ्च घटे या विशेष्यता सा घटत्वावच्छिन्ना अस्ति, किञ्च नीले या प्रकारता सा नीलत्वावच्छिन्ना अस्ति। अतः एकं यत् पदार्थतावच्छेदकं घटत्वरूपम्, तदवच्छिन्नविशेष्यता अस्ति, किञ्च तन्निरूपकत्वम् अभेदे अस्ति। पुनः स्वं घटत्वम्, तद्भिन्नधर्मः नीलत्वम्, तदवच्छिन्ना प्रकारता अस्ति, तन्निरूपकत्वमपि अभेदे अस्ति। तस्मात् नीलो घटः इत्यत्र प्रतीयमानः अभेदः पदार्थतावच्छेदकविशिष्टः अस्ति। एवं तस्य संसर्गमर्यादया भानं भवति।

एवं सति पचति इत्यत्रापि क्लेशो नास्ति। यतो हि तत्र यथा पदार्थभेदः अस्ति तथा पदार्थतावच्छेदकभेदोऽपि अस्ति। अत्र विशेष्यता व्यापारत्वावच्छिन्ना, प्रकारता च फलत्वावच्छिन्ना अस्ति। अतः पचति इत्यत्र फलव्यापारयोर्मध्ये प्रतीयमानः अनुकूलत्वसम्बन्धः व्यापारत्वावच्छिन्नविशेष्यतानिरूपकः, फलत्वावच्छिन्नप्रकारतानिरूपकः चास्ति। एवं सोऽपि पदार्थतावच्छेदकविशिष्टः अस्ति। तस्मात् तस्य संसर्गमर्यादया भाने न क्लेशः।

व्युत्पत्तिवादग्रन्थे ततः 'सम्पन्नो व्रीहिः' इति वाक्यमस्ति। सम्पन्नो व्रीहिः इति वाक्यस्य उपयोगः एकस्याः व्रीहिव्यक्तेः तात्पर्येण नोक्तम्। ततश्च सम्पन्नो व्रीहिः इत्यत्र व्रीहिपदोत्तरसुप्रत्ययेन उपस्थाप्यस्य एकत्वस्य व्रीहौ अन्वयो न भवति तेषां बहुत्वात्। ततश्च व्रीहित्वे अन्वयत्वं नैयायिकैः स्वीक्रियते। एकत्वस्य व्रीहित्वे पर्याप्तिसम्बन्धेन यः अन्वयः अस्ति सः पर्याप्तिरूपः सम्बन्धः आकाङ्क्षाभास्यः अस्ति किन्तु पदार्थतावच्छेदकविशिष्टो भवितुं नार्हति। नियमोऽस्ति—"अनुल्लिख्यमाना जातिः स्वरूपतो भासते"[1] इति। व्रीहिपदेन स्वरूपसम्बन्धेन व्रीहित्वविशिष्टस्य उपस्थितिर्भवति किन्तु व्रीहित्वस्य व्रीहित्वत्वे नान्वयः। एकत्वस्य व्रीहित्वे अन्वयः कर्तव्यः अस्ति, तस्मात् अत्र एकः पदार्थः व्रीहित्वरूपः पदार्थः, अत्र पदार्थतावच्छेदकं नास्त्येव। यतो हि—व्रीहित्वस्य स्वरूपेणैव भानं भवति। एवमेव 'चैत्रस्य गुरुकुलम्' इत्यत्रापि चैत्रस्य गुरुत्वे अन्वयो भवति। अर्थात् 'चैत्रनिरूपितगुरुत्ववत्

[1] *बालव्युत्पत्तिः*; पत्रसंख्या ४७

कुलम्’ इति बोधो भवति। गुरुत्वस्यापि उपस्थितिः स्वरूपेण भवति। अत्रापि पदार्थतावच्छेदकं नास्ति। अतः एवंविधेषु स्थलेषु पुनः दोषाः भवन्ति, तदर्थं पुनः परिष्कारः अस्ति। ततश्च उपस्थितावेकत्वस्य अपरत्वस्य च अन्वयः अस्ति। तेन उपस्थितीयविशेष्यताविशिष्टः संसर्गः संसर्गमर्यादया भासते इति।

**५. शोधनिष्कर्षः—** श्रीमता गदाधरभट्टाचार्येण विरचितस्य व्युत्पत्तिवादस्य इयं प्रथमा पङ्क्तिर्विद्यते। अस्याः पङ्क्तेः अर्थो विद्यते एकपदार्थानुयोगिकः अपरपदार्थप्रतियोगिकः संसर्गः शाब्दबोधनिरूपिताकाङ्क्षाप्रयोज्यविषयतावान् भवति इति। अयञ्च संसर्गो द्विविधः अभदेसंसर्गः तद्भिन्नसंसर्गश्चेति। तत्र अभेदः नीलो घटः इत्यादौ संसर्गमर्यादया भासते। भेदस्तु राज्ञः पुरुषः इत्यादौ संसर्गमर्यादया भासते।

**६. उपसंहारः—** व्युत्पत्तिवादस्य प्रथमपङ्क्तेः व्याख्यानं विविधैः प्रकारैः विविधासु टीकासु लभ्यते। प्रकृते शोधप्रबन्धे मया सुदर्शनाचार्येण विरचिताम् आदर्शव्याख्यामाश्रित्य व्याख्यानं विहितम्। एवमेवात्र जयाव्याख्यानुसारेण दीपिकाव्याख्यानुसारेणापि भिन्नं व्याख्यानं सम्भवति इति शम्।

## ग्रन्थसूची

## (Bibliography)


1. भट्टाचार्य, गदाधरः; *व्युत्पत्तिवादः* (आदर्शटीकासहितः); प्रथमो भागः; सुदर्शनाचार्यः (टीकाकारः); हरेरामत्रिपाठी (सम्पादकः); राष्ट्रियसंस्कृतसंस्थानम्; नवदेहली; २००११
2. भट्टाचार्य, गदाधरः; *व्युत्पत्तिवादः* (दीपिकाटीकासमलङ्कृतः); शिवदत्तमिश्रः (टीकाकारः); ज्वालाप्रसादगौडः (सम्पादकः); चौखम्बा सुरभारती प्रकाशन; वाराणसी; २०१०
3. भट्टाचार्य, गदाधरः; *व्युत्पत्तिवादः* (रामरुद्रीव्याख्यासहितः); प्रो. जी. आञ्जेनेयशास्त्री, बी. वी वेङ्कटरमणः च (व्याख्याकारौ); वेम्पटि कुटुम्बशास्त्री (प्रकाशकः); राष्ट्रिय संस्कृत संस्थान; नई दिल्ली; २००८
4. भट्टाचार्य, गदाधरः; *व्युत्पत्तिवादः* (इन्दुकलाहिन्दीव्याख्यासहितः); वैद्यनाथ झाः (व्याख्याकारः); हंसा प्रकाशन; जयपुर; २०११
5. भट्टाचार्य, विश्वनाथः, *न्यायसिद्धान्तमुक्तावली* (किरणावलीसमाख्यव्याख्योपेता); श्रीकृष्णवल्लभाचार्यः (टीकाकारः); चौखम्बा संस्कृत संस्थान; वाराणसी; २०१४
6. धिताल, विश्वनाथः (लेखकः सम्पादकश्च); *न्यायप्रवेशिका;* ; संस्कृति प्रकाशन; वाराणसी; २००७
7. धिताल, विश्वनाथः (लेखकः सम्पादकश्च) *बालव्युत्पत्तिः*; संस्कृति प्रकाशन; वाराणसी; २००६

# प्रमिताधिकरणव्युत्पादितन्यायैः हृदयाकाशस्य ब्रह्मस्वरूपत्वम्

Gaurav Sharma,
Ramakrishna Mission Vivekananda
Educational and Research Institute,
Belur Math, Howrah – 711202
Ph. – 8826134146
Gmail – gaurav.sharma.vedanta@gmail.com

**सारसंक्षेपः-** कठोपनिषद्-छान्दोग्योपनिषदोः प्रतिपादितां अङ्गुष्ठमात्रपुरुषस्य दहरविद्यायाश्च अवधारणां समाश्रित्य विचारः प्रस्तूयते। उपनिषत्सु ब्रह्मणः उपासनापरकस्वरूपस्य विवेचने कठोपनिषदः अङ्गुष्ठमात्रपुरुषप्रकरणं तथा छान्दोग्योपनिषदः दहरविद्या च अत्यन्तं महत्त्वपूर्णा वर्तते। संज्ञादृष्ट्या कठोपनिषदि हृदयकमले स्थितः परमात्मा 'अङ्गुष्ठमात्रः पुरुषः' इति परिमाणपरकत्वेन निर्दिष्टः, छान्दोग्योपनिषदि तु सः 'दहराकाशः' इति स्थानपरकत्वेन संज्ञापितः। उपासनायाः स्वरूपं विचारयामश्चेत्, अङ्गुष्ठमात्रपुरुषस्य 'ईशानः' इति रूपेण नियमनशक्तेः ध्यानं विधीयते, दहरविद्यायां च ब्रह्मणः 'सत्यकाम-सत्यसंकल्पत्वादयः अनन्ताः गुणाश्चिन्त्यन्ते। व्याप्तिदृष्ट्या यद्यपि सः हृदयकोशे अङ्गुष्ठमात्रः प्रतीयते, तथापि वस्तुतः सः 'विभुः' (व्यापकः) एव; यथा छान्दोग्ये उक्तं यत् हृदये स्थितोऽपि सः 'ज्यायान् पृथिव्याः' अर्थात् अखिलायाः पृथिव्याः अपि महान् अस्ति। अस्य प्रतिपादनस्य मुख्यम् उद्देश्यं जीवात्म-परमात्मनोः तात्त्विकभेदनिराकरणेन अन्तराकाशे स्थितस्य ब्रह्मणः साक्षात्कारात्मकज्ञानप्रदानम् एव अस्ति। स चायं विषयः सूत्रकाराभिमतरीत्या प्रतिपाद्यते। ब्रह्मसूत्रेषु प्रथमाध्याये तृतीयपादे वर्तते प्रमिताधिकरणम्। अस्मिन् अधिकरणे हृदयस्यान्तः स्थितम् आत्मानम् आदाय विचारः प्रवृत्तः। अत्र विषयवाक्यतया कठवल्लीगतं - "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।" इत्यादिवाक्यं गृहीतम्। वाक्येऽस्मिन् अङ्गुष्ठमात्रः पुरुष आत्मनि मध्ये स्थितः कश्चित् उपदिष्टः। पुनः अनन्तरवाक्येऽपि "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः" इति श्रुतम्। अङ्गुष्ठमात्रं हि हृदयम् उच्यते। अङ्गुष्ठमात्रे हृदये भवति इत्यङ्गुष्ठमात्रः। पुरुषः - पूर्णः। तथा चायं पुरुषः अङ्गुष्ठमात्रः श्रुतः कः? इति संशयः। अत्र तावत् वाक्ये अङ्गुष्ठमात्रत्वेन निर्देशात् जीवः स्यात् अयं पुरुषः, ईशानी भूतभव्यस्य इति श्रवणात् परमात्माऽपि भवितुम् अर्हति। अतः जीवेशयोः उभयोरपि अत्र लिङ्गश्रवणात् संशयो जायते कोऽयमात्मा इति।

पूर्वपक्षस्तावत् - जीवात्मा एवायं स्यात्। सिद्धान्तस्तु - परमात्मा एवायम्। एवं सति जीवस्य ग्रहणे जीवोपासनायां वाक्यस्य तात्पर्यं स्यात्। सिद्धान्ते तु - परमात्मस्वीकारे जीवस्य परमात्मस्वरूपप्रतिपादकम् इदं वाक्यं भवेत्। जीवस्वीकारे कस्तावत् हेतुः? परिमाणविशेषनिर्देश एव। तथा च - प्रकृते अङ्गुष्ठमात्रतया अयं पुरुष उपदिष्टः। अङ्गुष्ठमात्रत्वं परमात्मनो न सम्भवति, तस्य परिमाणादिरहितत्वात्। किञ्च - सर्वगतो व्यापकः परमात्मा शास्त्रेषु स्वयम् उपदिष्टः, तादृशस्य च तस्य अङ्गुष्ठमात्रे हृदयेऽवस्थानं न सम्भवति।

ननु - विज्ञानात्मनोऽपि नास्त्येव अङ्गुष्ठमात्रं परिमाणम्। तथा च जीवस्यापि अङ्गुष्ठमात्रत्वोक्तिः नोपपद्यते। उच्यते - जीवो हि सोपाधिकः, एवञ्च उपाधिविशेषसम्बन्धमाश्रित्य अङ्गुष्ठमात्रपरिमाणत्वं तस्य योजयितुं शक्यते। ईश्वरस्य तु उपाधिसम्बन्धाभावात् कथञ्चिद् अपि नोपपद्यते तत्पक्षे परिमाणविशेषश्रुतिः। अपिच - स्मृतावपि जीवस्यैवाभिधीयते अङ्गुष्ठमात्रत्वम् तथा हि - "अथ सत्यवतः कायात् पाशबद्धं वशं गतम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्।[1]" इति स्मृतौ स्पष्टमेव जीवस्य यमपाशबद्धता अवगम्यते। यमपाशो हि कर्माण्येव। तथा च स्मृतिरपि अङ्गुष्ठमात्रत्वेन जीवमेव उपदिशति। अतश्च - प्रकृते आत्मनि मध्ये उपदिश्यमानः अङ्गुष्ठमात्रो जीव एवेति।

[1] महाभारतम्, वनवर्प.२९७.१७

एवंरूपेण हृदयस्थस्य आत्मनो जीवत्वाशङ्कायां, प्रकृतवाक्ये अङ्गुष्ठमात्रः पुरुषः परमात्मा एव इत्येतत् प्रतिपादयितुं सूत्रमाह बादरायणः - "शब्दादेव प्रमितः[1]" इति। अयमर्थः - परमात्मा एवात्र वाक्ये अङ्गुष्ठमात्रो ग्राह्यः, कुतः? तदुच्यते - शब्दात् इति। यस्मात् अत्र वाक्ये - "ईशानो भूतभव्यस्य" इति विशिष्य परमात्मवाचकः शब्दः श्रूयते, तस्मात् परमात्मैव अयम् पुरुषः। भूतभव्यस्य हि ईशान अत्रोक्तः। एवं च कालत्रयेऽपि विद्यमानस्य ईशानोऽयं पुरुषोऽङ्गुष्ठमात्रः। कालत्रयपरिच्छिन्नस्य तु ईशानः परमात्मैव स्यात् न तु जीवः। जीवस्य तावत् एतत्कालीनसर्वपदार्थेशितृत्वम् एव न सम्भवति, कथं वा कालत्रयेऽपि स्यात्? किञ्च प्रकरणं पश्यामश्चेदपि अयं पुरुषः परमात्मैवेति गम्यते। अत्र हि आदौ "अन्यत्र धर्मात् अन्यत्राधर्मात्" इत्यादिना परमात्मा पृष्टः। प्रकृतवाक्ये च - पुरुषम् अङ्गुष्ठमात्रमुद्दिश्य भूतभव्येशितृत्वं तस्य उक्त्वा "एतद् वै तत्" इति निर्दिशति। एवञ्च - पूर्वं यत्पृष्टम् "अन्यत्र धर्मात्" इत्यादिना तदेव एतच्छब्देन परामृश्य उपदिशति "एतद् वै तत्" इति। सूत्रे च शब्दपदेन अभिधानश्रुतिः अभिप्रेता न तु वाक्यं प्रमाणम्। वाक्यप्रमाणस्य हि लिङ्गापेक्षया दुर्बलत्वम् अस्ति। अतः लिङ्गबलात् जीवत्वं यदा आशङ्कितम्, तद्वारणं न स्यात्। वाक्येन लिङ्गस्य अबाधात्। श्रुतेस्तु लिङ्गापेक्षयापि प्राबल्यम्, अतः 'ईशान' इत्यभिधानश्रुतिबलात् एवं जीवं निराकृत्य परमात्मैवात्र अङ्गुष्ठमात्र इति निर्धारयितुं शक्यते।

ननु अस्तु एतद्, तथापि कथमत्र व्यापिनः परमात्मनः हृदयस्थतया अङ्गुष्ठमात्रत्वेन निर्देश इति। सिद्धान्ते हि परमात्मनः अन्तःकरणाद्युपाधिरहितस्य व्यापित्वम् अङ्गीकृतम् अस्ति, अतस्तस्य हृद्यल्पपरिमाणता नोपपद्यत इति एवं शङ्का स्यात् - अतः सूत्रं प्रणीतं भगवता बादरायणेन - "हृद्यपेक्षया तु मनुष्याधिकारत्वात्"[2] इति। व्यापिनोऽपि परमात्मनः हृदयेऽवस्थित्यभिप्रायेण एतत् अङ्गुष्ठमात्रत्वम् उपदिष्टम् प्रकृतवाक्ये, इत्यर्थः। यथाऽकाशस्य उपाधिमादाय सर्वगतस्यापि परिच्छिन्नत्वम् तथाऽत्रापि। अयञ्चार्थः दहराधिकरणे अन्यत्र च सर्वत्र प्रसिद्ध्यधिकरणादौ च निरूपित एव। "अर्भकौकस्त्वात्"[3] इति सूत्रे तु साक्षात् एव "निचाय्यत्वात् एवं व्योमवच्च" - इति पठितं सूत्रकारेण। एतत्सूत्रव्याख्याने भाष्यकारैरपि उक्तम् - "परमात्मनो हृदयेऽवस्थानमपेक्ष्य अङ्गुष्ठमात्रत्वम् इदमुच्यते। आकाशस्येव वंशपर्वापेक्षम् अरत्निमात्रत्वम्।"[4] इति। अरत्निश्चात्र सकनिष्ठो करः। ननु अङ्गुष्ठमात्रशब्दस्य मुख्यार्थः जीवः। ब्रह्मणि चायं शब्दः अमुख्यया वृत्त्या। तथा च - मुख्यार्थस्य एवात्र ग्रहणं युक्तम्। अत्रोच्यते - सति संभवे मुख्यार्थो ग्राह्यः। यदि तु वाक्यार्थे किञ्चित् बाधकं वर्तते,तदा मुख्यार्थस्य त्यागेन अमुख्यस्यापि ग्रहणं सम्भवति। प्रकृते तु ईशितृत्वश्रुविरोधा एव मुख्यार्थपरित्यागे हेतुः। तथा चात्र गौणार्थस्य एव ग्रहणम्। एवञ्च - 'ईशान' शब्दादिभ्यः परमात्मग्रहणम् एवात्र न्याय्यम्। "गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः" इति न्यायस्य प्रकृतेऽपवादः।

ननु परमात्मनोऽत्र हृदयेऽवस्थानम् आदाय अङ्गुष्ठमात्रत्वं वर्णितम्। स च परमात्मा सर्वप्राणिनां हृदयेऽवस्थितः। हृदयपरिमाणञ्च प्रतिप्राणि भिन्नमेव। एवञ्च परिमाणस्य सर्वत्र अननुगतत्वात् हृदयावस्थानेनापि परमात्मनः अङ्गुष्ठमात्रत्वं न उपपद्यते। एतच्छङ्काव्यावृत्तये सूत्रकार आह - "मनुष्याधिकारत्वात्" इति। मनुष्याणामेव हि शास्त्रे अधिकारः। मनुष्याणाञ्च त्रैवर्णिकानाम्। शक्तत्वम्, अर्थित्वम्, अपर्युदस्तत्त्वञ्च अधिकारिविशेषणानि। अतो यत्रैतद् विशेषणम् तस्यैवाधिकारः स्यात्। मनुष्यांश्च अतिरिच्य अन्येषाम् एतद्विशेषणाभावात् नाधिकारः। एवञ्च मनुष्यानादाय एव एतद्वचनम्। मनुष्याणाञ्च नियतपरिमाणदेहोपलब्धेः नियतमेव हृदयपरिमाणं स्यात्। तथा च - मनुष्यहृदयपरिमाणं अङ्गुष्ठमात्रम्। तत्र च - परमात्मनोऽवस्थितिम् आदाय वाक्ये अङ्गुष्ठमात्रपरिमाणत्वम् उक्तम्।

---

[1] ब्रह्मसूत्रम्, १.३.२४
[2] ब्रह्मसूत्रम्, १.३.२५
[3] ब्रह्मसूत्रम्, १.२.७
[4] ब्रह्मसूत्रभाष्यम्, १.३.२५

यच्च जीवस्य अङ्गुष्ठमात्रपुरुषत्वाशङ्कायाम् हेतुतया उपन्यस्यते, स्मृतिपरिमाणोपदेशादिकम्। तत्र एतदवगन्तव्यम् -प्रकृतवाक्यं तावत् अस्य जीवस्य आविद्यकं जीवभावं निवर्त्य (परित्यज्य) परमार्थस्वरूपं प्रतिपादयितुम् आगतम्। तत्र च - प्रथमतो जीवस्य प्रत्यक्षतः लोके अवगतं यत् रूपं तदुक्त्वा तस्यापलापः कर्तव्यः। एवञ्च - प्रकृते अङ्गुष्ठमात्रं जीवमुपदिश्य (अनूद्य प्राप्तं रूपं) पुनस्तस्यैव पारमार्थिकं स्वरूपं तत्र दर्शयति - 'ईशानो भूतभव्यस्य' इत्यादि। "अहं ब्रह्मास्मि" "तत्त्वमसि" - इत्यादिवाक्यवत् अत्र जीवस्य ब्रह्मात्मैक्यं प्रतिपादितम् अस्ति। तथा च एतदवगन्तव्यम् अस्ति, यत् वेदान्तवाक्यानि ब्रह्मप्रतिपादकानि रीतिद्वयम् आश्रित्य प्रवृत्तानि। तत्र तावत् वाक्यानि कानिचित् सर्वप्रपञ्चधर्मनिषेधमुखेन परमात्मनो निर्धर्मकं निर्गुणं स्वरूपं प्रतिपादयन्ति। कानिचित् तु वाक्यानि अविद्याया आरोपितं रूपमनूद्य पुनस्तस्य प्रतिषेधमुखेन जीवस्य ब्रह्मात्मैक्यं बोधयन्ति। प्रकृते च द्वितीयां रीतिमाश्रित्य जीवस्य ब्रह्मात्मैक्यं बोधनीयम् इति वाक्यं प्रवृत्तम्। अतोऽङ्गष्ठमात्रपदेन जीवस्य ग्रहणेऽपि तस्य अनुवादमात्रता एव। ततश्च अनूद्य जीवरूपतां ततः परमात्मस्वरूपप्रतिपिपादयिषा, अतोऽत्र वाक्यस्यपरमात्मनि एव तात्पर्यम्, न जीवप्रतिपादने।

ननु - सूत्रकारेण 'हृद्यपेक्षया तु' - इत्यनेन परमात्मनो हृदयावस्थानम् आदाय अङ्गुष्ठमात्रत्वम् इति सूचितम्। कथमत्र उच्यते - जीवस्य परमात्मैक्यविवक्षया ज्ञानात्पूर्वम् आरोपितजीवरूपताया अनुवादः अङ्गुष्ठमात्र इति? अत्रेदमुत्तरम् - कठवल्ली-वाक्यं हि अत्र विषयः। वाक्यस्य च अवान्तरतात्पर्यम् उपास्ये ब्रह्मणि। तथा प्रधानतात्पर्यं विज्ञेये परमात्मनि। तथा च परमतात्पर्यम् आदायात्र पूर्वोक्तमुपस्थापितम्। यदि तु अवान्तरतात्पर्येण वाक्यं व्याचक्ष्महे तदा हृदयवास्थानमादाय परब्रह्मण अङ्गुष्ठमात्रत्वोपदेशः। तथा च - महातात्पर्यम् आदाय जीवस्य परमात्मैकत्वप्रतिपादकं वाक्यमिदं स्थितम्। तदनेन अङ्गुष्ठमात्रत्वं नात्राभिधीयते कस्यचित् इति ज्ञातव्यम्, अनुवादरूपत्वात् तस्य। स्मृतिमादायापि जीवशङ्का न कर्तव्या, अत्रैव अग्रे - "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा"[1] इत्यादि वाक्ये तं 'स्वाच्छरीरात् प्रवृहेत्' इत्यनेन जीवस्य एव निष्कर्षकत्वश्रवणात्। एवञ्च - "उत्तराच्चेदाविर्भूतस्वस्वरूपस्तु"[2] इति सूत्रन्यायेन शरीरात् आत्मनः विविच्य ज्ञातव्यताया (पृथक्कृत्य ज्ञानस्य) उपदेशात्, स्मृतिरपि तदनुसारिणी नेतव्या। तथा च न कथञ्चित् जीवस्य प्रकृतवाक्यप्रतिपाद्यता सम्भवति इति।

**उपसंहारः-** अत्रेदं वक्तुं शक्यते यत् कठोपनिषदः अङ्गुष्ठमात्रत्वप्रकरणं (प्रमिताधिकरणम्) तथा छान्दोग्योपनिषदः दहरविद्या च मूलतः ब्रह्मणोऽद्वैतस्वरूपस्य प्रतिपादिका अस्ति, यस्य उपलब्धिः हृदयगुहायां सम्भवा। यद्यपि उपासकस्य सौकर्याय परमात्मनः 'अङ्गुष्ठमात्रः पुरुषः' इति परिमाणपरकं तथा 'दहराकाशः' इति स्थानपरकं प्रतिपादनं कृतम्, तथापि तस्य तात्त्विकी व्याप्तिः तु 'विभुः' तथा 'ज्यायान् पृथिव्याः' इति वचनानुसारं सर्वव्यापिनी एव। अतः अस्माकं विमर्शस्य निष्कर्षोऽयं वर्तते यत् — 'ईशानः' इति रूपेण नियमनशक्तेः साक्षात्कारः तथा सत्यकाम-सत्यसंकल्पत्वादिगुणानां चिन्तनं वस्तुतः जीवात्म-परमात्मनोः भेदनिराकरणाय एव उपदिश्यते। अन्तराकाशे स्थितस्य एतस्य ब्रह्मणः साक्षात्कारेणैव मानवः सांसारिकपरिच्छेदात् मुक्तो भूत्वा स्वात्मानं परमात्मनि विलापयितुं शक्नोति। एतदेव उपनिषदां परमं प्रतिपाद्यमिति।

## आश्रितग्रन्थसूची

ब्रह्मसूत्रम् (शाङ्करभाष्यरत्नप्रभा भाषानुवाद सहित)। यतिवर श्रीभोलेबाबा (अनुवादकः)। भारतीय विद्या प्रकाशन। वाराणसी। २०११।
सुब्रह्मण्यशास्त्री. एस् (सम्पादकः)।उपनिषद्भाष्यम्। श्रीदक्षिणामूर्ति मठ प्रकाशन। वाराणसी। २०११।
श्रीमद्भगवद्गीता (शांकरभाष्य हिन्दी-अनुवादसहित)। श्रीहरिकृष्णदास गोयन्दका (अनुवादकः)। गीताप्रेस। गोरखपुर। कोलकाता।
मिश्रः, वाचस्पतिः। भामती। मोतीलाल बनारसीदास। वाराणसी। १९९०।
ब्रह्मसूत्र-शाङ्करभाष्यम् (रत्नप्रभा-सहितम्)। निर्णयसागर प्रेस। मुम्बई। १९३४।
कठोपनिषद् (शाङ्करभाष्यसहिता)। गीता प्रेस। गोरखपुर। संस्करणम् २०२१।
श्रीमद्भगवद्गीता (शाङ्करभाष्यम्)। गीताप्रेस गोरखपुरम्। २०२३ (पुनर्मुद्रणम्)

[1] कठोपनिषद् २.६.१७
[2] ब्रह्मसूत्रम्, १.३.१९

# स्मृतिप्रमाणानां वेदान्तसिद्धान्तसहायकत्वविचारः – एका ब्रह्मसूत्रानुसारिणी समीक्षा

देवज्योति-कुण्डुः,
सहायकाध्यापकः (अतिथिः),
संस्कृतविभागः, नव-नालन्दा-महाविहारः (सम-विश्वविद्यालयः),
नालन्दा, विहारः – 803111.
दूरवाणीसंख्या – 9883664625, 7076387877.
वैद्युतिकसंकेतः – debjyotikundu26@gmail.com

**शोधसारः-**भारतीयदर्शनेषु वेदान्तदर्शनमन्यतमम्। वेदान्तदर्शनं तत् पुनः द्वैताद्वैतादिभेदेन विविधप्रकारेण विभज्यते। तत्रापि सर्वापेक्षया प्रसिद्धः सिद्धान्तपरकश्च अद्वैतवेदान्तः। जीवब्रह्मणोरैक्यप्रतिपादनपरकेऽस्मिन् भारतीयदर्शने मोक्षाख्यस्य परमपुराषार्थस्य प्रापकमार्गाः सुनिर्दिष्टाः। पुराकालादेव नैके महर्षयः कर्तव्याकर्तव्यविचारमस्मान् उपदिदेशुः। कदाचिदुपदेशव्याजेन, कदाचिल्लोककथाभिः, कदाचिद्वा विधिमुखेन तत्त्वानि प्रतिपादितानि। महर्षिणां वाक्यानि उपदेशाश्च प्रमाणत्वेन ज्ञायन्ते। अद्वैतवेदान्ते प्रधानतया श्रुति-स्मृति-प्रमाणभेदेन त्रिविधानि प्रमाणानि अङ्गीक्रियन्ते। तत्र श्रुतिप्रमाणं वेदाः, स्मृतिप्रमाणं श्रीमद्भगवद्गीतादिकं, पुराणप्रमाणं च विविधानि पुराणोपपुराणानि। पूर्वपक्षखण्डनपुरःसरं सिद्धान्तमतस्य प्रतिष्ठापनमेव शास्त्रीयरीतिः। तयैव हि रीत्या विविधाः अद्वैतवेदान्तसम्बन्धीयग्रन्था अपि विरचिताः। ग्रन्थेषु तेषु अन्यतमं श्रीबादरायणव्यासप्रणीतं ब्रह्मसूत्रम्। तत्र विविधैः सूत्रैः ब्रह्मणः स्वरूपं तथा च तत्प्राप्त्युपायाः वर्णिताः। श्रीशङ्कराचार्यो हि तदीयेन भाष्येण सिद्धान्तस्य दार्ढ्यमसम्पादयत्। तद्भाष्यं शाङ्करभाष्यमिति नाम्ना विख्यातः। प्रस्तुते निबन्धे विविधस्मृतिविषये चर्चा विहिता। किं स्मृतिप्रमाणानि वेदान्तसिद्धान्तस्य सहायकानि भवन्ति वा न वेत्यस्मिन् विषये शङ्का जायते सर्वेषां वेदान्तसिद्धान्तसहायकत्वाऽभावात्। सांख्यादयः पूर्वपक्षिणः, सिद्धान्तिनो हि वैदान्तिकाः। स्मृतयः खलु प्रमाणानि भवन्ति। किन्तु पूर्वपक्षभूताः सांख्यस्मृतयो योगस्मृतयश्च कथं वेदान्तसिद्धान्तानां सहायिकाः भवन्तीति विषये विद्वत्सम्प्रदाये विप्रतिपत्तिः भवत्येव। तत्र काः स्मृतयः त्यक्तव्याः, काश्च न, कासां च तात्पर्यं कथं निर्धारणीयमित्यादिविषयाः ब्रह्मसूत्रे सम्यग् वर्णिताः। तत्र सूत्रमुखेन शङ्कानामेतासां समाधानं कृतं विद्यते। तथा च शाङ्करभाष्ये विषयस्यास्य सुष्ठु वर्णनमुपलभ्यते। तदनुसारमेव प्रस्तुते "स्मृतिप्रमाणानां वेदान्तसिद्धान्तसहायकत्वविचारः – एका ब्रह्मसूत्रानुसारिणी समीक्षा" इति शीर्षकवति शोधपत्रे विचाराः प्रतिपादिताः।

**कूटशब्दाः-** अद्वैतवेदान्तः, ब्रह्मसूत्रम्, शाङ्करभाष्यम्, सिद्धान्ताः, पूर्वोत्तरपक्षिणौ, स्मृतिप्रमाणानि, श्रुतिप्रमाणानि, सांख्याः, यौगिकाः, वैदान्तिकाः।

**भूमिका-**भगवता बादरायणव्यासेन ब्रह्मसूत्रं विरचितम्। वेदान्तशास्त्रस्य प्रमुखग्रन्थत्वेन ब्रह्मसूत्रं परिचयं लभते। ब्रह्मसूत्रैः अद्वैतवेदान्तशास्त्रस्य मतानि श्रुतियुक्त्यादिभिः सम्यक् सन्ति प्रतिपादितानि। पूर्वपक्षिणां विविधशङ्कानिवारणपुरःसरं भगवता शङ्कराचार्येणापि ब्रह्मसूत्रोपरि रचितेन भाष्येण वेदान्तमतं सुदृढीकृतम्। वस्तुतः सूत्रैरेतैः ब्रह्मस्वरूपं प्रतिपादितम्। सांख्यादयः पूर्वपक्षिणः ब्रह्म नाङ्गीकुर्वन्ति। अतस्तेषां नये ब्रह्मणः जगत्कारणत्वं न कथमपि सिध्यति। अत एव भगवान् श्रीशङ्कराचार्यः तद्रचितभाष्येण तेषां मतानि खण्डयित्वा श्रुतिप्रमाणैः वेदान्तमतानि अलङ्कृत्य प्रतिष्ठापयामास। एवं ब्रह्मसूत्रस्य द्वितीये अविरोधाख्याख्याये प्रथमपादे साङ्ख्ययोगकाणादादिस्मृतिभिः साङ्ख्यादिप्रयुक्ततर्कैश्च वेदान्तसमन्वयविरोधपरिहारः क्रियते। तत्र स्मृत्यधिकरणेन योगप्रत्युक्त्यधिकरणेन च वेदविरुद्धस्मृत्यादिमतानां निराकरणं वेदानुसारिस्मृतीनां ग्रहणं च प्रदर्श्यते। स एव विचारः शाङ्करभाष्यानुसारं संक्षेपेणात्रालोच्यते।

**स्मृतिबलेनैव वेदान्ताः व्याख्यातव्या इति पूर्वपक्षिणामभिप्रायः-**ब्रह्म एव जगतः कारणम्। स सर्वज्ञः सर्वेश्वरः। अत एव स एव सर्वेषां न आत्मा इत्येतत् वेदान्तवाक्यसमन्वयप्रतिपादनेन प्रतिपादितम्। किन्तु ब्रह्मणः जगत्कारणत्वं पूर्वपक्षिणः सांख्यादयः

नाङ्गीकुर्वन्ति। तत्र ब्रह्मणः जगत्कारणत्वस्वीकारे दोष आपतति इति पूर्वपक्षिणः। स च दोषः स्मृत्यनवकाशदोषप्रसङ्गरूपः। यदि ब्रह्मणः जगत्कारणत्वमङ्गीक्रियते, तर्हि स्मृतीनामनवकाशदोषो भवतीति तात्पर्यम्। स्मृतयस्तु परमर्षिप्रणीताः शिष्टपरिगृहीताः, अन्या अपि स्मृतयः तदनुसारेण एव भवन्ति। किन्तु तासां सर्वेषामपि अनवकाशत्वरूपदोष आपतेत्। तासु स्मृतिषु प्रधानं स्वतन्त्रम् अचेतनं जगत्कारणत्वेन प्रतिपादितम्। मन्वादिस्मृतीनां धर्मे सावकाशत्वमस्ति। ताश्च अग्निहोत्रादिकर्मद्वारा धर्मजातेन अपेक्षितमर्थं समर्पयन्ति। तदेवं प्रतिपादयति भाष्यकारः शङ्कराचार्यः – "मन्वादिस्मृतयस्तावच्चोदनालक्षणेन अग्निहोत्रादिना धर्मजातेनापेक्षितमर्थं समर्पयन्त्यः सावकाशा भवन्ति। अस्य वर्णस्याऽस्मिन् कालेऽनेन विधानेनोपनयनम्, ईदृशश्चाचारः, इत्थं वेदाध्ययनम्, इत्थं समावर्तनम्, इत्थं सहधर्मचारिणीसंयोग इति। तथा पुरुषार्थांश्चतुर्वर्णाश्रमधर्मान् नानाविधान् विदधति"[१] इति। एवमनुष्ठानविषये कपिलादिस्मृतीनां सावकाशत्वं नास्ति यतो हि ताः मोक्षसाधनम् एवाधिकृत्य प्रणीताः। अतो यदि तत्रापि अनवकाशत्वं स्यात्, तर्हि ता आनर्थक्यं भजेरन्। तस्मात् तदविरोधेन वेदान्ताः व्याख्यातव्याः।

ईक्षत्यादिभ्यः श्रुतिभ्यः ब्रह्मैव जगतः कारणमिति ज्ञायते। एवं सुनिर्णीतः श्रुत्यर्थः स्मृत्यनवकाशदोषप्रसङ्गेन कथमाक्षिप्यते इति शङ्कते पूर्वपक्षी। ये स्वातन्त्र्येण श्रुत्यर्थं ज्ञातुं शक्नुवन्ति, तेषामयं पूर्वपक्षो न भवेत्। किन्तु परतन्त्रप्रज्ञाः जनाः श्रुत्यर्थं ज्ञातुं स्मृतिषु एव अवलम्बेरन्। अतः स्मृत्या श्रुत्यर्थं विजानन्ति ते। कपिलप्रभृतीनां मुनीनां ज्ञानमार्षम् अप्रतिहतं च वर्तते। एतद्विषये एवं श्रुतिरस्ति – "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्"[२] इति। अतस्तेषां मतानि न कदापि अयथार्थानि भवितुमर्हन्ति। तर्कानवलम्ब्य ते अर्थान् प्रतिष्ठापयन्ति। अतः स्मृतिबलेनैव वेदान्ताः व्याख्यातव्या इति पूर्वपक्षिमतम्। अत एव सूत्रे "स्मृत्यनवकाशदोषप्रसङ्गः"[३] इति पूर्वपक्षिणो वदन्ति।

**पूर्वपक्षिणां मतखण्डनम्-**सम्प्रति पूर्वपक्षिणां मतं निराकरोति सिद्धान्ती। स्मृत्यनवकाशदोषप्रसङ्ग इति चेत् न, कथम् किं तत्र कारणम् तदुच्यते सिद्धान्तिना – "अन्यस्मृत्यनवकाशदोषप्रसङ्गात्"[४] इति। अत्र तात्पर्यं हि पूर्वपक्षिणः स्मृत्यनवकाशदोषं प्रदर्शितवन्तः। किन्तु स न उचितः। यदि तद् भवति, तर्हि अन्यस्मृत्यनवकाशदोषप्रसङ्गः स्यात्। अर्थात् तत् स्वीक्रियते चेत् अन्यासामपि स्मृतीनामनवकाशः स्यात्। अन्यस्मृतयः निरर्थकाः स्युरिति भावः। यदि सांख्यस्मृतिनिरर्थकताभयात् ईश्वरकारणवाद आक्षिप्येत, तर्हि ईश्वरस्य जगत्कारणत्वप्रतिपादकस्मृतयोऽपि निरर्थकाः भवेयुः। ईश्वरस्य जगत्कारणत्वविषये नैकानि प्रमाणानि प्राप्यन्ते। भाष्यकारः श्रीशङ्कराचार्यः बहूनामपि उदाहरणानां प्रामाण्यं निरूपितवान् – "'यत्तत्सूक्ष्ममविज्ञेयम्'[५] इति परं ब्रह्म प्रकृत्य 'स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते'[६] इति चोक्त्वा 'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम'[७] इत्याह। तथाऽन्यत्रापि 'अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते'[८] इत्याह।

'अतश्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पुराणः।
स सर्गकाले च करोति सर्वं संहारकाले च वदति भूयः॥'[९]

इति पुराणे। भगवद्गीतासु च –

'एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥'[१०] इति।

परमात्मानमेव च प्रकृत्याऽपस्तम्बः पठति –

'तस्मात् कायाः प्रभवन्ति सर्वे
स मूलं शाश्वतिकः स नित्यः॥'[११] इति।

एवमनेकशः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते"[१२] इति। एवम् ईश्वरकारणवादस्य नैकानि सन्ति प्रमाणानि।

स्मृतिबलेन प्रत्यवतिष्ठमानस्य दोषस्य स्मृतिबलेन एव उत्तरं प्रदत्तवान् सिद्धान्ती। श्रुतीनां तात्पर्यम् ईश्वरकारणवादे अस्तीति सम्प्रति दर्शितम्। स्मृतीनां विरोधे कस्याश्चन ग्रहणम्, अपरस्याः त्याग इत्येवं भवतीति कारणात् श्रुत्यनुसारिस्मृतय एव प्रमाणत्वेन अङ्गीक्रियन्ते, अन्याश्च अप्रमाणभूताः भवन्ति। तदुक्तं प्रमाणलक्षणे – "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्"[१३] इति।

**कपिलादीनामप्रतिहतज्ञानत्वादपि अतीन्द्रियार्थज्ञानत्वनिरासः-**श्रुतिप्रमाणं विना भिन्नप्रमाणेन अतीन्द्रियार्थस्य ज्ञानं भवतीति सम्भावयितुं न शक्यते। यतो हि तत्र किमपि निमित्तमेव नास्ति। कपिलादिमुनीनाम् अप्रतिहतज्ञानत्वात् तेषाम् अतीन्द्रियार्थदर्शनं भवति इत्यपि न युक्तम्। यतो हि सिद्धेरपि सापेक्षत्वं भवति। धर्मानुष्ठानापेक्षा हि सिद्धिः। स च धर्मः चोदनालक्षणः। अतः पूर्वसिद्धायाः चोदनायारर्थः पश्चिमसिद्धपुरुषवचनवशेन न कथमपि अतिशङ्कितुं शक्यते। सिद्धवचनानि आश्रित्य वेदार्थान् कल्पयित्वा नैके सिद्धाः भवन्ति। तत्प्रकारेण स्मृतिविरोधे जाते श्रुतिं विना अन्यः कोऽपि निर्णायको न भवतीति ज्ञायते। परतन्त्रप्रज्ञस्यापि अकस्मात् कस्याश्चन विशेषस्मृतौ पक्षपातो न युक्तः। यतो हि क्वचित् पक्षपाते जाते पुरुषवैचित्र्यकारणात् तत्त्वानाम् अनवस्थाप्रसङ्ग आपतेत्। तस्मात् स्मृतिविरोधोपन्यासेन श्रुत्यनुसारिस्मृतिषु एव प्रज्ञा संग्रहणीया। स्मृतिरियं श्रुतिमनुसरति, इयं च नेत्येवं प्रकारेण सन्मार्गे प्रवृत्तिः सम्भवति।

## कपिलादिस्मृतिनिराकरणं वेदानुसारिस्मृतिपरिग्रहणं च

कपिलादिस्मृतयः श्रुतिविरुद्धाः। या श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती प्रदर्शिता, तया कापिलं मतं श्रद्धातुं गृहीतुं वा न कथमपि शक्यते। सांख्यप्रणेतृकपिल-श्रुत्युक्तकपिलयोः केवलं शब्दे एव सादृश्यमस्ति। एकः कपिलः सांख्यस्मृतिप्रणेता, अपरश्च श्रुतिप्रसिद्धः सगरपुत्राणां प्रतप्तुः वासुदेवनाम्नः स्मरणात् ज्ञायते। रत्नप्रभायामुच्यते – "अन्यार्थस्य ईश्वरप्रतिपत्तिशेषस्य कपिलसर्वज्ञत्वस्य दर्शनमनुवादः तस्य मानान्तरेण प्राप्तिशून्यस्य स्वार्थसाधकत्वायोगात् न अनुवादमात्रात् सर्वज्ञत्वसिद्धिः"[१४] इति।

मनोः माहात्म्यख्यापनविषये एवं श्रुतिः श्रूयते – "यद्वै किञ्च मनुवदत्तद् भेषजम्"[१५] इति। मनुना च –

"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति॥"[१६]

इति सर्वात्मत्वदर्शनं प्रशंसता कापिलं मतं विन्द्यत इति गम्यते। आत्मा सर्वस्वरूप इत्येतस्मिन् विषये कपिलस्य विप्रतिपत्तिः विद्यते यतो हि तन्मतेन आत्मनो भेदः सम्भवति। सर्वात्मत्वविषये नैकानि प्रमाणानि प्राप्यन्ते। महाभारतेऽपि "बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु"[१७] इति विचार्य "बहवः पुरुषा राजन् सांख्ययोगविचारिणाम्" इति परपक्षमुपन्यस्य तद्व्युदासेन – "बहूनां पुरुषाणां हि यथैका योनिरुच्यते"[१८] तथा "तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्"[१९] इत्युपक्रम्य –

"ममान्तरात्मा तव च ये चान्ये देहसंस्थिताः।
सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्॥"[२०]

"विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः।
एकश्चरति भूतेषु स्वैरचारी यथासुखम्॥"[२१] इति।

एवं सर्वात्मत्वं निरूपितम्। श्रुतिषु अपि सर्वात्मत्वविषये एवं श्रूयते –

"यस्मिन् सर्वाणि भूतान्यात्मैवाऽभूद्विजानतः।
तत्र को मोहः क शोक एकत्वमनुपश्यतः॥"[२२] इति।

इतः सिध्यति यत् केवलं स्वतन्त्रस्य प्रधानस्य कल्पनया एव न, आत्मभेदकल्पनयाऽपि कापिलतन्त्रं वेदविरुद्धं भवति। किञ्च मन्वादिस्मृतिषु सर्वात्मत्वप्रतिपादनादपि कपिलादिस्मृतेः मन्वादिश्रुतिविरुद्धत्वमपि सिध्यति। यथा रवेः स्वरूपविषये निरपेक्षं प्रामाण्यं, तथैव वेदस्य स्वार्थे प्रामाण्यं निरपेक्षम्। पौरुषेयवाक्यानां स्वार्थस्मृतितन्मूलानुभवयोः कल्पनया प्रामाण्यं ज्ञेयमिति व्यवहितं परतः प्रामाण्यमिति विप्रकर्षः। रत्नप्रभायामेवमुच्यते – "समयोः विरोधे हि निरवकाशेन सावकाशं बाध्यम्। इह स्वतः परतः प्रामाण्ययोः वैषम्याद् झटिति निश्चितप्रामाणेयन चाऽनुपसंजातविरोधिना वेदवाक्येन विरुद्धस्मृतेरेव बाध इति भावः"[२३] इति। तस्माद् वेदविरुद्धे विषये स्मृत्यनवकाशदोषप्रसङ्गो न दोषः।

याः स्मृतयो वेदानुसारिण्यः, तेषां ग्रहणं कर्तव्यं, याश्च वेदविरुद्धाः, ताः अग्रहणीयाः। अत्र स्मृत्यनवकाशदोषप्रसङ्गो न दोष इत्युक्तम्। कुतः इति चेदुच्यते – "इतरेषां चानुपलब्धेः"[२४] इति।

## सिद्धान्तस्य दार्ढ्यसम्पादनम्

इतरेषां सांख्यस्मृतिप्रसिद्धानां महदादितत्त्वानां लोके वेदे चानुलब्धेः न सांख्यस्मृतेरप्रामाण्यं दोष इति सिद्धान्तिना उच्यते। प्रधानभिन्नं महदादितत्त्वं प्रधानपरिणामत्वेन स्मृतिषु कल्पितम्। तत् लोके वेदे च नोपलभ्यते। लोके वेदे च प्रसिद्धत्वात् भूतेन्द्रियाणां स्मृतिषु प्रतिपादनं संगच्छते। किन्तु लोकवेदयोरप्रसिद्धत्वात् षष्ठस्य इन्द्रियार्थस्येव स्मृतिषु प्रतिपादनं न सम्भवति।

क्वचित् श्रुतिषु महदादिप्रतिपादनं दृश्यते। किन्तु "आनुमानिकम् अप्येकेषाम्"[२५] इति सूत्रेण श्रुतिः महदादि न प्रतिपादयति इति व्याख्यातव्यम्। कार्यस्य महदादिस्मृतेरप्रामाण्यात् कारणस्य प्रधानस्मृतेरपि अप्रामाण्यमस्तीति युक्तम्। तस्मादपि न स्मृत्यनवकाशदोषप्रसङ्गो दोषः। तर्कावलम्बनं "न विलक्षणत्वात्"[२६] इति सूत्रेण खण्डनं कृतं भगवता भाष्यकारेण श्रीमता शङ्कराचार्येण। एवं सांख्यस्मृतिप्रसिद्धस्य प्रधानभिन्नस्य महदादितत्त्वस्य लोकवेदयोरप्रसिद्धत्वात् सांख्यस्मृतेरप्रामाण्यं न दोषाय इति अत्र प्रतिपादितम्।

**सिद्धान्तानुसारं योगस्मृतीनामपि खण्डनम्-**सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता भवतीति "एतेन योगः प्रत्युक्तः"[२७] इति सूत्रेण ब्रह्मसूत्रे प्रतिपाद्यते। सांख्यस्मृतयस्तु वेदविरुद्धत्वात् निराकृताः। तथैव योगस्मृतिविषयेऽपि प्रत्याख्यानं दृश्यते।

योगेऽपि श्रुतिविरुद्धं प्रधानं स्वतन्त्रमेव कारणमस्ति प्रतिपादितम्। लोकवेदयोरप्रसिद्धं महदादितत्त्वमपि तत्रास्ति प्रतिपादितम्। तर्हि अत्र पूर्ववदेव समानन्यायोऽस्ति। तर्हि किमर्थं पृथक्सूत्रेण तच्छङ्कानिराकरणं क्रियते इति पूर्वपक्षिणां शङ्का भवति। तदा सिद्धान्तिना उच्यते यत् अत्र अधिकशङ्काऽस्तीति। तस्मात् पृथक्सूत्रेण तच्छङ्कानिवारणं क्रियते इति।

सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[२८] इति। श्वेताश्वतरोपनिषदि अपि आसनादिकल्पनापुरःसरं बहुप्रपञ्चं योगविधानं दृश्यते – "त्रिरुन्नतं स्थाप्य समं शरीरम्"[२९] इति। एवं योगविषये बहूनि वैदिकलिङ्गानि उपलभ्यन्ते – "तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्"[३०], "विद्यामेतां योगविधिं च कृत्स्नम्"[३१] इति चैवमादीनि। योगशास्त्रेऽपि "अथ तत्त्वदर्शनाभ्युपायो योगः" इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते। एवं योगस्मृत्यर्थस्य एकदेशे संप्रतिपत्तिकारणात् अष्टकादिस्मृतिरिव योगस्मृतेरपि अनिराकरणीयत्वं सिद्ध्येत्। "अष्टकाः कर्तव्याः", "गुरुरनुगन्तव्यः" इत्यादीनि तु वेदविरुद्धाः। तानि योगस्मृतिषु अपि सम्यक् प्रतिपादितमिति कारणात् योगस्मृतेः ग्रहणं कार्यमिति शङ्का आपतति।

इयमप्यधिका शङ्का अतिदेशेन निवर्त्यते। यतो हि अर्थस्य एकदेशे सम्प्रतिपत्तौ सत्यामपि अन्यदेशे विप्रतिपत्तिरेव दृश्यते। अध्यात्मविषयकस्मृतयः नैकाः सन्ति। तथापि अत्र सांख्ययोगस्मृतिनिराकरणे यत्नः कृतः। यतो हि सांख्ययोगौ परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ। तौ च पुनः शिष्टैः परिगृहीतौ। किञ्च श्रौतलिङ्गेन उपबृंहितौ – "तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः"[३२] इति। किन्तु सांख्यज्ञानेन योगज्ञानेन वा मोक्षो न कदापि कथमपि प्राप्यते। आत्मैकत्वविज्ञानं विना मोक्षस्य अन्यमार्गो नास्ति। तदुक्तम् – "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[३३] इति। किन्तु सांख्याः योगिनश्च च द्वैतिनः। तत्तच्छास्त्रे आत्मैकत्वं न प्रतिपादितम्।

"तत्कारणं सांख्ययोगाभिपन्नम्" इत्यादि यद् दर्शनमुक्तं, तत्र सांख्ययोगशब्दयोः सान्निध्यकारणात् वैदिकमेव ज्ञानं ध्यानं च उच्येते इत्यवगन्तव्यम्। यस्मिन्नंशे सांख्ययोगस्मृतीनां श्रुतौ अविरोधोऽस्ति, तस्मिन्नंशे तासां प्रामाण्यमेव इष्टमस्ति। अर्थात् वेदानुसारिस्मृतिस्थले प्रामाण्यं स्वीकरणीयं, विरुद्धस्थलानि च त्यज्यानि। यथा – "असङ्गो ह्ययं पुरुषः"[३४] इत्यादिश्रुतिप्रसिद्धस्य एवात्मनो विशुद्धत्वं निर्गुणात्मनिरूपणेन सांख्यैः स्वीक्रियते। तथा च योगैरपि "अथ परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः"[३५] इत्येवमादि श्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेन अनुगम्यते। एतेन सर्वाणि तर्कस्मृतयोऽपि निराकरणीयाः। तर्कस्मरणानि तर्कोपपत्तिभ्यां तत्त्वज्ञानाय उपकुर्वन्तु नाम। किन्तु वेदान्तवाक्येभ्य एव केवलं तत्त्वज्ञानं भवति नान्येन केनचित्। "नावेदविन्मनुते तं बृहन्तम्"[३६], "तं त्वौपनिषदं पुरुषं पृच्छामि"[३७] इत्यादिश्रुतयोऽत्र प्रमाणम्।

**उपसंहारः-**मोक्षः परमपुरुषार्थः। तत्सिद्धये एव वेदान्ता आरब्धाः। मोक्षप्रतिपादकसूत्रैः ब्रह्मणः स्वरूपं प्रतिपादितं शाङ्ककभाष्यसमन्विते ब्रह्मसूत्रे। भिन्नभिन्नदार्शनिकाः तत्तच्छास्त्रे तत्तद्युक्तिप्रदर्शनेन परमपुरुषार्थं मोक्षं प्रतिपादितवन्तः। किन्तु

आत्मनः एकत्वविषये अनेकेषामस्ति विप्रतिपत्तिः। अद्वैतवेदान्तनये आत्मा एक एव। श्रुतिषु तद् बहुधा प्रतिपादितम्। किन्तु पूर्वपक्षिणः एतस्योपरि विविधशङ्काः कुर्वन्ति। अतः श्रीमान् शङ्कराचार्यः स्वभाष्ये ताः शङ्काः निवार्य अद्वैतमतं सुदृढतया प्रतिष्ठापितवान्। ब्रह्मसूत्रस्य द्वितीयाध्याये प्रथमपादे स्मृत्यधिकरणेन योगप्रत्युक्त्यधिकरणेन च सांख्ययोगस्मृतयः निराकृताः। वेदविरुद्धत्वात् काणादादिस्मृतयः त्यज्याः, मन्वादिस्मृतयश्च वेदानुसारित्वात् परिग्रहणीयाः। एवमेव योगस्मृतिरपि वेदविरुद्धत्वात् त्यज्या एव। यासु स्मृतिषु वेदाननुसारित्वं सम्यग् अवगम्यते, ताः ग्रहणीयाः, अन्याश्च त्यक्तव्या इति भावः। एवमत्र प्रबन्धे शाङ्करभाष्यानुसारं श्रुतियुक्त्यादिभिः स्मृतिविरोधमुपन्यस्य परिहृतम्। एवञ्च अधिकशङ्काकारणाद् योगस्मृतिरपि प्रत्याख्याता। तथा चात्र स्मृतिनिराकरणं प्रदर्शितमिति शम्।

**सन्दर्भाः**


१. शाङ्करभाष्यम् (ब्रह्मसूत्रम् २.१.१)
२. श्वेताश्वतरोपनिषद् (५.२)
३. स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् (ब्रह्मसूत्रम् २.१.१)
४. स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् (ब्रह्मसूत्रम् २.१.१)
५. महाभारतम् (१२.३३४.२९)
६. महाभारतम् (१२.३३४.३०)
७. महाभारतम् (१२.३३४.३१)
८. महाभारतम् (१२.३३९.३१)
९. ब्रह्मपुराणम् (१.१.१७४)
१०. श्रीमद्भगवद्गीता (७.६)
११. धर्मसूत्रम् (१.८.२३.२)
१२. शाङ्करभाष्यम् (ब्रह्मसूत्रम् २.१.१)
१३. जैमिनिसूत्रम् (१.३.३)
१४. रत्नप्रभा (ब्रह्मसूत्रशाङ्करभाष्यम् २.१.१)
१५. तैत्तिरीयसंहिता (२.२.१०.२)
१६. मनुस्मृतिः (१२.९१)
१७. महाभारतम् (१२.३५०.१)
१८. महाभारतम् (१२.३५०.२६)
१९. महाभारतम् (१२.३५०.२७)
२०. महाभारतम् (१२.३५१.४)
२१. महाभारतम् (१२.३५१.५)
२२. ईशावास्योपनिषद् (७)
२३. रत्नप्रभा (ब्रह्मसूत्रशाङ्करभाष्यम् २.१.१)
२४. ब्रह्मसूत्रम् (२.१.२)
२५. ब्रह्मसूत्रम् (१.४.१)
२६. ब्रह्मसूत्रम् (२.१.४)
२७. ब्रह्मसूत्रम् (२.१.३)
२८. बृहदारण्यकोपनिषद् (२.४.५)

२९. श्वेताश्वतरोपनिषद् (२.८)
३०. कठोपनिषद् (२.६.११)
३१. कठोपनिषद् (२.६.१८)
३२. श्वेताश्वतरोपनिषद् (६.१३)
३३. श्वेताश्वतरोपनिषद् (३.८)
३४. बृहदारण्यकोपनिषद् (४.३.१६)
३५. जाबालोपनिषद् (५)
३६. तैत्तिरीयब्राह्मणम् (३.१२.९.७)
३७. बृहदारण्यकोपनिषद् (३.९.२६)

**परिशीलितग्रन्थतालिका**


१. बृहदारण्यकोपनिषद् (सानुवाद शाङ्करभाष्यसहित)। गीताप्रेस। गोरखपुर।
२. गोयन्दका, श्रीहरिरकृष्णदास (अनुवादक)। श्रीमद्भगवद्गीता (शाङ्करभाष्य हिन्दी-अनुवादसहित)। गीताप्रेस। गोरखपुर।
३. शास्त्री, आचार्यः जगदीशः (सम्पादकः)। ब्रह्मसूत्रशाङ्करभाष्यम्। मोतीलाल बनारसीदास। देहली। २०१८। १९८० (प्रथमं संस्करणम्)।
४. शास्त्री, श्री एस. सुब्रह्मण्यः (सम्पादकः)। उपनिषद्भाष्यम् (खण्ड – २)। दक्षिणामूर्ति मठ प्रकाशन। वाराणसी।
५. दाहालः, आचार्यः लोकमणिः। संस्कृतसाहित्येतिहासः। चौखम्बा कृष्णदास अकादेमी। वाराणसी। २०१६।
६. पंडा, गंगाधर (प्रकाशक)। संस्कृत वाङ्मय का बृहद् इतिहास। उत्तर प्रदेश संस्कृत संस्थान। लखनऊ।
७. Advaita Sharada https://advaitasharada.sringeri.net/

# चतुःश्लोक्यां चतुःसूत्रीसादृश्यम् - एकमध्ययनम्

शुभदीपदासः,
शोधच्छात्रः, संस्कृतदर्शनविभागः,
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्,
वेलुडमठम्, हाओडा - ७११२०२
दूरवाणीसंख्या - 7407705668
अणुसङ्केतः - subhadeep.das.vedvid@gmail.com

**शोधसारः-** शङ्कराचार्यप्रवर्तितस्याद्वैतवादस्य प्राणभूतं हि बादरायणप्रणीतस्य ब्रह्मसूत्रस्य आद्यसूत्रचतुष्टयम्। सूत्रचतुष्टयीभाष्ये भगवत्पादैः अद्वैतवादस्य सर्वेऽपि प्रमुखप्रमेयाः प्रतिपादिताः। ततस्तन्मतानुयायी श्रीसर्वज्ञात्ममुनिः स्वग्रन्थे संक्षेपशारीरकाभिधे भाष्यकारमनुसरन् चतुर्णां श्लोकानां प्रणयनमकरोत्। तच्च आद्यश्लोकचतुष्टयं चतुःश्लोकीति प्रसिद्धम्। प्रस्तुते शोधप्रबन्धे प्रथमतः संक्षपेशारीरकग्रन्थस्य स्वरूपम् अवधारितम्। तदनु प्रत्येकं श्लोकस्य अन्वयसामान्यार्थौ उक्त्वा विशिष्टव्याख्यानं विहितम्। तदवसरे च एतैः चतुर्भिः श्लौकेः सह ब्रह्मसूत्रस्य चतुर्णां सूत्राणां कीदृशम् अभिधेयसाम्यम् अस्तीति विस्तरशः उपपादयितुं यथामति प्रयत्नः विहितः।

**कूटशब्दाः**– संक्षेपशारीरकम्, चतुःश्लोकी, चतुःसूत्री, तत्पदार्थः, त्वम्पदार्थः, अखण्डार्थः, प्रमाणम्।

**भूमिका** - परमहंसपरिव्राजकश्रीमच्छङ्करभगवत्पादाः बादरायणप्रणीतं ब्रह्मसूत्रमादाय वेदान्तविचाररत्नमण्डितं प्रसन्नगम्भीरं शारीरकमीमांसाभाष्यं प्रणिन्युः। तस्य भव्यभाष्यस्य सुष्ठु अर्थबोधोपपत्तये श्रीसर्वज्ञात्ममुनिः संक्षेपशारीरकाभिधेयं ग्रन्थं व्यरचयत्। शारीरकभाष्यस्थाः सगुणब्रह्मविचारा अन्ये प्रासङ्गिकविचाराश्चात्र ग्रन्थे न कृताः। केवलं निर्गुणब्रह्मविषयेऽत्र विशेषेण विचारः कृतः इत्यतो ग्रन्थस्य नामधेयं संक्षेपेशारीरकमिति युक्तम्। एवं ग्रन्थस्यास्य वेदान्तदर्शनैकदेशेन निर्गुणब्रह्मज्ञानेन सह सम्बद्धत्वात् शास्त्रकार्यान्तरावगतिविषयकत्वाच्च प्रकरणत्वमुपपद्यते। तथाह्युक्तं प्रकरणलक्षणम् –

“शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥”

स्वयं ग्रन्थकारोऽपि प्रथमाध्यायस्य “संक्षेपतः प्रकरणं करवाणि नित्यम्”[1] इति श्लोके “विमृशन्त्विदं प्रकरणम्”[2] इति श्लोके च ग्रन्थस्य प्रकरणत्वमुदघोषयत्। यथा मीमांसाशास्त्रे शाबरभाष्योपरि कुमारिलभट्टस्य श्लोकवार्तिकग्रन्थो वर्तते तथा अद्वैतवेदान्तशास्त्रेऽपि शाङ्करभाष्योपरि विरचितोऽयं ग्रन्थः वार्तिकरूप इति मन्तव्यम्।

शारीरकभाष्यमिव अयं ग्रन्थः समन्वयाविरोधसाधनफलाख्येषु चतुर्षु अध्यायेषु विभक्तः। तत्र प्रथमाध्याये त्रिषष्ट्युत्तरपञ्चशतं (५६३), द्वितीयाध्याये अष्टचत्वारिंशदुत्तरद्विशतं (२४८), तृतीयाध्याये षट्षष्ट्युत्तरत्रिशतं (३६६), चतुर्थाध्याये च त्रिषष्टिः (६३) श्लोकाः सन्ति। सम्प्रति संक्षेपशारीरकस्य चतस्रः टीकाः समुपलभ्यन्ते – १) मधुसूदनसरस्वतीविरचितः सारसंग्रहः २) रामतीर्थस्वामिप्रणीता अन्वयार्थप्रकाशिका ३) नृसिंहाश्रमस्य तत्त्वबोधिनी ४) अग्निचित्पुरुषोत्तमस्य सुबोधिनी।

**चतुःश्लोक्यां चतुःसूत्रीसादृश्यम्-** यथा चतुःसूत्री ब्रह्मसूत्रस्य प्राणस्वरूपा तथा चतुःश्लोकी संक्षेपशारीरकस्य प्राणभूता। ग्रन्थस्य प्रथमाध्यायस्य आदिमश्लोकचतुष्टयं चतुःश्लोकी इत्युच्यते। वेदान्तशास्त्रे मूलतः प्रमेयत्रयं प्रसिद्धम्– त्वम्पदार्थः तत्पदार्थः तयोरभेदश्च। ब्रह्मसूत्रे प्रथमे “अथातो ब्रह्मजिज्ञासा”[3] इति सूत्रे त्वम्पदार्थस्य, द्वितीये “जन्माद्यस्य यतः”[4] इति सूत्रे तत्पदार्थस्य, चतुर्थे “तत्तु

1 संक्षेपशारीरकम्, प्रथमाध्यायः, दशमश्लोकः
2 संक्षेपशारीरकम्, प्रथमाध्यायः, एकादशश्लोकः
3 ब्रह्मसूत्रम् - १.१.१
4 ब्रह्मसूत्रम् - १.१.२

समन्वयात्"[1] इति सूत्रे अखण्डार्थस्य, तृतीये "शास्त्रयोनित्वात्"[2] इति सूत्रे प्रमेयसाधकानां प्रमाणानाञ्च निरूपणं विहितम्। इत्थमस्मिन् संक्षेपशारीरकेऽपि प्रथमश्लोके तत्पदार्थस्य द्वितीयश्लोके त्वम्पदार्थस्य तृतीयश्लोके अखण्डार्थस्य चतुर्थश्लोके च प्रमाणानां प्रतिपादनं कृतम्।

**प्रथमश्लोकार्थविचारः-** चतुःश्लोक्यां प्रथमश्लोको हि -

"अनृतजडविरोधि रूपमन्तत्रयमलबन्धनदुःखताविरुद्धम्।
अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमि॥"[3]

**अन्वयः** – अनृतजडविरोधि रूपम् अन्तत्रयमलबन्धनदुःखताविरुद्धम् अतिनिकटम् अविक्रियं मुरारेः परमपदं प्रणयात् अभिष्टवीमि।

**सामान्यार्थः**– मिथ्याजडप्रपञ्चविरोधि सर्वरूपं त्रिविधपरिच्छेदशून्यं रागद्वेषधर्माधर्मदुःखादिविरहितम् अत्यन्तं समीपवर्ति जन्मादिविकाररहितं मुरारेः परमपदं श्रद्धया स्तौमि।

**विशिष्टपर्यालोचनम्-** मुरनामकस्य दैत्यस्य संहर्तृत्वात् भगवान् श्रीकृष्णः मुरारिरित्युच्यते इति पुराणेषु प्रसिद्धम्। सर्वज्ञात्ममुनिः ईश्वरविषये बिम्बप्रतिबिम्बरूपं पक्षद्वयमपि स्वीकृतवान्। तथाह्युक्तं तेन – "बिम्बे तमोनिपतिते प्रतिबिम्बके वा" इति। प्रथमपक्षे भगवान् कृष्णः सत्त्वप्रधानमायाप्रतिबिम्बितं चैतन्यम्। तस्य परमपदं नाम बिम्बचैतन्यम्। श्रीमद्भगवद्गीतायां स्वयं भगवतैव उक्तम्– "ततः पदं तत्परिमार्गितव्यम्" [4] "तद्धाम परमं मम" [5] इति। द्वितीयपक्षे तु भगवान् श्रीकृष्णः बिम्बचैतन्यम्। तस्य परमपदं नाम बिम्बप्रतिबिम्बभावरहितं शुद्धचैतन्यम्। अथवा वेष्टनार्थकात् मुरधातोः निष्पन्नस्य मुरशब्दस्यार्थो भवति स्वरूपावरकमज्ञानम्। तस्याज्ञानस्य अरिर्निवर्तकं वृत्तिप्रतिबिम्बितचैतन्यम्। तस्य परमपदं भवति सर्वोपाधिविनिर्मुक्तचैतन्यम्। अथवा परा मा (मानं) यस्य तत्परमम् इति व्युत्पत्त्या निष्पन्नस्य परमशब्दस्यार्थो भवति अपरिच्छिन्नम्। तदेव अपरिच्छिन्नं चैतन्यं मुक्तोपसृप्यत्वेन पदनीयत्वात् पदमित्युच्यते। श्रुतिरपि आह – "तद्विष्णोः परमं पदम्"[6] इति। अथवा मुरोऽबोधः अरिः आच्छादको यस्य स मुरारिरिति मुरारिपदेन शुद्धचैतन्यस्य ग्रहणम्। तदेव परमपदम्। अस्मिन् पक्षे मुरारेः इति षष्ठी 'राहोः शिरः' इतिवत् अभेदार्थिका।

प्रणयशब्दस्य श्रद्धा इत्यर्थः। केचित् प्रणयशब्दस्य भागत्यागलक्षणारूपः प्रकृष्टनयः इत्यर्थं स्वीकुर्वन्ति। परन्तु स्तुतौ तस्य नयस्य उपयोगाभावात् रूढ्यर्थस्य परित्यागे किमपि समुचितं कारणं नोपलभ्यते। तस्मादयं पक्षो न समीचीनः। अभिष्टवीमि इत्यस्य स्तौमि इत्यर्थः। अत्र निर्गुणब्रह्मणि गुणासम्भवात् केचन अभिष्टवीमि इत्यस्य एकाग्रचित्ततया अभेदचिन्तनम्, अन्ये च तत्स्वरूपनिरूपणपरकग्रन्थनिर्माणमिति स्वीकुर्वन्ति। परन्तु निर्गुणे ब्रह्मणि वास्तविकगुणाभावेऽपि कल्पितगुणाश्रयतया तस्य स्तुतिरुपपद्यते। तस्मात् स्तुतेः गुणिनिष्ठगुणाभिधानरूपस्य मुख्यार्थस्य सम्भवे गौणार्थस्वीकारः अन्याय्यः।

जगति जन्मादयः षड् भावविकाराः, जीवे जाग्रदादयो विकाराः, ईश्वरे च सृष्टिकर्तृत्वादयो विकाराः सन्ति। तस्मिन् निर्गुणे ब्रह्मणि एतेषु एकोऽपि विकारो नास्ति। तस्मादेव तस्य विशेषणरूपेण अविक्रियमिति पदं प्रयुक्तं श्लोके। "न जायते म्रियते वा"[7] "अविनाशी वाऽरे अयमात्मानुच्छित्तिधर्मा"[8] इत्यादयः श्रुतयोऽत्र प्रमाणभूताः सन्ति। निर्विशेषे शुद्धचैतन्ये कथं प्रपञ्चगतविकाराभाव इति प्रदर्शयितुम् अनृतजडविरोधि इति पदम्। परिणामिपदार्थाः सर्वदा सजातीयपदार्थात्मनैव परिणमन्ते, न तु विजातीयपदार्थात्मना। निर्गुणं ब्रह्म प्रपञ्चविरोधि अस्ति। यतो हि इदं निर्गुणब्रह्म सत्यस्वयम्प्रकाशस्वरूपं प्रपञ्चश्च मिथ्याजडभूतः। इत्थं ब्रह्मप्रपञ्चयोः परस्परं साजात्याभावात् तयोः विकारविकारिभावो न सम्भवति। निर्गुणब्रह्मणः अनृतजडविरोधित्वे कारणमस्ति अन्तत्रयविरोधः।

1 ब्रह्मसूत्रम् - १.१.४
2 ब्रह्मसूत्रम् - १.१.३
3 संक्षेपशारीरकम्, प्रथमाध्यायः, प्रथमश्लोकः
4 श्रीमद्भगवद्गीता - १५.४
5 श्रीमद्भगवद्गीता - १५.६
6 कठोपनिषत् - १.३.९
7 कठोपनिषत् - १.२.८
8 बृहदारण्यकोपनिषत् - ४.५.१४

प्रकृते अन्तत्रयपदेन देशकृतः कालकृतः वस्तुकृतः इति त्रिविधः परिच्छेदो गृह्यते। निर्गुणब्रह्म एतत्त्रिविधपरिच्छेदविरहितमित्यतः अनित्यपरिच्छिन्नसद्वितीयप्रपञ्चेन सह तस्य विरोधः। श्रुतयोऽपि आहुः – "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्"[1] "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"[2] "नित्यं विभुं सर्वगतं सुसूक्ष्मम्"[3] इत्यादि। निर्गुणब्रह्मणि कथं जीवगतजाग्रदादिविकाराभाव इति प्रदर्शयितुं मलबन्धनदुःखताविरुद्धमिति पदम्। "न वर्धते कर्मणा"[4] "शुद्धमपापविद्धम्"[5] "एष एव परम आनन्दः"[6] इत्यादयः श्रुतयः ब्रह्मणो नित्यशुद्धपरमानन्दस्वरूपत्वं प्रतिपादयन्ति। अतो रागद्वेषादिजीवविकारास्तस्मिन्न सम्भवन्ति। ईश्वरगतजगत्स्रष्टृत्वादिविकाराणां ब्रह्मणि निराकरणाय अतिनिकटमिति विशेषणं प्रयुक्तम्। तार्किकादयः ईश्वरं परोक्षं मन्यन्ते। किन्तु ब्रह्म साक्षादपरोक्षं प्रत्यगात्मस्वरूपम्। अतस्तस्मिन् ईश्वरगतविकाराः नैव सम्भवन्ति। प्रागुपलब्धेः चेतनस्य सत्ता न सिद्ध्यतीति पूर्वपक्षमतं निराकर्तुं श्लोके रूपमिति पदमुपात्तम्। तत् शुद्धचैतन्यं सर्वस्वरूपं सर्वाधिष्ठानं सर्वानुस्यूतं चास्ति। "इदं सर्वं यदयमात्मा"[7] "ब्रह्मैवेदं सर्वम्"[8] इत्यादयः श्रुतयोऽत्र प्रमाणभूताः सन्ति। अतस्तत्सत्तानङ्गीकारे सति समस्तस्य प्रपञ्चस्य सर्वेषामनुभवानां चाभावः अङ्गीकर्तव्यः स्यात्। तच्चानुचितम्।

**द्वितीयश्लोकार्थविचारः-** प्रथमश्लोके तत्पदार्थं निरूप्य त्वम्पदार्थनिरूपणपरकं द्वितीयश्लोकं प्रणिनाय ग्रन्थकारः –

"स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूमभावा।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा प्रत्यक्चितिर्विजयते भुवनैकयोनिः॥"[9]

**अन्वयः-** स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूमभावा स्वाभाविकस्वमहिमस्थितिः अस्तमोहा भुवनैकयोनिः प्रत्यक्चितिः विजयते।

**सामान्यार्थः–** यस्य स्वाज्ञानवशात् कल्पितैः जगत्परमेश्वरत्वजीवत्वादिभिः ब्रह्मभावः कलुषितो जातः, यस्य परमार्थतः स्वाभाविके स्वमहिम्नि स्थितिर्वर्तते, यस्य मोहः विनष्टः तत् भुवनत्रयैककारणम् अहङ्कारोपलक्षितं प्रत्यक्चेतनं विराजते।

**विशिष्टपर्यालोचनम्-** श्लोकस्थं स्वाज्ञानकल्पितेत्यादिपदं त्वम्पदस्य वाच्यार्थं निरूपयति। स्वाज्ञानवशेन प्रत्यक्चेतने जगत्, ईश्वरत्वं, जीवत्वं, जीवजगतोर्भेदः, जीवेश्वरयोर्भेदः, जीवानां परस्परभेदः, जगतः परस्परभेदः, जगदीश्वरयोर्भेदः इत्येते कल्पिताः। तेन प्रत्यक्चेतनस्य वास्तविको भूमभावः अर्थात् ब्रह्मभावः तिरोहितो जातः। तस्मात् स आत्मनि कर्तृत्वभोक्तृत्वादिकं समारोप्य दुःखमनुभवति। स्वाभाविकेत्यादिपदं त्वम्पदस्य लक्ष्यार्थं निरूपयति। परमार्थतः प्रत्यक्चेतनस्य स्वाभाविके पूर्णानन्दस्वरूपे स्वमहिम्नि एव स्थितिरस्ति। श्रुतावप्याम्नातम्– "स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि"[10] इति। पूर्वं यः स्वाज्ञानकृतब्रह्मभावतिरोभाव उक्तः तस्य परिच्छन्नत्वारोपमात्रे तात्पर्यं, न तु स्वरूपहानौ। अर्थात् यथा रज्जौ सर्पत्वारोपकाले वास्तविकरज्जुत्वं न निवर्तते, अन्यथा प्रतीयते केवलं तथा संसारावस्थायामपि ब्रह्मभावो न निर्वर्तते, अन्यथा प्रतीयते केवलम्।

नन्वज्ञानस्य अनादित्वात् तस्य निवृत्तिर्न सम्भवतीति शङ्कायाः समाधानम् अस्तमोहा इति पदेन कृतम्। यथा तार्किकाणां प्रागभावस्य अनादित्वेऽपि नाशो भवति तथा अज्ञानस्यापि नाशः स्वीक्रियते। अज्ञाने निवृत्ते सति प्रत्यगात्मनः स्वस्वरूपावस्थितिः सम्भवति। अस्तमोहा इत्यत्र अस्तपदस्य अध्यस्तमित्यपि अर्थो भवितुमर्हति। तदा अज्ञानस्य अध्यस्तत्वात् स्वरूपावस्थित्यवरोधे सामर्थ्यं नोपपद्यते। ननु लोके कल्पितरजतादेराधारः शुक्त्यादिः अज्ञानाश्रयो न भवति। अतः प्रत्यक्चेतनमेव

1 बृहदारण्यकोपनिषत् - २.५.१९
2 छान्दोग्योपनिषत् - ६.२.१
3 मुण्डकोपनिषत् - १.१.६
4 बृहदारण्यकोपनिषत् - ४.४.२३
5 ईशावास्योपनिषत्, अष्टमश्लोकः
6 बृहदारण्यकोपनिषत् - ४.३.३३
7 बृहदारण्यकोपनिषत् - २.४.६
8 बृहदारण्यकोपनिषत् - २.५.१
9 संक्षेपशारीरकम्, प्रथमाध्यायः, द्वितीयश्लोकः
10 छान्दोग्योपनिषत् - ७.२४.१

स्वाज्ञानकल्पितजगदादेराधार इति यदुक्तं तदयुक्तमिति शङ्कां निराकर्तुं भुवनैकयोनिरिति पदोपादानम्। दृष्टान्ते कल्पितरजतादेराधारः शुक्त्याद्यवच्छिन्नं चैतन्यं, न तु शुक्त्यादि। तच्च अज्ञानाश्रयो भवितुमर्हति। एवं प्रत्यक्चेतनमपि स्वाज्ञानाश्रयं भवितुमर्हतीति न कोऽपि दोषः।

**तृतीयश्लोकार्थविचारः-** प्रथमद्वितीयश्लोकयोः तत्त्वम्पदार्थौ निरूपयित्वा अखण्डवाक्यार्थं निरूपयति तृतीयश्लोके –

"प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं प्रक्षीणकारणविकारविभागमेकम्।
चैतन्यमात्रपरमार्थनिजस्वभावं प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम्॥"[1]

**अन्वयः**– प्रत्यक्प्रमाणकम् असत्यपराक्प्रभेदं प्रक्षीणकारणविकारविभागं चैतन्यमात्रनिजस्वभावम् एकं प्रत्यञ्चम् अच्युतं नित्यं प्रणतोऽस्मि।

**सामान्यार्थः**– यत्र प्रत्यक्स्वरूपमेव प्रमाणम्, बाह्यबुद्धीन्द्रियादिप्रपञ्चो मायाकाशादिकार्यकारणविभागश्च यत्र बाधितौ, चैतन्यमेव यस्य वास्तविकस्वरूपं, यच्चैकं तत् प्रत्यगात्माभिन्नम् अच्युतरूपं परमपदं नित्यं प्रणमामि।

**विशिष्टपर्यालोचनम्-** प्रत्यगभिन्नाच्युतात्मनः नमस्कारः अस्मिन् श्लोके विहितः। अत्र प्रत्यक्पदेन त्वम्पदार्थस्य अच्युतपदेन च तत्पदार्थस्य निर्देशः कृतः। प्रत्यञ्चमच्युतमिति समानविभक्त्यन्तप्रयोगदर्शनात् एकमिति विशेषणबलाच्च वाक्यार्थस्य अखण्डता अवगम्यते। ननु तत्त्वम्पदयोः वाच्यार्थयोः अत्यन्तभिन्नत्वात् तयोरेकत्वं कथं सम्भवतीति शङ्काया निराकरणाय चैतन्येत्यादिपदम्। चैतन्यमात्रमेव परमार्थः अत्यन्ताबाध्यः परमानन्दरूपत्वेन परमप्रयोजनरूपो वा निजोऽनौपाधिकः स्वभावः स्वरूपं यस्य स चैतन्यमात्रपरमार्थनिजस्वभावः इति विग्रहेण एतयोः पदयोः लक्ष्यार्थः चैतन्यमात्रमिति ज्ञातुं शक्यते। तस्मात् एतयोः वाच्यार्थे भेदे सत्यपि लक्ष्यार्थे भेदाभावात् एकत्वमुपपद्यते।

ननु सद्वितीयस्य प्रत्यगात्मनः अद्वितीयेन परमात्मना सह कथमभेद इति शङ्कोपशमाय असत्येत्यादिपदम्। अस्य प्रत्यगात्मनः बाह्यः दृश्यप्रपञ्चः परमार्थदृष्ट्या अत्यन्तमिथ्याभूतः अस्तीति तस्यापि अद्वितीयत्वमेव। ननु एकस्तत्पदार्थः परमात्मा आकाशाद्यनन्तविकारात्मना कथं परिणमते इति संशयविनाशार्थं प्रक्षीणेत्यादिपदम्। संसारदशायां प्रतीयमानः आकाशादिकार्यप्रपञ्चः परमार्थतो नास्तीति परमात्मनः एकरसत्वं न हीयते। एवं पदार्थद्वयसंशोधनानन्तरं वाक्यार्थं निरूपयति एकमिति पदेन। सर्वेषामपि पदानां तत्रैव तात्पर्यवशात् तदेकम् अखण्डैकरसं चैतन्यमेव वाक्यार्थः इति अखण्डवाक्यार्थबोधो जायते।

**चतुर्थश्लोकार्थविचारः-** तत्त्वम्पदार्थमहावाक्यार्थरूपं प्रमेयत्रयम् आद्यश्लोकत्रये प्रतिपाद्य प्रमाणनिरूपणं करोति चतुर्थश्लोके ग्रन्थकारः –

"औत्पत्तिकी शक्तिरशेषवस्तुप्रकाशने कार्यवशेन यस्याः।
विज्ञायते विश्वविवर्तहेतोर्नमामि तां वाचमचिन्त्यशक्तिम्॥"[2]

**अन्वयः**– विश्वविवर्तहेतोः यस्याः कार्यवशेन अशेषवस्तुप्रकाशने औत्पत्तिकी शक्तिः विज्ञायते ताम् अचिन्त्यशक्तिं वाचं नमामि।

**सामान्यार्थः**– यस्या विश्वविवर्तहेतुभूताया वाण्याः वैदिकप्रमारूपं कार्यमवलोक्य अशेषवस्तुप्रकाशने स्वाभाविकी शक्तिरवगम्यते ताम् अचिन्त्यशक्तियुतां वाग्देवीं नमामि।

**विशिष्टपर्यालोचनम्-** ब्रह्मसूत्रे शास्त्रयोनित्वाधिकरणस्य प्रथमवर्णके ब्रह्म वेदोपादानं द्वितीयवर्णके च ब्रह्म वेदप्रमाणकमिति प्रतिपादितम्। इमौ द्वावपि सिद्धान्तौ अस्मिन् श्लोके सन्निवेशितौ। विश्वविवर्तहेतोरिति पदेन प्रथमवर्णकसिद्धान्तः उक्तः। विश्वः सर्वप्रपञ्चः विवर्तो यस्य तत् ब्रह्म। तच्च ब्रह्म हेतुः उपादानं यस्याः सा विश्वविवर्तहेतुः वेदवाणी। श्रुतिरपि आह – "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः"[3] इति। द्वितीयवर्णकसिद्धान्तः श्लोकस्य प्रथमार्धेन प्रतिपादितः। "सर्वं खल्विदं ब्रह्म"[4] इत्यादिश्रुतेः अशेषवस्तु

1 संक्षेपशारीरकम्, प्रथमाध्यायः, तृतीयश्लोकः
2 संक्षेपशारीरकम्, प्रथमाध्यायः, चतुर्थश्लोकः
3 बृहदारण्यकोपनिषत् - २.४.१०
4 छान्दोग्योपनिषत् - ३.१४.१

यत् ब्रह्म तस्य प्रकाशने स्वाभाविकी शक्तिः वेदे एव अस्ति। परन्तु अलौकिकत्वात् सा शक्तिः ब्रह्मसाक्षात्कारे सति ज्ञायते, न तु प्रत्यक्षेण। यद्यपि सा वेदवाक् निखिलशब्दागोचरं ब्रह्म शक्त्या प्रकाशयितुं न शक्नोति "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"[1] इत्यादिश्रुतेः तथापि लक्षणया वेदः ब्रह्म प्रकाशयतीति षड्विधतात्पर्यनिर्णायकलिङ्गात् गम्यते। एवं प्रत्यगभिन्नब्रह्मणा सह वेदान्तवाक्यानां प्रतिपाद्यप्रतिपादकभावः सिद्ध्यति।

**उपसंहृतिः-** अद्वैतवेदान्तदर्शने वार्तिकस्थानीयं सर्वज्ञात्ममुनिप्रणीतं संक्षेपशारीरकम्। अमुष्मिन् ग्रन्थकुसुमे आदिमश्लोकचतुष्टयं चतुःश्लोकी इत्यभिधीयते। बादरायणप्रणीतस्य ब्रह्मसूत्रस्य आदिमसूत्रचतुष्टयं चतुःसूत्री इति कथ्यते। अतः ग्रन्थस्य आद्यभागे स्थितत्वेन चतुःश्लोकीचतुःसूत्र्योः स्थानसाम्यं तु सुतरां परिलक्ष्यते। तदतिरिच्य सूत्राभिधेयैः सह श्लोकाभिधेयानामपि सादृश्यमस्ति इति श्लोकचतुष्टयार्थविवरणेन अधिगन्तुं शक्यते। अतः अन्वयसामान्यार्थविशिष्टपर्यालोचनपुरःसरं चतुर्णां श्लोकानाम् अर्थाः विस्तरेण समुपवर्णिताः। प्रबन्धोऽयं समेषामुदितोदितानां शास्त्रज्ञानपिपासूनि चेतांसि आह्लादयेदिति आशास्महे।

## परिशीलितग्रन्थसूची

1. संक्षेपशारीरकम्। वैद्योपाह्वरङ्गनाथशास्त्री (सम्पा.)। पुनानगरम् : आनन्दाश्रममुद्रणालयम्।

2. सर्वज्ञात्ममुनिः। १९८७। संक्षेपशारीरकम् (पञ्चप्रक्रियासहितम्) । स्वामियोगीन्द्रानन्दः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन। सर्वज्ञात्ममुनिः। १९१८।

3. शङ्कराचार्यः। २०१८। ब्रह्मसूत्रशाङ्करभाष्यम्। जगदीशशास्त्री (सम्पा.)। दिल्ली : मोतीलाल बनारसी दास।

4. शङ्कराचार्यः। २०१६। श्रीमद्भगवद्गीताभाष्यम् (प्रथमः खण्डः)। श्रीमणिद्राविडशास्त्री (सम्पा.)। वाराणसी : दक्षिणामूर्तिमठप्रकाशनम्।

5. शङ्कराचार्यः। २०१६। श्रीमद्भगवद्गीताभाष्यम् (द्वितीयः खण्डः)। श्रीमणिद्राविडशास्त्री (सम्पा.)। वाराणसी : दक्षिणामूर्तिमठप्रकाशनम्।

1 तैत्तिरीयोपनिषत् - २.९.१

# महाकविकालिदासकृते विक्रमोर्वशीयत्रोटके दोषाभासविवेकः

सुमन्तपात्रः (शोधच्छात्रः)
रामकृष्ण-मिशन्-विद्यामन्दिरम्, बेलुरमठः
हाउडा, पश्चिमवङ्गम्
**Email-id-** sumanta.patra.vvv@gmail.com
**Mobile - 7864022344**

- **शोधसारः(Abstract)**अस्मिन् शोधपत्रेऽस्माभिः *विक्रमोर्वशीयत्रोटके* विद्यमानानां दोषाभासानां विवेचनं कृतम्। *विक्रमोर्वशीयत्रोटके* क्वचिद् दोषोऽस्तीति आपाततः प्रतीयते परन्तु पारमार्थिकदृष्ट्या तत्र दोषो नापि भवितुमर्हति। एवंविधानां स्थलानां शास्त्रयुक्त्या विचारः कृतः। दोषाणां लक्षणमपि यथास्थलम् आलोचितं समासेन।

- **कूटशब्दः(Keywords)** कालिदासः, *विक्रमोर्वशीयत्रोटकम्*, काव्यदोषः, दोषाभासः, *काव्यप्रकाशः*, *काव्यकौमुदी*

- **उपोद्घातः(Introduction)** विश्वस्मिन् विश्वे ये खलु सुकवयः स्वप्रतिभाभासा काव्यनभसि शुभ्रांशुरिव शोशुभ्यन्ते, तेषु गजमुक्तेव कविमूर्धन्यभूतो वैदर्भीरीतिप्रगल्भ उपमासम्राड् भूतनाथप्रियो यशस्वी प्रतिष्ठितकीर्तिः कविकुलगुरुः महाकविकालिदास आसीद् अन्यतमः। यस्य यशःकारणं केवलं काव्यम्। सन्ति सप्त काव्यानि तस्य महाकवेः सुप्रसिद्धानि। तेषु रसमयेषु रसप्रसिद्धेषु काव्येष्वपि दोषदर्शनेच्छुभिः समालोचकैः अदोषस्थलेऽपि क्वचित् काव्यदोषा दर्शिताः। किञ्च क्वचिद् अस्माकमपि अज्ञानवशतः *विक्रमोर्वशीये* दोषोऽस्तीति भ्रमो भवति। तेषां वस्तुतो *विक्रमोर्वशीये* विद्यमानां दोषाभासानां सम्यक्तया दर्शनम्, अनुसन्धानम्, अन्वेषणम्, अध्ययनं वा करिष्यतेऽस्मिन् शोधपत्रे।

अथ महाकविकालिदासकृतेषु काव्येषु *विक्रमोर्वशीये* विद्यमानानां दोषाभासानां विवेचनमिह प्रस्तूयते। शास्त्राणाम् आचार्याणाञ्च मतानि शिरसाऽवधार्य दोषाभासविवेचनमत्रोपस्थाप्यते। यत्रापाततो दोषाः सन्तीति प्रतीयते किन्तु वस्तुगत्या दोषा एव न सन्ति तादृशानां स्थलानां विचारोऽत्र प्राधान्येनास्माभिः करिष्यते। केवलं लक्षणं सङ्गच्छति चेदेव दोषो न भवति। वस्तुगत्या तत्र रसस्यापकर्षोऽस्ति नवेत्यपि विचार्यम्। रसस्य अपकर्षे दोषः, उत्कर्षातिशयेऽलङ्कारश्चेति। एवं बहुशास्त्रदृष्टान्तविवेचनादस्माभिर्मन्यते यत्-

लक्षणे सङ्गते मात्रे न दोषो नाप्यलङ्कृतिः।
काव्येऽलङ्कृतिदोषौ च रसस्य बन्धुघातकौ।। इति।

यथा उदाहरणमेकं दीयते

'अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि! माम्।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर।।'[1] इति।

नन्वत्रापाततो वर्णसाम्याद्[2] अनुप्रासोऽस्तीति प्रतीयते खलु। तथा क्-ण्-ठ्-आदिव्यञ्जनवर्णानां साम्याल्लक्षणसङ्गतिरिति। किन्तु न, अत्र शृङ्गाररसोऽस्ति। शृङ्गारे च माधुर्यगुण उत्कर्षको भवति। तथा माधुर्ये गुणे टवर्गः प्रतिकूलः शृङ्गारपरिपन्थ्योजोगुणव्यञ्जकत्वादिति भावः। अर्थाद् लक्षणसङ्गतावपि अत्रानुप्रासालङ्कार एव नास्ति। वस्तुतः प्रतिकूलवर्णतानामको वाक्यदोषोऽस्ति। एवमन्यत्रापि बोध्यम्।

एवं दोषस्य लक्षणसङ्गतावपि कुत्र कुत्र दोषो न भवति, स एवात्र विचार्यविषयः। तदधः प्रस्तूयते।

**विक्रमोर्वशीयत्रोटकम्-** महाकविकालिदासकृतेषु दृश्यकाव्येषु *विक्रमोर्वशीयमत्रोटकं* तु अन्यतमम्। तथा त्रोटके खलु पञ्च सप्त

---

[1] का.प्र. पृ-३२७

[2] वर्णसाम्यमनुप्रासः(का.प्र. पृ-४९४) इति।

अष्टौ वा नव अङ्का भवन्ति। एवं प्रत्येकम् अङ्केषु विदूषकः अवश्यमेव भवति। एवं त्रोटके शृङ्गाररसः प्रधानं भवति। दिव्यादिव्योभयचरित्रमेव तिष्ठति। तदुक्तं *साहित्यदर्पणे* कविराजेन विश्वनाथेन यथा-

'सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम्।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम्।।'[1] इति।

परन्तु *विक्रमोर्वशीयत्रोटके* तु प्रथमाङ्के चतुर्थाङ्के च विदूषको नास्ति। अतो लक्षणमिदं न सङ्गच्छते इति मैवम्। यतोहि केवलमङ्कद्वये विदूषकाभावात् त्रोटकमिदं लक्षणबहिर्भूतमिति न वक्तव्यम्। पुनश्च लक्षणमिदं कालिदासाद् बहु अर्वाचीनम्। तथा च विश्वनाथेनापि स्वयं त्रोटकस्योदारणे *विक्रमोर्वशीयस्य* उल्लेखः कृतः। किं बहुना ग्रन्थकर्त्रा महाकविना कालिदासेनापि प्रस्तावनायां त्रोटकरूपेणैवास्य उल्लेखः कृतः। अतोऽस्य त्रोटकत्वे संशयो न कार्यः।

ननु त्रोटकस्यास्य नायको राजा पुरूरवाः च नायिका अप्सराः उर्वशी। तयोः प्रेमकथा त्रोटकस्यास्य विषय इति। तेन नामकरणं पुरूरवोर्वशीयम् इत्येवं करणीयम् आसीत्। नतु *विक्रमोर्वशयीम्* इति चेत्, सत्यम्। परन्तु तत्काले कवेराश्रयदाताऽऽसीत् सम्राट् विक्रमादित्यनामको राजा। एवं विक्रमादित्यस्यैव सम्माननार्थं पुरूरवसोऽपरं नाम विक्रम इति कविना कल्पितम्। अत एवं नामकरणं कृतम्। तथाहि विक्रमेन प्राप्ता उर्वशी इति विक्रमोर्वशी। एवं तदधिकृत्य कृतं रूपकमिति *विक्रमोर्वशीयम्* इति। अतो नामकरणे न दोषः।

ननु पुरूरवसः पट्टमहिषी आसीत् काशिराजकुमारी औशीनरी, किन्तु त्रोटकेऽस्मिन् तत्प्रसङ्ग एव नास्ति। अतो रूपकमिदं मूलोच्छेदि इति चेत्, मैवम्। अपारे काव्यसंसारे कविस्तु स्वयं प्रजापतिः। यादृशं विश्वं तस्मै रोचते, तादृशमेव स कुरुते। विषयनिर्माणे कविस्तु स्वतन्त्रः। अतो न दोषः।

- **मूलम्-** 'वेदान्तेषु……………….निःश्रेयसायास्तु वः ।।'[2] इति।

ननु नान्दीपद्यम् अष्टभिः वा द्वादशभिर्पदैः युक्तं भवति। परन्तु त्रोटकस्यास्य नान्दीपद्ये पदसंख्या कथमपि अष्टौ वा द्वादश नास्ति। अतो नान्दीपद्यमिदम् असङ्गतिदोषेण दुष्टमिति चेन्न। यतोहि नान्दीलक्षणे या पदसंख्या उक्ता सा तु उपलक्षणमात्रम्। नो चेद् विश्वनाथेन उक्तं नान्दी अष्टपदयुक्ता वा द्वादशपदयुक्ता भवेत्। *मन्दारमन्दरे* उक्तं यन्नान्दी अष्टभिः, दशभिः, द्वादशभिः, अष्टादशभिः, वा द्वाविंशत्या पदैः युक्ता[3] भवेदिति। अर्थात् पदसंखाऽऽचार्यैः उपलक्षणरूपेणैव उक्ता। प्रकृतनान्दीपद्यं पञ्चविंशत्या पदैः युक्ता। एवं संख्याया उपलक्षणत्वाद् अन्यलक्षणसङ्गतेश्च न दोषः।

तथा *महाभाष्य*कारस्य व्याख्यानं तथा प्रयोग उभयमपि प्रमाणं तथा आलङ्कारिकाणां व्याख्यानं च महाकवीनां प्रयोगः उभयमपि प्रमाणरूपेण गृह्यते चेन्न दोषताऽऽपत्तिरिति भावः।

अथवा पद्यमिदं रङ्गद्वारमेव, नतु नान्दीपद्यमिति 'नान्द्यन्ते ततः प्रविशति सूत्रधार' इत्यादिकविप्रयोगात्।

- **मूलम् -** 'नेपथ्ये- आर्याः परित्रायध्वम्, परित्रायध्वम्, यः सरपक्षपाती यस्य वाम्बरतले गतिरस्ति'[4] इति।

ननु एकविधस्यैव पदस्यासकृत्प्रयोगे श्रोतुर्वैमुख्यात् परित्रायध्वम् इत्यस्य पदस्य द्विःप्रयोगात् कथितपदतादोष[5] इति चेत्, मैवम्। अत्र वक्तृजनस्य विषादग्रस्तत्वात् इति। अतो द्विरुक्तिरत्र न दोषाय, अपितु गुणाय। तदुक्तं *दर्पणे* यथा-

'-कथितं च पदं पुनः।।
विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि।
दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने।।

---

[1] सा.द. पृ-४५
[2] वि.उ.- पृ.१
[3] अष्टभिर्दशभिः श्रेष्ठा तथा द्वादशभिः पदैः।अष्टादशपदैर्वापि द्वाविंशत्या पदैर्युता।। इति।
[4] वि.उ.- पृ.६
[5] प्रयोजनशून्यत्वे सति समानार्थकसमानानुपूर्वीकपदवत्त्वं कथितपदत्वम्(का.प्र.- पृ.३४१)

अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे।'[1] इति।

- **मूलम्-** 'राजा- सूर्योपस्थाननिवृत्तं पुरूरवसम्, मामेत्य कथ्यताम्'[2] इति।

नन्वत्र 'उपस्थ' इत्यस्य गुह्यद्वारवाचकतया व्रीडाव्यञ्जकत्वात् लज्जया सहृदयहृदयस्य सङ्कोचकत्वादत्र पदांशगताश्लीलतादोष[3] इति चेन्मैवम्। यतोहि यस्य पदस्यैकदेशेऽसभ्यार्थके सत्यपि सम्पूर्णपदस्य यदि अर्थः सभ्यो भवति तर्हि न दोषाय। तदुक्तं वामानाचार्येण यथा-

'संवीतस्य हि लोकेन न दोषान्वेषणं क्षमम्।
शिवलिङ्गस्य संस्थाने कस्यासभ्यत्वसम्भावना।।'[4] इति।

- **मूलम्-** 'अग्रे यान्ति............ वेगानिलात्।।'[5] इति।

नन्वत्र पुरूरवा अदिव्यो धीरोदत्तो नायकः। तस्य च दिव्यरथेन भ्रमणं वा गगने विचरणं न सम्भवति। अतोऽसम्भवस्य वर्णनादत्र प्रकृतिविपर्ययो[6] नाम रसदोष इति चेन्न। पुरूरवोदुष्यन्तादिनृपाणां तु देवतानां रणाङ्गणेऽपि सहायकत्वेन वर्णनात्, तेषां महिम्नो बहुप्रसिद्धत्वात् तादृशवर्णने न दोष इति। तदुक्तं भट्टमम्मटाचार्येण यथा- 'अदिव्येषु यावदवादानं प्रसिद्धमुचितं वा तावदेव उपनिबन्द्धव्यम्'[7] इति।

ननु तृतीयचरणे हरिशब्दः घोटकरूपे अर्थे सम्यक् पठितोऽपि प्रकृतस्थले विवक्षितार्थस्य घोटकरूपस्य प्रतिपादने सामर्थ्यरहितः इति। एवं प्रसिद्धपरित्यागेन ईदृशप्रयोगे प्रयोजनानुसन्धानव्यग्रत्वाद् विलम्ब एव दूषकताबीजम् इति। तेनात्र असमर्थदोषता[8] इति चेन्न। यतोहि रथ-वेग-रेणुपदवी-ध्वजपटादिपदानां सहायकत्वात्प्रकरणत्वाच्च अत्र हरिशब्दस्यार्थस्तु घोटक इति प्रतीयते। तेनात्र दोषता।

- **मूलम्-** 'उपस्थितसम्परायो महेन्द्रोऽपि मध्यमलोकात् सबहुमानमानाय्य विबुधविजयाय सेनामुखे नियुङ्क्ते'[9] इति।

नन्वत्र देवाः किमर्थं सेनापतित्वेन युद्धे पुरूरवसमेव वाञ्छन्तीत्यत्र श्रोतुः हेतुविषये आकाङ्क्षा भवति। किन्तु हेतुः नोक्तः। अतो निर्हेतुतादोषः[10] इति चेन्न। यतोहि हेतुः अतिप्रसिद्धश्चेदस्य दोषस्य न प्रसङ्गः। एवं *महाभारतादौ* एतेषां विक्रमगाथा तु भूरिशः प्राप्यते। अतो न दोषता।

- **मूलम्-** 'आविर्भूते..........................प्रसादम्।।'[11] इति

नन्वत्र एकस्यैवोपमेयस्य उर्वश्याः बहुभिः उपमानैः(रात्रि-अर्चि-गङ्गादिपदैः) सह तुलना क्रियते। अतोऽत्र अभिनवगुप्तपादादीनां मते उपमानाधिक्यतादोष इति चेन्न। परवर्तिकाले भामहादिभिः आलङ्कारिकैः उपमानाधिक्यस्य अलङ्काररूपेण ग्रहणं कृतम्। तैरुक्तं बहूपमा मालोपमा वा। अतो न दोषः।

- **मूलम्-** 'अस्याः...............................मुनिः।।'[12] इति।

ननु सृष्टेः कर्ता ब्रह्मा, रक्षायाः कर्ता विष्णुः, संहारस्य च कर्ता महेश्वर इति आगमसिद्धान्तः। किन्तु प्रकृतपद्येऽस्मिन् उर्वश्याः

---

[1] सा.द.- पृ. ५५६
[2] वि.उ.- पृ.९
[3] लज्जया घृणया अशुभेन च मनसः सङ्कोचो भवति चेद् अश्लीलदोषो(का.कौ.- पृ.७१)
[4] का.ल.सू-पृ.४७
[5] वि.उ.- पृ.११
[6] यत्प्रकृतौ यद्वर्णनमनुचितं तत्र तद्वर्णनम्(का.प्र.- पृ.४४१)
[7] का.प्र.-पृ.४४३
[8] असमर्थं यत्तदर्थे पठ्यते न च तत्रास्य शक्तिः(का.प्र.- पृ.२७१)
[9] वि.उ.- पृ.१६
[10] निष्क्रान्तो हेतुर्यस्माद् इत्यर्थः। अनुपात्तहेतुकोऽर्थो निर्हेतुरिति यावत्( वामनाचार्यः, पृ.३८६)
[11] वि.उ.- पृ.२१
[12] वि.उ.- पृ.२३

स्रष्टा तु स्वयं मदन इति शङ्कते। तत्तु आगमविरुद्धमेव। अतोऽत्र रुद्रटमते निरागमदोष[1] इति चेन्न। ननु कामी किं न चिन्तयति। यतोहि उर्वश्याः सौन्दर्यातिशयावलोकनाद् अत्र वक्तुः पुरूरवसः अस्मिन् विषये प्रबलसंशयोऽस्ति, नतु निश्चयः। एवम् असम्बन्धे सम्बन्धस्थापनरूपः अतिशयोक्तिः अलङ्कारोऽस्ति। अतोऽत्र दोषो न चिन्तनीयः इति भावः।

- **मूलम्-** 'विदूषकः- किं तत्रभवती उर्वशी अद्वितीया रूपेण अहमिव विरूपतया'[2] इति।

नन्वत्र वाक्यं क्रियापदेन हीनं वर्तते। एवं वाक्ये क्रियापदं न भवति चेत् अशरीरनामको[3] दोष इति चेन्न। यतोहि तत्र क्रियापदेन प्रधानक्रियापदं विवक्षितम्। यतोहि प्रधानक्रियापदस्याभावे तु वाक्यशरीरमेव निष्पन्नं न भवतीति दोषता। अत्र तु अस्ति-भवति-आदिसामान्यक्रियापदम् अध्याहार्यम्। अतो न दोषता।

- **मूलम्-** 'राजा- विविक्तादृते नान्यदुत्सुकस्य शरणम्। तद् भवान्, प्रमदवममार्गमादेशयतु'[4] इति।

नन्वत्र व्यभिचारिभावस्य उत्सुकस्य स्वशब्दोक्तौ स्वशब्दवाच्यतादोष इति चेन्न अनौचित्याभावात्। यतोहि स्वशब्देनोक्तिमात्रमेव न दोषाय भवन्ति व्यभिचारिणः। तदुक्तं *काव्यप्रकाशे* यथा न दोषः स्वशब्देनोक्तावपि सञ्चारिणः क्वचित्[5] इति। अत्र औत्सुक्यशब्द इव तदनुभावः त्वरारूपः न तथा प्रतीतिकृत् इति न दोषता।

ननु मूले राजा विदूषकं कदाचित् प्रथमपुरुषेण उक्त्वा पुनरपि उत्तमपुरुषेण निर्दिशति। अतस्तत्र प्रक्रमभग्नता न ग्राह्या। राज्ञो विरहवशाच्च वयस्यभावेनेति।

- **मूलम्-** 'राजा

अग्रे स्त्रीनखपाटलं...................... तिष्ठति।'[6] इति।

नन्वस्मिन् पद्यांशे सुभगपदे भग इति पदांशस्य स्त्रीयोनिवाचकत्वाद् व्रीडया मनःसङ्कोचो भवति। अतोऽत्र पदांशगतः अश्लीलदोष[7] इति चेन्न। यतोहि सुभगादिपदानाम् असभ्यार्थस्मृतिहेतुत्वेऽपि लोकपरिगृहीतत्वान्न दोषः, शिवलिङ्गादिवत् इति। एवमन्यत्रापि ऊह्यम्।

- **मूलम्-** 'अपराधी.....................................निरपराधः।।[8] इति।

(इति पादयोः पतति)'

ननु पद्यमिदं राजा पत्नीं काशीराजपुत्रीं प्रति वदति। एवं भर्त्रा भार्यायाः पादयोः पतनम् अन्याय्यम् अमङ्गलकरञ्चेति। अतः असङ्गतदोष इति चेन्न। यतोहि भार्यायाः कोपशान्तये षड्विधा उपायाः शास्त्रेषु वर्णिताः सन्ति। तेषु पादयोः पदनं तु षष्ठमिति। तदुक्तं यथा *दशरूपके*-

'स्त्रीणामीर्ष्याकृतोमानः कोपोऽन्यासङ्गिनिप्रिये।
यथोत्तरं गुरुःषड्भिरुपायैस्तामुपाचरेत्।।
साम्ना भेदेन दानेन नत्युपेक्षारसान्तरैः।'[9] इति।

इत्यत्र नतिर्नाम पादयोः पतनमिति। अतो भार्यायाः कोपशान्तये भार्त्रा पादयोः पतनमपि न दोषाय इति भावः। अतो न दोषः। कालिदासदृश्यकाव्येषु नायकानां पादयोः पतनम् अत्यन्तसाधारणविषयः। सर्वत्रापि भार्यायाः कोपशान्तये एव। अतः तेषु तेषु

[1] आगमगम्यस्तमृते य उच्यतेऽर्थो निरागमः स इति (का.ल- पृ.११/६)
[2] वि.उ.- पृ.५९
[3] क्रियापदविहीनं यदशरीरं तदुच्यते इति(स.क.आ.- पृ.२७)
[4] वि.उ.- पृ.६१
[5] का.प्र.- पृ.४४५
[6] वि.उ.- पृ.६८
[7] व्रीडाजुगुप्साऽमङ्गलान्यतमव्यञ्जकशब्दत्वम् अश्लीलत्वम्(सा.द.- पृ.४७२)
[8] वि.उ.-पृ.१०९
[9] द.रू.- पृ.४५

स्थानेष्वपि दोषो न भवति।

एवमत्र समासेन *विक्रमोर्वशीये* त्रोटके प्रधानमल्लनिग्रहन्यायेन विद्यमानानां दोषाभासानां विवेचनम् उपस्थापितम्। अन्यत्र विद्वद्भिः स्वयं चिन्तनीयम्।

- **उपसंहारः(Conclusion)-** एवमत्र समासेन महाकविकालिदासकृते *विक्रमोर्वशीयत्रोटके* विद्यमानानां दोषाभासानाम् उपस्थापनं कृतम्। एवं यथास्थानं स्वयुक्त्या शास्त्रसिद्धान्तेन च कुत्र कुत्र दोषो न भवति, किञ्च कथं न भवति तदपि अत्र आलोचितम्। तथा च टीकाकाराणां शास्त्रकाराणाञ्च यत्र मतभेदे दोषोऽस्तीति प्रतीयते तत्र दोषः कथं न भवति। तदपि आलोचितम्। एवं महाकवेः कालिदासस्य अन्यासु कृतिष्वपि बहुत्र दोष एव नास्ति तदपि प्रतिपादयितुं शक्यते, तत्तु विद्विभिश्चिन्तनीयम् इति शम्।

- **सङ्केतपञ्जिः**

का.कौ.= काव्यकौमुदी
का.द.= काव्यादर्शः
का.प्र.= काव्यप्रकाशः
का.सू.वृ.= काव्यालङ्कारसूत्रवृत्तिः
छ.म.= छन्दोमञ्जरी
द.रू.= दशरूपकम्
बा.बो.= बालबोधिनी
म. भा.= महाभारतम्
वि.उ = विक्रमोर्वशीयम्
सा.द.= साहित्यदर्पणः

- **सहायकग्रन्थाः(Bibliography)**

Kalidasa. Abhijnanasakuntalam. Ed. Ramendra Mohan Bose. Calcutta. Pub- 1969
Mammata. Kavyaprakasha. Ed. Jha, Ganganatha. Varanasi. Pub-1985
Vamanacharya. Jha, Bechena. *Kavyalankara sutravritti.* Varanashi, Chaukhambha Sanskrit sansthan.
Visvanatha. Sahitya Darpan. Tran. Ballantyne, James. Asiatic Society. Pub-1851
आचार्यविश्वनाथः। *साहित्यदर्पणः*। सम्पा. कृष्णमोहनशास्त्री। वाराणसी : चौखम्बा संस्कृतसंस्थान, २०१२।
कालिदासः। *विक्रमोर्वशीयम्।* सम्पा. विन्ध्येश्वरीप्रसादमिश्रः। वाराणसी : चौखम्बा कृष्णदास अकादमी,२०१३।
कालिदासः। *श्रुतबोधः*। सम्पा.पण्डितरामेश्वरभट्टः। बुम्बाइ : श्रीवेङ्कटेश्वरस्टिम् प्रेस, - १९११।
दण्डी। *काव्यादर्शः* । सम्पा. चिन्मयीचट्टोपाध्यायः। कलकाता : पश्चिमबङ्ग राज्य पुस्तक पर्षत्, २०१८।
दाधीचः, डाँ. रामकुमारः। *अलङ्कारशास्त्रेतिहासः*। जयपुर : हंसा प्रकाशन, २०१९।
भट्टमम्मटः। *काव्यप्रकाशः*। सम्पा. विमलाकान्तमुखोपाध्यायः। कोलकाता : संस्कृतपुस्तकभाण्डार, १४२४ वङ्गाब्दे।
भट्टमम्मटः। *काव्यप्रकाशः*। सम्पा.डाँ ज्योत्स्नामोहनः। दिल्ली : नाग पाब्लिशर्स, १९९९।
भट्टवामनाचार्यः। *बालबोधिनीटीका*। दिल्ली : परिमल पाब्लिकेशन्स, २००८।
भट्टाचार्य, अमिय कुमार। *साहित्येर दोष गुण ओ अलङ्कार प्रसङ्गे आचार्य मम्मट*। कलकाता : संस्कृत पुस्तक भाण्डार, २०१२।
भरतमुनिः। *नाट्यशास्त्रम्*। सम्पा. पण्डितकेदारनाथः। वम्बइ : निर्णयसागरः. प्रकाशः १९४३।
माहान्तिः,डा. सुज्ञानकुमारः। *काव्यतत्त्वालोकः*। सम्पा. आचार्यहरेकृष्णशतपथी। तिरुपतिः : राष्टियसंस्कृतविद्यापीठम्, २०१०।
मुखोपाध्याय, रमारञ्जन। *रससमीक्षा*। कलिकाता : संस्कृतपुस्तकभाण्डार, १३८४।
श्रीकेदारभट्टः। *वृत्तरत्नाकरः*। सम्पा. श्रीकृष्णदासगङ्गाविष्णुः। कल्याण-मुम्बाइ : लक्ष्मीवेङ्कटेश्वरस्टिम् प्रेस्।
साहा, अणिमा। *संस्कृत अलङ्कारशास्त्रे दोषतत्त्व*। कलिकाता: संस्कृत महाविद्यालय गेवषणा ग्रन्थमाला, सारस्वत लाइब्रेरी, १९७३।
हरिदाससिद्धान्तवागीशः। *काव्यकौमुदी।* सम्पा. भट्टाचार्यः, भवेशचन्द्रः।कलिकाता: वर्त्मस्थसिद्धान्तविद्यालयः, प्रकाशः- १३८२ वङ्गाब्दे।

# स्वाधीनेच्छाशक्तिविषयकः श्रीश्रीरामकृष्णपरमहंससिद्धान्तः

Aneek Kumar Das,
Research Scholar,
Ramakrishna Mission Vivekananda Educational and Research Institute,
Belur Math, Howrah, West Bengal, India, 711202.
Contact No: 7384165253
Email: aneekkumardasvedvid@gmail.com

**शोधसारांशः-** स्वाधीनेच्छाशक्तिः अर्थात् Free Will इति विषयोऽयं न केवलं प्राचीनशास्त्रनिबद्धः, अपि तु आधुनिकसमाजे सुचिन्तकानां मध्ये अपि बहु चर्चितः वर्तते। स्वाधीना इच्छाशक्तिः अर्थात् कर्तुम् अकर्तुम् अन्यथाकर्तुं वा स्वीया इच्छा, या एव प्रवृत्तौ निवृत्तौ च कारणभूता, सा किं वस्तुतः वर्तते? उत स्वाधीनेच्छा इति किमपि न भवति। सर्वमपि ईश्वराधीनतया, ईश्वरेच्छया, पूर्वपरिकल्पिततया, ललाटलिखिततया, प्रारब्धकर्मजन्यतया वा भवति। इत्येवं द्विधा मतं लोके दृश्यते। तत्र सामान्यतः सर्वेषामपि, येषाम् ईश्वरलाभः अभवत् तान् विहाय अन्येषां समेषामपि कर्तृत्वबुद्धिः तथा स्वाधीनेच्छाशक्तिः वर्तते एव। किन्तु येषाम् ईश्वरलाभः सम्पन्नः तेषां ज्ञानयोगिनां दृष्ट्या तु जगदिदम् ईश्वरमयं, जगति विद्यमानं सर्वमपि, जगति जायमानानि कर्माणि इत्येतत् सर्वमपि ईश्वरेच्छानुसारं भवति। अस्माकं या स्वाधीनेच्छा इति अनुभवः, सोऽपि ईश्वरेणैव पापादिनियन्त्रणार्थम् अस्मासु संस्थापितः। श्रीश्रीरामकृष्णपरमहंसाः अपि स्वीयलौकिकदृष्टान्तैः डॉ. सरकारमहाशयं तथा अन्यान् भक्तान् एतद्विषये उपदिशति। परमहंसानां मतमपि शास्त्रसम्मतम् उत न इति पर्यालोचनम् अत्र यथामति आलोचितम्।

**कुञ्चीशब्दाः(Keywords)-** स्वाधीनेच्छाशक्तिः, अवतारवरिष्ठः, कर्तृत्वबुद्धिः, कथामृतम्, Free Will, फलभोक्तृत्वम्।

**भूमिका -** स्वाधीनेच्छाशक्तिः अर्थात् Free Will इति विषयोऽयं न केवलं प्राचीनशास्त्रनिबद्धः, अपि तु आधुनिकसमाजे सुचिन्तकानां मध्ये अपि बहु चर्चितः वर्तते। स्वाधीना इच्छाशक्तिः अर्थात् कर्तुम् अकर्तुम् अन्यथाकर्तुं वा स्वीया इच्छा, या एव प्रवृत्तौ निवृत्तौ च कारणभूता, सा किं वस्तुतः वर्तते? उत स्वाधीनेच्छा इति किमपि न भवति। सर्वमपि ईश्वराधीनतया, ईश्वरेच्छया, पूर्वपरिकल्पिततया, ललाटलिखिततया, प्रारब्धकर्मजन्यतया वा भवति। इत्येवं द्विधा मतं लोके दृश्यते। सामान्यतया विचार्यमाणे तु विषयोऽयं सुस्पष्टः एव प्रतीयते यद्- अवश्यं स्वाधीनेच्छा वर्तते एव इति। अन्यथा शुभाशुभकर्मणि युक्तायुक्तकर्मणि वा ये प्रवृत्ताः तेषां प्रवृत्तिहेतुत्वेन तज्जन्यफलस्य च कारणत्वेन ईश्वरेच्छा एव वक्तव्या भवति। तर्हि समाजे दुष्कृतिनः यानि चौर्यं, शाठ्यं, छलं, धर्षणादीनि कुकर्माणि कुर्वन्ति तानि अपि किम् ईश्वरेच्छया एव क्रियन्ते वा। अर्थात् ईश्वरः तथा चिन्तयति वा? यद्- अद्य अस्य गृहे चौर्यं भवतु, अयं च चौर्यं करोतु इत्यादि। तत्तु दयानिधौ ईश्वरे न युज्यते। तर्हि तादृशकर्माणि तैरेव दुष्कृतिभिः क्रियन्ते इति ते एव दोषभाजः। इत्येव मतं साधु इति प्रतीयते। अद्यतनसमाजे अपि दण्डव्यवस्था तथैव परिचाल्यते। यः दुष्टम् आचरति तस्य दोषस्य दण्डमपि सः एव लभते। एवञ्च स्वाधीनेच्छाशक्तिः वर्तते एव इत्येव मतं स्वीकर्तव्यम् आपतितं दृश्यते। इदं तु लोके युक्तमेव। किन्तु शास्त्रादिषु एतद्विषये किं वर्तते, किं वा अस्मिन् विषये अवतारवरिष्ठानां श्रीश्रीरामकृष्णपरमहंसानां मतं वर्तते इत्यादिविषये लघुशोधप्रबन्धेऽस्मिन् यथामति विचारं करिष्यामः।

**संशयः-** स्वाधीनेच्छाशक्तिः वर्तते उत न इति संशयः। लौकिकानां सामान्यानां मतं तावत्- अवश्यमेव स्वाधीनेच्छाशक्तिः वर्तते एव इति। गीतायामपि बहुत्र "यथेच्छसि तथा कुरु..."[1], "कुरु कर्मैव तस्मात्त्वं..."[2], इत्याद्युपदेशाः परिलक्ष्यन्ते। इत्थम् उपदेशः तदैव

[1] श्रीमद्भगवद्गीता - (१८.६३)
[2] श्रीमद्भगवद्गीता - (४.१५)

सम्भवति यदा तत्कार्यं कर्तुम् अकर्तुम् अन्यथाकर्तुं वा तस्य जनस्य सामर्थ्यं स्वाधीनेच्छा च वर्तते। अन्यथा यदि ईश्वरेच्छया एव कर्मसु प्रवृत्तिः अभविष्यत् तर्हि भगवान् श्रीकृष्णः अर्जुनाय इत्थम् उपदेशान् न अदास्यत्। तत्स्थले स्वयमेव तथा सम्पादयितुम् अचिन्तयिष्यत्, तच्चिन्तनमात्रेण च तत्कार्ये अर्जुनस्य प्रवृत्तिः अभविष्यत्। किन्तु इत्थं तु न दृश्यते। भगवान् तथा कर्तुम् अर्जुनाय उपदिशति। अत एव दृश्यते यत् पूर्वम् अर्जुनः युद्धं न करिष्यामि इति चिन्तयति "एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन"[1] इत्यादि। सः एव अर्जुनः भगवतः सकाशात् उपदेशान् लब्ध्वा अन्ते "करिष्ये वचनं तव"[2] इत्येवं युद्धाय कृतनिश्चयः भवति। तर्हि यदि सर्वत्रापि ईश्वरेच्छया एव कार्यं भवेत् तर्हि अर्जुनस्य कथमेवं मोहः आसीत्। साक्षादेव सः युद्धं कथं न आरब्धवान्। भगवान् स्वयं तत्र विश्लिष्य बोधितवान् इति तस्य सिद्धान्तः अर्थात् स्वाधीनेच्छा परिवर्तिता। एवं तर्हि स्वाधीनेच्छा अवश्यमेव वर्तते इति पूर्वपक्षमतम्।

यद्यपि एतद्विषये वैमत्यं बहूनामेव न भवति तथापि ये ईश्वरलाभार्थं किञ्चिद्वा यतमानाः सन्ति ते प्रायः सर्वे अपि इदम् अङ्गीकुर्वन्ति यत् जगति सर्वमपि ईश्वरेच्छया एव घटते। प्रसिद्धा भणितिर्हि "ईश्वरेच्छां विना नैकं पत्रं वृक्षस्य कम्पते" इति। तर्हि सर्वत्र ईश्वरेच्छा एव चेत् दुष्कृतीनां दुष्कर्मसु अपि ईश्वरेच्छा कथं सङ्गच्छते इति प्रश्ने कृते सति न सर्वेऽपि यथायथं सप्रमाणम् उत्तरितुं शक्नुवन्ति। इतस्ततः उक्त्वा भाययन्ति। किन्तु संशयाकुले तर्कभूयिष्ठे विषयेऽस्मिन् कथं समाधानं वक्तव्यम् -इति अस्मिन् लघुशोधप्रबन्धे अवलोकयिष्यामः।

**समाधानम् -** अस्य संशयस्य समाधानम् अवगन्तुम् आदौ विषयेऽस्मिन् स्पष्टता स्यात्। यथा खगोलशास्त्रानभिज्ञस्य कृते चन्द्रनक्षत्रयोः कतरत् बृहत् इति पृष्टे, चन्द्रः एव बृहत् -इति सः उत्तरति। बहुधा बोधितेऽपि सः नैव अङ्गीकरोति यत् नक्षत्रमेव बृहदिति। किन्तु, खगोलशास्त्रज्ञाय कस्मैचित् पृष्टे सः विविधयुक्त्या नक्षत्रमेव बृहत् इति प्रतिपादयति। सः जानाति दूरत्वकारणात् नक्षत्रं क्षुद्राकारम् प्रतीयते -इति। तद्वत् अत्रापि अधिकारिभेदेन चिन्तनं भिन्नम्।

**ज्ञानयोगिनां दृष्टिः -** वस्तुतत्त्वम् अवगन्तुम् आदौ इदं मनसि निधेयं यत् इदं जगत् वस्तुतः असदेव। सत् तु ईश्वरमात्रम्। तथाहि शास्त्रशिरोमणौ वेदान्ते उक्तं- "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्"[3], "आत्मा वा इदमेक एवाग्र आसीत्, नान्यत् किञ्चन मिषत्"[4], "नेह नानास्ति किञ्चन"[5] इत्यादि। गीतायामपि उच्यते "नासतो विद्यते भावो नाभावो विद्यते सतः"[6] -इति। लोकशङ्कराणां श्रीमच्छङ्करभगवत्पादानां सुप्रसिद्धा उक्तिः हि "ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः"[7] इति। एवञ्च जगत् असत् चेत् जगति विद्यमानं सर्वमपि असदेव। सर्वमिदं जगत् असत् चेत् तत्र जायमानानि दृश्यमानानि कर्माणि अपि असदेव -इति तत्र स्वाधीनेच्छाशक्तेः प्रसङ्गः एव न भवति। अतः सः तत्त्वज्ञानी, ज्ञानमार्गे स्थितः पुरुषः, तस्य कृते स्वाधीनेच्छाशक्तिः नास्त्येव। अत एव सः योगी स्वयं न कर्मसु प्रवर्तते। तथाहि गीतायां-

"बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥[8]" इति।

एवञ्च ज्ञानयोगिनः जगतोऽस्य मिथ्यात्वम् अनुभूय, स्वाधीनेच्छाशक्तिवत् यत्किञ्चित् जीवचित्ते अवभासते, तस्याऽपि मिथ्यात्वम् अवगच्छन्ति। अत एव खलु सुकृतदुष्कृतयोः उभयोरपि ते स्वेच्छया न प्रवर्तन्ते। अपि तु निर्लिप्ततया एव सर्वाणि कर्माणि कुर्वन्ति।

**कर्मयोगिनां दृष्टिः -** किन्तु न खलु सर्वोऽपि जनः ज्ञानमार्गे प्रवर्तते। बहवो हि कर्ममार्गे अपि प्रवर्तन्ते। तदुक्तं श्रुतिषु-

---

[1] श्रीमद्भगवद्गीता - (१.३५)
[2] श्रीमद्भगवद्गीता - (१८.७३)
[3] छान्दोग्योपनिषद् - (६.२.१)
[4] ऐतरेयोपनिषत् - (१.१)
[5] बृहदारण्यकोपनिषत् - (४.४.१९), कठोपनिषत् - (२.४.११), विवेकचूडामणिः - (४६५ - ४७१)
[6] श्रीमद्भगवद्गीता - (२.१६)
[7] विवेकचूडामणिः/ब्रह्मज्ञानावलीमाला/निरालम्बोपनिषद् इति बहवो बहुधा वदन्ति।
[8] श्रीमद्भगवद्गीता - (२.50)

"श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
तयोः श्रेय आददानस्य साधु भवति, हीयतेऽर्थाद्य उ प्रेयो वृणीते॥"[1] इति।

ये तावत् श्रेयःप्रेयसोः नीरक्षीरविवेकं कर्तुम् असमर्थाः कर्ममार्गे प्रवर्तन्ते तेषां स्वाधीनेच्छाशक्तिविषये कः सिद्धान्तः? तादृशानां कृते एतद्विषये किं वक्तव्यम् इति चेत् उच्यते- यस्तु कर्मयोगी सर्वं कर्म ईश्वरार्पणबुद्ध्या करोति, सः तु इत्थमेव चिन्तयति यत्- सर्वमपि ईश्वरेण एव क्रियते, सर्वमपि ईश्वरेच्छया यन्त्रारूढवत् एव भवति -इति। यन्त्रं यथा स्वयं चलितुम् असमर्थः यन्त्रारूढेन चालकेन कर्त्रा वा केनचित् नियन्त्र्यते तद्वत् ईश्वरेण वयं नियन्त्रिताः। अतः दूरात् यथा यन्त्रं स्वयं चलति इति भ्रमः जायते तद्वत् वयं कार्यं कुर्मः इति भ्रमः जायते। अर्थात् ईश्वरः एव कर्ता अहम् अकर्ता इत्यादिरूपा बुद्धिः यस्य, तस्य कर्मयोगिनः कृते तु अस्मिन् जगति जायमानं सर्वम् ईश्वरेच्छया एव जायते इति सिद्धान्तः। गीतायां भगवता अर्जुनाय कर्मयोगस्य उपदेशकाले उच्यते-

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः॥[2] -इति।

भगवतः एतादृशेन उपदेशेन ज्ञायते यत्- कर्मयोगी असक्तो भूत्वा कर्माणि आचरति इति। तत्र स्वाधीनेच्छाशक्तिः इति किमपि न भवति। कश्चित् किञ्चित् दुष्टम् आचरति चेत् तदपि ईश्वरेणैव लीलार्थं क्रियते। इत्थं तर्हि ये दुष्टाः अपकर्माणि कुर्वन्ति तेषां कृते किं दण्डः न देयः? एवं प्रश्ने सति वक्तव्यं- यस्तु यथार्थरूपेण कर्मयोगी तस्य दृष्ट्या तु- दण्डार्थं प्रयत्नः नापेक्षते इति। अर्थात् यथा नाटके सर्वाणि अपि पात्राणि उत्तमानि भवन्ति चेत् तत्र रसोत्कर्षः न भवति। किन्तु तत्र कश्चित् दुष्टः किञ्चित् अयुक्तम् आचरति चेत् अन्यः कश्चित् उत्तमः तस्य निवारणं करोति चेत् तत् रम्यं भवति इति खलु नाटकादिषु परिलक्ष्यते। तद्वत् इदं जगत् ईश्वरस्य क्रीडास्थानमेव। अतः सः यथेच्छं कर्तुं प्रभवति। यः जनः दुष्टम् आचरति, तस्य मनसि तादृशबुद्धिः ईश्वरेच्छया एव उदेति। एवञ्च कर्मयोगिनां कृते अपि स्वाधीनेच्छाशक्तिः नास्ति इत्येव आयातम्। सर्वमपि ईश्वरेच्छया एव जायते इति कर्मयोगिनां मतम्।

**बद्धानां संसारिणां कर्मिणां दृष्टिः -** जरामरणचक्रस्वरूपे दुःखसङ्कुले संसारेऽस्मिन् ये बद्धाः सन्तः "अहं करोमि" इति कर्तव्यबुद्ध्या कर्माणि कुर्वन्ति तादृशानाम् अस्माकं दृष्ट्या तु अवश्यं स्वाधीनेच्छाशक्तिः वर्तते एव। अन्यथा, कश्चित् युक्तम् आचरति, कश्चिच्च अयुक्तम् आचरति इति तयोः उभयोरपि स्वकीयेच्छानुसारमेव तौ तत्तत्कर्मणोः प्रवृत्तौ। अतः तत्तत्कर्माचरणार्थं तस्य तस्य जनस्य स्वकीया स्वाधीना इच्छाशक्तिः वर्तते एव इति अस्माकं बुद्धिः। तदनुसारमेव पुरुषाणां प्रवृत्तिः लोके दृश्यते। एतद्विषये गीतावचनं तावत्- "अहंकारविमूढात्मा कर्ताहमिति मन्यते"[3] इति। अर्थात् यः विमूढः अज्ञः जनः स तु आत्मानं तथा अन्यान् अपि कर्तॄन् मन्यते। अर्थात् यस्य न एतावता तत्त्वज्ञानम् उदितं, न वा कर्मयोगः तेन आश्रीयते, स्वयमेव आत्मानं कर्ता इति विचिन्त्य कार्याणि करोति, तादृशस्य जनस्य कृते तु अवश्यं स्वाधीनेच्छाशक्तिः वर्तते। तदनुसारमेव जनाः उत्तमम् असाधु वा कर्म आचरन्ति।

**सिद्धान्तः -** अत्र त्रिविधस्तरे विद्यमानानां पुरुषाणां दृष्ट्या त्रिधा सिद्धान्तः प्रोक्तः। किन्तु समकालं स्वाधीनेच्छाशक्तिः अस्ति नास्ति इति उभयमपि वक्तुं न शक्यते। तर्हि, वस्तुतः एतेषु सत्यं किम् इति प्रश्ने सति उच्यते- वस्तुतस्तु ज्ञानयोगिनां यद् दर्शनं- ब्रह्म सत्यं जगन्मिथ्येति, तदेव पारमार्थिकम् अर्थात् स्वाधीनेच्छाशक्तिः इति वस्तुतः नास्ति एव। किन्तु तादृशावस्थाऽऽपन्नस्य पुरुषस्यैव तथा दृष्टिः सम्भवति। यथा निद्राणस्य पुरषस्य जाग्रदवस्थागतविषयाणां ज्ञानं न भवति तद्वत् कर्मयोगिनः ज्ञानयोगदर्शनं न भवति। बद्धानां तु उभयमपि दर्शनं न भवति, सुषुप्तस्थितस्य जाग्रत्स्वप्नाभाववत्। अतः जिज्ञासुना अवश्यं ज्ञेयं यत् आत्यन्तिकतया स्वाधीनेच्छाशक्तिः इति नैव सम्भवति किन्तु उपदेशकाले अधिकार्यनुगुणम् उपदेशः विधेयः। एवञ्च संसारिणां कृते मोक्षोपदेशकाले अवश्यमेव स्वाधीनेच्छाशक्तिः वर्तते इत्येव निरूपणीयम्। यस्तु स्वयम् आत्मानं कर्तेति विचिन्त्य कर्म करोति तस्य स्वाधीनेच्छाशक्तेः अनुभवः अस्त्येव। तस्य कृते एतत्सर्वं न निरूपणीयम्। यस्तु कर्तृत्वबुद्ध्या पुनः पुनः कर्म कृत्वा स्वस्य अकर्तृत्वं निमित्तमात्रस्वरूपत्वं च अनुभूतवान् तादृशः बुद्धिमान् व्यक्तिः एव योगोपदेशार्थं युक्ताधिकारी। तदुक्तं गीतायां-

---

[1] कठोपनिषत् - (१.२.१)

[2] श्रीमद्भगवद्गीता - (३.१९)

[3] श्रीमद्भगवद्गीता - (३.२७)

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥[1] -इति।

तादृशाय मुमुक्षवे- स्वाधीनेच्छाशक्तिः इति वस्तुतः नास्ति सर्वमपि ईश्वरेच्छाधीनम् इति क्रमशः निरूपणीयम्। तादृशस्य मुमुक्षोः तदा कर्मयोगबुद्धिः उदेति। क्रमशः ज्ञानयोगोऽपि तस्य सम्पद्यते।

एतस्मिन् विषये अपरोप्येकः सिद्धान्तः वर्तते। सामान्यरूपेण कर्मणः स्वभावः यत् सः कर्तारं बध्नाति। किन्तु ज्ञानी तेषु कर्मसु नैव प्रवर्तते। कर्मयोगी च तेषु कर्मसु प्रवर्तते चेदपि निर्लिप्ततया ईश्वरार्पणबुद्ध्या फलेच्छारहिततया प्रवर्तते। अतः कर्मप्रभावः तयोः न भवति। तथाहि शङ्करभगवत्पादाः "तद्धि कौशलं यद् बन्धनस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान्निवर्तन्ते"[2] इति। किन्तु यः संसारी बद्धः मूढः अविवेकी कर्तृत्वबुद्ध्या कर्माणि आचरति तं कर्माणि निबध्नन्ति। एवञ्च यः स्वयं कर्तृत्वबुद्ध्या कर्म आचरति सः अवश्यम् आत्मानं कर्ता इति चिन्तयति। तदा तु तस्मिन् स्वाधीनेच्छाशक्तिः वर्तते एव। अर्थात् स्वल्पशब्दैः उच्यते चेत् य एव आत्मानं कर्ता इति मन्यते तस्य स्वाधीनेच्छाशक्तिः वर्तते।

पुनरेव सा शङ्का तदवस्था एव। अर्थात् यदि वस्तुतः स्वाधीनेच्छाशक्तिः नास्ति तर्हि पुनः बद्धानां कृते कथं सा वर्तते। यदि वा परमार्थतः असत्स्वरूपा सा शक्तिः भ्रममात्रतया बद्धानां वर्तते इति उच्यते, तर्हि भ्रमात्मकस्य अभावमात्रस्वरूपस्य तस्य प्रभावेन कथं कर्मबन्धनम्। यतोहि उक्तं खलु, कर्तृत्वबुद्धिरहिततया कर्माचरणेन कर्मयोगिनां कर्मबन्धः नास्ति, किन्तु कर्तृत्वबुद्धिसहकृततया कर्माचरणेन तु संसारिणां कर्मबन्धः भवत्येव। अत्रेत्थं वक्तुं शक्यते- यथा रज्जौ सर्पभ्रमः जायते चेत् भ्रमजन्य-भयादिकं तु वास्तविकतया एव अनुभूयते तद्वत् अत्रापि स्वस्मिन् कर्तृत्वारोपेण जायमानः भ्रमः अपि तज्जन्यकर्मफलबन्धनं जनयति। अत्रेदम् अवधेयं यत् नाऽयं भ्रमः अज्ञानम् अभावमात्रं, अपि तु इदम् अज्ञानं सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिद्[3] इति सदानन्दयोगीन्द्राचार्याणां वचनैः ज्ञायते। अतः भावरूपस्य अस्य अज्ञानस्य कर्मबन्धनादिफलं भवति इत्यत्र न विरोधः। तथाहि अज्ञानस्य फलवाचकानि श्रुतिप्रमाणानि- "अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः॥[4]", "विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥[5]" इति च। गीताप्रमाणं तावत्- "नायं लोकोऽस्ति न परो न सुखं संशयात्मनः"[6] -इति। एवं अन्धतमः, अन्धकारः, संसारबन्धनं, मृत्युः, दुःखं, सुखाभावः इत्यादिफलम् अज्ञानस्य वर्तते इति एतेभ्यः श्रुत्यादिभ्यः ज्ञातुं शक्यते।

**श्रीश्रीरामकृष्णकथामृते स्वाधीनेच्छाप्रसङ्गः -** भगवतः श्रीरामकृष्णस्य अमृतस्वरूपाणाम् उपदेशानां सङ्कलनपरे अस्मिन् ग्रन्थे परिदृश्यते यत्- विज्ञानानुरागी अपि शास्त्रादिषु प्रीतिमान्, श्रीश्रीरामकृष्णपरमहंसानां गृहिभक्तेषु अन्यतमः, डॉ. महेन्द्रनाथ-सरकार-महाशयः इत्याख्यः कश्चित् वैद्यः, वैद्यनाथाख्यः कश्चिद् गृहस्थो भक्तश्च विषयेऽस्मिन् जिज्ञासाम् उपस्थापयतः। तत्र ग्रन्थे "श्यामपुकुरस्थ-गृहे भक्तैः सह भगवान् श्रीरामकृष्णः" इति शीर्षकस्य त्रयोविंशपरिच्छेदे[7] चतुर्विंशपरिच्छेदे च (अक्टुबर-मासस्य २६ दिनांकः, १८८५) एतद्विषये विस्तरेण विचारितं वर्तते। अयं डॉ. सरकारमहाशयस्तु आधुनिकयुगस्य अर्जुनवत् आसीत्। अर्थात् अर्जुनः यथा स्वयं विविधशस्त्रशास्त्रविद् अपि स्वीयान् संशयान् दूरीकर्तुं भगवतः श्रीकृष्णस्य शरणापन्नः आसीत् अत्रापि सरकारमहाशयः आधुनिकविज्ञानविद् चिकित्साशास्त्रवित् विविधभक्त्यादिशास्त्रवित् अपि श्रीश्रीरामकृष्णपरमहंसनां शरणं गृहीतवान्। अर्जुनप्रश्नाः तदुक्तसंशयाश्च यथा अस्मत्सदृशानां गृहस्थानां संसारिणां बद्धानाम् आस्तिक्यबुद्धिसम्पन्नानां हृदयगह्वरोत्थाः आसन् तद्वत् सरकारमहाशयस्य संशयाः अपि आधुनिककाले विद्यमानानां वेदान्तज्ञानपिपासूनां हृदयगह्वरोत्थाः एव सन्ति इति

[1] श्रीमद्भगवद्गीता - (४.१८)
[2] श्रीमद्भगवद्गीता-शाङ्करभाष्यम् - (२.५० श्लोकभाष्यम्)
[3] वेदान्तसारः – ३४, (५० पत्रम्, सुबोधिनी बालवोधिनी विद्वन्मनोरञ्जनी इति टीकात्रययुतः ब्रह्मचारि-मेधाचैतन्यसम्पादितः वेदान्तसारः)
[4] ईशावास्योपनिषद् - ९
[5] ईशावास्योपनिषद् - ११
[6] श्रीमद्भगवद्गीता – (४.४०)
[7] श्रीश्रीरामकृष्णकथामृत, द्वितीय खण्ड, (२६.१०.१८८५), (पत्रसंख्या 964), उद्बोधन कार्यालय।

तत्तत्प्रसंगावलोकनेन सुस्पष्टं ज्ञातुं शक्यते।

**कथामृतग्रन्थे स्वाधीनेच्छाशक्तिविमर्शः-** परमहंसाः श्रीश्रीरामकृष्णचरणाः अपि विषयेऽस्मिन् अद्वैतसिद्धान्तस्यैव मतं पोषयन्ति। वैद्यनाथमहाशयः श्रीश्रीरामकृष्णपरमहंसं प्रति साक्षादेव स्वसंशयं प्रकटयति- "Free Will अर्थात् स्वाधीना इच्छाशक्तिः, अर्थात् इच्छामि चेत् साधु कर्म आचरितुं शक्नोमि अथवा असाधु कर्म अपि आचरितुं शक्नोमि -इत्ययं यः अनुभवः वर्तते स किं सत्यरूपः, वास्तविकतया वयं चिन्तयितुं स्वाधीनाः वा?"[1] -इति। प्रश्नोऽयम् आधुनिकशिक्षाशिक्षितानां चेतांसि संशयाच्छन्नानि करोति। तथाहि शास्त्रम् अस्मान् साधुकर्मसु प्रवर्तयति। इदानीं, शास्त्रम् साधुकर्मार्थम् उपदिशति इत्यस्य तात्पर्यं हि- इच्छति चेत् जनः साधु कर्म कर्तुं प्रभवति इति। यतोहि, एकं वृक्षं न कोऽपि- सत्यं वद इति उपदिशति, अथवा जडं पर्वतं प्रति तीर्थाटनोपदेशम् अपि न कोऽपि करोति। यदि मनुष्याणां स्वेच्छया साध्वसाधुकर्मार्थं सामर्थ्यमेव न स्यात् तर्हि तेषां कृते साधुकर्मोपदेशः अपि व्यर्थो भवेत्।

वस्तुतः बुद्धिमात्रेण संशयस्यास्य समाधानं निर्णेतुं न शक्यते। कश्चित् ब्रूयात्- अहं मम हस्तम् उत्थापयामि, अधः नयामि च इत्येतत् ममैव इच्छया अहं करोमि इति। अपरः कश्चित् ब्रूयात्- तव हस्तस्य उत्थापनम् अवनमनञ्च पूर्वनिर्धारितम् आसीत् तदनुसारं तव चेतसि तथा बुद्धिः आगता। तदनुसारं त्वया उत्थापितम् अवनतञ्च इति। सा दृष्टिः तव नास्ति इति कारणात् त्वया तथा उच्यते- अहं करोमि इति। भगवान् श्रीरामकृष्णः एतद्विषये वक्ति- "यावता ईश्वरलाभः न भवति तावत्पर्यन्तम् अहं करोमि इति अनुभवः भवति। स चाऽयं भ्रमः ईश्वरेणैव स्थापितं वर्तते"[2] -इति। ईश्वरेच्छया एव सर्वं भवति, किन्तु ईश्वरज्ञानम् अस्माकं नास्ति इति हेतोः अस्माकं कर्तृत्वबुद्धिः भवति।

यदि ईश्वरेच्छया एव सर्वं भवति तर्हि पापपुण्ययोः फलभोगः अस्माकम् इति कथं सङ्गच्छते इति प्रश्नस्य उत्तररूपेण भगवता श्रीरामकृष्णेन उच्यते- "इमं भ्रमम् ईश्वरः एव स्थापयति, अन्यथा पापवृद्धिः अभविष्यत्, जनाः पापकर्मणः न अभैषुः"[3] -इति। यदि अस्मासु स्वाधीनेच्छाशक्तिबोधः कर्तृत्वबुद्धिर्वा न अभविष्यत्, मदाचरितकर्मणां फलं मयैव भोक्तव्यम् इति बोधः यदि न अस्थास्यत् तर्हि वयं यथेच्छं पापादिकमपि अकरिष्याम। तेन पापवृद्धिः अभविष्यत्। अतः तादृशकर्तृत्वबुद्धिः ईश्वरेणैव सुपरिकल्पिततया स्थापिता वर्तते। यदा तु ईश्वरलाभः भविष्यति तदा इयम् उपलब्धिः भविष्यति- यत्किञ्चित् कर्म क्रियते तत्सर्वमपि ईश्वरनियन्त्रिततया यन्त्रवत् क्रियते अस्माभिः। तत्र स्वाधीना इच्छाशक्तिः इति वस्तुतः नैव वर्तते इति। अर्थात् यथा यन्त्रचालकः यन्त्रं चालयति यन्त्रमपि तथैव चलति। तत्र यन्त्रं स्वयं चलति इति प्रतीयते चेदपि तत् स्वेच्छया अन्यथाकर्तुं न शक्नोति। यन्त्री यथा तत् नियन्त्रयति तथैव तत् नियन्त्रितं भवति। तद्वत् अस्माभिः क्रियमाणानि कर्माणि, अन्यत् सर्वमपि ईश्वरेच्छानियन्त्रिततया एव भवति इति।

**ईश्वरकर्तृत्वोपदेशः कस्मै युज्यते -** प्रसङ्गेऽस्मिन् अपरमेकं विषयं श्रीरामकृष्णपरमहंसाः स्पष्टीकुर्वन्ति- "तर्कः न कार्यः"[4] इति। अर्थात् स्वसिद्धान्तम् अपरस्य कृते आपादयितुं वादः न कार्यः। यः स्वं कर्तारं मन्यते तं प्रति ईश्वरकर्तृत्वोपदेशः व्यर्थः एव। यस्तु संसारात् विरक्तः मुमुक्षुः अथवा जिज्ञासुः भक्तो वा तस्य कृते उपदेशः युज्यते। यदा स्वं कर्तारं मत्वा भूयो भूयः कर्म कृत्वा क्रमशः अकर्तृत्वानुभवः स्वतः जायते तदा एव अयम् उपदेशः संसारिणां कृते युज्यते। यस्तु स्वमेव कर्तारं मन्यते तेन सह विवादः न कार्यः -इत्येव परमहंसानाम् आशयः। शास्त्रेषु अपि युक्ताधिकारिणे एव उपदेशः कार्यः इति निर्देशः उपलभ्यते। तथाहि वेदान्तसारे "अधिकारी तु ... साधनचतुष्टयसम्पन्नः प्रमाता"[5] इति अधिकारिलक्षणं प्रोक्तम्। तत्र साधनचतुष्टयं नाम नित्यानित्यवस्तुविवेकः, फलभोगवैराग्यं, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वञ्च। वैराग्यञ्च कर्तृत्वबुद्धौ सत्यां नैव सम्भवति। अतः एतत्सर्वं सम्यक् विचार्य एव उपदेशः कार्यः। न तु केनापि सह विवादं कृत्वा स्वसिद्धान्तः तस्मिन् आरोपणीयः।

**वैद्योत्थापितलौकिकतर्काणाम् उत्तरम् -** भगवान् श्रीरामकृष्णः एकदा भक्तपरिवृत्तः सन् उपदिशति स्म- मया अज्ञेन किमपि

---

[1] श्रीश्रीरामकृष्णकथामृत, प्रथम खण्ड, (१५.०८.१८८३), (पत्रसंख्या ), उद्बोधन कार्यालय।

[2] श्रीश्रीरामकृष्णकथामृत, प्रथम खण्ड, (१५.०८.१८८३), (पत्रसंख्या ), उद्बोधन कार्यालय।

[3] श्रीश्रीरामकृष्णकथामृत, प्रथम खण्ड, (१५.०८.१८८३), (पत्रसंख्या ), उद्बोधन कार्यालय।

[4] श्रीश्रीरामकृष्णकथामृतम्, प्रथम खण्ड, (१५.०८.१८८३), (पत्रसंख्या ), उद्बोधन कार्यालय।

[5] वेदान्तसारः – ६, (११ पत्रम्, सुबोधिनी बालवोधिनी विद्वन्मनोरञ्जनी इति टीकात्रययुतः ब्रह्मचारि-मेधाचैतन्यसम्पादितः वेदान्तसारः)

न ज्ञायते चेदपि ये इमे उपदेशाः क्रियन्ते, ते सर्वे ईश्वरेच्छया एव सम्भवन्ति इति। परमहंसाः आत्मानं यन्त्ररूपेण निर्वर्ण्य ईश्वरं यन्त्रित्वेन व्याख्यान्ति। तदा तत्रोपस्थितः वैद्यः प्रथमं पृच्छति- यदि भवान् यन्त्रस्वरूपः तर्हि कथमेवम् उपदेशं करोति। एतेन तु भवतां गलदेशे विद्यमानः रोगः वर्धते एव इति तस्य आशयः। अस्य उत्तरं कथयन्ति परमहंसाः- मया किं वा कर्तुं शक्यते, ईश्वरेच्छया तथा भवति, यदा तथा अवस्था जायते तदा स्वस्मिन् नियन्त्रणमेव न भवति -इति। एवम् एकदा वैद्यः पृच्छति- अहं त्वयि श्रद्धां करोमि इत्यत्रापि किम् ईश्वरेच्छा एव कारणम् वा इति। अर्जुनदृष्टान्तं प्रदर्श्य भगवान् श्रीरामकृष्णः तदेव स्पष्टीकरोति यत् – "प्रकृतिस्त्वां नियोक्ष्यति"[1] -इति। अर्थात् ईश्वरेच्छया एव अस्माकं सर्वे प्रवृत्तयः। तदा वैद्यः पुनः पृच्छति- यदि ईश्वेच्छया एव सर्वं तर्हि कथमेवम् उपदेशं करोति भवान् इति। भगवान् उत्तरति- ईश्वरः मया यन्त्रस्वरूपेण एतत्सर्वम् उपदेशादिकं कारयति इति।

तदा पुनः वैद्यः पृच्छति- यदि आत्मानां यन्त्रमेव कथयति तर्हि यन्त्रवत् तुष्णीं तिष्ठतु, कथमेवम् उपदेशादिकम्। स्वाधीनेच्छाशक्तिः अर्थात् Free Will तेनैव प्रदत्ता खलु। यतोहि अहम् इच्छामि चेद् ईश्वरचिन्तनं कर्तुं शक्नोमि, पुनः इच्छामि चेत् नापि कर्तुं शक्नोमि। एतस्य प्रश्नस्य सदुत्तरं प्रयच्छन्ति गिरिशमहाशयः- भवते ईश्वर-चिन्तनम् अन्यत् किमपि सत्कर्म वा रोचते इत्यतः करोति, सा रुचिः कारयति। अर्थात् भवतः स्वतन्त्रेच्छा इति यत् मन्यते तत् नैव वर्तते इति। वैद्यः वदति- कुतः, अहं तु कर्तव्यं कर्म इति धिया करोमि। गिरिशमहाशयः कथयति- तदपि कर्तव्यं कर्म भवते रोचते इत्यतः भवतः तत्र प्रवृत्तिः। तदा वैद्यः दृष्टान्तमेकं प्रदर्शयति- चिन्त्यताम्, एको बालको दह्यते। तस्य रक्षणाय गमनं कर्तव्यधिया एव खलु। तत्र गिरिशमहाशयस्य उत्तरं- बालकप्राणरक्षणे अपि आनन्दो भवति, अतः एव अग्निमध्यं गच्छति भवान्। सः आनन्दो एव भवन्तं नयति। कर्तव्याचरणे तु कष्टमेव खलु -इति वैद्यः पृच्छति। तत्र ग्रन्थकारेण उच्यते- तादृशकष्टेऽपि आनन्दः एव। कर्तव्यकर्मसु आनन्दो नास्ति चेत् कथं तेषु प्रवर्तते भवान् इति प्रश्ने सति वैद्यः वदति- मनसः तथा गतिः। तत्रोच्यते- यदि मनोगतिः एव प्रवृत्तौ नियामिका तर्हि स्वाधीनेच्छाशक्तिः इति कुत्र।

एवं बहुधा प्रश्नान् पृष्ट्वाऽपि अनिरस्तसंशयः वैद्यः पुनः वदति- स्वाधीनेच्छा इति पूर्णतः वयं स्वाधीनाः इति तु न वदामः। किन्तु, यथा गौः एकत्र कीलके बद्धः अस्ति चेत् रज्जुः यावत् गच्छति तन्मध्ये अटितुं गौः स्वाधीना एव खलु। न वा सा यत्र क्वापि गन्तुं प्रभवति, किन्तु रज्जुसीमापर्यन्तं तस्य स्वाधीनता वर्तते खलु। अर्थात् पूर्णतः वयं स्वाधीनाः न स्म चेदपि, मम हस्तम् अहम् उत्थापयामि अधः नयामि वा इत्यत्र तु मम स्वाधीनता वर्तते एव। एवं स्वाधीनेच्छाशक्तिः इति तु प्रत्यक्षतः अपि सिद्धः एव। तत् नास्तीति कथं युज्यते।

**श्रीश्रीरामकृष्णपरमहंसानां सिद्धान्तः -** एतद्विषये भगवान् श्रीरामकृष्णः वैद्यं प्रति पाकदृष्टान्तम्[2] उपदिशति। यथा रन्धनकाले तप्तजलमध्ये आलुक-वार्ताकु-तण्डुलादीनि उत्प्लवनं कुर्वन्ति। अभिमानम् इव कुर्वन्ति यत्- "अहं नुदामि", "अहं उत्प्लवे" इत्यादि। लघुबालकाः चिन्तयन्ति प्रायः आलुकम्, पटोलिका, वार्ताकु -इत्येतानि मन्ये जीवन्ति सन्ति, अतः उत्प्लवन्तो। ये तु बुद्धिमन्तः जातबोधाः ते तु बोधयन्ति यत् एतानि सर्वाणि न जीवन्ति, स्वयं न उत्प्लवन्तो। यदि एधः काष्ठादिकं समाकृष्यते चेत्, अग्निः न भवति चेत्, न पुनः नुदन्ति। जीवस्य अपि अहं कर्ता इति अभिमानः अज्ञानजन्यः। ईश्वरशक्त्या एव वयं शक्तिमन्तः। पुत्तलनर्तनस्य पुत्तलिका मायाविनः पाणौ सम्यक् नृत्यति इति दृश्यते। किन्तु पाणितः पतनात् परं न पुनः नोदनादिकं दृश्यते। एवम् आपातदृष्ट्या अस्माकम् स्वाधीनेच्छाशक्तिः अस्ति इति प्रतीयते चेदपि आत्यन्तिकरूपेण तत् न विद्यते इति अखिलवेदान्तमतमेव श्रीश्रीरामकृष्णपरमहंसैरपि स्वयुक्त्या लौकिकोदाहरणेन उपदिष्टम्।

वस्तुतः भूतेशानन्दस्वामिचरणानां श्रीश्रीरामकृष्णकथामृतप्रसङ्गाख्यं ग्रन्थम् अवलोकयामश्चेत् तत्र परमहंसानाम् आशयः सुचिन्तिततया व्याख्यातं दृश्यते। तथाहि [3]स्वाधीनेच्छा वर्तते न वेति विषयोऽयं द्विधा चिन्तनीयः वर्तते। यस्तु स्वाधीनेच्छा अस्ति इति वदति, तदा अवगन्तव्यं यत् सः यस्मिन् स्तरे वर्तते तत्र कर्तृत्वबुद्धिः वर्तते। कर्तृत्वबुद्धिविषयकः प्रत्यक्षानुभवः भवति चेत् तत्र अनुमानादियुक्त्या तद्बुद्धेः बाधः तथा ईश्वरकर्तृत्वापादनं न शक्यते। एवञ्च ईश्वरानुभवः यस्य सम्पन्नः तस्य तु कदापि कर्तृत्वबुद्धिः न

[1] श्रीमद्भगवद्गीता- (१८.५९)

[2] श्रीश्रीरामकृष्णकथामृतम्- चतुर्थभागात्मकम्- प्रकीर्णखण्डम्- (३२९ पत्रम्), (२६.१०.१८८५ दिवसीयम्)।

[3] श्रीश्रीरामकृष्णकथामृत-प्रसङ्ग, प्रथमभागः – (४५), (कथामृते - १.१७.५-६), (पत्रसंख्या ३४०), उद्बोधन कार्यालय।

उदेति। तस्य कृते- अहं कर्ता इति बुद्धिः अपि आपादयितुं न शक्यते। अतः द्विस्तरीयजनानां वितर्कस्तु स्वाभाविकः एव। यद्यपि आत्यन्तिकतया ईश्वरः एव कर्ता तथापि यावता ईश्वरदर्शनं न भवति तावता कर्तृत्वबोधः स्थास्यति इत्येव स्वाभाविकम्। तदनुसारं स्वाधीनेच्छाशक्तिः अपि तस्य अस्त्येव। किन्तु सा स्वाधीनता कियत्परिमिता इति तु ईश्वरेच्छाधीना। अर्थात् गोदृष्टान्तम् अनुसारमश्चेत् गोः रज्जुः कियत् वर्धनीया, दृढं बन्धनं भवेद्वा इति तु गोः इच्छाधीनं न भवति। गोस्वामी यावतीं स्वाधीनतां प्रयच्छति तावत्पर्यन्तमेव तस्य गतिः। अतः स्वाधीनतायामपि ईश्वराधीनता एव इति आयातम्।

**निष्कर्षः -** निबन्धेऽस्मिन् अत्यन्तं सुप्रसिद्धस्य, स्वाधीनेच्छाशक्तिः अर्थात् Free Will इति वस्तुतः वर्तते उत ईश्वरेच्छा एव सर्वथा नियामिका- इति विषयस्य शास्त्रीय-लौकिकदृष्टान्तैः श्रीश्रीरामकृष्णपरमहंसानाम् उपदेशैः च तात्पर्यविश्लेषणं कृतम्। तत्र सामान्यतः सर्वेषामपि, येषाम् ईश्वरलाभः अभवत् तान् विहाय अन्येषां समेषामपि कर्तृत्वबुद्धिः तथा स्वाधीनेच्छाशक्तिः वर्तते एव। किन्तु येषाम् ईश्वरलाभः सम्पन्नः तेषां ज्ञानयोगिनां दृष्ट्या तु जगदिदम् ईश्वरमयं, जगति विद्यमानं सर्वमपि, जगति जायमानानि कर्माणि इत्येवं सर्वमपि ईश्वरेच्छानुसारं भवति। अस्माकं या स्वाधीनेच्छा इति अनुभवः, सोऽपि ईश्वरेणैव नियन्त्रिता भवति। एवञ्च स्वाधीनेच्छा नैव वर्तते इति न, किन्तु सा स्वाधीनेच्छा अपि अस्माकम् अधीने न भवति। अतः पारमार्थिकदृष्ट्या स्वाधीनेच्छा इति न वर्तते। अयं स्वाधीनेच्छानुभवः पापादिनियन्त्रणार्थम् अस्मासु संस्थापितः। इत्येतत् शास्त्रमतम् अविरुध्य स्वीयलौकिकदृष्टान्तैः श्रीश्रीरामकृष्णपरमहंसाः अपि डॉ. सरकारमहाशयं तथा अन्यान् भक्तान् एतद्विषये उपदिशति। तदेवात्र संक्षेपेण वर्णितमिति शिवम्।

## ॥ आश्रितग्रन्थसूची (Bibliography) ॥


१) गुप्तः श्रीमहेन्द्रनाथः । (1st Edition 1st October, 2016) । श्रीश्रीरामकृष्णकथामृतम् (चतुर्थभागात्मकम् प्रकीर्णखण्डम्) । बेलुड़मठः, हावड़ा : रामकृष्ण-मठः रामकृष्णमिशन् इत्येतौ ।

২) গুপ্ত শ্রীমহেন্দ্রনাথ । (February 2023) । শ্রীশ্রীরামকৃষ্ণকথামৃত (দ্বিতীয় খণ্ড) । উদ্বোধন কার্যালয়, বাগবাজার, কলকাতা, 700003 : নিত্যমুক্তানন্দ স্বামী ।

৩) ভূতেশানন্দ স্বামী । (October 2021) । শ্রীশ্রীরামকৃষ্ণকথামৃত-প্রসঙ্গ । রামকৃষ্ণ মঠ, বেলুড় মঠ । উদ্বোধন কার্যালয়, বাগবাজার, কলকাতা, 700003 : নিত্যমুক্তানন্দ স্বামী ।

৪) মেধাচৈতন্য ব্রহ্মচারী । (মহালয়া, ১৪২৪ বঙ্গাব্দ) । বেদান্তসারঃ । 38 বিধান সরণী, কলকাতা, 700006 : সংস্কৃত পুস্তক ভাণ্ডার ।


## ॥ आन्तर्जालीयतथ्यसूत्राणि (Web Sources) ॥


१) Archive - Isavasyopanishad Sankara Bhashya with Hindi Translation - Gita Press 1940.pdf

२) Gita Supersite - श्रीमद् भगवद्गीता | Gita Supersite

३) अद्वैतशारदा - अद्वैतशारदा | दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी

४) Sanskrit For Us - ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।अनेन वेद्यं सच्छास्त्रमिति वेदान्तडिण्डिमः॥ Sanskrit For Us

# ग्रन्थलिपिस्थमातृकायाः सम्पादनम् – एका समीक्षा

चन्दनमहान्ती, शोधच्छात्रः
श्रीसीतारामवैदिक-आदर्शसंस्कृतमहाविद्यालयः, कलकाता
दूरभाषसंख्या -7029344812
अणुवाक्संख्या – chandanmahanti66@gmail.com

**शोधसारः -** प्राचीनभारतीयज्ञानविज्ञानस्य मुख्यस्रोतःरूपेण विद्यमानाः वर्तन्ते प्राचीनमातृकाः। तासु प्राचीनसंस्कृतमातृकासु प्रायशः सम्पादिताः। परन्तु तथापि अनेकाः मातृकाः अधुनापि अप्रकाशितरूपेण भारतेषु मातृकागारेषु भारतेतरदेशेष्वपि मातृकागारेषु विद्यन्ते। एतासां मातृकाणां सम्पादनमतीवमहत्त्वपूर्णं, यतः अस्मादीयव्यवहारेण सह विविधशास्त्रशाखानां रहस्यं, वैज्ञानिकसमस्यानां समाधानं, काव्यसाहित्यानां लौकिकशिक्षेत्यादयः प्राप्यन्ते। दक्षिणभारतीय-प्राचीनसंस्कृतशिक्षापद्धतौ क्षेत्रलिपिषु वर्णानामक्षराभावात् एकस्याः भिन्नायाः लिपेः उद्भवः सञ्जातः या ग्रन्थलिपिरिति नाम्ना प्रसिद्धास्ति। अधुना दक्षिणभारतीयमातृकागारेषु प्राचीनमातृकासु प्रायशः मातृकाः ग्रन्थलिप्यैव लिखिताः।

भारतवर्षीयविविधक्षेत्रेभ्यः गवेषकाणां एतस्याः लिप्याः अवबोधने काञ्चन समस्याः समागच्छन्ति। यथा - वर्णानां ग्रन्थि-आकृतिरूपः, उपलब्धलिपिभिः सह सादृश्याभावः, लिपौ संयुक्तवर्णेषु परिवर्तनीयक्षेत्राणि, ताडपत्रेषु लिखितलिप्याः अवबोधनजनितसमस्याः, मातृकायाः पुरातनस्थितिः असमीचनता चेति।

एतस्याः लिपेः ज्ञानाय प्रथमं लिपिविशेषज्ञेभ्यः लिपिज्ञानं, तस्याः निरन्तरमभ्यासः, ततः अनेकेषां उपलब्धसहजपाठानां अभ्यासः, मातृकासु परिवर्तनीयक्षेत्रसमस्यानां चिह्नितकरणमित्यादयः ध्यातव्यविषयाः भवन्तीति शम्।

**शब्दसंकेताः** – प्राचीनमातृका, ग्रन्थलिपिः, ताडपत्रं, लिपिविशेषज्ञः, अभ्यासश्चेति।

**भूमिका** – प्राचीनभारते इतिहासस्य, धर्मस्य, साहित्यस्य, प्रशासनस्य च विकासे लिपेः अत्यन्तं महत्वपूर्णं स्थानमासीत्। भाषा मनुष्यान् ज्ञानस्य प्रकाशमकरोत्, किन्तु लिपिः तस्याः भाषायाः स्थायीरूपं प्रदाय ज्ञानस्य संरक्षणं प्रसारणं च सुलभं कृतवती। हृदयस्थभावस्य बहुसमयेभ्यः प्रकाशार्थमावश्यी तु लिपिः। भारते लिपेः इतिहासः सहस्रवर्षाधिकप्राचीनः। प्राचीनतमः लिपिनिदर्शनं सिन्धुसभ्यायाः मोहेञ्जो-दारो-हड़प्पा-नगरात् प्राप्तम् अस्ति, तच्च "सिन्धुलिपिः" इत्युच्यते। एषा लिपिः अद्यापि पूर्णतया न पठिता, किन्तु तस्याः लिपेः प्राचीनत्वं सूचयति। भारतीयोपमहाद्वीपेषु विविधानां लिपीनां उत्पत्तिः उपयोगश्च न केवलं भाषा संप्रेषणस्य साधनं नासीत्, अपि तु सामाजिक-सांस्कृतिक-राजनीतिकसंरचनायाः निर्माणेऽपि महत्त्वपूर्णं योगदानं दत्तवती।

वैदिककाले ज्ञानं श्रुतिपरम्परया प्रचलितमासीत्। तज्ज्ञानमेव अनुसन्धानप्रक्रियया ब्राह्मण-आरण्यक-उपनिषद्-सूत्रसाहित्येत्यादिक्रमाद् वर्तमानपर्याये समुपस्थितम्। भारतीयसंस्कृतेः धार्मिकचिन्तनस्य दर्शनस्य च प्रचारे लिपेः महत्त्वमन्यतमम्। यद्यपि आरम्भे वेदादयः श्रुतिपरम्परया प्रचलन्तः आसन्, परं लिपिबद्धत्वेन ते स्थायित्वं प्राप्तवन्तः।

भारतीयज्ञानपरम्परायाः प्रामुख्यविषयरूपेण विद्यमानाः प्राचीनमातृकाः। तासु प्राचीनसंस्कृतमातृकासु प्रायशः सम्पादिताः। परन्तु तथापि अनेकाः मातृकाः अधुनापि अप्रकाशितरूपेण भारतेषु मातृकागारेषु भारतेतरदेशेष्वपि मातृकागारेषु विद्यन्ते। एतासां मातृकाणां सम्पादनमतीवमहत्त्वपूर्णं, यतः अस्मादीयव्यवहारेण सह विविधशास्त्रशाखानां रहस्यं, वैज्ञानिकसमस्यानां समाधानं, काव्यसाहित्यानां लौकिकशिक्षेत्यादयः प्राप्यन्ते।

बौद्धग्रन्थललितविस्तारानुसारं ब्राह्मी तु लिपीनामादिः। तम्परम्परया इतेराणां लिपीनां समयेन सह उद्भवः। ब्राह्मीलिपितः उत्तरभारतेषु आदौ शारदालिपिः, एवञ्च दक्षिणभारतीय-प्राचीनसंस्कृतशिक्षापद्धतौ क्षेत्रलिपिषु वर्णानामक्षराभावात् एकस्याः भिन्नायाः लिपेः उद्भवः सञ्जातः या ग्रन्थलिपिरिति नाम्ना प्रसिद्धास्ति। अधुना दक्षिणभारतीयमातृकागारेषु प्राचीनमातृकासु प्रायशः मातृकाः ग्रन्थलिप्यैव लिखिताः।

**ग्रन्थलिपेः परिचयः-** ग्रन्थलिपिः दक्षिणभारतस्य (विशेषतः तमिळनाडुराज्ये) एका प्राचीना लिपिः। प्रायशः सर्वाः

भारतीयलिपयः ब्राह्मीतः जाताः । ग्रन्थलिपिरपि दक्षिणभारतीय-ब्राह्मीतः पल्लवलिपिः विकसिता । ततः प्रधानतया संस्कृतं तामिळभाषां च लिखिनार्थं व्यवह्यते एषा लिपिः। एतल्लिपेः स्थितिकालस्तु प्रायः क्रैस्तवीय ६००तः १८०० शतकं यावदेव। तमिळनाडुराज्यस्य आर्कार्ट्-सेलम्-तिरुचिरापल्ली-मधुरै-तिरुनेल्वेलिप्रदेशेषु क्रैस्तवीय सप्तमशताब्द्यां ग्रन्थलिपेः व्यवहृतासीत्। दक्षिणभारते पाण्ड्य-पल्लव-चोलराजवंशाः शिलालेखेषु अस्याः एव लिपेः प्रयोगं कृतवन्तः। एवञ्च मणिपल्लवसाहित्यस्य रचनार्थमेतल्लिपेः प्रयोगः भवति स्म। एतल्लिपितः जन्यलिपयस्तु तुळुलिपिः,मलयाळमलिपिः च। लेखनस्य गतिस्तु वर्णानां वामतो गतिः।

**ग्रन्थलिपिस्थमातृकासम्पादने समागताः समस्याः**-भारतीयप्राचीनज्ञानविज्ञानस्य संरक्षकेषु मुख्यं स्थानं धारयन्ति मातृकाः। तासु ग्रन्थलिपिस्थमातृकाः विशेषं महत्त्वं प्रवहन्ति, यतः एषु अनेकानि अप्रकाशितानि, अमूल्यानि च ग्रन्थरत्नानि संगृहीतानि सन्ति। विशेषतः दक्षिणभारतीयप्रान्तेषु एतस्याः ग्रन्थलिप्याः उपयोगेन लिखिताः मातृकाः प्रचुरतया दृश्यन्ते। किन्तु तेषां सम्पादने अनेकाः बाधाः समुपस्थिताः वर्त्तन्ते। यथा –

**ग्रन्थलिपेः जटिलता** -ग्रन्थलिपिः अत्यन्तजटिला अस्ति, यत्र प्रत्येकवर्णस्य विशेषग्रन्थिताकारः दृश्यते। ग्रन्थलिपेः पठनाय विशेषकौशलम् आवश्यकम्। अद्यत्वे संस्कृतलिपिविशेषज्ञाणामपि मध्ये अल्पाः एव जनाः लिपिं यथावत् पठितुं शक्नुवन्ति। ग्रन्थलिपेः स्वरूपं अन्यलिपिभ्यः भिन्नमिति।

**संयुक्ताक्षराणां भ्रमजनकता** -संयुक्तवर्णानां निर्माणप्रणाली बहुविधा अस्ति, संयुक्तवर्णानां संयोगः एकैकस्य लेखकस्य विशेषपद्धत्यनुसारं भवति। उदाहरणतः– "ञ्च" इति संयोजनं कतिपयलेखेषु स्पष्टं दृश्यते, अन्यत्र तु भिन्नं चिह्नम्। यया लिपिपाठे भ्रमं जनयति। वर्तमानस्थलिपिमालाभ्यः ग्रन्थलिपिः भिन्ना अस्ति। फलतः सामान्यपाठकानां लिप्यभ्यासे कठिनता जायते।

**ताडपत्रलेखनजन्यसमस्या** -ताडपत्रेषु कालान्तरेण लेखनक्षयः, छिद्रता, म्लानता च दृष्टव्याः। बहवः ग्रन्थाः जीर्णस्थितिषु वर्तन्ते, अन्यासां पूर्णपृष्ठाः अपहृताः सन्ति। ताडपत्रलिखितानां मातृकाणां वर्णाः म्लानाः, छिद्रयुक्ताः, अप्रत्यक्षाः च दृश्यन्ते। किञ्च, जलेन वा कीटैः क्षतिर्भवति। एषा स्थितिः सम्पूर्णग्रन्थस्य पुनर्निर्माणाय बाधां जनयति। अनेन पाठस्य सम्पूर्णतया पठने कठिनता सञ्जायते। एतैः कारणैः ग्रन्थलिपेः पाठसंपादनं दुष्करं भवति।

**पाठभेदानाम् अधिकता** -अनेकाः मातृकाः अपूर्णाः, छिन्नपृष्ठयुक्ताश्च सन्ति। सम्पूर्णपाठसंग्रहाय बाधा भवति। यदा पाण्डुलिपयः देशान्तरात् लभ्यन्ते, तदा बहवः भिन्नभिन्नपाठभेदाः दृश्यन्ते। अत्र कः पाठः यथार्थः इति निर्णयम्, अत्यन्तमिदं क्लिष्टकरं कार्यम्। एवञ्च प्राचीनप्रतिलिपिकारिणः स्वेच्छया अपि पाठे परिवर्तनं कुर्वन्तः आसन्। अतः प्रक्षिप्तश्लोकानाम्, लोपितांशानां च परीक्षणं गहनं विवेचनं च अपेक्षितम्।

**मानकीकृतलिपिन्यासस्य अभावः** -ग्रन्थलिपेः रूपरेखा मानकीकृता नास्ति। विभिन्नपाण्डुलिपिषु अक्षररूपेण भिन्नता अस्ति।

**डिजिटलसाधनानां न्यूनता** -ग्रन्थलिपेः पाठाय विशिष्टम् OCR साधनं वा AI आधारितं विश्लेषणप्रणाली अनुपलब्धा वा अपूर्णा अस्ति। अनेन सम्पादनप्रक्रिया विलम्बिता भवति।

**समाधानोपायाः –**

**लिपेः अभ्यासः -** ग्रन्थलिपेः शिक्षां प्राप्तुं लिपिशास्त्रज्ञैः सह प्रशिक्षणं, कार्यशालाः च आवश्यकम्। ग्रन्थलिपेः वर्णमालायाः अध्ययनं, लिपि-पाठमालायाः निर्माणं च करणीयम्।

**डिजिटलीकरणम्** -मातृकाणां स्कैनद्वारा डिजिटलीकरणं कृत्वा सुरक्षितीकरणं करणीयम्। मूलमातृकाणां डिजिटलीकरणं कृत्वा ताः संरक्षितुं शक्यते। OCR (Optical Character Recognition) तन्त्रज्ञानेन ग्रन्थलिपिपाठस्य रूपान्तरणं भवेत्। विश्वविद्यालयेषु, संस्कृताध्ययनकेन्द्रेषु च लिपिशास्त्रविषये पाठ्यक्रमाः आवश्यकाः। लघुकालिकः प्रशिक्षणम् अपि आयोजनीयम्। प्रत्येकं पाण्डुलिपिम् उच्चगुणसङ्केतनेन (High-Resolution Scanning) डिजिटलीकृत्य Digital Manuscript Library इति मध्ये समावेशनीयम्।

**तुलनात्मकमूल्यांकनम्** -अन्येषु ग्रन्थलिपिसम्बद्धमातृकेषु दृष्टवाक्येषु आधारितं सन्देहयुक्ताक्षराणां समाधानं कर्तव्यम्। एवञ्च

विविधपाण्डुलिपिषु पाठान्तराणां तुलनया संशययुक्तवाक्यानां निर्धारणं शक्यते। लिपिशास्त्रज्ञैः, भाषाविद्भिः, ग्रन्थविशेषज्ञैः च संयुक्तकार्यं सुसम्पादनाय आवश्यकम्।

**संयुक्ताक्षरनिर्धारणस्य मानकीकरणम्** -लिपिविशेषज्ञैः संयोजिताक्षरनिर्माणे एकस्य मानकीकृतप्रणालीकरणं करणीयम्। लिपिविशेषज्ञैः लिपेः मानकस्वरूपं निर्धातव्यं, यत् सम्पादनकार्ये सहायकं भवेत्।

**कृत्रिमबुद्धिप्रयोगः (AI Integration)** -AI आधारितः OCR-तन्त्रज्ञानं, ग्रन्थलिपिनिर्णयकार्येषु सहयोगेन पाठप्रक्रियायाः गतिं वर्धयेत्।

**संवादवर्गाः, कार्यशालाः च** -शोधकर्तृणां कृते ग्रन्थलिपिशिक्षाविषये कार्यशालाः, संवादवर्गाः च आयोजनीयाः। शोधार्थिनां कृते नियमितशिक्षावर्गाः, लघुकार्यशालाः, लिपिपरीक्षणकार्यक्रमाश्च आयोजनीयाः।

**पाठसम्पादनाय आन्तर्जालोपयोगः** -डिजिटलसंरक्षणार्थं विकिपीडियासदृशाः मुक्तपाठसम्पादनमञ्चाः (open-access platforms) उपयुज्यन्ताम्। विश्वस्य विविधसंस्थाभिः संयुक्तरूपेण अनुसन्धानं कृत्वा नवीनं पाठसम्पादनप्रणाली निर्माणं करणीयम्।

**उदाहरणम्** –



चेनाईस्थे आड्यारग्रन्थागारे दक्षिणभारतीयग्रन्थलिप्या प्राप्तस्य सीतापरिणयमहाकाव्यस्य प्रथमपुटम्

**प्रथमपुटस्य सम्पादितांशः** –हरिः ओम् शुभमस्तु रामजयम् । हणाजातिरिति जातित्वाज्जातेरसविषयादयोपयादिति दीपि। चकमेगन्तु माकाङ्क्षि। कमेः कर्मणि लिङ्। अस्मिन् सर्गे सूत्र यमकम्। यमकलक्षणमाह अव्यपेत्रितव्यपेताम्मतया प्रतात्मतया प्रत्तेस्तुवर्णनम्। यमकं तच्चपादानामदिमध्यान्तगोचरम्। एकद्वित्रिचतुः पादयमकानाम्विकल्पना। आदिमध्यान्तमाद्यन्तेमध्यादाद्यतसर्वतः। अत्यन्त बहवस्तेषां भेदास्सम्भूतयोनयः। सुकारादुष्कराश्चेति वर्ण्यन्ते तत्र केचनेति अन्यत्रापि द्वाद्यनकाक्षरावृतिर्यत्रोक्ता तु पुनः पुनः। य* कन्तत् द्विजानियादादिमध्यान्त भेदत इति तस्मिन् सर्गे योश्चिनिवृत्तं अयुजे ससजागुर्युजे सभरालोधभयगिनि गुरुजि लक्षणात्॥१॥

**निष्कर्षः** –प्राचीनभारतीयलिपीनां महत्वं केवलं भाषा-लेखनरूपेण नास्ति, अपि तु सम्पूर्णसमाजस्य सर्वेषां क्षेत्रेषु विकासे अपरिहार्यम्। धर्मे, शासने, साहित्ये, शिक्षायां, सांस्कृतिकजीवने च लिपेः प्रभावः सुस्पष्टः अस्ति। अधुनातनभारतीयसंस्कृतेः आधाररूपेण एषा प्राचीनलिपिः एव स्थिता। अतः एषा लिपिः न केवलं इतिहासस्य साक्षिणी, अपि तु अस्मद्संस्कृतेः आत्मप्रतीतिः।

ग्रन्थलिपिस्थमातृकाणां सम्पादनप्रयत्नः एकं सांस्कृतिकं पुनर्जीवनमिव भवति। समस्या बहवः सन्ति, किन्तु यथासम्भवोपायैः, नवप्रवर्तनैः च मातृकासम्पादनम् अधिकं सिद्धिप्रदं, सुलभं च भवेत्। एषा दिशा संस्कृतवाङ्मयस्य पुनरुत्थानाय आवश्यकसोपानं भवतीति शम्।

**सन्दर्भग्रन्थसूची** –


- शास्त्री, प्रो.पि. (२०१८) अनुसन्धानस्य प्रविधि-प्रक्रिया. नवदेहली: राष्ट्रिय-संस्कृत-संस्थानम्.
- मिश्रः, डॉ.एस. (२०२२) अभिलेखलिपिशास्त्रम्. कोलकाता- ६: बनारस-मर्केण्टाइल-कम्पनी.
- द्विवेदी, प्रो. प्र. (२०२२) संस्कृतशोध-प्रविधि. वाराणसी: शारदा-संस्कृत-संस्थान.

- गोस्वामी, प्रो. एस. (२०१८) पुँथिविद्या: तत्त्व ओ प्रयोग. कलकाता: पश्चिमबङ्ग रात्य पुस्तक पर्षत्.
- मण्डल, पि. (१९५१) पुँथिपरिचय. बोलपुर: विश्वभारती.
- Raghavan, V. – Manuscriptology and Textual Criticism.
- Sharma, R. – Grantha Lipi: Itihās evaṃ Vivecanam

**अन्तर्जालसूची –**

- Grantha to Devanagari Converter: https://sites.google.com/site/technicalhindi/files/IITM_Grantha%20to%20Devanagari%20Converter_02.html?attredirects=0&d=1
- Digital Library of India: Indian Institute of Science: http://www.new1.dli.ernet.in/.
- Google Books: http://books.google.co.in/bkshp?hl=en&tab=wp
- Manuscript Catalogs **Sanskrit:** http://audreytruschke.com/sanskrit-and-persian-lit-era/manuscripts/manuscript-catalogs/.
- National Mission for Manuscripts: https://web.archive.org/web/20090604000327/http://www.namami.org/.
- Sanskrit Manuscripts: http://www.library.upenn.edu/collections/sasia/skt-mss/.
- DEVNAGARI TO IAST CONVERT: https://arshavidya.org.uk/vyasa.html.

# ईश्वरस्यासद्भावे सौगतमतचिन्तनम्

बिप्लबसरकारः, न्यायविभागः (शोधच्छात्रः)
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य
(केन्द्रीयविश्वविद्यालयस्य)
अणुसङ्केतः- biplabs293@gmail.com

**सारसंक्षेपः-** भारतीयदर्शनपरम्परायां अवैदिकदर्शनेषु बौद्धदर्शनस्याप्रतिमं स्थानं विद्यते। अस्य दर्शनस्य अवैदिकत्वं वेदप्रामाण्यास्वीकारेणैव। वेदप्रमाण्यानभ्युपगन्तृत्वमेव अवैद्कत्वमे। यद्यपि दर्शनेऽस्मिन् अस्ति कर्म, अस्ति कर्मफलम्। साम्यमाधत्ते चैतदास्तिक विचारधारया। अस्य दर्शनस्य प्रवर्त्तको बुद्धः। बुद्धो यद्यपि कञ्चिद् ग्रन्थं नैव निर्मितवान्, परन्तु तेषामुपदेशाः भिक्षुभिरनन्तरं सङ्कलिताः प्रचारिताश्च तैरेवास्य सिद्धान्ताः ज्ञायन्ते। बुद्धेन उपदिष्टं यत् तत्त्वं तादृशं तत्त्वमूलकं प्रतिपादकत्वञ्च दर्शनं बौद्धर्शनं यद्यपि ख्यातं भवति तथापि तत्र चत्वारः सम्प्रदायाः विद्यन्ते। तेषामपि उपर्युक्तवादानां विषये यादृशी दृष्टिः विद्यते तस्याः विवेचनमपि आवश्यकं वर्तते इत्यतः अत्र किञ्चिदुपस्थाप्यते।

**प्रमुखाः शब्दाः** – सम्प्रदायाः, बुद्धः, प्रतीत्यसमुत्पादः, शाश्वतः, विज्ञानवादः, प्रमाणम् ।

भारतीयदर्शनपरम्परायां अवैदिकदर्शनेषु बौद्धदर्शनस्याप्रतिमं स्थानं विद्यते। अस्य दर्शनस्य अवैदिकत्वं वेदप्रामाण्यास्वीकारेणैव। वेदप्रमाण्यानभ्युपगन्तृत्वमेव अवैद्कत्वमे। यद्यपि दर्शनेऽस्मिन् अस्ति कर्म, अस्ति कर्मफलम्। साम्यमाधत्ते चैतदास्तिक विचारधारया। अस्य दर्शनस्य प्रवर्त्तको बुद्धः। बुद्धो यद्यपि कञ्चिद् ग्रन्थं नैव निर्मितवान्, परन्तु तेषामुपदेशाः भिक्षुभिरनन्तरं सङ्कलिताः प्रचारिताश्च तैरेवास्य सिद्धान्ताः ज्ञायन्ते।

तत्र चत्वारो बुद्धस्य सामान्याः सिद्धान्ताः विद्यन्ते। तथाहि -

**(१) प्रतीत्यसमुत्पादः**

**(२) क्षणभङ्गवादः**

**(३) अनीश्वरवादः**

**(४) अनात्मवादः**

**प्रतीत्यसमुत्पादनिरूपणम् -** बौद्धाभिमतः प्रतीत्यसमुत्पादः कार्यकारणभावस्य विशिष्टः नियमः विद्यते। यद्यपि गौतमबुद्धः कार्यकारणयोरविच्छिन्नां सन्ततिं नैव स्वीकरोति तथापि इदमङ्गीकरोति यत् “अस्मिन् सतीदं भवति ।”[1] एकस्य विनाशे सति अपरस्योत्पादो भवति। अयमेव वादः-नियमः प्रतीत्यसमुत्पादपदेनोच्यते। न्यायदर्शने कारणे सति कार्यस्योत्पत्तिर्भवतीति सिद्धान्तः प्रसिद्धोविद्यते। परन्त्वत्र नास्त्येवम्-प्रतीत्य समुत्पादो नाम प्रत्ययात् समुत्पादः। अर्थात् अतीतात् समुत्पादः। प्रत्ययपदेनात्र कारणं विवक्षितं परन्तु बुद्धेन प्रत्ययपदेन नैव स एवार्थः गृह्यते यः परैः कारणपदेन गृह्यते। प्रत्ययोऽयम् एतादृग् हेतुः यः कस्यचिद् वस्तुनः कार्यस्योत्पत्तेः प्राक् क्षणे लुप्तो भवति। प्रतीत्यसमुत्पादोऽयं कार्यकारणनियमस्य विच्छिन्नप्रवाहत्वं द्योतयति।[2] अयं बुद्धदर्शनस्याधारभूतः सिद्धान्तो विद्यते।

**क्षणभङ्गवादनिरूपणम्** – बौद्धदर्शने क्षणभङ्गवाद एकः सुप्रसिद्धः सिद्धान्तो विद्यते। तस्य अयमेवाभिप्रायः सर्वेषामपि पदार्थानां क्षणिकत्वं विद्यते। तेषां क्षणिकत्वं तु द्वितीयक्षणध्वंसप्रतियोगित्वमेव। बुद्धः स्कन्ध, आयतन, धातुभेदेन तत्त्वानि त्रिषु भागेषु विभक्तं करोति। स्कन्धाः पञ्च सन्ति रूप, वेदना, संज्ञा, संस्कार, विज्ञानाख्याः। रूपान्तर्गताः पृथिव्यादयः चत्वारो महाभूताः। सुखदुःखादीनामनुभवः एव वेदनापदेनोच्यते। अभिज्ञानं संज्ञा। संस्कारश्च वासनैव। विज्ञानपदेन चेतनोच्यते, मनोऽप्येतदेव। चक्षुः, श्रोत्र,

[1] म०नि० 1/4/8

[2] बौ० द० ( राहुल सांकृत्यायन) पृ० 33

घ्राण, जिह्वा, त्वक्, मनांसि चैतानि षडिन्द्रियाणि, रूप, शब्द, गन्ध, रस, स्पर्श, धर्माश्चैताः इन्द्रियविषयाः आयतनपदेनोच्यन्ते। धर्मपदेनात्र वेदना, संज्ञा, संस्काराः बोध्यन्ते। धातवश्चाष्टादश उपर्युक्तानि षडिन्द्रियाणि, षडिन्द्रियविषयाः, इन्द्रियविषयसन्निकर्षेण जायमानानि षड्विज्ञानानि चक्षुर्विज्ञानम्, श्रोत्रविज्ञानम्, घ्राणविज्ञानम्, जिह्वाविज्ञानम्, त्वग्विज्ञानम् मनोविज्ञानम् च। जगतोऽस्य सर्वाण्यपि वस्तूनि एतेषु त्रिष्वेवान्तर्भवन्ति । एतानि सर्वाणि चानित्यानि जन्यानि भवन्तीति सौगतानां सिद्धान्तः।[1]

**अनीश्वरवादप्रदर्शनम् -** वैदिकदर्शने ईश्वरस्य विचारः यत्रायाति तत्र स संसारस्यास्य स्रष्टा, पालकः, नित्यः, विभुः चेतनश्च इत्येवार्थः गृह्यते। सौगत दर्शने नास्त्येतादृशस्येश्वरस्य किञ्चिदपि स्थानम्। यदि च कश्चिदीश्वरः सम्भवति तर्हि स प्रतीत्यसमुत्पन्न एव सम्भवति प्रतीत्यसमुत्पन्नश्चेदीश्वरस्तर्हि स तु ईश्वर एव न भविष्यति ईश्वरसत्तास्वीकरणाय नास्ति बुद्धमतेन कश्चित्तर्कः। ईश्वरकर्तृत्वविषये बुद्धः उपहसति।[2] अन्यत्रेश्वरमपि सामान्यदेवकोटौ स्थापयति यश्च महाभूतानां निरोधस्य विषये देवानामिवाज्ञानी विद्यते।[3] अतः स्पष्टीभवति यद् बुद्धः ईश्वरमस्य जगतो कर्तृतया नैव स्वीकरोति न वा तस्य सर्वज्ञत्वमेवाङ्गीकरोति। अत एव सौगतदर्शने ईश्वरस्य कापि सत्ता नाङ्गीकृता विद्यते। यदि ईश्वरस्य सत्ताङ्गीक्रियकृता भवेत तर्हि सर्वज्ञत्वादीनामापत्तिः दातुं शक्यते। तथा नास्तीति बौद्धानां राद्धान्तः।

**अनात्मवादनिरूपणम् -** भारतीयवैदिकसम्प्रदाये आत्मनः सत्यत्वं नित्यत्वं शाश्वतत्वादिकत्वञ्च स्वीक्रियते। तथाहि –

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥[4]**

परन्तु गौतमबुद्धः वैदिकाभिमतं नैतादृशमात्मतत्त्वमङ्गीकरोति यः नित्यः शाश्वतः, अनुभवकर्ता, भोक्ता, ध्रुवः, अपरिवर्तनशीलश्च स्यात्। सः निगदति यदियं भावना पूर्णतया बालधर्म एव।[5] आत्मनः परमार्थतः नास्ति काचिदपि सत्ता। व्यावहारिकी एव आत्मपदार्थस्य सत्ता विद्यते स च आत्मपदार्थः, रूप, वेदना, संज्ञा, संस्कार, विज्ञानस्कन्धानां संघात एव। यश्च पदार्थः आत्मपदेनोच्यते सोऽयं पदार्थः एतेषां पञ्चानाम् स्कन्धानां समुदाय एव न तु तदतिरिक्तः। "मिलिन्दप्रश्ने" भदन्तनागसेनेन बुद्धसम्मतः आत्मविषयकः सिद्धान्तः यवनराजाय मिलिन्दाय प्रश्नप्रतिप्रश्नक्रमेण सम्यग् बोधितः।[6] बुद्धमतानुसारमात्माऽनित्यसंघातमात्रमेव। परन्त्वत्र प्रश्नोऽयं समुदेति यत्-यद्ययमात्माऽनित्यसंघातमात्रमेव तर्हि पुनर्जन्म कस्य भवति? बुद्धस्तु पुनर्जन्म स्वीकरोत्येव। कृतं कर्म कः भुनक्ति? कर्मानुरूपं च सुखं दुःखं वा कः अनुभवति? येन कर्माचरितं स तु अतीत एव यश्चोत्पन्नो भवति तेन तु कर्मैव नाचरितम्। अतः यद् द्रक्ष्यामो लोके कश्चिज्जन्म प्रभृति समृद्धः कश्चिच्च जन्मः प्रभृति दुःखी तत्र च नैव दृश्यतेऽधुनातनं कर्म, यत्फलेन कश्चित्समृद्धः कश्चिच्च दुःखी इति व्यवस्था भवेत्। अतः कृतहानिः, अकृताभ्यागमश्च प्रसक्तो भविष्यति। भौतिकवादस्याश्रयणञ्च गले सम्पतिष्यति।

समाधानं तु इत्थं दातुं शक्यते यत् - आभ्यां नामारूपाभ्यां कर्म क्रियते, तेन च कर्मणा अन्याभ्यां नामरूपाभ्यां जन्म गृह्यते। यः उत्पद्यते नायं स एव जन: नैव चापरः।[7] अत्र च नागसेनेनानेके दृष्टान्ताः प्रदर्शिताः। दीपशिखायाः दृष्टान्तः प्रदीयते - यदि कश्चिज्जनः रात्रौ दीपं प्रज्वालयति। किम् रात्रिपर्यन्तं स एव दीपः प्रज्वलति? साधारणतः एतदेव प्रतीयते यत् रात्रिपर्यन्तमेक एव दीपः ज्वलति परन्तु वस्तुतः नास्त्येवम् रात्रेः प्रथमस्य प्रहरस्य दीपशिखा अन्याऽऽसीत्, द्वितीयस्यान्या, तृतीयस्य च ततोऽप्यन्या। क्षणभेदेन वस्तुभेदादिति नियमानुसारेण तत्रापि क्षण-क्षणभेदेन दीपशिखा भिद्यते, आत्माप्येवमेव। कस्यचिदपि वस्तुनोऽस्तित्वमेवमेवास्ति। एकाऽवस्थोत्पद्यतेऽपरा च लीयते अयमेव प्रवाहः प्रचलति। प्रवाहस्यावस्थासु क्षणमात्रस्याप्यन्तरं नैव भवति। जीवनावस्थायामप्यात्मनः संघातात्मकस्य एवमेव प्रवाह: प्रचलति, मरणे सत्यपि प्रवाहोऽयं नैवोच्छिद्यते। एकस्य जन्मनोऽन्तिमस्य

[1] अं० नि० 3/12/34
[2] दी० नि० पथिकसुत्त 3/1
[3] दी० नि० केवट्ट सुत्त ||११||
[4] श्रीमद्भ. गी. 2/20
[5] "अयं भिक्खवे, केवलो परि पुरो बालधम्मो " म०नि० 1/12/2
[6] मि० प्र० पृ० 19-21
[7] मि० प्र० पृ० 57

विज्ञानस्य लये जाते सति अपरस्य जन्मनः प्रथमं विज्ञानं उत्थितं भवति।[1] अतः आत्मनोऽनित्यत्व स्वीकारेऽपि पुनर्जन्मवादः तर्कयुक्तो भवतीति सौगतानां प्रवाहः।

**बौद्धसम्प्रदायानां मतानुचिन्तनम् -** बुद्धेन उपदिष्टं यत् तत्त्वं तादृशं तत्त्वमूलकं प्रतिपादकत्वञ्च दर्शनं बौद्धर्शनं यद्यपि ख्यातं भवति तथापि तत्र चत्वारः सम्प्रदायाः विद्यन्ते। तेषामपि उपर्युक्तवादानां विषये यादृशी दृष्टिः विद्यते तस्याः विवेचनमपि आवश्यकं वर्तेते इत्यतः अत्र किञ्चिदुपस्थाप्यते। तथाहि –

**मुख्योमाध्यमिको विवर्तमखिलं शून्यस्य मेने जगत्,**
**योगाचारमते तु सन्ति मतयस्तासां विवर्तोऽखिलः।**
**अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुद्ध्येति सौत्रान्तिकः,**
**प्रत्यक्षं क्षणभङ्गुरं च सकलं वैभाषिको भाषते॥**[2]

बौद्धदर्शनस्य प्रस्थानानि चत्वारि सन्ति। उपरि प्रतिपादिताः विवेचिताश्च सिद्धान्ताः चतुर्ष्वपि प्रस्थानेषु समानरूपेण मान्याः सन्ति। तानि चत्वारि प्रस्थानानीमानि - वैभाषिकः, सौत्रान्तिकः, विज्ञानवाद: (योगाचार:), माध्यमिकाश्च इति प्रसिद्धानि सन्ति। वैभाषिकानुसारं बाह्यजगतः सत्ता प्रत्यक्षसिद्धा, अयं प्रकृतेर्मनसश्च स्वतन्त्रां सत्तामङ्गीकरोति। “**अथ बाह्यार्थस्य नित्यमनुमेयतावचनमसहमानो वैभाषिकः प्रत्यवतिष्ठते – कथं नीलादिद्रव्यं विज्ञानानामाकारं समर्पयति? दृष्टम्? अनुमितमिति वा? न तावदनुमितम्, आकारसमर्पणात् पूर्वमनुमानानुदयात्। यदि दृष्टम् तर्हि नीलादिपदार्थानां दृश्यत्वमवश्याश्रयणीयम्, अन्यथाकारसमर्पणहेतुत्वानुपपत्तेः। असम्बन्धस्य हेतुत्वे सर्वस्यापि सर्वत्र हेतुत्वप्रसङ्गात्। अत्र क्षणभङ्गुरः प्रत्यक्षश्चार्थ इति स्थितम्”।**[3] प्रकृतेरुपलब्धिः प्रत्यक्षा मनसैव भवति सौत्रान्तिकोऽपि बाह्यस्य जगतः सत्तामङ्गीकरोति परन्तु नास्य मतानुसारेण बाह्यं जगत् प्रत्यक्षविषयमपितु बाह्यानां वस्तूनां विना पदार्थानां मनस्यवभासो नैव भवति, अतः बाह्यवस्तूनामस्तित्वमनुमीयते।[4] उक्तञ्च मानमेयादयकारेण – “योगाचारेण साधिते बाह्यवस्तुनिरासमसहमानः सौत्रान्तिकः प्रत्यवतिष्ठते – अस्तु ज्ञानं सकारम्, तथापि न बाह्यमर्थमपह्नोतु शक्यम्। बाह्यपदार्थानां एकरूपस्य विज्ञानस्य बहुविधाकारसमर्पणमात्रं प्रति हेतुत्वात्। एकरूपमेव विज्ञानं नीलपीताद्याकारेण बहुधा विपरिवर्तते इति दुरुपवादमेव। तत्मात् विज्ञानाकारणामनेकविधत्वदर्शनात् तत्तदाकारणसमर्पणहेतुभूताः क्षणिकतरा बाह्यपदार्था अपि ज्ञानाकारविशेषदर्शनानुमेयाः।”[5] विज्ञानवादानुसारम् विज्ञानातिरिक्तं नास्ति किञ्चिद्वस्तु विज्ञानवाद: विज्ञानातिरिक्तस्य वस्तुनः सत्तां नैवाङ्गीकरोति। तत्र तर्कः प्रदीयते यद् यथा तिमिररोगी असत्कल्प केशचन्द्रादिकं पश्यति तथैव रूपादीनामसत्त्वेऽपि रूपादीनां विज्ञप्तिर्भवति, अतो अर्थाः नैव सन्ति केवला विज्ञप्तिरेव सत्, संसारे सर्वमपि विज्ञप्तिरेव।[6] तत्र मानमेयोदयकारः प्रमाणं प्रदर्शयति – माध्यमिकेनोक्तं ज्ञानाभावमसहमानो योगाचारः प्रत्यवतिष्ठते – अस्तु ज्ञेयाभावः, स्वप्नादौ ज्ञेयनामत्यन्ताभावे सत्यपि प्रतीयमानत्वात्, तत्दृष्टान्तेन विमतानामप्यत्यन्ताभावस्य सम्यगवगम्यत्वात्। ज्ञानं तु न निराकर्तुं शक्यम्। स्वप्नादौ अपि ज्ञानोदयदर्शनात्। न ज्ञेयाभावेन ज्ञानाभावोऽपि कल्पनीयः, प्रतीतिविरोधात्। तस्मात् विज्ञानमेव जाग्रत्प्रपञ्चघटादिरूपेण परिवर्तते। समनन्तरप्रत्ययेन च तदेव गृह्यते। तस्मात् दृश्यमानं घटाद्याकारं विज्ञानस्यैव। अपि च स्वयं प्रकाशरूपाद् विज्ञानाद्भिन्ना एव घटादयः। तथा च प्रयोगः – यत् प्रकाशते, तत् प्रकाशाद्भिन्नम्, यथोभयसिद्धः प्रदीप इति। तस्माद् विज्ञानविवर्तं जगदिति।[7] माध्यमिकः विज्ञप्तेरप्यस्तित्वं नैवाङ्गीकरोति माध्यमिकमते नास्ति कश्चिद् ग्राह्य ग्राहको वा सर्वमपि

---

[1] मि० प्र० पृ० 59
[2] मा.मेयोदयः प्रमेयप्रक. का. 51
[3] मानमेयः पृ. 282-283
[4] बुद्ध्याकारानुमेयोऽर्थो बाह्यः सौत्रान्तिकोदितः ॥ तदेव
[5] मानमेयः. पृ. 281
[6] विज्ञप्तिमात्रमेवैतदसदर्थावभासनात् ।
यद्वत् तैमिरिकस्यासत् केशोण्डुकादिदर्शनम्॥ विज्ञप्तिमात्रतासिद्धिः श्लो० १
[7] मानमेयः. पृ. 280

शून्यमेव।[1] शून्यवादी बौद्धमतं मनसि निधाय तत्सिद्धान्तमतमुपस्थापयति नारायणः – "ननु शून्यमेवेदं जगदिति वादिनी माध्यमिके जीवति सति कथं पदार्थपञ्चकविभागसिद्धिः? एवं हि स वदति – विमतं विज्ञानं शून्यविषयम्, विज्ञानत्वात् स्वप्नादिविज्ञानवदिति। ननु तत्रापि विज्ञानमस्त्येवेति कथं जगतः शून्यात्मकत्वमिति चेत् मैवम्, ज्ञेयाभावे ज्ञानस्याप्याप्यभावाद्, अतः शून्यं विवर्तं जगदिति।"[2] विज्ञानस्य, विज्ञेयस्य च सत्त्वम्, नैव पारमार्थिकम् अपितु सांवृतिकमेव।

**॥ शुभम् ॥**

**परिशीलितग्रन्थसूची –**


- श्रीनारायणद्वयः । ***मानमेयोदय***। व्याख्या. श्रीमती विजय राणी । दिल्लि : परिमल पाब्लिकेशन ।
- शर्मा, धर्मेन्द्रनाथः । ***भारतीय दर्शनशास्त्रम्***। कुरूक्षेत्र : कुरूक्षेत्र विश्वविद्यालय, 1968
- ***भारतीयदर्शन***। सम्पा. आचार्यः वलदेव उपाध्याय । वाराणसी, 1960
- ***बौद्धदर्शनतत्त्वविमर्शः***। सम्पा. रमेश कुमार द्विवेदी । वाराणसी : सम्पुर्णानन्द संस्कृत विश्वविद्यालयः, 2014
- सायणामाधवाचार्यः । ***सर्वदर्शनसंग्रहः***। सम्पा. त्रम्बकाचार्यः । पुना : भाण्डारकर प्राच्य शोधसंस्थानम्, 1982
- उदयनाचार्यः । ***न्यायकुसुमाञ्जलि*** । सम्पा. श्रीमोहन भट्टाचार्यः । कलिकाता : पश्चिमवङ्ग राज्य पुस्तक भाण्डार ।
- ***श्रीमद्भगवद्गीता***। गोरक्षपुर, गीता प्रेस ।


[1] नापि बुद्धिरपीत्याह: वादी भाध्यमिकः किल। स० सि० सं० बौ० प० प्र०

[2] मानमेयः. पृ. 279

# भारतीयदर्शनेषु नव्यन्यायस्य माहात्म्यम्

शिवशङ्कर-नाइया, शोधच्छात्रः,
यादवपुरविश्वविद्यालयस्य संस्कृतविभागे
Ph. 8697046807,
Email Id- sankar.naiya96@gmail.com

**सारसंक्षेपः-** न्यायशास्त्रस्य त्रिविधं विभक्तं कृतम्। तथा हि प्राचीनन्यायः मध्यन्यायः नव्यन्यायः च। न्यायदर्शनस्य प्रवर्तकतः महर्षिगौतमतः आरभ्य गङ्गेशोपाध्यायात् प्राक् यावत् प्राचीनन्यायः कथ्यते। तदनन्तरं नव्यन्यायप्रतिष्ठातुं गङ्गेशोपाध्यायतः इदानीं पर्यन्तं नव्यन्याय उच्यते। गङ्गेशोपाध्याय-रघुनाथशिरोमणि-गदाधरभट्टाचार्यादिविद्वद्भिः नव्यन्यायसम्प्रदायः सृष्टः। नव्यन्यायस्य भाषा गणिततुल्या। एतत्भाषाप्रयोगे यदि दार्शनिकतत्त्वालोचनं भवति तर्हि कृत्स्नं सन्दिग्धता दूरीभवति। सूक्ष्मातिसूक्ष्मचिन्तनम् एव नव्यन्यायस्य विशेषता। नव्यन्यायाध्ययनं विना कस्यापि संस्कृतग्रन्थस्य पूर्णतः तत्त्वज्ञानम् अयथार्थम्। अत एव नव्यन्यायस्य ज्ञानं तथा नव्यन्यायभाषाज्ञानं नितान्तम् आवश्यकम्। यथा गणितशास्त्रं विना भौतिकशास्त्रं (physics) रसायनशास्त्रं (chemistry) जीवशास्त्रं (biology) मानसशास्त्रं (psychology) तथा समाजशास्त्रज्ञानम् (sociology) असम्पूर्णम्, तथा नव्यन्यायस्य ज्ञानादृते संस्कृतशास्त्राध्ययनम् असम्भवम्। तस्मात् नव्यन्यायाध्ययनं तथा आत्मस्थकृतम् अवश्यकरणीयम्।

**कुञ्चिकाशब्दः-** नव्यन्यायः, अनुबन्धचतुष्टयः, अव्याप्तिः, अतिव्याप्तिः, असम्भवः अवच्छेदकता, व्यापकता, प्रचियोगिता, अनुयोगिता

**उपोद्घातः-** भारतीयदर्शनेषु नव्यन्यायः महत्वपूर्णं स्थानमलङ्करोति। भारतीयदर्शनेषु उल्लेखितदर्शनानां मध्ये न्यायवैशेषिकौ अन्यतमं स्थानं भजेते। तथा च 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इत्युक्तम्। चतुर्दशविद्यासु न्यायदर्शनस्य प्राधान्यं सुस्पष्टमेव। आत्यन्तिकदुःखनिवृत्तये तथा मोक्षप्राप्तये दर्शनानाम् आविर्भावः। उपनिषदां प्रकाशानन्तरं भारतीयदर्शनं प्रकाश्यते। भारतीयदर्शनशास्त्रेषु सर्वसम्प्रदायस्य कश्चित् प्रतिष्ठाता नास्ति। गुरुशिष्यपरम्पराक्रमेण प्रत्येकं दर्शनं प्रवर्तितम्। भारतीयदर्शनेषु न्यायदर्शनम् प्रथमस्य स्थानस्य अन्यतमम् अधिकारि। तत् आन्वीक्षिकीनाम्ना अभिहितम्। आन्वीक्षिकी सर्वेषां विद्यानां प्रदीपः, सर्वकर्मणाम् उपायः, सर्वधर्माणां आश्रयः च। तदुक्तम् –

"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥"[1]

न्यायशास्त्रस्य नामान्तरं तर्कशास्त्रम्। कालप्रभावेन न्यायशास्त्रस्य त्रिविधं विभक्तं कृतम्। तथा हि प्राचीनन्यायः मध्यन्यायः नव्यन्यायः च। न्यायदर्शनस्य प्रवर्तकतः महर्षिगौतमतः आरभ्य गङ्गेशोपाध्यायात् प्राक् यावत् प्राचीनन्यायः कथ्यते। तदनन्तरं नव्यन्यायप्रतिष्ठातुं गङ्गेशोपाध्यायतः इदानीं पर्यन्तं नव्यन्याय उच्यते। महर्षिगौतम-वात्स्यायन-उद्दोतकर-वाचस्पतिमिश्र-उदयनाचार्य-जयन्तभट्ट-प्रभृतिभिः पण्डितैः प्राचीनन्यायः अलङ्कृतः। गङ्गेशोपाध्याय-रघुनाथशिरोमणि-गदाधरभट्टाचार्यादिविद्वद्भिः नव्यन्यायसम्प्रदायः सृष्टः। तन्मध्ये प्राचीननवीनन्याययोः कुत्रचित् विषये सूक्ष्ममतभेदाः सन्ति।

गौतमप्रणीतं वैदिकन्यायशास्त्रं धाराद्वयेन विभक्तम्। एका धारा प्रमाणप्रधाना प्रमाणमीमांसा वा। अपरा तु प्रमेयप्रधाना पदार्थमीमांसा वा। अक्षपादतः गङ्गेशोपाध्याययावत् नैयायिकानां प्रतिपादितं कृतित्वं प्रधानतः प्रमेयप्रधानम्। नव्यन्यायप्रतिष्ठातागङ्गेशेन तत्त्वचिन्तामणिग्रन्थे अत्यन्तगम्भीरेण विस्तृतेन च प्रमाणपदार्थानां प्रतिपादनं कृतम्। नव्यन्याये प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि सूत्रमिदमुपजीव्यम्। मणिग्रन्थमाश्रित्य टीका-प्रटीका-टिप्पनी-व्याख्यादयश्च प्रमाणप्रधाना एव। नवीनन्यायो मूलतः भाषाभिः शैलीभिश्च आधारितः। प्रकारता विशेष्यता संसर्गता प्रतियोगिता अनुयोगिता अवच्छेदकता अवच्छेद्यता निरूपकता निरुप्यतादिशब्दप्रयोगैर्नव्यन्यायो विभूषितः। भाषाकाठिन्यवशात् नव्यन्यायग्रन्थारम्भो गभीरारण्यप्रवेश इवेति मन्यते। नव्यप्राचीनयोर्भाषाशैलीगतप्रभेदाः सन्ति। प्राचीनन्यायस्य भाषा अत्यन्तसरला निराडम्वरा भवति चेदपि तस्य संक्षिप्तत्वात् सांकेतिकत्वाच्च प्रतिपादितो विषयो न हृदयसङ्गमः। तत्रानुमानत्वशैली न स्पष्टा दुःशीलतावशात्। पक्ष-साध्य-हेतूनां प्रतिपत्तिरपि न

भवति। नव्यन्याये तु भाषा आडम्वरपूर्णा आपाततसुकठिना भवति चेदपि शैल्याः शालिनतावशात् प्रतिपादितो विषयः अत्यन्तो सुस्पष्ट एव। पारिभाषिकशब्दैः सह पाठकानां सम्बन्धे सति आलोचितविषयो बोधितो भवति। प्राचीनन्याये विषयस्थापनम् अत्यन्तस्थूलमेव। तस्य विचारपद्धतिः केवलं विषयानां वाह्यकलेवरस्पर्शी, न तु तलस्पर्शी। नव्यन्याये तु विषयप्रतिपादनम् अत्यन्तसूक्ष्मम्। तस्य विचारपद्धतयः कलेवरस्पर्शत्वात् तलस्पर्शाः। अत्र विचार्येण प्रतिपक्षस्य खण्डनं कृत्वा स्वमतानि सुप्रतिष्ठितानि सन्ति।

कालप्रभावेन न्यायसाहित्यम् त्रिविधम्। यथाक्रमम् प्राचीनन्यायो मध्यन्यायो नव्यन्यायश्च। न्यायदर्शनस्य प्रादुर्भावः बुद्धजन्मात् प्राक्। तत्र अक्षपादकृतग्रन्थस्य आद्यन्तानुसरणं कृतम्। समानतन्त्रवैशेषिकदर्शनस्य समानास्थाप्रदर्शनं बौद्धविज्ञानवादञ्च मुख्यरूपेण प्रतिपादितम्। प्राचीनन्यायप्रधानाः ग्रन्थाः– गौतमकृतं *न्यायसूत्रं* वात्स्यायनकृतं *न्यायभाष्यम्* उद्योतकरकृतं *न्यायवार्त्तिकं* वाचस्पतिकृतं *न्यायवार्त्तिकतात्पर्यटीका* उदयनाचार्यकृतं *तात्पर्यपरिशुद्धिः न्यायनिबन्धो* वा च। मध्यन्यायपर्याये कतिपयन्यायसूत्राणि स्वीकृतानि। तत्र चापि वैशेषिकैः न्यायसिद्धान्तः परिपूर्णतया अस्वीकृतः। वाचस्पतिमिश्रात् परं जयन्तभट्टाच्च प्राक् भासर्वज्ञस्य *न्यायसारम्* अवलम्ब्य काश्मीरप्रदेशे मध्यकालीनन्यायप्रस्थानमारम्भम्। नव्यन्यायपर्याये गङ्गेशकृतमणिग्रन्थमाश्रित्य प्राभाकरमीमांसादर्शनं प्रणीतम्। अत्र चापि न्यायवैशेषिकदर्शनयोः समानतन्त्रत्वं स्वीकृतम्।

नव्यन्यायेषु प्रधानवैशिष्ट्यानां मध्ये प्रथमतः प्राचीनसूत्रपद्धत्याः उपेक्षा कृता। ग्रन्थनिर्माणे च ग्रन्थकारस्य प्रवृत्तिः उल्लेखिता। दर्शनमीमांसायामुक्तम् –

"द्वैधं दर्शनसाहित्यं नूतनप्रयत्नभेदतः।
प्रत्नं सूत्रक्रमापेक्षि, तदुपेक्षि च नूतनम्।।
सूत्रवार्तिकभाष्यादि, क्वचिट्टीकापरम्परा।
प्रत्नं दर्शनसाहित्यं नूतनं च तथेतरत्।।
सूत्रक्रमं परित्यज्य स्वतन्त्रैर्विवुधैस्ततः।
ग्रन्था येऽत्र कृतास्ते तु साहित्ये नूतने मताः।।
नूतनप्रत्नभेदोऽयं न कालापेक्षिको मतः।
अङ्गीकृतोऽसौ सर्वत्र भङ्गीभेदात्तु केवलम्।।"

समयेऽस्मिन् न केवलं न्यायशास्त्रे, व्याकरणादिशास्त्रेऽपि रचितानां विषयानां चिराचरितप्रथा न अनुसृता। फलतः शास्त्रादस्माद् पूर्वं प्राचीन-नवीनशब्दाः संयुक्ताः, तयोः भेदाः अपि प्रकटिताः। नव्यन्यायस्य द्वितीयं वैशिष्ट्यम् यत् पदार्थानां महत्त्वम् आपेक्षिकपरिवर्तनञ्चेति। प्राचीनन्याये प्रसिद्धानां षोडशपदार्थानां मध्ये यस्य पदार्थस्य प्राधान्यं समधिकम्, स पदार्थ एव नव्यन्याये प्राधान्यरहितरभवत्। प्राचीनपद्धत्यां च यस्य महत्त्वमल्पम्, स एव नवीने महान्। यथा प्राचीनन्याये जातिनिग्रहस्थानपदार्थयोः महासमारोहेन वर्णिते सत्यपि तौ नव्यन्याये नाममात्रेण पर्यवसितौ। नव्यन्यायस्य तृतीयं वैशिष्ट्यं यत् प्रकरणग्रन्थमाश्रित्यमिति। प्रकरणं पारिभाषिकशब्देन परिचितम्। तल्लक्षणमुक्तम् –

"शास्त्रैकदेशसम्वद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः।।"[2]

अतएव शास्त्रस्य कस्यचित् अंशस्य प्रतिपादकः प्रकरणग्रन्थः अन्यशास्त्रोपयोगी। प्रसङ्गेऽस्मिन् दर्शनमीमांसायां कथितम्-

"ग्रन्थाश्च प्रकरणाख्या नव्याः सन्ति तथाविधाः।
न्यायकाणादयोस्तत्त्वं यत्रैकत्रैव वर्ण्यते।।
क्वचित् पदार्था न्यायस्य, क्वचित् वैशेषिकस्य च।
वर्णिता मुख्यतस्तेषु तथान्तर्भाविताः परे।
षट्पदार्थान् कणादस्यैवान्तर्भाव्य प्रमेयके।

न्यायस्यार्थान् समालम्व्य वर्णनं चैषु दृश्यते।।"

प्रकरणे ग्रन्थे केवलं प्रमाणपदार्थ एव विशदेनोक्तः। यत्र च प्रमेयसंशयादिपञ्चदशपदार्थाः अपि च गौणरूपेन वर्णिताः ते प्रकरणग्रन्थाः। यथा भासर्वज्ञस्य *न्यायसार* उल्लिखितः। यत्र च मुख्यतः न्यायसम्मताः परन्तु वैशेषिकस्वीकृतपदार्थाः प्रतिपादिताः, ते अपि प्रकरणग्रन्थाः। यथा श्रीवरदराजकृता *तार्किकरक्षा* केशवमिश्रकृता *तर्कभाषा* चादि। यत्र वैशेषिकसम्मतपदार्थानां मध्ये न्यायस्वीकृतप्रमाणादिपदार्थाः अन्तर्भूक्ताः, तेऽपि प्रकरणग्रन्थाः। तत्र वल्लभाचार्यकृता *न्यायलीलावती* अन्नंभट्टकृतः *तर्कसंग्रहः* विश्वनाथकृतो *भाषापरिच्छेदः* लौगाक्षिभास्करकृता *तर्ककौमुदी* चेति समधिकाः प्रसिद्धाः। यस्मिन् ग्रन्थे केषाञ्चित् न्यायपदार्थानां केषाञ्चित् च वैशेषिकपदार्थानां निरूपणं कृतम्, तदेव प्रकरणम्। यथा शशधरकृतो *न्यायसिद्धान्तदीपः* अन्यतमः। कतिपयेषु विषयेषु नव्यन्यायस्य मतं भिन्नम् तथा अभिनवम्, तदधोलिखितम्।

**नव्यन्यायस्य अनुबन्धचतुष्टयः-** प्रवृत्तिप्रयोजकज्ञानविषयत्वम् अनुबन्धत्वम्। शास्त्रादौ अनुबन्धः कथनीयः। अनु स्वज्ञानाद् अनन्तरं बध्नन्ति शास्त्रे ग्रन्थे वा आसञ्जयन्ति प्रवर्तयन्ति ये ते अनुबन्धाः। सदानन्दयोगीन्द्रेणोक्तम्- 'तत्रानुबन्धो नामाधिकारिविषय सम्बन्ध प्रयोजनानि।[3]

न्यायवैशेषिकसम्मतपदार्थानां सामान्यज्ञानलिप्सुः अध्येतव्यविषयानां च ग्रहणधारणसमर्थः यो स एव नव्यन्यायस्य अधिकारी। यो निःश्रेयसप्रापको मोक्षकामी वा, स अपि नव्यन्यायस्य अधिकारी भवितुमर्हति। सदानन्दमहोदय आह प्रसङ्गेऽस्मिन्- 'अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिक-प्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्त-निर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।'[4]

यावत्पदार्थानां तत्त्वज्ञानं तस्य च उपाय इति नव्यन्यायस्य शास्त्रस्य प्रतिपाद्यः विषयः। सप्तपदार्थानां साधर्म्य-वैधर्म्याभ्यां विभागसाधनम्, तस्य च ज्ञानालाभ इति शास्त्रस्यास्य विषयः। द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा इति सप्तपदार्थानां लक्षणं विभागश्च, तेषां लक्षणादिनां च निरूपणमपि नव्यन्यायशास्त्रस्य विषयः।

शास्त्रेण ग्रन्थेन वा सह विषयस्य सम्बन्धः प्रतिपाद्यप्रतिपादकः बोध्यबोधको वा। विषये शास्त्रसम्बन्ध एव बोध्यता, शास्त्रे च विषयसम्बन्ध एव बोधकता। विषयः शास्त्रस्य बोध्य इति ज्ञानात् पाठकस्य शास्त्राध्ययने प्रवृत्तिः भवितुं शक्यते। पुनः शास्त्रं विषयस्य बोधकमिति ज्ञानात् अपि पाठकस्य शास्त्राध्ययने प्रवृत्तिः सम्भवति। अथवा विषयः प्रतिपाद्यः बोध्यो वा, ग्रन्थश्च प्रतिपादकः बोधको वा।

प्रयुज्यते अनेन इति प्रयोजनम्। महर्षिगौतमेनोक्तम्- 'यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्।' समुदायास्तिकदर्शनं कतिपयनास्तिकदर्शनञ्च इव विशेषतो न्यायवैशेषिकदर्शनमिव नव्यन्यायशास्त्रस्यापि प्रयोजनमं मोक्षः निःश्रेयसप्राप्तिः वा। अतः दुःखस्य आत्यन्तिकनिवृत्तिः अर्थात् यदपेक्षा किञ्चित् श्रेयः नास्ति, तद् लब्धुं शास्त्रस्यास्य प्रयोजनम्। विभिन्नेषु दर्शनेषु मोक्षविषये मतभेदाः सन्ति। आस्तिकदर्शनेषु मोक्ष एव प्रयोजनम्। तस्य कारणं किम्? कारणं हि तद् वेदानुयायि शास्त्रम्। विशेषतो अलौकिकविषये आस्तिकदर्शनानि पूर्णतया वेदप्रामाण्यवादीनि वेदानुगामीनि च। वेदे कथितम् अस्ति यत् मोक्ष एव परमनिःश्रेयस् वस्तु, अन्यत् सर्वं प्रत्यक्षदृष्टपदार्थ इव अनित्यम् असुखकरञ्चेति। मोक्षस्योपाय अपि वेदे कथितः अस्ति। अतः आस्तिकदर्शनानि वेदोक्तमोक्षलाभोपायस्यैव अनुसरणं कूर्वन्ति। तल्लोभोपाये च साहाय्यं कर्तुं स्वमतानुसारं दर्शनशास्त्राणि विरचितानि। अत एव आस्तिकदर्शनानां तथा नव्यन्यायस्यापि वेदानुसरणपूर्वकं मोक्षोपायवर्णनम् एव प्रयोजनम्। नव्यन्यायस्य फलात्मकप्रयोजनं निःश्रेयसप्राप्तिः, उपायात्मकप्रयोजनञ्च प्रतिपादितपदार्थानां यथार्थज्ञानमिति।

सर्वेषां पारिभाषिकसंज्ञानां लक्षणम् असन्दिग्धं यथार्थं वर्णनात्मकं च कृतमिति नव्यन्यायस्य मूललक्ष्यम्। नव्यन्यायरचनायाः मूलं कारणम्- निसर्गदत्तः यः स्वाभाविकभाषायाः एकः मौलिकधर्मः, यत्र सहजातसन्दिग्धता जायते। यस्मात् नैसर्गिकभाषा सम्पूर्णतः न सन्दिग्धतारहिता। यदि केनोक्तम्- क नामकजनः कक्षेऽस्मिन् वर्तते, पुनः केनापि उच्यते – क नामकजनः तस्मिन् कक्षे नास्ति, तथापि भावाभावयोर्मध्ये विरोधः भवति। परन्तु यदि समयभिन्ने अर्थात् क नामकजनः प्रातः वर्तते, सायं तु न विद्यमान इति उच्चारिते विरोधः न तिष्ठति। अपि च प्रत्युत्तरे यदि अवदत् यत् – क नामकजनः निर्दिष्टस्थाने आधारितः न तु सर्वत्र, तथापि कोऽपि विरोधः न स्यादिति

नव्यन्यायस्य अभिप्रायम्। नव्यन्यायभाषाप्रयोगेन सन्देहस्य निरसनं तथा दूरीकरणं भवति। अपि च नव्यन्यायस्य बहु आवश्यकता अस्ति। दार्शनिकचिन्तायाः वाद-युक्तिवादतः तत्त्वज्ञानं जायते। तदुक्तम् – 'वादे वादे जायते तत्त्वबोधः।'

भारतीयदर्शनेषु सर्वेषां तत्त्वचिन्तकानां दार्शनिकचिन्तनप्रद्धतिः भिन्ना भिन्ना। एकेन दार्शनिकसम्प्रदायेन सह अपरदार्शनिकसम्प्रदायस्य सूक्ष्मातिसूक्ष्मयुक्त्या समानतत्त्वोपरि आलोचनं दृश्यते। तदानीं विशेषतः बौद्धैः सह नैयायिकानां दार्शनिकतत्त्वालोचनं दीर्घदिनयावत् प्रचलितमिति बहुत्र दरीदृश्यते। एकपक्षेन सह अपरपक्षस्य उत्तरोत्तरं मतस्य खण्डनं मण्डनं च दृश्यते। अतः पुनः पुनः मतस्य लक्षणस्य च परिवर्तनं जातम्। एतस्मात् कारणात् संशयरहितरूपेण विशदेन मतस्य तथा लक्षणस्य परिष्काराय नव्यन्यायस्य उत्पत्तिः। नव्यन्यायस्य भाषा गणिततुल्या। एतत्भाषाप्रयोगे यदि दार्शनिकतत्त्वालोचनं भवति तर्हि कृत्स्नं सन्दिग्धता दूरीभवति। सूक्ष्मातिसूक्ष्मचिन्तनम् एव नव्यन्यायस्य विशेषता। नव्यन्यायाध्ययनं विना कस्यापि संस्कृतग्रन्थस्य पूर्णतः तत्त्वज्ञानम् अयथार्थम्। अत एव नव्यन्यायस्य ज्ञानं तथा नव्यन्यायभाषाज्ञानं नितान्तम् आवश्यकम्। यथा गणितशास्त्रं विना भौतिकशास्त्रं (physics) रसायनशास्त्रं(chemistry) जीवशास्त्रं(biology) मानसशास्त्रं(psychology) तथा समाजशास्त्रज्ञानम्(sociology) असम्पूर्णम्, तथा नव्यन्यायस्य ज्ञानादृते संस्कृतशास्त्राध्ययनम् असम्भवम्। तस्मात् नव्यन्यायाध्ययनं तथा आत्मस्थकृतम् अवश्यकरणीयम्।

**नव्यन्यायरीत्या लक्षणं परिष्कृतम्-** प्राचीनन्यायशास्त्रे विचारपद्धतिः उद्देशलक्षणपरीक्षाभेदेन त्रिधा। 'तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः, तत्रोद्दिष्टस्यातत्त्वव्यवच्छेदको धर्मो लक्षणं, लक्षितस्य यथालक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षा।'[5] नव्यन्यायपद्धतौ लक्षणकथनस्य सुमहत् स्थानमस्ति। अव्याप्त्यतिव्याप्त्यसंशयदोषाणां निवारणेन लक्षणस्य साधुता निरूपणीया। तदर्थम् अव्याप्त्यादिदोषाणां लक्षणमपि प्रतिपादितम्। लक्षणदोषाणां लक्षणे ज्ञाते सत्येव तत् तत् लक्षणगतदोषान् ज्ञातुं शक्यते। दोषज्ञानादेव दोषनिवारणं शक्यम्। लक्षणेन प्रत्येकवस्तुनः सम्यक् ज्ञानं भवति। अथ लक्षणं नाम किम्? लक्षणस्यैव लक्षणं वा किम्? लक्ष्यैकदेशवृत्तित्वम् अव्याप्तिः, अलक्ष्यवृत्तित्वम् अतिव्याप्तिः, लक्षमात्रावर्तनम् असंभव इति यथाक्रमम् अव्याप्त्यतिव्याप्त्यसम्भवानां लक्षणम् आविष्कृतमस्ति। तत्त्वतस्तेन लक्ष्यतावच्छेदकमनियतत्वं लक्षणलक्षणम् इति परिणमति। नव्यन्यायरीत्या लक्षणपरिष्कारः न्यायबोधिन्याम् उक्तम्। यथा- लक्षणकथनात् परं लक्षणपरिष्कारमिति नैयायिकानां शैलिः। नव्यनैयायिकानां लक्षणपरिष्कारपटवः। उदाहरणेन सह लक्षणं कथं परिष्क्रियन्ते इति पश्यामः।

**अव्याप्तिः**- लक्ष्यतावच्छेदकाधिकरणवृत्तित्वे सति लक्ष्यतावच्छेदकाभावाधिकरणवृत्त्यभावप्रतियोगित्वम्। उदाहरणं यथा- गोः कपिलत्वम्। लक्ष्यतावच्छेदकं गोत्वम्। लक्ष्यतावच्छेदकाधिकरणं कपिलगौः। तत्र वृत्तिः कपिलत्वम्। अथ च लक्ष्यो गौः। तत्र वृत्तिः अभावः कपिलत्वाभावः। तत्प्रतियोगित्वं कपिलत्वे इति।

**अतिव्याप्तिः**- लक्ष्यतावच्छेदकाधिकरणवृत्तित्वे सति लक्ष्यतावच्छेदकभावाधिकरणवृत्तित्वम्। गोः शृङ्गित्वं लक्षणतया उच्यते। लक्ष्यो गोः। अत्र लक्ष्यतावच्छेदकं गोत्वम्। लक्ष्यतावच्छेदकाधिकरणं गौः। तत्र वृत्तिः शृङ्गित्वम्, अथ च लक्ष्यो गौः। लक्ष्यतावच्छेदकाभावः गोत्वाभावः। तदधिकरणं महिषः। तत्र वर्तमानत्वं शृङ्गित्वे अस्तीति।

**असम्भवः**- लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम्। यथा गोः एकशफवत्वम्। लक्ष्यतावच्छेदकं गोत्वम्। तद्व्यापकीभूतः अभावः एकशफवत्वाभाव इति व्यापकत्वम्। तस्य अभावस्य प्रतियोगी एकशफवत्वम् इति।

अथ लक्षणं नाम लक्ष्यतावच्छेदकसमनियतत्वम्। तच्च लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यत्वम्। लक्ष्यतावच्छेदकव्यापकत्वं नाम यत्र यत्र लक्ष्यतावच्छेदकं तत्र तत्र लक्षणम् इति। यथा गौः सास्नादिमत्वम्। लक्ष्यतावच्छेदकं गोत्वम्। यत्र यत्र गोत्वं तत्र तत्र सास्नादिमत्वम्। यत्र यत्र सास्नादिमत्वम् तत्र तत्र गोत्वम् इति। एवं लक्षणस्य लक्षणम् उच्यते। अस्य लक्षणस्य व्यावृत्तौ अतिव्याप्तिः। अतः व्यावृत्तिभिन्नत्वम् इत्यपि लक्षणलक्षणे वक्तव्यम् इति परिष्कारः। लक्षणदोषाणां लक्षणलक्षणानाम् आविष्कारेण नव्यन्यायपद्धतिः शास्त्रान्तरसरणिभ्यो व्यावृत्ता एकाकिनी परिलसति। तादृग्दशायां निर्दोषलक्षणाविष्कारः अवश्यम्भावी वर्तते। तदर्थं साङ्केतिकपदानां प्रयोगोऽप्यनिवार्यो जातः।

**नव्यन्यायपरिभाषासम्बन्धिनी संक्षिप्तविवृतिः-** न्यायः निश्चितरूपेण क्वचित् सिद्धान्ते समुपस्थितपद्धतिं बोधयति। न्यायपदमिदं प्राच्यदर्शने परार्थानुमितेः साधकम् अवयवसमूहं विज्ञापयति। आचार्यगौतमेन अवयवसमूहात्मकन्यायः विचारितः। तद्सूत्रपद्धतिमवलम्ब्य दार्शनिकतत्त्वालोचितो ग्रन्थ एव न्यायदर्शननाम्ना परिचीयते। पूर्वोक्तं न्यायदर्शनं द्विविधं प्राचीनं नवीनञ्चेति। प्राचीनन्यायदर्शने सर्वविधदार्शनिकानां प्राकृतप्रश्नगोचरीभूतवस्तूनां न्यायावयवानाञ्च विचारः कृतः, न्यायप्रयोगेन च समालोचनमपि कृतम्। नव्यन्यायः तु न्यूनसंख्यकेषु विषयेषु स्वकीयविचारेण सीमितः। एवञ्चालोचितो विषयो नैपुण्येन सूक्ष्मदृष्ट्या यथा उपन्यस्तः तथा प्राचीनन्याये नोपलभ्यते। नव्यन्यायरीत्या प्रतिपदार्थानां सूक्ष्मतया विचार्य विहितमिति विशिष्टत्वम्। नव्यन्यायपरिभाषाया उदाहरणं लक्षणीयम्। यथा – द्विशब्दः द्वित्ववत्शब्दश्चेति द्वयमेव द्वित्वसंख्यायुक्तपदार्थं प्रतिपादयति। तत्र द्विशब्दः एकं पदार्थमुद्दिश्य प्रयोक्तुं नार्हति। द्वित्ववत्शब्दस्तु एकपदार्थमुद्दिश्य प्रयुक्तो भवितुमर्हति। अतः द्वौ पदस्य द्वित्ववानिति पदस्य चार्थः न सर्वथा तुल्यः। उक्तपदद्वयस्य पारस्परिकमर्थगतं वैपरीत्यमेव गृहीतम्। अतएव एकमात्रे अयं-पदार्थे द्विपदार्थस्य द्वित्वपदार्थस्य च विधेयतया प्रयोगो भवितुं नार्हति। किन्तु द्वित्ववत्पदस्यार्थो यत् द्वित्वं तत् द्वयोः पदार्थयोरेव स्थातुं शक्यते। अतः एकमात्र पदार्थमुद्दिश्य अयं द्वित्ववानिति प्रयोगो भवति। प्रथमस्थले पर्याप्तिसम्बन्धेन विधेयतया द्वित्वप्रयोगः अभिहितः। द्वितीयस्थले तु द्वित्वप्रयोगः समवायसम्बन्धेन बोध्यः।

नव्यन्यायो भाषाशैलीनामुपरि आधारितः पारिभाषिकशब्दैश्च परिपूर्णः। नव्यन्यायनये प्राचीनपद्धत्याः प्रतिपादितानां विषयानां किञ्चित् परिवर्तनं विधाय पारिभाषिकशब्देन ग्रन्थः प्रणीतः। कतिपयप्रसिद्धपरिभाषाणां समासेनैवालोचनमधोलिखितम्।

**प्रतियोगिता (अनुयोगिता च)-** यस्य अभावः स प्रतियोगी। प्रतियोगिनः धर्मः प्रतियोगिता। सा द्विविधा अभावीयः सांसर्गिकश्च। स्वाभावज्ञानप्रतिबन्धकज्ञानविषयत्वमेव प्रतियोगितायाः लक्षणमिति। अभावः प्रतियोगितायाः निरूपको भवति। अतः प्रतियोगिता अभावनिरूपिता। अभावत्वम् अपि प्रतियोगितानिरूपितं भवति। एकस्मिन् पदार्थे धर्मावच्छेदेन सम्बन्धावच्छेदेन वा अनेकाः प्रतोगिताः स्थातुं शक्यन्ते। यत्र च अभावः स अनुयोगी। अभावस्याधिकरणं हि अनुयोगी। तत्र अनुयोगिताधर्मः वर्तते। अनुयोगिना सह प्रतियोगिनः निरूप्य-निरूपकभावसम्बन्धो भवति। उदाहरणं यथा घटाभाववद् भूतलमिति स्थले घटः प्रतियोगी, घटाभावाधिकरणत्वात् भूतलम् अनुयोगीति बोधनीयम्। उदयनाचार्यः कथयति– 'अभावविरहात्मत्वं वस्तुनः प्रतियोगिता' इति। तन्मते प्रतियोगित्वं नाम अभावाभावत्वम्। यथा पटाभावस्य अभावत्वम् एव पटस्य प्रतियोगित्वम्। चिन्तामणिकारमते तु प्रतियोगित्वं स्वसम्बन्धविशेषः। सम्बन्धः द्विनिष्ठः। तत्र आधेयः प्रतियोगी, आधारः च अनुयोगी। उदाहरणं यथा हस्ते पुस्तकस्य संयोगः। अत्र पुस्तकः प्रतियोगी, हस्तः च अनुयोगी। अतः सम्बन्धनिरूपितप्रतियोगित्वम् अभावनिरूपितप्रतियोगित्वं च भिन्नं भिन्नम्।

**अवच्छेदकता(अवच्छिन्नता)-** अवच्छेदकं नाम मापकं विशेषणम्। ज्ञानं कथं वस्तुनः ग्रहणं करोतीति अवच्छेदकधर्मेण ज्ञायते। अवच्छेदकस्य धर्मः अवच्छेदका अवच्छेदकत्वं वा। अतः अवच्छेदे अवच्छेदकत्वं तिष्ठति। यथा पर्वतः वह्निमानिति अनुमितौ वह्निः साध्यः, वह्नित्व एव च साध्यतावच्छेदकः। कार्ये यद् विशेषणं तत् कार्यतावच्छेदकम्। कारणे यत् विशेषणं तत् कारणतावच्छेदकम्। यथा घटस्य कारणं कपालः। कारणत्वं कपाले वर्तते, अतः कपालस्य विशेषणं कपालत्वमेव कारणतावच्छेदकम्। तत्र च घटकार्यस्य विशेषणं घटत्वमेव कार्यतावच्छेदकम्। इत्थं प्रकारतावच्छेदकं विशेष्यतावच्छेदकं साध्यतावच्छेदकं प्रतियोगितावच्छेदकं आधेयतावच्छेदकं हेतुतावच्छेदकं प्रतिबन्धकावच्छेदकञ्च अन्यत्र प्रसिद्धम्। अपि च अवच्छेदकेन यद् विशेषणभूतं तत् अवच्छिन्नम्। यथा कार्यं पटः इत्यत्र कार्यतावच्छेदकं पटत्वम्, पटत्वावच्छिन्ना कार्यता। अतः कार्यतावच्छेदकावच्छिन्नकार्यता नाम पटत्वावच्छिन्नकार्यता। अवच्छेदकं त्रिविधम् – स्वसम्बन्धविशेषः अनतिरिक्तवृत्तित्वं पारिभाषिकञ्चेति।

**सामानाधिकरण्यम्-** स्वाधिकरणनिरूपितवृत्तित्वं सामानाधिकरण्यम्। यथा सामानाधिकरण्यसम्बन्धेन द्रवत्वं गुणे तिष्ठति। अत्र स्वपदेन द्रव्यत्वं बोध्यम्, तदधिकरणद्रव्यनिरूपितवृत्तिता गुणे वर्तते। अतः सामानाधिकरण्यसम्बन्धेन द्रव्यत्वं गुणे वर्तते। एवं वह्निसमानाधिकरणं धूम इत्युक्ते वह्न्यधिकरणं पर्वतः, तदधिकरणवृत्तिः च धूमः। यत्र यत्र धूमः तत्र तत्र वह्निः इत्युक्ते वह्नेः सामानाधिकरण्यं धूमः भवति। सामानाधिकरण्यं नियतं भवति चेत्, तदेव व्याप्ति इत्युच्यते। सामानाधिकरण्यस्य विपरीतं व्यधिकरणं नाम तदधिकरणावृत्तित्वम्। यथा वह्निव्यधिकरणं जलम्।

**व्यापकता-** तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकधर्मत्वं व्यापकत्वम्। अत्र तत्पदेन यस्मात् व्यापकः तत्बोधनीयः। तत् विद्यते

यस्मिन् स तद्वान्, तद्वति(व्याप्याधिकरणे) निष्ठा (वृत्तिः) यस्य स तद्वन्निष्ठः, स चासौ अन्योन्याभावश्चेति तद्वन्निष्ठान्योन्याभावः, तस्य प्रतियोगिता, तस्य अनवच्छेदकः धर्मः तत्त्वम्। व्याप्याधिकरणे यः अन्योन्याभावः अस्ति, तस्य अन्योन्याभावस्य प्रतियोगितावच्छेदकः धर्म एव व्यापकः। यथा धूमाधिकरणं पर्वतादि, तत्र वह्निमान् नेति अन्योन्याभावो न शक्नोति। परन्तु षड्वान् नेति अभावः धातुं न शक्यते। अतः तद्वन्निष्ठान्योन्याभावपदे घटवान् न इति भेदः वर्तते, तस्य प्रतियोगितावच्छेदकः घटः अनवच्छेदकः च वह्निः। अतः वह्निः धूमस्यैव व्यापकः। अधिकदेशवृत्तित्वं व्यापकत्वम्। न्यूनदेशवृत्तित्वं व्याप्यत्वम्। यथा धूमस्य सर्वाधिकरणे वृत्तित्वे सति वह्निः व्यापको भवति। धूमश्च वह्न्यपेक्षा अल्पस्थाने वृत्तित्वे सति व्याप्यो भवति। अपि च द्रव्यत्वापेक्षा अधिकस्थाने तिष्ठति चेत् सत्ता व्यापकः। द्रव्यत्वः सत्तापेक्षा अल्पस्थाने वृत्तित्वे सति व्याप्यो भवति। पदार्थयोः समानाधिकरणे व्याप्यव्यापकसम्बन्धो भवति। द्रव्यत्वः गुणस्य व्याप्यो व्यापकश्च, गुणोऽपि द्रव्यस्य व्याप्यः व्यापकश्च। कार्यं कारणस्य व्याप्यो भवति। कयोश्चित् पदार्थयोः कुत्रचित् अधिकरणे परस्परं व्याप्यव्यापकसम्बन्धो न भवति। यथा भूतत्वं मुर्त्तत्वं च।

**निरूपकता (निरूप्यता)-** येन यस्य निरूपणं भवति स तस्य निरूपकः। इह ज्ञापकनाम्ना अभिधीयते। यथा विशेष्यतायाः निरूपकः प्रकारता, प्रकारतायाः निरूपकः विशेष्यता भवति। कस्मिंश्चित् वस्तुनि प्रकारता भानं न भवति चेत् विशेष्यतायाः अपि भानं भवितुं नार्हति। यस्य निरूपणं स्यात्, स एव निरूप्यो निरूपितो वा। यथा प्रकारता विशेष्यता च, अधिकरणता आधेयता च, जनकता जन्यता च, स्वत्वः स्वामित्वः च प्रभृतिपदार्थानां निरूप्यनिरूपकभावो वर्तते। पर्वतः वह्निना इति ज्ञानं वह्निनिष्ठप्रकारता-निरूपित-पर्वतनिष्ठ-विशेष्यताशालि पर्वतनिष्ठ-विशेष्यतानिरूपित-वह्निनिष्ठप्रकारताशालि वा। घटस्य कारणं कपालद्वयं, घटवृत्तिकार्यत्वस्य निरूपकः कपालद्वयम्। कपालद्वयवृत्तिकारणत्वस्य निरूपकः घटः। कपालनिरूपितं घटवृत्तिः कार्यत्वम्। घटनिरूपितं कपालद्वयवृत्तिकारणत्वम् इति वक्तुं शक्यते। निरूप्यनिरूपकभाव इति सम्बन्धः।

एवम् अनेन शोधकार्येण ये विषया उपस्थापिता आशासे ते भविष्यति नवीनानुसन्धानमार्गप्रदर्शकाः स्युः। दार्शनिकचिन्तनम् अस्मिन् प्रकरणे विद्यमानम्। विषयाः समासेन किन्तु सम्पूर्णतया अत्र निरूपिताः। भविष्यति पुनरस्मिन् विषये गवेषणा चिकीर्षुणामपि आधारो भवेत् अयं शोधबन्ध इति आशासे।

**उल्लेखपञ्जिः**

[1] अर्थशास्त्र, द्वितीयाध्यायः।

[2] पराशर उपपुराण।

[3] वेदान्तसार, ५।

[4] वेदान्तसार, ६।

[5] वात्स्यायनभाष्य, ३।

**सहायकग्रन्थपञ्जी**


अन्नभट्टः। *तर्कसंग्रहः, सटीकः अध्यापनासहितश्च,* सम्पा. नारायणचन्द्रगोस्वामी, कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १४१० वङ्गाब्दः(प्रथमसंस्करणम्)।

उदयनाचार्यः। *आत्मतत्त्वविवेकः(प्रथमः खण्डः),* सम्पा. श्रीदीननाथ-टिपाठी, कलिकाता : संस्कृत-कलेज्, १९८४।

उद्योतकरः। *न्यायवार्तिकम्,* सम्पा. श्रीमान् अनन्तलालठक्कुरः, कलिकाता : दार्शनिकानुसन्धान-परिषद्, १९९७।

केशवमिश्रः। *तर्कभाषा(प्रथमखण्डः),* सम्पा. श्रीमान् गङ्गाधर-करः, कलिकाता : महाबोधि-वुक्-एजेन्सि, २००८(प्रथमसंस्करणम्); २०१९ (तृतीयसंस्करणम्)।

केशवमिश्रः। *तर्कभाषा (द्वितीयखण्डः),* सम्पा. श्रीमान् गङ्गाधर-करः, कलिकाता : महाबोधि-वुक्-एजेन्सि, २००९ (प्रथमसंस्करणम्); २०१९ (तृतीयसंस्करणम्)।

गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः(प्रामाण्यवादान्तः प्रथमः खण्डः),* सम्पा. श्रीमदुमेशमिश्रः, मिथिला : मिथिलाविद्याभवनम्, २०१३ विक्रमाब्दः।

गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः, व्याप्तिपञ्चकम्,* सम्पा. राजेन्द्रनाथ-घोषः, कलिकाता : पश्चिमबङ्ग-राज्यपुस्तक-पर्षद्,

१९८२ (प्रथमसंस्करणम्); २०११ (द्वितीयमुद्रणम्)।
गौतमः। *न्यायदर्शनम्(प्रथमः खण्डः)*, सम्पा. फणिभूषणतर्कवागीशः, कलिकाता : पश्चिमवङ्ग-राज्यपुस्तक-पर्षद्, १९८१।
जगन्नाथः। *रसगङ्गाधरः (प्रथमाननम्),* सम्पा. विद्युत्-वरण-घोषः, कलिकाता : पश्चिमवङ्ग-राज्यपुस्तक-पर्षद्, २०१७ (प्रथमसंस्करणम्)।
जयम्तभट्टः। *न्यायमञ्जरी (प्रथमद्वितीयाह्निकयोः प्रत्यक्षांशः)*, सम्पा. सञ्जित्-कुमार-साधुखाँ, कलिकाता : सदेश, २००६ (प्रथमसंस्करणम्)।
जयन्तभट्टः। *न्यायमञ्जरी,* अनु. सम्पा. च श्रीपञ्चाननतर्कवागीशः, कलिकाता : कलिकाताविश्वविद्यालयः, १९३९ (प्रथमसंस्करणम्)।
फणिभूषणतर्कवागीशः। *न्यायपरिचयः*, कलिकाता : पश्चिमवङ्ग-राज्यपुस्तक-पर्षद्, १९७८ (प्रथमसंस्करणम्); २००६ (तृतीयसंस्करणम्)।
विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः*. सम्पा. श्रीमद्-पञ्चाननभट्टाचार्यः, कलिकाता : महाबोधि-वुक्-एजेन्सि, १९७०(प्रथमसंस्करणम्); २०१६(पुनर्मुद्रणम्)।
विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः*, सम्पा. श्रीदीपक-घोषः, कलिकाता : संस्कृत-पुस्तक-भाण्डारः, २००३(प्रथमसंस्कणम्)।
श्रीमहेशचन्द्रः। *नव्यन्याय-भाषाप्रदीपः*, कलिकाता :संस्कृत कलेज्, १९५६।

## ENGLISH BOOKS

Chaterjee Satishcandra: *The nyaya theory of knowledge*, Calcutta; University of Calcutta, 1978 (Rpt. Of 2nd ed. 1950).
Dasgupta Surendranath: *A History of Indian philosophy*; Vol.-I, London; Cambridge University Press, 1932 (Rpt. Of 1st ed. 1922).

# संस्कृतव्याकरणशास्त्रपरम्परायां दुर्घटपरम्परायाः विकासे शरणदेवस्य योगदानम्

राजीवमण्डलः, शोधच्छात्रः
व्याकरणविभागः
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः

**शोधसारः -** संस्कृतव्याकरणशास्त्रपरम्परायां दुर्घटपरम्परा एका प्रसिद्धा परम्परा। वृत्तिपरम्परायां यद्यपि दुर्घटवृत्तेः ग्रहणं सम्भवेत्, तथापि अत्र स्वतन्त्ररूपेण अस्य ग्रहणं भवति। कारणं प्रायतः सम्पूर्णसूत्रादीनामुपरि वृत्तिः भवति। परन्तु दुर्घटस्य स्थितिः भिन्ना। भाषायां व्यवहृतवाक्यानां वाक्यस्थपदादीनाञ्च दुर्घटस्थलानां व्याख्या अत्र भवति। अतः नाम्ना एव एतादृशग्रन्थानां महत्त्वं बोध्यते। दुर्घटस्य दुर्घटत्वविषये हर्षनाथमिश्रेण प्रोक्तम् - "तेषां प्रयोगाणामत्र वृत्तौ विवरणं दीयते, येषु पाणिनिसूत्राणि दुःखेनैव संघटन्ते। कृच्छ्रघटनीयानां लक्ष्याणां लक्षणानुगततया विवरणदानादियं वृत्तिः दुर्घटवृत्तिनाम्नाऽऽख्याता ग्रन्थकारेण। यदि चोच्यते अत्र प्राधान्येन सूत्राण्युल्लिख्य तेषां वृत्तौ दुर्घटता दर्शिताऽस्ति, तथा च दुर्घटेतिविशेषणं सूत्राणां भवितुमुचितं न प्रयोगाणाम् इति तर्हि दुर्घटानां लक्ष्येषु सदुःखं घटनीयानां पाणिनिसूत्राणां विवरणं वृत्तिः जीवनं वा इति तात्पर्य नीत्वेदृशनामकरणमिति गृह्यताम्। न च पूर्वनिर्दिष्टविग्रहद्वयेऽपि षष्ठीसमासो दुर्लभः दुर्घटेत्यस्य प्रयोगे सूत्रे वा साकांक्षतया वृत्तिशब्देन सह सामर्थ्याभावात् इति वाच्यम्, मा भवतु षष्ठीसमासः। मध्यमपदलोपिसमासेन रूपसिद्धेः सम्भवात्, तथाहि दुर्घटाः प्रयोगाः यस्यां सा दुर्घटप्रयोगाः; दुर्घटानि वा सूत्राणि यस्यां सा दुर्घटसूत्रा सा चासौ वृत्तिरिति विग्रहे शाकप्रियः पार्थिवः इतिवत् दुर्घटवृत्तिशब्दस्य सिद्धिः।"[1]

**संकेतशब्दाः -** व्याकरणपरम्परा, दुर्घटपरम्परा, शरणदेवः, दुर्घटवृत्तिः, समालोचनम्।

**भूमिका -** आचार्यः शरणदेवः संस्कृतव्याकरणशास्त्रेषु बैयाकरणविद् आसीत्। व्याकरणशास्त्रे शरणदेवस्य अवदानं दुर्घटवृत्तिकाररूपेण स्वीकृतम्। तेन विरचितः दुर्घटवृत्तिः इति ग्रन्थे नानाविधशब्दानां दुर्घटप्रयोगः दृश्यते। दुर्घटप्रयोगः इत्यनेन संदिग्धसिद्धप्रयोगः इति उच्यते। वृत्तिः इत्युक्ते हरदत्तेन प्रोक्तम् – **'सूत्रार्थप्रधानो ग्रन्थो वृत्तिः'**। अत्र विविधानि सूत्राणि उदाहरणानि च प्रतिपाद्यन्ते। संस्कृतव्याकरणशास्त्रस्य प्रमाणभूताचार्यः तथा सर्वोच्चाचार्यः पाणिनिः। तस्य परम्परायां अनेकाः उपाचार्याः अपि प्रख्याताः, तेषु शरणदेवः नाम्ना आचार्यः विशेषतया दुर्घटपरम्परायां अत्यन्तं महत्वपूर्णं स्थानं गृह्यते। विद्यमानेषु ग्रन्थेषु तस्य परिचयं सम्यग्रूपेण न प्राप्यते, परन्तु दूर्घटवृत्तिग्रन्थे भतृहरिः, पुरुषोत्तमदेवः, राजशेखरः प्रभृतयः आचार्याणां नामानि उल्लेखं दृष्ट्वा तेषां समसामयिकः वा परवर्ती इति कल्पते। अतः सः प्रायः एकादश-द्वादशशताब्द्याम् आविभूतमभवत्। 'अष्टाध्यायी' इति ग्रन्थात् ४९२सूत्राणि गृहीत्वा 'दुर्घटवृत्तिः' इति ग्रन्थे तेन स्थापितः। सः पूर्वाचार्याणां मतमनुसृत्य स्वस्य मतं स्थापितवान्। विविधव्याकरणपुस्तकेषु त्रयाणां दुर्घटवृत्तिकाराणां नामानि प्राप्यन्ते, तन्मध्ये मैत्रेयरक्षितस्य, पुरुषोत्तमदेवस्य च दुर्घटवृत्तेः नाम विविधग्रन्थादिषु प्राप्यते, तथापि तयोः ग्रन्थौ अधुना अनुपलब्धौ। अधुना केवलं शरदेवस्य दुर्घटवृत्तिः एव उपलभ्यते। स्वस्यां वृत्तौ बौद्धग्रन्थप्रयोगाणां बहुशः स्मरणात् मङ्गलाचरणे स्वदुर्घटवृत्तेः बुद्धापरपर्यायस्य सर्वज्ञस्य नमनाच्च अस्याः दुर्घटवृत्तेः कर्ता शरणदेवः बौद्धः आसीत्।

शरणदेवेन व्याकरणं केवलं तात्त्विकशास्त्रं न, व्यवहारोपयोगिविषयोऽपि अत्र प्रतिपाद्यते। तेन उदाहरणैः सह भाषाप्रयोगस्य शुद्धिरूपं विवेचितम्। प्रायतः तस्य कृते 'दुर्घटवृत्ति' इति ग्रन्थे ४९२सूत्राणानामुल्लेखः दृश्यते। विद्यमानेषु सूत्रेषु सूत्रचतुष्टस्य अनुशीलनं मया कृतम्- (१) ध्रुवमपायेऽपादानम् (१/४/२४), (२)वारणार्थानामीप्सतः (१/४/२७), (३)जनिकर्तुः प्रकृतिः (१/४/३०) (४) स्पृहेरीप्सितः (१/४/३६)

**ध्रुवमपायेऽपादानम् (१/४/२४)**[2] आचार्येण शरणदेवेन तदीये दुर्घटवृत्ति-ग्रन्थे **'ध्रुवमपायेऽपादानम्'** इति पाणिनिविरचितसूत्रस्य व्याख्या कृता। साधारणतया सूत्रस्यास्य अर्थो भवति - अपाये अर्थात् विश्लेषे यत् ध्रुवम् अवधिभूतं वा तस्य अपादानसंज्ञा भवति। उदाहरणं यथा - **'वृक्षात् पत्रं पतति'** इति। उदाहरणेऽस्मिन् वृक्षात् पत्रस्य विश्लेषः भवति। अपि तु विश्लेषकाले वृक्षः भवति ध्रुवः

---

[1] हर्षनाथमिश्रेण विरचितः चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्, एल्. वि. पि. एस्., नवदेहली, १९७४, पृ. ४७-४८

[2] ऊषा-सिंहलः, दुर्घटवृत्तिः, परिमलप्रकाशनम्, दिल्ली, २०२०, पृ. 94

तस्मात् वृक्षः इति पदे अत्र प्रकृतसूत्रानुसारेण अपादानसंज्ञा भवति। ततः **'अपादाने पञ्चमी'(२.३.२८)** इति सूत्रेण पञ्चमी विभक्तिः भवति। तत्परं पञ्चम्याः एकवचने **'वृक्षात्'** इति रूपं जायते। परन्तु **'शब्दे सोऽपि वियुज्यते'** इत्युदाहरणे विश्लेषे सत्यपि अपादानसंज्ञायाम् **'अपादाने पञ्चमी'** इति सूत्रेण पञ्चमी न भूत्वा कथं सप्तमी भवति अस्मिन् विषये मनसि प्रश्नः जायते विषयेऽस्मिन् भागवृत्तिकारेण उक्तं यत् **'अहो चित्रा प्रयोगस्थितिरिति'** अर्थात् प्रयोगोऽयं विचित्रः तस्मात् विश्लेषे सत्यपि **'शब्द'** इति पदे सप्तमी भवति न तु पञ्चमी। ततः शरणदेवेन अस्मिन् ग्रन्थे भट्टिकाव्यस्य एकमुदाहरणं प्रदर्शितम्। यथा - **'प्रामाद्यात् गुणिनां हिते'**[1] इति। वाक्येऽस्मिन् **'प्रामाद्यात्'** इति पदस्य अवस्थानत्वात् **'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्'** इति वार्तिकानुसारेण **'हित'** इति पदे अपादानसंज्ञायाम् **'अपादाने पञ्चमी'** इति सूत्रेण पञ्चमी न भूत्वा कथं सप्तमी भवति ? अस्मिन् विषयेऽपि प्रश्नः जायते मनसि। अस्य प्रश्नस्य उत्तरप्रदानकाले शरणदेवेन उक्तं यत् **'एवे चानियोगे'** इतिवत् प्रायिकमिदम् अर्थात् प्रयोगोऽयं विरलः। एतच्च न क्वचित् दृश्यते। अत्र विषयमात्रविवक्षत्वात् **'हित'** इति पदे सप्तमी भवति न तु पञ्चमी। एवं प्रकारेण ग्रन्थकारेण अस्मिन् विषये आलोचना कृता।

**वारणार्थानामीप्सतः (१/४/२७)**[2]आचार्येण शरणदेवेन विरचितः दुर्घटवृत्ति-ग्रन्थे **'वारणार्थानामीप्सितः'** इति पाणिनिविरचितसूत्रस्य व्याख्यानं कृतम्। सारल्येन सूत्रस्यास्यार्थो भवति - वारणार्थानां धातुनां प्रयोगे वारणक्रियायाय ईप्सितः तस्य अपादानसंज्ञा भवति। उदाहरणं यथा - **'अन्नात् काकं निवारयति'**। उदाहरणेऽस्मिन् वारणार्थकक्रियाया ईप्सितो भवति अन्नमिति। अतः प्रकृतसूत्रानुसारेण अन्नस्य भवति अपादानसंज्ञा, ततः **'अपादाने पञ्चमी'(२.३.२८)** इति सूत्रेण पञ्चमी विभक्तिः भवति, ततः पञ्चम्याः एकवचने अन्नात् इति रूपं भवति। परन्तु, **"यदीच्छति जगत्सर्वे वशीकर्तुमयत्नतः।**

**परापवादसस्येषु चरन्ती गौनिवार्यताम्॥"**[3]

कथं **'परापवादसस्येषु'** इत्यत्र वारणार्थकधातोः प्रयोगेऽपि अपादानसंज्ञा न भूत्वा अधिकरणसंज्ञा भवति? अस्मिन् विषये प्रश्नो जायते। विषयस्यास्योत्तरप्रदानकाले शरणदेवेन प्रोक्तम् - **'ध्रौव्येणाविवक्षितत्वादिति'** अर्थात् अत्र ध्रौवत्वविवक्षा नास्ति अपि च विषयत्वमात्रविवक्षा अत्र विद्यते तस्मात् अत्र **'आधारोऽधिकरणम्'(१.४.४५)** इति सूत्रेण अधिकरणसंज्ञायां **'सप्तम्याधिकरणे च'(२.३.३६)** इति सूत्रेण सप्तमी विभक्तिः भवति। अतः शरणदेवेन अस्मिन् ग्रन्थे उदाहरणद्वयं प्रदर्शितम्। यथा – **'कूपादन्धं वारयति'**। **'अग्नेर्माणवकं वारयति'** चेति। तत्परं तेनोक्तं कथं अभीप्सितत्वादपि अत्र अपादानसंज्ञा भवति कूपादपि च अग्नेः इत्यत्र ? अर्थात् वारणक्रियायाः कूपः ईप्सितो नास्ति अग्निः अपि। तर्हि कथम् अत्र अपादानसंज्ञा ? अस्य विषयस्य समाधानकाले शरणदेवेन इत्यस्मिन् ग्रन्थे अन्धस्य गतेनेप्सितः कूपः अपि च **'माणवकस्य ज्योतीरूपोऽर्थः स्पृहणीयत्वेनेप्सितः'** इति रक्षिताचार्यस्य युक्तिद्वयं प्रदर्शितम्। अर्थात् अन्धस्य ईप्सितो भवति गतिपथः तर्हि गतिपथे कूपोऽस्ति चेत् कूपोऽपि अन्धस्य ईप्सितो भवति। एवं रूपेण माणवकस्य अग्नेः ज्योतीरुपोऽर्थः ईप्सितः न तु अग्नेः दाहिकाशक्तिः तस्मात् कोऽपि च अग्नेः इत्यस्य अपादानसंज्ञा भवति। इत्यनेन प्रकारेण ग्रन्थकारेण विषयस्यास्य आलोचना कृता।

**जनिकर्तुः प्रकृतिः (१/४/३०)**[4] आचार्येण शरणदेवेन तेन कृते दुर्घटवृत्ति-ग्रन्थे **'जनिकर्तुः प्रकृतिः'** इति पाणिनिविरचितस्य सूत्रस्य व्याख्या कृता। साधारणतया सूत्रस्यास्य अर्थो भवति - जायमानस्य कारणम् अपादानसंज्ञं स्यात् इति। उदाहरणं यथा - **'पुष्पात् फलं जायते'**। अत्र जातद्रव्यस्य अर्थात् फलस्य कारणं भवति पुष्पम्। तस्मात् प्रकृतसूत्रानुसारेण पुष्पमित्यत्र अपादानसंज्ञा भवति। ततः **'अपादाने पञ्चमी'** इति सूत्रेण पञ्चमी विभक्तिः भवति । तत्परं पञ्चम्याः एकवचने **'पुष्पात्'** रूपं भवति। परन्तु **'जातं वंशे भुवनविदिते पुष्करावर्तकानाम्'**[5] इत्यत्र **'वंश'** इति पदे कथं सप्तमी विभक्तिः भवति, यतः प्रकृतिः भवति वंश इति, अतः यत्र प्रकृतसूत्रानुसारेण कथं न अपादानसंज्ञा ? तदुत्तरे शरणदेवेन उक्तं यत् **'वंश्य प्रकृतिर्नतु वंश एव'** न तु प्रकृतिः तस्मात् अत्र अपादानसंज्ञा

---

[1] भट्टिकाव्यम् - १७/३९

[2] ऊषा-सिंहलः, दुर्घटवृत्तिः, परिमलप्रकाशनम्, दिल्ली, २०२०, पृ. 95

[3] Edited with Notes By T. Gaṇapati Śâstrî, Durghatavritti (Saraṇadeva), Printed at The Travancore Government Press, Trivandrum, 1909, P. 14-

[4] ऊषा -सिंहलः, दुर्घटवृत्तिः, परिमलप्रकाशनम्, दिल्ली, २०२०, पृ. 96

[5] मेघदूतम्, पूर्वमेघः, श्लोकः - ६

न भूत्वा **'आधारोऽधिकरणम्'**(१/४/४५) इति सूत्रेण अधिकरणसंज्ञायां **'सप्तम्यधिकरणे च'**(२/३/३६) इति सूत्रेण सप्तमी विभक्तिः भवति इति।

**स्पृहेरीप्सितः (१/४/३६)**[1] आचार्येण शरणदेवेन तदीये दुर्घटवृत्ति-ग्रन्थे **'स्पृहेरीप्सितः'** इति पाणिनिविरचितस्य सूत्रस्य व्याख्यानं कृतम्। सूत्रस्यास्य सारल्येन अर्थो भवति - स्पृह-धातोः प्रयोगे कर्तुः यः ईप्सितः तस्य सम्प्रदानसंज्ञा भवति। उदाहरणं यथा - **'सर्वे धनाय सपृहयन्ति'**। वाक्येऽस्मिन् कर्तुः ईप्सितवस्तु तु धनम्, तस्मात् प्रकृतसूत्रानुसारेण अत्र सम्प्रदानसंज्ञायां **'चतुर्थी सम्प्रदाने'(२.३.१३)** इति सूत्रेण चतुर्थी विभक्तिः भवति।

परन्तु **'स्पृहणीया विभूतिः'** इत्यत्र कथं सम्पदानसंज्ञा न स्यात् ? अपि च **'पुष्पाणि स्पृहयतीति'** वाक्ये कथं कर्मत्वम् ? यद्यपि वाक्यद्वये स्पृह-धातोः प्रयोगो विद्यते अस्मिन् विषये सन्देहः जायते मनसि। विषयस्यास्य समाधाने शरणदेवेन उच्यते - **'ईप्सिततमत्वविवक्षायां कर्मसंज्ञैव परत्वात्'**[2] इति न्यासकारस्य मतम् उल्लिखितम्। अर्थात् उदाहरणयोः **'विभूतिः'** अपि च पुष्पाणि इत्यत्र ईप्सिततमत्वविवक्षा विद्यते। तस्मात् अत्र सम्प्रदानसंज्ञा न भूत्वा **'कर्तुरीप्सिततमं कर्म'(१.४.४९)** इति सूत्रेण कर्मसंज्ञायां **'कर्मणि द्वितीया'(२.३.२)** इति सूत्रेण द्वितीया विभक्तिः स्यात्। एवं रूपेण ग्रन्थाकारेण विषयस्यास्य समाधानं कृतम्।

**निष्कर्षः** - व्याकरणपरम्परायां यथा पाणिनिः, कात्यायन, पतञ्जलिः, भट्टोजिदीक्षितः, कैयटः, नागेशभट्टः प्रभृतयः प्रसिद्धाः आचार्याः सन्ति, तथैव दुर्घटवृत्तिकारोऽपि एकः विशिष्टः व्याकरणाचार्यः। दुर्घटवृत्तिः इति ग्रन्थस्य व्याकरणशास्त्रे महत्त्वपूर्णं स्थानमस्ति। अतः प्रौढत्वेन शरणदेवस्य प्रयासफलं व्याकरणशास्त्रे भूयो भूयः प्रशस्यः। अस्यां शरणदेवस्य दुर्घटवृत्तौ ४९२संख्यकपाणिनीयसूत्राणां तथा कतिपय-वार्त्तिकानामालोचनं क्रियते। अत्र ७५ग्रन्थानां, ५६ग्रन्थकाराणां तथा १०४२शब्दानां संदिग्धसिद्धयः प्रयोगाः च पाणिनीयव्याकरणमनुकृत्य सम्यग्रूपेण संसाधिताः दृश्यते। अत्र तु विचाराः यथा प्रोढाः शैली च तथैव प्राञ्जला दृश्यन्ते।

**सहायकग्रन्थसूची –**


Ṡâstrî, T. Gaṇapati. Durghatavritti (Saraṇadeva) Trivandrum: Printed at The Travancore Government Press, 1909.
Sharma, Ram Nath. A History of the Sanskrit Grammatical Tradition. Delhi: Motilal Banarsidass, 2002.
Cardona, George. Pāṇini: A Survey of Research. Delhi: Motilal Banarsidass, 1999.
Mishra, D.N. History of Sanskrit Grammar. Delhi: Bharatiya Vidya Prakashan, 1980.
Mishra, Sashibhusan. Various Traditions in Sanskrit Grammar. Kolkata: Sanskrit Book Depot, 2023.
सिंहलः, ऊषा. दुर्घटवृत्तिः. दिल्लीः परिमलप्रकाशनम्, २०२०.
चक्रवर्ती, पार्वती. दुर्घटवृत्तिः. कोलकाताः संस्कृत-वुक-डिपो, २०२४.
मिश्रः, शशिभूषणः. पाणिनीयव्याकरणस्य भाषावैज्ञानिकम् अध्ययनम्. कोलकाताः वनारस-मर्केण्टाइल-कोम्पानी, २०१२.
पाण्डेयः, श्रीगोपालदत्तः & गिरिः, स्वामी श्रीप्रह्लादः. अष्टाध्यायी. वाराणसीः चौखम्बा-सुरभारती-प्रकाशनम्, १९८१.
मिश्रः, हर्षनाथः. चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्. नवदेहलीः एल्. वि. पि. एस्.,१९७४.


**अंतर्जालीयसङ्केतसूची -**

http://www.archive.org
http://www.wikipedia.org
https://scholar.google.com

[1] ऊषा-सिंहलः, दुर्घटवृत्तिः, परिमलप्रकाशनम्, दिल्ली, २०२०, पृ. 96
[2] न्यासः(भागः - १), १/४/३६, पृ. २८८

# सरस्वतीकण्ठाभरणदिशा प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः, कृद्ग्रहणे गतिकारकपूर्वस्यापि इत्यनयोः परिभाषयोः समीक्षा

नित्यगोपालपात्रः, शोधच्छात्रः,
मानविकसामाजिकविज्ञानविभागे, विद्यासागरविश्वविद्यालये
Email Id- nityagopalpatra.rkmvu@gmail.com
Phone Number- 8900677753

**शोधसारांशः**-वेदाङ्गेषु मुख्यं स्थानं भजते व्याकरणम् इति। भारतीयज्ञानपरम्परायां यथा पाणिनीयव्याकरणस्य माहात्म्यम् अस्ति तथैव अपाणिनीयव्याकरणानामपि प्राधान्यं दृश्यते। तत्र अपाणिनीयव्याकरणेषु भोजराजस्य सरस्वतीकण्ठाभरणम् अत्यन्तं सुविदितं लोके। प्रकृते शोधप्रबन्धे "सरस्वतीकण्ठाभरणव्याकरणानुसारं प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः किञ्च कृद्ग्रहणे गतिकारकपूर्वस्यापि इत्यनयोः परिभाषयोः समीक्षात्मकमध्ययनम्" इति शोधप्रबन्धः लिखितो वर्तते। भाष्यस्थवार्तिकैः साकम् अनयोः परिभाषयोः साम्यमस्ति वा न वा इत्यपि यथामति वर्णितम् अस्ति अस्मिन् शोधप्रबन्धे।

**कूटशब्दाः**- परिभाषा, समीक्षा, व्याकरणम्, व्याकरणपरम्परा, शब्दशास्त्रम्, अपाणिनीयव्याकरणम्, सरस्वतीकण्ठाभरणम्, सूत्राध्ययनम्।

**उपोद्घातः**- व्याकरणशास्त्रस्य मूलं हि वेदः। वि-आङ् इत्युपसर्गात् करणे ल्युट्प्रत्यये सति व्याकरणशब्दः निष्पन्नो भवति। अस्य व्याकरणशास्त्रस्य शब्दशास्त्रम् इत्यपि नामान्तरम् अस्ति। अस्मिन् व्याकरणशास्त्रे प्रकृतिप्रत्ययमाध्यमेन साधुशब्दानां सिद्धिः क्रियते। भर्तृहरिणा शब्दब्रह्मणः स्वरूपमुच्यते-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[1]

व्याकरणस्य परम्परा अतीव प्राचीना अस्ति। शास्त्रे व्याकरणस्य परम्पराविषये कश्चित् श्लोकः प्रसिद्धः अस्ति। तद्यथा-

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥

यद्यपि अस्यां भूमौ नैकानि व्याकरणानि प्राप्यन्ते तथापि पाणिनीयव्याकरणस्य यादृशी महिमा अस्ति तादृशी महिमा अन्येषां व्याकरणानां नास्ति। तथा सत्यपि गच्छता कालेन अपाणिनीयव्याकरणानि अपि विरचितानि आसन्। अपाणिनीयव्याकरणपरम्परासु परमारवंशस्य भोजराजस्य सरस्वतीकण्ठाभरणम् अत्यन्तं सुविदितं लोके। अस्य समय एकादशशतकम् इति प्रसिद्धिः। अस्मिन् सरस्वतीकण्ठाभरणव्याकरणे अष्टौ अध्यायाः, प्रत्यध्यायं चत्वारः पादाः सन्ति। तेन साकल्येन द्वात्रिंशत् पादाः प्राप्यन्ते। व्याकरणेऽस्मिन् षट्सहस्रं सूत्राणि सन्ति। व्याकरणमतिरिच्य अन्यत्र शास्त्रेऽपि तस्य ग्रन्था उपलभ्यन्ते। ते ग्रन्थाः तावत्- अलंकारशास्त्रे सरस्वतीकण्ठाभरणम्, ज्योतिषशास्त्रे विद्वज्जनवल्लभः, शिल्पविषये युक्तिकल्पतरुः, नीतिशास्त्रे चाणक्यराजनीतिशास्त्रम् इत्यादयः। प्रकृतः शोधप्रबन्धः "सरस्वतीकण्ठाभरणव्याकरणानुसारं प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः किञ्च कृद्ग्रहणे गतिकारकपूर्वस्यापि इत्यनयोः परिभाषयोः समीक्षात्मकमध्ययनम्" इति शीर्षकोपेतः वर्तते। श्रीमद्भोजराजेन विरचितस्य सरस्वतीकण्ठाभरणव्याकरणस्य मूलं हि- पाणिनेः अष्टाध्यायी, चान्द्रस्य चान्द्रव्याकरणं चेति। अपि च भोजस्य परिभाषाणामुपरि महाभाष्यस्थवार्तिकानां प्रभावः साक्षात् दृश्यते। तथापि अस्य भोजव्याकरणस्य मौलिकत्वं तु दृश्यत एव। पाणिनेः सूत्राणां ज्ञानाय यथा ग्रन्थान्तरस्य साहाय्यम् अपेक्षते। किन्तु भोजसूत्रे सा समस्या नास्ति। अत्र सूत्र एव सर्वमुल्लिखितं वर्तते। तेन सुकुमारमतीनां बालानां कृते इदं व्याकरणम् अत्यन्तमुपकाराय भवति। अस्मिन् व्याकरणे कानिचन मौलिकसूत्राणि सन्ति, कानिचन सूत्राणि

[1] वाक्यपदीये ब्रह्मकाण्डे १.१।

पाणिनीयव्याकरणात्, कानिचन वा चान्द्रव्याकरणात् तथैव स्वीकृतानि सन्ति। अतः प्रत्यक्षपरोक्षतया अस्य व्याकरणस्योपरि एतेषां व्याकरणानां प्रभावः दरीदृश्यत एव। सरस्वतीकण्ठाभरणस्योपरि रचितासु टीकासु दण्डनाथनारायणस्य हृदयहारिणी अतीव प्रसिद्धा वर्तते। अत्र हृदयहारिणीमाश्रित्यैव सूत्राणां व्याख्यानं प्रदर्शितं वर्तते। सम्प्रति "सरस्वतीकण्ठाभरणव्याकरणानुसारं प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः किञ्च कृद्ग्रहणे गतिकारकपूर्वस्यापि इत्यनयोः परिभाषयोः समीक्षात्मकमध्ययनम्" इति प्रबन्धः प्रस्तूयते।

**सूत्रम्- प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः (सर-१.२.२४)**

**सूत्राध्ययनम्-**'प्रत्ययग्रहणे यस्मात् स विधिस्तदादेः' इत्यशंस्य कथनस्य अभिप्रायं वदति- प्रत्ययमात्रबोधके पदघटिते शास्त्रे तदादेः तदन्तस्य च ग्रहणं भवति। अत्र तदादिः विशेष्यः, प्रत्ययश्च विशेषणं भवति। 'येन विधिस्तदन्तस्य' (सर-१.२.१९) इत्यनया परिभाषया तदन्तविधौ प्रत्ययान्ततदादेः ग्रहणं भवति। यस्मात् प्रत्ययो विहितो वर्तते सः तदादिशब्देन गृह्यते। प्रकृतेः पूर्वो भागः तदादिशब्देन न गृह्यते। अत्र प्रत्ययान्तस्य इति कथनादेव ज्ञायते प्रत्ययस्य परं कार्यं न भवति। अत्र च प्रत्ययान्ततदादेः इत्यनेन प्रकृतिप्रत्ययविशिष्टसमुदायस्यैव ग्रहणं भवति न तदतिरिक्तस्य। 'अपञ्चम्याः' इति निषेधस्य अर्थमाह- प्रत्ययमात्रबोधकं पदं यत्र पञ्चम्यन्तात् परं भवति तत्र तदादिविशेष्यकतदन्तविधिः नैव भवति। तदोवोच्यते हृदयहारिण्यां- 'न चेत् पञ्चम्यन्तात् परस्य प्रत्ययस्य कार्यं भवति' इति।

अस्याः परिभाषायाः फलमुच्यते- चिकीर्षति इति। 'सनाद्यन्तश्चाणिङः' (सर-१.१.४) इत्यनेन सूत्रेण कृ इत्यस्य धातुसंज्ञायां सत्यां, कृधातोः सन्प्रत्यये सति 'प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः' (सर-१.२.२४) अनया परिभाषया तदादिविशेष्यकतदन्तविधौ चिकीर्षति इति रूपं सिध्यति। चिकीर्षति इत्यत्र सन्प्रत्ययः कृधातोः परं विहितो वर्तते। अतः 'सनाद्यन्तश्चाणिङः' इति सूत्रे तदादिविशेष्यकतदन्तविधौ सनाद्यन्ततदादेः इत्यनेन केवलं चिकीर्षति इत्यस्यैव ग्रहणं भवति। तेन प्राचिकीर्षत् अत्र तदादिविशेष्यकतदन्तविधिः न भवति। अस्मिन्नुदाहरणे चिकीर्षत् इत्यंशस्यैव ग्रहणं भवति न तु प्राचिकीर्षत् इति समुदायस्य। तेन तदादिविशेष्यकतदन्तविधेः निषेधो भवति। गर्गस्यापत्यं, दक्षस्यापत्यम् इति व्युत्पत्त्या 'यञिञ्भ्याम्' (सर-४.१.८०) इत्यनेन सूत्रेण फक्प्रत्यये प्रकृतपरिभाषया तदादिविशेष्यकतदन्तविधौ गार्ग्यायणः, दाक्षायणः इत्यादीनि रूपाणि सम्भवन्ति। अत्र गर्गशब्दः, दक्षशब्दश्च तदादिविशेष्यकः अस्ति। अतः फक्प्रत्ययः गर्गशब्दात् किञ्च दक्षशब्दादेव विधीयते। तेन तदादिविशेष्यकतदन्तविधिरपि भवति। किन्तु परमगार्ग्यस्यापत्यं, परमदाक्षेरपत्यम् इत्यत्र 'प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः' इत्यनया परिभाषया तदादिविशेष्यकतदन्तविधिः न भवति। तेन च फक्प्रत्ययः अपि न भवति। एवञ्च परमगार्ग्यायणः, परमदाक्षायणः इत्यादौ तदादिविशेष्यकतदन्तविधिः नैव सम्भवति। अत्र गार्ग्यशब्दः प्रकृतिरस्ति। तस्मात् पूर्वमस्ति परमशब्दः। अतः प्रकृतेः पूर्वस्य परमशब्दस्य तदादित्वेन ग्रहणं न भवति। तेन च परमगर्गशब्दात् तदादिविशेष्यकतदन्तविधिः न भवति। प्रत्ययान्ततदादिः इत्यनेन प्रकृतिप्रत्ययविशिष्टसमुदायस्यैव ग्रहणं भवति नान्यस्य। तथैव परमदाक्षायणः इत्यत्रापि बोध्यम्।

अपञ्चम्याः इत्यस्य फलमाह- अन्तस्तीर्णम्, दृषत्तीर्णम् इति। 'रदाभ्यां निष्ठातो दश्च नः' (सर-७.३.८६) इत्यनेन सूत्रेण दृषत्तीर्णम् इत्यादौ तकारस्य नकारादेशः प्राप्त आसीत्। अस्मिन् सूत्रे रदाभ्याम् इति पञ्चम्यन्तं पदमस्ति किञ्च निष्ठा इति प्रत्ययमात्रबोधकम् अस्ति। अपञ्चम्याः इति निषेधकारणात् दृषद्-तीर्ता इत्यत्र रदाभ्यामुत्तरस्य दकारान्तात् दृषद् इत्यस्मात् शब्दात् तदादिविशेष्यकतदन्तविधिः न भवति। तेन च धातुतकारस्य नकारादेशो न भवति। एवञ्च अनिष्टं रूपमपि न सिध्यति। किन्तु रदाभ्यामुत्तरस्य निष्ठातकारस्यैव नकारादेशः भवति इति ज्ञेयम्।

**समीक्षणम्-**तदादिविशेष्यकतदन्तविधेः विधानाय नियममाह- प्रत्ययग्रहणे यस्मात्स विहितः इति। अस्यार्थः तावत्- प्रत्ययमात्रबोधकं पदं यत्र उपतिष्ठते तत्र तदादेः तदन्तस्य च ग्रहणं भवति इति। एतेन तदन्तविधिः सिध्यत्येव। अत्र तदन्तविधिः सिद्धे अपञ्चम्याः इत्यशंस्य निषेधाय भाष्यस्थवार्तिकमाह- प्रत्ययग्रहणं चापञ्चम्याः (भा.वा-१.१.४१९) इति। अस्य वार्तिकस्य अभिप्रायः तावत्- प्रत्ययमात्रबोधकं पदं यत्र पञ्चम्यन्तात् परं भवति तत्र तदादिविशेष्यकतदन्तविधिः न भवति। इयं परिभाषा तदन्ताङ्गस्य अपवादभूता अस्ति। अनयोः वार्तिकयोः समाधारेणैव भोजराजः परिभाषां लिलेख- 'प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः' (सर-१.२.२४) इति। एकया एव परिभाषया कार्ये सिद्धे पृथक् सूत्रं नापेक्षते इति धिया भोजराज एकामेव परिभाषां रचयामास-'प्रत्ययग्रहणे यस्मात् स

विधिस्तदादेरपञ्चम्याः' (सर-१.२.२४) इति। साधारणमतीनां बालानां कृते इयं परिभाषा अत्यन्तमुपयोगाय स्यात्। वर्णलाघवोऽपि परिभाषायाः अस्याः रचनायां फलं वर्तते। महाभाष्ये प्रपञ्चिता एव विषयाः अत्र अस्यां परिभाषायां द्रष्टुमुपलभ्यते।

**सूत्रम्- कृद्ग्रहणे गतिकारकपूर्वस्यापि (सर-१.२.२५)**

**सूत्राध्ययनम्-** प्रत्ययग्रहणे यस्मात् स विधिस्तदादेरपञ्चम्याः (सर-१.२.२४) अस्याः परिभाषायाः स्वीकारे सति- भस्मनिहुतं, तथोदके विशीर्णम् इत्यादौ समासः नैव सम्भवति। इष्यते चात्र समासः। अतः अनियमे सति नियमः विधीयते-'कृद्ग्रहणे गतिकारकपूर्वस्यापि' (सर-१.२.२५) इत्यनया परिभाषया। अस्याः परिभाषायाः अर्थः भवति- यत्र कृत्प्रत्ययः विधीयते, यस्मात् सः प्रत्ययः विधीयते तदादेः गतिपूर्वकस्य किञ्च कारकपूर्वकस्य अपि ग्रहणं विधेयम्। तेन च यत्र तदादिः नास्ति तत्रापि तदादे आरोपः क्रियते। यत्र गतिपूर्वस्य किञ्च कारकपूर्वस्य समीपे कृदन्तं पदमुपतिष्ठति तत्र कृद्ग्रहणे गतिकारकविशिष्टस्यैव ग्रहणं कार्यं नान्यस्य। तथाहि दण्डनाथेन हृदयहारिण्यामुच्यते- "यत्र कृत्प्रत्ययो गृह्यते, यस्मात् स विहितस्तदादेर्गतिकारकपूर्वस्यापि ग्रहणं भवति" इति। सूत्रेऽस्मिन् अपिशब्दस्य उपादानकारणात् गतिकारकसमभिव्याहृतस्य यथा ग्रहणं भवति तथैव गतिकारकपूर्वस्य असमभिव्याहृतस्यापि ग्रहणं कर्तव्यम्। इयं परिभाषा कृद्विशेषग्रहणे, कृत्सामान्यग्रहणे च सङ्गच्छते। कृदकृत् साधारणविषये इयं परिभाषा न प्रवर्तते। इदमेव परिभाषायाः अस्याः फलमस्ति।

कृद्विशेषग्रहणस्योदाहरणमस्ति- 'इषूदराश्वेषु क्षेपे' (सर-८.४.१२३) इति। अत्र क्तप्रत्ययस्य अनुवृत्तिः भवति। अयञ्च क्तप्रत्ययः कृद्विशेषो वर्तते। तेन च अस्याः परिभाषायाः प्रवृत्तिः भवति। तस्मात् 'अवतप्ते नकुलस्थितम्' इति प्रयोगः क्तान्तेन समस्यते 'कृद्ग्रहणे गतिकारकपूर्वस्यापि' (सर-१.२.२५) इत्यनया परिभाषया। एवञ्च भस्मनिहुतं, तथोदके विशीर्णम्, सगतिकेन मनकुलेन इत्यादावपि क्तान्तेन समासः सिद्धो भवति अस्याः परिभाषायाः स्वीकारे सति।

**समीक्षणम्-**भोजस्य अस्याः परिभाषायाः मूलं वर्तते- भगवतः पाणिनेः क्षेपे (पा.सू-२.१.४७) इति सूत्रम्। अस्य सूत्रस्य भाष्ये भगवता पतञ्जलिना एकं वार्तिकं प्रोक्तमस्ति- 'क्षेपे सगतिकसकारकसमासे उक्तम्' इति। तस्मिन्नेव वार्तिके 'कृद्ग्रहणे गतिकारकपूर्वस्यापि' इदमपि उक्तं वर्तते। अतः भोजस्य 'कृद्ग्रहणे गतिकारकपूर्वस्यापि' (सर-१.२.२५) इत्यस्यां परिभाषायां पाणिनेः प्रभावः तु वर्तत एव। किन्तु कृद्ग्रहणे गतिकारकपूर्वस्यापि इत्यस्या परिभाषायाः विषये साक्षात् एकस्मिन् स्थले अष्टाध्याय्याम् अथवा महाभाष्ये तथा किमपि नोक्तमस्ति। तदर्थं व्याख्यानं द्रष्टव्यं भवति। स च क्लेशाय। अतः क्लेशं विना यथा सूत्रार्थबोधः स्यात् तदर्थम् इमां परिभाषां भोजः लिलेख। अत्र उदाहरणानि अपि अतीव सुष्ठुतया प्रसङ्गानुसारं दर्शितं भवति। एतेन च एषा परिभाषा सर्वेषां शास्त्रज्ञानां, बालानां च लाभाय स्यादिति वक्तुमलम्।

### सङ्केताक्षरसूची

१. सर-सरस्वतीकण्ठाभरणम्।

२. पा.सू-पाणिनीयसूत्रम्।

### सहायकग्रन्थसूची

१. भोजः। १९३५। सरस्वतीकण्ठाभरणम् (हृदयहारिणीसहितम्) (प्रथमोऽध्यायः)। शाम्बशिव शास्त्री (सम्पा.)।त्रिवन्दम् अनन्तशयन विश्वविद्यालयः।

२. भोजः। १९३७। सरस्वतीकण्ठाभरणम् (मूलमात्रम्)। चिन्तामणिः टि आर्(सम्पा.)। मद्रास- विश्वविद्यालयः।

३. श्रीमन्नागेशभट्टः। २००५। परिभाषेन्दुशेखरः (सुबोधिनी-हिन्दीव्याख्योपेतः)।विश्वनाथमिश्रः (व्याख्याकारः)। वाराणसी-चौखम्बा सुरभारती प्रकाशन।

४. पतञ्जलिः। २०१८। व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसहितम्) प्रथमः खण्डः। भार्गवशास्त्री जोशी (संशोधकः)। दिल्ली- चौखम्बा संस्कृत प्रतिष्ठान।

५. पतञ्जलिः। महाभाष्यम्। चारुदेव-शास्त्री (व्याख्याकारः)। दिल्ली- मोतिलाल बनारसीदास।

# सिद्धान्तलेशसंग्रहे अविद्यायाः आश्रयत्वविचारसन्दर्भे भामती-विवरणयोः मतभेदविमर्शः

अमितः घोषालः
अद्वैतवेदान्तविभागः, राष्ट्रीयसंस्कृतविश्वविद्यालयः
तिरुपतिः-517507, आन्ध्रप्रदेशः

**कुञ्चिकाशब्दाः-**अन्तःकरणविशिष्टचैतन्यरूपः, अज्ञानावभासकम्, जीवाश्रितत्वम्, पूर्वकालिकत्वम्, अविद्याकार्यम्, अन्योन्याश्रयः, जाड्यम्, प्रतीतिसाक्षिकम्, अनन्तरकालिकत्वम्, आश्रयत्वम्, महासुषुप्तिः, मायी, बीजशक्तिः

**उपोद्घातः-** अघटनघटनपटीयसी माया अविद्या वा शाङ्कराद्वैतवेदान्ते तत्त्वसकलेषु नितरां वरीवर्ति। मात्सस्यां विश्वमिति माया इत्युक्ते संसारचक्रे पुनः पुनः प्रेरकतत्त्वेषु माया अद्वितीया। अस्याः मायायाः प्रभावेण मुक्तचैतन्यं बद्धो भवति। अपि च अद्वैतवेदान्ततन्त्रे षट्स्वेव अनादितत्त्वेषु अविद्येयमन्यतमा। तदुक्तं चित्सुखाचार्येण तत्त्वप्रदीपिकायाम्

**जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा।**
**अविद्या तच्चितोर्योगः षडस्माकमनादयः॥**

अस्याः अविद्यायाः पर्यायपदानि अभिहितानि सन्ति पञ्चपादिकायां एवम्-इयं श्रुतिस्मृतिपुराणेषु **१. नामरूपम् २. अव्याकृतम् ३. अविद्या ४. माया ५. प्रकृतिः ६. अग्रहणम् ७. अव्यक्तम् ८. तमः ९. कारणम् १०. लयः ११. शक्तिः १२. महासुप्तिः १३. निद्रा १४. अक्षरम् १५. आकाशम् इति च तत्र तत्र बहुधा गीयते**[1] इति। अस्याः च अविद्यायाः आश्रयः कः इति विचारः कर्तव्यः भवति। यतः अहमज्ञः इत्यादिप्रतीतौ तस्य साश्रयत्वेनैव विषयभावात्।

ननु नायं विचारः युक्तिसहः भवितुमर्हति यतः **अहमज्ञः अहं न जानामि** इत्यादि प्रतीतौ अहमर्थस्य आश्रयत्वेन विस्पष्टं भानात्। उक्तं च गीताभाष्ये शङ्करभगवत्पादैः अविद्या कस्य इति प्रश्नः एव निरर्थक इति। तदीयं भाष्यमेवमस्ति-**अत्राह सा अविद्या कस्य इति। यस्य दृश्यते तस्यैव। कस्य दृश्यते इति। अत्रोच्यते। अविद्या कस्य दृश्यते इति प्रश्नः निरर्थकः। कथं दृश्यते चेत् अविद्या तद्वन्तमपि पश्यसि। न च तद्वति उपलभ्यमाने सा कस्य इति प्रश्नः युक्तः। न हि गोमति उपलभ्यमाने गावः कस्य इति प्रश्नः अर्थवान् भवेत्। ननु विषमः दृष्टान्तः गवां तद्वतः च प्रत्यक्षत्वात् तत्सम्बन्धोऽपि प्रत्यक्षः इति प्रश्नः निरर्थकः। न तथा अविद्या तद्वांश्च प्रत्यक्षौ यतः प्रश्नः निरर्थकः स्यात्। अप्रत्यक्षेण अविद्यावता अविद्यासम्बन्धे ज्ञाते किं तव स्यात्। अविद्यायाः अनर्थहेतुत्वात् परिहर्तव्या स्यात्। यस्य अविद्या सतां परिहरिष्यति। ननु ममैव अविद्या। जानासि तर्हि अविद्यां तद्वन्तं च आत्मानम्**[2] इत्यादि। अत्र च अविद्यायाः तदाश्रयस्य च स्पष्टप्रतिपन्नत्वमादाय भाष्यकाराः अविद्याश्रयस्य अविचार्यत्वं भाषन्ते इति विज्ञायते। ग्रन्थार्थः तु स्पष्टः एव। एवञ्च नैव विचारणीयः नैव प्रष्टव्यः वा अविद्यायाः आश्रयः इति चेत्। सत्यम्-अहमज्ञः इत्यादिप्रतीतौ अहमर्थः आश्रयत्वेन भासते परन्तु सः कीदृशः इति विचारः परमवशिष्टः एव स्यात्। उपरिनिर्दिष्टे भाष्ये सामान्यतः अहमर्थाश्रितत्त्वमेव समर्थितम्। अतः न तद्विरोधः शङ्कापथं आगच्छति। सः च अहमर्थः अन्तःकरणचितोः ग्रन्थिरूपः कश्चन विशेषः। अतः अविद्यायाः प्रायः त्रेधा विकल्पः भवितुमर्हति। यथा-

**१. अविद्यायाः अन्तःकरणाश्रयः, २. अन्तःकरणविशिष्टचैतन्याश्रयः ३. शुद्धचैतन्याश्रयः**

एवञ्च अपरित्यज्यैव अहमर्थस्य आश्रयत्वस्य अहमज्ञः इत्यादिप्रतीतिप्रतिपन्नां विचारः क्रियते इति न कश्चित् विरोधः।

**विषयः-** अतः सिद्धान्तलेशसंग्रहकारैः नानाशास्त्रकृतभूरिपरिश्रमैः आचार्याप्पयदीक्षितेन्द्रैः स्वकीये सिद्धान्तलेशसंग्रहे अयं विचारः भामतीविवरणोक्तदिशा व्याकृतो वर्तते। यथामति मया समासेन सिद्धान्तलेशसंग्रकाराणां आचार्याप्पयदीक्षितेन्द्राणाम् आशयः निरूप्यते। अस्याः अविद्यायाः कश्चन आश्रयः कथनीयः। यतः निराश्रयस्य कस्यचन पदार्थस्य सिद्ध्यभावात्। प्रतीतिः हि **अहं घटं न जानामि** इत्यनेन घटाज्ञानं ख्यापितं भवति। अत्र च अज्ञानस्य विषयः घटः, यतः घटस्य एव ज्ञानमत्र नास्तीति प्रतिपाद्यते। अज्ञानस्य

[1] पञ्चपादिका सूत्रम्-1, वर्णकम्-1
[2] भगवद्गीता-13.2

आश्रयश्चात्र अहमिति। विषयज्ञानम् अज्ञानञ्च न हि निराश्रयं तिष्ठति। अतः अविद्यायाः मायापर्यायभूतायाः कस्तावादाश्रयः, को वा विषयः इति विचारणीयम्। अविद्याश्रयत्वविषयत्वविषये अस्ति मतभेदः विवरणभामतीप्रस्थानयोः।

मायायाः अविद्यायाः वा कः आश्रयः इति विचारे प्रसक्ते केचित् जल्पन्ति-अन्तःकरणमेव अविद्यायाः आश्रयः इति। यतः अहमिति प्रतीतौ तावत् अन्तःकरणम् अवभासते। अतः तस्मिन् अन्तःकरणे समाश्रितमज्ञानमिति अहमज्ञः इति प्रतीत्या एव सिध्यति इति उपपादयन्ति।

तेषां मतमिदमयुक्तम्। अन्तःकरणस्य **तन्मोऽकुरुत**[1] इति श्रुतिवाक्येन जन्यत्वं प्रतिपन्नम्। जन्यत्वे च तस्य अविद्याकार्यत्वमेव। अविद्याकार्यत्वे च तदनन्तरकालिकत्वमेव। तथात्वे पूर्वकालिकस्य अज्ञानस्य कथम् आश्रयत्वं उपपद्यते ? तदेतत् बृहदारण्यकवार्तिके फलितं दृश्यते-

**नैवं स्यात् सर्वकार्येषु तेषां ताद्रूप्यहेतुतः।**
**जडस्वभावतो नान्यत् रूपं कार्येषु गम्यते।।**[2] इति

जाड्यरूपस्य अविद्याधर्मस्य अन्तःकरणे अनुवृत्तिदर्शनात् अन्तःकरणम् अविद्याकार्यमिति तस्मिन् अन्तःकरणे अविद्याश्रयत्वं सम्भवति इति तदर्थः।

एवञ्च सर्वेषु अपि जडेषु तुल्यत्वमस्ति। सर्वाणि जडानि जाड्यात् अविद्याकार्यमिति अतः अविद्यायाः आश्रयः न भवितुमर्हति। अतः परिशेषात् चैतन्यमेव अज्ञानस्य आश्रयः स्यात्।

विवरणकारमते संक्षेपशारीरककारस्य सर्वज्ञात्ममुनेश्च मते अज्ञानस्य आश्रयः विषयश्च ब्रह्म एव। अज्ञानस्य ब्रह्माश्रयत्वे नास्ति दोषः। न ह्यस्ति अज्ञानस्य शुद्धचैतन्यस्य च विरोधः। ब्रह्म हि अज्ञानस्य अवभासकम्, साक्षिचैतन्यस्य अज्ञानावभासकत्वम् अद्वैतिभिः अङ्गीक्रियते। यथा गृहे विद्यमानं तमः गृहमेव विषयीकरोति एवम् अविद्या अपि ब्रह्माश्रिता ब्रह्म एव विषयीकरोति इति नास्ति काचिदनुपपत्तिः। उच्यते च विवरणकारेण प्रथमवर्णके-**न तावदज्ञानम् आश्रयविषयभेदापेक्षम्, किन्तु एकस्मिन्नेव वस्तुनि आश्रयत्वमावरणं चेति कृत्यद्वयं सम्पादयति इति**[3]। संक्षेपशारीरककारेण उच्यते-

**आश्रयत्वविषयत्वभागिनी निर्विभागचितिः एव केवला।**
**पूर्वसिद्धतमसः हि पश्चिमः नाश्रयः भवति नापि गोचरः।।**[4] इति

नन्विदमप्ययुक्तं भवति। अज्ञानाश्रयत्वं हि विद्यास्वाभावे चैतन्ये कथं स्यात्। तदुक्तं वार्तिके अज्ञानस्य कल्पितत्वात् तथा अज्ञानसाक्षित्वात् आत्मनः न तस्मिन् अज्ञानं घटते इति। यथा-

**विषयत्वोपपत्तेः च प्रत्यङ्मोहतदुत्थयोः।**
**न अविद्यावान् भवेत् आत्मा नापि तत्कार्यवांस्ततः।।**
**न जाने मुग्ध इव अहं भवदुक्तं मनागपि।**
**इति चेत् वीक्षसे तर्हि मूढमज्ञं च कुम्भवत्।।**
**त्वन्तु अज्ञः मूढः एवेति भव कामं यथेच्छसि।**
**मूढाज्ञयोस्तु यः साक्षी नासौ मुग्धः अज्ञ एव वा।।**[5]

इत्यादिभिः श्लोकैः।

अतश्च चैतन्यरूपस्य आत्मनः अज्ञानाश्रयत्वं न सम्भवति। अतः अज्ञानकल्पनासाक्षित्वात् न अज्ञानस्य आश्रयः भवितुमर्हति

[1] बृ.उ-1.2.1
[2] बृ.उ.वा-अध्यायः-1, ब्राह्मणम्-4, श्लोकः-307
[3] पञ्चपादिका विवरणम् प्रथमवर्णकम्
[4] सं.शी-परिच्छेदः-1, श्लोकः-319
[5] बृ.उ.वार्तिकम् अध्यायः-4, ब्राह्मणम्-4, श्लोकः-357,362,363

आत्मा। अज्ञानस्य कल्पितत्वाच्च। तथापि तत्तु तत्त्वं वास्तविकं सत्यम्। आकाशः इव नीलपीतदिरूपाश्रयः अज्ञानस्य आश्रयः आत्मा इति उच्यते अहमज्ञः इति प्रतीतिः। नेदमाश्रयत्वमात्मनि वास्तवमिति स्पष्टयितुं वार्तिके प्रयासः इत्येव मननीयम्। पुनः अन्यत्र वार्तिके आत्मनि एव अविद्या इति प्रतिपादिता वर्तते। यथा-

**आत्मज्ञानं अतः प्रत्यक्चैतन्याभासवत्।**

**आत्माज्ञानसमुच्छित्तौ तज्जस्य न हि वस्तुनः॥**[1] इत्यादिस्थलेषु

संक्षेपशारीरके अपि इदं स्थिरीकृतमेव

**अज्ञाततापि घटतेऽत्र दृशोऽनुभूतेः**

**जानामि नाहं इति दृश्यपि दृश्यते हि।**

**अज्ञाततानुभवनं न च वास्तवं तत्**

**अज्ञाततोद्वहति कल्पितता हि तस्याः॥**[2] **इति**

अत्र च अहं न जानामीति प्रतीत्या आत्मनः चैतन्यरूपेऽपि अज्ञानस्य आश्रयत्वं ग्राह्यम्। किन्तु तन्न वास्तविकं भवितुमर्हति। अज्ञानस्य कल्पितत्वात् तदाश्रयत्वस्य वक्तव्यत्वात् इति अभिप्रायः स्पष्टः। अतः तदिदमज्ञानमाश्रयभूतं चैतन्यं शुद्धमेव ग्राह्यमिति संक्षेपशारीरके स्पष्टतया उपपादितं भवति।

किन्तु भामतीकारः आचार्यवाचस्पतिमिश्रः-

**ज्ञाज्ञौ द्वौ ईशानीशौ अजा ह्येका भोक्तृभोग्यार्थयुक्ता।**

**अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत्**[3]**॥ इति**

इति श्रुतौ स्पष्टमविद्यायाः जीवाश्रितत्वमभिहितमस्ति इति मनसि निधाय जीवाश्रितामविद्यामाचचक्षिरे। अर्थात् भामतीकारस्य आचार्यवाचस्पतिमिश्रस्य मते अविद्यायाः आश्रयः जीवः। न हि निरुपाधिके ब्रह्मणि अविद्या स्थातुमर्हति। अविद्यायाः विषयस्तु ब्रह्म एव। जीवो हि ब्रह्मस्वरूपम् अपरोक्षतया न जानाति इत्यस्माद् वाक्याद् अविद्यायाः विषयः ब्रह्म एव इत्यपि स्पष्टं ज्ञायते। जीवे हि ब्रह्मविषयकमज्ञानमस्ति अतः समन्वयाधिकरणभाष्ये भामतीकृता आचार्यवाचस्पतिना उच्यते-**"नाविद्या ब्रह्माश्रया, किं तु जीवे, सा त्वनिर्वचनीयेत्युक्तम् , तेन नित्यशुद्धमेव ब्रह्म इति"।**

अपि च पुनः एवं शङ्कां कुर्वन्नाह अविद्या यदि ब्रह्मगता चेत् तर्हि एकमुक्तौ सर्वमुक्तिप्रसङ्गः स्यात् अतः भामत्यामेवमुच्यते- **न वयं प्रधानवत् अविद्यां सर्वजीवेषु एकामाचक्ष्महे येन एवमुपालभ्येमहि किन्तु इयं प्रतिजीवं भिद्यते। तेन यस्यैव जीवस्य विद्या उत्पन्ना तस्यैव अविद्या अपनीयत्वे न जीवान्तरस्य**[4] **इत्यादि।** तेन जीवाश्रिता एव अविद्या इति स्पष्टमेव उक्तं भवति।

न च वाच्यम् जीवः नाम शुद्धस्य चैतन्यस्य अविद्यया कल्पितं किञ्चित् रूपम्। अन्यरूपत्वे बन्धमोक्षयोः सामानाधिकरण्यानुपपत्तेः। ततश्च अन्योन्याश्रयः अविद्यायां सिद्धायां तत्कल्पितः जीवः सिध्यति। जीवे आश्रये सिद्धे तदाश्रिता अविद्या सिध्यति इति। यतः अयं दोषः **वाक्यान्वयात्**[5] इति अधिकरणे **अवस्थितेरिति काशकृत्स्नः**[6] इति सूत्रस्य व्याख्याने भामतीकारेण एव जीवाश्रितत्वे प्राप्तान्योन्याश्रयदोषः वारितः। **न चैवमन्योन्याश्रयः जीवविभागाश्रया अविद्या अविद्याश्रयश्च जीवविभागः इति। बीजाङ्कुरवत् अनादित्वात्.....न खलु आदिमान् संसारः नापि आदिमान् अविद्याजीवविभागः येन अनुयुज्येत**[7] इत्यादिना भाष्येन। तथा हि-अविद्योपधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति तथापि तत्प्रतिबिम्बकल्पजीवद्वारेण परस्मिन्नित्युच्यते। न

[1] बृ.उ.भाष्यवार्तिकम्-अध्यायः-4, ब्राह्मणम्-3,.श्लोक-355,356

[2] सं.शा-अध्यायः-1, श्लोकः-316

[3] श्वे.उ-1.9

[4] भामती-1.4.3

[5] ब्र.सू-1.4.19

[6] ब्र.सू-1.4.22

[7] भामती-1.4.23

चैवमप्यन्योन्याश्रयः। जीवविभागाश्रया विद्या, अविद्याश्रयश्च जीवविभागः इति, बीजाङ्कुरवदनादित्वात्।

मायायाः जीवाश्रितत्वे **मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्** [1], **यतः वा इमानि भूतानि जातानि** [2] इत्यादिश्रुतिविरोधः। पुनः **मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्** [3], **दैवी ह्येषा गुणमयी मम माया दुरत्यया** [4]इत्यादि स्मृतिविरोधश्च भवति।

नन्वेवं सत्यपि भाष्यविरोधः। भाष्ये हि-**तदधीनत्वात् अर्थवत्** [5] इति सूत्रव्याख्यानावसरे-अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः इति स्पष्टं मायाख्यायाः अविद्यायाः परमेश्वराश्रितत्वोक्तेः। किम्बहुना अविद्यां जीवे इच्छतः श्रुतिविरोधः अपि भवति। श्रुतिर्हि- **मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्** इति कथयन्ती ईश्वराश्रिताम् अविद्यां दर्शयति इति चेत् न। पूर्वोक्तभाष्यश्रुतिवाक्ययोः भामतीकारेण अविद्यायाः ईश्वराधीनत्वपरत्वेन व्याख्यानात्। तथाहि- **ननु अविद्यैव जगद्बीजमिति कृतमीश्वरेण इत्यतः आह परमेश्वराश्रिता इति। न हि अचेतनं चेतनानधिष्ठतं कार्याय पर्याप्तमिति स्वकार्यं कर्तुं परमेश्वरं निमित्ततया उपदानतया च आश्रयते।....तस्मात् जीवाधिकरणा अपि अविद्या निमित्ततया विषयतया च ईश्वरमाश्रयते इति इति ईश्वराश्रिता इति उच्यते न तु आधारतया। विद्यास्वभावे ब्रह्मणि तदनुपपत्तेः** [6] इति ग्रन्थेन।

अनेन जीवाश्रिता एव अविद्या ईश्वरः तु तत्र विषयः इति प्रतिपादितम्। तत्र च हेतुः अपि उक्तः ब्रह्मणः चैतन्यरूपस्य विद्यास्वभावस्य अविद्यायाः तद्विरोधिन्याः आश्रयत्वमनुपपन्नमिति। एतेन मायिनं तु महेश्वरमिति श्रुतिवाक्यमपि व्याख्यातं भवति।

किञ्च उत्पत्तौ ज्ञप्तौ चान्योन्याश्रयो दोषाय भवति। न च जीवाविद्ययोः जन्यजनकभावः, उभयोरनादित्वात्। न च स्वज्ञानाधीनज्ञप्तिकत्त्वमपि। जीवाज्ञानं नाविद्याधीनं न चाविद्याज्ञानं जीवाधीनमिति। सर्वो हि लोकः अहमिति प्रतीत्यात्मानम्, न चाविद्यामपेक्षते। अहमज्ञो न जानमीति प्रतीतिसाक्षिकमज्ञानं न जीवज्ञानापेक्षम्।

अपि च अविद्यायाः जीवाश्रितत्वे जीवस्यैव जगत्कर्तृत्वादिप्रसक्तौ **यतो वा इमानि भूतानि जायन्ते** [7] इत्यत्र न श्रुतिविरोधः, यतो जीवाश्रिताविद्याविषयीभूतं ब्रह्मैवाज्ञातं सर्वजगदुपादानभूतं नियन्तृकर्तृ च नटवद् इति स्वीकारात्।

यथोक्तमारम्भणाधिकरणे भाष्ये-**युक्तेः शब्दान्ताच्च** [8] इति सूत्रशेषे। तथा मूलकारणमेवान्त्यात् कार्यात् तेन तेन कार्याकारेण नटवत्सर्वव्यवहारास्पदत्वं प्रतिपद्यते। तत्र भामात्यां मूलकारणं ब्रह्मेत्युक्तम्।

आचार्याप्पयदीक्षितेन्द्रैः कल्पतरुपरिमले उक्तम्- नटो हि द्रष्टृभिरज्ञातनिजरूप एव तत्तदभिनेयासत्यरूपतां प्रतिपद्यते। एवं जीवैरविज्ञातं ब्रह्मासत्यवियदादिप्रपञ्चकारतां प्रतिपद्यत इति दृष्टान्तोक्त्या वाचस्पतिसम्मतं भाष्याभिमतं निश्चीयत इत्यर्थः।

एभिः ग्रन्थैः जीवाश्रिताविद्याविषयीकृतमज्ञानं ब्रह्मैवोपादानमिति न जीवे सर्वनियन्तृत्वाद्यापत्तिः। अयमेव पक्षः भाष्याविरुद्धः इति निश्चीयते। एवं मायिनं तु महेश्वरमित्यादिश्रुतावपि मायाविषयतैव मायित्वं महेश्वरस्येति बोध्यम्।

अपि च जीवाश्रिता माया इत्यस्य जीवत्वविशिष्टचैतन्याश्रितत्वं न विवक्षितम्, किन्तु अक्षरब्रह्मणानुरोधेन चैतन्याश्रितत्वमेव, जीवत्वं तु तत्रावच्छेदकमिति। अतः संक्षेपशारीरककृता सर्वज्ञात्ममुनिना सह न विरोधः। न च यथा मायायाः चैतन्यवृत्तौ जीवत्वमवच्छेकदमेव जीवत्वस्यापि चैतन्यवृत्तौ मायाऽवच्छेदिका इति व्यक्तमन्योन्याश्रय इति वाच्यम्, अनादित्वात् अन्योन्याश्रयदोषस्य परिहारात्। अतः मायायाः जीवाश्रितत्वे कोऽपि दोषः न। कुत्रचित् केचित् आचार्या अस्याः **मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति** [9]श्रुतेः उपपादनाय मायायाः अविद्यायाः च भेदं कल्पयित्वा मायायाः आश्रयः ईश्वरः। अतः मायी इति तत्र

[1] श्वे.उ-2.10
[2] तै.उ-3.1.1
[3] भ.गी-9.10
[4] भ.गी-7.14
[5] ब्र.सू-1.4.3
[6] भामती-1.4.3
[7] तै.उ-3.1.1
[8] ब्र.सू-2.1.18
[9] श्वे.उ-2.10

शब्दप्रयोगः। अविद्यायाः च आश्रयः जीवः अतः तत्र अज्ञः इति शब्दप्रयोगः इति व्यवस्थां व्याचचक्षिरे। ततः अपि न विरोधः शङ्कनीयःइति।

**उपसंहारः-**समालोच्यमाने ग्रन्थेऽस्मिन् मूख्यतः अविद्यायाः आश्रयत्वविचारसन्दर्भे भामतीकाराणां वाचस्पतिमिश्राणां तथा विवरणकाराणां संक्षेपशारीरककृतां मतकुसुमानि प्रस्फुटानि दृश्यन्ते । आचार्यवाचस्पतिमिश्रस्य मते अविद्या तु जीवाश्रिता इति। एतन्मते जीवः न अन्तःकरणविशिष्टचैतन्यरूपः किन्तु अविद्याविशिष्टचैतन्यरूपः अतः विशिष्टप्रसङ्गात् अयमपि पक्षः निरूप्यते । तद्यथा जीवः एव अविद्यायाः आश्रयः भवितुमर्हति । न तु शुद्धचैतन्यरूपं ब्रह्म । तस्य विद्यारूपस्य अविद्याविरोधित्वात्। अतः औपाधिकं किञ्चित् रूपं तस्याः आश्रयः इति कथनीयः । तच्च जीवाख्यम् अविद्यावशिष्टचैतन्यरूपम् । अतः जीवः अविद्याश्रयः। अपि च न केवलम् अविद्या जीवाश्रिता अपि तु सा प्रतिजीवं भिद्यते एव । अतः तस्याः अविद्यायाः जीवाश्रितत्वे नैव संदेहः वाचस्पतिमिश्रस्य । यतः शुद्धाश्रितत्वे ईश्वराश्रितत्वे एव वा तस्य एकत्वेन भेदस्यैव अप्रसक्तेः प्रतिजीवं भिद्यते इत्यस्य अवक्तव्यत्वात्। एवमेव वाक्यान्वयाधिकरणभाष्यव्याख्यानावसरे अपि तैः अविद्या जीवाश्रिता इति स्पष्टीमीरितं भवति। तदेवोच्यते-**अविद्योपधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति तथाऽपि तत्प्रतिबिम्बकल्पजीवद्वारेण परस्मिन् उच्यते**[1] ।

विवरणप्रस्थानानुसारिणि संक्षेपशारीरके आचार्यसर्वज्ञात्ममुनिप्रभृतय अज्ञानं शुद्धे चैतन्ये एव आश्रितमिति प्रतिपादयन्ति । तथा हि उच्यते आचार्येण-

**चिद्वस्तुनः चितिभवेत् तिमिरं तमिस्रं तामिस्रमन्धतमसं जडिमा तमिस्रा।**
**माया जगत्प्रकृतिः अच्युतशक्तिः आन्ध्यं निद्रा सुषुप्तिः अनृतं प्रलयः गुणैक्यम्**[2] ॥

अनेन च तिमिरादिशब्दैः प्रसिद्धा या माया सा चैतन्यवस्तुनि एव सम्भवति इति प्रतिज्ञातं भवति । यद्यपि ज्ञानाज्ञानयोः विरोधः सर्वेषां सम्मतः तथा सोऽपि विरोधः वध्यघातकरूपः । ज्ञाने जाते अज्ञानं नष्टम् । यावत्पर्यन्तं ज्ञानं न जातं तावदेव अज्ञानं तिष्ठतीति प्रतीतिरस्ति। एवञ्च ज्ञानसम्बन्धे जायमाने अज्ञानं नश्यति एव । कुतः ज्ञाने आश्रयता अज्ञाननिरूपिता इति चेत् , उच्यते-सत्यं ज्ञानाज्ञानयोः विरोधः वध्यघातकभावरूपः अस्ति इति । तथापि तयोः सम्बन्धः उपपद्यते । यतः विरोधिनोः अपि कञ्चनकालं यावत् एकत्र समावेशः दृश्यते। यथा-मन्दान्धकारे वेश्मनि प्रकाशतमसोः । एवमेव प्रकृतेऽपि ज्ञानाज्ञानयोः वध्यघातकभावरूपविरोधशालिनोः यावत्पर्यन्तं न आचार्योपदेशजनितबुद्धिवृत्तिसंवलनं भवति तावत्पर्यन्तमवस्थानं न विरुध्यते सहैव । एवञ्च इदं सुनिष्पन्नं भवति ज्ञानाज्ञानयोः यद्यपि विरोधः तथापि ज्ञाने शुद्धचैतन्ये अज्ञानाश्रयत्वं न विरुध्यते इति ।

एवमनेन स्पष्टं भवति यत् विद्यायाः आश्रयः जीवरूपं विशिष्टं चैतन्यं वा स्यात् शुद्धं वा चैतन्यमिति पक्षद्वयं साधु-अन्तःकरणादिकं जडं तु नैव आश्रयः भवितुमर्हति इति शिवम् ।

## सन्दर्भग्रन्थसूची

1. द्विवेदी , पारसनाथ. सिद्धान्तलेशसंग्रहः. सम्पूर्णानन्दसंस्कृविश्वविद्यालयः, वाराणसी, 2005.
2. शास्त्री , ब्रह्मश्री एस् आर् कृष्णमूर्ति. शास्त्रसिद्धान्तलेशसंग्रहः . श्रीमदप्पयदीक्षितेन्द्रग्रन्थावलिप्रकाशनसमितिः, सिकन्दरबाद्, 1973.
3. आचार्य , जानकीशरण. वेदान्तपरिभाषा. श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्(गुजरात), 2019.
4. मूर्ति , एम् एल् नरसिंहः. शाङ्करदर्शनमर्मप्रकाशः. राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपति, 1996.
5. तैलङ्ग , रामशास्त्री. विवरणप्रमेयसंग्रहः. किशोरविद्यानिकेतन, वाराणसी, 1990.
6. वझे , भाउशास्त्री. संक्षेपशारीरकम्. चौखम्बा प्रकाशन, वारणसी, 2007.

[1] भामती-1.4.22
[2] सं.शा-1.318

# विश्वनाथजगन्नाथमतयोर्दोषप्रदर्शनपुरःसरं मम्मटकृतकाव्यलक्षणस्य पुनः प्रतिष्ठा

Basanta Chandra
Ph. D. Research Scholar,
Department of Sanskrit,
Ramakrishna Mission Vidyamandira,
Belur Math, Howrah, 711202, West Bengal.
Contact No: 8250032388
Email ID: shrimanbasanta@gmail.com

**शोधसारः-** मम्मटाचार्यकृतं 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति काव्यलक्षणं बहुधा खण्डितं कविराजविश्वनाथ-पण्डितराजजगन्नाथाभ्याम्। मयात्र विश्वनाथजगन्नाथाचार्याभ्यां मम्मटकृतकाव्यलक्षणस्य खण्डनप्रदर्शनपुरःसरं तयोरपि मतयोस्समालोचनेन मम्मटकृतकाव्यलक्षणस्य पुनः प्रतिष्ठानं कृतम्। कविराजविश्वनाथमते काव्यलक्षणे अदोषपदोपादानेन नैकान्युत्तमकाव्यानि अकाव्यरूपेण विवेचितानि भवन्ति। काव्यस्य यस्मिन्नंशे दोषो नास्ति तत्काव्यम्, यस्मिन्नंशे दोषोऽस्ति तदकाव्यमित्यपि न वाच्यम्। सति सम्भवे ईषद्दोषौ शब्दार्थौ काव्यमित्यपि न वाच्यम्। पुनः दोषहीनं काव्यं दुर्लभं भवति। अदोषाविति पदस्य समर्थने टीकाकारा वदन्ति यत् च्युतसंस्कारादयः काव्यत्वविघटका ये प्रवलदोषाः ते परिहरणीयाः। दोषो भवति उद्देश्यप्रतीतेः प्रतिबन्धकः। समस्तकाव्यानामुद्देश्यं भवति रसः। तद्रसस्य परिपन्थिनः सर्व एव दोषाः। दर्पणकारमते सगुणाविति पदस्य परिवर्तनेन रसवन्तौ इति विशेषणं युक्तिसङ्गतम्। दर्पणकारस्य मतमिदं स्वीक्रियते चेद्वस्तुप्रधानमलङ्कारप्रधानञ्च विषयवस्तु अकाव्यं स्यात्। मम्मटमतसमर्थने वक्तुं शक्यते यत्सगुणाविति विशेषणं नीरसचित्रकाव्येऽप्यव्याप्तं न भवति। अनलङ्कृती पुनः क्वापीत्यंशस्य समर्थने मम्मटाचार्येण 'यः कौमारहरः' इत्याद्युदाहरणं प्रदत्तम्। दर्पणकारमते उदाहरणेऽस्मिन् स्फुटालङ्कारो विद्यतेऽतो मम्मटमते प्रमादो विद्यते। परन्तु मम्मटानुगामिनां मते श्लोकेऽस्मिन्नस्फुटावेव विभावनाविशेषोक्त्यलङ्कारौ विद्येते।

पण्डितराजमते 'काव्यं पठितं श्रुतं गीतं रचितम्' इत्यादिव्यवहारैर्ज्ञायते यत् शब्दविशेष एव काव्यम्। केषाञ्चिन्मते आस्वादजनकत्वं काव्यप्रयोजकम् एवञ्च तत् शब्दार्थयोः उभयोस्तिष्ठतीत्यत उभयोः काव्यत्वं स्वीकार्यमिति मतमपि न युक्तिसङ्गतम्। तथा सति अभिनयस्यापि काव्यता स्यात्। पुनः काव्यता शब्दार्थयोरुभयोर्व्यासज्यवृत्त्या मिलितभावेन तिष्ठति चेत् श्लोकवाक्यं काव्यं न भवति। शब्दार्थयोः पृथक्तया तिष्ठति चेत् शब्दकाव्यमर्थकाव्यमिति काव्यद्वयापत्तिः स्यात्। अतः काव्यं शब्दनिष्ठम्। परन्तु जगन्नाथस्य मतमिदं न युक्तिग्राह्यम्। काव्यपदस्य प्रवृत्तिनिमित्तं भवति शब्दार्थयोरविनाभावः। वाचकशब्दो वाच्योऽर्थश्चेति द्वौ सम्मिलितौ काव्यं स्यात्। तस्मादेव कुन्तकाचार्यः स्पष्टमकथयत्- 'वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्।' इति।

**कुञ्चीशब्दाः-** अदोषौ, सगुणौ, अनलङ्कृती पुनः क्वापि, मुख्यार्थहतिर्दोषः, शब्दविशेष एव काव्यम्।

**अवतरिका-** सुप्राचीनकालाद् आधुनिककालं यावद् बहुभिरेवालङ्कारिकैः बहुधा काव्यस्य स्वरूपं प्रतिपादितम्। संस्कृतकाव्यनभसि विराजमानेषु आलङ्कारिकेषु अग्रगण्यो भवति राजानको मम्मटः। द्वादशशतकीयेन मम्मटाचार्येण विरचिते *काव्यप्रकाशः* इति अलङ्कारग्रन्थे प्रथमे उल्लासे 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'[1] इति काव्यलक्षणं निरूपितम्। तच्छब्देन काव्यम् इत्यस्य ग्रहणं भवति। अदोषौ सगुणौ पुनः क्वापि अनलङ्कृती शब्दार्थौ काव्यं भवति। वस्तुतोऽत्र शब्दार्थयोः चत्वारि विशेषणानि सन्ति- अदोषौ, सगुणौ, सालङ्कारौ, अस्फुटालङ्कारौ चेति। अत एव दोषहीनौ गुणयुक्तौ, अलङ्कारमण्डितौ, कदापि अस्फुटालङ्कारयुक्तौ शब्दार्थौ काव्यम् भवति। प्रत्येकं लक्षणमेव अव्याप्त्यतिव्याप्त्यसम्भवदोषरहितं स्यात्। परन्तु मम्मटाचार्यस्य काव्यलक्षणं त्रुटिहीनं नास्ति। परवर्तिनि काले विश्वनाथजगन्नाथाद्यालङ्कारिकैः लक्षणमिदं बहु समालोचितम्। चतुर्दशशतकीय आचार्यः कविराजविश्वनाथः तदीये *साहित्यदर्पणः* इति ग्रन्थे प्रथमपरिच्छेदे ''तत्किं स्वरूपं तावत्काव्यमित्यपेक्षायां कश्चिदाह-

[1] *काव्यप्रकाशः*, सम्पा.- भट्टवामनः, पृ. १३।

'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'- इति। एतच्चिन्त्यम्।''[1] इत्याद्युच्चारणेन मम्मटाचार्यकृतकाव्यलक्षणस्य खण्डनं कृतवान्। पण्डितराजजगन्नाथोऽपि तदीये *रसगङ्गाधरः* इति ग्रन्थे ''यत्तु प्राञ्चः अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यम्' इत्याहुः, तत्र विचार्यते।'' [2] इत्यादिवाक्यैः मम्मटाचार्य्यकृतकाव्यलक्षणं खण्डितवान्। अत्र मया विश्वनाथजगन्नाथाचार्याभ्यां मम्मटकृतकाव्यलक्षणस्य खण्डनप्रदर्शनपुरःसरं तयोरपि मतस्य समालोचनेन मम्मटकृतकाव्यलक्षणस्य पुनः प्रतिष्ठानं करिष्यते।

**आचार्यैः मम्मटीयलक्षणस्य खण्डनम्, खण्डनस्य निराकरणं च-** विश्वनाथजगन्नाथाचार्याभ्यां कृतस्य मम्मटकृतकाव्यलक्षणस्य खण्डनम्, पुनः तस्य निराकरणमत्र प्रदर्शयिष्यते।

**विश्वनाथमतम्, तन्मतनिराकरणं च-** प्रथमतः साहित्यदर्पणकारकविराजविश्वनाथस्य मतेन लक्षणे विद्यमानम् 'अदोषौ' इति पदम् अव्याप्तिदोषेण दुष्टम्। यतो हि-

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिग्धिक्छत्रुजितं प्रबोधितवता किं कुम्भकर्णेण वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥[3] इति श्लोको ध्वनिकाव्यत्वेन उत्तमकाव्यत्वेन वा विवेचितः। अथ च दोषशून्यो नास्त्ययं श्लोकः। यतो हि अत्र 'विधेयाविमर्शः', अविमृष्टविधेयांशदोषो वा विद्यमानः। अत एव दोषे विद्यमानेऽपि यदि उत्तमकाव्यं भवति तर्हि लक्षणस्य अव्याप्तिर्दोषः स्यात्। अदोषशब्दार्थरूपं यत् काव्यं तद् दोषयुक्तं काव्यं व्याप्तुं न समर्थम्, तस्मादत्र अव्याप्तिदोषः स्पष्टः।

अधुना यदि उच्यते, काव्यस्य पद्यस्य वा यस्मिन्नंशे दोषो विद्यते, तद् अकाव्यम्, यस्मिन्नंशे च दोषो नास्ति तत् काव्यम्, तर्हि एकस्यैव पद्यस्य काव्यत्वाकाव्यत्वयोः प्रसङ्ग आयाति, परन्तु तद् व्यवहारविरुद्धम्।

अनन्तरं कविराजविश्वनाथ ईषदर्थे नञः प्रयोगं प्रदर्श्य काव्यलक्षणे अव्याप्तिदोषं प्रदर्शितवान्। यदि ईषदर्थे अल्पार्थे वा नञो व्यवहारः स्वीक्रियते, तर्हि अल्पदोषयुक्तौ शब्दार्थौ काव्यमित्यर्थ आयाति। तेन निर्दोषशब्दार्थयोः काव्यत्वं न स्यात्। सति सम्भवे ईषद्दोषयुक्तौ शब्दार्थौ काव्यमित्येदपि काव्यलक्षणे न वाच्यम्, रत्नादिलक्षणे यथा कीटानुबिद्धताप्रभृतीनामुल्लेखो न भवति तदवदत्रापि बोध्यम्।

इतोऽपि वक्तुं शक्यते यत्, श्रुतिदुष्टादिदोषः काव्यस्य अंशमात्रं न दूषयति, तत् काव्यस्य समग्रांशस्यैव काव्यत्वहानिं करोति। पुनः केषुचित् स्थानेषु दोषः अलङ्काररूपेणापि परिणमते, किन्तु स यदि अलङ्कारो न भूत्वा दोषः स्यात्, तर्हि समग्रांशस्यैव क्षतिकारको भवति। प्रकृतलक्षणानुसारेण 'न्यक्कारो ह्ययमेव...' इत्यादिपद्यमपि अविमृष्टविधेयांशदोषेण दुष्टम् इत्यस्मात् पद्यं भवितुं न समर्थम्।

पुनः दोषहीनौ शब्दार्थौ काव्यम् इति स्वीक्रियते चेत् काव्यम् अत्यन्तं दुर्लभम् अथवा निर्विषयं स्यात्। उच्यते हि *साहित्यदर्पणे* कविराजविश्वनाथेन- 'किञ्च, एवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसम्भवात्।'[4] इति।

काव्यलक्षणे 'अदोषौ' इति पदस्य समर्थने युक्तयो विद्यन्ते। टीकाकारैरुच्यते च्युतसंस्कारादयो ये प्रबलदोषाः ते काव्यत्वविघटका भवन्तीत्यतः ते परिहरणीयाः। तथाहि- 'काव्यत्वविघटका ये च्युतसंस्कारादयः प्रवलदोषास्तद्रहितावित्यर्थविवरणकाराः।' इति। [5] यदि 'अदोषौ' इति पदस्य लक्ष्यं भवति दोषसामान्याभावः, तर्हि 'न्यक्कारो ह्ययम्' इत्याद्युत्तमकाव्ये अविमृष्टविधेयांशदोषस्य विद्यमानाल्लक्षणस्य अव्याप्तिर्दोषो भवति। परन्तु प्रकृतपक्षे तन्न जातम्। दोषो भवति

---

[1] *साहित्यदर्पणः*, सम्पा.- आचार्य कृष्णमोहन शास्त्री, पृ. ७।
[2] *रसगङ्गाधरः*, सम्पा.- विद्युत् वरण घोष, पृ. ५०।
[3] *काव्यप्रकाशः*, सम्पा.- भट्टवामनः, पृ. १७।
[4] *साहित्यदर्पणः*, सम्पा.- आचार्य कृष्णमोहन शास्त्री, पृ. ११।
[5] *काव्यप्रकाशः*, सम्पा.- भट्टवामनः, पृ. १४।

उद्देश्यप्रतीतेः प्रतिबन्धकः। समस्तकाव्यानामुद्देश्यं भवति रसः। तस्य रसस्य परिपन्थिनः सर्व एव दोषाः। तस्मादेव मम्मटेन *काव्यप्रकाशस्य* सप्तमे उल्लासे उक्तम्- 'मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः'[1] इति।

कविराजविश्वनाथेनापि उक्तम्- 'रसापकर्षका दोषाः'[2] इति। रसं परिप्रेक्ष्यैव गुणदोषौ विचारणीयौ। दोषाणां च क्वचिद्दोषत्वं क्वचिद्गुणत्वम् इत्यपि दर्पणकारेणोच्यते। अर्थाद् दोषाः कदापि दोषहीनरूपेण कदापि वा गुणरूपेण परिणता भवन्ति। 'न्यक्कारो ह्ययम्' इत्यादिश्लोके दोषा गुणरूपेण परिणताः। प्रसङ्गेऽस्मिन् एकं विख्यातं सूत्रं विद्यते- 'वक्त्रादौचित्यवशाद् दोषोऽपि गुणः क्वचित्'[3] इति। नियमेनानेनैव न्यक्कारादौ विदग्धरावणस्य वैशिष्ट्येन अविमृष्टविधेयांशदोषो गुणरूपेण परिणतः।

निर्गुणे अतिव्याप्तिवारणाय 'सगुणौ' इति पदं काव्यलक्षणे संयुक्तम्। 'सगुणौ शब्दार्थौ' इत्येवमुक्तिरपि दर्पणकारस्य मतेन त्रुटिहीना नास्ति। यतो हि गुणः शब्दार्थयोः धर्मो नास्ति, स रसस्य धर्मः। मम्मटोऽपि उक्तवान्- 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।'[4] इति। अत एव सगुणौ शब्दार्थौ इत्यनुक्त्वा 'रसवन्तौ शब्दार्थौ' इति कथनमेव श्रेयः।

दर्पणकारस्य एतद् अभिमतमपि ग्रहणीयं नास्ति। प्रथमतः रसयुक्तौ शब्दार्थौ एव काव्यपदवाच्यं भवति चेद् अलङ्कारप्रधानं वस्तुप्रधानं च विषयवस्तु अकाव्यं स्यात्। पुनः यत्र रसो नास्ति केवलं जलप्रवाहादयः कपिबालकानां क्रीडादयो वर्णिताः सन्ति, तेषामपि अकाव्यतापत्तिरागच्छति। कविराजकृतं 'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणमपि युक्तियुक्तं नास्ति। लक्षणानुसारेणानेन चित्रकाव्यस्य रसहीनत्वात् काव्यपदवाच्यता न स्यात्। जलप्रवाहादीनां वर्णनायां परम्परासम्पर्केऽपि रसस्य स्पर्शमात्रं नास्तीत्यतः तद् अकाव्यं भवति। उच्यते हि *रसगङ्गाधरे* 'न च तत्रापि यथाकथञ्चित् परम्परया रसस्पर्शोऽस्तीति वाच्यम्।'[5] इति।

अपरतो मम्मटस्य समर्थनेन वक्तुं शक्यते यत्, गुणा रसनिष्ठा भवन्त्यपि परम्परासम्बन्धेन रसव्यञ्जकं गुणपदम्।[6] मम्मटस्य समर्थने वक्तुं शक्यते यत् 'सगुणौ' इति विशेषणं नीरसचित्रकाव्येऽपि अव्याप्तं न भवति। अपरतः 'सरसौ' इति विशेषणं चित्रकाव्ये अव्याप्तिदोषेण दुष्टं भवति। अत एव नीरसे अव्याप्तिवारणाय 'सगुणौ' इति पदं लक्षणे अयौक्तिकं नास्ति[7]। मम्मटस्य मतेन गुणः त्रिप्रकारकः- माधुर्यम्, ओजः, प्रसादश्चेति। एवञ्च ते रसनिष्ठा भवन्त्यपि परम्परासम्पर्केण रसव्यञ्जकशब्दार्थनिष्ठाः।[8] अत एव 'सगुणौ' इति विशेषणं दोषयुक्तं नास्ति।

अनन्तरं कविराजविश्वनाथेन 'अनलङ्कृती पुनः क्वापि' इत्यंशे दोषः प्रदर्शितः। काव्ये अलङ्कारा भवन्ति कटककुण्डलादिवत् काव्योत्कर्षाधायका न तु स्वरूपाधायकाः। पुनः मम्मटाचार्येण अस्फुटालङ्कारत्वे उदाहृतम्-

> यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
> स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बनिलाः।
> सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
> रेवारोधसि वितसीतरुतले चेतः समुत्कण्ठते।।

इतीदं काव्यम्। दर्पणकारस्य मतेनात्र विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वं वर्तते। अत मम्मटाचार्याभिमतस्य अस्फुटालङ्कारस्येदं यथार्थमुदाहरणं नास्ति।

दर्पणकारस्य इदं मतमपि न यथार्थम्। तथा हि निरलङ्कारे अतिव्याप्तिवारणाय लक्षणे 'अनलङ्कृती पुनः क्वापि' इति

---

[1] *तदेव,* पृ. २६३।
[2] *साहित्यदर्पणः*, सम्पा.- आचार्य कृष्णमोहन शास्त्री, पृ. ४६९।
[3] *काव्यप्रकाशः*, सम्पा.- भट्टवामनः, पृ. ४१२।
[4] *तदेव,* पृ. ४६२।
[5] *रसगङ्गाधरः*, सम्पा.- विद्युत् वरण घोष, पृ. ५९।
[6] 'गुणस्य रसनिष्ठत्वेऽपि तद्व्यञ्जकपरं गुणपदम्'- *काव्यप्रकाशः*, सम्पा.- भट्टवामनः, पृ. १५।
[7] 'तेन नीरसेऽव्याप्तिरपि नेति बोध्यम्'- तत्रैव।
[8] 'गुणानां रसैकनिष्ठत्वेऽपि परम्परया तदभिव्यञ्जकशब्दार्थनिष्ठत्वमिति भावः।'- तत्रैव।

विशेषणं प्रदत्तम्। एतत् किमपि लक्षणघटकं पदं नास्ति 'सालङ्कारौ' इति विशेषणग्रहणात्। तस्माद् वृत्तौ मम्मटाचार्येण उक्तम्- 'सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः।'[1] अत्र 'अनलङ्कृती' इति पदस्यार्थः अलङ्कारविहीनो निरलङ्कारो वा न भवति। न अलङ्कृती- अनलङ्कृती। अत्र नञः अर्थ ईषद् अल्पम् अस्फुटं वा।[2] ईषद् इत्युक्ते बुध्यते, काव्यश्रवणमात्रं सहृदयानां ज्ञानस्य अविषयीभूतरूपेण स्फुटम्। अत एव 'अनलङ्कृती' इति पदस्यार्थः अस्फुटालङ्कारः। 'क्वापि' इति पदे अपिशब्देन समुच्चयार्थः प्रकाश्यते। फलतः 'सालङ्कारौ अनलङ्कृती च', अर्थात् शब्दार्थौ भवतः अलङ्कारयुक्तौ, पुनः कदापि अस्फुटालङ्कारयुक्तौ भवतः चेत् काव्यस्य हानिर्न भवति। संक्षेपेण वक्तुं शक्यते यद् अलङ्कारः स्फुटो भवतु उत अस्फुटो भवतु, एवम्विधौ शब्दार्थौ काव्यम्। स्फुटालङ्कारविरहे अर्थात् अस्फुटालङ्कारेऽपि काव्यस्य हानिर्न भवति। यथा-

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बनिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वितसीतरुतले चेतः समुत्कण्ठते।। इति।

शीलाभट्टारिकानामिकायाः कस्याश्चित् कवयित्र्याः कवितेयम् अपूर्वाम् अनुभूतिमावहति। स्वाधीनपतिका कापि युवती विवाहात्प्राक् यः प्रेमिक आसीत् तमेव पतिरूपेण वृतवती। विवाहानन्तरं पूर्ववदेव चैत्ररात्रौ मालतीकुसुमस्य सौरभयुक्तमृदुवायोश्च विद्यमानेऽपि स्वामिना सह मिलनान्तरं तस्याः सुखं न भवतीति सा तस्याः सखीं कथयति। रेवातीरे वेतसीतरुतले प्राग्विवाहकाले प्रेमिकेण सह मिलने या तृप्तिः या शङ्का यत् शिहरणं चासन्, विवाहोत्तरजीवने तेषाम् अनुभवाभावाच्चित्ते चरमातृप्तिर्विराजते।

समग्रकवितायां शृङ्गाररसस्य प्राधान्यं वर्तते। एष रसः अन्यस्य कस्यापि रसस्य अङ्गं नास्तीत्यत एष रसवदलङ्कारे पर्यवसितो नास्ति। अत्र अस्पष्टतया विभावना विशेषोक्तिश्चेति द्वावलङ्कारौ विद्येते। हेतुं विना कार्योत्पत्तिर्भवति चेद् विभावनालङ्कारो[3] भवति। अत्र कार्यं भवति चित्तस्य उत्कण्ठा। अस्या उत्कण्ठायाः कारणं भवितुम् अशक्ष्यद् यदि स्वामी प्रेमिकं विना अन्यः कोऽपि अभविष्यत्। परन्तु यः कौमार्यं हृतवान्, स युवकः प्रेमिक एव वर इत्यत उत्कण्ठायाः किमपि कारणं नास्ति। अत एव हेतुं विनैव कार्योत्पन्नादत्र विभावनालङ्कारः। परन्तु अलङ्कारोऽयमत्र स्पष्टो नास्ति, यतो हि वरः प्रेमिकाद् भिन्नो नास्ति। एवं नञर्थकम् अनुक्त्वा सदर्थकभङ्ग्या उक्तत्वाद् अस्फुटविभावनालङ्कारः। पुनः हेतोर्विद्यमाने सत्यपि फलाभावो भवति चेद् विशेषोक्तिरलङ्कारो[4] भवति। विशेषोक्त्यलङ्कारो विभावनालङ्कारस्य विपरीतो भवति। अत्र हेतुः तिष्ठत्यपि फलाभावः, पुनः विभावनायां हेतुर्नास्ति तथापि कार्योत्पत्तिः। अत्र हेतुर्विद्यते- 'स एव वरः' इति। प्रेमिको वरो भवति चेत् फलं कार्यं वा भवति चित्तस्यानुत्कण्ठा। परन्तु हेतौ सत्त्वेऽपि चित्तस्य अनुत्कण्ठारूपं फलं नोदितम्। अत्र नञर्थकभङ्ग्या फलाभावो न प्रदर्शितः, तस्मादेव विशेषोक्तिरस्फुटा।

एवं दृश्यते यत्, श्लोकेऽस्मिन् शृङ्गाररसस्य प्राधान्याद् रसवदलङ्कारो न जातः, एवञ्च यौ द्वौ अलङ्कारौ जातौ तौ अस्फुटौ।

**पण्डितराजमतं तन्मतनिराकरणं च-** द्वितीयतः पण्डितराजेन *रसगङ्गाधरे* मम्मटकृतकाव्यलक्षणे विद्यमानं 'शब्दार्थौ' इति पदं खण्डितम्। पण्डितराजमते 'काव्यं पठितं श्रुतं गीतं रचितम्' 'काव्यं बुद्धम्' 'काव्यं श्रुतमर्थो न ज्ञातः' इत्यादिव्यवहारेभ्योऽवगम्यते यत् शब्दविशेष एव काव्यम्, शब्दार्थयोः उभयोः काव्यत्वं न सम्भवति। यतो हि शब्द एव पठितुं शक्यते, शब्द एव श्रूयते, शब्दादेव अर्थबोधः सम्भवति। केषाञ्चिन्मते आस्वादजनकत्वं काव्यप्रयोजकम् एवञ्च तत् शब्दार्थयोः उभयोस्तिष्ठतीत्यतः उभयोः काव्यत्वं स्वीकार्यमिति मतमपि न युक्तिसङ्गतम्। तथा सति अभिनयस्यापि काव्यता स्यात्। पुनः काव्यता शब्दार्थयोरुभयोः व्यासज्यवृत्त्या मिलितभावेन तिष्ठति चेत् श्लोकवाक्यं काव्यं न भवति। शब्दार्थयोः पृथक्तया तिष्ठति चेत् शब्दकाव्यमर्थकाव्यमिति काव्यद्वयापत्तिः

---

[1] *तदेव*, पृ. १७।

[2] 'अनलङ्कृती इत्यत्र ईषदर्थे नञ्'- *तदेव*, पृ।.- १५।

[3] 'विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।'- *साहित्यदर्पणः*, सम्पा.- आचार्य कृष्णमोहन शास्त्री, पृ.- ७९२।

[4] 'सति हेतौ फलाभावो विशेषोक्तिः'- *तदेव*, पृ.- ७९३।

स्यात्। अतः काव्यं शब्दनिष्ठम्। तथाहि पण्डितराजेन *रसगङ्गाधरे* काव्यलक्षणं प्रतिपादितम्- 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'[1] इति।

परन्तु जगन्नाथस्य मतमिदं न युक्तिग्राह्यम्। काव्यपदस्य प्रवृत्तिनिमित्तं भवति शब्दार्थयोः अविनाभावः। वाचकशब्दः वाच्योऽर्थश्चेति सम्मिलितौ काव्यं स्यात्। तस्मादेव कुन्तकाचार्यः स्पष्टमकथयत्- 'वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्।'[2] इति। भामहाचार्येणापि *काव्यालङ्कारे* उक्तम्- 'शब्दार्थौ सहितौ काव्यम्'[3] इति। रसोद्बोधकं काव्यत्वं केवलं शब्दे अथवा केवलम् अर्थे न तिष्ठति, तत् शब्दार्थयोः मिलितसम्बन्धे एव तिष्ठति। तस्मात् टीकाकारेण नागोजिभट्टेन कथितम्- 'यदि त्वास्वादव्यञ्जकत्वस्योभयत्राप्यविशेषाच्चमत्कारिबोधजनकज्ञानविषयतावच्छेदकधर्मवत्त्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्षमतावच्छेदस्योभयवृत्तित्वाच्च काव्यं पठितं, श्रुतं काव्यं, बुद्धं काव्यमित्युभयविधव्यवहारदर्शनाच्च काव्यापदप्रवृत्तिनिमित्तं व्यासज्यवृत्ति।'[4] इति। एतस्माद् बोद्धुं शक्यते यद् आस्वादव्यञ्जकता शब्दार्थयोः अविशेषभावेन अभिन्नभावेन एकात्मभावेन वा तिष्ठति। अत एव 'शब्दार्थौ' इति पदे कापि अतिव्याप्तिर्नास्ति।

**उपसंहारः-** यद्यपि मम्मटकृतकाव्यलक्षणं निर्दुष्टं नास्ति, तत्र बहवो दोषा विद्यन्ते, तथापि कविराजविश्वनाथेन पण्डितराजजगन्नाथेन च खण्डितं मम्मटकृतकाव्यलक्षणं प्रदर्श्य तयोर्मतयोरपि दोषप्रदर्शनपूर्वकं मम्मटमतस्य पुनः प्रतिष्ठा मयात्र कृता। मम्मटाचार्यः काव्यलक्षणे शब्दार्थयोः उभयोः समप्राधान्यं स्वीकृतवान्। परन्तु पण्डितराजजगन्नाथेन शब्दस्य अधिकप्राधान्यं स्वीकृतम्। विश्वनाथाचार्येणापि रसात्मकवाक्यस्य काव्यता स्वीकृता। अतो जगन्नाथविश्वनाथाचार्ययोः मतं मम्मटाचार्याद् अवश्यमेव भिन्नं भवेत्। कविराजपण्डितराजाभ्यां प्राचीन आलङ्कारिक आसीत् मम्मटाचार्यः। अतो मम्मटाचार्यस्य काव्यलक्षणमुभाभ्यामपि सम्यगधीत्य खण्डितम्। पुनः स्वमतं मण्डितं ताभ्याम्। परन्तु तयोः खण्डनशैल्यामपि दोष आसीत्। कविराजविश्वनाथमते काव्यलक्षणे अदोषपदोपादानेन नैकान्युत्तमकाव्यानि अकाव्यरूपेण विवेचितानि भवन्ति। काव्यस्य यस्मिन्नंशे दोषो नास्ति तत्काव्यम्, यस्मिन्नंशे दोषोऽस्ति तदकाव्यमित्यपि न वाच्यम्। सति सम्भवे ईषद्दोषौ शब्दार्थौ काव्यमित्यपि न वाच्यम्। पुनः दोषहीनं काव्यं दुर्लभं भवति। अदोषाविति पदस्य समर्थने टीकाकारा वदन्ति यत् च्युतसंस्कारादयः काव्यत्वविघटका ये प्रवलदोषाः ते परिहरणीयाः। दोषो भवति उद्देश्यप्रतीतेः प्रतिबन्धकः। समस्तकाव्यानामुद्देश्यं भवति रसः। तस्य रसस्य परिपन्थिनः सर्व एव दोषाः। दर्पणकारमते सगुणाविति पदस्य परिवर्तनेन रसवन्तौ इति विशेषणं युक्तिसङ्गतम्। दर्पणकारस्य मतमिदं स्वीक्रियते चेद्वस्तुप्रधानमलङ्कारप्रधानञ्च विषयवस्तु अकाव्यं स्यात्। मम्मटमतसमर्थने वक्तुं शक्यते यत्सगुणाविति विशेषणं नीरसचित्रकाव्येऽप्यव्याप्तं न भवति। अनलङ्कृती पुनः क्वापीत्यंशस्य समर्थने मम्मटाचार्येण 'यः कौमारहरः' इत्याद्युदाहरणं प्रदत्तम्। दर्पणकारमते उदाहरणेऽस्मिन् स्फुटालङ्कारो विद्यतेऽतो मम्मटमते प्रमादो विद्यते। परन्तु मम्मटानुगामिनां मते श्लोकेऽस्मिन्नस्फुटावेव विभावनाविशेषोक्त्यलङ्कारौ विद्येते। पण्डितराजमते काव्यं शब्दनिष्ठमिति यन्मतं तन्न युक्तिग्राह्यम्। काव्यपदस्य प्रवृत्तिनिमित्तं भवति शब्दार्थयोः अविनाभावः। वाचकशब्दः वाच्योऽर्थश्चेति सम्मिलितौ काव्यं स्यात्। तस्मादेव कुन्तकाचार्यः स्पष्टमकथयत्- 'वाचको वाच्यं चेति द्वौ सम्मिलितौ काव्यम्।' इति। मम्मटानुगामिभिः परवर्तिटीकाकारैः मम्मटकाव्यलक्षणविरोधिनां विश्वनाथजगन्नाथादीनां मतानि खण्डितान्यपि मम्मटकृतकाव्यलक्षणे केचन दोषाः तिष्ठन्त्येव। तथापि अत्र मया येषां दोषाणां निराकरणं सम्भवति त एव प्रदर्शिताः। मया प्रदर्शितान् दोषनिराकरणांशान् विहायापि विश्वनाथाजगन्नाथाभ्यां मम्मटकृतकाव्यलक्षणस्य बहुधा खण्डनं कृतम् इति शम्।

**परिशीलितग्रन्थावली-**

कुन्तकः। *वक्रोक्तिजीवितम्*। सम्पा.- डा. दशरथ द्विवेदी। वाराणसीः विश्वविद्यालय प्रकाशन, १९७७।

जगन्नाथः। *रसगङ्गाधरः*। सम्पा.- विद्युत् वरण घोषः। कलकाताः पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१९।

---

[1] *रसगङ्गाधरः*, सम्पा.- विद्युत् वरण घोषः, पृ.- ४६।

[2] *वक्रोक्तिजीवितम्*, सम्पा.- डा. दशरथ द्विवेदी, पृ. १६।

[3] *काव्यालङ्कारः*, का. १६।

[4] *रसगङ्गाधरः*, सम्पा.- विद्युत् वरण घोष, पृ. ५५।

भामहः। *काव्यालङ्कारः*। सम्पा.- पण्डित बटुकनाथ शर्मा, पण्डित बलदेव उपाध्याय च। वाराणसीः चौखम्बा संस्कृत संस्थान, १९८१।

मम्मटः। *काव्यप्रकाशः*। सम्पा.- भट्टवामनः। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, २०२१।

---।---। सम्पा.- ड. श्यामाप्रसाद भट्टाचार्य, सैकत चाकी, राहुल वणिकश्च। कलकाताः संस्कृत बुक डिपो, २०२१।

विश्वनाथः। *साहित्यदर्पणः*। सम्पा.- आचार्य कृष्णमोहन शास्त्री। वाराणसीः चौखम्बा संस्कृत संस्थान, २०२२।

---। ---। सम्पा.- श्री सत्यनारायण चक्रवर्ती। कलकाताः संस्कृत पुस्तक भाण्डार, २०२३।

# तद्धितप्रत्ययोत्तरेषु जायमानाङ्गकार्यनिरूपणम्

Tanay Baidya, Ph.D. Scholar
Postal Address :- Ramakrishna Mission Vidyamandira.
Belur Math, Howrah, 711202, West Bengal
Email Address :- tanaybaidya656@gmail.com
Phone no:- 6289172051

**विषयसंक्षिप्तिका-** तद्धितान्तस्य प्रातिपदिकस्य निर्माणे यदा प्रकृति-तद्धितप्रत्यययो एकयोः योजनं क्रियते तदा प्रारम्भे प्रकृतेः दृश्यरूपं तथा तद्धितप्रत्ययस्य दृश्यरूपं लभ्यते। तत्र प्रकृतेः केषुचन स्थलेषु आदेशः भवितुमर्हति। परन्तु तद्धितप्रत्ययस्य दृश्यरूपे यत्परिवर्तनमस्ति तत् प्रायस्सर्वेषु प्रत्ययेषु भवति। अन्तिमे च प्रकृतेः दृश्यरूपं तद्धितप्रत्ययस्य दृश्यरूपम् इत्येतयोः मेलनेन यदा तद्धितान्तस्य निर्माणं भवति तदा तयोर्मध्ये कानिचन कार्याणि दृश्यन्ते। तानि कार्याणि सन्ति- अङ्गकार्यम्, प्रत्ययलुक्, सन्धिकार्यम्, त्रिपादिकार्यम् इत्यादिरूपाणि। एतेषु कार्येषु मध्ये अङ्गकार्यमिति यत्कार्यं तत्तु तद्धितप्रक्रियायां प्रधानकार्यम्। अङ्गकार्यात् परमेव दृश्यप्रकृति-तद्धितप्रत्यययोः मेलनेन स्वादिकार्ये तद्धितान्तरूपं सिध्यति। इह शोधपत्रे आदिवृद्धिरादिबहुविधाङ्गपरिवर्तनमाश्रित्य यानि तद्धितान्तरूपाणि तानि समाकल्यात्र विशदेन आलोचयामि।

**सारिष्ठाशब्दाः -** तद्धितः, अङ्गम्, प्रातिपदिकम्, वृद्धिः, टिभागः, उपधा।

**उपक्रमः -**'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इति सर्वसम्मतवचनं पाणिनीयव्याकरणस्य महत्वं प्रतिपादयति। वैदिकलौकिकयोरुभयोश्शब्दयोस्साधुत्वं प्रदर्शनार्थमद्यत्वे पाणिनीयव्याकरणमन्येषु व्याकरणेषु सर्वमान्यं भवति। सूत्रशैल्या निबद्धं पाणिनिप्रणीतं व्याकरणमष्टस्वध्यायेषु विभक्तमिति अष्टाध्यायी संज्ञा भजते। भाषां सम्यग् व्यवस्थापयितुं विरचितेषु बहुविधेषु व्याकरणेषु इयमष्टाध्यायी सर्वातिशायिनी। अष्टाध्याय्यां संस्कृतभाषायाः शब्दान् विश्लिष्य साधुत्वं प्रदर्शितम्। पाणिनीयदृष्ट्या विचारे कृते प्रतीयते यदष्टाध्याय्यां त्रयो भागास्सन्ति। यथा प्रथमद्वितीयाध्याययोः प्रथमे भागे वाक्येभ्यः पदानां संकलनम्। तृतीयचतुर्थपञ्चमाध्यायेषु द्वितीये भागे सङ्कलितपदानां प्रकृतिप्रत्ययविभागेन विश्लेषणम्। षष्ठसप्तमाध्याययोः तृतीयभागे प्रकृतिप्रत्ययविभागविश्लिष्टेषु तेषु आगमादेशादिविभागेन पदनिर्माणम्।

पाणिनीयव्याकरणं सूत्रशैल्या रचितं यत्र प्रतिपदं मात्रालाघवं वर्णलाघवं शब्दलाघवं च द्रष्टुं शक्यते। इत्थं स्वल्पपदैः सूत्रैः महतः शब्दौघान् व्युत्पादयति सूत्रकारः। अष्टाध्याय्यामेकस्य शब्दस्य बहुत्र प्रयोगवारणाय आवृत्तिप्रयुक्तगौरवस्य अपाकरणाय अनुवृत्तिपद्धति अधिकारपद्धतिश्च स्वीकृता। अत एव अस्या अष्टाध्याय्याः प्राणस्वरूपौ अनुवृत्त्यधिकारौ।

वैयाकरणा लाघवप्रिया भवन्ति। शास्त्रे लाघवसिद्ध्यर्थं पाणिनिना नैका युक्तय योजितास्सन्ति। तेषु अन्यतमोऽधिकारः। यत्सूत्रं निश्चितावधिपर्यन्तमुत्तरसूत्रेषु गच्छति तदधिकारसूत्रम्। यत अधिकारसूत्रस्य कोऽपि अर्थो नास्ति, परन्तु उत्तरोत्तरसूत्रेष्वन्वितं भूत्वा वाक्यार्थज्ञानं साधयति। अधिकारस्सम्पूर्णस्य सूत्रस्य सूत्रांशस्य पदैकदेशस्य वा भवति। तथाह्यधिकारसूत्रस्य लक्षणं भवति- 'स्वदेशे फलशून्यत्वे सति परदेशे वाक्यार्थबोधजनकत्वम् अधिकारत्वम्'। यथा- तद्धिताः इति।

तेभ्यः (प्रयोगेभ्यः) हिताः (उपयोगिनः) तद्धिताः इति। 'तद्धिताः' इति शब्दोऽत्र योगरूढः। प्रयोगाणां निष्पत्तौ हितकरसिद्धेः कारणस्वरूपाः ये प्रत्ययाः, ते तु तद्धिता इत्युच्यते। अर्थात् येषां प्रयोगेण भिन्नेष्वर्थेषु नूतनप्रातिपदिकानां निर्माणं भवति, ते तद्धितप्रत्ययाः। तद्धिता इत्येकम् अधिकारसूत्रम्। सूत्रादस्मात् तद्धिप्रप्रत्यया आरभ्यन्ते। अस्मिन् तद्धिताधिकारे ये ये प्रत्ययाः प्रोक्ताः, ते सर्वे तद्धितसंज्ञकाः भवन्ति। अस्मात्सूत्रात् अर्थात् 'तद्धिताः'(४.१.७६) इत्यारभ्य आपञ्चमाध्यायपरिसमाप्तेः अर्थात्

'निष्प्रवाणिश्च'(५.४.१६०) इति सूत्रपर्यन्तं ये प्रत्ययाः सन्ति, ते तद्धितसंज्ञकाः भवन्ति।

तद्धितप्रत्ययानां प्रायेण सर्वत्र प्रातिपदिकानि एव प्रकृतयो भवन्ति। परन्तु एते प्रत्ययाः सुबुत्पत्त्यन्तरमेव जायन्ते। 'घकालतनेषु कालनाम्नः' (६.३.१७) इति सूत्रेण अलुग्विधानादेव ज्ञाप्यते यत् सुबन्तादेव तद्धितोत्पत्तिर्भवति न प्रातिपदिकान्तात्। अतस्सुबन्तात् तद्धितोत्पत्तिरित्युच्यते। क्वचिच्च विशेषवचनबलात् बहुच्-इत्यादयः प्रत्ययाः सुबन्तं समुद्दिश्यापि जायन्ते। एवञ्च तद्धितप्रत्ययानां प्रकृतिः क्वचित् सुबन्तमपि भवति। किन्तु प्रायेण प्रातिपदिकान्येव तद्धितप्रत्यायानां प्रकृतिरिति। वस्तुतः सर्वे तद्धितप्रत्ययाः सर्वेभ्यः प्रातिपदिकेभ्यः सर्वेष्वर्थेषु वा न विधीयन्ते। अत एव तद्धितप्रत्ययानां योजनं शिष्टप्रयोगमनुसृत्यैव करणीयम्।

- **तद्धितप्रत्ययेषु परेषु जायमानानि अङ्गकार्याणि-** प्रक्रियायामङ्गस्य विभिन्नानि परिवर्तनानि सम्भवन्ति। तेषां सर्वेषां परिवर्तनानां सङ्कलनम् 'अङ्गस्य' (६.४.१) इत्यधिकारेऽस्मिन्

वर्णितम्। अङ्गस्य परिवर्तनकार्यं तद्धितप्रक्रियायामपि दरीदृश्यते। तथा च अस्यां प्रक्रियायां तद्धितसंज्ञकप्रत्यये परे अङ्गे किञ्चित् परिवर्तनं दृश्यते। एतदेव परिवर्तनमङ्गकार्यं नाम्ना ज्ञायते। अत्र बहुविधान्यङ्गकार्यानि सम्भवन्ति। तेषु बहुविधाङ्गकार्येषु मुख्यत्वेन त्रिप्रकारकाङ्गकार्यस्य प्राधान्यमस्ति। तद्यथा-

१) आदिकार्यम्।

२) अङ्गस्य टिकार्यम्।

३) अन्तिमवर्णकार्यम्।

तद्धितप्रत्यये परे अङ्गकार्यं प्रामुख्येन त्रिविधमस्ति। तेषु प्रथमकार्यम्-

- **आदिवर्णकार्यम्-** कस्मिंश्चित् तद्धितप्रत्ययपरे अङ्गस्य प्रथमो यः अच्वर्णः तस्य परिवर्तनं सम्भवति। एतत्कार्यमङ्गस्य आदिवर्णकार्यमिति नाम्ना ज्ञायते। सम्पूर्णतद्धितप्रक्रियायां यैः सूत्रैः अङ्गस्यादिवर्णस्य परिवर्तनं संघटितम्, तानि च सूत्राण्येव इदानीमत्र समाकल्य प्रस्तूयन्ते।

आदिवर्णकार्ये प्रधानतया अङ्गस्यादिवर्णस्य वृद्धिर्भवति। अस्मिन् प्रक्रियाकार्ये द्वाभ्यां सूत्राभ्यामेव वृद्धिकार्यं विधीयते।

तद्धितेष्वचामादेः (७.२.११७)- णित्-ञित्-तद्धितप्रत्यये परे अङ्गस्यादिवर्णस्य वृद्ध्यादेशो भवति। यथा आश्वपत इति। अश्वपति-शब्दात् अणि परे अणः णित्त्वात् प्रकृतेः अकारस्य सूत्रेणाणेन आदिवृद्धिकार्ये 'आश्वपत' इति रूपं सिद्धम्। ततः सुबुत्पत्त्यौ आश्वपतिः इति पदं जायते।

किति च (७.२.११८) - णितादिप्रत्ययपरे यथा कार्यं भवति तथैव कित्-प्रत्ययपरेऽपि भवति। अर्थात् कित्प्रत्यये परे सूत्राणेन अङ्गस्यादिवर्णस्य वृद्ध्यादेशः। यथा वैनतेय इति। विनता-शब्दात् ढकि परे ढकः कित्त्वात् प्रकृतिस्थवकारोत्तर-इकारस्य आदिवृद्धौ 'वैनतेय' इति रूपं सिद्ध्यति। ततः सुबुत्पत्त्यौ वैनतेयः इति पदं जायते।

अस्यां तद्धितप्रकियायां मुख्यत्वेन अङ्गस्यादिवर्णस्य वृद्धिर्भवति। परन्तु कस्मिंश्चित् स्थले विशिष्टशब्दात् तद्धितप्रत्ययपरेऽपि प्रकृतेः आदिवृद्धिकार्यं न भवति। यथा-

- 'देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्' [1] इत्यनेन सूत्रेण देविका-शिशंपा-दित्यवाट्- दीर्घसत्र-श्रेयस् इत्येतेषाम् विशिष्टशब्दानाम् अङ्गस्थादिभूतस्य अचस्स्थाने वृद्धिप्रसङ्गः आकारो भवति ञिति णिति किति च तद्धिते परतः। उदाहरणम्- देविकायां भवम् दाविकम् इति। अत्र देविकाशब्दात् अणि परे णित्त्वात् आदिवृद्धिप्राप्तौ सत्यां तद्बाधित्वा आकारादेशो भवति। ततः प्रक्रियाकार्ये दाविकम् इति रूपं सिद्ध्यति।
- 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्'[2] इति सूत्रेण पदान्तयकारात् पदान्तवकारात् वा परः यदि प्रथमस्वरो विद्यते तर्हि णित्-इत्यादितद्धितप्रत्ययपरे तस्य प्रकृते आदिस्वरस्य वृद्धिर्न भवति, अपि तु तस्मात् यकारात् वकारात् पूर्वं

[1] वैया.सि.कौ. - १४३९

[2] वैया.सि.कौ - १०६८

यथासंख्येन ऐकारौकारौ आगच्छतः। यथा- व्याकरणमधीते वेद वा इत्यर्थे व्याकरणशब्दात् अणप्रत्यये परे आदिवृद्धिनिषेधे प्रकृतिस्थ-यकारात् पूर्वमैकारे प्रक्रियाकार्ये वैयाकरणः इति रूपं भवति।

- ‘द्वारादीनां च’[1] इति सूत्रेण द्वारादिगणे पठितानां शब्दात् विषये णितादितद्धितप्रत्ययपरे आदिस्वरस्य वृद्धिर्न भवति, अपि तु द्वारादिगणोक्तशब्देषु यकाराते तथा वकारात् पूर्वं यथासंख्यम् ऐकार औकारश्च भवतः। यथा- द्वारे नियुक्तः इत्यत्र तत्र नियुक्तिः इत्यर्थे ठकि ततः कित्त्वात् आदि- वृद्धेरप्राप्रे ‘द्वार’ इत्यत्र वकारात् पूर्वम् औकारे प्रक्रियाकार्ये दौवारिकः इति रूपं सिद्ध्यति।

वस्तुतस्तु तद्धितप्रक्रियायाम् अङ्गस्यादिवृद्धिः भवति अर्थात् पूर्वपदस्य आदिस्वरे तद्धितकार्यं प्रवर्तते। परन्तु कुत्रचिद् निर्दिष्टसूत्रेण पूर्वपदस्यादिवृद्धिप्रतिषेधोऽपि दृश्यते। तत्र केवलमङ्गोत्तरपदस्यादिवृद्धिर्भवति। एवञ्च कदाचित् उभयोः पदयो आदिवृद्धिरपि दृश्यते। केषुचन स्थलेषु उत्तरपदस्य वृद्धिं बाधित्वा पुनः पूर्वपदस्यापि वृद्धिर्भवति। एवञ्च कुत्रचिदुत्तरपदस्य नित्यमादिवृद्धिः तथा पूर्वपदस्य विकल्पेनादिवृद्धिर्भवति। इदानीमुक्तकार्यस्यास्य विधायकानि सूत्राणि अध उल्लिख्यन्ते।

- अवयवादृतोः[2]- यदा अवयववाचिनः शब्दात् परो यदि ऋतुवाची शब्द आगच्छति तदा णितादितद्धितप्रत्ययपरे केवलमङ्गस्योत्तरपदस्यैव आदिवृद्धिर्भवति। यथा- पूर्वहिमशब्दात् अणि परे उत्तरपदे यो ऋतुवाची शब्दः, तस्य शब्दस्य आदिवृद्धौ पूर्वपदस्य तु आदिवृद्धिनिषेधे सुबुत्पत्तौ पूर्वहैमः इति पदं सिध्यति।
- सुसर्वार्धाज्जनपदस्य [3] - सु, सर्व, अर्ध- इत्येतेषां परः यदि जनपदवाचिशब्दः तिष्ठति, तर्हि आदिस्वरवृद्धिविधायकतद्धितप्रत्यये परे उत्तरपदस्यैव आदिवृद्धिर्भवति। यथा- सुपञ्चाल इत्यत्र वुञि परे सूत्राणानेन पञ्चाल इति जनपदवाचि-शब्दस्य आदिवृद्धिकार्ये सुपाञ्चालक इति रूपं जायते। तद्वत् सर्वपाञ्चालक, अर्धपाञ्चालक इत्यादिरूपं सिध्यति।
- दिशोऽमद्राणाम्[4] - दिग्वाचिनः उत्तरस्य जनपदवाचिनो मद्रवर्जितस्य शब्दस्य आदिवृद्धि- विधायकतद्धितप्रत्यये परे उत्तरपदस्यैव आदेरचो वृद्धिः स्यात् मद्रशब्दपरे तु इयं वृद्धिः पूर्वपदस्यैव भवति। यथा- पूर्वमद्र+वुञ्= पौर्वमद्रकः। परन्तु दक्षिणपञ्चाल इत्यादौ परपदवृद्धिः स्यात्। तथैव दिग्वाचि-शब्दात् उत्तरः यदि प्राच्यदेशस्य ग्रामवाचीशब्दः आगच्छति, तदा केवलमङ्गस्योत्तरपदस्यैव आदिवृद्धिर्भवति। यथा- पूर्वकृष्णमृत्तिका+अण्=पूर्वकाष्णमृत्तिक। अत्र कृष्णमृत्तिका इत्ययं प्राच्यदेशस्य ग्रामवाचीशब्दोऽस्ति।
- संख्यावाचिनः शब्दात् परः यदि संख्यावाची शब्दः, संवत्सरशब्दः, वर्षशब्दः(अभविष्यत् इत्यस्मिन्नर्थे), परिमाणवाचीशब्दः(संज्ञाभावविषये) वा आगच्छति, तदा आदिवृद्धिविधायक- तद्धितप्रत्यये परे उत्तरपदस्यैव आदिवृद्धिर्भवति। यथा- द्विषाष्ठिकः, द्विसांवत्सरिकः, द्विवार्षिकः, द्विसौवर्णिकः इत्यादितद्धितान्तरूपाणि जायन्ते।
- ष्यञ् इति तद्धितप्रत्ययपरे यदि राजपुरुष इत्ययं शब्दः तिष्ठति तर्हि न केवलमादिवृद्धिः अपि तु उभयपदस्यादिवृद्धिर्भवत्येव। यथा- राजपुरुषस्य भावः इत्यत्र ष्यञि प्रत्यये उभयपदस्य वृद्धौ प्रक्रियाकार्ये राजपौरुष्यम् इति पदं सिद्ध्यति। आकृतिगणोऽयम्। अतः यद्यन्यत्रोभयपदस्य वृद्धिस्स्यात्, स एवास्मिन् गणोऽन्तर्गत इति बुध्यते। यथा- अभिगमम् अर्हति आभिगामिकः। अधिदेवे भवम् आधिदैविकम्। अधिभूते भवम् आधिभौतिकम्। चतस्र एव विद्याः चातुर्वैद्यम् इत्यादीनि रूपाणि सिद्ध्यन्ति।
- यस्य समस्तपदस्योत्तरपदे जङ्गल, धेनु, वलज- इत्यादिशब्दो विद्यते तदा तत्पदस्य णितादि- तद्धिते परे पूर्वपदस्य

[1] वैया.सि.कौ - १३८६
[2] वैया.सि.कौ - १३९७
[3] वैया.सि.कौ - १३९८
[4] वैया.सि.कौ - १३९९

नित्यमादिवृद्धिः। तथा च भवति उत्तरपदस्य विकल्पेनादिवृद्धिः। यथा- 'विश्वधेनु' इत्यस्मात् शब्दात् अणिति (तत्र भव इत्यस्मिन्नर्थे) तद्धितप्रत्ययपरे पूर्वपदे आदिवृद्धिकार्ये प्रक्रियाकार्ये च वैश्वधेनवम् इति, विकल्पे तु वैश्वधैनवम् इति। तथा कुरुजङ्गलेषु भव इत्यत्र कौरुजङ्गलम् कौरुजाङ्गलम् वा। एवं सौवर्णवलजः सौवर्णवालज इति रूपद्वयमपि सिद्ध्यति।

- नञ्समासेन निर्मितस्य शब्दस्योत्तरपदं शुचि- क्षेत्रज्ञ-ईश्वर-कुशल-निपुण- अस्ति चेत् णितादितद्धितप्रत्ययपरे तस्योत्तरपदस्य नित्यमादिवृद्धिर्भवति, तथा पूर्वपदस्य विकल्पेनादिवृद्धिः स्यात्। उदाहरणम्- अशुचि+अण् इत्यत्र अणः णित्त्वात् आदिवृद्धौ आशौच इति रूपं, विकल्पे तु अशौच इति। तथैव अनीश्व+ष्यञ्=आनैश्वर्यम्, अनैश्वर्यम् वा। एवञ्च नञ्समासेन निर्मितस्य शब्दस्योत्तरपदं यथायथ उत यथापूर इत्यादिशब्दोऽस्ति चेद् णितादिप्रत्यये परे तस्योत्तरपदस्य तथा पूर्वपदस्य पर्यायेणादिवृद्धिर्भवति। अत्र पर्यायः इत्युक्ते उत्तरपदस्य भवति अहोस्वित् पूर्वपदस्य भवति, परन्तु द्वयो एकस्मिन् समये न भवति। उदाहरणम्- अयथातथ+ष्यञ्= आयथातथ्यम् अयाथातथ्यम् चेति।

❖ **टिकार्यम्-** तद्धितप्रत्ययपरे मुख्यतः प्रकृते आदिस्वरस्य वृद्धिर्भवति, परन्तु कस्मिंश्चित् तद्धितप्रत्यये परे प्रकृतेः टिभागस्य परिवर्तनमपि दृश्यते। एतत्कार्यं टिकार्यमिति नाम्ना ज्ञायते। टिभाग इत्युक्ते शब्दस्य योऽन्तिम अच्वर्णः, तस्मादारभ्य शब्दस्य अन्तिमवर्णपर्यन्तं यो वर्णसमुदायः तस्य टिसंज्ञा भवति। यथा- राममित्यत्र 'अम्' इति टिभागो भवति।

इदानीं टिकार्यस्य नकारान्त-भसंज्ञकाङ्गस्य टिलोपः तथा डिति टिलोप इति रूपेण विभागद्वयं कृत्वा अत्र तद्विधानज्ञापकसूत्रार्थं समाकल्य प्रस्तूयन्ते। तत्रादौ-

**नकारान्तभसंज्ञकाङ्गस्य टिलोपकार्यम्-**

- प्रथमतः नस्तद्धिते इत्यनेन सूत्रेण नकारान्तस्य भसंज्ञकस्य टिभागस्य तद्धितप्रत्यये परे लोपो भवति। यथा- उडुलोमन् इत्यत्र अपत्यार्थे इञ्प्रत्यये अङ्गस्य टेः अर्थात् 'अन्' इत्यस्य लोपे आदिवृद्धौ औडुलोमि इति रूपं सिध्यति। परन्तु अपत्यार्थं विहाय अन्येष्वर्थेषु अणप्रत्ययः प्रयुज्यते चेत् तस्य इन्नन्तभसंज्ञकस्याङ्गस्य टिलोपो न भवत्येव। तथैव गाथिन्, विदथि, केशि, गणिन्, पणिन्- इत्यादिशब्दानां अणप्रत्ययपरे अङ्गस्य टिलोपो न भवति। एवञ्च यदि भसंज्ञकस्य अङ्गस्यान्ते अहन् इत्ययं शब्दो विद्यते तर्हि तस्य च शब्दस्य टप्रत्ययपरे तथा खप्रत्ययपरे केवलं टिभागस्यैव लोपो भवति। यथा- द्व्यहन् इति शब्दात् टप्रत्ययपरे प्रक्रियायामस्यां 'अह्नष्टखोरेव' इत्यनेन प्रकृतेः टिलोपे 'द्व्यह' इति रूपं भवति।
- द्वितीयतः यस्मिन् इन्नन्ताङ्गे इन्-इत्यस्मात् पूर्वं संयोगोऽस्ति, तस्याङ्गस्य अणि परे टिलोपप्रतिषेधो भवति। यथा- चक्रिन्+अण् > चाक्रिन्+अ=चाक्रिण इति रूपम्। अत्र इन्नन्ताङ्गस्य इनित्यस्मात् पूर्वं संयोगो वर्तते, ततश्च अणप्रत्ययपरे न टिलोपकार्यम्। एवमेव यस्य भसंज्ञकस्यान्ते अन् अस्ति, तादृशस्य भसंज्ञकस्याणप्रत्यये परे न टिलोपो भवति। उदाहरणम्- सामन्+अण्=सामन इति। यतः सामन् इत्यस्यान्ते 'अन्' इत्यस्ति।

परन्तु अन्नन्तभसंज्ञकप्रकृतेः परः यदि यकारादि-तद्धितप्रत्ययः भावः तथा कर्म इत्यस्मिन्नर्थे प्रयुज्यते तर्हि तस्याङ्गस्य 'ये चाभावकर्मणोः' इत्यनेन टिलोपप्रतिषेधो न भवति। यथा- राज्ञो भावः कर्म वा इत्यर्थे य-इति तद्धितप्रत्यये टिलोपे जाते 'राज्य' इति रूपं सिद्ध्यति।

- तृतीयतः 'आत्माध्वानौ खे' इत्यनेन सूत्रेण आत्मन् तथा अध्वन् इत्यनयोः शब्दयोः टिलोपो न भवति, ख-इति तद्धितप्रत्ययपरे। यथा- आत्मन्+ख > आत्मन्+ईन =आत्मनीन इति। आत्मनीन इति आत्मने हितः इत्यर्थे। एवम् अध्वन्+ख=अध्वनीन इति। एवञ्च कर्मण्-शब्दात् परः णप्रत्ययः ताच्छिल्यार्थे प्रयुज्यते चेत् टिलोपो भवति। यथा- कर्मण्-शब्दात् णप्रत्ययपरे ताच्छिल्यार्थे कार्म इति। तथा च ब्रह्मन्-शब्दात् यदि अणप्रत्यय अपत्यर्थं जातिवाचकञ्च विहाय अन्येष्वर्थेषु प्रयुज्यते चेत् टिलोपो भवत्येव। यथा- ब्राह्म इति।

**डिति टिलोपः -**

- ति विंशतेर्डिति[1]- यत्र विंशतिशब्दः भसंज्ञां प्राप्नोति तत्र भसंज्ञकविंशतिशब्दस्य डित्प्रत्यये परे ति-इत्याङ्गांशस्य लोपो विधीयते। उदाहरणम्- विंशति इति शब्दात् पूरणम् अस्मिन्नर्थे डित्प्रत्यये परे भसंज्ञायाम् अङ्गस्य 'ति' इत्यस्य लोपे 'विंश' इति रूपं सिद्ध्यति।
- टेः[2]- डित्प्रत्यये परे भसंज्ञकाङ्गस्य टेः लोपस्स्यात्। यथा- कुमुद् इत्यस्माद् शब्दात् ड्मतुप्प्रत्यये परे भसंज्ञायां डिति अङ्गस्य टेर्लोपे कुमुद्वान् इति रूपं भवति।

❖ **अन्तिमवर्णकार्यम्-** अङ्गस्यादिवर्णस्य यथा परिवर्तनं भवति तथा कस्मिंश्चित् तद्धितप्रत्यये परे अन्तिमवर्णस्यैव परिवर्तनं भवति। तत्परिवर्तनम् अन्तिमवर्णकार्यम् इति नाम्ना ज्ञायते। अन्तिमवर्णविषयककार्ये अङ्गस्य त्रिविधं परिवर्तनं सम्भवति- **अन्तिमवर्णलोपः, अन्तिमवर्णादेशः, उपधालोपश्चेति।**

**अन्तिमवर्णलोपः -** इदानीमत्र येन सूत्रेण तद्धिते परे अन्तिमवर्णस्य लोपो विधीयते, तत्सूत्राणि प्रस्तूयन्ते। तत्रादौ-

- यस्येति च(६.४.१४८) - तद्धितप्रत्यये परे तथा ईकारादौ प्रत्यये परे भसंज्ञकस्याङ्गस्य अन्तिम-अवर्णस्य अन्तिम-इवर्णस्य च लोपो भवतीत्यनेन सूत्रेण। यथा- दक्ष+इञ् > दाक्ष्+इ=दाक्षि इति। अत्र इञि परे अङ्गस्यान्तिम-अवर्णस्य अर्थात् दक्ष इत्यत्र षकारोत्तर-अकारस्य लोपो भवति।
- ढे लोपोऽकद्र्वा(६.४.१४७) - ढकारादौ प्रत्यये परे उकारान्तस्य भसंज्ञकस्याङ्गस्य अन्तिमवर्णस्य लोपो सूत्रेणानेन विधीयते। परन्तु अयं लोपः कद्रु-शब्दस्य विषये न संगच्छते। यथा- कमण्डलु+ढक् > कामण्डल+एय=कामण्डलेय इति। परन्तु अस्माद् शब्दात् ढकि परे अन्तिमवर्ण-उकारस्य लोपाभावे काद्रवेय इति रूपं जायते।

**अन्तिमवर्णादेशः -**

तथा च येन सूत्रेण तद्धिते परे अन्तिमवर्णस्यादेशो विधीयते, तत्सूत्राण्येव अत्र उपस्थाप्यन्ते। तथाहि-

- ओर्गुणः(६.४.१४६) - भसंज्ञकाङ्गे अन्तिमवर्णे उकारः तिष्ठति चेत् तस्याङ्गस्य अन्तिमवर्णस्या गुणादेशो विधीयते इति सूत्रार्थः। उदाहरणम्- उपगु+अण् इत्यत्र उवर्णान्त-अङ्गस्य गुणादेशे अर्थात् गकारोत्तर-उकारस्य गुणे 'अव्' इत्यादेशे प्रक्रियाकार्ये औपगव इति रूपं सिध्यति।
- केऽणः(७.४.१३) - अवर्ण-इवर्ण-उवर्णान्तस्य अङ्गस्य ककारादौ प्रत्यये परे ह्रस्वादेशो भवति। यथा- शर्करा+कक् इत्यत्र कक् इति ककरादिप्रत्यये परे शर्करा इत्यन्तिमवर्णस्य ह्रस्वादेशे अर्थात् अकारादेशे शार्करक इति रूपम्।

**अङ्गस्य उपधोलोपः -** एवं च येन सूत्रेणाङ्गस्य उपधावर्णस्य लोपो विधीयते, तत्सूत्राण्येव अत्रोल्लिख्य तेन सूत्रविहितकार्याणि उपस्थाप्यन्ते। तथाहि-

- प्रथमतः - षन्-यस्यान्ते तादृशस्य, हन्-शब्दस्य, तथा धृतराजन्-शब्दस्य भसंज्ञकस्याङ्गस्य षपूर्वहन्धृतराज्ञामणि इत्यनेन उपधा-अकारस्य लोपो भवति अणि परे । उदाहरणम्- पूषन्+अण् > पौषन्+अ > पौष न् अ=पौष्ण इति। एवं वृत्रहन्+अण्=वार्त्रघ्न इति। धृतराजन्+अण्= धार्तराज्ञ इति। एवञ्च सूर्य, तिष्य, अगस्त्य तथा मत्स्य इत्येतेषां भसंज्ञायाम् अङ्गस्य उपधा-यकारस्य लोपो (सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः इति सूत्रम्) भवति। यथा- सूर्य+अण् +छ सौरीय इति।
- द्वितीयतः - उत्-उपसर्गात् परस्य लुप्तनकारात्मक-अञ्चधातोः भसंज्ञकस्याङ्गस्य अकारस्य ईकारादेशो विधीयते उद ईत् इत्यनेन सूत्रेण। उदाहरणम्- उद्+अच्+य=उदीच्य इति।
- तृतीयतः - भसंज्ञकेऽङ्गे यदि कश्चन यकार उपधायामस्ति, तस्मात् पूर्वं यदि हल्-वर्णोऽस्ति, तथा च यद्ययम् अकारः कस्यचन

[1] वैया.सि.कौ - ८४४
[2] वैया.सि.कौ - ३१६

तद्धितप्रत्ययस्य यकारोऽस्ति, तर्हि ईकारे परे तस्य लोपो भवतीति 'हलस्तद्धितस्य' इति सूत्रस्यार्थः। उदाहरणम्- गार्ग्य+ङीप् > गार्ग+ई=गार्गी इति। एवमेव भसंज्ञकेऽङ्गे यदि कश्चन यकार उपधायामस्ति, तस्मात् पूर्वं यदि हल्-वर्णोऽस्ति, तथा च यद्ययमकार अपत्यार्थे विहितस्य कस्यचन तद्धितप्रत्ययस्य यकारोऽस्ति, तर्हि तद्धितप्रत्यये परे तस्य लोपो भवतीति 'आपत्यस्य च तद्धितेऽनाति' इति सूत्रस्यार्थः। परन्तु आकारादिः तद्धितप्रत्ययऽस्ति चेदयं लोपो न स्यात्। यथा- गार्ग्य+फक्+गार्ग्यायन इति। एवञ्च भसंज्ञकेऽङ्गे यदि कश्चन यकार उपधायामस्ति, तस्मात् पूर्वं यदि हल्-वर्णोऽस्ति, तथा च यद्ययमकारः क्यच्, क्यङ् तथा च्वि-प्रत्यये परे तस्य यकारस्य लोपो भवतीति 'क्यच्व्योश्च' इति सूत्रस्यार्थः। उदाहरणम्- गार्ग्य+च्वि+भूतः = गार्गीभूत इति।

वस्तुतस्तु अङ्गकार्यविषये प्रामुख्येन आदिवर्णकार्यादीनि त्रिविधकार्याणि उल्लिखितानि। एतानि त्रिविधकार्याणि विहाय अङगस्य परिवर्तनविषये अन्यान्यपि कार्याणि सम्भवन्ति। तानि च- अङ्गस्य सम्प्रसारणम्, अङ्गस्य सर्वादेशः, प्रत्ययस्य लोपः, पुंवद्भावः, इष्ठन्-इमनिच्-ईयसुन्-प्रत्ययेषु परेष्वङ्गकार्यं चेति।

**उपसंहृतिः -** लाघवेन अनन्तानन्तशब्दानां ज्ञानं भवति व्याकरणस्य प्रयोजनम्। अनन्तानन्तशब्दानां विज्ञानं प्रकृतिप्रत्ययविज्ञानं विना न सम्भवति। आसां प्रकृतीनाम, एषां प्रत्ययानां च यथानियम योजनया तद्धितरूपाणि च जायन्ते। लोके अनन्ता अर्थाः विद्यन्ते। ये प्रातिपदिकात् तद्धितप्रत्ययेऽभिव्यज्यन्ते। एतेष्वर्थेषु १४१ अर्थाः भगवता पाणिनिणा अण्-ठक्-यत्-छ-ठञ्-इत्येषां पञ्चप्रत्ययानां मध्ये विभाजिताः। एते पञ्च तद्धितप्रत्ययाः महोत्सर्गप्रत्ययाः सन्ति। पाठेन च तद्धितप्रक्रियाविज्ञानम् अप्यभूत्। अनेन वाक्यविन्यासे लाघवम् आयातम्, तथा भाषायाः सौष्ठत्वं सामर्थ्यमपि वर्धयति। वस्तुतस्तु कस्यामपि भाषायामेवं न भवति यदेकस्य प्रत्ययस्य योजनेन वाक्यस्य सर्वोऽर्थः प्रकृतौ प्रविशेत्। परन्तु तादृशं सामर्थ्य संस्कृतेऽस्ति। यथा-दशरथस्य अपत्यम् इति वाक्यम्। अस्यार्थः दशरथशब्दे इप्रत्ययस्य योजनेन प्रकृतौ प्रविशति। अतो योऽर्थः वर्तते दशरथस्य अपत्यम् इति वाक्यस्य, स एवार्थो भवति 'दाशरथि' इति तद्धितान्तपदस्यापि। एवमेव माथुरायाः भवः माथुरः। व्याकरणमधीते वैयाकरणः। युवतीनां समूहः यौवनम्। सप्तत्या क्रीतम् साप्ततिकम् इत्यादिषु। एतादृशाः अनन्ता अर्थास्तद्धितप्रत्ययैः अभिव्यज्यन्ते।

अत एव अस्यां प्रक्रियायां तद्धितप्रत्येयेषु परेषु जायमानानि यानि अङ्कार्याणि सन्ति, तानि अङ्गकार्यानि रूपसिद्धिप्रक्रियायां बहुप्रयोजनानि भवन्ति। तत्र प्रक्रियायां अङ्गकार्य साधयित्वा ततः सुपः लुकि सुबुत्पत्तौ तद्धितान्तपदोत्पत्तिर्भवति। तदैव एवं पदं वाक्यप्रयोग- विषयो भवति। अतः तद्धितप्रत्ययसंयोगात् जातः शब्दः वाक्यप्रयोगे व्यवहारे च लाघवं साधयतीति शिवम्।

**सहायकग्रन्थावली**


१) दीक्षित पुष्पा। *अष्टाध्यायी सहजबोध, चतुर्थभागः*। दिल्ली: प्रतिभा प्रकाशन, 2006।

२) पाणिनिः। *अष्टाध्यायी* सम्पा. गोपालदत्तपाण्डेयः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2021।

३) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* सम्पा. श्रीगोविन्दाचार्यः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2022।

४) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी, द्वितीयभागः*। सम्पा. गिरिधरशर्मा। दिल्ली: मोतीलाल बनारसीदास इंटारनेशनल, 2017।

# शब्दस्य काव्यत्वमुत शब्दार्थयोः - एकमध्ययनम्

अमित-कुमार-गराइः,
शोधच्छात्रः, संस्कृतदर्शनविभागः,
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्,
बेलुड-मठः, हाओडा, पश्चिमबङ्गः, ७११२०२,
अणुसङ्केतः- amitkumargarai024@gmail.com
दूरवाणीसंख्या-9432545824

**सारसंक्षेपः-** 'काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक्' इति भट्टनायकवचनं काव्ये रसस्य प्राधान्यं प्रतिपादयति। काव्यप्रकाशकारैरपि 'प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थ-तात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापार-प्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्' इति। एवं काव्यस्वरूपज्ञाते सत्येव तत्काव्यम् उत्तममुत तदितरमिति ज्ञातुं शक्यते। तस्मान्निर्दुष्टं लक्षणं किमित्यत्र नैकानि काव्यस्वरूपप्रतिपादकानि लक्षणानि प्रथितानि काव्यशास्त्रादिषु। दर्पणकारेण आनन्दवर्धनकुन्तकभोजराजमम्मटाचार्यकृतलक्षणानां खण्डनं व्यधायि। मम्मटाचार्येण शब्दार्थयोः अदोषौ सगुणौ क्वापी अनलङ्कृती इति विशेषणानि पदत्तानि। तेषां सर्वेषामपि काव्ये उत्कर्षमात्राधायकत्वं न तु स्वरूपाधायकत्वमित्येवं रीत्या दर्पणकारः खण्डयति। आनन्दवर्धनाचार्याणां लक्षणमपि परास्तमेति, स्ववचनविरोधात्। शब्दार्थयोः समप्राधान्यात् शब्दप्राधान्यमाश्रित्य प्रवर्तिते जगन्नाथलक्षणे दोषमापादयन्ति विद्वांसः। एवं केषाञ्चित् लक्षणं परिशीलितं स्वमतमुल्लिखितं च।

**कुञ्चिकाशब्दाः -** काव्यम्, रसः, शब्दः, गुणः, अलङ्कारः, शब्दार्थौ।

**१.प्रस्तावना-** 'साहित्यसङ्गीतकलाविहीनः साक्षात्पशुपुच्छविषाणहीनः' इत्यादिसुभाषितवचनैः साहित्यं जगति प्रकृष्टं स्थानं भजते। ततश्च सहितयोः कर्म साहित्यमिति साहित्यपदव्यवहारः काव्ये उत्पद्यते। गुणवचनब्राह्मणादिभ्यः कर्मणि च (अष्टाध्यायी ५।१।१२४) इति सूत्रेण सहितपदात् कर्मार्थे ष्यञ्प्रत्यये साहित्यपदं निष्पद्यते। कवेरिदं कर्म वा काव्यम्। अत्रापि प्रकृतसूत्रेण षञि काव्यपदस्य निष्पत्तिः। चतुर्वर्गादिनानाप्रयोजनत्वेन प्रसिद्धं हि लोके काव्यम्। तथा च काव्यस्य उपादेयत्वं श्रुत्वा तत्काव्यं किंस्वरूपमिति जिज्ञासा सुतरामुदेति। तत्र प्राचीनाः आलङ्कारिकाः स्वकीयग्रन्थेषु काव्यलक्षणानि[1] ऊचुः। भामहस्य 'शब्दार्थौ सहितौ काव्यम्', वामनस्य 'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते[2]', मम्मटस्य 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' आनन्दवर्धनस्य 'काव्यस्यात्मा ध्वनिः' इत्यादयः प्रसिद्धाः। तेषु सत्सु नूतनं लक्षणम् अनावश्यकम्। परन्तु लक्षणं हि अव्याप्त्यादिदोषत्रयरहितं भवेत्। अतः अर्वाचीनाः तत्र दोषं प्रदर्श्य स्वकीयमतं चोपस्थापयन्ति।

**२.आनन्दवर्धनोक्तकाव्यलक्षणखण्डनम्-**दर्पणकारदिशा खण्डनमत्र विचार्यते। द्विधा खण्डनमत्र विहितम्। **प्रथमखण्डनप्रकारः-** ध्वनेः

---

1 काव्यमीमासायाम्—
'गुणवदलङ्कृतं वाक्यमेव काव्यम्'—शेषराजशर्मा रेग्मी (सम्पा), चन्द्रकला, उदाहार-८।
वाग्भटः—
साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम्।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये॥—शेषराजशर्मा रेग्मी (सम्पा), चन्द्रकला, उदाहार-८।
चन्द्रालोके—
निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।
साऽलङ्काररसाऽनेकवृत्तिर्वाक् काव्यनामभाक्॥—शेषराजशर्मा रेग्मी (सम्पा), चन्द्रकला, उदाहार-८।
2 काव्यालङ्कारसूत्रवृत्तिः१.१

तावत् प्रकारत्रयं वस्तुध्वनिः अलङ्कारध्वनिः रसध्वनिश्चेति। वस्त्वलङ्कारध्वनिः यदि काव्यस्यात्मा तदा प्रहेलिकादौ अतिव्याप्तिः। तत्रापि वस्तुध्वननात्। यदि च रसध्वनिः काव्यस्यात्मा स्वीक्रियते। तदा केचन ब्रूयुः रसध्वनिमात्रस्य काव्यत्वस्वीकारे अत्ता एत्थ निमज्जति एत्थ अहं दिअसअं पलोएहि। मा पहिअ रत्तिअन्धिअ सेज्जाए मह णिमज्जहिसि॥ इत्यत्र वस्तुमात्रस्य व्यङ्ग्यत्वे काव्यत्वं न स्यादिति चेन्न। अत्रापि रसाभास्यैव विद्यमानत्वात्। रसाभासोऽपि आस्वाद्यते इति कारणात् रस एव। रसध्वनेः काव्यात्वास्वीकारे देवदत्तो ग्रामं याति इत्यादौ तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। **द्वितीयखण्डनप्रकारः-** ध्वनेः वाच्यप्रतीयमानाख्यौ[1] द्वौ भेदौ स्वीकृतौ। वाच्यात्मत्वं ध्वनिः काव्यस्यात्मा तन्न सङ्गच्छते। यतो हि वाच्यार्थात् लक्ष्यार्थात् च भिन्नः अर्थो हि ध्वनिः। परन्तु तस्याः ध्वनेः पुनः वाच्याख्यः भेदः न सम्भवति। अतः वाच्यात्मत्वं काव्यस्यात्मा ध्वनिः इति स्ववचनविरोधादेवापास्तम् इति दर्पणकाराः।

**३.मम्मटचार्यकृतकाव्यलक्षणम्-** तददौषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि इति हि आचार्यकृतकाव्यलक्षणम्। अदोषत्वे सति सगुणत्वे सति क्वापि अनलङ्कृतित्वे सति शब्दार्थत्वं काव्यत्वमिति फलितम्।

अदोषौ शब्दार्थौ काव्यम्। काव्यत्वविघटकाः च्युतसंस्कारादयः प्रबलदोषाः तद्रहितौ शब्दार्थौ काव्यमित्यर्थः। दर्पणकारादायः दोषरहितत्वस्य काव्यत्वस्वीकारे दोषं प्रादर्शयन्। परन्तु दोषरहितं काव्यं दुर्लभमित्यत्र न्यक्कारो ह्ययमेव मे इति यदुदाहृतं तन्नोपपद्यते। तथाहि दोषत्वम् उद्देश्यप्रतीतिप्रतिबन्धकत्वम्। तच्च अनुभवबलात्तत्तद्व्यङ्ग्यवाच्यवैचित्र्यप्रतीतिविरहविशिष्टदोषस्य तद्भानस्य न्यक्कारो ह्ययमेव मे इत्यत्र विशिष्टाभावसंभवान्न काव्यत्वहानिः। व्यङ्गवाच्यवैचित्र्यप्रतीतिविरहः दोषः।

सगुणौ शब्दार्थौ काव्यम्। माधुर्यौजःप्रसादगुणसहितौ शब्दार्थौ काव्यम्। गुणानां रसैकनिष्ठत्वेपि परम्परया तदभिव्यञ्जकशब्दार्थनिष्ठत्वमित्यर्थः। तेन च नीरसे नाव्याप्तिः।

क्वापि अनलङ्कृती शब्दार्थौ काव्यम्। अनलङ्कृती इत्यत्र नञ ईषदर्थः स्वीक्रियते। ईषत्वं चात्र सद्यः सहृदयसंवेदनाविषयत्वरूपमस्फुटत्वमेव। क्वापि इत्यत्र अपिना अनुक्तसमुच्चयार्थकेन स्फुटालङ्कृती इत्येव समुच्चीयते। तेन सालङ्कारौ शब्दार्थौ काव्यमिति पर्यवस्यतीति नरसिंहठक्कुरस्य मतम्। सालङ्कारत्वविशेषणानुपादानात् नन्वनलङ्कारे अतिव्याप्तिरित्यपि न वाच्यम्। क्वापि इत्यनेन सर्वत्र सालङ्कारौ शब्दार्थौ काव्यम्, क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः। नञः अल्पार्थकत्वात्, अल्पत्वस्य चात्रास्फुटत्वे विश्रामात् इति प्रदीपद्योतकाराः।

**४. मम्मटाचार्यकृतकाव्यलक्षणखण्डनम्-लक्षणम्—** तददौषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।

अदोषौ दोषरहितौ सगुणौ गुणयुक्तौ क्वापि कुत्रचिदपि अनलङ्कृती सति सम्भवे अलङ्काररहितौ शब्दार्थौ काव्यम् इति तदर्थः। प्रत्येकं पदमत्र दर्पणदिशा विचार्यते।

**४.१ अदोषौ शब्दार्थौ काव्यम्** - न विद्यते दोषः ययोः तौ अदोषौ इति दोषरहितस्य काव्यत्वं स्वीक्रियते तदा क्वचित् लक्षणस्य अव्याप्तिः भवति। स्थलमस्ति—

न्यक्कारो ह्ययमेव मे यदरयस्तत्राऽप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः[2]॥

---

1 योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥-(ध्वन्यालोकः १।२)

2 धिग्धिक्शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनपरैः पीनैः किमेभिर्भुजैः।
धिक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसभटाञ्जीवत्यहो रावणः॥—(हनुमन्नाटकम् १४. ६)

अस्मिन् श्लोके विधेयाविमर्शदोषः अस्ति। वाक्ये प्रतिपाद्यतया प्रधानोऽर्थः विधेयः। प्रधानस्य अर्थस्य अविमर्शः अनालोचनम् अप्रधानतया प्रतिपादनं विधेयाविमर्शदोषः। स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः इत्यत्र विधेयाविमर्शदोषः अस्ति। कवेः विवक्षा इत्थमस्ति- रावणः पूर्वकाले स्वर्गरूपकुग्रामस्य विलुण्ठनं कृतवान्। तत्र तस्य बाहवः उच्छूनाः शौर्यं प्रदर्शितवन्तः। तादृशाः स्वर्गग्रामटिकाविलुण्ठने उच्छूनाः बाहवः सम्प्रति युद्धप्रसङ्गे वृथा जाताः। किन्तु वाक्यनिर्माणे कविः समासस्य आश्रयणं कृतवान्। तेन च मुख्यः अर्थः गुणीभूतो जातः। समासश्च स्वर्गग्रामटिकाविलुण्ठने वृथा उच्छूनैः इति। एवं तु नास्ति। स्वर्गग्रामस्य लुण्ठनं यत्कृतं तत्तु सार्थकमेवासीत्। तत्र न वृथाः। सम्प्रति युद्धकाले वृथायमानाः जाताः। समासे सति स्वर्गग्रामटिकाविलुण्ठनकाले वृथा शौर्यं प्रदर्शितवन्तः इत्यर्थः समायाति। तेन च सम्प्रति वृथायमानाः बाहवः इति योऽर्थः सः गुणीभूतः। विधेयस्य अंशस्य अविमर्शः विधेयाविमर्शः।

मम्मटोक्तकाव्यलक्षणस्य परिशीलनेन उक्तश्लोके लक्षणस्य गमनाभावात् अव्याप्तिदोषः समायाति। पुनः ध्वनिः अस्तीति कारणात् उत्तमकाव्यत्वमपि सम्भवति। तेन च दोषसद्भावे अस्य श्लोकस्य काव्यत्वं न, ध्वनित्वकारणात् च उत्तमकाव्यत्वमिति कतरः पक्षः ग्राह्य इति प्रश्नः। यदि उच्यते श्लोकस्य कश्चिदंशः दुष्टः न सर्वः भागः। तर्हि यत्र दोषः अस्ति तत् अकाव्यम्। यत्र च दोषः नास्ति तत् काव्यमिति चेत्, तदा उभयतः काव्यत्वेन अकाव्यत्वेन च आकृष्यमाणमिदं काव्यं वा अकाव्यं वा किमपि न स्यात्।

तीक्ष्णशब्दविन्याशयुक्तवर्णेषु श्रुतिदुष्टदोषाः भवन्ति। क्वचित् तेषां रसदूषकत्वं, न सर्वत्र। तथाहि वीररसः वर्णनीयश्चेत् कोमलवर्णविन्यासः न भवेत् तथा सति रसः सम्यक् अभिव्यक्तो न भवति। ओजोगुणयुक्तशब्दप्रयोगकाले श्रुतिकटुयुक्तवर्णः प्रयोक्तव्यः। तेन अर्थस्य परिपुष्टिः सम्यक् भवति। अतः श्रुतिदुष्टादयः दोषाः सर्वत्र न दोषाः यत्र केवलं काव्यस्यात्मभूतं रसं दूषयन्ति तत्र ते दोषाः, अन्यत्र न। रसदूषकत्वे सति दोषत्वम्। रसपोषकत्वे सति गुणत्वम्। अतः क्वचित् दोषः क्वचित् अदोष इति कारणात् एते अनित्यदोषाः। औचित्येन प्रयोगश्चेत् गुणः। अनौचित्येन प्रयोगश्चेत् दोषः। उच्यते हि— अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम्। प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा॥इति।

विधेयाविमर्शदोषस्तु वक्तव्यः अर्थः अन्यथैव क्रियते इति कारणात् नित्यदोषः। अतः एतेन रसस्य सर्वथा एव दूषणं भवति। उत्तमकाव्यस्य आत्मभूतः रसः शृङ्गारः यत्र वर्ण्यते तत्र श्रुतिदुष्टादयः दोषाः न भवेयुः। भवन्ति चेत् दोषत्वेन गण्यते। अत एव उक्तं ध्वनिकृता-

श्रुतिदुष्टादयो दोषाः अनित्या ये च दर्शिताः।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः॥ इति।

निर्दुष्टं काव्यं अत्यन्तं विरलम् अथवा न प्राप्यते एव, निर्दोषस्य काव्यस्य एकत्र असम्भवात्।

अत्र ईषदर्थे[1] नञः प्रयोगश्चेत् ईषद्दोषौ शब्दार्थौ काव्यमित्युक्ते निर्दोषकाव्यस्य काव्यत्वं न सम्भवेत्। किञ्चिद्दोषसत्त्वस्य काव्यत्वात्। सम्भवे सति ईषद्दोषौ शब्दार्थौ काव्यम् अन्यथा दोषशून्यौ शब्दार्थौ काव्यमिति चेत्, न। एवंविधलक्षणस्य सम्प्रदायानङ्गीकारात्। रत्नादिलक्षणे कीटानुवेधादिपरिहारवत्। अर्थात् कोऽपि रत्नलक्षणं कर्तुमुद्यतश्चेत् प्रकाशवत्त्वे सति शिलात्वं रत्नस्य लक्षणमिति खलु तेन वक्तव्यम्। कीटानुवेधादिपरिहारत्वं रत्नस्य लक्षणमिति तु रत्नलक्षणं भवितुं नार्हति। कीटानुवेधादयः रत्नस्य रत्नत्वं व्याहन्तुं न शक्ताः। किन्तु गुणतारम्यं कर्तुम्। तद्वदत्रापि श्रुतिदुष्टादिदोषाभावत्वे सति शब्दार्थत्वं काव्यत्वमिति लक्षणे दोषपदनिवेशः न कर्तव्यः। श्रुतिदुष्टादयः दोषाः काव्यस्य उपादेयतारतम्यं कुर्वन्ति, न पुनः काव्यत्वहानिर्जनयन्ति। तथाहि उक्तम्-

कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥

---

2 तथाहि—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥—भट्टवामनाचार्यः(सम्पा.), काव्यप्रकाशः, पत्राङ्कः-१५।

**४.२ सगुणौ शब्दार्थौ काव्यम्-** शब्दार्थयोः सगुणत्वविशेषणमपि अयुक्तम्। तथाहि गुणाः[1] रसधर्माः, यथा शौर्यादयः आत्मनः धर्माः। 'ये रसस्याङ्गिनो धर्माः शौर्यादयः इवात्मनः' इति आचार्येणैव स्वग्रन्थे प्रतिपादितम्। रसे गुणः अस्ति परन्तु गुणस्य अभिव्यञ्जकौ शब्दार्थौ एव। यथा यथा शब्दार्थाः भवन्ति तथा तथा गुणाः अभिव्यक्ताः भवन्ति। गुणाभिव्यञ्जकत्वं शब्दार्थयोरेव। उपचारात् लक्षणवाक्ये सगुणौ शब्दार्थौ प्रयुक्तञ्चेत् तदपि अयुक्तम्। यतो हि काव्यत्वेेन अभिमतयोः शब्दार्थयोः रसः अस्ति वा न वा। यदि शब्दार्थयोः रसः नास्ति तदा गुणवत्त्वमपि नास्ति। रससत्त्वे गुणसत्त्वं रसाभावे गुणाभाव इति अन्वयव्यतिरेकसद्भावात्। प्रकृते शब्दार्थयोः रसाभावे गुणाभावः। शब्दार्थयोः रसः अस्ति चेत् रसवन्तौ इति विशेषणं देयम्। किञ्च गुणग्रहणेन गुणाश्रयभूतः रसोऽपि अन्यथानुपपत्त्या लभ्यते इति चेत्, न। सरसौ शब्दार्थौ इति वक्तव्यं, न सगुणौ। प्राणिमन्तः देशाः इति वक्तव्ये शौर्यादिमन्तः देशाः इति केनापि न उच्यते। शब्दार्थौ सगुणौ इत्यनेन गुणस्य अभिव्यञ्जकयोः शब्दार्थयोः काव्ये प्रयोगः कर्तव्यः इति विवक्षित इत्यपि न वक्तव्यम्। गुणाभिव्यञ्जकशब्दार्थाः काव्ये उत्कर्षं वर्धयन्ति। न तु तेषां स्वरूपाधायकत्वम्। तस्मादेव उक्तम्- 'काव्यस्य शब्दार्थौ शरीरम्, रसादिश्च आत्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत् रीतयः अवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्' भवन्ति।

**४.३ क्वापि अनलङ्कृती शब्दार्थौ काव्यम्-** न विद्यते अलङ्कृती ययोः तौ अनलङ्कृतीति व्युत्पत्तिः। ततश्च सर्वत्र सालङ्कारौ कुत्रचित् प्रसङ्गे अनलङ्कृती शब्दार्थौ काव्यम् इति चेत्, तदपि न सम्भवति। सालङ्कारशब्दार्थवत्त्वस्य काव्ये उत्कर्षाधायकत्वमेव। न तु स्वरूपाधायकत्वम्। उक्तं हि अलङ्कारलक्षणे 'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते' इति। सास्नादिमान् पिण्डः गौः इत्युच्यते। परन्तु गोः अलङ्कारार्थं कदाचित् पुष्पमाला व्यवह्रियते चेत् सा गाम् अलङ्करोतिमात्रम्। न तु स्वरूपमापादयन्ति। तद्वत् काव्ये स्थिताः अलङ्काराः काव्यस्य स्वरूपप्रतिपादकाः न भवन्ति। अपि तु काव्यस्य शोभां वर्धयन्ति। अतः अलङ्काराः अपि उत्कर्षाधायकाः न तु स्वरूपाधायकाः। एतेन अनलङ्कृती पुनः क्वापि इति आचार्येण यदुक्तं तदपि परास्तम्।

**५. जगन्नाथकृतकाव्यलक्षणम्**

रसगङ्गाधरस्य कर्ता जगन्नाथः सर्वशास्त्रपारङ्गतः स्वकीयग्रन्थे काव्यस्य लक्षणमकार्षीत्। तद्धि रमणीयार्थप्रतिपादकः शब्दः काव्यम्। रमणीयार्थप्रतिपादकत्वे सति शब्दत्वं काव्यस्य लक्षणम्। रमणीयस्य चमत्कारकारणतया सुन्दरस्यार्थस्य वाच्यलक्ष्यव्यङ्ग्यान्यतमस्य प्रतिपादकः शब्दः काव्यमिति तदर्थः। विशेष्यदलानुपादाने अनुरागाद्यर्थस्य व्यञ्जके कटाक्षनिक्षेपाद्यर्थे अतिव्याप्तिः। अतस्तद्वारणाय विशेष्यदलम्। अर्थे रमणीयत्वविशेषणानुपादाने घटमानय इत्यादिवाक्ये अतिव्याप्तिः स्यात्। रमणीयप्रतिपादके व्याकरणे अतिव्याप्तिवारणाय लक्षणे अर्थपदोपदानम्। रमणीयता का इत्यत्र उच्यते लोकोत्तरस्य अलौकिकस्य आह्लादस्य आनन्दस्य जनकमुत्पादकं यज्ज्ञानं तद्गोचरता रमणीयता। पुत्रस्ते जातः धनं ते दास्यामि इत्यादिवाक्यात् जन्यस्य आह्लादस्य लोकोत्तरत्वं नास्ति अतः तादृशवाक्ये न काव्यत्वप्रसक्तिः। लोकोत्तरत्वं नाम किमिति ग्रन्थकारः लिखति लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः।

**५.१ जगन्नाथकृतकाव्यलक्षणखण्डनम्-** यद्यपि बहवः साहित्यरसिकाः रमणीयार्थप्रतिपादकः शब्दः काव्यमिति जगन्नाथलक्षणे रमन्ते। तथापि वाङ्मये शब्दमर्थं च समप्रधानौ मत्वा शब्दाप्राधान्येन व्यवस्थापिते जगन्नाथलक्षणे असमाधानं दृश्यते। वाङ्मये शब्दार्थयोः अविनाभावसम्बन्धात् एकतराभावे अपरस्य निष्प्रयोजकत्वम्। तथाहि विना शब्दमर्थस्य अप्रतीतेः अर्थं विना च शब्दसत्तायाः असिद्धेः तयोः परस्परं सापेक्षता। तस्मात् शब्दविशेष्यकं जगन्नाथादिकृतं काव्यलक्षणम् आपातरणीयं मे प्रतिभाति।

**६. उपसंहारः-**एवं कतिचन लक्षणानि पर्यालोचितानि। तत्र शब्दार्थयोः समप्राधान्येन रचितं भामहमम्मटादीनां काव्यलक्षणमेव साधु। भामहकृतं यत् शब्दार्थौ सहितौ काव्यमिति तत्र सहितौ इति पदोपादानात् सर्वेषां लक्षणानां गतार्थत्वं भवति। सहितौ पदस्य

---

1 प्राचीनैः दश गुणः स्वीकृताः—
श्लेषः प्रसादसमता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजः कान्तिः समाधयः॥—पं. बद्रिनाथझा, पं. मदनमोहनझा (सम्पा.), रसगङ्गाधरः, पत्राङ्कः-२२९।

तात्पर्यं तावत् लोकोत्तर-चमत्कारकारकरमणीयताधर्मेण गुणालङ्कारादिना रसादिव्यञ्जकत्वेन वा सहितौ। तादृशशब्दार्थयुगलस्य काव्यत्वस्वीकारे रामो वनं गच्छति इत्यादीनां वाक्यानां काव्यत्वमपास्तं भवति। सहितौ पदस्य तादृशार्थस्वीकारे मम्मटाचार्यस्य यल्लक्षणं तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति, जगन्नाथस्य यल्लक्षणं रमणीयार्थप्रतिपादकः शब्दः काव्यमिति, विश्वनाथस्य च यल्लक्षणं वाक्यं रसात्मकं काव्यमिति तेषां सर्वेषामन्येषां च अनेनैव गतार्थत्वमिति शिवम्।

**परिशीलित-ग्रन्थपञ्जिः**


परन्तु आयुर्वेदे प्रधान (उच्च) अप्रधान (जघन) च पार-अपरयोः माध्यमेन विचार्यन्ते। महर्षि चरकस्य मते परोक्तं देश-काल-वयो-पाक-आदीनां कृते पार-अपर-प्रयोगः भवति - देशकालवयोमानपाकवीर्यरसादिषु परपरत्वे।[2] यथा, मरुभूमिः आरोग्यस्य दृष्ट्या परः(उत्तमः) भवति, तथा च अनुप्पदेशः आरोग्यम् अस्ति।

**२. युक्तिः** - विचारपूर्वकं नियमानुसारं च किमपि कार्यं सम्पन्नं करणं रणनीतिः इति कथ्यते। आचार्य चरकः अस्मिन् विषये उक्तवान् – "युक्तिश्च योजना या तु युज्यते" [3]

**3. संख्या** - एक-द्वि-त्रि-चतुर्-आदि-व्यवहारस्य पृष्ठतः कारणं संख्या एव, यथा इदमपि उक्तं यत् - एकत्वादिव्यवहर्हेतुः- संख्या।[4] नानारोगाणां भेद-तनावानां ज्ञानम्। संख्याया लभ्यते । महर्षि चरकस्य गणितम् इति उक्त्वा सम्बन्धिनो संख्याः सन्ति[5] अर्थात् गणना संख्या अस्ति।

**५. संयोगः** – एकस्य पदार्थस्य अन्येन पदार्थेन सह मिश्रणं वा एकस्य पदार्थस्य अन्येन पदार्थेन सह मिश्रणं वा संयोगः कथ्यते । यथा त्रिफलाख्यं औषधं आम्ला, बहेदा, चरक च संयोगः अस्य विषये संहितायां उक्तं यत् - योग: सह संयोग उच्यते[6] अर्थात् पदार्थानां परस्परं मिश्रणम्। संयोग इति कथ्यते।

**६. विभागः** - संयोगस्य विपरीतगुणः विभागः उच्यते अर्थात् पदार्थस्य विभागः (एकं पदार्थं द्विधा वा अधिकं वा भागं कृत्वा) विभागः इति उच्यते । महर्षि चरकस्य मते - विभागस्तु विभक्त: स्याद्वियोगो भागशो ग्रहः7 एतौ च त्रिविधौ द्वन्द्वकर्मजः, सर्वकर्मजः, एककर्मजः च। [8]

| **संयोगः** | | **विभागः** |
|---|---|---|
| द्वन्द्वकर्मज | द्वयोः सक्रियद्रव्ययोः संयोगः। | कार्यद्रवद्वयस्य पृथक्कत्वम्। |
| सर्वकर्मज | द्व्यधिकद्रव्याणां संयोगः। | द्वयोः वा तदधिकपदार्थानां परस्परं पृथक्कत्वम्। |
| एककर्मज | अन्यैः अक्रियाशीलद्रव्यैः सह क्रियाशीलद्रव्यस्य मिश्रणम्। | अन्येभ्यः अक्रियाशीलद्रव्येभ्यः क्रियाशीलद्रव्यस्य पृथक्कत्वम् |

[1] चरकसंहितायाम् सूत्रा। २६/३० इति

[2] चरकसंहितायाम् सूत्रा। २६/३१ इति

[3] चरकसंहितायाम् सूत्रा। २६/३१ इति

[4] तर्कसङ्ग्रहस्य पृष्ठ सं. २३

[5] चरकसंहितायाम् सूत्रा। २६/३२ इति

[6] चरकसंहितायाम् सूत्रा। २६/३२ इति

[7] चरकसंहितायाम् सूत्रा। २६/३० इति

[8] चरकसंहितायाम् सूत्रा। २६/३२ इति

**७.पृथक्त्वम्** - येन गुणेन कश्चन पदार्थः द्रव्यं वा अन्येभ्यः पदार्थेभ्यः भिन्नतां दर्शयति, स च पृथक्त्वगुणः इति कथ्यते। यथा - सप्तपर्णात् कुष्माण्डः भिन्नः। महर्षिचरकेण अस्मिन् विषये उक्तं यत् - पृथकत्वं स्यादसंयोगो वैलक्षण्यमनेकता।[1] अर्थात् असंयोगत्वं, विशिष्टत्वं, नानात्वं च पृथक्त्वम्। असंयोगः - यस्मिन् संयोगः न भवितुमर्हति। यथा अस्थिविकाराः त्वक्विकारात् भिन्नाः भवन्ति। वैलक्षण्यम्- लक्षणविषमता येषु पदार्थेषु भवति। यथा- रोगी वैद्यात् भिन्नः भवति। नानात्वम् - समानजातिषु पदार्थेषु वर्णादिमाधारितः भेदः, येन ते समानजातीयत्वेऽपि बहवः भिन्नाः वा दृश्यन्ते। यथा – एकः माषः वर्णादिमाधारेण अन्यस्मात् भिन्नः भवतीति।

**८.परिमाणम्** - येन परिमाणं वा परिमितं भवति, तत् परिमाणं कथ्यते। महर्षिचरकेण अस्मिन् विषये उक्तम् – परिमान पुनर्मनाम्।[2] मानं परिमाणमिति यावत्। परिमाणं परिभाषयन् तर्कसंग्रहकारः उक्तं यत् – मानव्यवहारासाधारणकारणं परिमाणम्। नवद्रव्यवृत्तिः तच्चतुर्विधम् अनु दीर्घ महत् ह्रस्वं च।[3] अर्थात् मानस्य असाधारणं कारणं परिमाणं कथ्यते। तच्च नवद्रव्येषु लभ्यते। अणुः, दीर्घः, महत्, ह्रस्वः चेति भेदेन चतुर्विधः।

**९. संस्कारः** - पदार्थे विद्यमानगुणपरिवर्तनप्रक्रिया सस्कारः कथ्यते। आचार्यः चरकः संस्कारं करणमिति सम्बोधितवान्नस्ति।[4] तथा चैतत्करणं लक्षितं कुर्वन् उक्तं यत्-

करण पुन: स्वाभाविकानां द्रव्याणामभिसंस्कार:। संस्कारो हि गुणान्तराधानमुच्यते। ते गुणास्तोयाग्निसन्निकर्ष-शौचमन्थनदेशकालवासनभावनादिभि: कालप्रकर्षभाजनादिभिश्चा- धीयन्ते।।[5] अर्थात् स्वभाविकगुणयुक्तेषु पदार्थेषु यः संस्कारः (अन्यगुणसृष्टिः) क्रियते, तच्च करणमिति। एतेषां गुणानाम् आधानं जलेन, अग्निना, सन्नीकर्षेण (दहनेन, पाकेन, भर्जनेन), शौचेन (शुद्धिकरणेन), मन्थनेन, देशेन, कालेन, वासनेन, भावनादिना कालप्रकर्षत्वात् पात्रे स्थापितत्वात् इत्यादेः भवति।

**अभ्यासः** - पुनः पुनः किमपि कार्यं करणम्, अधीतविषयं पुनः पुनः पठनम् इत्यादिं अभ्यासः इति कथ्यते। विषये अस्मिन् उक्तमस्ति यत् – भावाभ्यसनमभ्यासः शीलनं सततक्रिया चेत्यप्युच्यते।[6]

**चिकित्साव्यवस्थायां परादिगुणानां व्यवहारः**

परादिगुणानां व्यावहारिकोपयोगितां प्रकटयन् चक्रसहितायां उक्तं यत् - 'सिद्ध्युपायाश्चिकित्साया' एते परादिगुणाः चिकित्सासफलतायाः साधनानि सन्ति। अनेन चिकित्सायां सिद्धिः वा चिकित्सायां सफलतां प्राप्नुवन्ति इत्यर्थः। आयुर्वेदे एते परादिगुणाः उपायाः इति कथ्यते। अतः एते परादिगुणाः चिकित्साशास्त्रस्य मूलमूलाधारः अथवा चिकित्साव्यवस्थायां आवश्यकतत्त्वानि इति वक्तुं शक्यन्ते। चिकित्साकार्य्ये पर-अपर-गुणाः प्रथमविचारणीयबिन्दुरिति। मुख्यस्तु परः उच्यते। रोगे दोषदुष्यस्थानादीनां प्राधान्यं विचार्य मुख्यायाः वा प्रधानायाः वेदनायाः विचार्य्य औषधचयनं भवति। पराधारेण परद्रव्यं चयनं भवति। तथा चास्याधारेण पूर्वद्रव्याणामर्थात्प्रथमप्रयोगयोग्यपदार्थानां निश्चित्योपयोगः भवति, तस्मात् चिकित्साकार्य्ये सफलतां प्राप्यते।

युक्तिं विना चिकित्सा सफला न भवितुमर्हति। केवलं योजनायुक्तचिकित्सैव सफला भवति। चिकित्सायै दोषम् औषधं, देशं, कालं, आयुं, औषधमात्रां, औषधावधिमादिं विचार्य तान् सर्वान् योजनाबद्धरूपेण सम्बन्धितकरणं युक्तिरिति। चिकित्साकार्य्ये संख्याऽथवा गणनाऽप्यतीवमहत्त्वपूर्णाऽस्ति। रोगग्रस्तव्यक्तेः श्वसनवेगः, नाडीवेगः इत्यादयः संख्याव्यवहारः, लक्षणगणना, लक्षणद्वारा दोषाणां स्थितिः मूल्याङ्कनं, गुणानामाधारेण दोषाणामंशांशानुमानमित्यादयः संख्यानां व्यवहारः इति मन्यन्ते। यथा - वाते सप्तगुणेषु कति गुणाः वर्धिताः? इत्यादि। संयोगः तु पदार्थानां वा अन्यभावानां मेलनम्। द्रव्यसंयोगव्यवहारः प्रसिद्धरस्ति। दोषस्य ६२ विकल्पनादोषसंयोगस्य तथा च रसस्य ६३ विकल्पनारससंयोगस्य व्यावहारिकोदाहरणानि। अनेन प्रकारेण दोषाद्याधारेण

---

[1] चरकसंहितायाम् सूत्र. २६ /३३

[2] चरकसंहितायाम् सूत्र.२६ /३४

[3] संस्कार: करणं मतम्। चरकसंहितायाम् सूत्र. २६/३४

[4] चरकसंहितायाम् सूत्र. २६/३४

[5] चरकसंहितायाम् वि. १/ २१ (२)

[6] चरकसंहितायाम् सूत्र. २६/३४

औषधद्रव्याणामपि संयोजयति रोगिणः आरोग्यलाभाय। यत्तु औषधसंयोग इति कथ्यते। औषधमात्रायाः विभागः विभागगुणस्य व्यावहारिकरूपमस्ति। औषधानि इव आहारादयः अपि परिमाणात्मकरूपेण विभज्य प्रयुज्यन्ते। पृथक्त्वं इत्यस्यार्थः वियोगः। द्रव्यस्य शुद्धिरादिः द्रवितद्रव्यस्य छाननं पृथक्त्वस्य व्यावहारिकरूपमस्ति। पृथक्करणस्य व्यावहारिकः उपयोगः औषधयोगात् अनुपयोगीघटकस्य पृथक्करणम्। चिकित्साकार्य्ये औषधसंयोजनात् अनावश्यकं हानिकारकं वा घटकं पृथक् करणीयमिति तत्र ध्यानं दातव्यम्। तथा च केषुचित् संक्रमणरोगैः आक्रान्तरोगिणं सामान्यरोगिभिः सह स्थापनस्थाने पृथक्त्वेन स्थापयति। यदि अत्र पूर्णतया अवधानं न दीयते तर्हि चिकित्सा न सम्भवति। परिमाणं तु मापनं मानं वेति कथ्यते। अर्थात् एतेन माध्यमेन औषधद्रव्यमात्राप्रदानस्य निर्णयः केवलं रोगिणः बलादिः आधारेण। यत्तु चिकित्सायै अतीव महत्त्वपूर्णमस्ति। यतः परिमाणेन सम्यक् परिमाणेन वा गृहीतं औषधमेव लाभप्रदं भवति। अनुचितमात्रायां च औषधानां सेवनेन स्वास्थ्यस्य हानिः भवति। अतः औषधयोगे कस्य औषधस्य किं परिमाणं च प्रयुक्तं भविष्यति इति निर्धारणमतीव महत्त्वपूर्णमस्ति। परिमाणं मापनं कथ्यते। चिकित्सासफलतायै रोगिणः शारीरिकदशा, भारः, यकृत्-विस्तारः, पित्तविस्तारः इत्यादीनां ज्ञानं केवलं मापनद्वारा एव। संस्कारनामकपदार्थरपि चिकित्साशास्त्रे अतीव महत्त्वपूर्णं स्थानं धारयति। गुणे परिवर्तनप्रक्रिया संस्कारः इति कथ्यते। अथवा पदार्थे विशिष्टगुणस्थापनार्थं या विशिष्टा प्रक्रिया क्रियते सः संस्कार उच्यते। संस्कारः औषधीयद्रव्याणां विविधकल्पनायामिति। कञ्चित् रोगिणं उष्णजलस्य प्रयोगस्य निर्देशः, विविधपूरकस्य निर्देशः, सहपेयस्य निर्देशः, स्थानपरिवर्तनं, स्थितेः परिवर्तनं च संस्कारस्य व्यवहारिकरूपमस्ति। विहितौषधानां सम्यक् प्रयोगः लाभप्रदः भवति उपचारे। चिकित्सायां कतिपयानि औषधस्य वा आहार इत्यादीनां अभ्यासः कर्तव्यः भवति। यतो हि समानगुणयुक्तद्रव्याभ्यासेन वृद्धिः, विपरीतगुणयुक्तद्रव्याभ्यासेन च क्षयः भवति। सर्वेषां रसानाम् अभ्यासः श्रेयस्करम्। यदि सर्वे रसाः द्वौ चतुर्दिनानि यावत् सेविताः भवन्ति तर्हि तस्य पूर्णः लाभः न भविष्यति। एतदर्थं निरन्तरं सतत् इत्यस्य अभ्यासः करणीयः येन स्वास्थ्यं प्राप्तुं शक्यते।

## सहायकग्रन्थसूची


- महर्षिः चरकः."चरकसंहिता".चरकसंहिता प्रथमखण्डः. कोलकाता : योगेन्द्रनाथसेनः,१९२०. प्रकाशिता.
- महर्षिः चरकः."चरकसंहिता". अग्निवेश. वनारस-गायघाट : भार्गव पुस्तकालय.
- महर्षिः सुश्रुतः." सुश्रुतसंहिता".नारायणरामाचार्य. बम्वाई : दि नारायणसागरप्रेस्,१९४५. प्रकाशिता.
- पञ्चाननः,आचार्यः विश्वनाथः. "भाषापरिच्छेदः ; कारिकावली" . मुम्बई : लक्ष्मीवेंकटेश्वरप्रेस्,१९५०. प्रकाशिता.
- भास्करः, लौगाक्षिः. " अर्थसंग्रह ". तृतीयसंस्करणम्. कारीनाथ शास्त्री तथा वासुदेवलक्ष्मणशास्त्री. बोम्वाई : दि निर्णयसार प्रेस्,१९३०.
- आचार्यः प्रशस्तपादः. "प्रशस्तपादभाष्यम्". द्वितीयं संस्करणम्. पण्डित श्री दुर्गाधर झा शर्मा. वाराणसी-२२१००२ : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,१९९७.
- आचार्यः प्रशस्तपादः. "प्रशस्तपादभाष्यम्". द्वितीयं संस्करणम्. विन्धेश्वरी प्रसाद द्विवेदी. देहली-११०००७ : श्री सद्गुरु पाब्लिकेशन्,१९८४.
- आचार्यः प्रशस्तपादः. "प्रशस्तपादभाष्यम्". गोपिनाथकविराजः तथा ढुन्डिराजशास्त्री. वाराणसी : विद्या विलास प्रेस्,१९२४.
- भट्टः,वाग्. "अष्टाङ्गहृदयम्". षष्ठः संस्करणम्. प्रो. भिषकाचार्य हरिशास्त्री परद्कर वैद्यः. बोम्वाई : दि निर्णयसागर प्रेस्,१९३९.

# अद्वैतवेदान्ते शाब्दबोधः

अनिमेषरायः
शोधच्छात्रः, वेदान्तविभागः
श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालटी, केरलः

**मुख्यपदानि-** शाब्दज्ञानस्वरूपम्, अन्विताभिधानपक्षः, अभिहितान्वयपक्षः, विवरणवाद्याश्रितमतम्, भामतीकाराद्याश्रितमतम्, अद्वैतसिद्धिकारमतम्, शाब्दप्रमाणपर्यालोचनम्।

**प्रबन्धसारः-** भारतीयदार्शनपरम्परासु शाब्दबोधप्रक्रियाविषये प्रधानतया वादद्वयम् निरूपितम्। तत्र प्राभाकरादिमीमांसकानाम् अन्विताभिधानवादः, कुमारिलभट्टादिमीमांसकानां अभिहितान्ववादः इत्युच्यते। अन्विताभिधानं नाम यत्र पदैः पदार्थानां स्मरणं भवति, किञ्च स्मृतानां पदार्थाना संसर्गोपि पदैः एव अवगम्यते। अर्थात् पदानां स्वस्वार्थे एव केवलं शक्तिरिति न, अन्वयांशेऽपि शक्तिरस्ति। तेन च वाक्यार्थबोधं प्रति पदान्येव कारणभूतानि भवन्ति। अभिहितान्वयवादे तु पदानाम् अन्वयांशे शक्तिः कल्प्यते चेत् गौरवादिकं भवति इत्यतः पदार्थाः एव वाक्यार्थबोधं प्रति कारणभूताः । यतो हि, पदार्थानां यः परस्परसंसर्गः वाक्यार्थबोधे भासते तस्य संसर्गस्य भासकाः पदार्थाः एव भवन्ति। तस्मात् पदानां वाक्यार्थबोधं प्रति कारणत्वमेव नास्ति इत्युच्यते।

एतन्मतद्वयमपि अद्वैतवेदान्तदर्शने स्वीक्रियते। परन्तु सम्प्रदायभेदेन मतभेदोपि दृश्यते। विवरणवादिनां मतं आलोचयामश्चेत् अन्विताभिधानपक्ष एव समीचीनः इति तेषाम् अभिप्रायः। अनयोः वादयोः मध्ये को वादः युक्ततरः ग्रहणयोग्यश्च इत्यस्मिन् विषये विवरणसम्प्रदायानुसारिभिः तत्त्वशुद्धिकारैः श्रीज्ञानघनपादैः स्वग्रन्थे आदौ अभिहितानामेव अर्थानाम् अन्योन्यसम्बन्धबोधकत्वं प्रसज्यते वा ? उत पदानामेव अन्वितार्थाभिधायित्वम् इत्येवं संशयः निरूपितः। अनन्तरं पूर्वपक्षरूपेण अभिहितान्वयवादः उपास्थापितः। ततः अभिहितान्वयवादखण्डनसमनन्तरं अन्विताभिधानवादः स्वयुक्तिबलेन सिद्धान्तपक्षरूपेण प्रतिपादितः।

परन्तु अद्वैतवेदान्तस्य अन्यसम्प्रदायेषु आचार्यैः अभिहितान्वय वाद एव अनुसारितः दृश्यते। यथा भामत्यां वाचस्पतिमिश्रैः "तत्तु समन्वयात्" इति ब्रह्मसूत्रव्याख्यानावसरे अन्विताभिधानं खण्डयित्वा अभिहितान्वयवादः सूचितः। चित्सुखाचार्येण अपि तत्त्वप्रदीपिकाख्ये ग्रन्थे वाचस्पतिमतम् अनुसरता अभिहितान्वयवाद एव अनुसृतः। परन्तु अद्वैतसिद्धिकारस्तु द्वितीयपरिच्छेदे वादद्वयमपि अस्माकम् अनुकूलम् भवति अखण्डार्थनिर्णये इति निरूपयति । एवं प्रकारेण पर्यालोच्यमाने सति कुत्रचित् ग्रन्थेषु अभिहितान्वयवादे दोषान् उत्थाप्य अन्विताभिधानवादं प्रतिपादयति। कुत्रचित् अन्विताभिधानवादे दोषान् उत्थाप्य अभिहितान्वयवादं प्रतिपादयति। कुत्रचित् तु उभयमेव समीचीनम् इत्युक्तं दृश्यते। अतः दोषादिपरिहारेण वादद्वयम् अपि ग्रहणयोग्यम् इति वक्तुं शक्यते।

**उपोद्घातः -** कस्माच्चित् वाक्यात् यदा शाब्दबोधो जायते तत्कथं जायते ? वाक्यस्य तात्पर्यं कथम् आलोचनीयम् ? वाक्यघटकानां पदानां कुत्र कुत्र शक्तिः कल्पनीया? पदार्थबोधापेक्षया कोऽयं वाक्यार्थबोधः ? वाक्यतात्पर्ये निर्णीते तादृशतात्पर्यार्थप्रतीत्यनुसारं पदार्थानां परस्परान्वयः कथं कल्पनीयः ? इति नैके संशयाः यदा उपस्थिताः तदा एतेषां प्रश्नानां समाधानार्थम् अस्माकं पण्डिताः गम्भीरान् विचारान् कुर्वन्त्येव। एवं प्रायेण नैयायिकाः वदन्ति,- अन्वयांशः यः शाब्दबोधे भासते तस्मिन् अन्वयांशे कस्यापि शक्तिः नापेक्ष्यते। किन्तु पदानां सह समभिव्याहारमात्रेण स्वयमेव सः सम्बन्धः भासते इति। मीमांसकास्तु वदन्ति, तत्र काचन वृत्तिः अपेक्ष्यते।वृत्तिं विना अन्वयांशः शाब्दबोधे भासितुं नार्हति। तत्र प्राभाकराः भाट्टाश्च इति द्विविधाः मीमांसकाः सन्ति। भाट्टमीमांसकानाम् अभिमतः पक्षः अभिहितान्वयवादः, प्राभाकराणाम् अभिमतः पक्षः अन्विताभिधानवादः। अद्वैतवेदान्ते उभयोरपि वादयोः विचारसहत्वम् अङ्गीक्रियते। परन्तु सम्प्रदायभेदेन मतभेदः दृश्यते। यद्यपि उभयोरपि वादयोः अद्वैतवेदान्ते अखण्डार्थनिर्णये ग्रहणयोग्यत्वं विद्यते तथापि वेदान्तग्रन्थेषु एकस्य अङ्गीकारे सति अपरस्य खण्डनं तु विहितमेव। अयमेव विषयः अत्र विशिष्टतया निरूपयितुं प्रयत्नः विधीयते।

**शाब्दज्ञानस्वरूपम् -** किं नाम शाब्दज्ञानम् इति विवक्षायां इदं वक्तुं शक्यते यत्, शब्दप्रमाणात् जायमानं ज्ञानमेव शाब्दज्ञानम्। यथा

अयं माम् एवं बोधयति, ज्ञापयति, नियोजयति, कल्पयति इत्याकारकं ज्ञानं साधारणतया शाब्दज्ञानं भवति। व्यावहारदशायां तत्र यदा वाक्यानि उच्चारयामः तदा तस्य किम् उद्देश्यम् अस्ति इति चेत् , यं प्रति वाक्यं प्रयुज्यते सः वाक्यार्थम् अवगच्छेत् इति वाक्यरचयितृणाम् आशयः भवति। वाक्यानि न पदार्थज्ञानार्थम् उच्चार्यन्ते अपि तु अज्ञातस्य वाक्यार्थस्य अवगमार्थमेव। तदेव तत्र उद्देश्यम् अस्ति। यथा वाक्यस्थले "बालकः विद्यालयं गच्छति" इत्यत्र गमनक्रियायाः बालकस्य च यः सम्बन्धः प्रतीयते तत्र कोऽपि अनुपपत्तिः अनुमानं वा न भवति। भवति चेत् प्रश्न एव न भवेत् सः कुत्र गच्छतीति। तस्मात् शाब्दज्ञानस्य एतत् सामर्थ्यम् अस्ति यत् उपस्थितयोः पदार्थयोः सम्बन्धविशेषं बोधयतीति।

अद्वैतवेदान्ते तु प्रमाणभूतं वाक्यं किमिति विवक्षायां, परस्मिन् ब्रह्मणि लब्धतात्पर्याणि वाक्यानि एव प्रामाणिकानि। यथा " सत्यं ज्ञानमनन्तं ब्रह्म"[1] इत्यादि शब्दप्रमाणात् ब्रह्मस्वरूपविषये बोधः जायते। तथा च " तत्त्वमसि"[2], "अहं ब्रह्मास्मि"[3] इत्यादि शब्दप्रमाणात् एव अखण्डार्थबोधः ततः ब्रह्मसाक्षात्कारो भवति। तदर्थं षड्विधतात्पर्यलिङ्गान्यपि उक्तानि, "उपक्रमोपसंहारौ अभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये"[4] इति । अनेकावान्तरवाक्यनिचयात्मके एकार्थप्रधानके सन्दर्भे बहूनामर्थानां प्रतीयमानत्वात् कस्मिन्नर्थे तात्पर्यविषयत्वं प्राधान्येन वर्तते इत्येतन्निर्णयाय इमानि तात्पर्यलिङ्गानि उपयुज्यन्ते। तस्मात् शब्दप्रमाणं शाब्दबोधप्रक्रिया तज्जन्यज्ञानं च अद्वैतशास्त्रे अतीवमहत्स्थानं अलंकरोति।

**शाब्दबोधे द्विविधा प्रक्रिया -** शब्दस्य बोधे प्रधानतया द्विविधा प्रक्रिया प्रसिद्धा वर्तते। तत्र प्राभाकरमीमांसकाः अन्विताभिधानवादं रोचयन्ते। भाट्टमीमांसकास्तु अभिहितान्वयवादं रोचयन्ते इति सर्वैः ज्ञायते एव। उभयो वादयो मध्ये किं समानम् इति चेत्,आदौ वाक्यश्रवनम्, ततः पदज्ञानं, पदज्ञानानन्तरं पदार्थज्ञानं, पदार्थज्ञानानन्तरं वाक्यार्थबोधः। अत्र पदपदार्थयोः ज्ञानं साधनं वाक्यार्थबोधश्च उद्देश्यं भवति। अन्यत् सर्वं तु तत्साधनतया उपयोक्तव्यम्। पदज्ञानमात्रं पदार्थज्ञानमात्रं वा न वाक्यार्थबोधं जनयितुं शक्नोति। एवञ्च पदपदार्थयोः ज्ञानानन्तरं आकांक्षायोग्यतासन्निधयश्च अपेक्ष्यते। एतत् त्रितयम् अस्ति चेत् तदा एव वाक्यार्थबोधः सम्भवति इति उभयमतसाधारणी प्रक्रिया वर्तते। अस्मिन् प्रसङ्गे अभिहितान्वयवादिभिः आकांक्षाद्यनन्तरं तात्पर्यवृत्तिः स्वीकृता भवति। अर्थात् तात्पर्यार्थ एव वाक्यार्थः। अन्विताभिधानवादिनां मते वाच्य एव वाक्यार्थः इति उच्यते।

एवञ्च कुत्र तर्हि अनयोः वादयोः भेदः इति चेत्,वाक्यार्थबोधस्य हेतौ। वाक्यार्थबोधस्य कृते असाधारणकारणत्वेन किं स्वीकरणीयम् इति जिज्ञासायाम् अभिहितान्वयवादिनः वदन्ति वाक्यार्थज्ञानस्य अव्यवहितपूर्वं पदार्थज्ञानमेव तिष्ठति। अतः पदार्थज्ञानमेव शाब्दबोधे कारणम्। पदज्ञानं तु पदार्थोपस्थित्यर्थम् एव अपेक्ष्यते।

अन्विताभिधानवादिनः अस्मिन् प्रसङ्गे वदन्ति, यत्र पदैः पदार्थानां स्मरणं भवति, किञ्च स्मृतानां पदार्थाना संसर्गोपि पदैः एव अवगम्यते। अर्थात् पदानां स्वस्वार्थे एव केवलं शक्तिरिति न, अन्वयांशेऽपि शक्तिरस्ति। तेन च वाक्यार्थबोधं प्रति पदान्येव कारणभूतानि भवन्ति।

एवं प्रकारेण उभयोः वादयोः कुत्रचित् सादृश्यं कुत्रचित् वैसादृश्यञ्च अवलोकयितुं शक्यते अस्माभिः।

**अद्वैतवेदान्ते शाब्दबोधप्रक्रिया -** अद्वैतवेदान्ते तत्त्वमस्यादिवाक्यार्थविचारकाले भाट्टमीमांसकानां मतमेव प्रायेण अङ्गीकृतं दृश्यते। भामतीकारादिभिः कैश्चित् आचार्यैः अन्विताभिधानवादे दोषाः अपि उद्भाविताः। परन्तु अन्विताभिधानवादस्य ग्रहणं न दोषाय अपि तु अभिहितान्वयवादग्रहणे एव महद्गौरवम् इति विवराणसम्प्रदायानुसारिणां मतम्। अधुना अत्र विवरणवादिनां मतम् संक्षेपेण उपस्थाप्यते,-

**विवरणवादिनां मतम् -** अनयोर्वादयोर्मध्ये को वादो युक्ततरः ग्रहणयोग्यश्च इत्यस्मिन् विषये विवरणसम्प्रदायानुसारिभिः

---

[1] तै.उ. २/१/१

[2] छा.उ. ६/८/७

[3] बृ.उ. १/४/१०

[4] वेदान्तसारः, पृ-१२४

तत्त्वशुद्धिकारैः श्रीज्ञानघनाचार्यैः स्वग्रन्थे संशयपूर्वपक्षनिराकरणपुरस्सरं सिद्धान्तपक्षः उपस्थापितः दृश्यते।

तत्रग्रन्थकारैः आदौ संशयः निरूपितः यत्, अभिहितानामेव अर्थानाम् अन्योन्यसम्बन्धबोधकत्वं प्रसज्यते वा ? उत पदानामेव अन्विततार्थाभिधायित्वम् इति[1] । तत्र आदौ पूर्वपक्षः, -

**पूर्वपक्षः -** "देवदत्त शुक्लां दण्डेन गामानय" इत्यादिशब्दश्रवणसमनन्तरं प्रतिपत्तुः प्रवृत्तिलिङ्गेन आदौ बालस्य अविशेषेण वाक्यार्थे सामर्थ्यं प्रतिपद्यते। तदनन्तरं "गां चारय तुरगमानय" इत्यादिप्रयोगान्तरेषु गोपदोद्धारेण सास्नादिमदर्थमात्रस्य उद्धारदर्शनात्, तुरगपदप्रक्षेपे च केसरादिमदर्थमात्रप्रक्षेपदर्शनात् गवादिपदानां गवादिस्वरूपमात्रे एव सामर्थ्यम् अस्ति इति तेन बालकेन अवगम्यते। तर्हि शब्दश्रवणादनन्तरमेव पदार्थयोः मध्ये सम्बन्धबुद्धिः कथं जायते इति चेत् उच्यते, - पदाभिहितपदार्थानामेव संसर्गबुद्धिहेतुत्त्वम् , पदानां पदार्थस्वरूपमात्रप्रतिपादनविज्ञानस्य उपक्षीणशक्तित्वात् सम्बन्धविषयस्य प्रमाणान्तरेण अनवगमाच्च।

एवञ्च पदानां तावत् पदार्थस्वरूपस्मृतिजननसामर्थ्यं पुनः तेषाम् अन्विततार्थाभिधानसामर्थ्यञ्च इति कृत्वा अन्विताभिधानवादे अनेकशक्तिकल्पनाश्रयः दृश्यते। नायं दोषः अभिहितान्वयवादे प्रसज्यते। अपि च पदार्थानां मध्ये यत् सम्बन्धवोधनसामर्थ्यं विद्यते तद् प्रथमतया अभिहितान्वयवादे एव न परिकल्प्यते। उक्तं हि, श्लोकवार्तिके वाक्याधिकरणे

"पश्यतः श्वेतमारूपं हेषाशब्दञ्च शृण्वतः।
खुरनिष्पेषशब्दञ्च श्वेतोऽश्वो धावतीति धीः।।"[2]

"अश्वः श्वेतो धावति" इत्यत्र वाक्यप्रयोगस्थले ये पदार्थाः पदैः उपस्थापिताः भवन्ति, ते पदार्थाः अत्र पदं विना एव उपस्थिताः सन्ति। तेन पदज्ञानं विनैव अश्वः श्वेतो धावतीति बोधः जायते। अयं बोधः कस्मात् कारणात् निष्पन्नः इति चेत् उच्यते,- अत्र आकाङ्क्षायोग्यतासन्निधिविशिष्टपदार्थोपस्थितिः विद्यते। शाब्दबोधस्य या सामग्री सा अत्र सम्पन्ना इत्यतः अश्वः श्वेतो धावतीति धीः शाब्दबोधात्मकी इति निर्णयः। अतः आकाङ्क्षायोग्यतासन्निधिविशिष्टानां पदार्थानाम् अर्थाधिगतं अन्योन्यसंसर्गबोधनसामर्थ्यम् अन्यत्र दृष्टमेव आश्रीयते। अतः अभिहितान्वयवादे तु पदानां पदार्थाभिधानसामर्थ्यम् इति एका एव कल्पना अनुसृता। तस्मात् अभिहितानामेव अर्थानाम् अन्योन्यसम्बन्धबोधकत्वम् इति निश्चयः।

**सिद्धान्तपक्षः -** सिद्धान्तिभिः उच्यते, - पदानामेव संसृष्टार्थाभिधानसामर्थ्यम् आश्रयणीयम्। कुतः इति चेत्, अन्यान्वितगवादिस्वरूपे गवादिपदानां सङ्गतिदर्शनात्। अर्थात् "गामानय दण्डेन" इत्यत्र शब्दश्रवणसमनन्तरभाविप्रवृत्तिलिङ्गेन आदौ शब्दानाम् अर्थेषु सामर्थ्यं प्रतिपद्यते। पुनः प्रयोगान्तरेषु पदोद्धारे इतरपदार्थान्वयेन सार्धमेव उद्धारात् पदान्तरप्रक्षेपे च अन्यान्वितस्यैव तदर्थस्य प्रक्षेपः दृश्यते। तस्मात् पदानाम् व्युत्पत्त्या (शक्त्या) एव अन्योन्यान्वितस्वार्थे सामर्थ्यं प्रतिपद्यते। एवं अन्वितपदार्थविज्ञानेन शब्दस्य अन्वयव्यतिरेकवत्वे सति, पुनः अनन्वितगवादिस्वरूपमात्रे शब्दशक्तिकल्पना न प्रमाणप्रयोजनवती भवतीति। अतः अभिहितान्वयपक्षे एव अनेकशक्तिकल्पनाश्रयात् गौरवम्।

पुनश्च आकाङ्क्षासिन्निधियोग्यताविशिष्टार्थगतसम्बन्धप्रतिपादनसामर्थ्यम् इति दृष्टमेव आश्रीयते न अपूर्वतया कल्प्यते इत्येतदयुक्तमेव। यतो हि, "अश्वः श्वेतो धावति" इत्यादिस्थले संसर्गयोग्यार्थलिङ्गेन संसर्गानुमानमेव क्रीयते। तथा च अनुमानस्वरूपम् एवम् उच्यते, - "विगीतः श्वेतपदार्थः क्षिप्रगामी तुरगो भवितुम् अर्हति खुरनिष्पेषहेषाशब्दवत्वात् सम्प्रतिपन्नतुरगवदिति। अत्र तु पदार्थानाम् सम्बन्धानुमानमेव प्रतिपाद्यते। परन्तु सप्तमप्रमाणाभावात् न पदार्थानाम् अन्यत्किञ्चित् प्रमाणान्तरं विद्यते। अतः अभिहितान्वयवादे गुरुतरशक्तिकल्पना आश्रीयते एव। अन्विताभिधानवादे तु पदानां पदार्थस्वरूपस्मारकत्वं अन्विततार्थाभिधानव्यापारनान्तरीयकं न पृथग्रूपेण शक्तेः कल्पना इति। तस्मात् अन्विताभिधानवादे पदानामेव संसृष्टार्थप्रतिपादनसामर्थ्यम् इति एक एव कल्पनाश्रयः।

एवं प्रकारेण तत्त्वशुद्धौ श्रीज्ञानघनपादानां मतम् आलोचयामश्चेत् अन्विताभिधान पक्ष एव समीचीनम् इति तेषाम् अभिप्रायः

[1] तत्वशुद्धिः,पृ-४७

[2] श्लोकवार्तिकः, ११४८, श्लोक.संख्या- ३५८

अवगम्यते। परन्तु अद्वैतवेदान्तस्य भामत्यादिसम्प्रदायेषु आचार्याणां मतम् आलोचयामश्चेत् अभिहितान्वयवादे एव अधिका रुचिः दरिदृश्यते।

अद्वैतसिद्धिकारस्तु द्वितीयपरिच्छेदे वादद्वयमपि अस्माकम् अनुकूलम् भवति अखण्डार्थनिर्णये इति निरूपयति। तत्र उच्यते , जहदजहल्लक्षणापक्षे एव वादद्वयोः आश्रयनं सम्भवति। अस्मिन् प्रसङ्गे, तत्रैव अद्वैतसिद्धिकारः संक्षेपशारीरकोक्तश्लोकं वर्णयति, "अभिहितघतना यदा तदानीं स्मृतिसमबुद्धियुगं पदे विधत्तः। परदृशि पुनरन्विताभिधानवादे पदयुगलात् स्मृतियुग्ममेव पूर्वम्।।"[1] इति। अर्थात् अभिहितान्वयपक्षे तत्त्वमिति पदद्वयं स्मृतिसदृशं स्वस्वपदार्थज्ञानम् उत्पादयति। अन्यत्र अन्विताभिधानपक्षे तु पदयुगलात् शाब्दबोधरूपकार्यात्पूर्वं ब्रह्मविषयकस्मृतिज्ञानम् उत्पद्यते।

चित्सुखाचार्येण अपि तत्त्वप्रदीपिकाख्ये ग्रन्थे वाचस्पतिमतम् अनुसरता अभिहितान्वयवाद एव अनुसृतः। तत्र अन्विताभिधानवादे कथं दोषाः प्रदर्शिताः इति चेत् उच्यते, अन्विताभिधानपक्षे पदानाम् इतरान्वितस्वार्थाभिधानशक्तिरिति न एकशक्तिकल्पना। अपि तु पदे अर्थान्तरबोधनशक्तिः, अन्वयबोधनशक्तिः, स्वार्थबोधनशक्तिश्चेति तिसृणां शक्तीनां कल्पना भवत्येव। यद्यत्र एवमुच्यते, यथा नित्यत्वे सति अनेकसमवेतरूपजातिवाचकमपि पदं न अनेकात्मकव्यक्तीनां तदन्वयस्य समवायस्य वा वाचकं भवति, तथैव अन्यान्वितस्वार्थवाचकमपि पदं स्वार्थमात्रमेव प्रतिपादयति। तस्मात् न शक्तित्रयकल्पना इति चेत् तत्र इदं वक्तव्यं, किं व्यक्तेः इव अर्थान्तरान्वयोपलक्षितं स्वार्थबोधकत्वं पदानाम् मन्यते, उत अर्थान्तरान्वयविशिष्टस्वार्थबोधकत्वम् इति। तत्र आद्यपक्षे स्वीकृते सति पदानाम् अन्विताभिधानभङ्गप्रसङ्गात्, द्वितीयपक्षे स्वीकृते सति पुनः शक्तित्रयकल्पनायाः अवश्यम्भावितत्वात् अन्विताभिधानपक्षेऽपि गौरवम्। एवं प्रकारेण तत्त्वप्रदीपिकाकारैः अन्ततो गत्वा अभिहितान्वयवादः समीचीनः इति निश्चीयते।

**उपसंहारः -** एवं पर्यालोच्यमाने सति इदमवगन्तुं शक्यते यत्, कुत्रचित् ग्रन्थेषु अभिहितान्वयवादे दोषान् उत्थाप्य अन्विताभिधानवादं प्रतिपादयति। कुत्रचित् अन्विताभिधानवादे दोषान् उत्थाप्य अभिहितान्वयवादं प्रतिपादयति। कुत्रचित् तु उभयस्यापि ग्रहणम् अनुकूलम् इत्युक्तं दृश्यते। अतः दोषादिपरिहारेण वादद्वयम् अपि ग्रहणयोग्यम् भवितुम् अर्हति । अत्र उभावपि सिद्धान्तौ शास्त्रीयौ भवतः। खण्डनमण्डनादिकं सर्वेषु दर्शनेषु परस्परं भवत्येव। यतो हि, तत्तच्छास्त्रप्रतिपाद्यः यः पदार्थः तं पदार्थम् अन्येनसिद्धान्तेन आलोचयित्वा स्वसिद्धान्तानुसारं लेखनं न सम्भवति। तस्मात् सर्वेषामेव शास्त्राणां कश्चन सिद्धान्तः वर्तते, तत् सिद्धान्तमधिकृत्य शाब्दबोधविचारः क्रीयते चेत् अवश्यम् एकपक्षस्य खण्डनं भवत्येव। एवं भिन्नानि मतानि सन्ति चेदपि लक्ष्यं तु एकमेव। तत्र सर्वेषां वेदान्तवाक्यानां निर्गुणे निर्विशेषे ब्रह्मणि एव तात्पर्यावधारणम् इति। एवञ्च कथं वेदान्तवाक्यानां निर्गुणे निर्विशेषे ब्रह्मणि प्रमाणत्वम् इति चेत् , मुख्यगौण्यभावे लक्षणया एव। यतो हि, संसर्गावगाहिज्ञानाजनकानि वेदान्तवाक्यानि असन्दिग्धमविपर्यस्तं निर्विकल्पं ज्ञानमेव उत्पादयन्ति इति शम्।

**सन्दर्भग्रन्थाः -**


१) ज्ञानघनः। तत्वशुद्धि। शे.सु. सूर्यनारायणशास्त्री & ए.प. राधाकृष्ण । चैन्नपुरीविश्वविद्यालयः, १९४१ ।

२) न.स. रामानुजः । शाब्दबोधमीमांसा । राष्ट्रीयसंस्कृतसंस्थानम् । नयादिल्ली,२००५ ।

३) ड.गजाननशास्त्री । तत्त्वप्रदीपिका । काशीसंस्कृतग्रन्थमाला । चौखम्बाविद्याभवनम्,वाराणसी ।

४) श्रीमधुसूदनसरस्वतीः । न्यायामृताद्वैतसिद्धिः । स्वामीयोगीन्द्रानन्द । उदासीनसंस्कृतविद्यालयः, वाराणसी,१९७७ ।

५) श्रीसदानन्दः । वेदान्तसारः । ड.आद्याप्रसादः । अक्षयवटप्रकाशनम्, इलाहाबाद् -१८८८ ।


**अन्तर्जालस्रोतः –**


१) अद्वैतशारदा । दक्षिणाम्नाय श्री शारदापीठम्, https://advaitasharada.sringeri.net


[1] अद्वौतसिद्धिः, ८३८

# उपनिषत्सु शिक्षण-अधिगमपद्धतिनां विश्लेषणम्

तानिया पाइन्, शोधच्छात्रा
संस्कृतविभागः, असम विश्वविद्यालयः, शिलचर
Contact Number: 8327372344
Mail ID - taniapyne02@gmail.com

**संक्षिप्तसारः** – वैदिककाले गुरुशिष्यपरम्परायां श्रवणमाध्यमेन अध्ययन-अध्यापनप्रक्रिया प्रचलति स्म। वैदिककालात् परं उपनिषदां समयेऽपि श्रुतिपरम्परायाम् आचार्याः शिष्यान् उपदिष्टवन्तः। उप-नि पूर्वकं सद्-धातोः क्विप् प्रत्ययेन उपनिषद् पदमिदं निष्पन्नम्। सामग्रिकार्थः, गुरोः समीपे अवस्थानपूर्वकम् ऐकात्म्यनिश्चयेन अध्ययनम्। सर्वासु उपनिषत्सु मुख्यतः शिष्यान् प्रति गुरोः उपदेशेनैव शिक्षणप्रक्रियायाः उल्लेखः प्राप्यते। अस्यां गुरुशिष्यपरम्परायां प्रश्नोत्तरमाध्यमेन (Questioning and Answering) शिक्षण-अधिगमप्रक्रियायाः बहुप्रचलनमासीत्। केनोपनिषदि आदौ शिष्याः गुरून् प्रति प्रश्नान् पृच्छन्ति, तदनन्तरम् आचार्याः ब्रह्मस्वरूपम् उपदिशन्ति। गुरुणा अत्र उमा-हैमवती उपाख्यानस्य दृष्टान्तं प्रदत्तम्। उपनिषदां काले दृष्टान्तोपस्थापनपूर्वकं शिक्षणं (Giving Example) तु प्रसिद्धं जातम्। प्रश्नोपनिषदि अपि षड्शिष्याः पिप्पलाद ऋषीन् प्रति प्रश्नान् पृच्छन्ति, ऋषिः सम्यगालोचनापूर्वकं उत्तरप्रदानं करोति। कठोपनिषदि नचिकेतसा जिज्ञासितः सन् यमः उपमाप्रदानेन (Providing Analogy or Metaphor) आत्मस्वरूपम् उपदिशति। अन्यासु उपनिषत्स्वपि बहुस्थलेषु उपमायाः प्रयोगेन तथ्यमुपस्थापितमस्ति। तैत्तिरीयोपनिषदि दृश्यते, भृगुः वरुणेन आदिष्टः सन् वारम्वारं तपः कृत्वा ब्रह्मज्ञानलाभं करोति। स्वहस्तेन प्रयोगमाध्यमेनैव (Experimenting) शिक्षणअधिगमक्रिया प्रसिद्धाऽभवत्। छान्दोग्योपनिषदि न्यग्रोधफलस्य वीजात् वृक्षस्योत्पत्तेरुदाहरणं, अपि च जलमध्ये लवणस्य दृष्टान्तः तु प्रायोगिकः। बृहदारण्यकोपनिषदि श्रवण-मनन-निदिध्यासनेन (Listening, Contemplation, Meditation) ज्ञानप्राप्तेः प्रसिद्धम् उदाहरणं लभ्यते। अनेनैव उपनिषत्सु शिक्षण-अधिगमविधेः बहवः उपायाः प्रकाराः वा समुपलभ्यन्ते। तस्य प्रभावः वर्तमानसमये शिक्षाक्षेत्रे आवश्यकः वर्तते।

**कूटशब्दाः-** गुरुशिष्यपरम्परा, उपनिषत्, प्रश्नोत्तरः, दृष्टान्तः, केनोपनिषद्, प्रश्नोपनिषद्, तैत्तिरीयोपनिषद्, छान्दोग्योपनिषद्, बृहदारण्यकोपनिषद्।

**भूमिका :-**सुप्राचीनकालादेव शिक्षाक्षेत्रे भारतवर्षः अग्रणी आसीत्। वेदेषु, उपनिषत्सु, पुराणेषु ऐतिह्यवाहीशिक्षायाः बहूनि उदाहरणानि उपलभ्यन्ते। वैदिककाले गुरुशिष्यपरम्परायां श्रवणमाध्यमेन अध्ययन-अध्यापनपद्धतिः प्रचलिता आसीत्। वैदिककालात् परं उपनिषदां समयेऽपि श्रुतिपरम्परायां शिक्षण-अधिगमप्रक्रियायाः प्रचलनम् दृश्यते। उपनिषद्-शब्दस्य व्युत्पत्तिः क्रियते, उप-नि पूर्वकं सद्-धातोः क्विप् प्रत्ययेन शब्दोऽयं निष्पद्यते। उप-शब्देन सत्वरं सामीप्यं वा बुध्यते, नि-शब्दः निश्चयार्थकः निःशेषार्थकः वा, सद्-धातोः अर्थः विशरणं शिथिलीकरणं वा, गतिः प्राप्तिर्वा, अवसादनं विनाशः वा। उपनिषद्-शब्दस्य धातुगतः अर्थः, ऐकात्म्यनिश्चयेन या विद्या सत्वरं निःसंशयेन आत्मसमीपे नयति, अथवा यस्याः विद्यायाः अनुशीलनेन संसारबन्धनं शिथिलं विनाशं वा जातम्, सा विद्या उपनिषद्। गुरोः समीपे उषित्वा शिष्याः इयं विद्या उपदिष्टा। अतः, उपनिषद्-शब्दस्य अपरार्थः, विनीतरूपेण शिष्येण गुरुसमीपे अवस्थानम्। Paul Deussen महाभागेनापि अस्मिन् विषये सममतं प्रदर्शितम्, **'Confidential Secret sitting'.**[1] अस्यां गुरुशिष्यपरम्परायां शिक्षण-अधिगमविधेः बहुप्रकाराः प्राप्यन्ते। यथा, केनोपनिषदि, प्रश्नोपनिषदि च प्रश्नोत्तरमाध्यमेन आचार्याः शिष्यान् उपदिष्टवन्तः। अनेनैव बहुसु उपनिषत्सु प्रश्न-प्रतिवचनमाध्यमेन शिक्षणप्रक्रियायाः प्रचलनं दृश्यते। गुरुः शिक्षणसमये दृष्टान्तप्रदानपूर्वकमपि उपदेशदानं कृतवन्तः। अनेनैव उपमामाध्यमेन, आलोचनामाध्यमेन, प्रायोगिकरूपेणापि शिक्षण-अधिगमप्रक्रिया प्रचलिता आसीत्। शिष्याणां सम्यगवबोधनार्थं गुरुः श्रवण-मनन-निदिध्यासनेन, विस्तृतव्याख्याप्रदानेन, वितर्कमाध्यमेन च उपदेशप्रदानमकरोत्। विविधासु उपनिषत्सु अस्याः शिक्षणप्रक्रियायाः विविधाः उपायाः उपलभ्यन्ते। पत्रेऽस्मिन् मुख्योपनिषत्सु शिक्षण-अधिगमविधेः विविधप्रकारविषये आलोचयिष्यते।

[1] Deussen, paul, The philosophy of The Upanishads, p.13

**उपनिषत्सु शिक्षण-अधिगमविधेः प्रकाराः -** प्रश्नोत्तरमाध्यमः (Questioning and Answering Method)-

शिक्षार्थी-शिक्षकयोः मध्ये प्रश्नोत्तरमाध्यमः अध्ययन-अध्यापनक्षेत्रे महत्वपूर्णां भूमिकां निर्वहति। केनोपनिषदि आदौ शिष्यः पृच्छति, **'केनेषितं पतति प्रेषितं मनः, केन प्राणः प्रथमः प्रैति युक्तः....'**[1] । प्रश्नस्यास्य उत्तरे गुरुणा **'श्रोत्रस्य श्रोत्रं मनसो मनो यद्....'**[2] इत्यादिः उपदिश्यते। अनेन प्रकारेण गुरुः ब्रह्मस्वरूपं प्रकाशयति। **'तदेव ब्रह्म त्वं बिद्धि नेदं यदिदमुपासते।'**[3] केनोपनिषदः भाष्यभूमिकायां शंकराचार्येण कथितम्, **'शिष्याचार्यप्रश्नप्रतिवचनरूपेण कथनं तु सूक्ष्मवस्तुविषयत्वात् सुखप्रतिपत्तिकारणं भवति।'**

कठोपनिषदि नचिकेतसा जिज्ञासितः सन् यमः आत्मस्वरूपविषये परलोकतत्वविषये च उपदिष्टवन्तः। प्रश्नोपनिषदि षड्शिष्याः पिप्पलादऋषीन् प्रश्नान् पृच्छन्ति, ऋषिः सम्यक्तया उत्तरप्रदानं करोति। प्रश्नोपनिषदः षड्संख्यके प्रश्ने शिष्याः षड्प्रश्नाः पृष्टवन्तः। प्रश्नोपनिषदः प्रथमप्रश्ने कवन्धी प्रजासृष्टिविषये प्रश्नान् कृतवान्। द्वितीयप्रश्ने भार्गवः प्राणदेवतायाः संख्याविषये श्रेष्ठत्वविषये च प्रश्नान् कृतवान्। तृतीयप्रश्ने कौशल्यः प्राणस्योत्पत्तिस्थितिप्रसङ्गे, चतुर्थप्रश्ने गार्ग्यः जाग्रत् स्वप्नादिविषये, पञ्चमप्रश्ने सत्यकामः ओङ्कारस्य ध्यानम्, तस्य फलविषये च प्रश्नान् कृतवन्तः। षष्ठप्रश्ने भारद्वाजः षोडशकलाविशिष्टपुरुषविषयकप्रश्नान् पृष्टवान्। पिप्पलाद ऋषिः विस्तृतेन तेषां प्रश्नानां उत्तरं दत्तवान्।

मुण्डकोपनिषदि अपि प्रश्नप्रतिवचनच्छलेन परतत्वः निर्णीतोऽस्ति। तत्र प्रश्नकर्ता शौनकः, उत्तरदाता तु अङ्गिरा। शौनकः अङ्गिरसः समीपे उपस्थितः सन् अपृच्छत्, **'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति।'**[4] तदुत्तरे ऋषिः अङ्गिरा पराविद्या-अपराविद्यायाः विषये उपदिष्टवान्। श्रीमद्भगवद्गीतायामपि अर्जुनस्य मनसि संशये जाते भगवान् श्रीकृष्णः उपदेशमाध्यमेन तस्य संशयं दूरीकृतवान्।

अतः दृश्यते, प्रथमे शिष्याणां मनसि प्रश्नः जायते, संशयो उत्पद्यते, तत्परं उत्तरस्य अनुसन्धानं क्रियते, गुरोः उपदेशेन ब्रह्मस्वरूपं प्रकाशितं भवति। संशयं, प्रश्नाः, जिज्ञासा च शिक्षायां महतीं भूमिकां निर्वहन्ति।

दृष्टान्तोपस्थापनम् (Giving Example)- उपमाद्वारा अध्यापनस्य एषा पद्धतिः उपनिषदीये शिक्षाशास्त्रे अतीव गुरुत्वपूर्णम् अस्ति। गुरुः शिष्यान् दृष्टान्तप्रदानपूर्वकं ब्रह्मतत्वम् उपदिष्टवन्तः। यतो हि दृष्टान्तेनैव कोऽपि विषयः सम्यक्तया बुध्यते, अतः प्राचीनऋषयः अपि ब्रह्मविद्यायाः उपदेशकाले बहूनां दृष्टान्तानामुपस्थापनं चक्रुः। कठोपनिषदि आत्मतत्वोपदेशकाले यमेन कथितम्, दुर्गमस्थले वर्षितं जलं यथा निम्नस्थानेषु विक्षिप्तं भवति, तथैव प्रत्यगात्मानं प्रतिशरीरे पृथक् पश्यन् आत्मानमेव अनुसरति अर्थात् भिन्नः देहप्राप्तिर्भवति।[5]

मुण्डकोपनिषदि जगत्सृष्टेः प्रसङ्गे ऊर्णनाभस्य दृष्टान्तं प्रदर्श्यते। ऊर्णनाभः यथा स्वशरीरात् तन्तून् विसृज्य पुनः गृह्णाति, यथा पृथिव्याम् ओषधयः जायन्ते, यथा सतः पुरुषात् केशलोमानि उत्पद्यन्ते, तथैव अक्षरात् अविनाशिब्रह्मनः जगत् उत्पद्यते।[6] प्रश्नोपनिषदि द्वितीयप्रश्ने प्राणदेवतायाः माहात्म्यकथनसमये मक्षिकायाः दृष्टान्तं प्रदीयते। यथा, मधुकरराज्ञि उत्क्रान्ते सति सर्वाः मक्षिकाः उत्क्रमणं कुर्वन्ति, मधुकरराज्ञि स्थिते सति मक्षिकाः स्थिताः सन्ति, तथैव वाक्, मनः, चक्षुः, श्रोत्रं च प्राणमनुसरन्ति।[7] चतुर्थप्रश्ने आत्मस्वरूपोपदेशकाले ऋषिणा उक्तम्, पक्षिणः यथा आवासवृक्षं प्रति धावन्ति, तथैव सर्वमेव आत्मनि अक्षरपुरुषे वा प्रतिष्ठिताः भवन्ति।[8]

---

[1] केनोपनिषद् १.१

[2] केनोपनिषद् १.२

[3] केनोपनिषद् १.८

[4] मुण्डकोपनिषद् १.१.३

[5] 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति।।' कठोपनिषद् २.१.१४

[6] 'यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाऽक्षरात् सम्भवतीह विश्वम् ।।' मुण्डकोपनिषद् १.१.७

[7] प्रश्नोपनिषद् २.४

[8] प्रश्नोपनिषद् ४.७

बृहदारण्यकोपनिषदि मैत्रेयीं प्रति याज्ञवल्क्यस्य आत्मतत्वोपदेशकाले याज्ञवल्क्येन दृष्टान्तमिदं दत्तम्, यथा आर्द्रकाष्ठेन प्रज्वलिताग्नेः नानाविधाः धूमाः विनिर्गताः सन्ति, तथैव ऋक्-यजु-साम-अथर्ववेदाः, इतिहास-पुराणानि, श्लोकाः, सूत्राणि, व्याख्यानानि च परमात्मनः निःश्वासरूपाणि।[1]

आख्यानोपाख्यानेनापि दृष्टान्तप्रदानं प्रचलितमासीत्। केनोपनिषदि ब्रह्मविषये उपदेशसमये आचार्यः उमा-हैमवती उपाख्यानस्य दृष्टान्तं दत्तवान्। वैदिककाले एतेषाम् उपाख्यानानां पुरावृत्तानां वा गुरुत्वमासीत्। उपनिषत्सु बहूनाम् उपाख्यानानां परिचयः प्राप्यते। यथा, छान्दोग्योपनिषदि राज्ञः जनश्रुतेः उपाख्यानम्, श्वेतकेतुप्रवाहणस्य उपाख्यानम्, सत्यकामजावालस्य उपाख्यानम्। शिक्षणसमये एते पुरावृत्तयः दृष्टान्तरूपेण उपस्थापिता आसन्।

उपमाप्रदानं (Providing Analogy/Metaphor)-

उपनिषदां समये शिक्षाप्रदानकाले कोऽपि सूक्ष्मविषयः सरलतया अवबोधनार्थं ऋषयः बहुस्थले उपमायाः प्रयोगं कृतवन्तः। उपमाप्रयोगेन दृष्टान्तप्रदानं तस्मिन् समये प्रसिद्धमासीत्। कठोपनिषदि प्राप्यते,

**'आत्मानं रथिनं बिद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं बिद्धि मनः प्रग्रहमेव च।।'**[2]

अर्थात्, जीवात्मानम् देहरथस्य आरोहीरूपेण कल्प्यते, शरीरं रथेन सह तुलनां क्रियते, बुद्धिं देहरथस्य सारथिरूपेण, मनः प्रग्रहरूपेण उपमीयते।

प्रश्नोपनिषदि प्राप्यते, **'अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्। ऋचो यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च।।'**[3] रथचक्रस्य नाभौ शलाकानां सदृशं ऋक्-यजुः-साम-क्षत्रिय-ब्राह्मणं सर्वमेव प्राणे प्रतिष्ठितमस्ति।

मुण्डकोपनिषदि उपदिष्टम्, **'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।'**[4] अत्र द्वौ सुपर्णौ इत्यनेन जीवात्मा परमात्मा च बुध्यते। अपि तु, वृक्षेति शरीरम्।

श्वेताश्वतरोपनिषदि उपदिष्टम्, यः सत्येन तपसा च दुग्धे घृतसदृशं इदमात्मानं मुक्तेः आश्रयरूपेण ब्रह्मरूपेण साक्षात् करोति, तेनैव परमात्मा तिलेषु तैलवत्, दधिनि सर्पिवत्, भूगर्भस्थजलवत्, अरणीषु अग्निवत् आत्मनि एव गृहीतः भवति।

**'तिलेषु तैलं दधिनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः।**
**एवमात्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति।।'**
**'सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम्।**
**आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत् परम्।।'**[5]

व्याख्यानविधिः (Lecture/Explanation Method)- शिष्याणां प्रश्नानामुत्तरे गुरुः व्याख्यानेन ब्रह्मतत्वविषयकम् उपदेशं प्रददाति स्म। उपनिषत्सु प्रायशः विस्तृतरूपेण व्याख्यानविधिः उपलब्धा आसीत्। माण्डुक्योपनिषदि साक्षात् सम्बन्धे विस्तृतव्याख्यानेन ब्रह्मोपदेशः क्रियते। ऐतरेयोपनिषदि अपि व्याख्यानेन आत्मतत्वः, जगत्प्रपञ्चः उपदिष्टः। प्रश्नोपनिषद्यपि शिष्याणां प्रश्नानामुत्तरप्रदानसमये गुरुः व्याख्यानविधिमवलम्ब्य विस्तारेण उत्तरं दत्तवान्। श्वेताश्वतरोपनिषदि व्याख्यानेनैव ब्रह्मतत्वः उपदिष्टोऽभवत्। छान्दोग्योपनिषदः प्रथमाध्याये व्याख्यानविधिना उद्गीथोपसनायाः परिचयः प्राप्यते। बृहदारण्यकोपनिषदि याज्ञवल्क्यः मैत्रेयीं प्रति विस्तृतव्याखायाः माध्यमेन आत्मतत्वं उपदिष्टवान्। कठोपनिषदि यमेण नचिकेतसं प्रति श्रेय-प्रेयविषये विस्तारेणोपदिष्टम्। अनेन शिष्याः समृद्धाः जाताः, तेषां ज्ञानं वर्धितं जातमिति।

पुनः पुनः अभ्यासम् (Repetition / Practice) –

शिक्षणअधिगमविधौ पुनः पुनः अभ्यासम् एकः प्रमुखः शिक्षणसहायकोऽस्ति। वारं वारं अभ्यासेनैव पूर्वज्ञानेन सह संयोगस्थापनं

---

[1] बृहदारण्यकोपनिषद् २.४.११

[2] कठोपनिषद् १.३.३

[3] प्रश्नोपनिषद् २.६

[4] मुण्डकोपनिषद् ३.१.१

[5] श्वेताश्वतरोपनिषद् १.१५,१६

सम्भवति। तैत्तिरीयोपनिषदि दृश्यते, ब्रह्मतत्वं ज्ञातुमिच्छन् भृगुः तस्य पितुः वरुणस्य समीपे उपस्थितः सन् **'अधीहि भगवो ब्रह्मेति'**[1] इत्यवदत्। उत्तरे पिता उवाच, यस्मात् सर्वाणि भूतानि उत्पद्यन्ते, येनैव वर्धितानि जातानि, विनाशकाले यस्मिन् प्रविशन्ति, तदेव ब्रह्म। वरुणेनोपदिश्यते, **'तद्विजिज्ञासस्व। तद् ब्रह्मेति।'**[2] भृगुः ब्रह्मस्वरूपज्ञानार्थं तपश्चर्यां कृतवान्। तपसा प्रथमे अन्नं ब्रह्मेति ज्ञातवान्। तत्परं पुनः तपश्चरणं कृत्वा प्राणः ब्रह्मेति ज्ञायते। प्राणात् सर्वाणि भूतानि जातानि वर्धितानि च इति ज्ञानमभवत्। अनन्तरं, पुनः भृगुः तपः कृतवान्। तपसा मनो ब्रह्मेति ज्ञातवान्। अस्मात् परं पुनः तपश्चरन् भृगुः विज्ञानं ब्रह्मेति ज्ञातवान्। **'विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते...'**[3] इति ज्ञानमभवत्। अनन्तरं, पुनः तपः कृत्वा आनन्दो ब्रह्मेति ज्ञायते भृगुना। वरुणप्रोक्तं भृगुकर्तृकं वारं वारं तपसा जाता इयं विद्या परमानन्दे प्रतिष्ठिता। अत्र अन्नमय-प्राणमय-मनोमय-विज्ञानमय-आनन्दमयकोशानां धारणा प्रस्फुटिता जाता। अत्र भृगुः पुनः पुनः तपश्चर्यां कृत्वा अर्थात् पुनः पुनः अनुसन्धानेन वारं वारं अभ्यासेन वा ब्रह्मस्वरूपं विजानाति।

प्रायोगिकं (Experimental)-

स्वहस्तेन प्रयोगमाध्यमेन दृष्टान्तोपस्थापनमपि उपनिषदां समये प्रचलितमासीत्। गुरुणा शिक्षणसमये स्वहस्तेन परीक्षामाध्यमेन प्रायोगिकरूपेण वा ब्रह्मोपदेशं कृतम्। छान्दोग्योपनिषदि, आरुणिना श्वेतकेतोः प्रति ब्रह्मोपदेशकाले सूक्ष्मात् कथम् स्थूलस्योत्पत्तिः भवेत्, तस्मिन् प्रसङ्गे प्रायोगिकमाध्यमस्य दृष्टान्तं प्राप्यते।[4] आरुणिः श्वेतकेतुं न्यग्रोधफलमाहरणस्य आदेशं कृतवान्। फलमाहरणात् परं आरुणिना फलमिदं भग्नकरणार्थम् उक्तम्। भग्नकरणेन फलाभ्यन्तरे अणोः सदृशं बहूनि बीजानि प्रकाशितानि सन्ति। आरुणिना आदिष्टः सन् श्वेतकेतुः वीजमेकं भग्नं करोति। तदभ्यन्तरे किमपि न दृश्यते। आरुणिना उपदिश्यते, वीजस्य अस्मात् सूक्ष्मांशात् विशालन्यग्रोधवृक्षस्योत्पत्तिरभवत्। अणिम्नः अर्थात् अणुस्वरूपात् सूक्ष्मकारणात् स्थूलजगतः सृष्टिर्भवति इत्याशयः।

पुनः दृश्यते, आरुणिना श्वेतकेतुः आदिष्टः सन् लवणखण्डं पात्रस्थजले विक्षिप्तं कृत्वा प्रातःकाले पितुः समीपे समुपस्थितोऽभवत्।[5] तदा आरुणिः तत् लवणखण्डं आहरणार्थम् आदिष्टवान्। श्वेतकेतुः अनुसन्धानं कृत्वाऽपि तत् न प्राप्तवान्। तत् लवणखण्डं जलमध्ये विलीनमभवत्। तत्परं, आरुणेः आदेशानुसारं, श्वेतकेतुः जलस्य उपरिभागात्, मध्यभागात्, अधोभागाच्च आस्वादनमकरोत्, सम्पूर्णजलं तु लवणाक्तमभवत्। आरुणिना उपदिश्यते, जले विद्यमाने सत्येव यथा लवणं न दृश्यते, तथा अस्मिन् देहमध्ये एव सत् ब्रह्म विद्यमानमस्ति। तात्पर्यः, जलमध्ये विलीनं लवणखण्डं चक्षुषा न दृश्यते, परन्तु आस्वादेन ज्ञायते। अनेन प्रकारेणैव जगतः मूलं सत् ब्रह्म देहमध्ये विद्यमानमस्ति, परन्तु इन्द्रियेभ्यः न ज्ञायते।

वितर्कमाध्यमः (Debate/Seminar)-

उपनिषदां काले सम्मिलितरूपेण अंशग्रहणं कृत्वा वितर्कमाध्यमेन अध्यात्मविषये आलोचनं प्रचलितमस्ति। बृहदारण्यकोपनिषदः तृतीयाध्याये दृश्यते, राजा जनकः बहुदक्षिणयज्ञस्यानुष्ठानमकरोत्। तत्र बहवः ब्राह्मणाः समागता आसन्। जनकस्य मनसि तदा प्रश्नः जायते, एतेषु ब्राह्मणेषु कः श्रेष्ठः वेदज्ञः? जनकः ब्राह्मणान् उक्तवान्, वः ब्रह्मिष्ठजनः एताः गाः स्वगृहे नयतु। तदा याज्ञवल्क्यः गाः गृहीतवन्तः। याज्ञवल्क्यः कथं सर्वेषु ब्रह्मिष्ठः भवेत्, अस्मिन् विषये अन्ये ब्राह्मणाः क्रुद्धाः जाताः। अतः, ते याज्ञवल्क्यं प्रति प्रश्नान् पृष्टवन्तः। अश्वलः, जारत्कारवः आर्तभागः, लाह्यायनिः भुज्युः, चाक्रायणः उषस्तः, कहोलः, गार्गी वाचक्नवी, उद्दालकः आरुणिः, शाकल्यः प्रमुखाः विदग्धजनाः याज्ञवल्क्यं प्रति ब्रह्मविषयकान् अध्यात्मविषयकान् बहुविधान् प्रश्नान् पृष्टवन्तः। गार्गी-वाचक्नव्या सह तस्य वारद्वयं तर्कमचलत्। तयोः वादानुवादं प्रसिद्धमासीत्। याज्ञवल्क्यः सर्वेषां प्रश्नानाम् उत्तरं सम्यक् रूपेण प्रदानं कृत्वा सर्वश्रेष्ठः ब्रह्मज्ञोऽभवत्। अत्र सर्वे मिलित्वा तर्कवितर्कमाध्यमेन ज्ञानार्जनस्य दृष्टान्तः उपलभ्यते।

बृहदारण्यकोपनिषदि एव श्रवण-मनन-निदिध्यासनस्य परिचयः प्राप्यते। याज्ञवल्यः मैत्रेयीं प्रति उपदिशति, **'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो।'**[6] श्रवणमिति (Listening) शास्त्रप्रतिपादितवस्तोः ज्ञानम्, मननमिति (Contemplation)

---

[1] तैत्तिरीयोपनिषद् ३.१

[2] तैत्तिरीयोपनिषद् ३.१

[3] तैत्तिरीयोपनिषद् ३.५

[4] छान्दोग्योपनिषद्, षष्ठाध्यायः, द्वादशखण्डः

[5] छान्दोग्योपनिषद्, षष्ठाध्यायः, त्रयोदशखण्डः

[6] बृहदारण्यकोपनिषद् २.४.५

श्रुतविषयस्य चिन्तनम्, निदिध्यासनमिति (Meditation) तस्य आचरणम् अनुशीलनं वा।

एतानि विहाय अपि उपनिषत्सु कथोपकथनरूपाः बहवः संवादाः (Dialogues) प्राप्यन्ते। छान्दोग्योपनिषदि नारद-सनत् कुमार संवादः, इन्द्र-विरोचन संवादः, बृहदारण्यकोपनिषदि वालाकि अजातशत्रु संवादः, आरुणि-प्रवहण संवादः, जनक-याज्ञवल्क्य संवादः प्रभृतयः। एतेभ्यः संवादेभ्योऽपि ब्रह्मतत्वमुपदिष्टम्।

**उपसंहारः-** अत्र मुख्योपनिषदः अनुसृत्य शिक्षण-अधिगमविधेः बहवः प्रकाराः उपस्थापिताः। गुरु-शिष्यपरम्परायां श्रुतिमाध्यमेन शिक्षणकाले गुरोः सकाशात् उपविश्य शिष्याः ब्रह्मोपदेशं प्राप्तवन्तः। उपनिषत्सु प्रायशः प्रश्नोत्तरमाध्यमेन गुरुशिष्ययोः अध्ययन-अध्यापनं चलति स्म। शिष्याणां मनसि प्रश्ने संशये वा जाते गुरुः विस्तृतव्याख्यानेन शिष्याणां प्रश्नानाम् उत्तरं दत्वा तेषां संशयं दूरीकरोति स्म। उपदेशप्रदानकाले गुरुः दृष्टान्तप्रदानपूर्वकं जटिलविषयं सरलतया अवबोधनं कारयति स्म। आख्यानोपाख्यानेनापि दृष्टान्तप्रदानस्य प्रचलनमासीत्। शिष्याणां कृते उपमाप्रयोगेन, प्रतीकमाध्यमेन, संवादमाध्यमेन च शिक्षाप्रदानं कृतवन्तः। स्वहस्तेन प्रयोगमाध्यमेनापि सूक्ष्मविषयस्य अवधारणां कारयते। सम्मिलितरूपेण अंशग्रहणेन वितर्कसभायाः माध्यमेनापि ज्ञानार्जनस्य दृष्टान्तः प्राप्यते। अध्ययन-अध्यापनविधेः एते विविधाः प्रकारास्तु प्राचीनभारतवर्षस्य शिक्षाव्यवस्थायाः उत्कृष्टतां निर्दिशन्ति। प्राचीनऋषयः एतेभ्यः प्रकारेभ्यः शिष्यान् पाठदानं कृतवन्तः। अतः, प्राचीनाचार्याणां महत्वं तु अनस्वीकार्यम्। वर्तमानसमयेऽपि शिक्षाक्षेत्रेषु शिक्षण-अधिगमकाले उपनिषद् दिशा शिक्षणप्रकाराः प्रयोक्तव्याः। आधुनिकशिक्षणव्यवस्थायां उपनिषदः शिक्षणेन प्रभाविता अनेकाः पद्धतयः प्राप्यन्ते। उपनिषदः आदर्शैः सह सङ्गतिं कृत्वा जातीयशिक्षानीतौ (NEP 2020) नैतिकतायाः (Ethics), आलोचनात्मकचिन्तनस्य (Critical thinking) चोपरि गुरुत्वं प्रदत्तमस्ति। उपनिषदः शिक्षणअधिगमविधिना सह सामञ्जस्यं कृत्वा आधुनिकशिक्षणव्यवस्थायामपि संवादस्य (Dialogues), अनुभवात्मकपरियोजनानां (Experiential Project), चिन्तनात्मकशिक्षणस्य (Reflective learning) च उपयोगः दृश्यते। उपनिषदः शिक्षणविचाराः विश्वव्यापीरूपेण शिक्षणपद्धतिं प्रभावितं कुर्वन्ति, इत्यस्मिन् विषयेऽपि नास्ति संशयः। यतो हि Waldorf, Montessori इतोऽपि अन्यान्य-आधुनिकशिक्षणस्योपरि उपनिषदः प्रभावः वर्तते। उपनिषदग्रन्थाः आत्मज्ञानस्य (Self-Knowledge), सामग्रिकविकाशस्य (Holistic Development), नैतिकमूल्यानां (Moral values) , समीक्षात्मकजिज्ञासायाश्च कालातीतम् अन्वेषणं प्रददाति। आधुनिकशिक्षानीतौ अपि एतेषाम् आदर्शानां उपयोगः क्रियते, येन शिक्षार्थीनां वौद्धिक-भावनात्मक-आध्यात्मिकसमृद्धिः भवेत्। अनेन जातीयशिक्षानीतिः उपनिषदः शिक्षणस्य अनेकाः आदर्शाः प्रतिबिम्बयति।

**सन्दर्भग्रन्थपञ्जी :-**


१. उपनिषद् ग्रन्थावली (vol I ), स्वामी गम्भीरानन्द (सम्पा.), उद्वोधन कार्यालय, २०१७, कोलकाता।

२. उपनिषद् ग्रन्थावली (vol II), स्वामी गम्भीरानन्द (सम्पा.), उद्वोधन कार्यालय, २०२३, कोलकाता।

३. उपनिषद् ग्रन्थावली, (vol III), स्वामी गम्भीरानन्द (सम्पा.), उद्वोधन कार्यालय, २०१८, कोलकाता।

४. कठोपनिषद्, स्वामी जुष्टानन्द (अनुवादकः), उद्वोधन कार्यालय, २०२०, कोलकाता।

५. केनोपनिषद्, स्वामी जुष्टानन्द (अनुवादकः), उद्वोधन कार्यालय, २०१८, कोलकाता।

६. मुण्डकोपनिषद्, स्वामी जुष्टानन्द (अनुवादकः), उद्वोधन कार्यालय, २०१८, कोलकाता।

७. The Philosophy of the Upanishads, Paul Deussen, 1908, Edinburgh.

८. Upanishads and Teaching Methods, Jayarama B., International Journal of Creative Research Thoughts, vol.2, issue 1, January 2014, ISSN: 2320-2882.

९. Transcending knowledge: Holistic Education through Upanishadic Insight, Dr. S. Vidyashree, Dr. Amulya Bharadwaj, International Journal of Novel Research and Development, vol.8, issue 8, August 2023, ISSN: 2456-4184.


# अद्वैतवेदान्तमतानुसारं वर्तमानसमाजे विद्याविद्ययोः प्रभावः

Shrabani Bera

Research Scholar, Department of Vedanta
Central Sanskrit University, Shree Sadashiva Campus
Mobile No – 8967775495
Email Id – shrabanibera.me@gmail.com

**सारांशः-** आधुनिकयुगे समाजविकासस्य मूलकारणमस्ति विद्या । विद्या मानवजीवनस्य सर्वोत्कृष्टा शक्तिः । या विद्या जीवस्य अन्तःकरणस्य प्रकाशं करोति एवञ्च अज्ञानस्य तिमिरं निवारयति । विद्यया मनुष्यस्य अन्तःकरणं विशुद्धं भवति । अपि च एषा विद्या सत्यम्-असत्यम्, श्रेयः-प्रेयः च विभक्तं कर्तुं शक्यते । विद्या न केवलं पुस्तकज्ञानं परन्तु आचरणे सत्यं, प्रेम, करुणा, धर्मनिष्ठा च प्रवर्तते, तादृशी आन्तःशुद्धिः अपि विद्या । प्राचीनभारते शिक्षाग्रहणार्थं गुरुकुलप्रणाली अस्ति । यत्र शिष्याः आचार्यस्य सन्निधौ ब्रह्मचर्यव्रतेन सह अध्ययनं अकुर्वन्, तत्र विद्यायाः लक्ष्यं न केवलं पुस्तके उपलब्धमानं शिक्षाम् अपि तु आत्मसाक्षात्कारमेव भवति। अविद्या मनुषस्य चित्ते स्थित्वा वस्तुतत्त्वज्ञानम् आच्छादयति । यथा तमः सूर्यप्रकाशं निवारयति तथैव अविद्या आत्मज्ञानस्य प्रकाशं अवरुद्ध्य जनान् मोहयति । अस्मात् कारणात् आत्मानं भिन्नमेव मन्यते । एषा मिथ्याज्ञानरूपा शक्तिरेव बन्धनस्य कारणम् । परन्तु विद्या मानवस्य व्यक्तित्वं निर्माति, तस्य सिद्धान्तस्य व्यापकता वर्धयति, सर्वस्य विकासस्य मार्गं प्रदर्शयति च । एषा विद्या मनुष्ये न केवलं बाह्यज्ञानं ददाति अपि तु विनयः, संस्कारः, नैतिकता च विकासाय सहायकरूपेण कार्यमपि करोति । विद्या मुक्तेः साधनं भवति।
**कूटशब्दाः -** विद्या, अविद्या, जीवः, मोक्षः, ज्ञानं, ब्रह्म, जगत्, श्रेयः, प्रेयः

**प्रस्तावना-** षडास्तिकर्शनानां मध्ये 'वेदान्तः' इति एकं दर्शनमेव गण्यते । वेदान्तः इति शब्दो 'वेदः' तथा 'अन्तः' द्वयोः पदयोः योगेन निर्मितः अस्ति । वेदस्य अन्तः इति वेदान्तः। वेदान्तः इति पदस्य शाब्दिकार्थः – वेदानां अन्तभागः सारः वा । वेदानामन्तभागे स्थिताः उपनिषदत्सु यानि तत्त्वज्ञानानि प्रतिपाद्यन्ते, तदेव वेदान्त इत्युच्यते । तत्र न केवलं तत्त्वज्ञानानि सन्ति, शिक्षाणां सारभूतज्ञानानि अपि सन्ति । वेदान्ते अधिकारी, विषयः, सम्बन्धः, प्रयोजनं, ब्रह्म, जीवो, जगत्, विद्या, अविद्या, मोक्षः इत्यादयः विषयाः वर्णिताः सन्ति । तेषां स्वरूपं विस्तार्येण वर्णितमस्ति । अस्मिन् विश्वे मानवाः तथा के अपि जनाः प्रयोजनं विना किमपि कार्यं न कुर्वन्ति । अतो वेदान्तस्य प्रयोजनमपि अस्ति । सदानन्दयोगीन्द्रेन वेदान्तस्य प्रयोजनविषये उक्तम् –

**'तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च'**[1] ।

अर्थात् ब्रह्म एवं आत्मा एकमेव । तस्य चैतन्येन अज्ञानस्य निवृत्तिः भवति । अज्ञानं दूरीभूतं कृत्वा परमानन्दं प्राप्तुं शक्यते । वेदान्तकारेण श्रुतिवाक्यमपि उक्तम् – **'तरति शोकम् आत्मवित्'**[2] इति । अस्मिन् संसारे यः आत्मज्ञः स दुःखम् अतिक्रामति । तस्य शोकं दुःखं च किमपि न भवति । अपि च **'ब्रह्म वेद ब्रह्मैव भवति'**[3] इति । यो ब्रह्म जानाति स ब्रह्मणि लीनं भवति । जीवो ब्रह्म साक्षात्कृत्वा ब्रह्मैव भवति । वेदान्ते विद्याविद्ययोः स्वरूपस्य विवेचनं क्रियेते । विद्याविद्ये 'श्रेयः प्रेयः' च इति उच्येते । कठोपनिषदि उक्तम् –

**"श्रेयश्च प्रेयश्च मनुष्यमेतः तौ सम्परीत्य विविनक्ति धीरः ।**
**श्रेयो हि धीरोऽभि प्रेयसो वृणीते, प्रेयो मन्दो योगक्षेमात् वृणीते"**[4] ॥

श्रेयः अर्थात् यो मोक्षः, आत्मज्ञानं , आध्यात्मिकप्रगतिः च नयति । प्रेयः अर्थात् यः इन्द्रियसुखं, आसक्तिः, लौकिकसुखं च नयति। वुद्धिमन्तः मानवाः विद्यया श्रेयः स्वीकुर्वन्ति । मन्दवुद्धिमानवाः अविद्यया प्रेयः स्वीकुर्वन्ति । वर्तमानसमाजे विद्याविद्या च सर्वत्र दरीदृश्यते । तयोः प्रभावमपि परिलक्ष्येते ।

---

[1] वे. सा. - २९
[2] छा. उप. – ७. १. ३
[3] मुण्ड. उप. – ३. २. ९
[4] कठ. उ. – १.२.२.

**विद्या-** 'विद्या' इति शब्दस्य बहवः अर्थाः सन्ति। 'विद्' धातोः 'टाप्' प्रत्ययेन 'विद्या' इति शब्दो निष्पन्नो भवति। विद्या अर्थात् ज्ञानम्, शिक्षा, बोधो, ब्रह्मविद्या इत्यादयः सन्ति। विद्या मनुष्यजीवनस्य प्रकाशस्तम्भो भवति। या अन्धकाररूपां अविद्यां निवारणं कृत्वा मनुष्यं ज्ञानमार्गे नियच्छति, सा एव विद्या। विष्णुपुराणे वर्णितमस्ति -

**'सा विद्या या विमुक्तये'**[1]

अर्थात् या विद्या मनुष्यं बन्धनात् मुक्तिं प्रति नयति, सा एव सच्चिदानन्दस्वरूपा विद्या। विद्या न केवलं संसारबन्धनात् मुक्तं करोति, तया सह अमृतरूपपरब्रह्म प्राप्ताय सहायतामपि करोति। केनोपनिषदि वर्णितमस्ति –

**'विद्यया विन्दतेऽमृतम्'**[2]

ईशोपनिषदि समानमेव वर्णितम् –

**'विद्ययाऽमृतमश्नुते'**[3]

विद्यया मनुष्यस्य अन्तःकरणस्य विशुद्धं भवति। तथा च सत्यम्-असत्यम्, श्रेयः-प्रेयः च विभक्तं कर्तुं शक्यते। विद्या न केवलं पुस्तकज्ञानं परन्तु आचरणे सत्यं, प्रेम, करुणा, धर्मनिष्ठा च प्रवर्तते, तादृशी आन्तःशुद्धिः अपि विद्या। प्राचीनभारते शिक्षाग्रहणार्थं गुरुकुलप्रणाली अस्ति। यत्र शिष्याः आचार्यस्य सन्निधौ ब्रह्मचर्यव्रतेन सह अध्ययनं अकुर्वन् , तत्र विद्यायाः लक्ष्यं न केवलं पुस्तके उपलब्धमानं शिक्षाम् अपि तु आत्मसाक्षात्कारमेव अस्ति। हितोपदेशग्रन्थे उल्लिखितमस्ति –

**"विद्या ददाति विनयं, विनयाद् याति पात्रताम्।**
**पात्रत्वात् धनमाप्नोति, धनात् धर्मं ततः सुखम्"**[4] ॥

विद्यायाः विनयं नम्रतां वा उत्पद्यते। विनम्रतात् पात्रता योग्यता वा आगच्छति। योग्यतायाः धनं प्राप्नोति। धनेन धर्मं पालयति। धर्मेण सुखं आगच्छति। शिक्षायाः आरब्धं कृत्वा सुखे समाप्तं भवति, सा एव विद्या। अर्थात् विद्यया सर्वमपि प्राप्तुं शक्यते। शतपथब्राह्मणे कथितम् –

**"विद्यया तदारोहन्ति यत्र कामाः परागताः।**
**न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः"**[5] ॥

केवलं विद्यया कामना वासना च परित्याज्यते। एवञ्च उत्तममार्गे गन्तुं शक्यते । विना विद्यां किमपि कार्यं न सम्भवति। मुक्तेः साधनं करोति विद्या। विद्या अर्थात् ब्रह्मविद्या एव ज्ञायते। तदेव ब्रह्मविद्या एव मुक्तेः साधनम्। सर्वे मनुष्याः मृत्योः परं स्वर्गलोकं प्राप्ताय इच्छन्ति। परन्तु स्वर्गलोकः केवलं विद्यया प्राप्नोति। अस्मिन् विषये बृहदारण्यकोपनिषदि वर्णितम् –

**'कर्मणा पितृलोकः, विद्यया देवलोकः'**[6]।

विद्या एव मनुष्यानां प्रधाना सम्पद्। भौतिकसम्पदः नष्टाः जाताः परन्तु विद्या कदापि नष्टं न भवति। सर्वासां समस्यानां मुक्तिः विद्या एव भवति। अतः सर्वेषां कृते विद्यार्जनम् आवश्यकमिति।

**अविद्या -**'अविद्या' इति शब्दो विद्या शब्दस्य वैपरीत्यमस्ति। अविद्या अर्थात् अज्ञानं, मोहः, माया, तत्त्वज्ञानाभावः इत्यादयः अर्थाः सन्ति। अ-उपसर्ग, विद्-धातोः, टाप्-प्रत्ययेन अविद्या इति शब्दो निष्पन्नः भवति। अविद्या एव सर्वेषां दुःखानां मूलं कारणम्। मनुष्याः अविद्यायै सत्यं न जानन्ति। ते असत्यमेव सत्यं मन्यन्ते। ईशावास्योपनिषदि वर्णितम् –

**'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते'**[7]।

---

[1] वि. पुराण
[2] के. उप. – २. ४.
[3] ई. उप. - ११
[4] हित. उप.
[5] शत. ब्रा. – १०. ५. ४. १६
[6] बृ. उप. – १. ५.
[7] ई. उप. - ९

यो मनुष्यः अविद्यामुपासते स अन्धकाराच्छन्नं जगति प्रविशति । मनुष्याः भोगे आसक्तं भूत्वा कार्यं कुर्वन्ति । अविद्यावशतः भिन्नानि काम्यकर्माणि कुर्वन्ति । ततः पश्चात् पुनः पुनः जन्मं लभ्यते । एवञ्च संसारप्रवाहे आबद्धमपि भवति । मुण्डकोपनिषदि उल्लिखितमस्ति –

**"अविद्यायां वहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति वालाः ।**
**यत् कर्मिणो न प्रवेदयन्ति रागात् तेनातुराः क्षीणलोकाश्च्यवन्ते"[1] ॥**

मन्दबुद्धिजनाः अविद्यायाः बहुविधानि कर्माणि कुर्वन्ति एवं चिन्तयन्ति – मया कर्तव्यं कृतम्, सर्वं सुखं प्राप्तम् इति । ते न जानन्ति परब्रह्मरूपं एकं सर्वज्ञम् अस्ति । जनाः तं लब्धुं शक्नुवन्ति । श्रीमद्भगवद्गीतायामपि उल्लिखितम् –

**'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः'[2] ।**

अविद्या मनुषस्य चित्ते स्थित्वा वस्तुतत्त्वज्ञानम् आच्छादयति । यथा तमः सूर्यप्रकाशं निवारयति तथैव अविद्या आत्मज्ञानस्य प्रकाशं अवरुद्ध्य जनान् मोहयति । अस्मात् कारणात् आत्मानं भिन्नमेव मन्यते । एषा मिथ्याज्ञानरूपा शक्तिरेव बन्धनस्य कारणम् । सदानन्दयोगीन्द्रेन वेदान्तसारग्रन्थे अज्ञानस्य स्वरूपम् उक्तम् –

**'अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित् इति वदन्ति'[3] ।**

अज्ञानं तु सदसद्भ्याम् । सत् इति शब्दो अस्तित्वं, सत्यं, चैतन्यं च बोधयति । असत् इति तस्य वैपरीत्यम् – अनस्तित्वं, मिथ्यात्वम्, अज्ञानं च बोधयति । यथा – रज्जौ सर्पभ्रमः इति । रज्जुः सत्यम्, सर्पः असत्यम् परन्तु यत् दृश्यते तद् न पूर्णतः असत् , न तु पूर्णतः सत् । तथैव जगत् अपि ब्रह्मणः आधारम् अस्ति किन्तु नित्यं न भवति । अतः एतत् जगत् सदसद्भ्याम् अनिर्वचनीयम् इति । अपि तु अज्ञानं ज्ञानविरोधि भावरूपमिति । मुण्डकोपनिषदि वर्णितम् –

**"अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः ।**
**जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः"[4] ॥**

यदा अन्धजनस्य मार्गदर्शकः अन्धः एव भवति तदा इष्टस्थाने गन्तुं नैव शक्यते । अन्धजनः स्वयं मार्गं न पश्यति, स कथं अन्येषां मार्गदर्शनं करोति । अज्ञानात् दुःखं जायते । अविद्यावशतो जीवः पुनः पुनः संसारे आगत्वा कर्मफलं भोगं करोति ।

**वर्तमानसमाजे विद्यायाः प्रभावः-** वर्तमानकाले विद्या मानवजीवनस्य अत्यन्तमहत्वपूर्णा शक्तिः अस्ति । समाजविकासस्य मूलकारणं विद्या इति। विद्या एव मानवस्य व्यक्तित्वं निर्माति, तस्य सिद्धान्तस्य व्यापकता वर्धयति, सर्वस्य विकासस्य मार्गं प्रदर्शयति च । एषा विद्या मनुष्ये न केवलं बाह्यज्ञानं ददाति अपि तु विनयः, संस्कारः, नैतिकता च विकासाय सहायकत्वरूपेण कार्यमपि करोति। विद्या मुक्तेः साधनं भवति । विद्या सर्वस्याः समस्यायाः मुक्तिं ददाति । विद्या अर्थात् ज्ञानमिति । ज्ञानेन समाजस्य परिवर्तनं सर्वत्र परिलक्ष्यते । वर्तमानसमाजे विद्या ज्ञानं वा केवलं पुस्तके न स्थित्वा जीवनस्य प्रत्येकक्षेत्रे व्याप्यदिश्यते । विज्ञानं, तन्त्रज्ञानम्, आर्थिकविकासः, सामाजिकसमता, नैतिकमूल्यमं च सर्वत्र विद्यायाः एव प्रभावो दृश्यते । विद्या व्यक्तिविकासं करोति । शिक्षितमनुष्याः विवेकसम्पन्नाः भवन्ति । ते यथार्थनिर्णयं कर्तुं समर्थाः भवन्ति । विद्यायाः प्रभावेन व्यक्तिः आत्मविश्वासं लभते । विद्या जीवनस्य विविधानां द्वाराणि उद्घाटयति – चिकित्सकः, न्यायाधीशः, अध्यापकः, वैज्ञानिकः इत्यादयः सर्वे विद्यामाध्यमेन सम्भवति । समाजे समर्थव्यक्तीनां संख्यामपि प्रतिदिनं वर्धयन्ति । विद्यायाः प्रभावः सामाजिकस्तरे स्पष्टः दृश्यते । विद्या समाजे समता, सख्यता, सहिष्णुता च वर्धयति। शिक्षितसमाजः अन्धविश्वासः, जातिभेदः, स्त्री-पुरुषभेदभावः च विचारान् परित्यज्यते । वर्तमानयुगे नारीशिक्षा महत्वमपि अत्यधिकं वर्धते। यत्र स्त्री शिक्षिता भवति तत्र परिवारः, समुदायः, राष्ट्रं च शिक्षितं भवति । अतो विद्या सामाजिकपरिवर्तनस्य शक्तिशालीसाधनमिति वदितुं शक्यते । विद्या आर्थिकविकासस्य मूलाधरः । नूतनाः आविष्काराः, नवोन्मेषाः सर्वे विद्यया सम्भवति।

[1] मुण्ड. उप. – १. २. ९
[2] गी. ता. – ५. १५
[3] वे. सा. – ३४
[4] मुण्ड. उप. – १. २. ८

अधुना डिजिटालयुगे तु कम्पूटरविद्या, कृत्रिमबुद्धिः इत्यादिषु शिक्षणं राष्ट्रस्य प्रगत्यै अत्यधिकं प्रचलितम् । विद्यया प्रभावेन राष्ट्रः शक्तिशाली आत्मनिर्भरं च भवति । महात्मागान्धिः अवदत् – **'शिक्षा मनुष्यस्य अन्तःस्थितशक्तिं प्रकाशयति'** । विद्यया आत्मशुद्धिः अपि भवति । आत्मशुद्ध्या सत्येन च ब्रह्मविद्यापि प्राप्तुं शक्यते । अतो मुण्डकोपनिषदि वर्णितम्–

**"सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ।**

**येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत् सत्यस्य परमं निधानम्"**[1] ॥

मानवः विद्यया सत्यस्य पन्थाः अवलम्वते । सत्येन सर्वमपि जयति । ऋषयः साधनेन परब्रह्म प्राप्तुं शक्नुवन्ति । अतो मानवः सत्येन परमसत्यं प्राप्नोति ।

**वर्तमानसमाजे अविद्यायाः प्रभावः-** अविद्या मोक्षस्य मुख्यबाधिका मन्यते । अविद्यायाः कारणात् जीवो ब्रह्मस्वरूपं न जानाति। अद्वैतवेदान्तस्य मूलम् – **'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः**[2]**'** इति । अज्ञानात् जीवः सत्यं न जानाति । यदा मनुष्यः **अहं कर्ता, अहं भोक्ता, सर्वं बाह्यं सत्यम्** इति मन्यते, तदा स संसारबन्धने बद्धो भवति । अस्मिन् संसारे अपि दुःखस्य मूलकारणमविद्या भवति । समाजे अविद्यायाः प्रभावः व्यापकरूपेण दृश्यते । यत्र अज्ञानं तत्र द्वेषः, विभेदः, अन्धविश्वासः च वर्धन्ते । मनुष्यः कोऽपि विषयः विचारः कर्तुं न शक्यते। धैर्यमपि न तिष्ठति । अविद्यया जीवानां मध्ये अहमिति विषयः आगच्छति । यत्र अविद्या तत्र विकासो न सम्भवति । एवञ्च नैतिकता श्रद्धा च अवरुद्धेते । बाह्यरूपेण प्रगतिः दृश्यते अन्तःकरणे अविद्यायाः प्रभावः अद्यापि दृढः अस्ति । समाजे अधुनापि अन्धविश्वासः परिलक्ष्यते । ग्रहशान्तिः, वशीकरणं च विषये ज्योतिषशास्त्रस्य दूरुपयोगः भवति। सर्वत्र अविद्यायाः प्रभावः लक्ष्यते । अन्तर्जाले बहवः अप्रमाणितसूचनाः जनानां मनसि भ्रमं जायन्ते । लोकाः सत्यविचारं विना मिथ्यावार्ता विश्वासं कुर्वन्ति । वर्तमानसमाजे प्रगतिः अस्ति परन्तु प्रगतेः अधः अविद्यायाः छायामद्यापि विद्यमाना ।

**उपसंहारः-** वर्तमानसमाजे विज्ञान-प्रायोगिकयोः अत्यधिकौ विकासौ दृश्यमानौ स्तः । लोकाः दूरवाणी-दूरदर्शन-इत्यादिभिः माध्यमैः विश्वस्य सर्वान् विषयान् शीघ्रं ज्ञातुम् अर्हन्ति । तथापि एतासु सुविधासु अपि समाजे अविद्यायाः प्रभावः अत्यन्तः गम्भीरः दृश्यते । यथार्थज्ञानस्य अभावः व्यापकार्थे परिदृश्यते । यत्र सत्यं न तिष्ठति तत्र अज्ञानम्, मिथ्याचारः, अन्धश्रद्धा च वर्धन्ते । **अविद्या समाजस्य अन्धकारः, विद्या तु प्रकाशदीपः** । यदा समाजः विद्यायाः आलोकं स्वीकरोति तदा न केवलं आर्थिक-सामाजिक-वैचारिकं प्रगतिं भवति अपि तु मानवधर्मस्य वास्तविकपरिपूर्णतामपि साध्यते । अतः प्रत्येकः नागरिकः एतत् स्मरेत् – **विद्या ददाति विनयं, विनयाद्याति पात्रताम्** । विद्या एव उज्ज्वलभविष्यतस्य द्वारमिति । विद्या ज्ञानं प्रकाशं वा सूचयति, या मनुष्यं सत्यस्य मार्गे नयति । ज्ञानमात्रस्य प्राप्तिः न पर्याप्तं, विवेकयुक्तं ज्ञानम् आवश्यकम् । अविद्यायां तमगुणः अस्ति । अतो तमगुणं त्याक्त्वा विद्यया प्रकाशं स्वीक्रियतामिति । तदा एव समाजस्य समृद्धिमुन्नतिं च भविष्यति ।

**सन्दर्भग्रन्थसूची**


१. जुष्टानन्दः स्वामी (सम्पादकः), (शंकरभाष्यसहितम्) कठोपनिषद्, उद्वोधनकार्यालयः, कलिकाता, २०१२

२. रङ्गनाथानन्दः स्वामी, उपनिषदों का सन्देश, नागपुर, रामकृष्ण मठ, २००१

३. रामसुखदासः स्वामी, श्रीमद्भगवद्गीता, गोरक्षपुरः, गीताप्रेसः

४. सेन अतुलचन्द्रः, तत्त्वभूषणः सीतानाथः, घोषः महेशचन्द्रः, उपनिषद्, कलिकाता, हरफप्रकाशनी, २०१५ ( पुनर्मुद्रणम्), अखण्ड संस्करणम् १९८०

५. योगीन्द्रः सदानन्दः, वेदान्तसारः, शुक्लः वद्रीनाथः (व्याख्याकारः), वाराणसी, मोतीलाल बनारसीदास, २०१९ (पुनर्मुद्रणम्), प्रथमसंस्करणम् १९७९

६. योगीन्द्रः सदानन्दः, वेदान्तसारः, अमृत्वानन्दः स्वामी (सम्पादकः), उद्वोधनकार्यालयः, कलिकाता, २०१६ (पुनर्मुद्रणम्),


[1] मुण्ड. उप – ३. १. ६

[2] ब्रह्माज्ञानावलीमाला - २०

प्रथमसंस्करणम् १९९८

७. भट्टाचार्यः ड. समरेन्द्रः. भारतीयदर्शन, वुक सिण्डिकेट प्राइभेट लिमिटेड, कलिकाता, २०१३ पुनर्मुद्रणम्, प्रथमसंस्करणम् १९९६

८. सरस्वती स्वामी सत्यप्रकाशः, शतपथब्राह्मणः, आर्य साहित्य भवन, २०१४

**अन्तर्जालसङ्केतसूची**

www.epustakalay.com

www.googlebooks.com

www.archive.com

www.wikipedia.com

# भारतीयज्ञानपरम्परायां प्रसाधनसिद्धान्तः : वाणीवरपुत्रकालिदासस्य खण्डकाव्यस्य विशेषसन्दर्भे

**Author**
Riya Bepari
Research Scholar
Department of Sanskrit
University of Allahabad
Contact No – 9641038397
Gmail - riyabepari1999@gmail.com

**Co-Author**
Soumitra Sardar
Assistant Professor
Department of Sanskrit
Sri Ramkrishna Sarada Vidyamahapitha
Contact No – 9073872554
Gmail - sardarsoumitra57@gmail.com

**शोधसारांशः :-** यथा पृथिव्याः सृष्टेः इतिहासः प्राचीनः तथैव मनुष्याणाम् उत्पत्तेः इतिहासोऽपि प्राचीनः एव। मनुष्याणां कदा उत्पत्तिः अभवत् कदा च ते एतेन अखिलविश्वेन सह स्वजीवनप्रणालिं समन्वयितुं प्रयत्नं कृतवन्तः इति विषये विविधेषु विचारकेषु मतानैक्यं दृश्यते। तथापि निश्चयेन एवं वक्तुं शक्यते यत् मनुष्याणाम् उत्पत्तेः बहुकालादनन्तरं यदा ते आहारवस्त्रनिवासानां महत्त्वं बुबुधिरे, तदा आहारमेव जीवनस्य प्रधानसाधनरूपेण स्वीकृतवन्तः।

आहारस्य उपयोगं ज्ञात्वा मनुष्यः वस्त्रस्यापि उपयोगं बुबुधे। वस्त्रविहीनः मनुष्यः अनुकूलप्रतिकूलवातावरणस्य साहचर्येण जीवनं यापयितुं न अशक्नोत्। ततः वस्त्रस्य सम्यग्रूपेण प्रयोगम् अवगम्य शनैः शनैः सः सौन्दर्यबोधं सुखबोधं च अनुभूतवान्। तस्मात् एव मानवजीवने प्रसाधनवस्तूनाम् आभरणानां च प्रवेशः जातः। हस्तकण्ठकेशपादादिषु विविधेषु अङ्गेषु नानाविधानि आभरणानि धारयन् मनुष्यः स्वजीवनं परिपूर्णम् अचिकीर्षत्।

एषः प्रसाधनाभरणानां प्रयोगः मानवसंस्कृतेः अभिन्नः अङ्गः। अस्मिन् विषये संस्कृतसाहित्ये कवीनां ग्रन्थेषु बहुविधा वर्णना प्राप्यते। महाकविः कालिदासः स्वकाव्येषु मनुष्यजीवनस्य एषां प्रसाधनवस्तूनाम् आभरणानां च चित्रणम् अकरोत्। तस्य काव्येषु स्त्रीपुरुषयोः प्रसाधनाभरणप्रयोगस्य विविधानि रूपाणि समुपलभ्यन्ते।

कवेः काव्यपङ्क्तिषु यानि गन्धद्रव्याणि, प्रसाधनवस्तूनि आभरणानि च निर्दिष्टानि, तानि तस्य काव्यं न केवलं शोभायुक्तं कुर्वन्ति, अपि तु संस्कृतसाहित्यम् ऋद्धं कुर्वन्ति।

अतः अस्मिन् शोधप्रबन्धे महाकवेः कालिदासस्य खण्डकाव्यद्वयम् आधारीकृत्य प्रसाधनवस्तुविषये काचित् संक्षिप्ता आलोचना प्रदीयते, या तु संस्कृतसाहित्ये भारतीयज्ञानपरम्परायां च विशेषमहत्त्वं धारयति।

**कुञ्चिकाशब्दाः :-** भारतीयज्ञानपरम्परा, वेदः, आभूषणम्, प्रसाधनी, ऋतुसंहारः, मेघदूतम्।

**प्रस्तावना :-** मनुष्याणाम् आविर्भावात् अनन्तरं तेषु विविधानि परिवर्तनानि अजायन्। गच्छत्सु समयेषु ते सौन्दर्यं प्रति मनोनिवेशं कृतवन्तः। सभ्यतायाः जन्मनः परम् शनैः शनैः मनुष्याः अन्नवासस्थानाभ्यां सह वस्त्रस्योपयोगिताम् अपि ते स्वीकृतवन्तः। अनन्तरं ते रूपचर्याविषयेऽपि ध्यानं प्रदत्तवन्तः। दैनिकरूपचर्चा केन प्रकारेण मनुष्याणां सौन्दर्यं वर्धयतीति विचिन्त्य ते शारीरिकसौन्दर्यं प्रति यत्नशीलाः अभवन्। कालक्रमेण मनुष्याणां गृहे साजसज्जासामग्र्यः सञ्चिताः। देहपरिचर्चा-केशपरिचर्ययोः कृते मानवैः विविधानां

गन्धद्रव्याणां विलेपनानां प्रयोगः क्रियते।

**प्रसाधनसामग्र्याः व्यवहारस्योद्भवः विकासश्च :-** भारतीयसभ्यतायाः तथा संस्कृतेः मूलाधारः ऋग्वेदः। मानवसभ्यतायाः उद्भवस्य आभासः तत्रोपलभ्यते। यदि मानवाः जगतः तथा जगत्संसारस्य ज्ञानं आहर्तुम् इच्छन्ति तर्हि ऋग्वेदे हि ते सर्वे ज्ञानं लब्धुं शक्यन्ते। पृथिव्याः प्राथमिकयुगस्य मानवस्य जीवनयात्रा कीदृशी आसीत् तस्यपि सुष्ठुतया वर्णना ऋग्वेदे अस्मभिः उपलभ्यते। आधुनिककालस्य मनुष्याः सौन्दर्यं प्रति आकृष्टाः भवन्ति एतत्तु सर्वे जानन्ति। परन्तु प्राचीनसभ्यतायाः आविर्भावलग्ने मनुष्याः शारीरिकसौन्दर्यं प्रति यत्नशीलाः आसन् तस्याः सूक्ष्मातिसूक्ष्मवर्णना ऋग्वेदे उपलभ्यते। तत्रैव ऋग्वेदस्य सप्तममण्डलस्य महामृत्युञ्जमन्त्रे अस्ति -

"सुगन्धं पुष्टिवर्धनम्।"[१]

किञ्च पुनः ऋग्वेदस्य दशममण्डलस्य शताधिकसप्तचत्वारिंशत्तमे सूक्ते उच्यते अरण्यमेव सुगन्धस्य मूलाधारः इति -

"आञ्जनगन्धि सुरभिं बह्वन्नामकृषीवलाम्।"[२]

प्रख्याताङ्गलगवेषकउइलसनमहोदयेन आङ्ग्लभाषायाम् ऋग्वेदस्य अस्य मन्त्रस्य व्याख्या क्रियते अनेन प्रकारेण -

"I praise the musk, scented, fragrant, fertile, uncultivated ARANYAN."[३]

ऋग्वेदातनन्तरं पौराणिकसाहित्ये अपि सौन्दर्यसामग्र्याः वर्णना प्राप्यते। तत्र साजसज्जायाः अन्यतमोपकरणरूपेण गन्धद्रव्यस्य व्यवहारोऽपि आसीत्। गन्धद्रव्यं देवेभ्यः रोचते इयं वर्णना कालिकापुराणे उपलभ्यते -

"गन्ध पञ्चविधो प्रोक्तो देवानां प्रीतिदायकः।"[४]

गन्धद्रव्येषु सुगन्धप्रसङ्गेऽपि आलोचनं वर्तते कालिकापुराणे -

"तानि गन्धवहानि स्युः सुगन्धप्रथमस्मृतधृष्टो मलयजो गन्धेसचूर्णीकृतमेरुणा।"[५]

अस्मिन् जगति सुगन्धद्रव्यस्य ख्यातिः सदैव विराजते। सुगन्धद्रव्येषु धूपः पूर्वकालतः एव मनुष्याणां मनसि वर्तते। सुगन्धमिश्रितेन अतीव मनोहरेण धूपेन सर्वे आनन्दिताः भवन्ति। कालिकापुराणे अस्य सुगन्धिधूपस्य वर्णना दीयते एवंप्रकारेण -

"नासाक्षिरन्ध्रसुखदसुगन्धोऽतिमनोहरः।<br>
दह्यमानस्य काष्ठस्य प्रयतस्येतरस्य च॥<br>
परागस्याथवा धूमो निस्तापो यस्य जायते।<br>
स धूपः इति विज्ञेयो देवानां तुष्टिदायकः॥"[६]

पौराणिककालमतिक्रम्य महाभारतस्य समयेऽपि साजसज्जायाः विशेषता दरीदृश्यते। तस्मिन् समये विरागवसनस्य, चन्दनस्य तथा गन्धद्रव्यानाम् अनुलेपनस्य व्यवहारोऽपि मनुष्येषु प्रचलितः आसीत्। महाभारतस्य सभापर्वणः विंशतितमेऽध्याये महर्षिवेदव्यासेनोक्तम् -

"विरागवसनाः सर्व्वे स्रग्मिणो मृष्टकुण्डलाः॥"[७]

"शालस्तम्भनिभास्तेषां चन्दनागुरुरूषिता॥"[८]

सम्भ्रान्ताः राजानः रागरञ्जितवस्त्राणि धृतवान्तः। अनुलेपनग्रहणम् अपि नृपेण क्रियते। महाभारतस्य सभापर्वणः विंशतितमेऽध्याये प्रसङ्गेऽस्मिन् उक्तम् -

"एवं विरागवसनाः वहिर्माल्यानुलेपनाः।<br>
सत्यं वदत के यूयं सत्यं वाजसु शोभते॥"[९]

**महाकवेः कालिदासस्य खण्डकाव्ययोः प्रसाधनसामग्र्याः व्यवहारः :-**

"अपारे काव्यसंसारे कविरेकप्रजापतिः।"[१०]

अर्थात् यथा प्रजापतिः ब्रह्मा अस्य जगतः स्रष्टा, तथैव कविः अपि काव्यसंसारस्य एकः एव प्रजापतिः। कविः स्वकीयेन मनसा

जगत् विविधेन प्रकारेण व्याख्यातुं शक्नोति। मम्मटाचार्येण तस्य काव्यप्रकाशग्रन्थस्य प्रथमे उल्लासे उक्तम् -

"नियतिकृतनियमरहिताम्।"[११]

अर्थात् कवयः प्रकृतेः बन्धनं न स्वीकुर्वन्ति । ते मुक्तहस्तेन काव्यसौन्दर्यं वर्णयन्ति । पण्डितप्रवरः राजशेखरः तस्य काव्यमीमांसायां साहित्यं पञ्चमवेदरूपेणाङ्गीकृतवान्। तस्य मतानुसारेण -

"पञ्चमी साहित्यविद्या इति यायावरीयः।"[१२]

प्रथितयशाः कविकुलगुरुः कालिदासः संस्कृतसाहित्ये कल्पवृक्षस्वरूपः। यथा देवतरुषु श्रेष्ठः कल्पवृक्षः मानवानां सर्वेषां कामनापूर्तिं करोति , तथैव साहित्यपिपासूनां सहृदयपाठकानां मनः शृङ्गारादिरसैः पूर्णं क्रियते महाकविना कालिदासेन।

महाकवेः कालिदासस्य सर्वश्रेष्ठकीर्तिस्तावत् अभिज्ञानशकुन्तलमिति नाटकं , यत्र प्रसाधनसामग्र्याः व्यवहारः भूयः एव परिलक्ष्यते। न केवलम् अभिज्ञानशकुन्तले अपि तु विक्रमोर्वशीय-कुमारसम्भवादिषु सर्वेषु नाटक-महाकाव्यादिषु साजसज्जायास्तथा प्रसाधनसामग्र्याः भूयः भूयः प्रयोगाः दरीदृश्यन्ते। कालिदासकालीनसमाजे पुरुषनारीणां साजसज्जायाः उपकरणानि कीदृशानि सन्ति तेषां वर्णना कालिदासस्य ग्रन्थानुसन्धानेभ्यः पाठकाः जानन्ति। अत्र वर्तमानप्रबन्धे कालिदासविरचिते खण्डकाव्यद्वये गन्धद्रव्यादिप्रसाधनसामग्र्याः कीदृशः व्यवहारः परिलक्ष्यते तदेव संक्षेपेणालोच्यते।

**ऋतुसंहार-खण्डकाव्ये प्रसाधनस्य व्यवहारः :-** महाकविना कालिदासेन निपुणतया स्वप्रतिभया प्रकृतेः ग्रीष्मादीनां षण्णाम् ऋतूनां वर्णना दृश्यते ऋतुसंहारनामके षट्सर्गात्मके अस्मिन् खण्डकाव्ये। खण्डकाव्येऽस्मिन् प्रकृतेः ऋतूनां मनोमुग्धकरं हृदयविलासितं वर्णनमस्ति। ऋतुपरिवर्तनेन सह मनुष्याणां जीवनशैली केन प्रकारेण परिवर्तते तस्य प्राञ्जलं मनोज्ञं च वर्णनमपि खण्डकाव्येऽस्मिन् उपलभ्यते। ऋतूनां वर्णनावसरे मनुष्याणां जीवनयात्रायाः तथा व्यवहारयोग्यानां प्रसाधनसामग्रीणां वर्णनापि महाकविना क्रियतेऽत्र। प्रसाधनीषु चन्दनस्य व्यवहारः , अङ्गदस्य व्यवहारः कङ्कणस्य च व्यवहारः एवंप्रकारेण बहूनां प्रसाधनसामग्रीणां व्यवहारोऽस्मिन् खण्डकाव्ये दृश्यते।

षट्सु ऋतुषु प्रथमस्तावत् ग्रीष्मः। खण्डकाव्यस्य प्रथमे श्लोके ग्रीष्मकालस्य प्रबलदावदाहस्य वर्णनां कृत्वा परवर्तिनि श्लोके प्रबलोत्तापस्य प्रशमनस्यापि विषये वाणीवरपुत्रेण कालिदासेन उच्यते -

"मणिप्रकाराः सरसञ्च चन्दनम्।
शुचौ प्रिये यान्ति जनस्य सेव्यताम्॥"[१३]

अर्थात् मनुष्याः ग्रीष्मकालीनोत्तापस्य प्रशमनाय शरीरे चन्दनादिकम् अनुलिम्पन्ति। चन्दनादिकस्य प्रसाधनस्य व्यवहारोऽस्मिन् खण्डकाव्ये विविधे स्थाने वर्तते। ऋतुसंहारस्य प्रथमे सर्गे नारीणां स्तनयुगलयोः वर्णनाप्रसङ्गे कविना प्रोच्यते -

"पयोधराश्चन्दनपङ्कचर्चिता-
स्तुषारगौरार्पितहारशेखराः॥"[१४]

श्लोकेनानेन वयम् अवगन्तुं शक्नुमः यत् ग्रीष्मकाले नार्यः स्तनयुगले चन्दनस्य प्रलेपनं ददति। किञ्च स्तनयोः चन्दनस्य व्यवहारः प्रथमे सर्गे पुनरुल्लिख्यते -

"स्तनैः सहाराभरणैः सचन्दनैः।"[१५]

चन्दनादिकं व्यतीत्य चन्द्रहारमणिमयालङ्काराणां वर्णना विविधेषु श्लोकेषु वारं वारं दृश्यते। कवेः वर्णनावसरे एवमत्रोपलभ्यते यत् चन्द्रहारमणियुक्तैः अलङ्कारैः पौररमण्यः प्रवासिजनानां चित्तं हरन्ति -

"स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला
हरन्ति चेतो युगपत् प्रवासिनाम्॥"[१६]

खण्डकाव्यस्यास्य तृतीये सर्गे कणितकनककाञ्ची-नामकस्य अलङ्कारस्य उल्लेखः वर्तते। अत्र कणितकनककाञ्ची-शब्दस्य अर्थस्तावत् स्वर्णचन्द्रहारः। चन्द्रहारस्यास्य वर्णना चतुर्थसर्गेऽपि विद्यते। कवेः कथनानुसारेण -

"काञ्चीगुणैः काञ्चनरत्नचित्रै-

र्नो भूषयन्ति प्रमदा नितम्बम् ॥"[१७]

श्लोके 'काञ्चनरत्नचित्रैः काञ्चीगुणैः' इत्यस्य अर्थस्तावत् मणिरत्नसुशोभितः चन्द्रहारः। कवेः वर्णनानुसारेण प्रमदाः सुशोभितैः रत्नखचितैः चन्द्रहारैः नितम्बभागस्य शोभां वर्धयन्ति। किञ्च पुनः ताः रमण्यः रत्नमणीमयेन चन्द्रहारेण स्वासां कण्ठम् समावृत्य स्वासां वक्षयुगलम् अपि अपावृण्वन्तीति अस्य विषयस्य वर्णना विविधस्थानेष्वप्यस्ति। ऋतुसंहारस्य अन्तिमे सर्गे कविना उद्यते -

"अलम्बि-हेमरसनाः स्तन-सक्त-हाराः
कन्दर्प-दर्प-शिथिलीकृत-गात्रषष्ट्यः ॥"[१८]

ऋतुसंहार-खण्डकाव्ये महिलायाः व्यवहारयोग्यप्रसाधनसामग्रीरूपेण नूपुरस्यापि वर्णना दरीदृश्यते। नूपुरः नारीणां कृते एकविशेषप्रकारकं साजसज्जायाः वस्तु। नूपुरस्य उल्लेखः वाणीवरपुत्रेण क्रीयते -

"कामं च हंसवचनं मणिनूपुरेषु ॥"[१९]

अत्र 'मणिनूपुरः' इत्यस्य अर्थः सुसज्जितमणिना निर्मितः नूपुरः। नूपुरस्य वर्णना चतुर्थसर्गेऽपि दृश्यते - 'न नूपुरैर्हंसरूतं' इति पदेन। ऋतुसंहारस्य रचनायाः समये समाजेस्थिताभिः महिलाभिः हस्तयुगलस्य अलंकाररूपेण अङ्गदस्य व्यवहारः क्रीयते। अङ्गद-शब्दस्य अर्थः कङ्कणम्। दीपशिखोपादिधारिणा महाकविना प्रोच्यते -

"न वाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि ॥"[२०]

पदयुगलस्य रञ्जनाय तथा सौन्दर्यवर्धनाय ललिताभिः लाक्षारसस्य प्रयोगः दृश्यते -

"नितान्तलाक्षारसरागरञ्जितै-
नितम्बनीनां चरणैः ॥"[२१]

अर्थात् लाक्षारसरञ्जनेन नार्यः तासां पदयुगलं रञ्जयन्ति। न केवलं पादरञ्जनाय अपि तु वस्त्रं सुशोभितं कर्तुं लाक्षारसस्य व्यवहारः नारीभिः क्रियते इति कविः सुस्पष्टतया वर्णयति। ऋतुराजवसन्तस्य आगमनकाले कामनिमग्नाः नार्यः शरीरस्य पुरुवस्त्रं विहाय लाक्षारससिक्तं रक्तवर्णरञ्जितं शीथिलं वस्त्रं परिदधते -

"गुरुणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ॥"[२२]

एवंप्रकारेण ऋतुसंहारकाव्ये प्राप्तानां प्रसाधनीवस्तूनां संक्षेपेण सम्यग् आलोचनं कृतं यथामति।

**मेघदूते प्रसाधनसामग्र्याः व्यवहाराः :-** महाकविकालिदासेन विरचितम् एकमात्रं दूतकाव्यं तावत् मेघदूतम्। प्रभुशापेन प्रियात् विच्छिन्नस्य यक्षस्य हृदयविदारिका गीतिका अस्मिन् दूतकाव्ये कालिदासेन वर्णिता। जगति एतादृशः कोऽपि सहृदयः पाठकः नास्ति यस्मै न रोचते काव्यमिदम्। प्रियाविरहतः चेतनाहीनः सन् यक्षः चतनाचेतनभेदं विस्मृत्य अचेतनं धूमज्योतिःसलिलमरुतसन्निविष्टं मेघमेव स्वप्रियायाः समीपे वार्ताप्रेषणाय दौत्यकार्ये न्ययोजयत्। मेघस्य यात्रापथस्य वर्णनावसरे वाणीवरपुत्रः आनुसङ्गिकं विविधं विषयं चित्रितवान्। पूर्वमेघे तथा उत्तरमेघे उभेयत्रैव कविना वर्णितेषु विविधेषु विषयेषु प्रसाधनसामग्रीणां वर्णना न केवलं पाठकानां चित्ताकर्षणं क्रियते, अपि तु पाठकाः तदानीन्तने समाजे स्थितानां जनानां साजसज्जायाः उपकरणानि ज्ञातुं समर्थाः भवन्ति। ग्रन्थारम्भे मङ्गलाचरणात् अनन्तरं
प्रभुशापेन प्रियाविच्छिन्नशोकातुरस्य नवोद्वाहसम्पन्नयक्षस्य मानसिकपीडा सम्बोधितुं महाकविना प्रोद्यते -

'कनकवलयभ्रंशरिक्तप्रकोष्ठः।'[२३]

अत्र 'कनकवलयः' शब्दस्य अर्थस्तावत् स्वर्णकङ्कणम्। कविकुलगुरुकालिदासस्य वर्णनया सहृदयाः अवगन्तुं शक्नुवन्ति यत् मेघदूतस्य रचनाकाले पुरुषाः अपि कनकवलयं मलितवन्तः। पूर्वमेघे एकस्मिन् स्थाने मेघविरहेण विरोहिण्याः सिन्धुनद्याः कीदृशी अवस्था जायते तस्याः अवस्थायाः वर्णनावसरे महाकविना समुल्लिख्यते -

"वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धुः ॥"[२४]

श्लोकेऽस्मिन् वेणीशब्दस्य अर्थः केशरचनाविशेषः इति। प्रमदाः तासां केशसज्जाविषये यां यां शैलीं व्यवहृतवत्यः , तासु शैलीषु वेणी तु अन्यतमा । मेघदूतस्य पूर्वमेघस्य एकस्मिन् श्लोके नारीणां केशसंस्कारादौ प्रसाधनरूपेण धूपस्य उल्लेखः विद्यते । उज्जयिनीनगर्याः योषितः केशप्रक्षालनतोऽनन्तरं केशेषु सुगन्धम् आनेतुं धूपनामक-गन्धद्रव्यस्य धूमस्य व्यवहारं कृतवत्यः । टीकाकारः मल्लिनाथोऽपि 'केशसंस्कारधूपैः' इति पदस्य व्याख्यानकाले सञ्जीवनीटीकायाम् प्रब्रूते -

"केशसंस्कारधूपैः वनिताकेशवासनार्थैः गन्धद्रव्यधूपैः इत्यर्थः ।"[२५]

किञ्च पुनः तत्र दृश्यते ललितकन्याः पादरञ्जकरूपेण लाक्षारसस्य व्यवहारं कुर्वन्ति।

"ललितवनितापादरागाङ्कितेषु ।"[२६]

अत्र श्लोके पादराग-पदस्य अर्थस्तावत् 'लाक्षारसः'। वाणीप्रतिभाधन्यः कालिदासः पूर्वमेघे उज्जयिनीनगर्याः सौन्दर्यवर्णनावसरे एकस्मिन् श्लोके लिखति यत् उज्जयिन्यां यानि यानि उद्यानानि सन्ति , तेषु प्रस्फुटितानां नीलपद्मानां सुगन्धमिश्रितः निर्मलवायुः यथा प्रवहति तथा गन्धवत्यां नद्यां स्नानरतानां नारीणां स्नानसुगन्धद्रव्यस्य शोभनगन्धः सदा उज्जयिन्यां निर्मलवायुं वोढुं सनतीति -

"धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्य-
स्तोयक्रोडा-निरत युवतिस्नान-तिक्तैर्मरुद्भिः ॥"[२७]

मल्लिनाथसूरिः सञ्जीवनीटीकायाम् अस्य प्रसङ्गस्य विश्लेषणावसरे व्याख्यायते –

"कुवलय-रजोगन्धिभिः उत्पलपरागगन्धवद्भिः तोयक्रोडासु निरतानाम् आसक्तानां युवतीनां स्नानं , स्नानीयं चन्दनादि...।"[२८]

अर्थात् मल्लीनाथसूरिणा युवतीनां स्नानस्य उपकरणरूपेण चन्दनादिगन्धद्रव्यानां प्रयोगः उल्लिख्यते।

चर्मण्वतीनद्याः वर्णनाकाले कविः मुक्तहारस्य उपमा लिखति। मेघालोकटीकायां इदं व्याख्या अनेन प्रकारेण -

"शुभ्रा सा जलवेणी धरित्र्याः कण्ठे लम्बमाना मुक्तामयी हारयष्टिः त्वत्सङ्गात् विलसन्नीलेन्द्रमणिनायका इव शोभिष्यते ।"[२९]

कोमलकिसलयवस्त्रस्य उल्लेखः पूर्वमेघे दृश्यते , यस्मात् वयं जानीमः यत् तस्मिन् समये कोमलमसृणवस्त्रस्य कीदृशः व्यवहारः मनुष्यैः अक्रियत -

'किशलयान्यंशुकानीव'[३०]

नार्यः विविधप्रकारेण केशपरिचर्यां केशसज्जां च कुर्वन्ति। महाकविः कालिदासः वर्णयति -

"मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ।"[३१]

कविकुलगुरुकालिदासस्य व्याख्यानानुसारेण प्रमदाः केशसज्जासमये तासां केशान् मुक्ताहारेण सज्जीकुर्वन्ति । मल्लीनाथसूरेः टीकानुसारेण -

"कामिनी स्त्री मुक्ताजालैः मौक्तिकसरैः ग्रथितं प्रत्युप्तम् ॥"[३२]

पूर्वमेघात् अनन्तरम् उत्तरमेघेऽपि नारीणां साजसज्जायाः उपकरणरूपेण विविधप्रसाधनानां प्रयोगः दृश्यते । पुष्पनिर्मितं विविधालंकारादिकं ताः स्वासाम् अङ्गेषु परिदधति , यथा - केशेषु बालकुन्दस्य हारः , कर्णयोः शिरिषकुसुमं , कवर्यां सद्यप्रस्फुटितं कुरुवकपुष्पम् इत्यादयोऽलङ्काराः। महाकविना उच्यते -

"हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।
चूडापाशे नवकुरुबकं चारुकर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥"[३३]

रमण्यः कटिदेशे एकविशेषप्रकारकम् अलंकारम् अदधुः , कवेः भाषायां यदुच्यते 'नोवीबन्धः' इति।[३४]

महिलानां व्यवहारयोग्यवस्त्ररूपेण क्षौमवस्त्रस्य उल्लेखः दृश्यते । पुनः चरणे लाक्षारसस्य व्यवहारः उत्तरमेघस्य एकस्मिन् श्लोके समुपलभ्यते -

"लाक्षारागं चरणकमलन्यासयोग्यञ्च यस्याम् ।"[३५]

उत्तरमेघे अञ्जनशब्दस्य प्रयोगोऽस्ति 'अञ्जनस्नेहशून्यम्' इति ।[३६] नयनस्य प्रसाधनीरूपेण अञ्जनं व्यवह्रियते । अञ्जनं नाम कज्जलमिति। नयनस्य शोभावर्धनाय कज्जलस्य व्यवहारः प्राचीनकालादेव जनसमाजे प्रचलितः आसीत्। सरस्वतीकृपाप्राप्तमहाकविकालिदासस्य रचनैव तत्र प्रमाणमिति ।

**उपसंहतिः :-** भारतवर्षः पुण्यात्मनाम् जन्मभूमिः । भारतवर्षे प्राचीनकालादारभ्य ऋषिचिन्तनपरम्परायाः आविर्भावः अभवत् । इयं ज्ञानपरम्परा तथा ऋषिपरम्परा अस्मान् सर्वाङ्गीनविकाशस्य उच्चतममार्गे अधिष्ठितवती । महाकविः कालिदासः अपि भारतमातुः यथार्थः सन्तानः । सः तस्य लेखन्या अस्मान् विश्वज्ञानपरम्परायाः समीपे आनीतवान् । समयस्य परिवर्तनं जातम् एवञ्च तेनैव सह मनुष्याणां जीवनयात्रायाः , व्यवहारयोग्यप्रसाधनसामग्रीणां तथा साजसज्जायाः कौशलानाम् अपि परिवर्तनं दृष्टम् । परन्तु कज्जलं , नूपुरः , कङ्कणं , कोमरमेखला , चन्दनं , रत्नहारः , कवरी वेणी चेत्यादीनि प्रसाधनानि अधुनापि जनजीवने समानतया अधितिष्ठन्ति। आलोच्यमानेऽस्मिन् शोधप्रबन्धे महाकवेः कालिदासस्य खण्डकाव्यद्वयम् अवलम्ब्य प्रसाधनसामग्रीणां विचारः क्रियते । महाकवेः समग्रलेखनीम् एकीकृत्य प्रसाधनविषये व्याख्यास्यते चेत् सहृदयान् पाठकान् निकषा तत्तु अतीव चित्ताकर्षकं हृदयग्राहि च भविष्यति एवञ्च तत् अस्माकं संस्कृतेः गौरवं माहात्म्यं च रक्ष्यति वर्धिष्यति च इति शम् ।

**परिशीलितग्रन्थपञ्जिः :-**


कालिदास। *मेघदूतम्।* सम्पा. श्री वैद्यनाथ झा शास्त्री। वाराणसी: कृष्णदास अकादमी, २००२ (चतुर्थ संस्करण)।

चक्रवर्ती, सत्यनारायण। *मेघदूत ओ सौदामनी।* कलकाता: संस्कृत पुस्तक भाण्डार,२०१९ (तृतीय संस्करण)।

तिवारी, रमाशंकर। *महाकवि कालिदास।* वाराणसी: चौखम्बा विद्याभवन, वि.सं. २०१८ (प्रथम संस्करण)।

मम्मटाचार्यः। *काव्यप्रकाशः।* सम्पा. श्रीनिवास शर्मा । वाराणसी: द भारतीय विद्या प्रकाशन, २०२२ (षष्ठसंस्करण)।

व्यासदेव। *कालिकापुराण*( द्वितीय खण्ड)। सम्पा. डॉ. चमनलाल गौतम। वरेली: संस्कृति संस्थान, १९७३ (प्रथम संस्करण)।

राजशेखर । *काव्यमीमांसा।* सम्पा. श्री नगेन्द्रनाथ चक्रवर्ती। वीरभूम: शान्तिनिकेतन प्रेस, सेप्टेम्बर १९६०।

Upadhyaya, B.S. *India in Kalidasa.* Allahabad: Kitabistan, 1947.

Upadhyaye, Shasri Vyankatacharya. *The Ritusamhara of Kalidasa*. Patna: MotilalBanarsidass,1967 (2nd ed).


**आन्तर्जालिकपञ्जिः** :-

https://archive.org/
https://ashtadhyayi.com/
https://sanskritsahitya.org/
https://vedicheritage.gov.in/
https://www.drishtiias.com/
https://www.mha.gov.in/en

**उल्लेखपञ्जिः** :-

१. ऋग्वेदः ७/५९/१२
२. ऋग्वेदः १/१४७/६
३. Rigvedasamhita, page. 255

४. कालिकापुराण (देवाराधन के अन्य उपचार),पृ. ४५४
५. तदेव
६. तत्रैव, पृ. ४७०
७. महाभारतम्, सभापर्व, २०/२४
८. महाभारतम्, सभापर्व, २०/२५
९. तत्रैव, सभापर्व, २०/४०
१०. अग्निपुराणम्
११. काव्यप्रकाशः १/१
१२. काव्यमीमांसा, प्रथमाध्यायस्य द्वितीयाधिकरणम्
१३. ऋतुसंहारः १/२
१४. तत्रैव, १/६
१५. तत्रैव, १/४
१६. तत्रैव, २/१९
१७. तत्रैव, ४/४
१८. तत्रैव, ६/२४
१९. तत्रैव, ३/२५
२०. तत्रैव, ४/३
२१. तत्रैव, १/५
२२. तत्रैव, ६/१३
२३. मेघदूतम्, पूर्वमेघः १/२
२४. तत्रैव, पूर्वमेघः३०
२५. तत्रैव, पूर्वमेघः ३३
२६. तत्रैव, पूर्वमेघः३३
२७. तत्रैव, पूर्वमेघः ३४
२८. मेघदूत ओ सौदामनी, पृ. १८४
२९. तत्रैव, पृ. २१२
३०. मेघदूतम्, पूर्वमेघः ६३
३१. तत्रैव, पूर्वमेघः ६४
३२. मेघदूत ओ सौदामनी, पृ. २४६
३३. मेघदूतम्, उत्तरमेघः २
३४. तत्रैव, उत्तरमेघेः ७
३५. तदेव
३६. मेघदूतम्, उत्तरमेघः ३४

# शाण्डिल्योपनिषदि अष्टाङ्गयोगविमर्शः

कालीचरणदासः, शोधच्छात्रः
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः
दूरभाषसंख्या-7699943296/9733590943
अणुवाक्संख्या-kalicharansitalgram@gmail.com

**शोधसारः-** भारतीयज्ञानपरम्परायाः आधारः विविधभारतीयशास्त्रम्। शास्त्रे बहुविषयकं ज्ञानं निहितमस्ति। तत्र वेदः अस्माकं प्राचीनग्रन्थः वर्तते। वेदे निहितं ज्ञानम् अस्माकं जीवनस्य आधारस्वरुपम्। वेदस्य कर्मकाण्डज्ञानकाण्डयोः ज्ञानकाण्डः उपनिषद्रुपेण परिचितः।

सर्वस्याम् उपनिषदि निहितं ज्ञानं मूलतः मोक्षलाभाय। यतः पुरुषार्थचतुष्टयेषु मोक्षः सर्वेषां काम्यविषयः। तदर्थं अनेकाः मार्गाः उपायाः च वर्णिताः विभिन्नेषु शास्त्रेषु। उपनिषद्शास्त्रेऽपि मोक्षलाभाय पन्थानः वर्तन्ते। शोधपत्रे अष्टोत्तरशतोपनिषद्सु अथर्ववेदीयां शाण्डिल्योपनिषदि आत्मोपलब्धेः उपायः अष्टाङ्गयोगः वर्णितः। पातञ्जले योगदर्शने तस्य योगाङ्गस्य वर्णनं प्राप्यते, परन्तु अस्यामुपनिषदि सविभागं सविशेषं सविस्तृतञ्च वर्णितमस्ति। तत्र यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि इति विवरणं सुष्ठु मिलति। एतेन अष्टाङ्गयोगेन योगिनः परमानन्दं प्राप्नुवन्ति, आत्मोलब्धिञ्च कुर्वन्ति।

साम्प्रतिके युगे शारिरीक-मानसिकसमस्यायाः वैविध्यं दृश्यते। तासां समस्यानां दूरीकरणाय प्राचीनमार्गः योगः तथा योगाभ्यासः। अष्टाङ्गयोगेन योगाभ्यासः क्रीयते चेत् अधिकाधिकं लाभः। अनेकाः शारिरीकसमस्याः मानसिकसमस्याः च नश्यन्ति। यत शरीरं तथा स्वास्थ्यं सम्पदेव। कालिदासस्य कुमारसम्भवे अपि दृश्यते **"शरीरमाद्यं खलु धर्मसाधनम्"**[1]

**शब्दसंकेताः-** योगतत्त्वम्, यमनियमादयः, आत्मतत्त्वम्, ब्रह्मतत्त्वम् इत्यादयः।

**भूमिका-** वैदिकवाङ्मयम् अतिविशालम् तस्य व्यापकत्वात्। वेदस्य विभागचतुष्टयेषु उपनिषद् अन्तिमभागः। अतः उपनिषद् वेदान्तः इति। उपनिषद् रहस्यविद्या रुपेण परिचिता। ये ब्रह्मज्ञानीनां समीपे आगत्य रहस्य विद्यायाः अनुशीलनं कुर्वन्ति, ते रहस्यविद्याप्रभावेन तेषां सांसारिकानर्थम् अविद्यादिकञ्च समूलं नश्यन्ति। उपनिषदः ज्ञानं गुह्यं, तस्मात् कथ्यते कठोपनिषदि- **"य इमं परमं गुह्यम्"** [2] इति। श्वेताश्वतरोपनिषदि अपि विषये अस्मिन् प्रचलितम् यत्– **"वेदान्ते परमं गुह्यम् पुराकल्पे प्रचोदितम्"**[3] इति। अष्टोत्तरशतोपनिषदां मूलविषयः ब्रह्म आत्मा चेति। ब्रह्मविद्यायाः प्रकाशः आदौ वेदे परिलक्षितः। आत्मा ब्रह्मैव। अत् धातोः उत्तरं मन् प्रत्यययोगात् आत्मन् इति शब्दः निष्पन्नः। आत्मा नित्यः शुद्धः बुद्धः ज्ञाता चेति। अयमात्मा सर्वव्यापी, अनेकासु उपनिषद्सु ब्रह्मात्मनोः एकत्वं प्रतिष्ठितम्। आत्मानम् अवबोधनाय, आत्मोपलब्धिकरणाय बहुषु उपायेषु अन्यतमोपायः अष्टाङ्गयोगः। पातञ्जले योगदर्शने अष्टाङ्गयोगविषये चर्चा दृश्यते। तस्यैव अष्टाङ्गयोगस्य विशेषतया वर्णनम् अस्यामुपनिषदि अपि उल्लिखितमस्ति। तत्र यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान समाधयः इति। शाण्डिल्योपनिषदि अष्टाङ्गयोगस्य आलोचना आत्मोपलब्धेः साधकरूपेण कृता अस्ति, तत्तु अस्माकं ज्ञातव्यम्।

ब्रह्मतत्त्वमेव उपनिषदां मूलप्रतिपाद्यविषयः। प्रसङ्गे अस्मिन Winter Nitz महोदयेन प्रोक्तम्–" **The entire thought of the Upanisad philosopher revolve around the two conceptions of Brahman and Atman**"[4] पुनश्च केनोपनिषदि द्रष्टुं शक्यते-- **"न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो**
**न विद्मो न विजानीयो यथैतदनु शिष्यात्।**
**अन्यदेव तद्विदितादथो अविदितादधि**
**इति शुश्रुमः पूर्वेषां ये नस्तद् व्याचचक्षिरे॥"**[5]

**शाण्डिल्योपनिषदः परिचयः-** मुक्तिकोपनिषदि वर्णितेषु अष्टोत्तरशतपोनिषद्सु अथर्ववेदीयैकत्रिंशदुपनिषद्सु

शाण्डिल्योपनिषद् अन्यतमा। अस्यामुपनिषदि शाण्डिल्य-अथर्वनामकयोः ऋषिद्वयोः कथोपकथनेन योगविद्यायाः सविशदं विवरणं प्राप्यते। वेदान्तदर्शनस्य तत्त्वम्, योगदर्शनस्य तत्त्वम्, आत्मतत्त्वम्, ब्रह्मतत्त्वम् इत्यादयः वर्णिताः सन्ति। सुचारुरुपेण अष्टाङ्गयोगस्य विवरणं विज्ञानात्मकम्। अत्र अध्यायत्रयम्। अध्यायत्रयेषु प्रथमोऽध्याये एकादशखण्डानि, द्वितीयोऽध्यायः, तृतीयोऽध्याये खण्डद्वयम् च सन्ति। यथाक्रमम् आदौ आत्मोपलब्धेः उपायस्वरूपः अष्टाङ्गयोगः विशदरूपेण वर्णितः, द्वितीयोऽध्याये ब्रह्मणः सर्वव्यापीत्वम्, अनिर्वचनीयत्वम् पुनश्च तृतीयोऽध्याये ब्रह्मणः सृष्टिप्रक्रियादि॥

**मूलविषयः-** योगः चित्तशुद्धेः कारणम्। योगः जीवात्मना परमात्मनोः सम्पर्कं साधयति। पातञ्जले योगसुत्रे योगस्य अष्टाङ्गत्ववत् शाण्डिल्योपनिषदि अपि योगस्य अष्टाङ्गत्वं साधितम् यमनियमादिविभागरुपेण, तत्तु योगतत्त्वं कथितुं शक्यते। महर्षेः शाण्डिल्यस्य प्रश्नस्योत्तरे ऋषिः अथर्वा आत्मोलाभोपायभूतम् अष्टाङ्गयोगमुवाच- **"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि। तत्र दश यमाः। तथा नियमाः। आसनान्यष्टौ। त्रयः प्राणायामाः। पञ्च प्रत्याहाराः। तथा धारणाः। द्विप्रकारं ध्यानम्। समधिस्त्वेकरूपः"**[6] अर्थात् यमाः दशप्रकाराः, नियमाः दशप्रकाराः, अष्टप्रकारानि आसनानि, प्रकारत्रयः प्राणायामः, पञ्चविधः प्रत्याहारः, तथैव धारणा अपि, प्रकारद्वयं ध्यानम्, समाधिः एकैव। यत्तु पातञ्जते योगदर्शने वैसादृश्यं दृश्यते यथा तत्र यमाः पञ्चधाः, नियमाः पञ्चधाः, नवासनानि, एवमेव।

**यमः- " तत्राहिंसासत्यस्तेयब्रह्मचर्यदयार्जवक्षमाधृतिमिताहारशौचानि चेति यमा दश "**[7] अस्यामुपनिषदि यमाः दश। यथा- अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, दया, सरलता, क्षमा, धैर्यम्, मिताहारः, शौचं तथा पवित्रता। एतेषु मनसा वाचा कायया कर्मणा च सर्वभूतेषु कदापि दुःखानि न प्रदेयानि – **"तत्र मनोवाक्कायकर्मभिः सर्वभूतेषु सर्वदाऽक्लेशजननम्"**[8] मन-वाक्-काय-कर्मभिः भूतानुकुलयथार्थाभिभाषणं नाम सत्यम्। परद्रव्येषु निर्लोभः अर्थात् लोभः न करणीयः मनोवाक्कायकर्मभिः, एतत्तु अस्तेयमुच्यते। सर्वासु अवस्थासु सदा मनवाक्कायकर्मभिश्च मैथुनस्य त्यागः ब्रह्मचर्यं कथ्यते। ये पञ्चयमाः एतदतिरिक्तं पञ्चयमाः विद्यन्ते अत्र तद्यथा दया – सर्वजनेषु तथा सर्वप्राणी-पशुषु कृपा करणीया। आर्जवं कथ्यते-**"आर्जवं नाम मनोवाक्कायकर्मणां विहिताविहितेषु जनेषु प्रवृत्तौ निवृत्तौ वा एकस्वरूपम्"**[9] पुनः क्षमा इत्युक्ते या काऽपि प्रियाप्रियाः घटनाः पूजन-ताडनादि घटनाश्च ताः सहनमिति। धनहानौ, स्वेष्टजनस्य वियोगे तस्य प्राप्तौ च सर्वत्र चित्तस्य स्तिररूपता धृति। उदरे चतुर्थांशावशेषकं घृतदुग्धमधुराद्याहारग्रहणं मिताहारः कथ्यते- **"मिताहारो नाम चतुर्थांशावशेषकसुस्निग्धमधुराहारः"**[10] अन्तिमयमः शौचम् अर्थात् शुचिता पवित्रता वा। शौचस्य द्वैविध्यं बाह्याभ्यन्तरभेदेन कृतम्। मृज्जलाभ्यां बाह्यशुद्धिः भवति, आन्तरशुद्धिस्तु मनसः शुद्धिः, तदध्यात्मविद्यया लभ्यते।

**नियमः- "तपः सन्तोषास्तिक्यदानेश्वरपूजनसिद्धान्तश्रवणह्रीमतिजपव्रतानि दश नियमाः"**[11] अर्थात् तपः, सन्तोषः, आस्तिक्यम्, दानम्, ईश्वरपूजनम्, सिद्धान्तश्रवणम्, ह्रीः, मतिः, जपः, व्रतम् इत्येताः नियमाः। तत्र विधिपूर्वकं कृच्छ्रचान्द्रायणादिव्रतेन शरीरस्य शोषनम् तपः कथ्यते। भगवतः कृपया इच्छया च यदेव मिलति हस्तगतञ्च भवति तस्मिन् लाभे सन्तुष्टिः सन्तोषः कथ्यते। वेदप्रयुक्तं धर्माधर्मादिकं प्रति विश्वासकरणम् आस्तिक्यस्य लक्षणम्। वेदस्य प्रामाण्यं ये अङ्गीकुर्वन्ति ते आस्तिकाः। न्यायेन अर्जितस्य धनस्य भक्तिश्रद्धया दीनजनान् प्रति समर्पणं दानमुच्यते। चित्तशुद्धेः अनन्तरं प्रसन्नचित्तेन श्रद्धानिष्ठया भगवतः तथा विष्णुरूद्रादिदेवतायाः पूजनम् ईश्वरपूजनं कथ्यते। योगदर्शने ईश्वरपूजनम् ईश्वरप्रणिधानमिति रूपेण वर्णितम्। वेदान्तस्य तथा उपनिषदः निगुढतत्त्वार्थस्य विचारपूर्वकग्रहणं श्रवणञ्च सिद्धान्तश्रवणम्। ह्री इत्यस्यार्थः लौकिकशास्त्रेषु वैदिकशास्त्रेषु च अधममानात्मकं कार्यं वहु वर्णितं, तस्मिन् कार्ये लज्जा स्तापनं विरक्तभावनमिति – **"ह्रीर्नाम वेदलौकिकमार्गकुत्सितकर्मणि लज्जा"**[12]। वेदोक्तोत्तमकर्मसु श्रद्धास्थापनं हि मतिः। गुरूपदिष्टानां वेदमन्त्राणां विधिपूर्वकम् अभ्यासः जपः, वाचिक-मानसिकभेदेन जपः द्विविधं, पुनः उच्चैरुपांशुभेदेन वाचिकं द्विविधम्। उच्चरवेन कृतजपेन यथोक्तफलं लभ्यते, उपांशुना तु अधिकफलम् तथा सहस्रफलम्। अपरं मानसिकं कोटिफलप्रदायकम्। वेदोक्तविधिनिषेदपूर्वकम् अनुष्ठानम् तथा आचरणं हि ब्रतम्।

**आसनम्- "स्वस्तिकगोमुखपद्मवीरसिंहभद्रमुक्तमयूराख्यान्यासनान्यष्टौ"**[13] अर्थात् स्वस्तिकासनम्, गोमुखासनम्, पद्मासनम्,

वीरासनम् , सिंहासनम् , भद्रासनम् , मुक्तासनम् , मयूरासनम् इत्येतानि अष्टप्रकारानि आसनानि कथितानि। आसनस्य लक्षणं पातञ्जले योगदर्शने अस्ति "**स्थिरसुखमासनम्**" 14। तत्र स्वस्तिकासनविषये लिखितमस्ति " **जानूर्वोरान्तरे सम्यक्कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते**"॥ 15 एवम् अस्यामुपनिषदि सर्वेषाम् आसनानां लक्षणं प्रदत्तमस्ति। एतेन आसनाभ्यासेन शरीरं सम्यक् तिष्ठति , निरोगः भवति। आसनेषु योगिभिः सिंहासनं सदा पूजितम्। मयूरासनं सर्वपापहरणम्। यमनियमाभ्यां सम्पृक्तः पुरुषः प्राणायामं कर्तुं शक्नोति , एतेन नाडयः शुद्धा भवन्ति।

**प्राणायामः-** प्राणस्य आयामः अर्थात् संयमः प्राणायामः। प्राणापानादितः धनञ्जयपर्यन्तं शरीरे दश वायवः विद्यन्ते। दशसु वायुषु प्राणापनवायुद्वयोः एकत्रकरणं प्राणायामः कथ्यते। उच्यते- " **प्राणापनसमायोगः प्राणायामो भवति। रेचकपूरककुम्भकभेदेन स त्रिविधः॥ ते वर्णात्मकाः। तस्मात् प्रणव एव प्राणायामः॥**"16 अत्र प्रणवेति पदेन ओङ्कारः वोद्धव्यः अर्थात् अ-उ-म इति वर्णत्रयम्। अ वर्णेन रेचकः , उ वर्णेन पूरकः , म वर्णेन कुम्भकश्च ज्ञातव्याः। अकारमूर्तिः गायत्री भवति। या भवति रक्ताङ्गी , हंसवाहिनी , दण्डहस्ता , बाला – "**....अकारमूर्तीरक्ताङ्गी हंसवाहिनी दण्डहस्ता बाला गायत्री भवति।**"17 उकारमूर्तिः भवति सावित्री या श्वेताङ्गी , युवती , तार्क्ष्यवाहिनी , चक्रहस्ता। पुनः मकारमूर्तिः सरस्वती भवति या कृष्णाङ्गी वृषभवाहिनी वृद्धा त्रीशूलधारिणी। वर्णत्रयं मिलित्वा एकाक्षरं भवति तत्तु प्रणवं कथ्यते , यत्तु परमज्योतिविशिष्टम् , उच्यते तत्र- "**अकारादित्रयाणां सर्वकारणमेकाक्षरं परंज्योतिः प्रणवं भवतीति(ध्यायेत्)**"18 अनन्तरं अकारं चिन्तयन् इडानाड्या षोडशमात्राभिः बाह्योवायोः ग्रहणं तथा पुरणीयम् (पुरकः) , पुरितवायोः चतुःषष्टिमात्राभिः उकारं चिन्तयन् कुम्भकः करणीयम्। एतदनन्तरं पिङ्गलनाड्या द्वात्रिंशन्मात्राभिः मकारं चिन्तयन् पुरितवायोः रेचककार्यं समाप्य तं वायुं वहिः करणीयम्। एवं क्रमेण पुनः पुनः अभ्यासः करणीयः। प्रातः मध्याह्ने सायं मध्यरात्रौ च चतुर्वारं अशीतिमात्रापर्यन्तं शनैः शनैः कुम्भकाभ्यासः करणीयः। यथा पशुराजः गजः व्याघ्रश्च शनैः शनैः मानवानां वशीभूताः भवन्ति , तथैव शनैः वायुसेवनेन प्राणायामः करणीयः अन्यथा साधकनाशोऽपि भवति। एवं विचिन्त्य प्राणायामकरणेन योगिनः सिद्धिम् अर्जयन्ति। योगीनां वाह्यचिन्ता न करणीया तथैव आन्तरचिन्ताऽपि , चिन्ताशुन्यं भूत्वा परमतत्त्वे तथा आत्मतत्त्वे ते लीयमानं भवेयुः। यथा कर्पूरम् अनले सैन्धवञ्च सलीले विलीयेते। योगदर्शने तु "**तस्मिन सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः**"। 19 अर्थात् आसनजये सति वाह्यवायोः ग्रहणं श्वासः गृहीतवायोश्च निःसारणं प्रश्वासः , एतयोर्गतिविच्छेदोभयाभावः प्राणायामः कथ्यते। प्राणायामेषु वाह्यवृत्तिवीशेषः रेचकः , आभ्यन्तरवृत्तिविशेषः पूरकः, स्तम्भवृत्तिविशेषः कुम्भकः। प्राणायामे सिद्धे सति योगिनः हृदि इष्टदेवतायाः ध्यानं सहजेन कर्तुं शक्नुवन्ति।

**प्रत्याहारः-** यमनियमासनप्राणायामात् अनन्तरं प्रत्याहारः करणीयः। प्रत्याहारस्य सहजार्थः ईन्द्रियाणां विषयविमुखता। अर्थात् रुपरसगन्धस्पर्शशव्दयुक्तविषयान् प्रति ईन्द्रियाणाम् उदासीनता अनवधानता विमुखता च। सर्वस्मिन वस्तुनि आत्मेति दर्शनीयं प्रत्याहारः। सर्वविषयेषु अनुरागाभावः , नित्यकृतकर्मणां फलत्यागश्च प्रत्याहारः। अस्याम् अवस्थायां योगिनः चित्तं विषयासक्तिशून्यं भवति। शरीरस्य अष्टादशसु स्थानेषु धारणा करणीया। पुनः प्रत्याहारोऽयं पञ्चविधः। उच्यते तत्र शाण्डिल्योपनिषदि एतस्मिन् विषये - "**विषयेषु विचरतामिन्द्रियां बलादाहरणं प्रत्याहारः। यद्यत् पश्यति तत् सर्वमात्मेति प्रत्याहारः। अष्टादशसु मर्मस्थानेषु क्रमाद्धारणं प्रत्याहारः। पादाङ्गुष्ठगुल्फजङ्घाजानूरुपायुमेढ्रनाभिहृदयकण्ठकूप-तालुनासाक्षिभ्रूमध्यललाटमूर्ध्नि सथानानि। तेषु क्रमादारोहावरोहक्रमेण प्रत्याहारेत्**" ।20 पातञ्जले योगदर्शने अस्ति – "**स्वविषयासम्प्रयोगे चित्तस्यस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः**"। 21

**धारणा** – अष्टाङ्गेषु षष्ठाङ्गं धारणा। श्थानभेदात् धारणायाः त्रैविध्यं परिलक्ष्यते। एकं आत्मनि मनसः धारणम् , दहराकाशे वाह्याकाशस्य धारणम् द्वितीयम् , तृतीयन्तु पृथिवी-अप्-तेज-वायु-आकाशेषु पञ्चमूर्तिधारणम्। उच्यते उपनिषदि – "**आत्मनि मनोधारणं दहराकाशे वाह्याकाशधारणं पृथिव्यप्तेजोवाय्वाकाशेषु पञ्चमूर्तिधारणं चेति**"।22 पातञ्जले तु - "**देशवन्धचित्तस्य धारणा**"23 अर्थात् चित्तस्य शरीराभ्यन्तरेषु नाभ्यादिदेशेषु वाह्यविषयरुपदेशेषु च स्थिरता एव धारणा कथ्यते।

**ध्यानम्** – किमपि वस्तु स्वीकृत्य हृदि संस्थाप्य च तस्य एकाग्रचिन्तनम् एव ध्यानम्। अत्र ध्यानं द्विविधम्। एकं सगुणम् अपरन्तु निर्गुणम्। एतयोः सगुणं विशेषणात्मकम् अर्थात् विकारात्मकम् , किञ्चित् विकारम् आश्रित्य एतद्ध्यानं क्रियते।

अपरं विकारहीनम् विशेषणहीनम् , किमपि ध्येयवस्तु नास्ति आत्मतत्त्वं विहाय। उच्यते तदर्थम् – **"अथ ध्यानम्। तद्द्विविधं सगुणं निर्गुणं चेति। सगुणं मूर्तिध्यानम्। निर्गुणमात्मयाथात्म्यम्"** ॥24 पातञ्जले तु – **"तत्र प्रत्ययैकतानता ध्यानम्"**। उक्तञ्च भाष्यकारेण – **"तस्मिन् देशे ध्येयालम्वनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्"**॥25

**समाधिः -** समाधिविषये उपनिषद्यस्याम् प्रथमोऽध्यये एकादशखण्डे प्रलिखितमस्ति – **"अथ समाधिः। जीवात्मपरमात्मैक्यावस्था त्रिपुटीरहिता परमानन्दस्वरूपा शुद्धचैतन्यात्मिका भवति"** ॥26 एषा अन्तिमावस्था , अस्याम् अवस्थायां योगिनः जीवात्मापरमात्मनोः एकत्वम् अनुभवन्ति। एषा तु योगिनः परमानन्दस्वरूपावस्था शुद्धचैतन्यमयावस्था। पातञ्जले अस्ति – **"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ध्यानमेव ध्योयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमेव यदा भवति ध्येयस्वभावावेशात् तदा समाधिरित्युच्यते"** ॥27

**निष्कर्षः** – यतः शरीरम् अस्माकं सम्पद् वर्तते तस्मात् तस्य प्रयत्नः करणीयः। तदर्थं प्राचीणकालादेव स्वास्थ्यस्य सुरक्षायै दृष्टादृष्टोपायस्य अनुस्मरणं वयं कुर्वन् स्मः। तेषु सर्वोपायेषु योगाभ्यासः तथा योगचर्चा प्राचीणपन्था वर्तते। अष्टाङ्गयोगाभ्यासेन शरीरं सम्यक् भवति। रोगमुक्तं भवति। विविधासनस्योपकारिता विभिन्नैव। बात-पित्त-श्लेष्मा इत्येतेषाम् अनुपातसमानाय योगचर्चा करणीया। मुद्राभ्यासः अपि कर्तव्यः। नाडीशोधनमपि करणीयम्। योगाभ्यासेन न केवलं शरीरस्य अपि तु मानसिकोन्नतिः , आत्मिकोन्नतिः , Stress Decrease , स्मृतिशक्तेः विकाशः , एकाग्रतायाः वृद्धिश्च भवन्ति। शाण्डिल्योपनिषदि अष्टाङ्गयोगः सुष्ठु वर्णितः। पतञ्जलिकृतयोगदर्शनात् अत्र अष्टाङ्गयोगस्य विवरणे विशेषत्वं परिलक्ष्यते॥

**सन्दर्भग्रन्थसूची –**


- अनू.स्वामी, भर्गानन्द. (२००४) पातञ्जल योगदर्शन . उद्बोधन कार्यालय . कलकाता .
- अनू.शास्त्री,वि.केशवलाल (२०२१) उपनिषत्सञ्चयनम्(तृतीय खण्ड) . चौखम्बा संस्कृत प्रतिष्ठान . दिल्ली .
- सम्पा.स्वामी,गम्भीरानन्द. (२०१७) उपनिषद् ग्रन्थावली (प्रथम भागः). उद्बोधन कार्यालय . कलकाता .
- पतञ्जलिः . योगसूत्रम् ,सम्पा.शास्त्री.ढुण्ढराज. (वि.सं.२०७३) चौखम्बा संस्कृत संस्थान. वाराणसी, भारत.
- विश्लेषक.गौतम,(२०२४) प्राणायाम , सन्ध्या प्रकाशनी, कलकाता.


**अन्तर्जालसूची –**


- https://bn.wikipedia.org
- https://vidyanagarcollege.net
- https://www.yogapoint.com
- https://theyogainstitute.org


1 कुमारसम्भवम्
2 कठोपनिषद् – १/३/१७.
3 श्वेताश्वतरोपनिषद् -६/२२
4 HIL. – vol.1 p-215
5 कठोपनिषद्-१/३
6 शाण्डिल्योपनिषद् -१/१/२,३
7 शाण्डिल्योपनिषद् – १/१/४
8 शाण्डिल्योपनिषद् -१/१/५
9 शाण्डिल्योपनिषद् -१/१/१०
10 शाण्डिल्योपनिषद् -१/१/१३
11 शाण्डिल्योपनिषद् -१/२/१

12 शाण्डिल्योपनिषद् -१/२/८
13 शाण्डिल्योपनिषद् -१/३/१
14 पातञ्जल योगदर्शन-४६(सा.पा.)
15 शाण्डिल्योपनिषद् -१/३/१
16 शाण्डिल्योपनिषद् -१/६/१,२
17 शाण्डिल्योपनिषद् -१/६/३
18 शाण्डिल्योपनिषद् -१/६/४
19 पातञ्जल योगदर्शन-४९ (सा.पा.)
20 शाण्डिल्योपनिषद् -१/८/१,२
21 पातञ्जल योगदर्शन- ५४
22 शाण्डिल्योपनिषद् -१/९/१
23 पातञ्जल योगदर्शन- १(वि.पा.)
24 शाण्डिल्योपनिषद् -१/१०/१
25 पातञ्जल योगदर्शन- २(वि.पा.)
26 शाण्डिल्योपनिषद् -१/११/१
27 पातञ्जल योगदर्शन-३(वि.पा.)

# अमृतबिन्दूपनिषद्दिशा आत्मनः अखण्डैकत्वसन्दर्भः

सौम्यजित् आचार्यः, सहायकशिक्षकः
विवेकानन्द-केन्द्र-विद्यालयः (अरुणाचलप्रदेशः)
Email- soumyajitmon20@gmail.com

शोधसारः- अमृतबिन्दूपनिषत् अथर्ववेदस्यान्तर्गता एका प्रमुखा उपनिषत् अस्ति । अद्वैतवेदान्तस्य हृद्स्थाने आत्मविद्या प्रतिष्ठिता विद्यते। उपनिषदः अस्य शास्त्रस्य परमं प्रमाणं मन्यते। तत्र आत्मा न शरीरसम्बद्धः, न च विषयासक्तः, किन्तु नित्यः, शुद्धः, बुद्धः, मुक्तः परमार्थस्वरूपश्चेति प्रतिपाद्यते। विश्वे यत् सर्वं दृश्यते, तत् अस्य आत्मनः एव प्रतिबिम्बरूपेण व्यक्तं भवति। यः आत्मा सर्वभूतानाम् अन्तर्यामिरूपेण व्याप्य स्थितः, स एव ब्रह्म। एषः आत्मा नानात्वरहितः, एक एव अखण्डचैतन्यस्वरूपः इति उपनिषदः सम्यक् उद्घोषयन्ति । अतः आत्मा न कदापि जन्ममृत्युवशं गतः, स सर्वदा सच्चिदानन्दरूपेण स्थितः। एषा एव आत्मविद्या मोक्षमार्गस्य मूलाधारभूता इति अद्वैतवेदान्तदर्शनं निर्दिशति । अद्वैतवेदान्ते 'अखण्ड:' इति शब्दः ब्रह्मणः प्रकृतिः इति । जाग्रतस्वप्नसुषुप्तिषु अवस्थासु आत्मनः अभिन्नत्वमेव अस्ति । अतः आत्मा एक एव मन्तव्यः भवति । यः जनः अवस्थात्रयव्यतीत: अस्ति, तस्य अवस्थात्रयव्यतीतस्य पुनर्जन्म न विद्यते । तस्मिन् जने पुर्नजन्मनः बन्धनं न तिष्ठेत् अर्थात् तस्य स्थानत्रयव्यतीतस्य मोक्षप्राप्तिः विधेया। जलचन्द्रवत् अर्थात् चन्द्रस्य तु एकत्वमेव विद्यते परन्तु जले तस्य प्रतिफलनं भिन्नं भिन्नं प्रतियतेति यथा, तथैव आत्मा तु एक एव परन्तु ज्ञानभ्रान्तिकारणात् उपाधिकारणात् चेति जीवे पृथक् पृथक् अनुभूयते । भूतानाम् अन्तर्यामी एकः, नित्यः, सर्वव्यापकः चैतन्यरूपश्च । किन्तु अविद्याकारणात् स एव आत्मा यदा देहादीनाम् उपाधिद्वारा आच्छन्नः भवति तदा जीवबहुत्व प्रतीयते।

अतः अमृतबिन्दूपनिषदः प्रामाण्यत्वमायाति-----

**"एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु ।**
**स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥"**
**"एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥"** इत्यादयः

"अखण्डः[1]" इति शब्दः केनापि अश्रुतः इति तास्ति । अद्वैतजिज्ञासूनां परिचितोऽयम् अत्यन्तनिगूढशब्दः । प्रायः सर्वैः श्रुतः श्लोकोऽयम्-

"अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्" इति । सम्प्रति प्रश्नः भवितुमर्हति यत्, कस्मिन् विषये विचारोऽयं प्रवर्तते इति? अत्र 'अखण्डः' इति शब्दः किमर्थं प्रयुक्तः? को वा अस्यार्थः? इत्येस्मिन् विषये पथप्रदर्शनाय आगच्छन्ति उपनिषदः । कारणं "वेदान्तसारः" इत्यस्मिन् ग्रन्थे स्पष्टतया उक्तमस्ति " वेदान्तो नाम उपनिषद्प्रमाणम्" इति। अतः "अखण्डः" इति शब्दार्थे सति उत्तरं प्रयुक्तमस्ति यत् यः खण्डरहितः, अविभाज्यः, अद्वितीय: प्रभृतयः । तर्हि "अखण्डः" इति शब्दार्थः ज्ञात: सम्प्रति, "अखण्डः" इति शब्दः किमर्थं प्रयुक्तः? इति ज्ञातव्यः । अतः विषयोऽयमाधारीकृत्य छान्दोग्योपनिषदि विराजते - "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति अर्थात् श्वेतकेतो: पिता श्वेतकेतुं प्रति अखण्डत्वविषयम् अवदत् । अनन्तरं बृहदारण्यकोपनिषदि विलसति " न तत्र द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत" इति । अत: ब्रह्मसूत्रस्य शाङ्करभाष्येऽपि प्राप्तमस्ति "ब्रह्मणो हि अखण्डानन्दरूपत्वात् खण्डोपाधिभेदेन विवेकदर्शनम्" इति । अद्वैतवेदान्ते "अखण्डः" इति शब्दः लक्ष्यार्थे व्यवहृतः। कारणं 'अखण्ड:' इति ब्रह्मणः प्रकृतिः। "अहं

[1] "ब्रह्मणो ह्यखण्डानन्दरूपत्वात्..." — ब्रह्मसूत्रशाङ्करभाष्यम्, २.१.१४

ब्रह्मास्मि"[1] इति महावाक्यात् तु अखण्डज्ञानं लभते। यः खण्डभेदरहितः, एकरसचैतन्यमात्रः स एव अखण्डः इति।

**आत्मनः अखण्डैकत्वे प्रथमसन्दर्भः-** अद्वैतवेदान्तस्य स्तम्भस्वरूपः विषयोऽयम् **"अमृतबिन्दूपनिषद्दिशा आत्मनः अखण्डैकत्वसन्दर्भः"** इति। स्तम्भनिर्माणं विना यथा गृहस्य निर्माणं न सम्भवति , तथैव अद्वैतवेदान्तशास्त्रमिदम् एतादृशं विषयं विना पूर्णतां न प्राप्नोति। सम्प्रति विषयस्यास्य प्रथममन्त्रः आयाति – – –

**"एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु।**
**स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते॥"**

जाग्रतस्वप्नसुषुप्तिषु अवस्थासु आत्मा एक एव मन्तव्यः भवति। आत्मा एकाधिकः न , यः एक[2] एव। यस्य जन्ममृत्युः न विद्यते अपरिवर्तितश्चेति। न केवलमेतत्, यः अवस्थात्रयव्यतीतः जनः राजते, तस्य जनस्य तु अवस्थात्रयानन्तरमेव उपलब्धिः जायते यत् आत्मनः अखण्डैकत्वमेव विराजते। तस्य अवस्थात्रयव्यतीतस्य पुनर्जन्म न भूयते अर्थात् सः जनः पुर्नजन्मनः बन्धने आबद्धः न भविष्यति। कारणं पुनर्जन्म तु देहमनस्तत्वाभ्यामेव संयुक्तः न तु आत्मना सह। सरलतया वक्तुं शक्यते , यः जनः उपलब्धिं करोति यत् अवस्थात्रयेषु सः एकेन अविच्छिन्नचैतन्यरूपेण विराजमानः एवञ्च स्थानत्रयव्यतीतस्य तस्य मोक्षप्राप्तिः भविष्यति। अतः योगोपनिषदि लिखितमस्ति—"अवस्थाभेदानुरोधेन तदध्यक्षभेदः स्यादित्यत आह--एकं इति। चतुश्चतुर्धाभिन्नजाग्रत्स्वप्नसुपुप्तिषु विश्वविश्वाद्यनुज्ञैकरसाविकल्पान्तभेदेन यो विभागः सोऽयम् आत्मा एक एव इति मन्तव्यः, घटशरावाद्यनुगतव्योमैकत्ववत् जाग्रज्जाग्रदाद्यवस्थानुगतविश्वविश्वादिचित एकत्वात्। एवं चतुश्चतुर्धाभिन्नस्थानत्रयव्यतीतस्य तुर्यावस्थाऽऽरूढस्य विश्वविश्वादिरूपेण पुनर्जन्म न विद्यते तथा जन्महेतुस्वाज्ञानवैरव्वात्"। सम्प्रति प्रश्नः भविष्यति यत्, किं नाम अवस्थात्रयमिति? अवस्थात्रयेषु केषां तावत् अन्तर्भूक्तिः ? इति प्रश्नद्वयस्य उत्तरत्वेन आगच्छति यत् अत्र अवस्थात्रयेषु जाग्रत्स्वप्नसुषुप्यादीनाम् अन्तर्भावः विद्यतेति। अतः तासामपि अवस्थानां विषये विचारयितुम् ईहे चेत् प्रश्नस्तावत् आगच्छति किं तावत् अवस्थात्रयम् इति ? एतस्य प्रश्नस्य उत्तरत्वेन आगच्छति माण्डूक्योनिषदः वाक्यमिति -

**"जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः"॥** इति

अर्थात् अस्याम् अवस्थायाम् आत्मा "वैश्वानरः" इति नाम्ना ख्यातः विद्यते। जीवास्तु इन्द्रियद्वारा बहिर्जगतः स्थूलवस्तूनाम् अभिज्ञतां लब्धुं शक्नुवन्ति एवञ्च देहस्य अहमममाभिमानं कल्पयन्ति इति। अस्यामवस्थायां बर्हिजगतः विषयाः इन्द्रियमाध्यमेन अनुभूयन्ते। ते जीवाः देहाभिमानात् "अहं कर्ता भोक्ता" इति अनुभवन्ति इति। अस्याः अवस्थायाः अनन्तरं द्वितीयावस्था आयाति स्वप्नावस्थेति। माण्डूक्योपनिषदि विषयेऽस्मिन् उक्तम् –

**"स्वप्नस्थानो अन्तः प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभूक् तैजसो द्वितीयः पादः"॥**

स्वप्नावस्थायाम् आत्मा तैजसः इति नाम्ना ख्यातः भवति। अस्यामवस्थायां बाह्येन्द्रियाणि कार्यं न कुर्वन्ति, परन्तु मनः पूर्वाभिज्ञतायाः परिकल्पनां करोति। अवास्तविकमपि अस्यामवस्थायाम् वास्तविकं भवति। । आत्मा अत्र चैतन्यरूपेण विलसति परन्तु स्वप्नमायाद्वारा आच्छादितः अस्ति। अनन्तरं तृतीयावस्था आयाति, सुषुप्त्यावस्था इति। अतः माण्डूक्योपनिषदि लिखितं -

**"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः"** इति।

अर्थात् अस्यामवस्थायाम् इन्द्रियादयः लयं गच्छन्ति। स्वप्नः अपि तिष्ठति , सर्वेन्द्रियाणि मनश्च लयं प्राप्नुवन्ति कालेऽस्मिन्। तस्मिन् समये अविद्यालक्षणेन कारणेन आत्मा स्थितः भवति। तथापि आत्मा सुखेन एकीभूतेन विद्यते इति। अस्यामवस्थायाम् आत्मा 'प्राज्ञः' इति नाम्ना ख्यातः। अनेन एव अवस्थात्रयस्य विषये अनतिविस्तरेण उक्तमस्ति इति। तर्हि अस्य विषयश्लोकस्य विषये भगवद्भिः श्रीमच्छङ्कराचार्यैः लिखितमस्ति - "जाग्रत्स्वप्नसुषुप्त्युपाधिभेदेन आत्मा न भिद्यते, उपाधिनाशे स एव ब्रह्म भवति "

[1] "अहं ब्रह्मास्मि" — बृहदारण्यकोपनिषद् १.४.१०
[2] बृहदारण्यकोपनिषद्, — "न तत्र द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत"

इति। अर्थात् आत्मा कदापि अवस्थात्रये न विभज्यते , विभेदोऽयं केवलः देहेन्द्रियोपाधिना इति। यदा उपाधिः नश्यति तदैव आत्मा ब्रह्मरूपेण प्रकाशितः भवति। अत्र पुनः प्रश्नः भवति, 'पुनर्जन्म न विद्यते' [1]इति कथमुक्तम् ? अस्य प्रश्नस्य उत्तरत्वेन वक्तव्यमिति, यस्य जनस्य अखण्डैकब्रह्मज्ञानोपलब्धिम् आयाति, तस्य "अहं देहः', 'अहं मनः" इति विभेदः न जायते । यतोऽहि तस्य सर्वं कर्मफलम् आत्मज्ञानेन दग्धः भवति । तस्मात् तस्य जन्ममृत्योः चक्रं समाप्तं याति अर्थात् तस्य मोक्षप्राप्तिः भवति । अस्मिन् सन्दर्भे श्रीमद्भगवत्गीतायां लिखितमस्ति- " **यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।**

**ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥**" इति

अर्थात् यथा अग्निः काष्ठखण्डं भस्मसात्करोति तथैव ज्ञानाग्निः सर्वं कर्म दहति । अनेन ज्ञायते, अहं नैव देहः, अहमेव चिदात्मा इति । अवस्थात्रये अपि इयं सत्ता अपरिवर्तनीया । अनेनैव प्रथमविचारः समाप्यते । ' आत्मनः अखण्डैकत्वमिति कथम्? इत्यस्य प्रश्नस्य उत्तरत्वेन द्वितीयधापः आरम्भनीय : इति ।

**आत्मनः अखण्डैकत्वे द्वितीयसन्दर्भः-** **"एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**

**एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥"** इति।

अनेन मन्त्रमाध्यमेन जायते यत्, स्वरूपतया आत्मा नित्यः एकश्चेति परन्तु अवस्थानेन तु बहुः इति । यथा अस्माकं चन्द्रस्तु एक एव विद्यते परन्तु जले तस्य प्रतिफलनं भिन्नं भिन्नं दृश्यते । एकस्य चन्द्रस्य अवस्थानभेदेन परिस्थितिभेदेन च प्रतिफलनं भिन्नमेव आयाति । तथापि आत्मा तु एक एव, परन्तु ज्ञानभ्रान्तिकारणात् उपाधिकारणात् चेति जीवे पृथक् पृथक् विद्यते इति । आत्मनः एकत्वमेव अस्ति । जीवजगतोः भिन्नत्वमेव दृश्यते अस्माभिः । तत् तु केवलम् उपाधिकारणादेव सम्भवति इति । श्रीमच्छङ्कराचार्यपादानां नये तु भूतात्मा अर्थात् भूतानाम् अन्तर्यामी एकः, नित्यः, सर्वव्यापकः चैतन्यरूपश्च । किन्तु अविद्याकारणात् स एवं आत्मा यदा देहादीनाम् उपाधिद्वारा आच्छन्नः भवति तदा जीवबहुत्व प्रतीयते ।। योगोपनिषदि लिखितमस्ति — "कथं पुनरात्मनः एकत्वमित्यत्र सदृष्टान्तमेकत्वमाह--एक इति । पञ्चभूतभोतिकव्यवस्थित आत्मा एक एव हि स्वज्ञादिदृष्टानुरोधेन नभोजलबिम्बप्रतिनिम्बभावमापन्नचन्द्रवत् शिवजीवभेदेन एकधा बहुधेव दृश्यते, वस्तुत आत्मन एकत्वात्" । अनन्तरम् भगवत्पादैः इतोऽपि श्रीमद्भगवत्गीताभाष्ये लिखितम्-- "यथा एक एव चन्द्रः अनेकसदृशेषु जलकुम्भादिषु बहुधा प्रतिविम्बते, तथैव आत्मा अपि एक एव सन् उपाधिभेदात् बहुधा इव दृश्यते।" इति । "भूते भूते व्यवस्थितः" इति पङ्क्त्यां 'व्यवस्थितः' इत्यस्य शब्दस्य अर्थः अयं न कर्तव्यः यत् आत्मा जीवेषु पृथक्तया अवतिष्ठति इति । तस्य अयमर्थः कर्तव्यः यत्, आत्मा स्वरूपतः सर्वव्यापी विराजते। अतः सर्वभूतेषु सः विराजमानः ।

अतः श्वेताश्वतरोपनिषदि लिखितमस्ति - **"एको देवः सर्वभूतेषु गूढः**

**सर्वव्यापी सर्वभूतान्तरात्मा "** इति।

आत्मा कदापि प्रकृतार्थे बहु भवितुं नार्हति, केवलं तु मायायाः प्रभावात् बहु प्रतीयते । तस्मात् ब्रह्मसूत्रभाष्ये लिखितमस्ति-- "न तु आत्मा बहुधा भवति, केवलम् अविद्यया बहुधा इव भवति दृश्यते " इति चन्द्रस्य प्रतिफलनं यदा पात्रस्थजले पतति, तदा तु भिन्नः चन्द्रः दृश्यते परन्तु यदि पात्रे जलं न तिष्ठेत् तदा तु एकः चन्द्रः एव अवतिष्ठति । अनेनैव उपाधिरहितावस्थायां शुद्धचैतन्यमेव अवतिष्ठति। आत्मज्ञानलाभः इत्यनेनैव जायते ।अतः कठोपनिषदि लिखितमस्ति -

**"एकस्तथा सर्वभूतान्तरात्मा**

**रूपं रूपं प्रतिरूपो बहिश्च"** इति।

यदा ब्रह्मज्ञानेन अविद्या दूरीभूता भवति तदा भिन्नत्वं न आयाति । 'नानात्वं नास्ति किञ्चन" इति श्रुतिः।

**अखण्डैकत्वसन्दर्भे श्रीमद्भगवतीताप्रमाणम्- "आत्मनः अखण्डैकत्वसन्दर्भः"** इति विषयस्य प्रामाणिकत्वं श्रीमद्भवतगीतायामपि विद्यते । सम्प्रति तेषामेव आलोचना विधेया।

---

[1] माण्डूक्यकारिका (गौडपादाचार्यः), ३.७७ —"अजातं जायते किञ्चित्, न भवत्युपशान्तये।"

**प्रथमप्रमाणम्-----** **"समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।**
**विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥"** इति

अर्थात् यः जनः सर्वभूतेषु परमात्मानमेव पश्यति स एव प्रकृतदर्शी अस्ति। अनेन ज्ञायते सर्वभूतेषु जीवेषु आत्मा एक एव।

**द्वितीयप्रमाणम्----** **"समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम्।**
**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥"** इति

अनेन ज्ञायते, यः सर्वत्र ईश्वरमेव पश्यति, सः कदापि कस्यापि क्षतिं न जनयति, स्वयं मुक्तिं च प्राप्नोति।

**तृतीयप्रमाणम्----** **"अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः।**
**शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते "॥** इति

श्लोकेऽस्मिन्, भगवान् श्रीकृष्णः अर्जुनं प्रति उक्तवान् आसीत् - आत्मा तु अनादिः, निर्गुणः अक्षयश्चेति। देहे अवस्थानं कृत्वापि न किमपि कर्म करोति, न कर्मणि लिप्तः च भवति इति।

**चतुर्थप्रमाणम्----** **"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥"** इति

अस्मात् ज्ञायते, योगयुक्तजनः सर्वदा आत्मानं सर्वभूतेषु पश्यति एवञ्च सर्वभूतानि आत्मनि पश्यति इति ॥

**पञ्चमप्रमाणम्----** **"यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।**
**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥"** इति

भगवान् श्रीकृष्णः अर्जुनं प्रति अवदत्, यः ब्रह्मरूपं भगवन्तं सर्वत्र पश्यति एवञ्च सर्वं भगवति ब्रह्मरूपे पश्यति। सः कदापि ब्रह्मरूपात् भगवतः विच्छिन्नः न भवति।

**षष्ठप्रमाणम्----** **"मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।**
**मयि सर्वमिदं प्रोक्तं सूत्रे मणिगणा इव "॥** इति

अर्जुनं प्रति भगवान् श्रीकृष्णः उक्तवान् ब्रह्मरूपं भगवन्तम् अतिरिच्य न किमपि विद्यते। जगदिदं सर्वं ब्रह्मरूपे भगवति एवं राजते इति। कथं राजते इति प्रश्ने सति वक्तव्यम्, सूत्रे यथा मणिसमूहः विद्यते तथैव इदं जगत्सर्वं भगवति एव एकात्मभूतमिति।

**सप्तमप्रमाणम्----** **"मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।**
**मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥"** इति

ब्रह्मरूपे भगवति इदं सर्वं जगत् अव्यक्तरूपेण विद्यते। सर्वं भूतमिति तस्मिन्नेव वर्तते अनासक्तः सन्।

**अखण्डैकत्वसन्दर्भे उपनिषत्प्रमाणम्-** श्रीमद्भगवत्गीतामिव उपनिषत्प्रमाणानि अपि विद्यन्ते। तानि प्रमाणानि सम्प्रति परिलक्ष्यन्ते।

**प्रथमप्रमाणम्----** श्वेताश्वतरोपनिषदि अस्ति –

**"एको देवः सर्वभूतेषु गूढः, सर्वव्यापी सर्वभूतान्तरात्मा।**
**कर्माध्यक्षः सर्वभूताधिवासः, साक्षी चेता केवलो निर्गुणश्च ॥"**

परमात्मा तु सर्वभूतेषु निगूढः विद्यते। सः तु निर्गुणः कर्माध्यक्षः साक्षी चैतन्यस्वरूपश्चेति।

**द्वितीयप्रमाणम्----** मुण्डकोपनिषदि विराजते--

**"द्वा सुपर्णा सयुजा सखाया**
**समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्य-**
**नश्नन्नन्यो अभिचाकशीति॥"**

अस्मिन् मन्त्रे तु एकः परमात्मा एव सर्वेषु जीवेषु साक्षीस्वरूपेण विराजमानः। अतः आत्मा एक एव, सः बहुजीवरूपेण विराजमानः। जाग्रतादिषु एकः एव तिष्ठति। अयमेव, उक्तः आसीत् "भूतात्मा भूते भूते व्यवस्थित:" अर्थात् जीवेषु एक एव आत्मा विराजमान:।

**तृतीयप्रमाणम्----** **"एकोऽहम् एव इदं सर्वम् , नेह नानास्ति किचन"।**

अस्य तात्पर्यः अस्ति, अत्र आत्मन: अभिन्नत्वम् एकत्वं च प्रकाशित:।

**चतुर्थप्रमाणम्----** **"सदेव सोम्य इदमग्र आसीत् एकमेवाद्वितीयम्"**

अर्थात् अनेन ज्ञायते, सृष्टे: पूर्वम् अद्वितीयम्[1] एकमेव सत् ब्रह्म आसीत्।

**पञ्चमप्रमाणम्----** श्वेताश्वतरोपनिषदि अस्ति – **"एको देवः सर्वभूतेषु गूढः, सर्वव्यापी सर्वभूतान्तरात्मा "**

अर्थात् एकात्मा एव सर्वजीवेषु गूढभावेन विराजमान: । स एव आत्मा सर्वव्याप्त: अन्तर्यामी च|

**उपसंहारः-** उपनिषत्सु अखण्डः, एकः, सर्वव्यापी च आत्मा परमार्थसत्तारूपेण निरूपितः। "सदेव सोम्य इदमग्र आसीत् एकमेवाद्वितीयम्" इति छान्दोग्योपनिषद्वचनं तदेकत्वं प्रतिपादयति । "नेह नानास्ति किञ्चन" इति बृहदारण्यकोपनिषद्वचनं च नानात्वाभावं निर्दिशति। यथा एकः चन्द्रः नानाजलेषु प्रतिबिम्बितः सन् अपि एक एव दृश्यते, तथैव एकः आत्मा नानाभूतेषु शरीररूपेषु व्यवस्थितोऽपि एक एव अस्ति। "अहं ब्रह्मास्मि" इत्यनेन जीवब्रह्मणोः अभेदः सूचितः, तथा "तत्त्वमसि" इति महावाक्येन तयोः ऐक्यमेव प्रतिपाद्यते । आत्मा सर्वभूतेषु व्याप्य स्थितः, स नित्यः, शुद्धः, बुद्धः, मुक्तः च । यदा ज्ञानी भेददृष्टिं त्यक्त्वा आत्मैकत्वम् अनुभवति, तदा एव तस्य मोक्षः सिध्यति । अतो अद्वैतवेदान्तस्य सारः अयम्— आत्मा, भिन्नः न भवति, स एव एकः अखण्डचैतन्यस्वरूपः इति , यस्मिन् सर्वं प्रतिष्ठितम् इति शम् ।

## सहायकग्रन्थसूची

1. Īśādi Nau Upaniṣad. Gorakhpur: Gita Press.
2. Vyāsa, Bādarāyaṇa. Brahmasūtra Śaṅkarabhāṣyam. Ed. Āchārya Jagadīśa Śāstrī. Delhi: Motilal Banarsidass.
3. Swami Vireshwarananda. Brahmasūtra. Trans. Dr. Saccidānanda Dhar. Kolkata: Udbodhan Karyalaya.
4. Swami Gurubhaktananda. Amritabindu Upanishad: A Drop of Immortality, Reflections.
5. Yoga Upaniṣadāḥ: Śrī Upaniṣad Brahma Yogiviracitavyākhyāyutāḥ. Ed. A. Mahadeva Shastri. Adyar: Theosophical Publishing House.
6. Śrīmad Bhagavad Gītā (Śāṅkarabhāṣyam). Trans. Śrī Harikṛṣṇadāsa Goyandaka.

[1] माण्डूक्योपनिषद्, मन्त्र ७ —
"शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः।"

# आलंकारिकदृष्ट्या लघुत्रयी बृहत्त्रयी इति संज्ञायाकरणविमर्शः

Sanchita Chakraborty, (SACT)
Gangadharpur Mahavidyamandir

**सारांशः :-** दृश्यश्रव्यभेदेन काव्यस्य द्वैविध्यमङ्गीकृतमलङ्कारशास्त्रकारैः। कवेर्भावः इति व्युत्पत्त्या कविशब्दोत्तरात् ष्यङि क्लीवत्वे च काव्यमिति संज्ञा। आदौ शब्दः अनन्तरमर्थः इति शब्दार्थयोः अनन्यतया प्रतिभासमानत्वात् 'शब्दार्थौ सहितौ काव्यम्' इति – भामहोक्तालंकारिकविचारार्थपरतया काव्यत्वसंज्ञा सुतरां प्रेक्ष्यते। अत्र विचार्यमेव, शब्दार्थयोः व्यवहारेण यदि काव्यत्वसंज्ञा स्यात्तर्हि संसारयात्रायां शब्दानां नियतार्थप्रतिपादकत्वेन तत्रापि चलति काव्यत्वसंज्ञा। एवञ्च स्वीकृते काव्यत्वसंज्ञाव्यभिचारापत्तेः। तथा सति आलंकारिकाणां काव्यत्वसंज्ञाचर्चायां वृथाश्रमभारोपनीतप्रसङ्गापत्तेरिति भावनायाः अलीकत्वेन नेयम्। तथा च शब्दार्थयोरेकीकरणमार्गे लोकोत्तरचमत्कारितायाः प्रसक्तत्वात् तादृशव्यवस्थायाः लौकिककथनमार्गे अनुपस्थितेः न कश्चन काव्यत्वसंज्ञाव्यभिचारप्रसङ्गः समुपतिष्ठते। एतेन लौकिककथोपकथनदशायां सर्वथा लोकोत्तरचमत्कारितानिर्णयः नानुसन्धेयः , तादृशप्रसङ्गस्यानाकाङ्क्षितत्वात्। अतः काव्यलक्षणं स्मारं स्मारं विचारयितव्यं काले काले युगे युगे च।

**विशिष्टशब्दा :** आलंकारशास्त्रम्, आलंकारिकः, काव्यलक्षणम्, ईशवीयशतकम्।

**प्रस्तावना :** सुचारुशब्दार्थपरिवित्तया काव्यत्वाङ्गीकारेण रसैकभावनायाः परिगणितत्वात् 'वाक्यं रसात्मकं काव्यम्' इत्यादिलक्षणानामबाधसञ्चारितत्वेन काव्यत्वपरिमण्डलस्य असाधारणसम्पर्कितत्वेन दर्शकैः श्रोतृभिश्च रसैकतानतायाः स्वरूपवेद्यत्वात् असाधारणी समीक्षा समापतेत् इति काव्यत्वलक्षणचर्चा स्वयं स्ववीर्यं समाख्यातवती। काव्यत्वपारावारे विविधोपकरणसज्जितसम्भारादीन् उपगृह्य काव्यसेविनां मनोवाञ्छापूरणप्रक्रियासत्वात् काव्यत्वाङ्गीकारस्तदा भूयसा परिवर्धेत।

प्रसङ्गतः काव्यत्वलक्षणशैली काव्यमार्गे केन प्रकारेण स्वस्वकृष्ट्या नानावैचित्र्यपूर्णं मनोहारिशब्दार्थपूर्णं सौन्दर्यं विकशति इति निर्धारणीयं यथाक्रमं काव्यत्वलक्षणसुगभीरकर्षणफलप्राप्तौ –

१. अलंकारशास्त्रे गुरुस्थानीयः आचार्यो भरतः प्रायेण रसवादस्य प्रवक्ता ईशवीयद्वितीयशतकसमुद्भूतः नाट्यशास्त्रं व्यरचि। यद्यपि काव्यलक्षणं तत्रभवता नोररीकृतं तथापि अलङ्कारलक्षणविधया मन्त्रितम्.- "भूषणैरिव चित्रार्थैस्तद्भूषणमिति स्मृतम्।"

२. अनन्तरमलङ्कारशास्त्रमार्गे समुद्भूतः ईशवीयषष्ठशतकपूर्वार्द्धे समुपजातः काव्यालंकारग्रन्थस्य रचयिता आचार्यभामहः सप्रशंसं स्मर्य्यते। अत्रभवता "शब्दार्थौ सहितौ काव्यम्"(१/१६) इति लक्षणेन अलङ्कारसम्भूतत्वम् आसादितं भूयते। पुनश्च अलङ्कारलक्षणे अस्य शेमुषी प्रशस्ता- "वाच्या वक्रार्थशब्दोक्तिरलङ्काराय कल्पते" इति।

३. तदनन्तरम् अलङ्कारप्रस्थाने भामहसमकालीनतया तदुत्तरवर्त्तितया वा समुद्भूतः काव्यादर्शाख्यालंकारशास्त्रप्रणेता ईशवीयषष्ठशतकोत्तरवर्त्ती सप्तमशतकवर्त्ती वा आचार्यदण्डी अतिचमत्कारिताम् आसादितवान्। तेन काव्यलक्षणविधौ कथञ्चित् नावीन्यं संप्रसारितम् - "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलिः"(१/१०) इति। अत्रभवता अलङ्कारलक्षणचर्चायाम् – "काव्यशोभाकारान् धर्मानलङ्कारान् प्रचक्षते" इति भणितम्। आलङ्कारिकाः पुनः दण्डिनं रीतिवादमध्ये परिगणयन्ति।

४. अलङ्कारशास्त्रपारावारे समुदेति रीतिवादप्रवक्ता ईशवीयाष्टमोत्तरार्द्धसमुद्भूतः काव्यालङ्कारसूत्रवृत्तिरचयिता आचार्यः वामनः। असौ काव्यलक्षणमतिविस्तीर्णतया निरूपयति – "काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते भक्त्या तु शब्दार्थवचनमात्रं गृह्यते"(१/१/१) इति। अलङ्कारलक्षणमेवं भणितम् - "सौन्दर्यमलंकारः। अलंकृतिरलंकारः" इति।

५. ईशवीयाष्टमशतकोत्तरार्द्धसमुद्भूतः काव्यालङ्कारसारसंग्रहप्रणेता आचार्य उद्भटः समुपजायते। काश्मीरराजस्य जयापीडस्य सभापण्डितरूपेण परिचय आसीत् इति कल्हनमतम्। अलङ्कारसंग्रहमूलकग्रन्थे एकचत्वारिंशदलंकाराः नवतिसंख्यकानि

उदाहरणानि दत्तानि।

६. तदनन्तरम् ईशवीयनवमशतकपूर्वार्द्धसमुद्भूतः काव्यालंकारग्रन्थस्य रचयिता आचार्यरुद्रटः सप्रशंसं स्मर्य्यते। अत्रभवता "शब्दार्थौ काव्यम्" इति लक्षणेन शब्दार्थयोः अलङ्कारसम्भूतत्वम् इति आसादयितुं शक्यते।

७. अलङ्कारशास्त्रपारावारे ध्वन्यालोकग्रन्थस्य प्रणेता ईशवीयनवमशतकोत्तरार्द्धे समुपजातः आचार्यानन्दवर्धनः। असौ काव्यलक्षणमतिविस्तीर्णतया निरूपयति – "काव्यस्यात्मा" (१/१) इति।

८. ईशवीयदशमशतकपूर्वार्द्धसमुद्भूतः काव्यकौतुकग्रन्थप्रणेता आचार्यभट्टतौतः। स आलंकारिकाभिनवगुप्तस्य गुरुः आसीत्। तेन शान्तरसस्य श्रेष्ठत्वं समर्थितम्।

९. तदनन्तरमलङ्कारशास्त्रमार्गे समुद्भूतः ईशवीयदशमशतकोत्तरार्द्ध समुपजातः लोचन-अभिनवभारती-काव्यकौतुकग्रन्थत्रयस्य रचयिता आचार्योऽभिनवगुप्तः सप्रशंसं स्मर्य्यते।

१०. अलङ्कारशास्त्रे वक्रोक्तिवादस्य प्रवक्ता आचार्यकुन्तकः ईशवीयदशमशतके समुद्भूतः वक्रोक्तिजीवितं नाम ग्रन्थं रचितवान्। तेन काव्यलक्षणविधौ कथञ्चित् नावीन्यं संप्रसारितम् – "शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥"

पुनश्च अलङ्कारलक्षणे अस्य शेमुषी प्रशस्ता – "वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते" इति।

११. अलङ्कारशास्त्रपारावारे समुदेति ईशवीयदशमशतके समुपजातः दशरूपकग्रन्थस्य प्रणेता आचार्यधनञ्जयः। मुञ्जराजस्य सभाकविः धनञ्जयः भरतनाट्यशास्त्रमनुसृत्य दशरूपकग्रन्थं व्यरचयत्।

१२. अलङ्कारशास्त्रमार्गे ईशवीयैकादशशतकसमुद्भूतः सरस्वतीकण्ठाभरणशृङ्गारप्रकाशग्रन्थद्वयस्य रचयिता आचार्यभोजराजः सप्रशंसं स्मर्य्यते। असौ काव्यलक्षणमतिविस्तीर्णतया निरूपयति –

"निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति ॥" (सरस्वतीकण्ठाभरणम् - १/२) इति।

१३. अनन्तरमलङ्कारशास्त्रमार्गे ईशवीयैकादशशतकसमुद्भूतः व्यक्तिविवेकग्रन्थस्य प्रणेता आचार्यः महिमभट्टः सप्रशसं स्मर्य्यते। तेन आलङ्कारिकानन्दवर्धनस्य ध्वनिवादविषये विरुद्धमतं प्रदत्तम्।

१४. अलङ्कारशास्त्रपारावारे समुपजातः ईशवीयैकादशशतके काव्यप्रकाशग्रन्थस्य रचयिता आचार्यमम्मटः। तेन काव्यलक्षणविधौ कथञ्चित् नावीन्यं संप्रसारितम् – "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"(काव्यप्रकाशः-१/२) इति। तस्य काव्यप्रकाशग्रन्थे उल्लासदशकमस्ति। ग्रन्थमध्ये तेन काव्यलक्षणम्, काव्यश्रेणीभेदः, गुण-दोष-रस-ध्वनि-अलंकाराः इति विषयाः वैशद्येन आलोचिताः।

१५. अलङ्कारशास्त्रमार्गे औचित्यवादस्य प्रवक्ता ईशवीयैकादशशतके समुद्भूतः। तेन काव्यलक्षणविधौ कथञ्चित् नावीन्यं संप्रसारितम् –'काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृतिः।' (सुवृत्ततिलकम् – ३/३) इति।

१६. ईशवीयद्वादशशतकपूर्वार्द्धसमुद्भूतः अलंकारसर्वस्वग्रन्थस्य प्रणेता आचार्यः रुय्यकः सप्रशंसं स्मर्य्यते।

१७. अलंकारशास्त्रमार्गे ईशवीयद्वादशशतकसमुद्भूतः आचार्यः हेमचन्द्रः काव्यानुशासनग्रन्थस्य प्रणेता। ग्रन्थेऽस्मिन् काव्यलक्षणं कृतम् – "अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्" इति सप्रशंसं स्मर्य्यते।

१८. तदन्तरमलङ्कारशास्तरपारावारे समुदेति ईशवीयत्रयोदशशतकसमुद्भूतः चन्द्रालोकग्रन्थस्य रचयिता आचार्यः जयदेवः। अस्मिन् ग्रन्थे काव्यलक्षणं कृतम् – "निर्दोषा लक्षणवती सरीतिगुणभूषिता।
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्॥" इति।

पुनश्च अलंकारलक्षणे अस्य शेमुषी प्रशस्ता – "शब्दार्थयोः प्रसिद्ध्या वा कवेः पौरवशेन वा।
हरादिवदलङ्कारसमन्निवेशो मनोहरः॥" इति।

१९. ईशवीयचतुर्दशशतके समुपजातः अलंकाररत्नाकरग्रन्थस्य रचयिता आचार्यशोभाकरमिश्रमहोदयः सप्रशंसं स्मर्य्यते।

२०. अलङ्कारशास्त्रमार्गे ईशवीयचतुर्दशशतकपूर्वार्द्धसमुद्भूतो विद्याधराचार्य एकावलीग्रन्थस्य प्रणेता। ग्रन्थेऽस्मिन् काव्यलक्षणं तेन कृतम् - "शब्दार्थौ वपुरस्य तत्र विवुधैरात्माभ्यधायि ध्वनिः"(एकावली – १/१३) इति।

२१. अलंकारशास्त्रे ईशवीयचतुर्दशशतकसमुद्भूतः प्रतापरुद्रयशोभूषणग्रन्थस्य रचयिता विद्यानाथाचार्यः। अस्मिन् ग्रन्थे काव्यलक्षणं तेन कृतम् – "गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः॥" इति।

पुनश्च अलङ्कारलक्षणमेवं भणितम् - "अलंक्रियतेऽनेनेति चारुत्वहेतुरलंकारः" इति।

२२.अलंकारशास्त्रपारावारे समुदेति ईशवीयचतुर्दशशतकसमुद्भूतः साहित्यदर्पणग्रन्थस्य प्रणेता रसवादस्य प्रवक्ता आचार्यविश्वनाथः। तेन काव्यलक्षणविधौ कथञ्चित् नावीन्यं संप्रसारितम् – "वाक्यं रसात्मकं काव्यम्"(सा.द. – १/३) इति।

२३.ईशवीयषोडशशतकोत्तरार्द्धे समुपजातः चित्रमीमांसाकुवलयानन्दवृत्तिवार्त्तिकग्रन्थत्रयस्य रचयिता आचार्योऽप्पय्यदीक्षितः सप्रशंसं स्मर्य्यते।

२४. तदनन्तरमलङ्कारशास्त्रमार्गे ईशवीयसप्तदशशतकसमुद्भूतः रसगङ्गाधरग्रन्थस्य प्रणेता जगन्नाथाचार्यः। ग्रन्थेऽस्मिन् काव्यलक्षणं तेन कृतम् – "रमणीयार्थप्रतिपादकः शब्दः काव्यम्"(र.ग. – १/३) इति। पुनश्च अलङ्कारलक्षणे अस्य शेमुषी प्रशस्ता - "काव्यात्मनो व्यङ्ग्यस्य रमणीयताप्रयोजका अलङ्काराः।"

२५. ईशवीयाष्टादशशतकपूर्वार्द्धसमुद्भूतः अलङ्कारकौस्तुभालंकारमुक्तावल्यलंकारप्रदीपग्रन्थत्रयस्य स्रष्टा आचार्यविश्वेश्वरपण्डितः सप्रशंसं स्मर्य्यते।

२६. अलङ्कारशास्त्रमार्गे ईशवीयद्वादशशतकप्रथमार्द्धसमुद्भूतः वाग्भटालङ्कारग्रन्थस्य स्रष्टा वाग्भटाचार्यः। ग्रन्थऽस्मिन् काव्यलक्षणं तेन कृतम् – "शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालंकारौ काव्यम्"(वा.भ. – ५/१४) इति।

२७. ईशवीयनवमशतकोत्तरार्द्धवर्ती ईशवीयदशमशतकपूर्वार्द्धवर्त्ती वा समुपजातः आचार्यमुकुलभट्टः अभिधावृत्तिमातृकाग्रन्थस्य रचयिता। अस्माभिः श्रद्धोपगूढेषु चित्तेषु संवृतो भूयते।

२८. अलङ्कारशास्त्रमार्गे ईशवीयदशमशतके समुद्भूतः आचार्यप्रतीहारेन्दुराजः अभिनवगुप्तस्य गुरुः मुकुलभट्टस्य शिष्यश्च आसीत्। स एव अलङ्कारशास्त्रस्य सर्वप्राचीनटीकाकारो जातः। तेन 'लघुवृत्तिः' इति टीका कृता।

२९. ईशवीयैकादशशतकसमुद्भूतः उद्भटविवेकग्रन्थस्य प्रणेता आचार्यराजानकतिलकः अस्माकं चित्तसारे स्वीयते।

३०. ततः अलंकारशास्त्रपारावारे समुदेति ईशवीयदशमशतकपूर्वार्द्धसमुद्भूतः काव्यमीमांसाग्रन्थस्य स्रष्टा आचार्यराजशेखरः।

३१. ईशवीयद्वादशशतकपूर्वार्द्धसमुद्भूतः अलङ्कारविद्यासूत्रग्रन्थस्य रचयिता जैनाचार्यः शौद्धोदनिः प्रशंसाभूयस्त्वेन नेतुं शक्यते।

३२. अलंकारशास्त्रे ईशवीयषोडशशतकोत्तरार्द्धे समुपजातः अलंकारशेखरग्रन्थस्य प्रणेता आचार्यकेशवमिश्रः। शौद्धोदनिविरचितालङ्कारविद्यासूत्रग्रन्थतः कारिकामवलम्ब्य तेन अलङ्कारशेखरग्रन्थः विरचितः।

३३. ईशवीयपञ्चदशशतकसमुद्भूतः उदाहरणदीपिकाकाव्यप्रकाशप्रदीपग्रन्थद्वयस्य रचयिता आचार्यगोविन्दठक्कुरः अलङ्कारवासितचित्तेषु अत्यादरणीयतया संवृत्तः।

३४. ततः ईशवीयत्रयोदशशतकोत्तरवर्त्ती ईशवीयचतुर्दशशतकप्रथमवर्त्ती वा समुपजातः रसतरङ्गिणीरसमञ्जर्यलंकारतिलकगीत-गौरीशग्रन्थचतुष्टयस्य स्रष्टा आचार्यो भानुदत्तो न कदापि वीतश्रद्धतया नीतः।

३५. तदनन्तरम् अलङ्कारशास्त्रपारावारे समुदेति ईशवीयपञ्चदशशतके समुद्भूतः अलंकारकौस्तुभग्रन्थस्य प्रणेता आचार्यकविकर्णपूरः अतिगौरवमापन्नः अलङ्कारशास्त्रहर्म्येषु। बङ्गदेशे तत्रभवान् अजायत। चैतन्यमहाप्रभोः शिष्यः आसीत्। ग्रन्थेऽस्मिन् तेन काव्यलक्षणं कृतम् – "कविवाङ्निर्मितिः काव्यम्" इति। पुनश्च काव्यपुरुषविषयमधिकृत्य तेन उक्तम् - "शरीरं शब्दार्थौ, ध्वनिरसव आत्मा किल रसः" इति।

३६. अनन्तरमीशवीयसप्तदशशतकोत्तरार्द्धसमुद्भूतः काव्यचन्द्रिकाग्रन्थस्य स्रष्टा आचार्यकविचन्द्रः अस्माकं मनोमुकुरेषु स्थितः।

३७. ततः अलंकारशास्त्रमार्गे ईशवीयत्रयोदशशतकोत्तरार्द्धे ईशवीयचतुर्दशशतकपूर्वार्द्धे वा समुपजातः अरिसिंहाचार्यः कवितारहस्याख्यग्रन्थस्य काव्यकल्पलताग्रन्थस्य वा रचयिता। अरिसिंह प्रणितस्य असमाप्तग्रन्थस्य अन्तः अमरचन्द्रेण कृतः।

३८. ईशवीयचतुर्दशशतकोत्तरार्द्धसमुद्भूतः उज्ज्वलनीलमणिः भक्तिरसामृतसिन्धुनाटकचन्द्रिकाग्रन्थत्रयस्य प्रणेता आचार्यः रूपगोस्वामी सप्रशंसं स्मर्य्यते।

३९. ईशवीयपञ्चदशशतकोत्तरार्द्धे समुपजातः भक्तिरसायनग्रन्थस्य स्रष्टा अद्वैतवेदान्ताचार्यः मधुसूदनसरस्वती सप्रशंसं स्मर्य्यते।

४०. तदन्तरमलंकारशास्त्रे ईशवीयद्वादशोत्तरार्द्धे ईशवीयत्रयोदशपूर्वार्द्धे वा समुद्भूतः भावप्रकाशग्रन्थस्य रचयिता आचार्यशारदतनयः अतिगम्भीरघोषेण रसोपयुक्ते चित्ते उपस्थीयते।

ईशवीयदशमशतकोत्तरार्द्धे समुपजातः नाटकलक्षणरत्नकोषग्रन्थस्य प्रणेता आचार्यसागरनन्दी अस्माकं चित्तमुकुरे नरीनृत्यते।

अलंकारशास्त्रे इत्थं सर्वेषामाधिकारिकाणां मतानि संप्रेक्षितानि। एतेषां ग्रन्थेषु काव्यचर्चाविषये कुत्रापि लघुबृहच्छब्दयोः सञ्चारो न दृष्टचर आसीत्। तथापि उक्तशब्दयोः काव्यचर्चायां संपातितयोः कथं व्यवहारः समासादितः इति प्रेक्षणदशायां सञ्चारितः दृश्येत।

संस्कृतसाहित्यागारे लघुशब्दस्य अल्पीयस्त्वेन बृहच्छब्दस्य च महदर्थवत्त्वेन व्यवहारः कोशग्रन्थेषु समादृतः। विशेषतो ग्रन्थपर्याये अनयोर्व्यवहारो दृश्यतेतराम्। यद्यपि 'बृहत्कथा'नाम साहित्यग्रन्थे प्रभूतपद्यसंघटितजल्पसंग्रहः सूचितः, पुनश्च बृहन्नारदीयेषु पुराणग्रन्थेषु बृहच्छब्दस्य तादृशार्थवत्वात्, किञ्च कुमारिलभट्टान्तेवासिनः प्रभाकरमिश्रपादस्य ईशवीयसप्तमशतकार्द्धासमुद्भूतस्य शवरभाष्यस्योपरि 'बृहती' इति 'लघ्वी' इति टीकाद्वयविरचनम्, अन्यतश्च शब्दशास्त्रे लघुसिद्धान्तकौमुदीग्रन्थेषु, स्वल्पीयस्त्वेन व्यवहारस्य दृश्यमानत्वात् न कथञ्चित् व्यतिक्रमः परिलक्षितः। एवंविधेषु प्राप्तेषु बृहल्लघुशब्दयोः समाचारेषु अतिरिक्तबोधाय कथञ्चिदधिकं तथ्यमुपन्यस्यते –

**निष्कर्ष :** संस्कृतसाहित्यपारावारे लघुबृहच्छब्दव्यवहाररीतिः प्रेक्षिता। प्रायशः मात्रार्थे अनयोर्व्यवहारः परिलक्षितः। तथा सति एषा वृत्तिः कदा काव्यक्षेत्रे सज्जते, तत्र किं बहिरङ्गतया एतौ समाचरितौ सम्यगलक्षणानुसारतो गुणानां तथा वैशिष्ट्याणां विचारणा इति सर्वथा प्रेक्षणेन निर्णीते विषये चिन्तायाथार्थ्यं समायाति। प्रकृते बृहत्त्रयी वृत्तिः भारविविरचितादिकाव्येषु यथा व्रियते तथा कालिदासरचितेषु काव्येषु लघुत्रयी वृत्तिः शोभते इति समाचारः। तथाहि लघुत्रयी वृत्तिः कालिदासविरचितेषु महाकाव्यद्वयं रघुवंश-कुमारसम्भवाख्यं तथा मेघदूतं नाम खण्डकाव्यमिति अङ्गीकृत्य संघटते; बृहत्त्रयी वृत्तिः भारविविरचितं किरातार्जुनीयम्, माघविरचितं शिशुपालवधम्, श्रीहर्षविरचितं नैषधीयचरितम् इति महाकाव्यत्रयमुपजीव्य विद्यते।

ननु महाकाव्यविषयमुपजीव्य लघुवृहच्छब्दयोर्व्यवहारः काव्यप्रतिभानिर्णयव्यापारे असङ्गत एवेति चेदुच्यते ये ये कवयः काव्यकृतीः समुद्दिश्य चर्चायां निहिताः , ते न जानन्ति एतादृशं परिगणनम्। तथा सति प्रतिभासम्पन्नस्य महाकवेः कालिदासस्य कृतौ पुनरेकतमस्य महाकाव्यस्य संयोजनम् इति लीलयैव कर्तुं शक्यते। ऐतिहासिकविषयमवलम्ब्य भावरसादिपरिपूर्णशब्दार्थसम्भारैः महाकाव्यलक्षणाभिधायि प्रातिभं विच्छुरणं महाकवेः कालिदासस्य अपरां कीर्तिगाथां स्पृशति। एतेन संस्कृतसाहित्यं पुनर्धन्यतामासाद्येत। एते काव्यकलापातिशोभासञ्चारितधीवृत्तयः कविवर्याः कालिदासपूज्यपादाः पुनरधस्तनानां महाकाव्यगतलक्षणभाजां काव्यरसिकानां परिमाणमात्रतत्पराणां प्रचेष्टां प्राक्तयाऽवगतवन्तः अलौकिकशक्तिबलेन , नूनं धन्यधन्या

भवेयुः काव्यरससुधाधारापात्रनिष्णातामलिनचित्ताः स्निग्धाः मनोहराः सहृदयाः सर्वोत्कृष्टरसोपलब्धये। किञ्चामरगाथासञ्चारयितृरसभावमाधुर्योत्सारितशब्दार्थमूर्च्छनासम्पृक्तानां कालिदासानां महाकवीनां सुललितपदझनत्कारध्वनिः। किन्त्वपरिगणिता तादृशी शेमुषी इत्यधन्यानि काव्यरससुधावञ्चितानि सहृदयानाम् ।

अत्रैकतः कालिदासीयः पक्षः , अपरतश्च काव्यचर्चाशीलाः शब्दार्थपरिषेवणधुरन्धराः भारविमाघश्रीहर्षप्रभृतयः महाकवयः इति। अत्रोत्तरपक्षे महाकाव्यत्रयं परिगणितं महाकाव्यलक्षणानां यथायथपरिवेशनेन , तत्रोत्कर्षापकर्षगणनाऽपरिप्रेक्षितत्वात्। अत्र परिवर्जिता पक्षद्वयस्य विचारचर्चा गुणागुणनिर्णये। नूनं तत्र कालिदासः सर्वानतिशेते काव्यरससुधामात्रदानेन। प्रतिभावलमेवात्र प्रमाणं यत् कालिदास एव विद्यते। इतरस्थानेषु काव्यचर्चापारिपाट्यं सततमनुभूयते। अतो लघुवृहच्छब्दयोर्व्यवहारो ध्वनितः केवललक्षणात्मकनियमपूर्णतोपरि, न तु वैदग्ध्यविचारश्चर्चितः। तथा सति काव्यसमालोचकानां व्याहतो विचारध्वनिः – पुरा कवीनां गणनाप्रसङ्गे / कनीष्ठिकाधिष्ठितकालिदासः। अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती वभूव।। इत्यादिकन्ठशतैः स्तुतिदर्शनात्। वस्तुतस्तु कालिदासीया रीतिः नवीनमार्गप्रदर्शिका, तत्रेतरेषां कवीनां पदध्विनिर्न श्रूयते वैदग्धविचारदशायाम्। साधुरास्तां मार्गः संख्याविचारे। महति कालिदासे महाकाव्यद्वयेन साकं खण्डकाव्यस्यावस्थानम्, इतरत्र कवित्रये पृथक्तया महाकाव्यलक्षणविचारः परिपूरित इति सारः।

अत्र प्रश्नः समुदेति यत्, ये ये काव्यरसिकाः लघुवृहश्छव्दयभावनां परिशीलितवन्तः, तेषां कथं नु चर्चा श्रीहर्षपर्यन्तं विद्यत इति। मन्यते, कालिदासीये पक्षे महाकाव्यद्वयस्य सत्त्वात् इतरत्र काव्ये। खण्डपरत्वसूचनात् समुदायेन त्रितयमहाकाव्यत्वाभावे, अन्यत्र भारवि-माघ- श्रीहर्षाविधृतमहाकाव्यत्रयदर्शनात् तदपेक्षया कालिदासीयरचनायां नून्यता समायति। अतः काव्यसमालोचकानां कथं श्रीहर्षपर्यन्तमवनमनम् इति चेदुच्यते, कालिदासव्यतिरिक्तानां कवीनां प्रसिद्धिरुक्तत्रयपर्यन्तं विन्यस्ता, तदुत्तवर्त्तिनां कवीनां परिगणनाभावात् अप्रसक्तत्वाच्च। अथवा कालिदासोत्तरपर्याये प्रसिद्धिवशात्त्रितयस्य परिगणनमुचितमिति मन्तुं पार्यते किल। अथवा कालिदासीयमहाकाव्यद्वयं सन्मार्गेण सेवितमिति चिन्तया उत्तरत्र कवित्रयं नीतं कालपर्यायविवेचनात्।

आस्तां तावत्तादृशी विवेचना। अधुना कदा एतादृशानां समालोचकानां कालनिर्णयो घटते? संस्कृतकथासाहित्ये 'वृहत्कथा' इति गुणाढ्यविरचिता आनुमानिकेशवीयप्रथमशतकसमुद्भूता यद्यपि परिमाणतः संज्ञातो नीत्वा वृहच्छव्देन केवलेन व्यवह्रियते , पस्पशायां लघुशव्दव्यवहारो दृश्यते , तथापि उभयोरेव यथेच्छनिर्णयः शास्त्रेषु उत्तरवर्तिषु कालेषु अर्थात् दशमशताव्दीतः सप्तदशशताव्दीं यावत् अङ्गीकारो दृष्टः। एवं साहित्यसमाचारे लघुवृहच्छब्दयोर्व्यवहारानुसन्धित्सा चलतु। तथापि परिमाणतः शब्दयोर्व्यवहारे नास्ति वैमत्यम्, अन्यथा कवित्वप्रतिभाविचारेऽङ्गीकृते उक्तशव्दार्थयोर्व्यवहारानुपपत्तेरिति।

**Bibliography:**


- Visvanatha, Sahityadarpana, Ed: P.V. Kane. Bombay, 2nd Editition, 1923.
- Dandina, Kavyadarsa, Ed: V.V. Sastrulu and R.K. Panda. Delhi, Bharatiya Kala Prakashan, Revised Ed. 2008
- Bharatamuni, Natyashastra, Ed: Madhusudan Shastri, Varanasi, 1971.
- Mammata, Kavyaprakasha, Ed: Ganganatha Jha, Allahabad, Delhi: Bharatiya Vidya Prakashan, Oriental Publishers. 1985.
- Bamana, Kavyalamkarasutra Vritti, Ed: Srikrishnasuri, Srirangam: Sri Vani Vilas Press, 1909.

# श्रुतिप्रस्थाने ब्रह्मतत्त्वम्

Naba Kumar Panda, Assistant Professor,
Odisha State Open University, Sambalpur,
Phone no- 6370432899

**शोधसारः-** भारतीय वेदान्तदर्शनशास्त्रसाहित्ये प्रस्थानत्रयमस्ति । एतानि प्रस्थानि वेदम् आश्रयन्ते । एतानि मानवजीवनस्य चरमलक्ष्यप्राप्तये सहायकानि भवन्ति। प्रस्थीयते ब्रह्मस्वरूपम् अनेनेति प्रस्थानम्। येन ब्रह्मस्वरूपं स्थाप्यते , तत् प्रस्थानम्। शृति-स्मृति-न्यायभेदेन प्रस्थानं त्रिविधम्। शृति प्रस्थानम् उपनिषदः, स्मृतिप्रस्थानं श्रीमद्भगवद्गीता, न्यायप्रस्थानं तु ब्रह्मसूत्रमिति विविच्यते। सर्व खल्विदं ब्रह्म, नेह नानास्ति किचन, इन्द्रो मायाभिः पुरुरूप ईयत इत्यादि श्रुतयः एकमपि कूटस्थं नित्यं ब्रह्म माययाऽनेकधा विभाव्यत इति प्रतिपादयति। अविद्योपहिते ब्रह्मणि नामरूपे अविद्यया कल्प्येते। तच्च ब्रह्म निर्गुणसगुणभेदेन द्विविधम्। निर्गुण सर्वोपाधिवर्जितं, सगुणं तु नामरूपादिविकार-भेदोपाधिविशिष्टम् , वेदान्तदर्शनं भारतीयदर्शनानां मुकुटमणिरूपेण शोभतेतमाम्। वेदानाम् अन्तः-अन्तिमो भाग एव वेदान्तः। अर्थादन्तिम, उपनिषद्भागों वेदान्तनाम्ना प्रसिध्यति। यथा चोकम्-वेदान्तो नामोपनिषत्प्रमाणम्। अन्तिमे भागे सारः भवतीति सर्वविदितम्। उपनिषदोंऽनेका तासु क्वचिदापाततो विरोधोऽपि प्रतिभासते। तस्यैव विरोधस्य दूरीकरणाय महर्षिव्यासेन ब्रह्मसूत्राणि रचितानि। अतः वेदानां साररूपमिदं वैदानादर्शनम्। दर्शनस्यास्य प्रवर्तकः महर्षिमादरायणानासः। महर्षिणा प्रणीतः ब्रह्मसूत्रग्रन्थो वेदान्तदर्शनस्य आधारस्तम्भः भवति । भारतीयदर्शनं वेदान्तपर्यवसायि, पतोऽत्र सर्वत्र दर्शनेषु क्रमविकास इव प्रतीयते प्रथर्म कणादस्यारम्भवादः तदनन्तरं गौतमस्य परमाणुवादः, तत्परतीऽपि सांख्यस्य परिणामवादः, सर्वान्ते वेदान्तस्य विवर्तवादः। सोऽयं विकासो वेदान्तपर्यवसायितां बोधयति दर्शनानाम्। अद्वैतवेदान्ते जीमब्रह्मणोरसिशब्देन बोधितमैक्यं ब्रह्मणः परमानन्दस्वरूपत्वम् । ग्रन्थेऽस्मिन् सगुणनिर्गुणवह्मोपासना सिध्यति। उपासनायाः प्रत्यावृत्तिरूपत्वात्सगुणव्रह्मण इव निर्गुणब्रह्मणोऽपि सिध्यतीत्याह-

**निर्गुणब्रहात्तत्त्वस्य नह्युपास्तेरसंभवः ।**
**सगुणब्रह्मणीवात्र प्रत्ययात्तिसंभवात् ॥**[1]

**व्रह्मतत्त्वम्-** अहं ब्रह्मास्मी[2] त्याकारपरोक्षानुभूतिस्साक्षात्कारः। स च पंचक्रोशविवेचनापूर्वकः अर्यादपास्तं तस्य चिदाभावभासितत्वरूपं फलव्याप्यत्वम्। चिरंतनाभ्यस्तदेहात्मतत्वविभ्रान्तस्य पुनः पुनर्विचारेऽपि प्रतिबंधितः सामग्र्यभावाद्वाऽधीतवेदवेदार्यानामपि अत्यन्तव्याकुलचित्तानां मंदधियामात्मत्वेन ब्रह्मावगन्तुं न शक्यते। तेषामनिशं ब्राह्मोपसाना विधीयते। लौकिकव्यवहरे इवोपासनानामपि ज्ञानिनस्तु मिथ्यात्वबुद्धिरेव इति।

**अवाङ्मनसगम्यं तन्नोपास्यति चेत्तदा।**
**अवाङ्मनसगम्यस्य वेदनं न च संभवेत्॥**[3]

अर्थात् अवाङ्गनसगम्यं मनसा चिन्तितुं वाचा वर्णितुं वाऽशक्यं यतो बाचों निवर्तन्ते अप्राप्य मनसा सह[4] इति श्रुतेः। तन्निर्गुणं ब्रह्मोपास्यं नेत्युच्यते चेत्प्रतिपंद्या प्रतिवदति, अवगतिः। तथा अवाङ्गनसगम्पस्य वेदनं ज्ञानं न संभवति ज्ञानस्यापि चित्तवृतिरूपत्वात्। सत्यं ज्ञानमनन्तं ब्रह्म[5] इत्यादि श्रुतिभिर्निर्गुणब्रह्म परोक्षतया ज्ञायते। अर्थात् गूढ अज्ञातोपासनातत्त्वास्तिष्ठन्तु नाम। प्रकृताप्रकृत-प्रकरणविषयभूता निर्गुणोपास्तिरीर्यते कथ्यते। विध्यैक्याद्वहुश्रुतिप्रतिपादितस्य निर्गुणोपासनस्य ऐक्यात्सर्वशाखास्यानुपास्यान् गुणान् अत्र निर्गुणोपासने उपसंहरेत्। तत्तत्स्वरूपं ब्रह्मेत्युपासीतेत्यर्थः । ब्रह्मप्रतिपादिकासूपनिषत्सु आनंदविज्ञानधनसवर्गतत्वादिबोधकारशब्दाः तत्र तत्र खूयन्ते। सर्वत्रैव ते सर्वेऽपि संग्रहीतव्याः। तेषां सर्वेर्षा ब्रह्मप्रति पादकाभिप्रायकत्वादिति भावः। विविधश्रुतिप्रतिपादिताः धर्माः विधेयाः निषेध्याः इति द्विप्रकारकाः। तत्र नित्यशुद्धयुद्धमुक्ताद्वयानंदा इत्येवं जातीयकाः स्वरूपधर्मा विधेयाः। अस्थूलमनण्वहस्वमदृश्यमग्राह्मम-शब्दमित्यादयो निषेध्यरूपाः। तत्र विधेयानामुपसंहारः

ब्रह्मसूत्रे दर्शित इत्याह, आनन्देति-

**आनंदादेर्विधेयस्य गुणसंघस्य संह्रतिः ।**
**आनंदादय इत्यस्मिन् सूत्रे व्यासेन वर्णिता ॥**[6]

अर्थात् विधेयस्य उपास्तौ परिग्रहीतव्यस्थानंदादेः आनन्दविज्ञान-धनसर्वगतसर्वात्मत्वादेः गुणसंधस्य स्वरूपयोधकानां धर्माणां संघस्य संहतिरेकोपसंहारः आनन्दायः प्रधानस्य व्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्या इति सूत्रार्थः। उपासनायां यत्किचिदालंबनस्यावश्यकतया निर्गुणेऽपि परे ब्रह्मण्येवंरूपगुण-संहतेव्र्व्यसादिप्राचीनाचार्यैः ब्रह्मसूत्रे प्रतिपादिततया प्रमितत्वेन तदुपालंभः केवलोपहासायैव भवतीति भावः। हिरण्यश्मश्रुसूर्यादिमूर्तीनाम-स्मिन्निर्गुणोपासनेऽनुदाह्यतेराधानात् निर्गुणत्वमविरुद्धमिति चेत् केवलविधेयनिषेध्यगुणसंहतेर-निर्गुणोपासना न विरुध्यत् इत्युच्यते चेत् तर्हि त्वया तुष्यतां अस्माकमपीष्टापत्तेरीति भावः। मोक्षो नाम आत्यन्तिकदुःखनिवृत्तिः महदानन्दप्रातिश्च भवति। इह जन्म भवति प्राणिनां कस्यामपि योनिवेशेषे तदनु जरा, तदनु मरणं, पश्चात् पुनर्जन्म इत्येवं संसरणचक्रं प्रवर्तमानम् अस्तीति शास्त्रेभ्यः अवगन्तुं शक्नुमः। जन्मनः कारणं भवति पूर्वकृतकर्म। कर्म तद्वासनायाः क्षये सति पुनर्जन्म न स्थादेव। तर्हि कर्मणः अनिष्टफलप्रदानाद् अवरोधः कथं स्यादिदिति चिन्तनीयम्। कर्मवासना कम् आधारं कृत्वा अवतिष्ठते इति चिन्तिते सति ज्ञायते मनः एव आधार इति। मनसः शुद्ध्यै सदा एकस्य सात्विकस्य स्वरूपस्य चिन्तनं कर्तव्यम् । सात्त्विकस्य स्वरूपं तु साक्षात् भगवान् एव । सात्विकस्य स्वरूपस्य निरन्तरम् अभ्यस्यमाने सति कर्म तद्वासनायाः क्षयेण सह शरीरवियोगकाले भगवद्विषयकस्य अन्तिमस्मृतेः सम्प्रातिः भवत्येव। तस्याः अन्तिमस्मृतेरपि सम्पत्तिः भगवदनुग्रहैकलभ्या भविष्यति मर्यार्पितमनोबुद्धिः मामेवैष्यसि न संशयः[7] इत्यादि-प्रमाणबलैः भगवद्विषयणी अन्तिमस्मृतिश्च सर्वेषु कालेषु भगवति समर्पित मनोबुद्ध्यादिमताम् एव भवति। अनवरतमभ्यासश्च न सर्वेषां सुलभः। अतोऽयम् उपायः भक्तियोगवतां स्यात्। तर्हि अन्येषां का गतिः इति चेदुच्यते, प्रपत्तिः, शराणागतिः, न्यासविद्या इत्यादिशब्दैः व्यवह्रियमाणा विद्या सकृदनुष्ठिता, शरीरपातसमये अन्तिमस्मृतिम् अनपेक्ष्य एव मोक्षायां पालं प्रयच्छति। तत्रापि स्वभक्तस्य अन्तिमस्मृतिं स्वयं भगवान् तत्पक्षतः करोति।

**उपसंहारः-** शारीरकमीमांसायां जन्माद्यधिकरणे ब्रह्मणः जगज्जन्मस्थितिलयकारणत्वं लक्षणं प्रतिपाद्य सर्वज्ञत्वं यत् सूचितं तस्य दृढीकरणं शास्त्रयोनित्वाधिकरणे वेदकारणत्वेन कृतम्। वेदस्य नित्यत्वात् वेदकारणत्वमनुपपन्नमिति शङ्का अत्र निराक्रियते। आदौ वेदकर्तृत्वेन वेदोपादानत्वेन च ब्रह्मणः सर्वज्ञत्वसिद्धिः न भवतीति पूर्वपक्षमुपपाद्य आक्षेपसमाधानाभ्यां वेदकर्तुत्वेन वेदोपादानत्वेन च ब्रह्मणः सर्वज्ञत्वं सिद्धान्तितम्। अन्तरङ्गबहिरङ्गाभ्यां मोक्षसाधनं द्विविधम्। अन्तरङ्गसाधनं परमात्मनो व्यञ्जकम्। श्रवणमनन-निदिध्यासनानि मोक्षप्राप्तये अन्तरङ्गसाधनानि। एतेषामन्तरङ्गसाधनत्ये श्रुतिप्रमाणं यथा- आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[8] इति। अत्र आत्मनः दर्शनमनूद्य तत्साधनत्वे श्रवणमनननिध्यिासनानि विहितानि। तत्र श्रवणं नाम षडविधतात्पर्य-लिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम्। मननं नाम श्रुतस्य अद्वितीयवस्तुनः वेदान्तानुगुणयुक्तिभिः अनवरतमनुचिन्तनम्। निदिध्यासन तु विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः इति। एतेः श्रवणमनननिदिध्यासनैः ब्रह्मात्मैक्यापरोक्षज्ञानाद् अविद्यानिवृत्ती मोक्षः इति अर्द्धतिनः साधयन्ति। ज्ञानात् ऋते न मुक्तिः, तमेव विदित्वातिमृत्युमेति, नान्यः पन्थाः विद्यतेऽयनाय, तरति शोकमात्मविद इत्यादयः श्रुत्तयः आत्मज्ञानादेव बन्धनिवृत्तिः इति प्रतिपादयन्ति। श्रवणादिभिः संस्कृतः मन् तत्त्वमस्यादिवाक्यार्थावबांधे जीवत्रह्मणो ऐक्यं सम्भवति।

वेदोपादनत्वेनापि ब्रह्मणः सर्वज्ञत्वं सम्भवति। कार्यकारणयोः एकशक्तिकत्वनियमस्य औत्सर्गिकत्वात् यथा दीपगतां प्रकाशशक्तिः तदुपादाने बह्मवपि दृश्यते तथा वेदगतायाः सर्वार्थप्रकाशनशक्तेः बाधकाभावेन वेदोपादाने ब्रह्मण्यपि सिद्धिर्भवति। कार्योपादानयोः एकशक्तिकत्वनियमस्य मृत्पिण्डघटादिषु व्यभिचार इति यदुक्तं तन्न यतः यत् यदुपादानं तत् तद्गतशक्तिमदिति सामान्यव्यातिशरीरे बाधाभावे सतीति विशेषणं देयम्। तथा च घटगतायाः उदकहरणशक्तेः तदुपादाने मृत्पिण्डे साधने प्रत्यक्षबाधः वर्तत। अतः न मृत्पिण्डघटादिषु व्यभिचारः। अत्रेदं समाधानम्-ब्रह्म वेदगतसर्घार्थप्रकाशनशक्तिमत् वेदोपादानत्वात् इति प्रयोगे ब्रह्म पक्षः, तद्धर्मता तद्वत्त्वित्वम्। तच्च हेतोः तस्य बलम, ब्रह्मरूपपक्षे साक्षादावरणनिवृत्त्यनुकूलशक्तिमत्वस्य साधकत्वं विना अपर्यवसानं तत्र च हेतुः ब्रह्मणः स्वप्रकाशसर्वव्याप्त-चैतन्यरूपत्वम्। तस्मात् एवंविधे ब्रह्मणि उक्तहेतुना साक्षादावरणनिवृत्त्यनुकूलशक्तिमत्वस्य

सिद्धिः सम्भवतीत्यतः जीवं प्रति वेदार्थज्ञानहेतु- भूतशक्तिमत्वस्य सिद्धिः न सम्भवति। तथा च दृष्टान्तदृष्टधर्मसमानस्यैव धर्मस्य पक्षे सिद्धिरिति न नियमः, किन्तु पक्षधर्मताबलात् विजातीयस्यापि धर्मस्य सिद्धिः दृष्टा। तद्यथा कुलालादिज्ञानं इच्छादिद्वारैव कार्यानुकूलं दृष्टमिति क्षित्यादिषु कार्यानुकूलतया अनुमीयमानमपि ज्ञानम् इच्छादिद्वारैव तदनुकूलम् अनुमानवादिभिः न अनुमीयते। क्षित्यादिकं ज्ञानजन्यं कार्यत्वात् घटवदित्यत्र ईश्वरीयं ज्ञानजन्यत्वम् इच्छादिद्वारेति वक्तुं न शक्यते। ईश्वरीयेच्छायाः नित्यत्वेन द्वारशब्दार्थव्यापरत्वासम्भवात्, साक्षादेव वाच्यम्। तस्मात् ब्रह्मणःसर्वज्ञत्वं सिद्धयति इति ।

**पादटीका-**

1. प.प्र -9.55
2. वृ.उ-1.4.10
3. तत्रैव-9.56
4. तै.उ – 2.4
5. तत्रैव-2.1
6. प.प्र-9.66
7. भ.गी-8/7
8. ई.उ—1/1/1

**सहायकग्रन्थसूची**


- ईशादिदशोपनिषदः- मोतिलाल वनारसिदास पव्लिकेसन्स् , नयादिल्ली
- श्रीमद्भगवद्गीता- चौखम्वापव्लिकेसन्स, गोरखपुर
- वृहदारण्यकोपनिषदः- केन्द्रियसंस्कृतविश्वविद्यालयः वेदव्यासपरिसरः
- तैतरीयोपनिषदः - चौखम्वापव्लिकेसन्स, गोरखपुर
- पञ्चदशी प्रकरणम्- मोतिलाल वनारसिदास पव्लिकेसन्स् , नयादिल्ली

# भारतीयज्ञानपरम्परायां पाण्डुलिपिसम्पादनकला

सुफलमोदकः, शोधच्छात्रः
श्रीसीतारामवैदिकादर्शसंस्कृतमहविद्यालयः, कोलकाता
दूरभाषसंख्या- 9674499576
अनुवाक्संख्या- sufalmodak@gmail.com

**शोधसार:** ज्ञानगङ्गायाः निरन्तरप्रवाह: ज्ञानपरम्परा इति यदुच्यते । अनादिकालात् सा परम्परा तु भगवत: भगीरथस्य प्रोथनेन जलच्छलप्रवाहरूपिणी चतुःषष्टिकलासु भारतभूमौ परिव्याप्ता अस्ति । ऋग्वैदिककाले आचार्यकुलेषु गुरुमुखात् प्राप्तविद्या अव्यक्तरुपेण अन्तेवासिनां श्रुतौ संस्थितमासीत् , पश्चात्तासां विद्यानां आकारात्मिका प्रकाशः मातृकासु निहितमस्ति । एवम्भूतानां पाण्डुग्रन्थानां संरक्षणं लोकार्पणञ्च भारतीयशिक्षानीत्यां महती स्थानं भजते । विलुप्तप्रायानां पाण्डुग्रन्थानां सम्पादनम् तथा तेषां प्राप्तेषु पाठान्तरेषु आदर्शप्रारूपस्य वैज्ञानिकमानके प्रतिपादनम् अधुना शोधमूलकं प्रतिभाति । अस्मिन् शोधपत्रे पाण्डुलिपिनां शोधपद्धतिः, पाठसम्पादनप्रसङ्गे महती चर्चा अभूत् । तासु पद्धतिषु Stemmatic text editing , Eclectic text editing , इतोऽपि निम्नस्तरीयसमीक्षा तथा उच्चस्तरपाठसमीक्षासु Heuristic, Recension तथा Emendation इत्यादीनां सम्यक् व्याख्यानं जातम्। सम्पादनकार्येषु अभिज्ञानशकुन्तलमित्यस्य प्रसङ्गमपि विद्यते ।

**शब्दसंकेता:** पाण्डुलिपि: , लिप्यासनम् , पाठसमीक्षा , मुलादर्श: इत्यादयश्च ।

**भूमिका** आधुनिकविश्वपटलेषु यत्सर्वं यन्त्रिकीमुद्रनकलायाः प्रयोगो दृश्यते तत्तु सार्धेशताव्दी प्रागेव अभूत । तत्पुर्वं शास्त्रस्य प्रवत्ति: केवलं गुरुपरम्पया श्रुतिरुपेण उत् मातृकारुपेण संरक्षितमासीत् । अथ हस्तलेखनमेव एव वैदिकोत्तर शिक्षाव्यावस्थायां प्रधानभूतं साधनमासीत् । विद्यादानस्य परम्परा सुप्राचीनकालादेव भारतवर्षे सुविदितमस्ति, तत्र ऋग्वेदस्य कुन्तापसुक्ते विद्यते–

**न वा उ देवा: क्षुधमिद्वधं ददुरुताशितमुपगछति मृत्यव: ।**
**उतो रयिः पुणतो नोपदस्यतुतापृणन् मर्डितारं विन्दते ॥**[1]

एवन्च विष्णुधर्मोत्तरपुराणे दृश्यते –

**विद्यादानात् परं धर्मो न भूतो न भविष्यति ।**

न हि केवलम् अध्यापनादिकार्यं प्रशंसनीयमासीत् अपि तु दरिद्रेभ्यो पुस्तकादि प्रदानमपि विशिष्टदानमिति ज्ञायते । हयशीर्षपञ्चरात्रे (संकर्षणकाण्डः, ३१.४८.५०) दानस्तुतिप्रसङ्गे गोदानस्य कृते तु स्वर्गप्राप्तिरिति वर्णितमस्ति । भूमिदानेन ग्रहीतायाः यथा- सुवर्णधान्यादि शस्यानां प्राप्तिर्भवति, तथैव पुस्तकादिदानकार्येण तच्छात्रभूतानां निर्मलज्ञानेन दाता ग्रहीता च उभयोरेव श्रेयस्करफलवन्तौ भवत: । महाभारते अस्ति –

**दापनमथ विद्यानां दरिद्रेभ्योर्थवेदनैः ।**
**स्वयं दत्तेन तुल्यं स्यादिति विद्धि शुभानने ॥**[2]

नान्दीपुराणेष्वपि दानस्तुतिर्विद्यते यथा – **विद्यादानमवाप्नोति प्रदानात् पुस्तकस्य च ।**
**येऽपि पत्रं मसीपात्रं लेखनीसम्पुटादिकम् ॥**
**लघुशास्त्राभियुक्ताय तेऽपि विद्याप्रदायिनाम् ।**
**यान्ति लोकान् शुभान् मर्त्याः पुण्यभाजो नराधिपः ।**[3]

तत्कालीन भारतवर्षे पञ्चमहायज्ञ विहाय पाण्डुलिपियज्ञनाम भिन्नैका यज्ञस्य अवधारणा आसीत् । तत्र स्थिते पाण्डुलिपिग्रन्थानां महता यत्नेन संरक्षणस्य प्रथा आसीत् ।

**यः सौवर्णम् सुसम्पूर्णं स्वर्वरत्नोपशोभितम् ।**
**सपिधानम् सुमन्जूषं विद्याकोशसमाश्रयम् ॥**
**कारयेद् वापि रौप्येण ताम्रेण चतुरस्रकम् ।**
**कांस्यारकूटलोहं वा दारुवंशादिर्निमितम् ॥**
**कुर्यात् तालसंयुक्तं विद्यारत्नकरण्डकम् ॥**[4]

पुस्तिकायन्त्रेषु ग्रन्थानाम् आधारपात्रनिर्माणमपि सुव्यवस्थितमासीत् । नान्दीपुराणादिषु तत्तु विद्याधारः, शिवयन्त्रम्, सरयत्रम्, शरयत्रम् इत्यादि नाम्नापि वर्णितमस्ति । तदा चन्दनादिकाष्ठनिर्मितम् गजदन्तनिर्मिताधारस्योपरि वा पट्टवस्त्रादिना आवृत्य पुस्तकसंरक्षणं प्रचलितमासीत्, देवीपुराणे अस्ति यथा-

**तस्य मध्ये न्यसेद् यक्षं नागदन्तमयं शुभम्।**
**यत्रकं चासनं चैव दण्डासनमथापि वा ॥**

**पुनश्च उच्यते -**

**विद्यधारं प्रकुर्वीत हेमरूपमयं शुभम्।**
**नागदन्तमये वापि शुभदारुमयं तथा ॥**
**मनोज्ञमगुरुं रम्यं श्रश्नयनप्रयोगजम्।**
**संकोचपत्रसंयुक्तं विकाशेन समन्वितम् ॥**
**तत्र विद्यां विनिहितां कुर्यात् पुस्तकसंहिताम् ॥**
**रम्यं लघु सुविस्तीर्णम् निर्ग्रन्थि ग्रन्थिसंयुतम्।**
**विद्याधारं ततो यन्त्रसंस्थितं पूर्वपुस्तकम् ॥**[5]

इतोऽपि पुस्तकलेखकाः कायस्थपदेन सम्बोधिताश्चासन् । आचार्यशुद्रकस्य मृच्छकटिके नवमाङ्के धर्माधिकरणस्थस्य कायस्थस्य मनोज्ञचित्रं दृक्पथमायाति । अपि तु महाकविभासकृतपञ्चरात्रस्य द्वितीयाङ्के सैनिकानां विवरणलेखकरूपेण ब्राह्मणलेखकानामुपस्थितिः दृश्यते । कविराजक्षेमेन्द्रः स्वकृतौ नर्ममालायाम् एतेषायां कृते कटूभाषते –

**"तुष्टस्तमेत्य वरदः कलिः साक्षादभाषत ।**
**सर्वदेवविनाशाय गच्छ वत्स महीतलम् ॥**
**अनेन कलमात्रेण मद्दत्तेन प्रहरिणा ॥**[6]

वस्ततस्तु वेदविदब्राह्मणलेखकास्तदा उत्कृष्टहस्तलेखकरूपेण समाजे पूज्यते, एवमेव ब्राह्मणलेखकस्य नैपुण्यताविषये वाचस्पत्यम्उपलभ्यते -

**"ब्राह्मणं वाचकं विद्यान्त्रान्यवर्ण जमादरात् ।**
**सप्तस्वरसमायुक्तं काले काले विशाम्पते ॥**
**प्रदर्शयन् रसान् सर्वान् वाचयेद् वाचको नृपः ॥**[7]

**मूलविषयः** संस्कृतभाषायां "मातृका", "पाण्डुलिपिः" इत्यादि शब्दस्य प्रयोगः अप्रकाशितहस्तलेखस्य कृते व्यवह्रियते। अपि च मूलादर्शः, पुस्तिका, पुस्त नाम्नापि प्रसिद्धम् अस्ति । तत्र पाण्डुलिपिविमर्शग्रन्थे अशोककालियामहोदयः भणति-

**मस्याद्युपकृतस्तत्तल्लिप्यक्षरसमन्वितः ।**
**हस्तेन क्वचिदुत्कीर्णो लिखितो लेखितोपि वा ॥**
**कर्गदभूर्जताडादिपात्राणां कोपि सङ्ग्रहः ।**
**पञ्चसप्ततिवर्षेभ्यः प्राचीनः कुलशेवधिः ॥**
**पुस्तकं कुत्रचित् पोथी कुत्रचित् ग्रन्थ इत्यपि ॥**
**मातृका हस्तलेखो वा प्रोक्तः पाण्डुलिपिस्तथा ॥**[8]

अपि च Maheswaran Nair नये " The Word 'Manuscript 'is formed of two elements namely 'Manu' and 'scripts'. 'Manu 'stands for manual originating from 'Manus' meaning hand. Script is from Latin 'scriber' meaning to write. The two semantic elements of the word Manuscript, therefore 1. It is manually written and 2. It is in some script form." प्राचीनकाले भारतवर्षे लिप्यासनस्य आधारदृष्ट्या भेदद्वयम् परिकल्पितमासीत् । तत्र प्रस्तरखण्डताम्रफलकादिषु राजशासनप्रशस्तादीनां कठोरलिप्यासनम् अपि च कर्गजताडभूर्जपत्रादिषु लेखनम् कोमललिप्यासनम् इत्युच्यते ।

**कठोरलिप्यासनम्**

| पाषाणलेखः | मृत्तिकालेखः | धातुपत्रलेखः | काष्ठीयलेखः |
|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ |
| स्तम्भलेखः (जुनागडः) | क्लेटेब्लस् | ताम्रपत्रम् | बौद्धजातकम् |
| चट्टानलेखः (खारवेलप्रशस्तिः) | (सुमेरियप्रदेशः) | (वेङ्कटेश्वरप्रशस्तिः) | (विनयपिटकम्) |
| मूर्तीयलेखः (कोणार्कमन्दिरम्) | | स्वर्णपत्रम् (तक्षशिलागङ्गुस्तूपम्) | |
| गुहालेखः (हातिगुम्फादि) | | रजतपत्रम् (भट्टिप्रोलु स्तूपम्) इत्यादि। | |

**कोमललिप्यासनम्**

- **ताडपत्रलेख: – रामेश्वरध्वजकृतः कुसुमाञ्जालिटिका प्रबोधसिद्धिटिका च।**
- **भूर्जपत्रलेख: - खोतानप्रदेशस्य संयुक्तागमेति बौद्धग्रन्थः।**
- **सांचीपत्रलेख: – आर्यमञ्जुश्रीकल्पेति बौद्धदार्शनिकग्रन्थः।**
- **पटीयलेख: – प्रभसूरिविरचितं धर्मविधिः इति जैनग्रन्थः।**
- **चर्मपत्रलेख: - ईरानप्रदेशमध्ये चर्मपत्रलेखस्य परम्परा आसीत्।**
- **कागजीयलेख: – अभिनवगुप्तविरचितं ध्वन्यालोकस्य ध्वन्यालोकस्य लोचनटीका।**
- **तुलिपातलेख: – रामायणस्य प्रतिलिपिः आसामप्रदेशे गुयाहाटी विश्वविद्यालये संरक्षितास्ति।**

एवञ्च परम्परारूपेण मातृकासंरक्षणस्य विधिः भारते दृश्यते। यद्यपि भौमालिकावस्थानदृष्ट्वा तत्र वैचित्र्यमपि न दुर्लभम्। हिमाचलदेशे भूर्जपत्राणां, ओडिशाप्रदेशे दक्षिणभारते च ताडपत्रानां (नवजातशिशूनां जन्मपत्रनिर्माणे) पूर्वभारतस्य असमप्रदेशे संचीपत्रम् तुलिपत्रम् प्रभृतीनां मातृकारूपेण व्यवहारः दृश्यते। अधुना भारतसर्वकारस्य संस्कृतिविकासमन्त्रालयेन National Manuscript Mission मध्ये "**पाण्डुलिपिपटलम्**" इत्यत्र सहस्रलक्षाधिकाः हस्तलेखग्रन्थाः **Digitised** रूपेण संरक्षिताः वर्तन्ते। "**New Catalogues catalogorum**" इत्यत्र अक्षरानुक्रमेण भारतीयकृतिवैभवाः सुत्र्यार्वास्थताः सन्ति। इतोपि Asiatic Society of Kolkata, BORI, RORI , Saraswati Mahal library, Ganga Nath Jha Library Prayagraj प्रभृतिषु प्राच्यविद्याकेन्द्रेषु पाण्डुलिपयः महत्प्रयनेन एव संर्गक्षतास्यन्ति।

अद्यत्वे संगणकयुगेऽस्मिन् समाजस्य प्रत्येकमपि क्षेत्रं शोधमूलकं प्रतिभाति। ज्ञानविज्ञानस्य प्रगतिमार्गमनुसृत्य प्रामाणिकतत्वान् उररीकृत्य मानवस्तावता वेगेनगम्यमानाः यत्र तर्कनिहितयुक्ति विना किमपि न सिद्धति। वैदिककालादेव भारतीयज्ञानपरम्परा यथा बहुकौणिकं तथा विशालं वर्तते। श्रुतिक्रमेण पूर्वाचार्यैः प्रोक्तसाहित्यं हस्तलिखितरुपेण पुनःपुनः लिप्यान्तस्करणेन च वहुपाठेषु अद्य शोधमूलकं प्रतिभाति। अधुना केन्द्रीयशिक्षानीतिः २०२० आधारीकृत्य तथा भारतीयज्ञानपरम्परामनुसृत्य संस्कृतस्य पीठस्थानभूताः केन्द्रीयसंस्कृविश्वविद्यालयः शोधग्य प्रमुखक्षेत्राणि निर्धारयति। तेषु पाण्डुलिपि सम्पादनकार्यं प्रथमान्तत्येन वर्तते।

भारतवर्षे लेखनकलायाः ऐतिह्यम् न स्थिरमिति स्पष्टमिति। विषयेऽस्मिन् विरोधप्रतिरोधादिक्रमांऽपि वहुधा दृश्यते। अस्य कारणमिदं ऐतिह्यस्य भ्रान्तोपलब्धिः, तथासामग्रीरित्यस्याल्पता च। मैक्समूलरः पाणिनिकालीनं कालमधिकृत्य कल्पयति यत् भगवता पाणिनिना विरचिता, अर्थात् स स्वमतानुसारेण कल्पयति लेखनकलायाः प्रारम्भः चतुःशताब्दाभवत्। द्वितीयक्रमे विद्याविशारदः वर्णेल अपि तसैव मतस्य समर्थनं करोति, अनेन स्पष्टं यत्लेखनकलायाः प्रारम्भः चतुःपञ्चम्यां वा अभूत्। तृतीयक्रमे बुलहारमहोदयः ब्राह्मीलिप्याः इत्यस्याः विवेचनं कुर्वन् प्रतिपादयति यत् ब्राह्मी इत्यस्याः विस्तारः ई.पू. पञ्चमशताब्द्यामभवत्। अतः

अष्टमशताब्द्याम् वर्णनानां प्रवेशकालस्य परिकल्पना भवितुमर्हति। इदं सामयिकमिति । युरोपीयविदुषामपेक्षा भारतीयलेखनकला अत्यन्ता प्राचीनसिद्धा भवति ।

भारतीयप्राच्यविद्यापरम्पराक्रमे समीक्षितपाठसम्पादनसन्दर्भ सर्वप्रथमं १९६० खिष्टीयाव्द वरोदाप्राच्यविद्याकेन्द्रस्य अध्यक्षपादाः G.H.Bhatt महोदयाः बालकाण्डस्य तथा च १९५१ ख्रिष्टीयाब्दे V.S. Sukhthankar महाभारतस्य दृष्टान्तरूपं समीक्षितपाठकृतवन्तौ । एवन्च लौकिककाव्यादिषु, पुराणेतिहासः, नाट्यसाहित्यम्, चिकित्साविज्ञानम्, खगोलादिशास्त्रम् सर्वत्र समुपलब्धेषु प्रतिलिपिकृतपाठेषु प्रक्षिप्तांशस्य योजनं भूयो भूयः दृश्यते । अतस्तेषां ग्रन्थानां सम्पादनं करणीयम् स्पष्टमिति ।

अभिज्ञानशाकुन्तलानाटकस्य तृतीयाङ्के सुचनायामस्ति[9] –

- **काश्मीरीयपाठः** ततः प्रविशति **कामयानावस्थो** राजा विदूषकश्च।
- **मैथिली/बङ्गपाठः** **ततः प्रविशति मदनावस्थो राजा विदूषकश्च।**
- **देवनागरी/दाक्षिणात्यपाठः** **ततः प्रवशति कामयामानावस्थो राजा विदूषकश्च।**

अतस्तत्र निराङ्कुशंपाठस्य प्राप्तिः कथं भवेत् ? वामनाचार्यस्तु काव्यालङ्कारसूत्रवृत्तौ कामयानशब्दः **'सिद्धोऽनादिश्चेत्' (५/२/८२)** इति सूत्रेण "**कामयानशब्दः**" प्रयोगविमर्शः कृतवान् । तन्नये यद्यपि व्याकरणदृष्ट्या "**कामयानशब्द:** शब्दसाधनं कठिनं मन्ये, तथापि काश्यां मूर्धर्ण्यपण्डितवर्या: रेवाप्रसादद्विवेदीपादाः नये कालिदासेन रघुवंशकाव्ये १९/५० श्लोकमध्ये अस्य शब्दस्य प्रयोगं कृतवान्, अतो कालदृष्ट्या मैथिली, बङ्गाली तथा देवनागरीपाठान्तरेषु प्रयुक्तपाठस्तु उत्तरकालिकसैव प्रयोगः । अनादिकालात् प्रयोगवशात् तथा रघुवंशमित्यत्र (१९/५०) कालिदासेन पूर्वाल्लेखात् काश्मीरीय पाठस्यैव प्राचीनतरूपेण ग्रहणं भवति । एवम्प्रकारेण वैविध्यपूर्णपाठस्य सन्दर्भ तर्कनिष्ठठ्या मूलपाठस्य चयने नूनमेव क्लेशकरमनुमीयते । प्रसङ्गेऽस्मिन् पाश्चात्यपण्डिता: S.M.Katre महोदयाः तस्य **"Introduction to Indian Textual criticism"** ग्रन्थे साक्ष्यभूतपाठस्य प्रकारत्रयं परिकल्पितमासीत् । यथा-

- **मूलग्रन्थकारस्य स्वहस्तलेखपाठ:।**
- **मूलहस्तलेखस्य प्र तिलिपि:।**
- **प्रतिलिपीनां प्रतिलिपि: इति।**

यूरोपीयपाठसम्पादनस्य नवीनप्रेक्ष्ये भारतीयवैविध्यपूर्णपाठस्य समीक्षणं कथं प्रतिपादयिष्यते ? इति प्रश्ने वाङ्गयसाहित्यम् कति तत्तु आदौ ज्ञातव्यम् । यतो हि सहदयानां कृते काव्यशरीरं तु सदैव रसोपोभोग्यं भवेत्, परन्तु तच्छरीस्योपादेयत्वम् वामनादि श्र्चार्यः भिन्नदृष्ट्या प्रतिपादितवन्तः । वस्ततस्तु उपलभ्यमास्य संस्कृतसाहित्यस्य सञ्चारितपाठस्य स्वरूपं पञ्चविधा: विद्यन्ते । यथा-

**१. दृष्टसाहित्यम् (वेदादिशास्त्रम् तथा उपनिषद्द्याहित्यम्)**
**२. उत्कीर्णसाहित्यम् (अशोकादि शिलालेखः, स्थम्भलेख इत्यादि)**
**३. प्रोक्तसाहित्यम् (रामायणम्, महाभारतम् तथा अष्टादशपुराणानि च)**
**४. श्रुतसाहित्यम् (बुद्धः, महावीरादि धर्मानुशासनम्)**
**५. कृत्साहित्यम् (अभिज्ञानशाकुन्तलम्, कुमारसम्भवम् इत्यादि)**[10]

भारतीयज्ञानपरम्परानये वेदा: परमपुरुषस्य निश्वासभूताः । तत्तु अतीन्द्रियसाधनलब्धाः दृष्टमत्रांशेन संपृक्तास्तथा बहुशाखासु निबद्धाः सन्ति । केवलं सामवेदस्यैव सहस्रशाखाः आसन्, यद्यपि शाखात्रयमेव इदानीमुपलभ्यते । एवञ्च ऋग्वेदस्य एकविंशतिशाखासु एकमात्रमेव मिलति । अर्थात् संपूर्णवेदसाहित्ये लेखनविद्याकालस्य प्रागेव श्रुतिपरम्परायां विपुलमासीत्, परन्तु पाण्डुलिपिरुपेण किञ्चिन्मात्रेण विद्यते । वस्तुतस्तु अकर्तृकवेदवाङ्गयेषु तथा उपनिषद्ग्रन्थेषु तेषां

सञ्चारितपाठेषु वैविध्यपूर्णता नूनमेव दृश्यते ।

अशोकादि शिलालेखेषु (ई.पू. २८३ तः १८ शताब्दीपर्यन्तम्) तथा ताम्रशासनेषु खोदितसाहित्ये उत्कीर्णसाहित्यमित्युच्यते। अधुना भारतदेशे देवनागरीलिप्यां तथा मौर्यब्राह्मीलिप्याञ्च प्राचीनोत्कीर्णसाहित्यस्य निदर्शनं मिलति । तत्रोदाहणरूपेण सारनाथलघुस्तम्भाभिलेखः, गिर्णारलेखः तथा बौद्धजातकलेखस्तु दृक्पथमेति । वस्तुतस्तु ऐतिहासिकयुगे राजशासनस्य प्रोथनं वंशानुक्रमेण परम्परासमभूतमासीत् । २५० ई. पूर्वीय सारनाथलेखे ब्राह्मी लिप्यामस्ति यथा- **देवा नां पिये) २. ए ळ ३. पाट (लिपुत) (नसकि ये केन पि संघे भेतवे (1) संस्कृते तु देवानां प्रिय: ये पाटलिपुत्रे तथा कर्त्यवं येन शक्य:' इति** । एतादृशं साहित्ये लिपिकारस्य भ्रमवशात् टङ्कणदोषाच्च सर्वथा विवादास्पदमेव ।

रामायणादि आर्षकाव्यद्वयं तथा अष्टादशपुराणानि प्रोक्तसाहितत्येषु अन्तर्भवन्ति । वेदोत्तरकालिके भारतीयलौकिकजीवने रामायणं तथा महाभारतम् अद्वितीयस्थान भूतमिति ज्ञायते। हिन्दुधर्मे अखण्डरामायणपारायणम् तथा श्राद्धादिषु गीतादानम् नृयज्ञरूपेण परिगण्यते । प्रत्येकमपि भारतीयाः वाक्यविनिमये, नाट्यचरित्रनिर्णये, नवजातकानां नामकरणसंस्कारे रामादि तथा युधिष्ठिरादि चरित्रानाम् अनुकुर्वन्ति । रामानन्दसागरनिर्देशितं रामायणम् तथा महाभारतचलच्चित्रम् अद्यापि दूरदर्शने नितरां प्रचलति । परन्तु कालव्यावधानदृष्ट्या महाभारतादि पाठस्तु निराङ्कशम् नास्ति । यथा हरिवंशपुराणम् महाभारतस्यैव प्रक्षिप्तांशमिति सुविदितमस्ति, एकाच बालकाण्डः उत्तरकाण्डस्तु उत्तरकालिकस्य तथा वाल्मीकेर्हस्तलिखितं नास्ति इति पण्डिताः वदन्ति।

भासकालिदासबाणभट्टादिकाव्यकारैः कृतानि सृष्टकाव्यानि कृतसाहित्येषु परिगण्यते। वस्ततस्तु रामायणादिकथावस्तूनि आधारीकृत्य कविकल्पनया च द्रवीभूय कालान्तरेषु एतेषां काव्यग्रन्थानां संरचना जाता। पश्चात् भिन्नैः टीकाकारैः स्व स्व टीकाभिस्तथा भाषान्तरेषु कृतमिश्रितसंरचनया एतेषां काव्यग्रन्थानां पठनपाठनं प्रचल्यमानमस्ति । यथा अभिज्ञानशाकुन्तलनाटके पञ्चविधपाठस्येव संरचना अस्ति । परन्तु तेषु समीक्षितपाठेषु काश्मीरीयपाठस्येव प्राचीनत्वम् (एशियाटिकसोसाइटिमध्ये प्राप्तनेवारीलिपिस्तु १२ई.पू . परन्तु प्राप्तसमीक्षितपाठस्य पाण्डुलिपिस्तु ७/११ ई.पू. कालिकपाठः तत्तु भूर्जपत्रेलेखनात् कालदृष्ट्या सर्वोत्कृष्टमिति) प्रमाणभूतं वर्तते। गुजरातविश्वविद्यालयस्य भाषासाहित्यभवनस्य अध्यक्षपादाः डॉ वसन्तकुमारभट्टचरणाः २०१८ तमे वर्षे पाठसमीक्षां कृतवन्तः।

जातकसाहित्यकाले भगवान् बुद्धमहावीरादि आप्तपुरुषवचनानि बौद्धभिक्षुकाः तथाचारणगीतिकाराः नगरजनपदेषु परिभ्रमन्तः प्रचारिताः प्रसारिताश्चासन् । उत्तरकालिकेषु तत्परम्पराभावात् स्मृतौ संरक्षितरुपदेशावली लेखनशैल्या श्रुतगसाहित्यरूपेण लिखितमासीत् । यथा भगवतः बुद्धस्य महापरिनिर्वाणन्तिरं बौद्धसाधवः तदुपदेशावर्ती चतुर्ष **बौद्धसंगीतिषु संरक्षिताश्चासन्।** परन्तु नैकानां श्रुतिकाराणां पाठसंयोजनात् मूलभूतपाठास्तु कालग्रस्तास्तथा विवादग्रस्ताः । तत्र **आर्यमञ्जुश्रीकल्पेति** बौद्धदार्शनिकग्रन्थे तथा धर्मविधिरिति जैनग्रन्थे बहुपाठस्य संरचनास्सन्ति।

एवम्प्रकारेण पाश्चात्यावधारणा तथा भारतीयपरम्परामाश्रित्य पाठसम्पादनस्य पद्धतिस्त्रयं अधुना प्रचलति । एताः सर्वाः पूर्वापरसन्दर्भितपाठसम्पादनम् उत रुढीवादीपाठसम्पादनम् भवतु, तदुभयथा सिद्धति । यथा-

**Copy text editing (प्रतिलेखनपद्धतिः)** उपलभ्यमानेषु नैकेषु मातृकासु एकमातृकाग्रन्थसैव ईदृशं पाठसम्पादनं भवति । प्रस्तरगात्रताम्रशासनादिषु अथवा दुर्लभपाण्डुलिपिषु (Autograph Copy) केवलं प्रतिलिप्यान्तरकरणेन इयं प्रक्रिया सिद्धति। परन्तु संश्लिष्टपाठमध्ये अवाच्यांशेषु समीक्षणं कथमपि न सम्भवति। तत्र (............) इति चिह्नम् प्रदाय सम्पादनं भवति। एवम्प्रकारेण तत्र नवीनपक्षाः पूर्वापरसन्दर्भदृष्ट्या नवीनानुकुलशब्दस्य प्रयोगस्तु साधयन्ति, परन्तु रुढीवादिनः **'स्थितस्य गतिश्चिन्तनीया'** इति रीत्या त्रुट्यांशस्य अर्थघटनं विश्लेषणञ्च करणीयमिति प्रतिपादयन्ति । यथा अभिनवभारत्याः पाठसम्पादनकाले आचार्यविश्वेश्वरपादः नवीनपक्षमाश्रित्य कल्पितपाठस्य संयोजनात् वाक्यपूर्ति तथा प्रकरणसङ्गतिं कृतवान्। इतोऽपि उपलब्द्धेषु नैकेपाठेषु केवलं सरलपाठस्यैव ग्रहणेन इत्थं सिद्धति। प्रतिलिपिपाठग्रहणस्य प्रकारत्रयमस्ति उपलब्धपाठेषु सम्पादकस्य स्वकीयरुचिर्नये निर्दिष्टकस्य पाठस्य चयनात् इयं पद्धतिस्तु भ्रमात्मकमेव सिद्धति। तत्र पाठचयनदोषात् सम्पादितग्रन्थोऽपि दोषदुष्ट भवति। यथा कालविलुप्तित्वात् वैदिकस्तथा उपनिषद्मन्त्राणां पाठस्तु सर्वथा विवादग्रस्तम्।

- **प्राचीनतमपाण्डुलिपिसम्पादनम् (Oldest Manuscript School)**[11] अत्र तु केवलं मूलग्रन्थकारकालस्य निकटस्थितपाठस्य सम्पादनं क्रियते । परन्तु सन्दर्भितपाठस्य तदुनक्रमिकपाठानां समीक्षाभावात् तदपि क्लेशकरमेव भवति ।

- **उत्तमपाण्डुलिपिसम्पादनम् (Best Manuscript School)** नैकेषु पाठेषु उत्कृष्टतमपाठस्य (सचित्रं, स्पष्ट तथा सुहस्तलेखनसमन्धितपाठः ) चयनमत्र भवति । अ त्र तु वस्तुलक्षिताधर्मस्य (Objectivity) प्राधान्यं दृश्यते। अनुलेखनी यपाठेषु ( समानाशुद्धिसम्पन्नेषु पाठेषु) उत्तमपाण्डुलिपिना अत्र पाठसम्पादनकार्य सिद्धति । एवम्प्रकारेण वहुषु पाण्डुग्रन्थेषु प्रतिलेखनपद्धत्या पाठसम्पादनम् यथा प्रशंसनीयम् तथा च निन्दनीयमपि उभयथा भवति।

**Eclectic text editing (संदोहनपद्धतिः)** शताधिकपाण्डुलिपिषु आन्तरिकसम्भावनाविशिष्टानां सन्दर्भे संदोहनपद्धत्या (मधुकरवृत्तिमवलम्व्य) पाठसम्पादनं विधीयते। अत्र वस्तुलक्ष्यधार्मितायाः तथा गुणवत्तायाः प्राधान्यं दीयते । यथा आचार्यनीलकण्ठः महाभारतस्य भारतभावदीपटिकायाः रचनाकाले समग्रप्रदेशेषु उपलब्धपाठान्तरेषु सर्वोत्तमपाठान् संहत्य संदोहनपद्धत्या पाठसम्पादनम् कृतवान् । महाभारतस्य आदपर्वणि प्राप्यते यथा-

**बहून् समाहृत्य विभिन्नदेश्यान् कोशान्, विनिश्चित्य तु पाठमग्र्यम् ।**
**प्राचां गुरूणाम् अनुसृत्य वाचमारभते भारतभावप्रदीपः ।।**[12]

यद्यपि श्रुतसाहित्येषु संदोहनपद्धत्या पाठसम्पादनं तु साम्प्रदायिकभावनायुक्तं भवति । तत्र धर्मावलम्विनाम् अभिनिविष्टवुध्या विकृतपाठस्य सम्भवना विद्यते । उदाहरणरूपेण प्रो. वसन्तभट्टपादाः अभिज्ञानशाकुन्तलनाटकस्य संदोहनपद्धतिं वर्णयति –

- कालिदासकृतः मूलभूतपाठस्तु कालग्रस्तः विलुप्तश्च।
- पञ्चपाठेषु काश्मीरीयपरम्परायुक्तपाठस्तु प्राचीनतमः।
- काश्मीरीयशारदापाठेषु भूर्जपत्रपाठस्तु सर्वोत्कृष्टतमः।
- शारदापाण्डुलिपिषु प्राकृतपाठस्य अन्तर्भवनात्तेषु अनुलेखनीयप्राकृतपाठेषु शौरसेनीप्राकृतपाठसैव (ई.पू.१६) ग्रहणं भवति।
- अॅक्सफर्ड 1, अॅक्सफर्ड 2 एवं श्रीनगरस्य शारदापाण्डुलिपिषु प्राप्ताशुद्धिनां टिप्पणीरूपेण प्रदर्शनम् जातम् ।
- शारदापाण्डुलिपिषु प्रक्षिप्तांशस्य (......) इति कोष्टकेन उद्धृत्य तेषामुच्चतरपाठसमीक्षा जाता । वस्ततस्तु कालिदासकालिकपाठात् (ई.पू. १तः ई.पू. ७म पर्यन्तम्) आरभ्य सुदीर्घकालं यावत् प्रक्षिप्तपाठास्तु अन्तप्रविष्टाः सञ्जाताः।
- अपितु रङ्गकर्मिणां पाठविकृतिर्वशात् नाट्यांशस्य परिवर्तनं जातमिति उच्चतरसमीक्षायां प्रमाणितः । तृतीयाङ्के भ्रमरबाधां निरूप्य ‘सस्पृहम्’ इति रङ्गसूचनायाः पश्चात् ‘यतो यतः षट् चरणो’ इत्यादि श्लोकांशः।
- भूर्जपत्रसम्बलितपाठे (९१ तथा ९२ पाठद्वयम् ) षष्टाङ्गे धीवरवृतान्तस्य प्रवेशात् केचन् वाक्यानामवलोपस्तु दृश्यते। अस्मिन् सन्दर्भे कार्लबुर्खाडमहोदयः पिशेलकृतबङ्गपाठस्यैव अनुकरोति, यद्यपि तत्पाठस्तु संपूर्णतया शारदापाठसैव अनुवृत्तिरस्ति।
- शाकुन्तले भारतवाक्ये अस्ति-

**काश्मीरीपाठः** **सरस्वती श्रुतिमहतां महीयताम् (ब्राह्मणः)**
**देवनागरीपाठः** **सरस्वती श्रुतिमहती महीयताम् (वेदः)**
**दाक्षिणात्यपाठः** **सरस्वती श्रुतमहतां महीयताम् (विद्वान्)**
**अन्यपाठः** **श्रुतीमहतां न महीयताम् (पाठान्तरः)**

एतेषु पाठेषु कालिदासस्य रचनाशैलीदिशा वेदज्ञविप्राणां प्रति समादरवशात् द्वितीयपाठसैव प्रसक्तिर्भवति।

- **Stemmatic text editing (वंशवृक्षपद्धतिः)** युरोपीयपाठसम्पादनपद्धतिमाधारीकृत्य अधुना वंशवृक्षनिर्माणेन

समीक्षितपाठसम्पादनं तु बहुप्रचलितमस्ति। प्राच्ये पाश्चात्ये चोभयथा मुलादर्श निर्माय तदुपरि Stemmatic Text Editing प्रचलति ।आदौ सन्दर्भितपाण्डुलिपीनां समेषाम् एकत्रीकरणेन सन्तुलनपत्रिकायां तेषाम् अनुक्रमेण लेखनं भवति। पश्चात्तेषु सन्तुलितपाठेषु अनुवंशस्यावधारणादिशा वंशवृक्षस्य निर्माणं क्रियते।वस्ततस्तु उच्चस्तरीयसमीक्षा स्तथा निम्नस्तरीयसमीक्षादृष्ट्या वंशवृक्षस्तु द्विधा कल्प्यते ।

1. **Lower Criticism (निम्नस्तरीयसमीक्षा)**

- **Heuristic (सामग्रीसंकलनम्)** मातृकासम्पादनस्य सर्वप्रथमं सोपानमस्ति शोधसम्पर्कितानां साकल्येन एकत्रीकरणम्। अधुना New Catalogus Catalogorum Aufrecht इत्यादिषु सूचीमध्ये सहस्रल्लक्षाधिकाः पाण्डुग्रन्थाः Digital रूपेण संरक्षितमस्ति । इतोऽपि Asiatic Society of Bengal. BORI, RORI, Saraswati Bhawan Library Ganganath Jha प्रभृतिषु प्राच्यकेन्द्रेषु Descriptive Catalogue मध्ये दुर्लभमातृकानां सम्भारोऽस्ति। तत्र छायाप्रतिलिपिकरणेन अथवा Microfilm कृत्वा संकलनकार्य विधीयते।

- **Recension (संशोधनम्)** पाठसंरकरणमेव समीक्षितसम्पादनस्य द्वितीयसोपानभूतमस्ति। तत्र सन्तुलनपत्रिकायां तेषामनुक्रमिकसंख्यायां सूची विद्यन्ते। पश्चात् तेषु वाक्यांशेषु पाठभेदानामुल्लेखः अधः पादसूचीमध्ये दीयते

**अवचिन्तामणिटिप्पनीमातृका**[13]

| | |
|---|---|
| **प्रथमपाठः** | आप्तेन परप्रतिपिपादयिषया उदीरितेऽपि न्यायत्वमित्यवधेयम्। |
| **द्वितीयपाठः** | अन्येन परप्रतिपिपादनेच्छया यदुदीर्यते तत्रापि। |
| **तृतीयपाठः** | आप्तेन परं प्रतिपादयितुं यदुदीर्यते तत्रापि। |
| **चतुर्थ पाठः** | आप्तपुरुषेण परं प्रतिपादयितुं यदुदीर्यते तत्रापि। |
| **पञ्चमपाठः** | **प्राप्तेन परं परप्रतिपिपादयिषया यदुदीर्यते तत्रापि।** |

एतेषु वाक्येषु 'यदुदीर्यते तत्रापि' इति पाठस्तु सर्वत्र विद्यते, यद्यपि 'आप्तेन' तथा 'परप्रतिपिपादयिषया' इत्यत्र उपसर्गयोजनात् भिन्नतापि दृश्यते । एतादृशं पाठास्तु Critical Apparatus मध्ये स्थापनीयम् भवति।

- **Emendation (संस्करणम्)**- प्राप्तपाण्डुलिपिषु सन्तुलनपत्रिकायां कुत्रापि वाक्यार्थं यदि असङ्गतिपूर्ण स्यात्तदा पुर्वापरसन्दर्भदृष्ट्या कल्पितपाठस्य संयोजनमत्र सम्पाद्यते । यद्यपि विद्वत्यु कल्पितपाठसंयोजनदृष्ट्या रुढीवादीपक्षः (conservative ) तथा प्रगतिशीलपक्षः (progressive) इति पक्षद्वयं भवति । पुर्वपक्षनये तु पाठसम्पादनस्य संदर्भ केवलं प्रत्यक्षभूततथ्यानामाकलनं विधेयम्, तत्र सम्पादकस्य वैयक्तिकसिधान्तस्तु गौणः यद्यपि नवीनदृष्टिर्नये तु पौर्वापर्यभावदृष्ट्या तत्र समुचितपाठं कल्पनीयम्। यतोहि संपूर्णपाण्डुलिपिग्रन्थस्य प्रतिपादानां विशुद्धपाठस्य सम्पादनं नूनमेव सम्पादकसैव नैतिकदायित्वमेव। अत्र सिद्धान्तस्तु उभयोरेवपक्षमाश्रित्य भवति । अधोल्लेखितप्रकोष्टमध्ये तदिदं वर्णयति । तत्र केचन् चिन्हानां प्रयोगे सन्तुलनपत्रिकायां विकल्पपाठस्यावधारणा भवितुमर्हति।

| | |
|---|---|
| [ ] | कल्पितपाठः। |

| | |
|---|---|
| { } | सम्पूर्णपरिवर्जनयोग्यपाठः। |
| * | किञ्चित्परिवर्तनीयपाठः। |
| ** | लुप्तपाठः। |
| | मूलग्रन्थे अनुपलब्धेऽपि टिकाकारेण समर्थितपाठः। |

एवम्प्रकारेण पुर्वापरसापेक्षतया वंशवृक्षपद्धतिमाधारीकृत्य पाठसम्पादनमधुना प्रचलति। इये पद्धतिस्तु सम्पादनप्रविधिषु आधुनिकी वर्तते। प्रसङ्गेऽस्मिन् आचार्यशिवगणेशमूर्तिमहोदय: तस्य 'Introduction of Manuscriptology' ग्रन्थे ११७ तमे पृष्ठाङ्के उक्तवान् "**If among the set of manuscripts of a work the manuscripts array themselves in two or three distinctly different groups, then each of those groups is a recension. The Valmiki Ramayana has three recensions The North Western, The Bengal and The Southern.**" अभिज्ञानशाकुन्तलमिति नाटकस्य वंशवृक्षमिदमस्ति यथा-




- प्रस्तुतेऽस्मिन् वंशवृक्षमध्ये पाठसंचारणमेव प्रदर्शितमस्ति। यतोहि भूतकालस्याधारदृष्ट्या तेषां प्राचीनत्वं

समक्षमायाति। देशविदेशेषु समुपलब्धपाण्डुलिपिषु लुप्तांशेषु तथा प्रक्षिप्तांशेषु साम्यवैषाम्यञ्च भेदकल्पनात् सन्तुलनपाठेषु अनुवंशपरम्परासम्बद्धक्रमेण प्राचीनतमपाठस्यैव मौलिकता सिद्धति। तस्मात् वंशवृक्षनिर्माणं सर्वोत्कृष्ट तथा सर्वाधुनिकी परिगण्यते ।

- तृतीयाङ्के मलिनीनदीतटमध्ये लताकुजेषु शयानां शकुन्तलां दृष्ट्वा अनुरागतप्तदुष्यन्तः भणति – **'लब्धं नेत्रनिर्वापनम्'** इति । कृतिनिष्ठपाठेषु तस्य प्रामाण्यमस्ति, यद्यपि प्रचलितपाठेषु ' **लब्धं नेत्रनिर्वाणम्'** इति पाठभेदस्तु दृश्यते ।
- पञ्चमाङ्के विदूषकः कामयमानां दुष्यन्तं तापसकन्यायै स्पृहाकारणं पृच्छति, तदा दुष्यन्तस्य स्वगतोक्तिरस्ति यत्र पाठस्तु आनुपुर्वीसम्वन्धक्रमेन प्रचलितपाठेषु दुर्लभः -
**चिरं गतनिमेषाभिर्नेत्रपङ्क्तिरुन्मुखः नवामिन्दुकलां केन भावेन पश्यति।**
**न च सा मादृशानाम् अप्रार्थनीया समासतः समिन्मध्यकालागुरुखण्डवत् ॥**
- शकन्तुलायाः प्रेमप्रार्थनां स्वीकर्तुं (दुष्यन्तमुद्दिश्य) प्रियंवदा उक्तवती हला, अलं वो अन्ते उरविहार-पय्युस्सुएण राएसिणा उवरुद्धेण '। वाक्यमिदं बहुवल्लभाः राजानः' इत्यादि संदर्भवाक्येषु सिद्धति, परन्तु प्रचलितपाठेषु 'अन्तःपुरविरह-पर्युत्सुकस्य' इति पाठभेदः दृश्यते ।
- तृतीयाङ्कस्यान्तिमभागे शकुन्तलादुष्यन्तयोर्मिलनमध्ये विरामसूचनाय कालिदासः नेपथ्ये उद्घोषयति अम्मो अय्या गौतमि', तथा च गौतमीप्रवेशात् सखीनां उपस्थितिरपि नास्ति । तत्तु नाट्यमञ्चोपक्रमदृष्ट्या संगच्छते। यद्यपि पाठान्तरेषु चक्रवाकवधूके, आमन्त्रयस्व प्रियसहचरम्, उपस्थिता रजनी इत्यादि प्रक्षिप्तवाक्यांशस्य संयोजनम् अर्वाचीनपाठसैव अङ्गीभूतमेव ।
- षष्ठाङ्के प्रवेशकवृतान्तसूचनायां राजद्वारे धीवरस्य स्वगतोक्ति 'यमवसतिं गत्वा, गुडखण्डं च दत्वा इव प्रतिनिवृत्तः ' इत्यादि वाक्येन यमसदनात् मुक्तिघोषणां श्रूयते, यद्यपि ईदृशं वाक्यं अन्यत्कुत्रापि पाठान्तरेषु नास्ति ।

सर्वोपरि अभिज्ञानशाकुन्तलमिति शीर्षकपदमाश्रित्य तत्र मतानैक्यता दृश्यते । प्रचलितमैथिलीपाठे तथा बङ्गीयपाठे अभिज्ञानशकुन्तलम् इति । दाक्षिणात्यस्तथा देवनागरीपाठेष्वपि अभिज्ञानशकुन्तलमिति उपलभ्यते । अत्र अभिज्ञानम् इत्युक्ते स्मारकचिह्नविशेषं तथा शकुन्तलाविषयकमिति कृत्वा तत्र नामकरणं जातम्, यद्यपि प्रो. रेवाप्रसादद्विवेदीनये शीर्षकं अभिज्ञानशाकुन्तलम् इति सार्थकं तथा कृतिनिष्ठं भवति। तन्नये दृश्यकाव्यस्यास्य मुख्यविषयस्तु चक्रवर्तीगुणोपेतः पुत्रप्राप्तिः, तस्मात् शाकुन्तलमिति ध्यान्यास्पदं भवति ।

इतोऽपि पक्षद्वयमुररीकृत्य तृतीयपक्षस्तु काचित् भिन्नतामङ्गीकरोति । तत्र अभिज्ञानशकुन्तला इति शीर्षके तु नवीनदृष्टिरस्ति। समस्तपदेऽस्मिन् **'अभिज्ञान पुर्विका शकुन्तला इति अभिज्ञानशकुन्तला'** इति विग्रहवाक्ये आदौ अभिज्ञानम् पश्चात् शकुन्तलेति अभेदोपचारवशात् अर्थग्रहणं तु सम्पूर्णतां प्र तिपादयति । आदौ परित्यक्ता कन्या शकुन्तैः परिरक्षिताः इति शकुन्तला नामकरणं अभिज्ञानपुर्वकं महर्षिणा कृतमासीत् । तत्र प्रथमाङ्के अशंसयं क्षत्रपरिग्रहक्षमा.....' इत्यादि दुष्यन्तवाक्येन शकुन्तलायाः क्षत्रियपरिणययोग्यत्वम् सिद्धति। एवन्व सप्तमाङ्केऽपि दुष्यन्त पुत्रस्य क्कक्रवर्ति लक्षणत्वात् आदौ अभिज्ञानसैव प्राधान्यता दृश्यते । एवम्प्राकारेण काश्मिरीयपाण्डुलिप्यां ' अभिज्ञान पुर्विका शकुन्तला इति अभिज्ञानशकुन्तला इति तर्क्यनिष्ठा सर्वथा ग्रहणयोग्यपाठः इति प्रतिपद्यते । एवम्प्रकारेण काश्मीरपाठपरम्परादृष्ट्या 'अभिज्ञानशकुन्तला' इति नाट्यकाव्यस्य वंशवृक्षस्तु इत्थं भवितुमर्हति -

**कालिदासस्य स्वहस्तलेखः** 1

⬇

**मूलादर्शप्रतिः (Archetype)**

⬇

**रङ्गकर्मिभिकृतः प्रक्षिप्तपाठः**

⬇

**सम्भावितादर्शप्रतिः (प्रथमङ्गवृत्तिदिशा)**

**(क) शारदा Recension**

**(काश्मीरीयपाठः) 1**

**(ख) शरदोत्तर Recension**

**प्रक्षेपसहितरुपान्तरकरणम्**

**2. मैथिली**

**3. बङ्गाली**

**संक्षिप्तरुपान्तरकरणम्**

**4. दाक्षिणात्य**

**5. देवनागरी**

एवञ्च अभिज्ञानशकुन्तला इत्यस्य पाठभेददृष्ट्या वृहत्पाठस्तथा लघुपाठेति परम्पराद्वयम् प्र चलति । निम्नोक्तं यथा –

| **अङ्क** | **कश्मीरी** | **मैथिली** | **बङ्गाली** | **देवनागरी** | **दाक्षिणात्य** |
|---|---|---|---|---|---|
| १ | ३० | ३३ | ३३ | ३० | ३१ |
| २ | १९ | १९ | १९ | १८ | १८ |
| 3 | ३५ | ४० | ४१ | २४ | २४ |
| ४ | २६ | २६ | २४ | २४ | २४ |
| ५ | ३३ | ३४ | ३२ | ३२ | ३२ |
| ६ | ३४ | ३७ | ३७ | ३२ | ३२ |
| ७ | ३६ | ३६ | ३५ | ३४ | ३५ |
| **योगः** | २९३ | २२५ | २२१ | १९१ | १९३ |

| | बृहतपाठः | लघुपाठः |
|---|---|---|
| | | |

2. <u>Higher Criticism(उच्चतरपाठसमीक्षा)</u> समीक्षितपाठसम्पादनक्षेत्रेषु सम्पादितमातृकाग्रन्थस्य प्रतिलिपिनां पुर्णाङ्गविचारस्तु उच्चतरपाठसमीक्षामाध्यमेन क्रियते । सन्दर्भितपाठेषु मूलपाठस्य सञ्चारणं तथा सन्तुलितपत्रे अवलुप्तांशानां पाददिप्पण्यां समुल्लेखनमत्र भवति। वस्तुतस्तु निम्नस्तरीयपाठसमीक्षायाम् सन्तुलनपत्रेषु केवलं प्राप्तपाठानां तुलनात्मकमध्ययनं सम्पाद्य तेषां वंशवृक्षनिर्माणं भवति, परन्तु तेषां कृतिनिष्ठता तथा अनुलेखनीयसम्भावना Higher Criticism माध्यमेन सिद्धति।

**<u>पाठान्तरसम्भवना</u>**

- प्रतिलिपिकरणकाले वर्णाकृतिस्वारूप्येन सृष्टभ्रमात् पाठान्तरः।
- छन्ददृष्ट्या, व्याकरणदृष्ट्या सृष्टपाठान्तरः।
- प्रसङ्गसंगतिदृष्ट्या पाठान्तरः।
- टिकाकारस्तथा सम्प्रदायदृष्ट्या पाठान्तरः।

किरातार्जुनीयमिति काव्यस्य **अनुलेखनीयपाठान्तर**मस्ति यथा-

**स किंसखा साधु न शास्ति योऽधिपं, हितान्न यः संशृणुते स किंप्रभुः**
**सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥ (१-५)**

अत्र जोनराजस्य (Sharada MS. Vadodara) विवरणमित्थं प्राप्यते –**नित्यमनुकूलेषु राजसु सचिवेषु च सर्वसमृद्धयोः रतिं सक्तिं कुर्वते।** अत्र पाठान्तरमस्ति – रतिं शक्तिं कुर्वते (BORI, MS , Poona). रघुवंशकाव्ये राजादिलीप-सुदक्षिणयोर्मध्ये अनपत्यता कारणात् वसिष्ठाश्रमं गमनकाल सम्भाषणमिदमस्ति-

**स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।**
**प्रावृषेण्यां पयोवाहं विद्युद्-ऐरावताविव॥**[16]

अस्मिन् श्लोकमध्ये ऐरावतमित्यत्र पाठभेदमस्ति । **'एचोऽयवायावः'** इति सुत्रेण सन्धिकार्येन **'विद्युददैरावतौ'** इति इन्द्रहस्ती, पुनश्च **'विद्युदैरावते'** इति सन्धेरभावे प्रगृह्यसंज्ञायां **'ऐरावतम्'** इत्यनेन **'इन्द्रधनुः'** ज्ञायते । अत्र टिकाकारचारित्यवर्धननये कवेर्प्रकृतिप्रियता, उपमानोपमेययोः सङ्गतिः पुनश्च दिलीपस्य भावीसन्तानप्राप्तिः इत्यादि कारणात् ऐरावतमित्यत्र **'इन्द्रहस्ती'** इत्यसैव ग्रहणम् भवति ।

भारतदेशे ऋषिपरम्परायां चतुषष्टीकलाविद्यासु लेखनकलाविद्या ज्ञानपरम्पराभूतमासीत्। परन्तु सामग्रीस्वल्पता पुनश्च ऐतिहासिकस्पष्टक्रमोपलब्धेर्कारणात् तत्र विरोधप्रतिरोधादिक्रमोऽपि दिग्गोचरी भवति । तत्र नारदस्मृतौ प्राप्यते –

**नाकरिष्यद्यदि ब्रह्मा लिखितं चक्षुरुत्तमम्।**
**तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः॥**[17]

**<u>निष्कर्षः</u>** पाण्डुलिपि अस्माकं कृतिवैभवाः अतो नूनमेव तेषां रक्षणं राष्ट्रधर्मः इति मन्ये । भारतसर्वकारैः **'राष्ट्रीयपाण्डुलिपिमिशन' २००३** निर्माय दुर्लभपाण्डुग्रन्थानां संरक्षणे संलग्नाः सन्ति, तत्र योगदानं अत्यावश्यकमिति। आधुनिककाले पाश्चात्यजार्मानदेशस्य हाम्बुर्गनगरे '**Nepal German Preservation Project**' इत्यत्र '**Microfilm**' निर्माय हस्तलेखग्रन्थनां संरक्षणं प्रचलति। इन्दोनेशियादेशे उदयनविश्वविद्यालयस्तथा सरस्वतीविश्वविद्यालयमाध्यमेन १८००० हस्तलेखानां संस्करणं दृश्यते। इतोऽपि श्रीलङ्का, डेन्मार्क, फ्रान्स, जापानदेशेषु नवीनपद्धत्या पाण्डुलिपिग्रन्थानां संरक्षणं प्रकाशनञ्च क्रियमानमस्ति । वसतस्तु समीक्षितपाठसम्पादनसन्दर्भे भारतीयविद्वांसः यथा आधुनिकपद्धतिमाश्रित्य स्वदेशवैभवम् संरक्षितवन्तः तथा शास्त्रेषु निहिततथ्यानां बिश्वपटलेषु उपस्थाय भारतस्य जयगाथां आसमुद घोषितवन्तः । पाश्चात्यविद्वांसः F. W. Hall महोदयस्य मतमिदमुल्लिख्य शोधपत्रमिदं समापयामि '**Many people tend to regard textual criticism as a disease. But it is neither a disease nor a science, but simply the application of common sense to a class of problems which beset all inquirers whose evidence rests upon the authority of manuscript**

**documents.'**[18]

**संदर्भग्रन्थाः -**


- मिश्रः, डॉ. सुधाकरः (२०२२) अभिलेखलिपिशास्त्रम् बनारस- मर्कैण्टाइल - कम्पनी,कोलकाता - ६.
- गोस्वामी, सुबुद्धिचरणः (२०१८) संस्कृतपुथिविद्या:त्वत्तप्रयोगः, पश्चिमबङ्गराज्यपुस्तकपर्षद् , कोलकाता -७०००९१
- Potter Karl. (1990) Encyclopedia of Indian Philosophy, Princeton University press
- Gode, P.K. (1942-43, volume 5) New Indian Antiquary, shanti Niketan Viswa Bharati library


**अन्तर्जालसङ्केतसूची -**

- www.googlebooks.com
- www.archieve.com
- www.sodhganga.com
- Manuscript.scuwb@gmail.com
- www.sanskritlings.blogspot.com
- www.namami.gov.in

**पादटीका**

1. कुन्तापसूक्तम् (२०.१२७.३६)
2. विद्यादानम् ( वेङ्कटेश्वर् प्रेस,परिशेषभाग:)
3. दानसागर: (वल्लालसेन:,४३ अध्याय:)
4. लक्ष्मीधरवचनम् ( द्वितीयपर्व:154)
5. दानसागर: (वल्लालसेन:, ४३८पृष्ठाङ्क:)
6. नर्ममाला (१.११.२)
7. हयशीर्षपञ्चरात्रम् (२.३१)
8. नर्ममाला (१.१६,२.१२०)
9. अभिज्ञानशकुन्तलम् ( वसन्त.भट्ट, लोकप्रियसाहित्यग्रन्थमाला-92 )
10. http://vasantbhatt.blogspot.com/2014/
11. http://vasantbhatt.blogspot.com/2014/
12. http://vasantbhatt.blogspot.com/2015/
15. vasantbhatt.blogspot.com/2009/04/blog-post_21.html
16. अभिज्ञानशकुन्तलम् (वसन्त. भट्ट, लोकप्रियसाहित्यग्रन्थमाला-92)
17. Aspects of Manuscriptology (Asiatic Society of Kolkata,page 87)
18. F. W. Hall (context of text editing, page 24)

# अभिज्ञानशकुन्तले तत्समयकालदृष्ट्या स्त्रीशिक्षा - एको विमर्शः

Satish Das, Ph.D Scholar
Department of Sahitya Vidya Shakha
Central Sanskrit University
Ekalavya Campus, Agartala
Contact Number- 8942007814
Email ID- satishdasd@gmail.com

❖ **शोधसारः-**

सामाजस्य निर्माणे नारी-पुरुषोभययोर्योगदानस्य गुरुत्वपूर्णा भूमिकास्ति। समाजस्य सार्विककल्याणसाधनं केवलं पुरूषैरपितु केवलं नारिभिर्न सम्भवति। तथाच समाजस्योन्नतिरवनतिर्नारीणां स्हितिं दृष्ट्वा ज्ञातुं शक्यते। कस्मिन् समयेऽपि समाजे नारीणामुन्नतस्थित्याः प्रधानकारणं भवति- तेषां शिक्षा। अस्मिन् शोधप्रबन्धे अभिज्ञानशकुन्तले तत्समयकाले च स्त्रीशिक्षाविषये विस्तृतालोचना कृतास्ति। अनया पठकाः तस्य समयेकालस्य स्त्रीशिक्षाविषये एकां धारणां प्राप्तुं शक्यन्ते।

❖ **कुञ्चीशब्दाः**- अभिज्ञानशकुन्तलम्, शकुन्तला, स्त्रीशिक्षा, पार्वती, इरावती चेति।

❖ **भूमिकाः-**

शिक्षास्ति समाजस्यैको गुरुत्वपूर्णोऽङ्गः। यया समाजस्योन्नतिरवनतिश्च जायते। आभ्योऽवश्यमेवादर्शशिक्षापद्धत्याः प्रयोजनमस्ति। अतः श्रुत्यामुच्यते यत्- शिक्षते उपादीयते या सा शिक्षा। शिक्षा-शब्दः शिक्ष्-धातोरुत्पत्तिर्जायते। यस्यार्थो भवति विद्याग्रहणमिति। शिक्षाविषये शतपथब्राह्मणेऽस्ति- स्वाध्यायेन प्रवोचनमाध्यमेन च मानवा एकाग्रचित्तेनेन्द्रियसंयमेन तथाच प्रज्ञाबुद्धिमाध्यमेन शिक्षाग्रहणं कुर्वन्ति। शिक्षामाध्यमेन मानवा जगतः तथा स्वाभ्युदयस्य प्रचेष्ठां कुर्वन्ति। अतः तैत्तरीयोपनिषद्यस्ति-

**“स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।[1]”**

अस्य शिक्षाशब्दस्य पुनः सङ्कुचितार्थो व्यापकार्थश्च सन्ति। सङ्कुचितार्थे शिक्षा भवति विद्यारम्भसंस्काराद् गृहस्थाश्रमपर्यन्तं गुरुं निकषा शिक्षाग्रहणमपितु व्यापकार्थे शिक्षाशब्दस्यार्थः पुस्तकविद्याया वहिराधुनिकशिक्षाया विकाशः, यस्य शिक्षग्रहणस्य पद्धत्याः सूचना जन्मतो भवति अपितु श्रवण-मनन-निदिध्यासनमाध्यमेन जीवनस्यान्तिमपर्यन्तं प्रवाहितं भवति। प्रत्येको मानवो जीवनस्य प्रारम्भादन्तिमपर्यन्तमेकः शिक्षार्थी।

अस्मिन् शिक्षाग्रहणविषये पुरुषैः सह नार्योऽपि समानाधिकारिन्य आसन्। यतो यदि नार्यः शिक्षिता न भवेयुः तर्हि समाजस्योन्नतिसाधनं न भविष्यन्ति। अतो वयं पश्यामो यद्- वैदिकसमयेऽपि नारीणां शिक्षाग्रहणविषयेऽपि उच्चतरस्थानमासीत्।

❖ **प्राचीनकालिनः स्त्रीशिक्षाः-**

वैदिककालेऽपि पुरुषैः सह नार्योऽपि शिक्षाग्रहणं कुर्वन्ति। समयेऽस्मिन् विद्याग्रहणस्य प्रागुपनयसंस्कारो जात आसीत्। ता ब्रह्मचर्यपालनं कुर्वन्ति। अनेन सह विविधविषये ताः शिक्षाग्रहणं कुर्वन्ति। वैदिककाले वेदध्यायने तथाच यज्ञसम्पादने नारीणां पूर्णाधिकारमासीत्। अतोऽथर्ववेदे उच्यते यद्-

**“ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।[2]”**

शिक्षाग्रहणस्य पश्चात् प्रकारद्वयानां नारीनां वर्णना प्राप्यते-

- ब्रह्मवादिनी- या मृत्युकालपर्यन्तं ब्रह्मचारिणी भविष्यन्ति।

[1] तैत्तिरीय उपनिषद् -१/११/१.

[2] अथर्ववेदः-११/५/१८.

- सद्योद्वाहा- या आश्रमात् शिक्षाग्रहणं कृत्वा संसारधर्मे प्रवेशं कुर्वन्ति।

ऋग्वेदेऽनेकानां मन्त्रद्रष्टानां विदुषीणां नारीणां नाम प्राप्यते। तासां मध्ये उल्लेखयोग्या भवन्ति- अपाला, गार्गी, घोषा, मैत्रेयी, विश्ववारा, अदिति, अरुन्धती, लोपामुद्रा, सन्ध्या, रोमशा, शतरूपा इति।

वैदिकपरवर्तिकालेऽपि मनुसंहिता-इत्यादिषु स्मृतिग्रन्थेष्वपि नारीणां पूजनीयरूपेण तथा श्रद्धेयरूपेणोल्लेखः प्राप्यते। मनुसंहितायां मनुनोच्यते-

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।[1]"**

त्रेतायुगे अर्थाद् रामायणस्य कालेऽपि लक्षिक्रियते यत्- कौशल्या, तारा चेति नार्यो मन्त्रस्य ज्ञाता आसन्। तथाच सीतया अपि प्रत्येकस्मिन् दिवसे वैदिकमन्त्रस्य जपं कृतमासीत्। परवर्तिकाले महाभारतस्य समयेऽपि नारीणां शिक्षाविषयोऽस्माभिर्लक्षिक्रियते। यतो दौपदी आसीद् विविधशास्त्रस्य ज्ञाता। तस्या उल्लेखो विविधविषये तथाच तस्या वक्तव्योपस्थापनमाध्यमेन ज्ञायते।

ततो बौद्धसमयकालेऽपि विदुषीनां तथा शिक्षितानारीणामुल्लेखो लक्षिक्रियते। तदा शिक्षां, धर्मं दर्शनञ्च प्रति नारीणामाग्रहमासीत्। ताभिरुच्चतरशिक्षा प्राप्यते। अनेन सह अनेका नार्यः कठोरजीवनयापनमकुर्वन्, तासु उल्लेखयोग्या नार्यः- शुभा, अनुपमा, सुमेधा, भद्रकुण्डकेशा इति।

जैनसाहित्येऽप्यनेकानां विदुषीनारीणां दृष्टान्तः प्राप्यते। याः खलु नृत्य-गीत-वाद्य-लोकव्यवहारादिषु पारदर्शिनी आसन्। तासु उल्लेखयोग्याः सन्ति- शीलः, भट्टारिकः, जयन्ती इति।

तत्परवर्तिकालस्य विविधसंस्कृतसाहित्ये नारीणां शिक्षाग्रहणस्य विषयस्योल्लेखोऽस्ति। अपितु अनेकानां विदुषीरमणीनां नाम अपि प्राप्यते। मया अस्मिन् शोधप्रबन्धे "अभिज्ञानशकुन्तले तत्समयकाले च स्त्रीशिक्षा- एको विमर्शः" इति शीर्षके अभिज्ञानशकुन्तलेन सह तत्समयकालस्य अर्थात् कालिदासस्य समयकालस्य शिक्षाव्यवस्था, तथा नारीणां शिक्षाग्रहणविषये विस्तृतालोचना कृतास्ति।

### ❖ अभिज्ञानशकुन्तले तत्समयकालदृष्ट्या स्त्रीशिक्षा - एको विमर्शः-

संस्कृतसाहित्यस्यान्यतमः कविः तथा श्रेष्ठः कविः कविकुलशिरोमणिरस्ति कविकालिदासः। तस्य कविकृतिर्न केवलं भारतवर्षेऽपि तु समग्रे विश्वे अद्य समादृता। कालिदासस्य रचनासु उल्लेखयोग्याः भवन्ति- ऋतुसंहारम्, मेघदूतम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशकुन्तलम्, कुमारसम्भवम्, रघुवंशञ्चेति। कालिदासस्य रचनामाध्यमेन तत्कालस्य समाजस्य समाजव्यवस्था, आदर्शनीतिबोधः, तथाच राजतन्त्र-शासनव्यवस्था-धर्मीयादर्शप्रणयणमिति विषये स्पष्टधारणा प्राप्यते। अनेन सह कालिदासस्य कृतिमाध्यमेन तत्कालीनसमाजस्य शिक्षाव्यवस्था तथाच नारीणां शिक्षाग्रहणविषये एका धारणा प्राप्यते।

प्राचीनकाले शिक्षाव्यवस्था अर्थाद् वैदिककाले शिक्षाव्यवस्था आसीदाश्रमनिर्भरा। यत्र गुरुगृहे गुरुं निकषा छात्रैर्ब्रह्मचर्यव्रतपालनमाध्यमेन शिक्षाग्रहणं कृतमासीत्। कालिदासस्य विविधरचनामाध्यमेनास्याः व्यवस्थायाः प्रचलनविषये विविधतथ्यं प्राप्यते। अभिज्ञानशकुन्तलमिति नाटके दृश्यते यत्- महर्षेः कण्वस्याश्रममासीदेकं शिक्षाकेन्द्रस्थलम्। तत्र विविधप्रदेशेभ्य आगताः छात्राः शिक्षाग्रहणमकुर्वन्। तत्र न केवलं पुरुषछात्रा अपितु नारीछात्रा अपि सन्ति। अर्थात् कण्वाश्रमे नारीछात्रा अपि शिक्षाग्रहणमकुर्वन्। अभिज्ञानशकुन्तलमिति नाटके महर्षेः कण्वस्याश्रमस्य, रघुवंशमिति महाकाव्ये वशिष्ठाश्रमस्य, विक्रमोर्वशीयमिति नाटके च्यवनमुनेराश्रमस्योल्लेखः प्राप्यते। आश्रमशिक्षाग्रहणेन सह गृहशिक्षकमाध्यमेन शिक्षाग्रहणस्य व्यवस्था कालिदासस्य विविधासु रचनासु लक्षिक्रियते। यत्र अभिजातसम्प्रदायस्य बालकबालिकाः स्वगृहे गृहशिक्षकमाध्यमेन शिक्षालाभमकुर्वन्। यथा- रघुवंशमिति महाकाव्ये रघुमपितु पार्वतीं विविधशिक्षासु पारदर्शीं करणार्थं गृहशिक्षक आसीदिति कालिदासस्य रचनासु ज्ञायते। मालविकाग्निमित्रमिति नाटकेऽपि इरावती-मालविकयोर्द्वयोर्नार्योः शिक्षादानार्थम् अर्थात् नृत्य-गीतविषये शिक्षादानार्थं अन्तःपुरे एव शिक्षकस्य नियोगस्य कथा प्राप्यते। इत्थं गृहे नारीशिक्षाविषये विविधानि तथ्यानि अस्माभिः

[1] मनुस्मृति ३/५६.

प्राप्यते। रघुवंशमिति महाकाव्ये इन्दुमती ललितकलाविषये शिक्षार्थिनीरूपेणाजस्य प्रिया शिक्षार्थिन्यासीत्-

**"प्रियशिष्या ललिते कलाविधौ।[1]"**

कालिदासस्य रचनामाध्यमेन तथा विविधवर्णनानुसारेण ज्ञायते यद्- आश्रमे पुरुषैः सह समानरूपेण नार्योऽपि शिक्षाग्रहणमकुर्वन्। तस्योदाहरणरूपेण वयं पश्यामः- अभिज्ञानशकुन्तलमिति नाटके शकुन्तला, अनसूया, प्रियंवदा चाश्रमे पालिता अभवन्। अपितु आश्रमात् शिक्षालाभमकुर्वन्। विषयेऽस्मिन् वक्तव्यं यद्- बालक-बालिकानां पृथक् पृथक् शिक्षाग्रहणस्य विषये कालिदासस्य कस्मिन्नपि ग्रन्थे कोऽप्युल्लेखोऽस्माभिर्न प्राप्यते। अभिज्ञानशकुन्तलमित्यस्माद् ज्ञायते यद्- बालिका न केवलं पुस्तकीयविद्याविषये शिक्षाग्रहणमकुर्वन्, अपितु चित्राङ्कण-नृत्य-गीत-गृहकार्यादिविषयेष्वपि शिक्षाग्रहणमकुर्वन्।

अपितु विविधप्रकारस्य व्यवहारेण सहोद्यानकलाविषयेऽपि ताभिः शिक्षाग्रहणं कृतमासीत्। अतो वयं अभिज्ञानशकुन्तलमिति नाटके दृश्यते यद्- वृक्षस्य यथार्थपरिचर्याविषये अर्थाद् वृक्षे जलप्रदानस्य यथार्थसमयः, अपितु वृक्षं सन्तानस्नेहेन पालनमित्यादेर्विषयस्योल्लेखः प्राप्यते–

**"अस्ति मे एतेषु सोदरस्नेहः।[2]"**

वृक्षं तथा प्रकृतिं प्रति नारीणां वात्सल्यप्रेमविषये कालिदासस्य विविधरचनासु विविधानि तथ्यानि प्राप्यन्ते। कालिदासेन शकुन्तला-पार्वती-सीता इत्यादिस्त्रीचरित्रैर्वात्सल्यप्रेम्णः चित्राङ्कणं कृतमासीत्। कुमारसम्भवमिति महाकाव्यस्यैकस्मिन् श्लोके वृक्षं प्रति पार्वत्या यद्वात्सल्यप्रेम आसीत्, तत्कार्त्तिकस्य मध्येऽपि वर्तते इत्युल्लेखोऽस्ति-

**"गुहोऽपि येषां प्रथमाप्तजन्मना न पुत्रवात्सल्यमपाकरिष्यति।[3]"**

शकुन्तलया नवमालिका-इत्यस्या नाम प्रदत्तं 'वनज्योत्स्ना' इति। अर्थाद् वात्सल्यप्रेम्णा वृक्षादीनां नाम अपि प्रदत्तम्। वनज्योत्स्नां विस्मृतायाः प्रश्नस्योत्तरे शकुन्तलया उच्यते यत्-

**"तदा आत्मानमपि विस्मरिष्यामि।[4]"**

अनेन उक्तिप्रत्युक्तिमाध्यमेन वृक्षादिभिः सह एकात्मतायाः परिचयः प्राप्यते। शकुन्तला शिक्षिता आसीत्। अर्थात् तस्या वर्णज्ञानमप्यासीत्। विषयेऽस्मिन् कालिदासस्याभिज्ञान-शकुन्तलमिति नाटकस्य तृतीयाङ्कात् तथ्यं प्राप्यते। तृतीयाङ्के वयं पश्यामो राजानं दुष्यन्तं प्रति शकून्तलया पद्मपत्रे स्वनखेन प्रेमपत्रं लिखितमासीत्। तत्प्रेमपत्रमीदृशमासीत्-

**"तव न जाने हृदयं मम पुनः कामो दिवापि रात्रावपि।**
**निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथानि अङ्गानि॥[5]"**

अनेन सह अभिज्ञान-शकुन्तलमिति नाटकस्य पञ्चमाङ्के हंसपदीका- इत्यस्याः सङ्गीतशिक्षाविषये ज्ञायते। हंसपदीका आसीत् सङ्गीतज्ञा अर्थात् तया सङ्गीतस्य शिक्षा लभ्यते। अस्या प्रमाणरूपेण अभिज्ञान-शकुन्तलमित्यस्य पञ्चमाङ्के तस्याः सङ्गीतस्योल्लेखः प्राप्यते-

**"अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।**
**कमलवसतिमात्रनिर्वृत्तो मधुकर विस्मृतोऽसि एनां कथाम्॥[6]"**

काश्चिद् नार्योऽपि पुरुषैः सह समविद्याया अध्ययनमकुर्वन्। यथा मालविकाग्निमित्रमिति नाटके परिव्राजिका विविधविद्यासु पारदर्शिनी तथा विदुषी रमणी आसीत्। अस्य प्रमाणं प्राप्यते- गणदास-हरदत्तयोभयोर्मध्ये वितर्कसभायां तया परीक्षकस्य

---

[1] रघुवंशम्-८/६७.
[2] अभिज्ञानशकुन्तलम् अङ्कः -१.
[3] कुमारसम्भवम् -५/१४.
[4] अभिज्ञानशकुन्तलम् अङ्कः -१.
[5] अभिज्ञानशकुन्तलम् -३/१४.
[6] अभिज्ञानशकुन्तलम् -५/१.

पदमलङ्कृतमासीत्।

कालिदासस्य विविधरचनाया ज्ञायते यत्- तदा पाठ्यपुस्तकेन सह ललितकलाविषये बालिकाभिर्विशेषरूपेण शिक्षा प्राप्यते। विशेषरूपेण सङ्गीत-नृत्याभिनयविषयेषु ता विशेषशिक्षाग्रहणमकुर्वन्। सर्वा बालिकाः शिक्षाग्रहणमिदं कर्तुं शक्यन्ते। परन्तु विशेषरूपेणेदृशी शिक्षा आसीद् गणिकानां जीविका। मालविकाग्निमित्रमिति नाटके दृश्यते यद्- राज्ञा अग्निमित्रेण इरावती-मालविकयोर्नृत्यशिक्षाप्रदानार्थं राजप्रासादैव शिक्षादानस्य व्यवस्था कृतासीत्। परन्तु राजप्रासादेऽस्मिन् साधारणशिक्षार्थिनां शिक्षाग्रहणस्योल्लेखो न प्राप्यते। काश्चित् शिक्षार्थिन्यः शिक्षाग्रहणेऽस्मिन् अत्यन्ता निपुणा आसन्। अतोऽस्माभिर्दृश्यते मालविकाग्निमित्रमिति नाटके गणदासेन मलविका परमनिपुणा, मेधाविनी इति उपाधौ भूषिता कृतासीत्।

कुमारसम्भवमिति महाकाव्ये पार्वती आसीत् सर्वस्मिन् कलाविषये निपुणा। अतः कुमारसम्भवमित्यस्मिन् महाकाव्येऽस्ति-

**"स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्या।[1] "**

अतएव वक्तुं शक्यते कालिदासस्य समये नारीणां शिक्षाव्यवस्था आसीद् उत्तमा। आश्रमे स्त्रीयो विविधविषये शिक्षाग्रहणं कर्तुं शक्यन्ते। अनेन सह अभिजातसम्प्रदायैः तेषां गृहे एव शिक्षालयस्य स्थापनं कृतमासीत्। तदा बालिकाः पुस्तकस्य शिक्षया सह विविधे ललितकलाविषये शिक्षाग्रहणं कर्तुं शक्यन्ते, तथाच विविधायां विद्यायां पारदर्शिन्योऽप्यभवन्। अतः काश्चिद् नार्यो विविधा उपाधिः प्राप्यन्ते।

### ❖ निष्कर्षः-

परिशेषे वक्तुं शक्यते- न केवलं वैदिकयुगस्य नार्य आसीद् विदुषी। अपितु अनेन सह तत्परवर्तिकालेऽपि नारीणां शिक्षाग्रहणस्य प्रचलनमासीदिति निःसंशयेन वक्तुं शक्यते। यथा- रामायणे सीता-कौशल्या इत्यादीनां शिक्षितानां नारीणां नाम प्राप्यते, तथा महाभारते द्रौपद्या विचार-व्यवहारः शिक्षितानां नारीणां प्रतिमूर्तिरिति लक्षिक्रियते। इत्थं महाकवेः कालिदासस्य विविधरचनासु प्रकाशितो भवति तस्मिन् समये शकुन्तला, इरावती इति नार्योऽक्षरज्ञानेन सह ललितकलोद्यानपरिचर्यादिविविधविषयेषु शिक्षिताः पारदर्शिन्यश्चासन्।

### ❖ सन्दर्भग्रन्थाः-


- कालिदास. *कुमारसम्भवम्.* सम्पा. श्यामापदभट्टाचार्यः. कोलकाता: संस्कृत-वुक-डिपो, २०१८
- कालिदास. *रघुवंशम्.* सम्पा. ड.देवकुमारदासः. कोलकाता: सदेशः, १४१०(वङ्गाब्दः).
- कालिदास. *रघुवंशम्.* सम्पा. पण्डितज्वालाप्रसादमिश्रः. बंबइः , श्रीवेङ्कटेश्वर-स्टीट्-प्रेस,१४१०
- कालिदासः. *अभिज्ञानशकुन्तलम्.* सम्पा. ड.सत्यनारायणचक्रवर्ती. कोलकाता: संस्कृत-पुस्तक-भाण्डार, १९८९.
- मनुः. *मनुस्मृतिः.* संम्पा. श्रीअशोककुमारवन्द्योपाध्यायः. कोलकाता: सदेशः, २००९.
- वन्द्योपाध्यायः, धीरेन्द्रनाथः. *संस्कृत साहित्येर इतिहास.* कोलकाता: पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, १९८८.
- वाल्मीकिः. *रामायणम्.* सम्पा. कृष्ण-कान्त-शुक्लः. मेरठ: साहित्य भण्डार, १९८९.
- वाल्मीकिः. *रामायणम्.* सम्पा. रामानुज-गोविन्द. दिल्ली: नागपब्लिकेशनम्, २०१२.
- वेदव्यासः. *महाभारतम्.* गोरखपुरम्: गीता-प्रेस, १९५७.


[1] कुमारसम्भवम् १/१३०.

# लक्ष्मीधराचार्यविरचित अद्वैतमकरन्दग्रन्थस्य एकं तात्त्विकविश्लेषणम्

प्रवीणः म सज्जनः , शोधच्छात्रः
कर्नाटकसंस्कृतविश्वविद्यालयः
दूरवाणी संख्या- 7892125909
email- praveensajjan1602@gmail.com

**प्रस्तावना-** अद्वैतवेदान्तपरम्परायां लघुग्रन्थानाम् अपि महत्त्वपूर्णं स्थानं दृश्यते। तत्र लक्ष्मीधराचार्यविरचितः अद्वैतमकरन्दः एकः लघु एव ग्रन्थः, तथापि गहनतत्त्वदर्शी च। केवलं २८ श्लोकैः एव सम्पूर्णस्य अद्वैतसिद्धान्तस्य सारः अत्र सम्यक् निरूपितः। अस्य ग्रन्थस्य नामकरणं "मकरन्दः" इति प्रतीकमूलकम् अस्ति – यथा मकरन्दस्य एकः बिन्दुः अपि रसिकायाः हृदयं तर्पयति, तथैव अस्य ग्रन्थस्य एकः श्लोकः अपि साधकस्य चित्तं ब्रह्मबोधेन तर्पयति।

**आत्मब्रह्मणोः अभेदः-** ग्रन्थस्य आद्यः श्लोकः एव — "अहमेव परं ब्रह्म नान्यदस्ति कदाचन" — इति आत्मब्रह्मणोः अद्वैतं प्रतिपादयति। उपनिषत्सु "अहं ब्रह्मास्मि" (बृहदारण्यक), "तत्त्वमसि" (छान्दोग्य), "प्रज्ञानं ब्रह्म" (ऐतरेय) इत्यादि महावाक्यानां भाव एव अत्र संक्षिप्ततया प्रतिफलति। लक्ष्मीधराचार्यः आत्मस्वरूपं ब्रह्मस्वरूपं च अभिन्नं इति प्रतिपाद्य, अद्वैतवेदान्तस्य मूलं सुस्पष्टं करोति।

अहमेव परं ब्रह्म नान्यदस्ति कदाचन ।

अद्वैतवेदान्तदर्शनस्य सर्वाधिकं तत्त्वं "आत्मा एव ब्रह्म" इति। आत्मनः (व्यष्टिचैतन्यस्य) च ब्रह्मणः (समष्टिचैतन्यस्य) च यः ऐक्यम् उपनिषद्भ्यः प्रतिपाद्यते, स एव **आत्मब्रह्मणोः अभेदः** इत्युच्यते।

**१. शास्त्रप्रमाणसमर्थनम्**

**महावाक्यप्रमाणम्**

छान्दोग्योपनिषत् (६।८।७): "तत्त्वमसि श्वेतकेतो"

बृहदारण्यकोपनिषत् (१।४।१०): "अहं ब्रह्मास्मि"

ऐतरेयोपनिषत् (३।१।३): "प्रज्ञानं ब्रह्म"

माण्डूक्योपनिषत् (७): "स आत्मा स विज्ञेयः"

एतेषु वाक्येषु प्रतिपाद्यते यत्, जीवस्य यः आत्मा, स एव ब्रह्म।

**गीता प्रमाणम्** - भगवद्गीता (१३।२३):

"उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥"

अत्र देहे स्थितः आत्मा परमात्मैव इत्युक्तम्।

**तर्कसमर्थनम्**

**घटाकाशदृष्टान्तः**

यथा घटान्तर्गतः आकाशः भिन्नः नास्ति महाकाशात्, केवलं घटोपाधिना सीमितः इव दृश्यते। घटभङ्गे स एव महाकाशे लीयते।

तथैव जीवात्मा ब्रह्मणः भिन्नः न, केवलं देहाद्युपाधिभिः सीमितः इव।

**सूर्यकिरणदृष्टान्तः**

यथा सूर्यः एकः, किन्तु नद्यादिषु प्रतिबिम्बरूपेण नानात्वेन दृश्यते। नद्यपवित्रताया दूषणस्य वा भेदेन सूर्यस्य न किंचन दूषणम्। तथैव आत्मा सर्वेषु शरीरेषु प्रतिबिम्बितः, किन्तु स्वरूपतः ब्रह्मैव।

**शङ्करभाष्यदृष्टिः-** शङ्कराचार्यः ब्रह्मसूत्रभाष्ये [1] स्पष्टं वदति—

"तत्त्वमसि इत्यादिश्रुतीनां पुनः पुनरनुवादात् आत्मनः ब्रह्मणः च अभेदः एव सिद्ध्यति।"

अभेदज्ञानं मोक्षहेतुः इति निष्कर्षः।

---

[1] (१।१।४)

**जगतः मिथ्यात्वम्-** अस्मिन् ग्रन्थे जगत् भ्रान्त्युपस्थितम् इति दृष्ट्या निरूपितम्। "यदिदं हृदि स्फुरति तज्जगदाख्यमनर्थवद्भ्रान्त्या" इति श्लोके स्पष्टतया उक्तम् यत् आत्मनि एव जगत्स्वरूपेण भ्रान्तिः प्रतीयते। वस्तुतः ब्रह्मैव सत्यं, जगत् तु मायारूपम्। अयं विचारः शाङ्करवेदान्ते "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इत्यनेन सूत्ररूपेण प्रसिद्धः। । तत्र मूलाज्ञानं तूलाज्ञानमिति अज्ञानं द्वविधं भवति । तत्र घटावारकम् अज्ञानं तूलाज्ञानम्, ब्रह्मावारकं अज्ञानं मूलाज्ञानम् इति अज्ञाने द्वैविध्यं सम्पाद्यते येन च आक्षेपः एवं स्यात् यत् – घटावारके अज्ञाने नष्टे सति अज्ञानं तु नष्टं तस्मात् ब्रह्मप्राप्तिः स्यात् खलु । एतादृश आक्षेपस्य उत्तरार्थमेव इह अज्ञानं द्विधा उक्तमिति । तत्र अज्ञानस्यैव विषये चिन्त्यमाने ज्ञायते यत्

अज्ञानं नाम – "सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित् इति वदन्ति"[1] इति वेदान्तसारे उच्यते तत्र अज्ञानस्य यदि सद्रूपत्वं तर्हि अद्वैतहानिः – केवलस्य ब्रह्मणः एव सद्रूपत्वं भवितुमर्हति यतः एकेनैव सर्वानुगतेन सत्त्वेन सर्वत्र सत्प्रतीत्युपपत्तौ ब्रह्मवत् प्रत्येकं प्रपञ्चस्य सत्स्वभावताकल्पने मानाभावात्, अनुगतव्यवहाराभावप्रसङ्गाच्च। इत्येवं यदि प्रपञ्चस्य पृथक् सत्ता कल्प्यते तदा तु अनुगतव्यवहारः न स्यात् घटः सन् , पटः सन् इत्येवं तस्मात् कारणात् ब्रह्मणः केवलस्य सद्रूपत्वं वक्तव्यं नान्यस्य, तस्मात् अज्ञानस्य सद्रूपत्वं न वक्तुं शक्यते, अपि च अज्ञानस्य असद्रूपत्वं वदामः इत्यपि न शक्यते वक्तुं यतः शशविषाणवत् अत्यन्तं तुच्छः पदार्थः अयं नास्ति । किञ्च असद्रूपं चेत् कारणत्वानुपपत्तेः तस्मात् सदसद्रूपमिति वदामः इति चेत् विरोधात् न शक्यते – तस्मात् सदसदभावरूपमित्येव वक्तव्यमित्यभिप्रायः । एवं सदसद्भ्यामनिर्वचनीयं इति उक्ते सति सद् अपि न असद् अपि न इति कथनात् एतादृशः पदार्थः एव न स्यात् इति मन्यते चेत् तदा वक्तव्यं यत् त्रिगुणात्मकम् इति । त्रिगुणात्मकमिति कः अर्थः इति चेत् सत्वरजस्तमो रूपगुणात्मकमित्यर्थः तत्र अजामेकां लोहतशुक्लकृष्णां इत्यादि श्रुतिभ्यः इदमज्ञानमेकमव इति ज्ञायते तत्र व्योमादिरूपेण परिणतस्य सत्यवद्भासमानत्वेन संसारानिवृत्तिः स्यात् इति चेत् उच्यते यत् – ज्ञानवरोधि इति अर्थात् तत्र ज्ञानविरोधि इति कथनात् एतस्य अज्ञानस्य नाशः अवगम्यते अर्थात् बाध्यत्वं अवगम्यते । तथा सति ज्ञानं तु भावरूपं अज्ञानं तु अभावरूपमिति चिन्तयेत् कश्चित् इति अग्रिमं दलमुच्यते यत् भावरूपमिति । तस्मात् दलकृत्य पुरस्सरं अज्ञानस्य लक्षणं वेदान्तसारोक्तदिशा चिन्तितम्। तत्र स्मृतस्य उपेक्षा अनर्हत्वात् – प्रकृते प्रमाणव्यापरस्य विषये चिन्त्यमाने अज्ञाननाशपर्यन्तं प्रमाणव्यापारः भवति

**आत्मस्वरूपवर्णनम्-** ग्रन्थे आत्मा शुद्धः, बुद्धः, नित्यः, परमानन्दरूपः, अजः, कूटस्थः इत्यादिभिः विशेषणैः निरूपितः। लक्ष्मीधराचार्यः आत्मनः नित्यत्वं, अजत्वं, अद्वितीयत्वं च निरूप्य, आत्मा न कदापि बन्धनग्रस्तः इति सूचयति। अज्ञानकृत एव बन्धः कल्पितः; तस्मात् अज्ञाननिवृत्तिः एव मोक्षः। आत्मस्वरूपवर्णनम् इत्युक्ते आत्मनः यथार्थस्वभावस्य निरूपणम्। अद्वैतवेदान्तपरम्परायां आत्मस्वरूपं निरुपाधिकं शुद्धचैतन्यमेव। नास्य जन्मास्ति, न मृत्युर्न पुनः परिबन्धः।

**आत्मस्वरूपवर्णनम् (संक्षेपेण)**

**शुद्धचैतन्यम्** आत्मा न शरीरः, न इन्द्रियम्, न मनः, न बुद्धिः। यत्साक्षिरूपेण एतानि सर्वाणि प्रकाशयति, तत् शुद्धं चैतन्यमेव आत्मा।

**असङ्गत्वम्** आत्मा सर्वेषु अवयवेषु उपाधिषु तिष्ठन् अपि तेषु निबद्धो न भवति। यथा आकाशः घटादिषु अन्तर्बद्धः सन् अपि तैः न लिप्यते, तथैव आत्मा।

**नित्यत्वम्** आत्मा कदापि न जायते, न म्रियते, न विक्रियते।— "न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।"[2]

**अद्वितीयत्वम्** आत्मा केवलः, तस्य तुल्यं किञ्चित् नास्ति।— "एकमेवाद्वितीयम्।"[3] **आनन्दरूपत्वम्** आत्मा न केवलं ज्ञानस्वरूपः, किन्तु परमानन्दरूपः। तैत्तिरीयोपनिषत् — "सच्चिदानन्दरूपो ब्रह्म।"

**उपनिषद्भ्यः उद्धरणानि**

- बृहदारण्यकोपनिषत् (४।५।१५): अयमात्मा ब्रह्म — आत्मा एव ब्रह्म भवति। कठोपनिषत् (२।२।१३): "आत्मानं रथिनं विद्धि शरीरं रथमेव तु।" माण्डूक्योपनिषत् (७): "नान्तःप्रज्ञं न बहिःप्रज्ञं... प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः।"

**बन्धमोक्षयोः असत्यत्वम्** - ग्रन्थकारः स्पष्टतया लिखति — "न मे बन्धोऽस्ति मोक्षो वा भ्रान्तिमात्रं निरूपितम्"। अत्र आत्मा न कदापि बद्धः, न च वास्तवेन मोक्तव्यः इति तत्त्वदर्शनम्। यः जीवः अज्ञानात् बन्धं पश्यति, ज्ञानसमये स एव भ्रान्तिनिवृत्तिः मोक्षरूपेण

[1] वेदान्तसारः

[2] *गीता* (२।२०)

[3] *छान्दोग्योपनिषत्*

प्रतीयते। अतः मोक्षः कश्चन नूतनः लाभः न, किन्तु स्वस्वरूपस्य अविद्यावृतौ निवृत्तिः एव।

अद्वैतवेदान्तदर्शने परमं तत्त्वं ब्रह्मैव — नित्यं शुद्धं बुद्धं मुक्तं सच्चिदानन्दरूपम्। अस्य परमार्थदृष्ट्या जीवस्य न किञ्चिद्बन्धनं न मोक्षः, केवलं अविद्यया कल्पितं भ्रान्तिरूपमेव।

**१. शास्त्रदृष्टिः**

“नायं आत्मा बध्यते वा विमुच्यते वा।”

आत्मा न कदापि बध्यते, न मोच्यते।[1]

**असङ्गत्वश्रुतेः**

“असङ्गो ह्ययं पुरुषः” [2]

आत्मा सर्वथा असङ्गः, तस्मात् बन्धनमोक्षयोः प्रश्नः नास्ति।

गौडपादाचार्यः

“निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।

न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥”[3]

अत्र स्पष्टं प्रतिपाद्यते यत् बन्ध-मोक्षौ व्यावहारिकसत्ये स्तः, परमार्थतोऽनयोः असत्त्वमेव।

**२. युक्तिदृष्टिः**

**आत्मा नित्यशुद्धस्वरूपः**

यदि आत्मा सच्चिदानन्दरूपः नित्यः शुद्धः च, तर्हि बन्धोऽपि न सम्भवति। यः बध्नाति स च अन्यः कश्चित् कल्प्येत, किन्तु तादृशः कोऽपि नास्ति।

**बन्धस्य अनिर्वचनीयत्वम्**

बन्धः यदि वास्तविकः, तर्हि मोक्षोऽपि असम्भवः। यदि पूर्णतया असत्, तर्हि शास्त्रस्य प्रयोजनं व्यर्थम्। तस्मात् बन्धः केवलं अविद्याकल्पितः — सदसद्विलक्षणः अनिर्वचनीयः।

**दृष्टान्ताः**

**सर्परज्जुदृष्टान्तः** — यथा रज्जौ सर्पभ्रमः स्वभावतो नास्ति, तथैव आत्मनि बन्धो नास्ति।

**स्वप्नदृष्टान्तः** — स्वप्ने बद्धः जनः जागरणे मुक्तः भवति, वस्तुतः तत्र न बन्धः न मोक्षः।

**३. शङ्करभाष्यदृष्टिः**

शङ्कराचार्यः गीता[4] भाष्ये वदति—

“यः आत्मा सर्वगतः, न चोपाधिभिः लिप्यते, तस्मात् न कदाचिद्बध्यते, न मोच्यते।”

तथैव ब्रह्मसूत्रभाष्ये [5] —

“न हि मुक्तस्य मोक्षो नाम कश्चिदस्ति, नापि बद्धस्य कश्चित् बन्धः परमार्थतः। केवलं अज्ञानकल्पित एवायम्।

**ज्ञानस्य प्रमुखता**

कर्म वा उपासनाः साधनभूताः, किन्तु मोक्षहेतुः न सन्ति। ते केवलं अन्तःकरणशुद्ध्यर्थं साधकाय उपयुज्यन्ते। मोक्षस्य मूलं तु आत्मब्रह्मणोः अभेदज्ञानम् एव। अयं विचारः उपनिषदां भाष्येषु शङ्कराचार्येण प्रतिपादितः, स एव अत्र स्पष्टतया दृष्टिगोचरः।

**तात्त्विकविश्लेषणम्-** अद्वैतमकरन्दः लघुग्रन्थत्वेन अपि साधकाय महदुपकारकः। तत्र उपनिषद्वाक्यानां सारभूतं तत्त्वं सरलया शैल्या प्रदर्शितम्। शास्त्रार्थस्य गाम्भीर्यं, उपनिषद्वाक्यसमन्वयः, आत्मनः स्वरूपप्रतिपादनम्, मोक्षस्य स्वरूपनिर्णयः — एते सर्वे अत्र संग्रहीताः सन्ति । अतः अयं ग्रन्थः अद्वैतवेदान्तस्य प्रवेशद्वाररूपेण मान्यः।

अद्वैतमकरन्दः लघुग्रन्थत्वेन अपि अतिगूढतत्त्वप्रतिपादकः ग्रन्थः। लक्ष्मीधराचार्येण विरचितः अयं ग्रन्थः अद्वैतवेदान्तप्रवेशाय साधकानामुपकारकः भवति।

---

[1] बृहदारण्यकोपनिषत् (४।३।२३)

[2] (बृह. उ. ४।३।१५)

[3] माण्डूक्यकारिका (२।३२)

[4] (१३।३२)

[5] (२।१।२२)

**उपनिषद्वाक्यानां सारभूततत्त्वनिर्णयः**

अत्र ग्रन्थे उपनिषदां महावाक्यानि — "तत्त्वमसि", "अहं ब्रह्मास्मि", "प्रज्ञानं ब्रह्म", "अयमात्मा ब्रह्म" — इत्यादीनां गूढार्थः सरलया शैलीया निरूपितः।

उपनिषद्वाक्यानां समन्वयः (श्रुतिसामञ्जस्यं) अत्र मुख्यं तात्त्विकं योगदानम्।

**आत्मस्वरूपप्रतिपादनम्**

आत्मा नित्यः, शुद्धः, बुद्धः, मुक्तः, सच्चिदानन्दरूपः इति अत्र स्पष्टं प्रदर्शितम्। देह-मनः-प्राणादिभिः आत्मा न संबध्यते, किन्तु साक्षिरूपेण तेषां सर्वेषां प्रकाशक एव।

**मोक्षस्वरूपनिर्णयः**

मोक्षः न कश्चित् नवीनः भावः, किन्तु आत्मस्वरूपस्य एव अवगमः। "अविद्यानिवृत्तिः मोक्षः" इति सिद्धान्तः ग्रन्थे विशेषेण प्रतिपादितः।

**शास्त्रार्थगाम्भीर्यं सरलशैली च**

ग्रन्थः अत्यल्पशब्दप्रयोगेनापि शास्त्रस्य गहनं तत्त्वं प्रकाशयति। उदाहरणोपमा-दृष्टान्तप्रयोगेन जटिलं विषयं साधकस्य हृदयंगमं करोति।

**अद्वैतवेदान्तस्य प्रवेशद्वाररूपता** यः साधकः वेदान्तशास्त्रं गभीरतरं ग्रन्थानां (ब्रह्मसूत्रभाष्य, उपनिषद्भाष्य, पञ्चदशी, विवेकचूडामणि इत्यादीनाम्) अध्ययनं कर्तुमिच्छति, तस्य कृते अयं अद्वैतमकरन्दः प्रथमोपयोगी मार्गदर्शकः भवति।

अयं ग्रन्थः आत्मविद्यायाः आरम्भिकाध्यायनाय उपयुक्तः प्रवेशद्वारः इव कार्यं करोति।

**उपसंहारः**

लक्ष्मीधराचार्यविरचितः अद्वैतमकरन्दः अद्वैतवेदान्तग्रन्थानां मध्ये रत्नरूपेण ख्यातः। यद्यपि अयं लघुग्रन्थः केवलं अष्टाविंशतिः श्लोकैः एव अलङ्कृतः, तथापि तेषु प्रत्येकश्लोके उपनिषदां सारभूतं ब्रह्मतत्त्वं, आत्मब्रह्मणोः ऐक्यम्, मोक्षस्वरूपनिश्चयः च सम्यक् प्रतिपादितः अस्ति।

अस्मिन्नेव ग्रन्थे शास्त्रार्थगाम्भीर्यं सरलतया, दृष्टान्तैः सह, मधुरया शैलीया प्रकाश्यते। तस्मात् अस्य पठनमननाभ्यां साधकस्य आत्मब्रह्मैक्यनिष्ठा दृढा भवति, अद्वैतसिद्धान्ते स्थैर्यं जायते, मोक्षमार्गे दृढप्रेरणा च सुलभ्यते।

अतः अद्वैतमकरन्दः नामकः अयं ग्रन्थः केवलं वेदान्तदर्शनस्य प्रवेशद्वाररूपः न, अपितु अद्वैततत्त्वस्य मधुरं मकरन्दं साधकहृदयेषु आस्वादयन्, तान् आत्मस्वरूपबोधे, अद्वितीयब्रह्मनिष्ठायां च प्रतिष्ठापयति इति निःसंशयम्।

## लघुशोधप्रबन्धे उपयुक्ता ग्रन्थसूची

1. **लक्ष्मीधराचार्यः** – अद्वैतमकरन्दः, सम्पा. स्वामी माधवानन्दः। कोलकाता: अद्वैताश्रमः, १९५०।
2. **शङ्कराचार्यः** – उपनिषद्भाष्याणि (बृहदारण्यक, छान्दोग्य, माण्डूक्य)। वाराणसी: चौखम्बा विद्याभवनम्, २००८।
3. **शङ्कराचार्यः** – ब्रह्मसूत्रभाष्यम्, सम्पा. स्वामी गम्भीरानन्दः। कोलकाता: अद्वैताश्रमः, १९९३।
4. **गौडपादाचार्यः** – माण्डूक्यकारिका (शाङ्करभाष्यसहितम्)। वाराणसी: चौखम्बा ओरिएण्टालिया, २००५।
5. **स्वामी चिन्मयानन्दः** – अद्वैतमकरन्दः (An English Commentary)। मुंबई: चिन्मय मिशन पब्लिकेशन्स्, १९८२।
6. **स्वामी तेजोमयानन्दः** – Nectar of Advaita: Commentary on Advaitamakaranda। मुंबई: चिन्मय मिशन, १९९६।
7. **राधाकृष्णन, एस्.** – The Principal Upanishads। दिल्ली: ऑक्सफोर्ड युनिवर्सिटी प्रेस्, १९५३।

# नाट्यशास्त्रोल्लेखितानां कतिपयानां हस्तमुद्राणां योगविज्ञानदृष्ट्या एकमध्ययनम्

सुनन्दा दे , शोधच्छात्रा
श्रीसीतारामवैदिक-आदर्शसंस्कृतमहाविद्यालयः
deysunanda4@gmail.com
Mobile: 8436820859

**शोधसारः-** आचार्यभरतमुनिना प्रनीतं नाट्यशास्त्रम् संस्कृतालंकारशास्त्रस्य सर्वाधिकप्रसिद्धः ग्रन्थः इति। षट्त्रिंशदध्यायसमन्वितं नाट्यशास्त्रं विश्वकोषः इत्युच्यते। अस्य ग्रन्थस्य अष्टमाध्याये अभिनयप्रसङ्गे आलोचना दृश्यते। तत्र अभिनयस्य चत्वारभेदविषये आचार्येण भरतमुनिना उक्तम्, ते च – आङ्गिकः वाचिकः आहार्यः सात्त्विकः इति। अतःपरं नवमाध्याये हस्तः वक्षः पार्श्वः जठरः कटी जङ्घा ऊरुः पादः च लक्षणं तथा विनियोगविषये आलोचितवान्। सर्वाग्रे भरतमुनिः हस्ताभिनयप्रसङ्गे विस्तारेण आलोचितवान्। हस्ताभिनयकाले हस्तमुद्राणामुपोयोगिता एव विशेषरूपेण दृश्यते। नाट्यशास्त्रे आचार्यः भरतमुनिः असंयत-संयत-नृत्तहस्त इति त्रिविधमुद्राविषये आलोचितवान्। चतुर्विंशतिः **असंयतहस्तमुद्रा** यथा- 1. पताकः 2. त्रिपताकः 3. कर्त्तरीमुखः 4. अर्द्धचन्द्रः 5. अरालः 6. शुक्रतुण्डः 7. मुष्टिः 8. शिखरः 9. कपित्थः 10. कटकामुखः 11. सूच्यास्यः 12. पद्मकोषः 13. सर्पशीर्षः 14. मृगशीर्षः 15. काङ्गुलः 16. अलपद्मः 17. चतुरः 18. भ्रमरः 19. हंसास्यः 20. हंसपक्षः 21. सन्दशः 22. मुकुलः 23. ऊर्णनाभः 24. ताम्रचूडश्चेति। **संयतहस्तमुद्रा** - द्वाभ्यां हस्ताभ्यां क्रियमाणा हस्तमुद्रा संयतहस्तमुद्रा इति कथ्यते। नाट्यशास्त्रे त्रयोदशप्रकाराणां संयतहस्तमुद्राणामालोचना उपलभ्यते। ताश्च – 1. अञ्जलिः 2. कपोतः 3. कर्कटः 4. स्वस्तिकः 5. कटकावर्धमान 6. उत्सङ्गः 7. निषधः 8. दोला 9. पुष्पपुटः 10. मकरः 11. गजदन्तः 12. अवहित्थः 13. वर्धमान चेति। **नृत्तहस्तमुद्रा** – नाट्यशास्त्रे त्रिंशत् नृत्तहस्तमुद्राणामुल्लेखो दृश्यते। ताश्च – 1. चतुरस्त्रः 2. उद्वृत्तः 3. तलमुखः 4. स्वस्तिकः 5. बिप्रकीर्णः 6. अरालः 7. खटकामुखः 8. आबिद्धवक्रः 9. सूचीमुखः 10. रेचितः 11. अर्धरेचितः 12. उत्तानवञ्चितः 13. पल्लवः 14. नितम्बः 15. केशबन्धः 16. लताहस्तः 17. करिहस्तः 18. पक्षवञ्चितः 19. पक्षप्रद्योतकः 20. गरुडपक्षः 21. दण्डपक्षः 22. ऊर्ध्वमण्डलिन् 23. पार्श्वमण्डलिन् 24. उरोमण्डली 25. उरःपार्श्वमण्डली 26. मुष्टिस्वस्तिकः 27. नलिनीपद्मकोषः 28. अलपल्लवः 29. उल्वणः 30. ललितश्चेति।

इत्थं भरतमुनिना २४+१३+३०= ६७ प्रकारकहस्तमुद्राणामुल्लेखः अभिनयप्रसङ्गे नृत्यप्रसङ्गे च प्रोक्तः। आभिः हस्तमुद्राभिः नाट्ये नृत्ये च विविधाः भावावस्थाः विविधाः अर्थाश्च ज्ञाप्यन्ते। न केवलं नाट्यशास्त्रे अपि तु योगशास्त्रे तन्त्रशास्त्रे बौद्धशास्त्रे जैनशास्त्रे च मुद्राणां बहुविधाः आलोचनाः दृश्यन्ते। एतासां मुद्राणां यथा नाट्यप्रयोगे तथा शरीरविज्ञानदृष्ट्यापि महती उपकारिता अस्ति।

मानवानां तनुः यद्रूपं पृथ्वी जलं तेजः वायुः आकाशश्चेति पञ्चतत्त्वैः निर्मिता तद्रूपं जनानां हस्तयोः दशाङ्गुलिः अपि पञ्चतत्त्वानामवस्थानम् इति। हस्तस्य अङ्गुुष्ठे अग्निः तर्जन्यां वायुः मध्यमायां आकाशः अनामिकायां पृथिवी कनिष्ठायां जलमिति स्थीयते। यद्रूपं नाट्यशास्त्रे हस्तमुद्राणां व्यवहारः दृश्यते तद्रूपं योगाभ्यासकालेऽपि विविधहस्तमुद्राणां प्रयोगः दृस्यते। एतादृशं नाट्यशास्त्रोक्तपञ्चहस्तमुद्राणां प्रायोगिकयोगाभ्यासदृष्ट्या विश्लेषणं विधास्यते, यथा- भ्रमरमुद्रा, मुक्लमुद्रा, मुष्टिमुद्रा, सन्दंशमुद्रा, कर्कटमुद्रा।

**शब्दसंकेताः - नाट्यशास्त्रम्, हस्तमुद्रा, योगविज्ञान**

**भूमिका-** भारतीय ज्ञानपरम्परायाः विशेषः विषयः प्राचीन-भारतीय-ललितकला इति। भरतमुनिप्रणीतं नाट्यशास्त्रं ललितकलायाः विश्वकोषः इति अभिधीयते । काव्य-नाटक-सङ्गीत-नृत्य-इत्यादीनां सर्वेषां विषयाणां संग्रहः नाट्यशास्त्रमिति। इदानीं उपलब्धे नाट्यशास्त्रे षट्त्रिंशत् अध्यायाः प्राप्यन्ते। नाट्यशास्त्रस्य रचनाकालविषये वहबः मतभेदाः सन्ति। आनुमानिकरूपेण ख्रीष्टपूर्बः प्रथमशताब्दी ग्रन्थस्यास्य रचनाकालः इति स्वीक्रियते। नाट्यतत्त्वसमृद्धस्यास्य ग्रन्थस्योपरि अनेकाः टीकाः सन्ति। तासु आचार्य-

अभिनवगुप्तविरचिता अभिनवभारती टीका नाट्यशास्त्रस्य सर्वापेक्षा प्रसिद्धा सर्वजनग्राह्या च टीका वर्तते।

नाट्यशास्त्रस्य अभिनय-निरुपणम् इति अष्टमाध्याये अभिनयविषये विस्तारेण आलोचना दृश्यते। अभि उपसर्गपूर्वकं 'णीङ् प्रापणे' (नी) धातोः अनन्तरं अच् प्रत्ययेण अभिनयः शव्दः उत्पद्यते। अभिनय-शब्दस्य अर्थरस्ति- आभिमुख्य-नयनम्। नाट्याचार्यभरतस्य मतानुसारेण शाखाङ्गोपाङ्गाप्रयोगेन विविधाः अर्थाः यदा सामाजिकस्य हृदये रसास्वादनं उत्पादयति, सः अभिनयः इति। साहित्यदर्पणकारविश्वनाथेन प्रोक्तं- 'भवेदभिनयोऽवस्थानुकारः[1]'। अभिनवगुप्तपादः 'अभिनवभारती' टीकायामाह – 'क्रियते इति कर्म अभिनेयमित्यर्थः।' नाट्यशास्त्रे अभिनयस्य चत्वारोभेदाः परिदृश्यन्ते, यथा – आङ्गिकः, वाचिकः, आहार्यः, सात्त्विकश्च।

आङ्गिको वाचिकश्चैव ह्याहार्यः सात्त्विकस्तथा।
ज्ञेयस्त्वभिनयो विप्राः चतुर्धा परिकल्पितः[2]॥

मानवशरीरस्य विविधाङ्गानामुपाङ्गानां प्रत्यङ्गानां विभिन्नचेष्टाभिः भावमुद्राभिः च यः साङ्केतिकार्थः प्रकाश्यते तदाङ्गिकाभिनय इति कथ्यते। पुनः आङ्गिकाभिनयस्यापि शरीरज-मुखज-चेष्टाकृतेति त्रयः प्रकाराः दृश्यन्ते। शाखाङ्गोपाङ्गसंयुक्तेन अभिनयः शरीरजाभिनयः। नाट्यशास्त्रे उक्तम्-

शिरोहस्तकटीवक्षः पार्श्वपादसमन्वितः।
अङ्गप्रत्यङ्गसंयुक्तः षडङ्गो नाट्यसंग्रहः॥[3]

आङ्गिकाभिनयेषु हस्ताभिनयस्य स्थानं सर्वादौ अस्ति। आचार्येण भरतेन नाट्यशास्त्रस्य नवमाध्याये हस्ताभिनयप्रसङ्गे विस्तारेण आलोचितवान्। हस्ताभिनयेन मानवहृदयस्य सुख-दुःख-भय-उत्साह-इत्यादयः भावाः अभिव्यञ्जन्ति। हस्ताभिनयकाले विविधाभिः मुद्राभिः भावाः रसाः व्यङ्ग्यार्थाश्च प्रतिपादयन्ति। भरताचार्येण हस्ताभिनयस्य त्रयः भेदाः कृतवान्- असंयुतहस्तमुद्रा, संयुतहस्तमुद्रा, नृत्तहस्तमुद्रा।

**असंयतहस्तमुद्रा** - एकेन हस्तेन क्रियमाणा हस्तमुद्रा असंयतहस्तमुद्रा इति कथ्यते। नाट्यशास्त्रे चतुर्विंशतिः असंयतहस्तमुद्राणामुल्लेखः प्राप्यते। ताश्च - 1.पताकः 2.त्रिपताकः 3.कर्त्तरीमुखः 4.अर्द्धचन्द्रः 5.अरालः 6.शुक्तुण्डः 7.मुष्टिः 8.शिखरः 9.कपित्थः 10.कटकामुखः 11.सूच्यास्यः 15.पद्मकोषः 13.सर्पशीर्षः 14. मृगशीर्षः 15. काङ्गुलः 16. अलपद्मः 17. चतुरः 18.भ्रमरः 19.हंसास्यः 20.हंसपक्षः 21.सन्दंशः 22.मुकुलः 23.ऊर्णनाभः 24. ताम्रचूडश्चेति।





1साहित्यदर्पणः -६/२.
2नाट्यशास्त्रम् -८/९.
3 नाट्यशास्त्रम्-८/१२

**संयतहस्तमुद्रा** - द्वाभ्यां हस्ताभ्यां क्रियमाणा हस्तमुद्रा संयतहस्तमुद्रा इति कथ्यते। नाट्यशास्त्रे त्रयोदशप्रकाराणां संयतहस्तमुद्राणामालोचना उपलभ्यते। ताश्च - 1.अञ्जलिः 2.कपोतः 3. कर्कटः 4.स्वस्तिकः 5.कटकावर्धमान 6.उत्सङ्गः 7.निषधः 8.दोला 9.पुष्पपुटः 10.मकरः 11.गजदन्तः 12.अवहित्थः 13.वर्धमान चेति।





**नृत्तहस्तमुद्रा** – नाट्यशास्त्रे त्रिंशत् नृत्तहस्तमुद्राणामुल्लेखो दृश्यते। ताश्च - 1.चतुरस्रः 2.उद्वृत्तः 3.तलमुखः 4.स्वस्तिकः 5.बिप्रकीर्णः 6.अरालः 7.खटकामुखः 8.आबिद्धवक्रः 9.सूचीमुखः 10.रेचितः 11.अर्धरेचितः 12.उत्तानवञ्चितः 13.पल्लवः 14.नितम्बः 15.केशबन्धः 16.लताहस्तः 17.करिहस्तः 18.पक्षवञ्चितः 19.पक्षप्रद्योतकः 20.गरुडपक्षः 21.दण्डपक्षः 22.ऊर्ध्वमण्डलिन् 23.पार्श्वमण्डलिन् 24.उरोमण्डली 25.उरःपार्श्वमण्डली 26.मुष्टिस्वस्तिकः 27. नलिनीपद्मकोषः 28.अलपल्लवः 29.उल्वणः 30.ललितश्चेति।

इत्थं भरतमुनिना २४+१३+३०= ६७ प्रकारकहस्तमुद्राणामुल्लेखः अभिनयप्रसङ्गे नृत्यप्रसङ्गे च प्रोक्तः। आभिः हस्तमुद्राभिः नाट्ये नृत्ये च विविधाः भावावस्थाः विविधाः अर्थाश्च ज्ञाप्यन्ते। न केवलं नाट्यशास्त्रे अपि तु योगशास्त्रे तन्त्रशास्त्रे बौद्धशास्त्रे जैनशास्त्रे च मुद्राणां बहुविधाः आलोचनाः दृश्यन्ते। एतासां मुद्राणां यथा नाट्यप्रयोगे तथा शरीरविज्ञानदृष्ट्यापि महती उपकारिता अस्ति।

**योगशास्त्रोक्तमुद्राणां परिचयः -**

पातञ्जलयोगसूत्रे योगस्य अष्टाङ्गस्वरूपाणि प्रोक्तानि- "यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यानसमाधयोऽष्टावङ्गानि"[1]॥

एतेषु अष्टाङ्गेषु आसने प्राणायमे ध्याने च विविधमुद्राः व्यवह्रियन्ते। हठयोगप्रदीपिका, घेरण्डसंहिता, शिवसंहिता, वशिष्ठसंहिता इत्यादिषु शास्त्रेषु मुद्राविषये विस्तारेण आलोचना कृतास्ति । मुद्रा शरीरस्य च अन्तःकरणवृत्तिं जागरयति। पुराणेषु अपि परिदृश्यते

1 पातञ्जल-योगसूत्रः साधनपादः 29

यत् धर्माधारेण प्रत्येकमुद्राणां कृते देवानां कल्पना कृता। अतएव मुद्राभिः शरीरसुस्थता तथा आन्तरिकभावनायाः अभिव्यक्तिरिति बोध्यम्।

विविधमुद्रासु हस्तेन क्रियमाणा मुद्रा हस्तमुद्रा इति उच्यते। देहिनां तनुः पृथ्वी जलं तेजः वायु आकाशश्चेति पञ्चतत्त्वैः निर्मिता। यदा एतानि पञ्चतत्त्वानि सन्तुलितानि न भवन्ति तदैव मानवानां विविधाः शारीरिक-मानसिक-रोगाः जायन्ते। योगासनाभ्यासकाले सुस्वास्थ्यरक्षणाय मानवाः विविधहस्तमुद्राणां व्यवहारं कुर्वन्ति। यद्यथा – ज्ञानमुद्रा, ध्यानमुद्रा, प्राणमुद्रा, व्यानमुद्रा, वरुणमुद्रा चेति।

**शोधोद्देश्यानि – प्रत्येकस्मिन् कार्येयेव उद्देश्यमावश्यकम्। शोधकार्यमेकं महत्कार्यम्। शैधकार्ये अवश्यमेव उद्देश्यं वर्तते। अस्मिन् शोधकार्यस्य उद्देश्यानि -**

- नाट्यशास्त्रोक्तहस्तमुद्राणां योगविज्ञानदृष्ट्या अध्ययनम्।
- मानवशरीरे नाट्यशास्त्रोक्तहस्तमुद्राणां प्रभावस्य समीक्षणम्।

**शोधस्य प्रकृतिः**- शोधस्य प्रकारद्वयं भवति 1. प्रयोगात्मकम् (Experimental Research) 2. अप्रयोगात्मकञ्चेति (Non-Experimental Research)। अस्य शोधकार्यस्य प्रकृतिः "प्रयोगात्मिका" वर्तते।

**नाट्यशास्त्रोक्तहस्तमुद्राणां योगविज्ञानदृष्ट्या अध्ययनम्**

मानवशरीरस्य अन्नमय-प्राणमय-मनमयकोषत्रयस्य संयोगसाधकाः मुद्राः इति। मानवदेहे ७२०००सहस्रम् नाड्यः सप्तचक्राणि च सन्ति। एताभ्यः नाडीभ्यः सर्वदैव एका विशेषशक्तिः निःसरति या शक्ति अस्मदीय अङ्गुल्यग्रभागेभ्यः वहिः निःसृत्य महासंसारे मेमिल्यते। मुद्राभ्यासेन शक्तिरियं मानवदेहाभ्यन्तरे एव तिष्ठति, शक्तिरियं वहिः न निःसरति। मनुष्याणां हस्तयोः दशाङ्गुलिषु पञ्चतत्त्वानामवस्थानमस्ति। अङ्गुष्ठे अग्नेः तर्जन्यां वायोः, मध्यमायां आकाशस्य, अनामिकायां पृथिव्याः, कनिष्ठायां जलस्य चावस्थानं वर्तते । अग्नितत्त्वं शरीरस्य अतीव महत्त्वपूर्णं तत्त्वमस्ति। यदा अग्नितत्त्वं ( अङ्गुष्ठः) अन्यतत्त्वैः ( अन्यैः अङ्गुलिभिः) सह संयुज्यते तदा अन्येषां तत्त्वानामपि सजीवता जायते। यदा अङ्गुष्ठस्य अग्रभागः अन्यासामङ्गुलीनामग्रभागैः सह संयुज्यते तदैव तत्तत्तत्त्वानि शरीरे संतुलितानि भवन्ति। यदा अङ्गुष्ठस्य अग्रभागः अन्यासामङ्गुलीनाम् मूलस्थानं स्पृशति तदा शरीरे तत्तत्तत्त्वानि वर्धन्ते। यदा अङ्गुलीनाम् अग्रभागः अङ्गुष्ठस्य आधारं स्पृशति तदा शरीरे तत्तत्तत्त्वानि न्यूनीभवन्ति। अतः हस्तमुद्राणां उपयोगिताः मानवदेशे विशेषरूपेन परिदृश्यन्ते। नाट्यशास्त्रे उल्लिखितानां हस्तमुद्राभिः सह योगाभ्यासे व्यवहृतानां हस्तमुद्राणां सादृश्यता परिलक्ष्यते। यथा -

**भ्रमरमुद्रा -** नाट्यशास्त्रे असंयतहस्तमुद्रासु एका विशेषमुद्रा **भ्रमरमुद्रा** इति। यदा मध्यमाङ्गुलिः अङ्गुष्ठस्य अग्रभागं स्पर्शं करोति, तर्जनी वक्ररूपेण तिष्ठति, अन्ये द्वे अङ्गुली उर्द्धभागे प्रकीर्णमस्ति तदा भ्रमरहस्तमुद्रा भवति। नाट्यशास्त्रे प्रोक्तम्-

मध्यमाङ्गुष्ठसन्दंशो वक्र चैव प्रदर्शिनी।

ऊर्द्धमध्ये प्रकीर्णे च द्वयङ्गुल्यौ भ्रमरे करे।।[1]



भ्रमरहस्तस्य माध्यमेन पद्मम् उत्पलं कुमुदं चेत्यादिनां पुष्पानां चयनाभिनयकाले अनया मुद्रया व्यवहारं दृश्यते।

योगाभ्यासे एका महत्त्वपूर्णा मुद्रा अस्ति **भ्रमरमुद्रा।** यत्र मध्यमा अङ्गुष्ठस्य अग्रभागं स्पर्शं करोति। तर्जनी वक्ररूपेन तिष्ठति। कणिष्ठा-अनामिका च प्रसारिता भवति। पद्मासने उपविश्य द्वौ हस्तौ मनिवन्धे स्थापयित्वा करतलं उर्द्धमुखं कृत्वा इयं मुद्राभ्यासं क्रियते। इयं मुद्रा प्रतिदिनम् अभ्यासेन मानवशरीरस्य बहु व्यधिः यथा- Asthma, Bronchitis, Cold Allergy, Skin Allergy इत्यादयः दूरीभूताः भवन्ति।

**मुष्ठिमुद्रा-** नाट्यशास्त्रे भरतमुनिना मुष्ठीमुद्राविषये उक्तम् -

आङ्गुल्यो यस्य हस्तस्य तलमध्येऽग्रसंस्थिताः।

तासामुपरि चाङ्गुष्ठः सः मुष्ठिरिति संज्ञितः ।।

एष प्रहारे व्ययामे निर्दमे पीडने तथा।

संवाहनेऽसियष्टोनां कुन्तदण्डग्रहे तथा।। [2]

यदा अङ्गुलयः हस्तस्य करतलमध्ये संस्थापयन्ति, तासामुपरि अङ्गुष्ठः तिष्ठति, तदा मुष्ठिमुद्रा भवति। अनया मुद्रया प्रहार-निर्गम-व्यायाम-पीडण-संवाहन-दण्ड-असि-यष्ठि-इत्यादिनाम् अभिनयं प्रदर्शति।

इयं मुद्रा प्रायोगिक-योगाभ्यासेऽपि दृश्यते। पद्मासने उपविश्य द्वौ हस्तौ मनिवन्धे स्थापयित्वा **मुष्ठिमुद्रा**भ्यासं कर्तव्यम्। पूजनकालेऽपि इयं मुद्रा दृश्यते, तत्र वलीमुद्रा रूपेन परिचियते।

अनया मुद्रया मानवशरीरस्य परिपाकतन्त्रस्य कार्यकारिता सम्यकरूपेन चलति। यकृत् इति अङ्गस्य कार्यं वर्धयति।

अतः नाट्यशास्त्रोक्तमुष्ठिमुद्रया सह योगाभ्यासे व्यवहृतं मुष्ठिमुद्रायाः सादृश्यं परिदृश्यते।



1 नाट्यशास्त्रम् -९/१०१

2 नाट्यशास्त्रम् -९/५३-५५

**मुकुलमुद्रा-** मुकुलमुद्रायाः लक्षणप्रसङ्गे नाट्यशास्त्रे प्रोक्तम्- समा नताग्राः सहिताः यस्याङ्गुल्यो भवन्ति हि। ऊर्ध्वा हंसमुखस्यैव स भवेन्मुकुलः करः।।[1]



यदा हस्तस्य अङ्गुलिनामग्रभागाः समानरूपेन नताः भूत्वा परस्परं मिलन्ति तदा मुकुलमुद्रा भवति। अभिनयकाले भोजन-हिरण्य-गणना-मुखसङ्कोच-प्रदान-शीघ्रता-मुकुलितपुष्पमित्यादीनां प्रदर्शनाय मुकुलहस्तस्य प्रयोगः दृश्यते।

प्रायोगिक-योगाभ्यासे **समानमुद्रा** एका गुरुत्वपुर्णमुद्रा अस्ति। यदा अङ्गुष्ठेन सह अपराङ्गुलयः नताः भूत्वा परस्परं स्पृशन्ति, तदा समानमुद्रा भवति। पद्मासने उपविश्य इयं मुद्राभ्यासं क्रियते। अनया मुद्रया मानवशरीरे पञ्चतत्त्वस्य साम्यतारक्षणं भवति, वात-पित्त-कफस्य संतोलनं भवति, शरीरवेदनापि दूरीभूता भवति।

अतः नाट्यशास्त्रोक्त-मुकुलमुद्रया सह योगाभ्यासे व्यवहृतं समानमुद्रया सादृश्यता उपलभ्यते।

**सन्दंशमुद्रा -** सन्दंशहस्तस्य लक्षणविषये नाट्यशास्त्रे प्रोक्तम्-

तर्जन्यङ्गुष्ठसन्दंशस्त्वरालस्य यथा भवेत्। आभुग्नतलनध्यस्थः स सन्दंश इति स्मृतः।।[2]



यदि कनिष्ठाङ्गुलिः अङ्गुष्ठेन सह संयुज्यते, करतलं किञ्चित् नतं भवति, तदा सन्दंशमुद्रा भवति। अभिनयकाले पुष्पचयन-ग्रथन-ग्रहणे, तृण-पर्ण-केश-सूत्रग्रहणे, शल्यावयवग्रहणे अपकर्षणे अस्याः मुद्रायाः व्यवहारं क्रियते।

प्रायोगिकयोगाभ्यासे **जलमुद्रा वृद्धिमुद्रा** वा एका विशेषमुद्रा अस्ति। अत्रापि कणिष्ठाङ्गुलिः अधःमुखी भूत्वा अङ्गुष्ठस्याग्रभागं स्पृशति। अपरः त्रयः अङ्गुलयः परस्परं मुक्ताः तिष्ठन्ति।

इयं मुद्रा प्रतिदिनमभ्यासेन मानवशरीररे जलतत्त्वस्य वृद्धिः भवति। इतोऽपि परिपाकतन्त्रस्य समस्या , मांसपेशीमध्ये वेदना, शुष्कत्वकस्य समस्या दूरीभूतं करोति।

अतः भरतमुनिना उक्तं सन्दंश इति असंयतहस्तमुद्रया सह योगाभ्यासे व्यवहृतं वृद्धिमुद्रायाः सादृश्यता उपलभ्यते।

**कर्कटमुद्रा-** नाट्यशास्त्रे उल्लिखितेषु संयतहस्तमुद्रासु एका विशेषमुद्रा कर्कटमुद्रा । कर्कटमुद्रायाः प्रसङ्गे नाट्यशास्त्रे उक्तम्-

अङ्गुल्यो यस्य हस्तस्य ह्यन्योन्यान्तरनिस्सृताः।
स कर्कट इति ज्ञेयः करः कर्म च वक्ष्यते।।
एष मदनाङ्गमर्दे सुप्तोत्थितविजृम्भणे बृहद्देहे।
हनुधारणे च योज्यः शङ्खग्रहणेऽर्थतत्त्वज्ञैः।।[3]

---
1 नाट्यशास्त्रम् -९/११७
2 नाट्यशास्त्रम् -९/११०
3 नाट्यशास्त्रम् -९/१३३-१३४

नाम्ना एव वोध्यते यदा द्वयोः हस्तयोः अङ्गुलयः कर्कटवत् परस्परं तिष्ठन्ति, तदा कर्कटहस्तमुद्रा भवति। 'मदनाङ्गमर्दने' 'सुप्तोत्थितविजृम्भणे' 'हनुधारणे' 'शङ्खग्रहणे' च अस्य हस्तस्य प्रयोगं दृश्यते।



योगशास्त्रे कर्कटमुद्रया सह सादृश्यसम्पन्ना **सहजशङ्खमुद्रा** इति एका मुद्रास्ति। सुखासने वज्रासने वा उपविश्य इयं मुद्राभ्यासनेन मानवशरीरस्य बहु उपकारं साधयति। परिपाकपद्धत्याः वाचनसमस्यायाः स्वरतन्त्रस्य च उपकारं साधयति। शरीरे पञ्चतत्त्वस्य साम्यता रक्षणं कृत्वा शरीरस्य कार्यकारिता वर्धयति।

**निष्कर्षः** - एतद्रूपेन नाट्यशास्त्रोक्तं विविधाभिः मुद्राभिः सह योगाभ्यासे व्यवहृतानां विविधानां मुद्रानां सादृश्यता उपलभ्यते। योगाभ्यासकाले तासामभ्यासेन ये उपकारिताः लभ्यन्ते ते उपकारिताः अभिनयकालेऽपि वयं लब्धुं शक्नुमः। देहिनां सुस्वास्थ्यरक्षणाय योगाभ्यासः अवश्यमेव करणीयः। योगाभ्यासेन मानवस्य शरीरे सुस्थता मनसि आध्यात्मिकता च जायेते। योगाभ्यासकाले विविधहस्तमुद्राणां व्यवहारो दृश्यते। भरतमुनिना नाट्यशास्त्रेऽपि अभिनयप्रसङ्गे विविधहस्तमुद्राणामुल्लेखः कृतः। आभिः हस्तमुद्राभिः नाट्ये नृत्ये च विविधाः भावाः विविधाः अर्थाश्च अभिव्यज्यन्ते। तदतिरिक्तः आभिः हस्तमुद्राभिः शरीरस्य महान् उपकारः साध्यते। योगाभ्यासे निरुत्साहिताः जनाः नृत्याभ्यासमाध्यमेनापि सुन्दरं स्वास्थ्यं कलयितुं शक्नुवन्ति । मुद्राभिनयः न केवलं नटस्य उपकारं साधयति अपि तु दर्शकस्य मनसि महान्तं प्रभावं पातयति। योगाभ्यासे एकस्यैव उपकारः भवति किन्तु मुद्राभिनयेन कर्तुः द्रष्टुश्च उपकारः भवति। शरीरसुस्थता यथा आवश्यकी तथा मानसिकी सुस्थता अपि। वैद्यशास्त्रदृष्ट्या मानसिकी सुस्थता आयुवर्धने महती सहायिका भवति। अतः मानवः सर्वदा सुस्थमानसिकतायुक्तः भवेत्। नृत्यदर्शने करणे च मानसिकी सुस्थता वर्धते। तासामभ्यासेन ये उपकारिताः लभ्यन्ते ते उपकारिताः अभिनयकालेऽपि वयं लब्धुं शक्नुमः।

**सन्दर्भग्रन्थसूची -**


- द्विवेदी,डॉ.पारसनाथः. नाट्यशास्त्रम् (द्वितीयभागः).वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,2015.
- शास्त्री, श्री वाबुलाल शुक्ल. नाट्यशास्त्रम् (द्वितीयभागः). वाराणसी : चौखम्भासंस्कृतसंस्थान,2015.
- शास्त्री, मधुसूदनः. नाट्यशास्त्रम् (द्वितीयभागः). वाराणसी: काशी हिन्दु विश्वविद्यालयः,1975.
- मिश्र, पं. लालविहारी. नित्यकर्म-पूजाप्रकाश. गोरक्षपुर : गीताप्रेस, सं २०७०
- पाण्डे, डां. प्रकाशः. मुद्राविमर्शः. प्रयागः : श्रीगङ्गानाथझाकेन्द्रीयसंस्कृत-विद्यापीठम्, 1990.
- त्रिपाठी, डा. इन्द्रदेव. नाडी-विज्ञानम्. वाराणसी : चौखम्भा भारती अकाडेमी, 1982.
- Hirschi,G. Mudras Yoga in Your Hands. York Beach : Samuel Weiser, INC, 1997.
- Panigrahi, Yogi Vishnu. Mudras. : World Peace Yoga School Educations,

- Sharma, S. Effect of Yogic Practices On Body Posture and It's Correlation with Physical and Mental Health in Adolescents. Swami Vivekanand Joga University, 2024.
- Pathloth,V. Critical Analysis of Hasta Mudras and Their Interpretations In Dance. International Journal of Creative Research Thoughts, Vollume 6, Issue 2,2018.


**अन्तर्जालसूची –**


www.archive.org

www.sanskritlibrary

https://sodhganga.inflibent.ac.in

www.epustakalaya

# संवेदनोन्मुखविकासवैकल्यप्रभावितानां बालानां (Autistic children) उद्वेगनिवृत्तौ (Anxiety Reduction), अतिगतिनियन्त्रणे (Hyperactivity Control) च योगासनाभ्यासः- एकं समीक्षात्मकमध्ययनम्

संगीता-बागः, शोधच्छात्रा
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः
दूरवाणीसंख्या 9775617351
वैद्युतसम्पर्कसंकेतः sangitabag8@gmail.com

**शोधसारः-** १९७७ क्रिस्ताब्दे प्रतिष्ठितस्य "The National Society for Children and Adults with Autism" इति प्रतिष्ठानस्य कर्तृपक्षैरेवं संज्ञा प्रदत्ता "संवेदनोन्मुखविकासवैकल्यम्"(Autism) इत्यस्य- त्रिंशन्मासपरिमितात्पूर्वमेव शिशोः शरीरे विकसितः कश्चनैषः जैविकोपसर्गः येन च शिशोर्विकाशस्य क्रमे स्नायविकसंगठने वाचनशक्तौ भाषागतविकाशे बौद्धिकविकाशे व्यक्तिवस्तुगतसम्बन्धसम्पृक्ततायाञ्च प्रतिबन्धकताधिक्येन दृश्यते। "संवेदनोन्मुखविकासवैकल्यस्य"(Autism) संज्ञाप्रसङ्गे १९९० क्रिस्ताब्दे The Individual With Disabilities Education Act(U.S.A) वदति- "Autism means a developmental disability significantly affecting verbal and non-verbal communication and social instruction generally, evident before age.3, that adversely affects a child's education performance" इति। संवेदनोन्मुखविकासवैकल्यम्(Autism Spectrum Disorder) इत्यस्यातिसक्रियतानियन्त्रणे योगाभ्यासस्य भूमिकास्त्यपरिमिता।

संवेदनोन्मुखविकासवैकल्यम्(Autism Spectrum Disorder) इत्येका स्नायविकविकासजनितावस्था यत्र सामाजिकसम्बन्धे, आचरणे, आवेगप्रकाशे चाक्षमता दरीदृश्यते। अनेनाक्रान्तावस्थायां शिशावुद्वेगोऽतिसक्रियता मनोयोगाभावादिश्च परिलक्ष्यते। सम्प्रति लब्धगवेषणाफले इदं लक्षितं यत्, अस्योपसर्गस्य न्यूनीकरणेऽस्य योगाभ्यासस्य भूमिकानिन्दनीया। योगाभ्यासस्यासनप्राणायामध्यानादिकं शारीरिकमानसिकस्थितिशीलतायामतीव सहायकम्। आसने चोल्लेखनीयाः एते- ताडासनम्, बालासनम्, पद्मासनम्, भुजङ्गासनम्, वृक्षासनम्, शवासनम् इत्यादयः। कर्टिजल्हरमोन् इत्यस्य मात्रां नियन्त्रणे आनीय मानसिकप्रशान्तिं प्रयच्छति। मनोयोगक्षमतामात्मनियन्त्रणक्षमतां च वर्धयति, प्रतिदिनं योगचर्चा चोद्वेगमतिगतिप्रवणतां(Hyper activity) न केवलं लघूकरोत्यपि तु, तेनैव साकं सामाजिकांशग्रहणेऽपि आत्मविश्वासं वर्धयति। योगव्यायामचर्चा तु न कस्या अपि व्याधेश्चिकित्सायाः विकल्पव्यवस्था, परन्त्वेषा संवेदनोन्मुखविकासवैकल्याक्रान्तव्यक्तेर्मानसिकस्थितिशीलतायां जीवनमानोन्नयने च मुख्यसहायिका।

**शब्दकुञ्जिका-** संवेदनोन्मुखविकासवैकल्यम् (Autism Spectrum Disorder), योगः (Yoga), उद्वेगनिवृत्तिः(Anxiety Reduction), अतिवेगनियन्त्रणम्(Hyperactivity Control), श्वासप्रश्वासनियन्त्रणं ध्यानाभ्यासश्च (Pranayama & Meditation), आचरणविद्योन्नतिः (Behavioural Improvement)।

**भूमिका-** संवेदनोन्मुखविकासवैकल्यम् (Autism Spectrum Disorder) अस्ति तावदेका स्नायविकव्याधिर्यया सामाजिकसम्मेलन-भाषाव्यवहारदक्षता-आवेगप्रकाशभङ्गीत्यादिविषये स्वाभाविकमात्रातः वैषम्यता परिलक्ष्यते शिशोर्मध्ये। अनयाक्रान्तेषु शिशुषु प्रायशो दृश्यते, अत्युद्वेगता, अतिसक्रियता, मनोयोगाभावः इत्येवंरूपेण बहुविधाः जटिलसमस्याः। याश्च तेषां सामाजिकांशग्रहणे शिक्षेच्छायां विघ्नमुत्सृजन्ति। योगव्यायामश्चैकः प्राचीनोऽनुशीलनाध्यायः मनोशारिरीकयोर्येन शरीरं मनः आत्मा च स्थितिशीलतां प्राप्नोति। आधुनिकगवेषणायां बहुत्रेदं परिदृष्टं यत्, संवेदनोन्मुखविकासवैकल्यपीडितस्य शिशोर्मानसिकस्थितावाचरणनियमने च गुरुत्वपूर्णं प्रभावमातनोति।

**मूलीभूतालोचना-**

**संवेदनोन्मुखविकासवैकल्यम् (Autism Spectrum Disorder) इत्यनेनाक्रान्तानां बालकानां शारीरिकमानसिक-समत्वधारणे कतिचनोल्लेखनीयान्यसनानि**

संवेदनोन्मुखविकासवैकल्ये(Autism Spectrum Disorder)अत्यन्तं हितकराण्येतान्यासनान्यालोच्यन्ते अधः-

1. **ताडासनम् (Tadasana – Mountain Pose)**

शरीरस्य समत्वं स्थापयत्येतदसनं, मनस एकाग्रतां च वर्धयति।

2. **बालासनम् (Balasana – Child's Pose)**

आसनमेतत् मनसि शान्तिं नियच्छति, उद्वेगमस्थिरतां च अपहर्तुमुपकरोति। एतत् "आनन्द-सुखसन्निवासं कारयति।

3. **पद्मासनम् (Padmasana – Lotus Pose)**

पद्मासनं ध्याने तथा श्वासनियन्त्रणाभ्यासेऽत्यधिकत्वेन सहायकं भवति। मनसंयोगविवर्धनेऽप्यत्यन्तं हितकरमेतत्।

4. **भुजङ्गासनम् (Bhujangasana – Cobra Pose)**

एतदासनं शरीरस्य नमनीयतामुन्नयत्यभ्यासेन। पुनश्चात्मविश्वासजागरणेऽप्यतीव सहाय्यं करोति।

5. **वृक्षासनम् (Vrikshasana – Tree Pose)**

मनःसम्बन्धसमुन्नयनेऽस्यासनस्य भूमिकातुलनीयास्ति। तथा च शारीरिकं स्थैर्यमुन्नयति।

6. **शवासनम् (Shavasana – Corpse Pose)**

अत्यन्तं शान्तिदायकमेतत्। एतच्छरीरमनसोः शान्तिं विदधाति, तथा च निद्रागतगुणवृद्धिमप्युपजनयति।

7. **प्राणायामः (Pranayama – Breath Regulation)**

प्रणायामो नाम श्वासप्रश्वासयोर्गतिनियन्त्रणाभ्यासः। भावनियन्त्रणे धैर्यवृद्धौ मनः-सम्बन्धे चोपकरोत्येषः।

विधिवदाचरणेनैतेषामासनानां संवेदनवलयवैकल्यप्रभावितानां बालकानां (Autistic children) मानसिकप्रशान्तिलाभे, आत्मनियन्त्रणे समाजसंगोष्ठे चांशग्रहणे सक्षमाः भवन्ति।

"संवेदनोन्मुखविकासवैकल्य" (Autism) क्षेत्रे उद्वेगः (Anxiety), अतिगतिः (Hyperactivity) इत्येतद्द्वयमतीव साधारणं, यच्चानेकेषु संवेदनवलयवैकल्यप्रभावितेषु बालकेषु (Autistic children) दरीदृश्यते।

**उद्वेगः (Anxiety)**

प्रायेण संवेदनवलयवैकल्यप्रभाविताः बालकाः (Autistic children) नूतने वातावरणे च शब्दालोकयोरुपस्थितौ च जनाकीर्णे स्थले च स्वस्थं नानुभवन्ति। एतास्ववस्थास्वतीव भीतिग्रस्थाः भवन्ति, दुश्चिन्तां कुर्वन्तस्तिष्ठन्ति। तथा चोपसर्गाः-

१. सहसाधिकशब्देन भिया सह स्थगनम्,

२. अन्यत्रापरिचितस्थलेऽनाग्रहो गमने,

३. येन केनचित् वार्तालापेऽस्वस्त्यवस्था।

**अतिगतिः (Hyperactivity)**

अतिगतिस्तथा Hyperactivity एतादृश्यवस्था यत्र शिशुरतीवस्थिरत्वेन चाञ्चल्येन मनोयोगशून्यत्वेन च वर्तते सदा। तद्यथैते परिलक्ष्यते तस्मिन् शिशौ-

१. सर्वदास्थिरत्वेन विक्षेपं कम्पनं चापल्यञ्च,

२. एकत्रोपवेशनेऽक्षमत्वम्,

३. वाचालत्वमथवातिकथनमथवा चित्कारादिकरणम्,

४. कर्मारम्भेऽपि समापनेऽनाग्रहत्वम्।

**केचन मुख्यविन्दवः**

**१.उद्वेगनिवृत्तौ (Anxiety Reduction) योगाभ्यासस्य भूमिका**

प्रायः संवेदनोन्मुखविकासवैकल्येष्वतिरिक्तनाडीजागरणम् (अतिस्नायविकोत्तेजना) परिदृश्यते। योगाभ्यासाधारितकार्यक्रमेण प्राणायामविशेषेण श्वासप्रश्वासनियन्त्रणाभ्यासेन नाडीसूत्रं (Nervous System) शमत्वं याति, पुनश्च Cortisol नामकस्य Hormones इत्यस्य स्रवणं न्यूनं भवति येन मनःशान्तिर्विराजते। भ्रामरी-प्राणायामः नाडीशोधनमित्यादिप्रक्रियायाम् अत्युपयोगश्चास्ति। उद्वेगापचयेऽत्यन्तमातनोति च सुफलताम्।

**२.अतिगतिनियन्त्रणे (Hyperactivity Control)आचरणविद्योन्नतौ (Behavioural Improvement) चावदानं योगस्य**

Koehing इत्यादीनां २०१२ तमे वर्षे कृतशोधकार्यादिदं प्रकाशमायातं यत्, नियमिताभ्यासेन योगस्य संवेदनवलयवैकल्यप्रभाविताः बालकाः अति-सक्रियतातस्तथा व्यवहारिकास्थिरतातः शनैर्मुक्तिदिशि गच्छन्ति। आसानप्रयोगस्तथा श्वासप्रश्वासनियमनाभ्यासो वर्धयत्येकाग्रतां, येन तेऽप्याक्रान्ताः बालकाः स्वगतिचेष्टायां प्रतिक्रियानियमने चतीव समर्थाः भवन्ति।

**३.आत्मचेतनायास्तथावेगनियन्त्रणेऽभ्यासस्य योगस्य सहायता**

योगाभ्यासः शरीरसञ्चालनं प्रति शरीरानुभूतिं प्रति च स्वचेतनां (Self-awareness) विकाशयति। येन संवेदनवलयवैकल्यप्रभावितेषु बालकेषु देह-जागरूकता (Body-awareness) उद्भूता भवति। येनात्मनियन्त्रणमावेगनियन्त्रणं च क्रमशो वर्धते। ध्यानमथवा मनसैकाग्रत्वचर्या (Mindfulness) तेषामावेगीयप्रतिक्रियां स्थिरीकरोति।

**४. एकाग्रतायां (Concentration) आत्मनियन्त्रणे (Self-regulation) च मुख्यसहायकः**

योगाभ्यासस्तथा ध्यानचर्चा न केवलमेकाग्रतां वर्धयत्यपि त्वात्मनियन्त्रणक्षमतामपि वर्धयति। राधाकृष्णेन (२०१०) कृतशोधे इदं प्रतिपादितम्—योगाभ्यासे अंशग्राहिनां बालकानां सामाजिकप्रतिक्रियानुकरणशक्तिस्तथैकाग्रत्वमभूतपूर्वतया विकसितम्।

**५. सामाजिकसहभागितायामत्मविश्वासवृद्धिस्थले च मूलभूतोऽयं योगः**

गोष्ठ्याधारितयोगचर्चया सामाजिकसम्पर्कस्यावसरः उद्घाटितो भवति, येन यथात्मविश्वासस्य वृद्धिर्भवति तथैव, पारस्परिकसंबन्धमपि सुदृढं भवति। एवंञ्चायमभ्यासो बालकेषु सामाजिककृष्टिम् आचरणभावनां, तथा च दलीयकार्यक्षमतञ्च वर्धयति।

**उपसंहारः**

Autism Spectrum Disorder (ADS) तथा संवेदनोन्मुखविकासवैकल्यक्षेत्रे योगव्यायामाभ्यास एका निर्हानिकरा प्रकृतिगतकार्यकरा परिपूरिका च निरामयपद्धतिः। एषश्चोपायोतिसक्रियताया उपशमने आचरणगतास्थिरतायाश्च नियमने साहाय्यं करोति। मनोयोगवृद्धिं करोति, आत्मनियन्त्रणकौशलं च ज्ञापयति, मानसिकीं प्रशान्तिं चानयति। प्रत्यहं योगव्यायामस्याभ्यासः संवेदनोन्मुखविकासवैकल्यानां सार्वभौमत्वेन मानसिकविकाशे सामाजिकविकाशे च सर्वत्रापि सदर्थकं प्रभावं विस्तारयति। योगव्यायामावात्ममनःशरीरानां समन्वयं साधयित्वा व्यक्तेर्मनोस्थितिरात्मविश्वासः सामाजिकसंयोगश्चेत्यादीन्नग्रगामिणः कुरुतः इति शिवम्।

**सहायकग्रन्थसूची**


1. American Psychological Association. Yoga as a Complementary Therapy for Children with Autism. Washington D.C., American Psychological Association, 2022.
2. Field, Tiffany. "Yoga and Children on the Autism Spectrum." Journal of Developmental & Behavioral Pediatrics, 2021.
3. Guha, Arpita. অটিজম: পরিচয়, কারণ ও করণীয়. ঢাকা, মুক্তধারা, 2020.
4. Radhakrishnan, Meera. "The Role of Yoga in Reducing Anxiety in Children with Autism

Spectrum Disorder." Indian Journal of Child Health, vol. 8, no. 3, 2022.

5. Sarkar, Rituparna. Holistic Approaches to Autism: Yoga and Mindfulness. Kolkata, Orient BlackSwan, 2023.
6. Sharma, Neela. যোগব্যায়াম ও মানসিক স্বাস্থ্য. কলকাতা, আনন্দ পাবলিশার্স, 2021.
7. UNICEF. Supporting Children with Autism Through Inclusive Practices. New York, UNICEF, 2023.
8. World Health Organization. Autism Spectrum Disorders: Key Facts. Geneva, World Health Organization, 2023.

**अन्तर्जालसूची**

1. www.googlesbooks.com
2. www.shodhganga.com
3. www.archieve.com
4. www.bori.ac.in
5. www.sanskritlinks.blogspot.in

# भारतीयसामाजिक-इतिहास-चित्रणे बौद्धजातकस्य अवदानम्

समर खांडा, शोधार्थी, संस्कृत-विभागः
यादवपुरः विश्वविद्यालयः
इ-मेल – samarkhnr@gmail.com

**सारसंक्षेपः**- प्राचीनसंस्कृतिसम्पन्नं भारतवर्षं नानाजातीनां संसकृतिनाञ्च आश्रयः आसीत्। षष्ठशताब्द्यां ई. पूर्वे भारतवर्षे बौद्धिकाध्यात्मिकान्दोलनस्य चरमोत्कर्षरूपेण बौद्धधर्मस्य अभ्युदयोऽभवत्। एष धर्मः बुद्धस्य जीवनकाले स्वसंघव्यवस्थया परवर्तिकाले अशोकादीनृपाणां प्रभावेन च भारतस्य बहिरपि प्रसारमभवत्, यद्यपि अधुना भारतेऽयं लुप्तप्रायः। नास्तिकतायां दुष्टत्वात् एव बुद्धस्य सिद्धान्तः भारते स्थायी आसनं न लब्धवान्, इदानीं सा भावना निवृत्ता। वस्तुतः सनातनधर्मे प्रचलित वैदिकव्यवस्थायाः संस्कारसाधनकल्पे स एव महापुरुषः अस्मिन् पुण्यभूमौ आविर्भूतोऽभवत्। तस्मादेव सः खलु महापुरुषः काले अवतारवरिष्ठ इति आख्याम् अलभत्।

न केवलं भारतवर्षे अपि तु समग्र विश्वस्य प्रायशः सर्वत्र सर्वेषु जनजातिषु एव कथाच्छलेन सदुपदेशदानपरम्परा स्मरणातीतकालादेव आवहति। कथासाहित्यमाध्यमेन केनापि गूढतत्वं उपदेशं वा सहजतया उपस्थाप्यते। यत् कथा आख्यायिका, Myth, fables, legend इत्यादिषु नाम्नाऽपि परिचित आसन्। एतस्माद् एव कारणात् सहज-गल्पसाहित्यमेव बौद्धानां उपदेशप्रदानस्य मुख्यं साधनं जातम्।

अस्यैव कथासाहित्यस्य अन्यतमं साहित्यरूपमस्ति बौद्धजातकमिति। बौद्धसाहित्ये जातकोऽयं पारिभाषिकः शब्दः। तत्र जातकशब्दस्य आक्षरिक अर्थः'यः जातः' एव। परन्तु बौद्धसाहित्ये 'गौतमबुद्धस्य पूर्वजन्मवृत्तान्तः' इति पारिभाषिक अर्थे शब्दोऽयं गृह्यते। बुद्धत्वः प्राप्तेः प्रागेव बोधिसत्वरूपेण भगवान् बुद्ध अस्मिन् जगति अवतीर्णं भूत्वा यदेव जनहितकरकार्यं करोति तदेव जातके वर्णितमस्ति। सम्पूर्णजातके अंशत्रयमस्ति तद्यथा- प्रथमतः पच्-चुप्-पन्न वत्थु (वर्तमान कथा), द्वितीयतः अतीत वत्थु (अतीत कथा), तृतीयतः समवधान् (अतीत-वर्तमानयोः सम्बन्धः निर्णयः)। केषाञ्चन बौद्धजातकानां साहाय्येन बौद्धभारतस्य सामाजिक-इतिहासस्य रेखाचित्रं अस्मिन् प्रबन्धे प्रस्तूयते।

**सूचक-शब्दः** बौद्धजातकम्, कथासाहित्य, आख्यानसाहित्य, भारतीयसमाजव्यवस्था, बौद्ध-मैत्रीभावना।

**उपोद्घातः** प्राचीनसंस्कृतिसम्पन्नं भारतवर्षं नानाजातीनां संसकृतिनाञ्च आश्रयः आसीत्। षष्ठशताब्द्यां ई. पूर्वे भारतवर्षे बौद्धिकाध्यात्मिकान्दोलनस्य चरमोत्कर्षरूपेण बौद्धधर्मस्य अभ्युदयोऽभवत्। एष धर्मः बुद्धस्य जीवनकाले स्वसंघव्यवस्थया परवर्तिकाले अशोकादीनृपाणां प्रभावेन च भारतस्य बहिरपि प्रसारमभवत्, यद्यपि अधुना भारतेऽयं लुप्तप्रायः। नास्तिकतायां दुष्टत्वात् एव बुद्धस्य सिद्धान्तः भारते स्थायी आसनं न लब्धवान्, इदानीं सा भावना निवृत्ता। वस्तुतः सनातनधर्मे प्रचलित वैदिकव्यवस्थायाः संस्कारसाधनकल्पे स एव महापुरुषः अस्मिन् पुण्यभूमौ आविर्भूतोऽभवत्। तस्मादेव सः खलु महापुरुषः काले अवतारवरिष्ठ इति आख्याम् अलभत्।

न केवलं भारतवर्षे अपि तु समग्र विश्वस्य प्रायशः सर्वत्र सर्वेषु जनजातिषु एव कथाच्छलेन सदुपदेशदानपरम्परा स्मरणातीतकालादेव आवहति। कथासाहित्यमाध्यमेन केनापि गूढतत्वं उपदेशं वा सहजतया उपस्थाप्यते। यत् कथा आख्यायिका, Myth, fables, legend इत्यादिषु नाम्नाऽपि परिचित आसन्। एतस्माद् एव कारणात् सहज-गल्पसाहित्यमेव बौद्धानां उपदेशप्रदानस्य मुख्यं साधनं जातम्।

अस्यैव कथासाहित्यस्य अन्यतमं साहित्यरूपमस्ति बौद्धजातकमिति। बौद्धसाहित्ये जातकोऽयं पारिभाषिकः शब्दः। तत्र जातकशब्दस्य आक्षरिक अर्थः'यः जातः' एव। परन्तु बौद्धसाहित्ये 'गौतमबुद्धस्य पूर्वजन्मवृत्तान्तः' इति पारिभाषिक अर्थे शब्दोऽयं गृह्यते। बुद्धत्वः प्राप्तेः प्रागेव बोधिसत्वरूपेण भगवान् बुद्ध अस्मिन् जगति अवतीर्णं भूत्वा यदेव जनहितकरकार्यं करोति तदेव जातके वर्णितमस्ति। सम्पूर्णजातके अंशत्रयमस्ति तद्यथा- प्रथमतः पच्-चुप्-पन्न वत्थु (वर्तमान कथा), द्वितीयतः अतीत वत्थु (अतीत कथा), तृतीयतः समवधान् (अतीत-वर्तमानयोः सम्बन्धः निर्णयः)। केषाञ्चन बौद्धजातकानां साहाय्येन बौद्धभारतस्य सामाजिक-इतिहासस्य रेखाचित्रं अस्मिन् प्रबन्धे प्रस्तूयते।

यदा बुद्ध एव एताः कथाः कथयति तदा तस्य पूर्वमपि एताः कथाः प्रचलिताः आसन् इति स्मर्तव्यम्। अतः एते भारतस्य अतीव प्राचीनाः सम्पत्तिः इत्यत्र न संशयः। जातकस्य मुख्यम् उद्देश्यं बौद्धधर्मस्य अहिंसा-त्यागः-तितिक्षा-शीलादि च इति सिद्धान्तानां

व्याख्यानं प्रसारञ्च। तथापि बौद्धभारतस्य समाजस्य सभ्यतायाः संस्कृतेः च आलेख्य-अङ्कने बौद्धजातकानाम् अवदानम् अनस्वीकार्यम्।

**विषयप्रदर्शनम्** अधिकांशजातकाः- 'अतीते वाराणसीयं ब्रह्मदत्तं रज्जं कारेसि' इति वाक्येन आरभ्यन्ते। ब्रह्मदत्तः काल्पनिकः ऐतिहासिकः वा इति विषयस्य आलोचना अस्मिन् क्षुद्रपरिसरे न सम्भवति। परन्तु ऐतिहासिकराजन्यवर्गानां नामानि अपि दुर्लभानि न सन्ति- पसेण्डि (प्रसेनजित्), उदेन (उदयन), इत्यादीनि ऐतिहासिकनामानि। अतः ज्ञायते प्राचीनकाले एतद्देशे राजानुशासनम् आसीत्। परन्तु तत् वंशानुक्रम आसीत् इति निश्चितरूपेण न वक्तुं शक्नोमि। यतः *उलुक*जातके उक्तमस्ति-अतीते प्रथमकल्पे जनाः एकमभिरूपं सौभाग्यप्राप्तं सर्वाकारपरिपूर्णं सुपुरुषं राजानमकुर्वन्।[1] तथापि कालान्तरे राजशासनं वंशानुगतम् आसीत् इत्यत्र न संशयः। तत्सत्वेऽपि राज्ञः अभिषेकसमये प्रजानाम् अमात्यानाञ्च मतं स्वीकृतम्। *पादञ्जलि* इति जातके विदुषां मन्त्रिणां विचारे वाराणसिराजस्य ब्रह्मदत्तस्य जडमतिः पुत्रः पादाञ्जलि राजपदस्य अयोग्यं विवेचिते सति राज्ञः धर्मार्थानुशासक-अमात्यः बोधिसत्वः राजपदं लब्धवान्-

> अद्धा पादञ्जली सव्वे पञ्जाय अतिरोचति,
> तथाहि ओट्ठं भञ्जति उत्तरिं नून पस्सति ॥
> नायं धम्मं अधम्मं वा अत्थानत्थं व वुज्झति,
> अञ्जमत्र ओट्ठनिब्भोग नायं जानाति किञ्चन॥[2]

जातकस्य वर्तमानकथायां बुद्धस्य प्रादुर्भावकालस्य विषये बहुसूचना अस्ति। तस्मिन्काले वाराणसि कौसाम्बी साकेत श्रावस्ती राजगृह चम्पा च आर्यावर्तस्य षट् प्रसिद्धानि नगराणि आसन्। यद्यपि राजकरविषये जातके सुनिर्दिष्टं तथ्यं नास्ति, तथापि *कुरुधर्मः* जातके कर्षकाः नगदर्थं न दत्वा राजकररूपेण उत्पादितस्य शस्यस्य सुनिर्दिष्टं भागं राजानं ददाति इति विषयस्य उल्लेखम् अस्ति।[3] यथा वर्तमाने नगररक्षी चौकिदारी प्रथा वा दृश्यते तथैव तस्मिन् समये दस्यु-तस्करेभ्यः पल्लीवासिनां रक्षणार्थं ग्रामभोजकमिति राजकर्मचारी आसीत्। अयं सेवकः पल्लीजनेषु सुशृङ्खला विदधाति। परन्तु स्थानविशेषे अयं सेवकः अत्याचारी आसन् राजा तं विसृजति। *खरम्बरः* जातके एतादृशस्य दुष्टराजसेवकस्य वर्णनमस्ति, यः डाकुभिः सह मिलित्वा नगरं लुण्ठति, तस्य दुष्कर्मस्य दण्डरुपेन राजा तं अपसृजत्-

> यतो विलुम्ता च हता च गावो
> दड्ढानि गेहानि जनो च नीतो,
> अथागमा पुत्तहताय पुत्तो
> खरस्सरं देण्डिमं वादयन्तो॥[4]

जातकाध्ययनेन ज्ञातुं शक्यते यत्, अन्येषु सर्वेषु देशेषु इव प्राचीनभारते दासत्वप्रथा प्रचलितमस्ति। क्रीतदासं गर्भदासं च विहाय अन्ये द्वे दासवर्गौ स्तः। केचन अन्न-वस्त्रं संग्रहार्थं केचन वा दस्युभयभीताः सन् आत्मरक्षार्थं दासत्वं स्वीकुर्वन्ति। *विदुरपण्डित, कुलायक, विश्वम्भर* आदि जातके दासत्वविषयकम् आलोचनमस्ति।[5]

न केवलं राष्ट्रनीती विषये अपि च धर्मनीति, अर्थनीति, शिक्षा, उद्योगः इत्यादयः विषये च भारतवर्षं प्रभूतं समृद्धम् आसीत्, एतद्विषयस्य परिचायकमस्ति बौद्धजातकमिति। *भीमसेन, गुण, मदीयक*-जातके उत्कृष्टवस्त्रस्य उल्लेखमस्ति। *गुण*जातके दृश्यते, कोशलराजः स्त्रियः यत् शाटीका दत्तवान् तत् एतावन्तः उत्तमाःआसन् यत् प्रत्येकस्य वस्त्रखण्डस्य मूल्यं मुद्रा-सहस्रम् असीत्। एवञ्च *काषाय*जातके गजदन्तशिल्पस्य, *सूची*जातके लौहशिल्पस्य, *कुश*जातके स्वर्णनिर्मत-द्रव्यस्य परिचयः विधृतमस्ति-

> सुवण्णचीरवसने जातरूपसुमेखले
> सुस्सोणि तव कामाहि नाहं रज्जेन-म-त्थिको॥[6]

जातकाख्यानेषु तक्षशिला विद्यायतनस्य विशिष्टता वर्णिता अस्ति। *पञ्चायुध, असातमन्त्र* आदि बौद्धजातके उक्तम्-एकदा तक्षशिला निखिलभारतस्य प्रसिद्धं शिक्षाकेन्द्रम् आसीत्। तत्र विविधा ललितकलाविज्ञानविषयानि च शिक्षयन्ते। *महासुतसोम्*-जातके उक्तं तक्षशिलायां राजपुत्राः शस्त्रशास्त्रस्य अध्ययनं कृतवन्तः। अस्मिन् शिक्षाव्यवस्थायाः मानम् अतीव उत्तमः स्यात्।

---

[1] Roy, Sharat kumar. *Bauddhabhārat*(a). p. 103 (8th chapter).
[2] Kausalyayan, Anand. *Jātaka* (Vol. II). p. 473.
[3] Roy, Sharat kumar. *Bauddhabhārat*(a). p. 106 (8th chapter).
[4] Kausalyayan, Anand. *Jātaka* (Vol. I). p. 461.
[5] Roy, Sharat kumar. *Op.cit.* p. 111.
[6] Kausalyayan. Anand. *Op.cit.* p.375.

जातक इति भगवान् बुद्धस्य पूर्वजन्मे बोधिसत्वनायकानां कथाः। बोधिसत्वत्वेन परहिताय सेवायैः वा आत्मत्याग एव बोधिसत्वस्य आदर्शः, न तु वर्तमानजन्मनि स्वस्य बोधिः निर्वाणः वा। यथा *शश*जातके अतिथि ब्राह्मणस्य सेवार्थं शशस्य आत्मत्यागः। अथवा *न्यग्रोध-मृग*जातके गर्भिणी मृगस्य प्राणरक्षार्थं न्यग्रोध-मृगराजस्य आत्मवलिदानः। स्वजीवन दानेन यदि महतः कस्यापि प्राणरक्षा भवति तर्हि जीवनधारणात् सन्निमित्ते तस्मिन् स्वजीवनत्याग एव वरम्-इति आदर्शः बोधिसत्वचरित्रे अधिकं गुरुत्वं प्राप्नोति, यत् बौद्ध-दशपारमितायां दानमिति कथ्यते। परहिताय आत्मोत्सर्गस्य दृष्टान्तः हिन्दु शास्त्रेऽपि दृश्यते, यथा *पञ्चतन्त्रे* क्षुधापीडितस्य शकुनेः आत्मतृप्त्यर्थं कपोतस्य स्वदेह-दानः वृत्तान्तः *महाभारतस्य* शिविराजस्य वृत्तान्तः वा इति। एतेन वोध्यते यत् साहित्ये प्रतिफलितम् एवं आदर्शः जनान् सद्धर्माचरणे प्रणोदितः स्यात् अथवा केचन विवेकिनः जनानां महत्-आदर्शः साहित्यं प्राणितं स्यात्।

बौद्धभारते स्त्रियाःस्थितिः किम् आसीत् इति विचारः बौद्ध-जातकसाहित्यमाश्रित्य आलोच्यते। पुराभारते कन्यायाः जन्म-शुभं न मन्यते, इति तथ्यं बौद्ध-जातकसाहित्येऽपि दृशते। *कट्ठाहारि*जातके वाराणसिराजः ब्रह्मदत्तः गन्धर्वमतानुसारम् एकां काष्ठहारिणीं विवाहम् अकुर्वन्, यदा सः नृपः नगरे प्रत्यभिगच्छति तदा तां स्वनामाङ्कितं अङ्गुलीयकं दत्वा अवदत्- "যদি কন্যা প্রসব কর, তবে এটা বিক্রি করে সন্তানটীর ভরণপোষণ করবে; আর যদি পুত্র প্রসব কর, তবে তাকে অঙ্গুরীসহ আমার কাছে নিয়ে আসবে"[1]। इति वाक्यांशात् एतत् स्पष्टतया वोध्यते मानवाः कन्यासन्तानस्य जन्मम् अनिष्टम् अभाग्यं च मन्यन्ते। तथापि यदि कन्या जाता तर्हि सा अवहेलिता न भवति। *अवदानशतके* अनाथपिण्डदगृहे एका कन्या जाते सति परिवारस्य सर्वेषां जनानां अपि च सर्वेषां श्रावस्तीवासिनाम् आनन्दम् अभवत्। यतो हि एषा कन्या सर्वेषां प्रिया आसीत्, तस्मात् सा सुप्रिया इति नाम्ना परिचित आसन्।

पतिनिष्ठा पतिव्रतारक्षणं च भारतीयस्त्रीणां चित्तादर्श आसीत्। बौद्धसाहित्ये अपि एवं पतिपरायणाः स्त्रीणां दृष्टान्ताः सन्ति। तथापि दुर्भाग्यस्य विषयं यत् स्त्रीत्वेन तासां चरित्रे शङ्का जाता। *सम्बुला* इति जातके वाराणसिराजस्य ब्रह्मदत्तस्य पुत्रः स्वस्तिसेनः उपराजा आसीत्। तस्य प्रधाना महीषि सम्बुला रुपवती, जितेन्द्रिया, पतिव्रता आसीत्। सा कुष्ठग्रस्तः भर्ता सह किञ्चित्कालं वनं स्थित्वा राजपुत्रसेवायां निरता आसीत्। एकदा भर्तुः कृते फलसंग्रहकाले सा राक्षसेन आक्रमित अभवत्। परन्तु सा तस्याः शीलतेज-प्रभावेन राक्षसात् परित्राणं प्राप्नोति। विलम्बहेतु सम्बुलायाः चरित्रविषये राजपुत्रस्य शङ्काः उत्पन्नाः-

अतिसायं वन्तागच्छि राजपुत्ति यसस्सिनि,
केननुज्ज समागच्छि, को ते पियतरो मया।।[2]

अपि च *देवतावतारवदाने* राज्ञः बहुपत्नी आसीत्। परन्तु तासां परपुरुषसंसर्गापवादं राज्ञः कर्णगोचरं भवति। तदा नृपः सतीपत्नीं प्राप्त्यर्थं पुनर्विवाहं कृतवान्। परन्तु राज्ञः संशयात्मकं चित्तं नवोढाम् अपि आशङ्क्यते। एतद्विषये भ्रातरं सूचयित्वा राज्ञः शङ्कायाः निरसनस्य स्थाने सतीपत्न्याः अस्तित्वं प्राय असम्भवम् एवमुक्त्वा राज्ञः संशयं घनीभूतं कृतवान्-

क्लीवः कामी सुखी विद्वान् धनी नम्रः प्रभुः क्षमी।
अर्थी मान्यः खलः स्निग्धः स्त्री सतीति कथैव का।।[3] (देवतावतारवदानम् 71)

बौद्धसाहित्ये स्त्रियाः अपमानस्य प्रयास अस्ति इति भासते। परन्तु बौद्धसाहित्यस्य विविधेषु ग्रन्थेषु अपि स्त्रीणां माहात्म्यं गौरवञ्च वर्णितमस्ति। प्राचीनभारते स्त्रियाः श्रेष्ठसम्पदरूपेण स्वीकृता- 'इत्थी भत्तानम् उत्तमं' (संयुक्तनिकाय, प्र. खण्ड, पृ. 43)। *ललितविस्तर* इति भगवतः बुद्धस्य प्रथमं जीवनचरितमिति प्रसिद्धम्। अनुमीयते यत् ख्रिस्टिये प्रथमशतके एव तत् अरचयत्। एतादृशे प्राचीनग्रन्थे तु भगवतः बुद्धस्य पूर्वाश्रमस्य पत्न्याः यशोधरायाः चरित्रम् अतीव वलिष्ठम् आसीत् इति ज्ञायते। पुनश्च *श्यामाजातके* वज्रसेनं प्रति श्यामायाः ऐकान्तिकः प्रेम आत्मनिवेदनश्चापि लक्षणीयः। दर्शनमात्रे ईदृशं प्रणयसञ्चारः नैव चटुलता नापि रूपतृष्णासञ्जातः अनुरागः, परन्तु तत् प्रेमः जन्मजन्मान्तरस्य वासनासञ्जात एव, अस्यैव परिचायकमस्ति श्यामाजातकमिति-

पूर्व वासनिवासे प्रत्युत्पन्ने हितेन वा।
एव सञ्जायते प्रेम्नं उत्पलं वा यथोदके।।[4]

बौद्धधर्मः विश्वमैत्रीधर्मः इति कथ्यते। मैत्री तु जीवानां प्रति प्रेमः स्नेहः वा। भगवान् बुद्ध उवाच-

माता यथा नियं पुत्तं आयुसा एक पुत्तमनुरक्खे,
एवम्पि सव्वभूतेसु मानसं भावये अपरिमाणं।

---

[1] Chatterjee, Bani. *Women in palli literature*. p. 2.
[2] Kausalyayan, Anand. *Jātaka* (Vol. V). p. 174.
[3] Ghosh, Kakali. *Bhāratīya sāmājika itihāsa citrane bauddha-bauddhika avadāna: ekaṭi parikramā*. p. 10.
[4] *Mahāvastu-Avadāna*. Ed. Radhagovinda Basak. p. 237.

अर्थात् यथा माता पुत्रं प्रति स्नेहयति तथैव सर्वभूतानां प्रति स्नेहभावः मैत्री। उपनिषदि सर्वभूते आत्मदर्शनस्य आदर्शः बौद्धमैत्री अवधारणायां सहजतरं रूपं प्राप्नोति। एवं मैत्रीभावना *नन्दकमृगजातके* दृश्यते-तत्र नन्दिकनामकः मृगः पितरौ प्राणरक्षार्थं स्वयमेव बन्धनं स्वीकुरुत। सः मृगः स्वस्य अग्रतः भागं राज्ञः समीपं कृत्वा स्थिरचित्ते स्थितवान् आसीत्। बोधिसत्वस्य मैत्रीवृत्तेः प्रभावेन राजा शरनिक्षेपे असमर्थ अभवत्।

नैतिकता नाम सुसंहतस्वभावा। समाजजीवने किमुत राष्ट्रजीवने सर्वत्र नैतिकता एव प्रधाना। सतता नैतिकगुणेषु अन्यतमा। 'सतां सङ्गो हि भेषजम्' इति प्रवचनं श्रूयते। जातकसाहित्ये अपि सत्-कर्मस्य विधानमस्ति। राज्ञः सुतसोमस्य सत्यैकनिष्ठा नरखादकस्य नृपस्य आसुरीवृत्तिपरिहाराय कथं साहाय्यं करोतीति तदेव वृत्तान्तं *महासुतसोम्* जातके वर्णितमस्ति-

न सा सभा यत्थ न सन्ति सन्तो
न ते सन्तो ये न भयन्ति धम्मं
रागं च दोसं च पहाय मोहं
धम्मं भणन्ता च भवन्ति सन्तो॥[1]

**उपसंहारः** एवञ्च यदि वयं जातकं पठामः तर्हि बौद्धाः कीदृशेन उत्साहेन अन्धविस्वासानां विरोधं कृतवन्तः तत् द्रष्टुं शक्नुमः। अस्योदाहरणरूपेण *मङ्गल*जातकस्य *नक्खत्त*जातकस्य च कथा उल्लेखनीयाः। एवंरूपेण केषाञ्चन जातकमाश्रित्य बौद्धभारतीय-सामाजिक-इतिहासस्य आलोचनम् अस्मिन् प्रबन्धे प्रस्तूयते।

**विमर्श-ग्रन्थपञ्जीः**

Bandyopadhyay, Anukul Chandra. *Buddha o Bauddhabhārat(a).* Kolkata: Damodar Press, 1966. PDF.

Chakrabarty, Janhvi kumar. *Prācīn bhāratīya sāhitya o vāṅālīr(a) uttarādhikār(a)*. Publisher. Gopaldas Majumder. Kolkata: D M Library, 1367 BS.

Chatterjee, Bani. *Women in Pali Literature*. Publisher. Sandip Nayak. Calcutta (now Kolkata): Grantha Tirtha, 1990. Print.

*Jātakasaṅgaha* (Pālī Text in Devaṇagari with Introduction, Glossary & Notes). N V Tungar. Poona (now Pune): The Oriental Book Agency, 1942 (2nd ed.).

Kausalyayan. Anand. *Jātaka* (Vol. 5). Prayagraj: Hindi Sahitya Sammelan, 1954. PDF.

*Mahāvastu-Avadāna* (Vol. II). Ed. Radhagovinda Basak. Calcutta (now Kolkata): Sanskrit College, 1968. (Calcutta Sanskrit College Research Series No. LXIII).

Roy, Sharat kumar. *Bauddha-Bhārat(a)*. Kolkata: Karuna Prakashani, 1338 BS. PDF.

[1] Kausalyayan. Anand. *Op.cit.* p. 488.

# गुणत्वजातिसिद्धिविचारः

Jiban Gorai, Research Scholar,
Department of Sanskrit & Philosophy,
Ramakrishna Mission Vivekananda Educational
and Research Institute,
Belur Math, Howrah – 711202
Phone: +91 8327009218
Email: jiban.gorai.vedvid@gmail.com

**सारसंक्षेपः -** "अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः"[1] इति कारिकया प्राप्यते गुणलक्षणत्रयम्। लक्षणत्रयमेतत् अन्ततोगत्वा गुणत्वजातिघटितमेव भवतीत्यतः गुणत्वजातौ किं मानमिति पृच्छायां गुणत्वजातिसिद्धिः निरूपिता। तत्र गुणत्वजातिसिद्ध्यर्थं मुक्तावल्यां "द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात्"[2] इत्येवं प्रदत्तेनानुमानेन गुणत्वजातिसिद्धिः सम्पादिता। किन्तु कारणतावच्छेदकतया गुणत्वजातिसिद्धिः न सम्भवतीति दिनकरीग्रन्थे प्रतिपादितम्। अतः गुणत्वजातिसिद्ध्यर्थं प्रकारान्तरस्यान्वेषणं विहितमस्ति। अन्वेषणकाले दीधितिकृतां मतमपि विहितम्, प्रकारान्ते उद्भावितानां दोषाणामपि समाधानम् कृतम्। अन्तिमे च मुक्तावलीकारोक्तानुमानेनैव गुणत्वजातिः सिद्ध्यतीत्यपि निरूपितं शोधप्रबन्धेऽस्मिन्।

**कुञ्चिकाशब्दः** - अनुमानप्रमाणम्, गुणत्वजातिः, कारणता, अवच्छेदकधर्मः, दोषः, जातिबाधकः, सिद्धिः।

**गुणत्वजातिसिद्धिविचारः-** वस्तुतस्तु गुणस्य प्रागुक्तं लक्षणत्रयं गुणत्वजातिघटितमेव भवति। अतः गुणत्वजातिमत्त्वं गुणसामान्यलक्षणं बोध्यम्। किन्तु गुणत्वं यदि जातिः न स्यात् तर्हि गुणत्वजातिघटितं लक्षणं कर्तुमेव न शक्यते इत्यतः आदौ इयमेव शङ्का उत्थाप्यते – "गुणत्वजातौ किं मानमिति"[3] तदा उच्यते इदम् अनुमानमेव मानम्। तदेवाह - "द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात्" इति। एवमनुमानस्याकारो भवति - द्रव्यकर्मभिन्ने सामान्यवति कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, घटत्वावच्छिन्नकार्यतानिरूपितदण्डत्वावच्छिन्नदण्डनिष्ठकारणतावत् इति। गुणत्वजातिसिद्धेः प्राक् गुणनिष्ठकारणतात्वेन पक्षत्वस्य असम्भवात् 'द्रव्यकर्मभिन्ने सामान्यवति कारणता' इत्येवं पक्षनिर्देशः। द्रव्यकर्मभिन्नत्वम् इत्यस्य द्रव्यसामान्यभेदकर्मसामान्यभेदोभयविशिष्ट इत्यर्थः प्राप्यते। एवं तादृशभेदद्वयविशिष्टसामान्यवन्निष्ठकारणता भवति पक्षः। किञ्चिद्धर्मावच्छिन्नत्वं साध्यम्, कारणतात्वमिति हेतुः, दृष्टान्तस्तु घटत्वावच्छिन्नकार्यतानिरूपित-दण्डत्वावच्छिन्नदण्डनिष्ठकारणता अथवा दण्डनिष्ठघटकारणता। दण्डनिष्ठघटकारणता इत्यस्य दण्डनिष्ठघटनिरूपितकारणता इत्यर्थः। या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना एव भवति निरवच्छिन्नकारणतायाः असम्भवात्। यथा दण्डनिष्ठकारणता दण्डत्वधर्मावच्छिन्ना। यो धर्मो यस्या अवच्छेदकः सा तद्धर्मावच्छिन्ना भवति इति नियमः। तथैव द्रव्यकर्मभिन्नं सामान्यवत् रूपादिकम्, तन्निष्ठा कारणताऽपि किञ्चिद्धर्मावच्छिन्ना भवति। स च धर्मः गुणत्वमिति। एवं रूपादिनिष्ठकारणतावच्छेदकतया गुणत्वसिद्धिः, तच्च लाघवात् जातिबाधकाभावाच्च जातिरिति रीत्या गुणत्वजातिसिद्धिर्भवति।

सम्प्रति शङ्का भवति यत् – रूपादिगुणनिष्ठकारणतायाः अवच्छेदकधर्मः रूपत्वं सत्ता वा भवतु। गुणत्वमेव अवच्छेदकधर्मः इत्यत्र किं नियामकमिति। तदोच्यते रूपादिगुणनिष्ठकारणता चतुर्विंशतिगुणेषु विद्यते, किन्तु रूपत्वस्य रूपमात्रवृत्तित्वम्। एवं कारणतापेक्षया रूपत्वस्य न्यूनवृत्तित्वात् रूपत्वं न कारणतावच्छेदकम्। अस्तु तर्हि सत्ता गुणनिष्ठकारणतायाः अवच्छेदकधर्मो भवतु,

[1] कारिकावली, कारिका-८६
[2] न्यायसिद्धान्तमुक्तावली, पृ. ४३५, आत्मारामशर्मा(सम्पा.)
[3] तत्रैव।

यतः सत्तायाः चतुर्विंशतिगुणेषु सत्त्वात् पूर्ववत् तस्याः न्यूववृत्तित्वं नास्ति। तदोच्यते गुणनिष्ठकारणतातिरिक्तवृत्तित्वात् सत्ता न कारणतावच्छेदिका। अवच्छेदकस्तु अन्यूनानतिप्रसक्तधर्मो भवति। गुणत्वमेव अन्यूनानतिप्रसक्तमिति गुणत्वस्यैव अवच्छेदकत्वम्। तदेवाह – "न हि रूपत्वादिकं सत्ता व तत्रावच्छेदिका, न्यूनाधिकदेशवृत्तित्वात्। अतः चतुर्विंशत्यनुगतं किञ्चिद्वाच्यं, तदेव गुणत्वम्"[1] इति। इदमप्यत्र वक्तुं शक्यते – पूर्वोक्तानुमानेन रूपत्वस्य सत्तायाः वा सिद्धिः यद्युद्देश्यं स्यात् तदा सिद्धसाधनाख्यः दोषो भवेत्। यतः रूपत्वजातिस्तु सिद्धा एव किञ्च सत्ता अपि पदार्थविधया सिद्धा एव। तदर्थं पुनः नानुमानस्य आवश्यकता। अपि च तादृशसिद्धेः उद्देश्यत्वे अर्थान्तरदोषोऽपि स्यात्। अर्थान्तरदोषो नाम अभिमतार्थासिद्धिः अथवा अनभिमतार्थसिद्धिः। प्रकृते अभिमतार्थस्य गुणत्वस्य असिद्ध्या अभिमतार्थासिद्धिरूपः अर्थान्तरः स्यात् किञ्च अनभिमतार्थस्य रूपत्वस्य सत्तायाः वा सिद्ध्या अनभिमतार्थसिद्धिरूपः अर्थान्तरः स्यात्। गुणत्वजातिसिद्ध्यर्थं नानुमानस्य आवश्यकता, तत्र किल प्रत्यक्षमेव प्रमाणमिति शङ्का। कथं तत्र प्रत्यक्षस्य प्रामाण्यमित्युक्तौ, नियमो वर्तते "येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनैवेन्द्रियेण तद्गता जातिः तदभावश्च गृह्यते"[2] इति। यथा जायते घटगतरूपस्य प्रत्यक्षं चक्षुरिन्द्रियेण संयुक्तसमवायसन्निकर्षात् तथा तेनैव चक्षुरिन्द्रियेण संयुक्तसमवेतसमवायसन्निकर्षात् तद्गतरूपत्वजातेरपि प्रत्यक्षं सम्भवति। चक्षुसंयुक्तो घटः, तत्समवेतं रूपं, तस्य समवायः रूपत्वे इति। एवं रूपे गुणत्वस्यापि समवायेन सत्त्वात्, तस्य गुणत्वस्यापि प्रत्यक्षं चक्षुसंयुक्तसमवेतसमवायसन्निकर्षात् जायते। अत एव गुणत्वजातिसद्धौ अनुमानप्रयोगः निरर्थकः इति प्रतिपादितम्।

तत्रोच्यते घटगतरूपादौ गुणत्वजातेः प्रत्यक्षसम्भवेऽपि परमाणुगतरूपादौ गुणत्वजातेः प्रत्यक्षसम्भवापत्तिः। परमाणूनामतीन्द्रियत्वात् तद्गतरूपादीनामपि अतीन्द्रियत्वम्, अतः तादृशातीन्द्रियपरमाणुगतरूपादौ विद्यामानायाः गुणत्वजातेरपि अतीन्द्रियत्वम्। तथा च गुणत्वजातेः प्रत्यक्षासम्भवः। अपि च विद्यन्ते केचन सर्वथा अतीन्द्रियाः गुणाः यथा गुरुत्वादृष्टभावनाः। एतेषु अतीन्द्रियगुणेष्वपि विद्यमानायाः गुणत्वजातेः प्रत्यक्षं न सम्भवति। एवं यत्किञ्चित्गुणत्वस्य प्रत्यक्षसम्भवेऽपि चतुर्विंशतिगुणसाधारणगुणत्वजातिः प्रत्यक्षेण न सिद्ध्यतीत्यतः तत्रानुमानप्रमाणं प्रदर्शितम्।

सम्प्रति विधीयते अन्यः कश्चनाक्षेपः पूर्वपक्षिणा, अतीन्द्रियरूपनिष्ठगुणत्वजातेः अप्रत्यक्षेऽपि तत्र गुणत्वजातिस्तु अङ्गीकार्या एव, अन्यथा गुणत्वेन सह रूपत्वस्य साङ्कर्यं स्यात्। तेन च साङ्कर्येण गुणत्वस्य जातित्वभङ्गः स्यात्। कथं साङ्कर्यमिति पृच्छायामुच्यते, सङ्करो नाम परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः इति। प्रकृते रूपत्वाभाववति रसादौ गुणत्वस्य सत्त्वात् रूपत्वात्यन्ताभावसमानाधिकरणधर्मो भवति गुणत्वम्। पुनः गुणत्वाभाववति अतीन्द्रियरूपे रूपत्वस्य सत्त्वात् गुणत्वात्यन्ताभावसमानाधिकरणधर्मो भवति रूपत्वम्। एवं परस्परात्यन्ताभावसमानाधिकरणधर्मयोः रूपत्वगुणत्वयोः एकत्र समावेशो घटगतरूपे सम्भवतीति अत्र सङ्करो दोषो विद्यते। अयञ्च सङ्करो जातित्वबाधकोऽस्ति। एवं रूपत्वादिना साङ्कर्यभिया अतीन्द्रियरूपादौ गुणत्वमस्त्येव इत्यङ्गीकार्यम् इति पूर्वपक्षिणामाशयः। तदेवाह दिनकर्याम् - "न च रूपत्वादिना साङ्कर्यभिया अतीन्द्रियरूपादौ गुणत्वजातिसिद्धिः"[3] इति।

तर्हि गुरुत्वादौ गुणत्वसिद्धिः कथं स्यादिति प्रश्ने पूर्वपक्षिणो वदन्ति यत् - येन प्रमाणेन गुरुत्वादिसिद्धिः तेनैव प्रमाणेन गुरुत्वादिनिष्ठगुणत्वजातिसिद्धिः। अत्र आदिपदेन अदृष्टभावने ग्राह्ये। धर्मिणः गुरुत्वस्य ग्राहकं प्रमाणं गुणत्वविशिष्टतयैव गुरुत्वं गृह्णातीति तत्र गुणत्वसिद्धिः। अतः गुणत्वसिद्धौ अनुमानप्रमाणं व्यर्थमिति तेषां पूर्वपक्षिणामाशयः। तदेवाह दिनकर्यां - "गुरुत्वादौ तु धर्मिग्राहकमानेन तत्सिद्धिः इति अनुमानप्रदर्शनं व्यर्थम् इति"[4]।

तत्र समाधानमुच्यते – यदुक्तमादौ घटगतरूपादौ विद्यमानस्य गुणत्वस्य चक्षुरादिसंयुक्तसमवेतसमवायसन्निकर्षाज्जायते प्रत्यक्षम्।

सम्प्रति उच्यते यत् विद्वज्जनानां रूपादौ गुणः इति प्रत्यक्षसम्भवेऽपि पामरजनानान्तु रूपत्वेनैव रूपप्रत्यक्षसम्भवः, न तु गुणत्वेन

[1] न्यायसिद्धान्तमुक्तावली, पृ. ४३५, आत्मारामशर्मा(सम्पा.)

[2] बालव्युत्पत्तिः, पृ. ४६

[3] दिनकरी. पृ. ६५२, शङ्कररामशास्त्री (सम्पा.)

[4] तथैव।

तेषां रूपप्रत्यक्षं जायते। अतः पण्डितपामरसाधारण्येन प्रत्यक्षप्रमाणेन गुणत्वसिद्धेः वक्तुम् अशक्यतया प्रत्यक्षप्रमाणं परित्यज्य गुणत्वजातिसाधकतया अनुमानप्रमाणं प्रदर्शितमिति भावो ग्राह्यः। तदेवाह दिनकर्यां - "रूपादावप्यापामरसाधारणगुणः इति प्रत्यक्षस्याप्रसिद्धेः"[1] इति।

**गुणत्वजातिसिद्धौ विशेषविचारः-** "द्रव्यकर्मभिन्ने सामान्यवति कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, दण्डनिष्ठघटकारणतावत्" इत्यनुमानेन गुणत्वजातिसिद्धिः मूले प्रतिपादितम्। अत्रैवाक्षेपः - द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणतावच्छेदकतया कथं गुणत्वजातिसिद्धिः? किं बीजम् आक्षेपस्यास्य इति चेदुच्यते "कारणगुणाः कार्यगुणान् आरभन्ते" इति न्यायेन अवयवीरूपनिष्ठकार्यतानिरूपितकारणता अवयवरूपनिष्ठा भवति। अवयवीरसनिष्ठकार्यतानिरूपितकारणा अवयवरसनिष्ठा भवति। एवं चतुर्विंशतिगुणेषु प्रत्येकं भिन्नभिन्नाः कारणताः विद्यन्ते। रूपनिष्ठकारणतावच्छेदकतया रसनिष्ठकारणतावच्छेदकतया वा रूपत्वस्य रसत्वस्य वा सिद्धिर्भवति। किन्तु तच्च रूपत्वं रसत्वम् आपामरसाधारण्येन प्रत्यक्षेण सर्वसिद्धमेवास्ति। पुनः किन्निष्ठकार्यतानिरूपितकारणता चतुर्विंशतिगुणनिष्ठा भवतीति पृच्छायां तादृशं किमपि कार्यमेव नास्ति यस्य कारणं चतुर्विंशतिगुणाः भवन्ति। अतः दिनकर्यामुक्तम् - "सकलगुणसाधारणी एका कारणता नास्त्येवेति कथं तदवच्छेदकतया गुणत्वजातिसिद्धिः"[2] इति।

एवमस्य समाधानमुच्यते, यद्यपि रूपादिषु चतुर्विंशतिगुणेषु प्रत्येकं विद्यमानाः याः भिन्नभिन्नाः कारणताः, तत्तत्कारणतावच्छेदकतया गुणत्वजातिसिद्धिः भवितुं नार्हति, गुणत्वस्य अतिप्रसक्तत्वात्। किन्तु चतुर्विंशतिगुणेषु प्रत्येकं याः भिन्नभिन्नाः कारणताः विद्यन्ते तासां सर्वासां कारणतानां पक्षत्वम् अङ्गीकारे सति सर्वासु कारणतासु विद्यमानः योऽनुगतधर्मः द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणतात्वरूपः, तदवच्छिन्ना या कारणता, तदवच्छेदकतया गुणत्वसिद्धिः भवति, तदानीं गुणत्त्वस्य अन्यूनानतिप्रसक्तत्वात्।

एतदपि न सम्भवति, कुतः इत्युक्तौ- द्रव्यकर्मरूपभिन्नसामान्यवति कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् दण्डनिष्ठघटकारणतावत् इत्यनुमाने पक्षो द्रव्यकर्मरूपभिन्नसामान्यवन्निष्ठकारणता अर्थात् रसादिनिष्ठकारणता। एवमत्र पूर्ववत् रसादित्रयोविंशतिगुणेषु याः भिन्नभिन्नाः कारणताः विद्यन्ते, तासां सर्वासां कारणतानां पक्षत्वम् अङ्गीक्रियते। तथा च सर्वासु कारणतासु विद्यमानः योऽनुगतधर्मो द्रव्यकर्मरूपभिन्नसामान्यवन्निष्ठकारणतात्वरूपः, तदवच्छिन्ना या कारणता, तदवच्छेदकतया गुणत्वसिद्धिः सम्भवति। एवं प्रकृतानुमानेन रसादौ गुणत्वसिद्धिः भवति न तु रूपे। अतः रूपस्य रसादिगुणैः सह वैजात्यप्रसङ्गः समायाति गुणत्वेन।

सम्प्रति अपरोऽपि दोषः प्रदर्श्यते –

कारिकावल्यामुक्तमस्ति- "पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्"[3] इति। पारिमाण्डल्यं नाम अणुपरिमाणम्। एवम् पारिमाण्डल्यात्मकस्य अणुपरिमाणगुणविशेषस्य क्वापि कारणता नास्ति। किन्तु अणुत्वे गुणत्वं विद्यते। अतः कारणत्वाभाववति अणुत्वे गुणत्वस्य सत्त्वात्, गुणत्वस्य अवच्छेदकत्वं न सम्भवति, तस्य अतिप्रसक्तत्वात्। अतः कथं कारणतावच्छेदकतया गुणत्वजातिसिद्धिः? तत्र समाधानरूपेण परिष्कारटीकायामुक्तमस्ति – "न चैवं पारिमाण्डल्यादेर्व्यवस्थितमकारणत्वं व्याहन्यत इति वाच्यं ज्ञानातिरिक्तं प्रत्यकारणताया एव पारिमाण्डल्यादेः सिद्धान्तितत्वात्"[4]।

सम्प्रति प्रकारान्तरेणोच्यते यत् गुणपदशक्यतावच्छेदकतया गुणत्वजातिसिद्धिः सम्भवति। तदेवोक्तम् – "असति बाधके गुणपदशक्यतावच्छेदकत्वेन गुणत्वजातेः सिद्धौ बाधकाभावः"[5] इति। अनुमानस्याकारो भवति – गुणनिष्ठा गुणपदनिरूपितशक्यता

[1] दिनकरी, पृ. ६५२, शङ्कररामशास्त्री (सम्पा.)

[2] तत्रैव।

[3] कारिकावली, कारिका-१५

[4] वैशेषिकसूत्रोपस्कारः, पृ. २५९, आचार्यः सेख-साविर-आलिः (सम्पा.)

[5] श्रीरघुदेवटीका, पृ. १०९, आचार्यः हरेकृष्णशतपथी (सम्पा.)

किञ्चिद्धर्मावच्छिन्ना शक्यतात्वात्, घटनिष्ठघटपदनिरूपितशक्यतावत्। या या शक्यता सा सा किञ्चिद्धर्मावच्छिन्ना यथा घटनिष्ठा घटपदनिरूपितशक्यता घटत्वधर्मावच्छिन्ना इति व्याप्तिः। एवं शक्यतात्वमिति हेतुना गुणपदार्थनिष्ठगुणपदनिरूपितशक्यतायां किञ्चिद्धर्मावच्छिन्नत्वं सिद्धम्। स च धर्मो गुणत्वमिति। तच्च गुणत्वं लाघवात् जातिबाधकाभावाच्च जातिः इत्येवं गुणत्वजातिसिद्धिः।

एवं तर्हि विभुपदशक्यतावच्छेदकतया विभुचतुष्टयमात्रवृत्तिविभुत्वजातिसिद्धिप्रसङ्गः इति चेन्न विभुत्वेन सह भूतत्वस्य साङ्कर्यात्। तथा चोक्तम् भूतत्वसङ्करस्य बाधकस्य सत्त्वेन तस्य जातित्वासम्भवादिति। कथं साङ्कर्यमिति चेदुच्यते सङ्करो नाम परस्परात्यन्ताभावसमानाधिकरणधर्मयोः एकत्र समावेशः। प्रकृते भूतत्वाभाववति आत्मनि विभुत्वस्य सत्त्वात् भूतत्वात्यन्ताभावसमानाधिकरणधर्मो भवति विभुत्वम्। विभुत्वाभाववति जले भूतत्वस्य सत्त्वात् विभुत्वात्यन्ताभावसमानाधिकरणधर्मो भवति भूतत्वम्। एवं परस्परात्यन्ताभावसमानाधिकरणधर्मयोः विभुत्वभूतत्वयोः एकत्र आकाशे सम्भवतीत्यतः अत्र सङ्करदोषो विद्यते। अयञ्च सङ्करः जातित्वबाधको भवति।

दीधितिकृतां नये तु आकाशकालदिशाम् ईश्वरे एवान्तर्भावः। अतः आत्मातिरिक्तं विभुत्रयं नास्ति एव। विभुत्वम् आत्मत्वतुल्यमेव। अतः तुल्यव्यक्तिवृत्तित्वरूपजातिबाधकसत्त्वे तथा विभुत्वजातिसिद्धिप्रसङ्गरूपदोषस्य अनवकाशः। आकाशादीनाम् आत्मातिरिक्तत्वस्वीकारपक्षे तु विभुत्वजातिसिद्धौ बाधकाभावः। तथा चोक्तम् – "इदानीमीश्वरजीवातिरिक्तस्य विभुत्वे मानाभावेन विभुत्वस्यात्मतुल्यवृत्तितया आत्मत्वातिरिक्तजातित्वे तुल्यव्यक्तिवृत्तित्वरूपसाधकसत्त्वे तथा दोषानवकाशात् आकाशादीनामतिरिक्तत्वपक्षेऽपि तथा स्वीकारे बाधकाभावाच्चेति।"[1]

यदुक्तं रघुदेवाचार्येण पदार्थतत्त्वनिरूपणटीकायाम् 'असति बाधके गुणपदशक्यतावच्छेदकतया गुणत्वजातेः सिद्धौ बाधकाभावः' इति निरर्थकमेव, रूपादिषु गुणपदशक्यते प्रमाणाभावात्। यतः व्याकरणे 'अदेङ् गुणः' इति अदेङोः गुणत्वव्यवहारः, सांख्यादिदर्शनेषु सत्त्वरजस्तमसां गुणत्वव्यवहारो दृश्यते। एवं रूपादौ अदेङोः सत्त्वादौ वा गुणपदस्य शक्तिरिति निश्चये विनिगमनाविरहात् गुणपदशक्यतावच्छेदकतया न गुणत्वजातिसिद्धिः।

अतः प्रकारान्तरमुच्यते यत् घटो द्रव्यं गुणाद् इत्यनुमानप्रयोगे गुणस्य सद्धेतुत्वात् घटो द्रव्यम् इत्यनुमितिर्जायते। घटो द्रव्यम् इत्यनुमितिं प्रति गुणस्य कारणता विद्यते। अतः घटो द्रव्यमित्यनुमितिनिष्ठकार्यतानिरूपितकारणता गुणनिष्ठा भवति। एवम् एतादृशानुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकतया गुणत्वसिद्धिर्भवति। एतच्च गुणत्वं लाघवात् जातिबाधकाभावाच्च जातिः इति रीत्या गुणत्वजातिः सिद्ध्यति।

सम्प्रति मूलोक्तानुमाने द्रव्यकर्मभिन्ने सामान्यवति कारणता इत्यनेन पक्षेण घटो द्रव्यमित्यनुमितिनिष्ठकार्यतानिरूपितकारणता गृह्यते। एतादृशानुमितिनिष्ठकार्यतानिरूपितकारणता चतुर्विंशतिगुणनिष्ठा भवति। अतः सकलगुणसाधारणी एका कारणता नास्त्येव इत्याकरकः प्रागुक्तः आक्षेपः निराकृतो भवति। पुनः पारिमाण्डल्यगुणविशेषमादाय गुणत्वस्य अतिप्रसक्तत्वात् तस्य अवच्छेदकत्वापत्तिरपि उत्सारिता भवति। एवं गुणत्वजातिसिद्ध्यर्थं प्रयुक्तस्य मूलोक्तानुमानस्य संगतिः उपपादिता।

**उपसंहारः-** गुणत्वजातिस्तु अनुमानेन सिद्ध्यति। अनुमानस्याकारो वर्तते – द्रव्यकर्मभिन्ने सामान्यवति कारणता किंञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, दण्डनिष्ठघटकारणतावदिति। अनेनानुमानेन कथं गुणत्वजातिः सिद्ध्यति इति क्रमेण आक्षेपसमाधानपूर्विका प्रतिपादिता। पारिमाण्डल्यरूपगुणविशेषस्य क्वापि अकारणतया तत्र गुणत्वस्य सत्त्वेन कारणत्वाभाववति अणुत्वे गुणत्वस्य सत्त्वात् गुणत्वस्य अवच्छेदकत्वं न सम्भवतीति कारणतावच्छेदकतया गुणत्वजातिः न सिद्ध्यति किन्तु प्रकारान्तरेण गुणत्वजातिः साधनीया इति दिनकरीग्रन्थस्य आशयः प्रतिपादितः। ततः गुणपदशक्यतावच्छेदकतया गुणत्वजातिसिद्धिः इति प्रकारान्तररूपेण दीधितिकृतां मतमुपस्थापितम्। अस्मिन् प्रकारान्तरेऽपि विभुपदशक्यतावच्छेदकतया विभुचतुष्टयमात्रवृत्तिविभुत्वजातिसिद्धिप्रसङ्गरूपदोषः उद्भावितः। दीधितिमते तु तत्र तुल्यव्यक्तिवृत्तित्वरूपजातिबाधकसत्त्वात् उक्तदोषस्य अनवकाशः एव इति प्रतिपादितम्। तथापि रूपादौ

[1] श्रीरघुदेवटीका, पृ. १०९, आचार्यः हरेकृष्णशतपथी (सम्पा.)

अदेङोः सत्त्वादौ वा गुणपदस्य शक्तिरिति निश्चये विनिगमनाविरहात् गुणपदशक्यतावच्छेदकतया गुणत्वजातिसिद्धिः नैव सम्भवति इति शङ्कया पुनः प्रकारान्तरं कल्पितम्। घटो द्रव्यं गुणात् इत्यनुमानेन घटो द्रव्यमित्यनुमितिः जायते। एवं घटो द्रव्यमित्यनुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकतया गुणत्वजातिसिद्धिः भवति। अन्ते च मूलोक्तानुमानेनैव गुणत्वजातिः सिद्ध्यतीति प्रकारान्तरकल्पनपुरःसरं मूलोक्तानुमानस्य साधुत्वं लघुशोधप्रबन्धेऽस्मिन् निरूपितम्।

**परिशीलितग्रन्थपञ्जिः-**


रघुनाथशिरोमणिः। पदार्थतत्त्वनिरूपणम्। श्रीविश्वनाथपञ्चाननविरचितपदार्थतत्त्वावलोक-श्रीरघुदेवकृतटीकाभ्यां सहितम्। प्रधानसम्पादकः, आचार्यः हरेकृष्णशतपथी। तिरुपतिः – राष्ट्रियसंस्कृतविद्यापीठम्, २०१०।

विश्वनाथतर्कपञ्चाननः। कारिकावली (मुक्तावलीसहिता सा च प्रभा-मञ्जुषा-दिनकरी-रामरुद्री-गङ्गारामीति व्याख्यापञ्चकसमन्विता)। सम्पा. आचार्यः शङ्कररामशास्त्री। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, २०१६।

विश्वनाथधितालः। बालव्युत्पत्तिः। वाराणसी: संस्कृति प्रकाशन, २०१२।

विश्वनाथपञ्चाननः। कारिकावली (न्यायसिद्धान्तमुक्तावलीसंवलिता दिनकरी-रामरुद्रीव्याख्याभ्यां च सनाथीकृता)। सम्पा. आचार्यः आत्मरामशर्मा। वारणसी: चौखम्बा कृष्णदास अकादमी, २०२१।

विश्वनाथपञ्चाननः। न्यायसिद्धान्तमुक्तावली (किरणावली समाख्यव्याख्योपेता)। व्याख्या. श्रीकृष्णवल्लभाचार्यः। संशो. नारायण-चरणशास्त्री श्वेतवैकुण्डशास्त्री च। वारणसी: चौखम्बा संस्कृत संस्थान, २०२१।

विश्वनाथपञ्चाननः। भाषापरिच्छेदः। व्याखाकारः, श्रीज्वालाप्रसाद गौडः। सम्पादकः, श्रीढुण्ढिराजशास्त्री। दिल्ली चौखम्बा संस्कृत प्रतिष्ठान, २००३।

शङ्करमिश्रः। वैशेषिकसूत्रोपस्कारः। प्रकाशिका – हिन्दीव्याख्योपेतः। व्याख्याकारः, आचार्य ढुण्ढिराज शास्त्री। सम्पा. श्री नारायण मिश्रः। वाराणसी – चौखम्भा प्रकाशन, २०१६।

शङ्करमिश्रः। वैशेषिकसूत्रोपस्कारः। प्रकाशः – बङ्गव्याख्योपेतः। सम्पादकः, आचार्यः सेख-साविर-आलिः, कलकाता – संस्कृत-वुक डिपो, २०१३।

# अकर्मकधातूनां सकर्मकत्वापत्तिः

तुहिन-मण्डलः
शोधच्छात्रः, संस्कृत-दर्शन-विभागः
रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्
वेलुड-मठः, हाओडा, पश्चिमवङ्गाः
e-mail: tuhinmandal55@gmail.com
phone: 8777730850

**शोधसारः-** येषां धातूनां कर्म न सम्भवति ते अकर्मकाः धातवः इति प्रसिद्धिः। यथा आस्, स्वप् इत्यादयः। परन्तु एतेषामपि धातूनां देशकालादिकर्म सम्भवति। वार्तिककारेण वार्तिकं कृतम् "कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणां देशश्च" इति। परन्तु तथा सति सर्वेऽपि धातवः सकर्मकाः जायन्ते। तथा सति भावे कदापि लादयः न स्युः। तथा चेत् "लः कर्मणि च भावे चाकर्मकेभ्यः"[1] इति सूत्रवैयर्थापत्तिः। अस्मिन् शोधप्रबन्धे अयमेव विषयः वाक्यपदीयदिशा यथामति आलोचितः। उत्थापितदोषस्य परिहारः कथं क्रियते तदपि अत्र आलोचितम्। अन्तरङ्गं कर्म बहिरङ्गं कर्म इति भेदः कथं क्रियते, कुत्र कीदृशं कर्म सम्भवति इत्यादिविषयाः अत्र यथामति आलोचिताः।

**कुञ्चिकाशब्दाः-** कर्म, अकर्मकः, सकर्मकः, अन्तरङ्गम्, बहिरङ्गम्, लादयः, कालः।

वाक्यपदीयदिशा सप्तविधेषु कर्मसु अन्तिमम् अस्ति सूत्रान्तरनिर्दिष्टं कर्म। तस्मिन् प्रसङ्गे उच्यते "कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणां देशश्च"।[2] अनेन वार्तिकेन अकर्मकाणामपि धातूनां कर्म विधीयते। तथाहि अकर्मकधातूनां प्रयोगे देशः, कालः, भावः, गन्तव्यः अध्वा च कर्मसंज्ञकः भवति। यथा कुरून् स्वपिति, मासमास्ते, गोदोहमास्ते, क्रोशम् आस्ते इत्यादीनि उदाहरणानि। स्वप्-धातुः, आस्-धातुः च अकर्मकः। परन्तु एतादृशधातूनामपि देशकालादिकर्म विधीयते प्रस्तुतवार्तिकेन।

अत्रायं विचार्यते इदं वार्तिकं नापेक्षते इति। वार्तिकं विनापि एतेषां धातूनां कर्म विधीयते। कथमिचि चेत् अन्तर्भूतक्रियान्तरैः अत्र कर्मत्वमुपजायते। तदुक्तं हरिणा-

**"कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।**
**सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥" इति।**[3]

यथा मासमास्ते इत्यत्र मासं व्याप्य आस्ते इति आसनरूपप्रधानक्रियापेक्षया व्याप्यक्रिया अन्तर्भूता अस्ति। एवञ्च अन्तर्भूतव्याप्यक्रियया कर्तुः आप्तुमिष्यमाणत्वात् "कर्तुरीप्सिततमं कर्म"[4] इत्यनेनैव कर्मत्वं सिद्ध्यति। अतः वार्तिकं नापेक्षितम्।

तदा उच्यते यद्येवं तर्हि इदानीम् आस्ते इत्यादि अकर्मकधातवः अपि सकर्मकाः सम्पन्नाः। सकर्मकत्वात् अधुना लकृत्यक्तखलर्थाः कर्मणि प्राप्नुवन्ति न तु भावे। तेन मासमास्यते मासमासितव्यम्, मासमासितम् इत्यादि भावे प्रयोगाः न स्युः। परन्तु "भावे चाकर्मकेभ्यः"[5], "तयोरेव कृत्यक्तखलर्थाः"[6] इत्यादिसूत्रनिर्देशात् भावेऽपि लादयः इष्यन्ते। परन्तु तन्न प्राप्नोति इति दोषः जायते।

तत्र समाधानम् उच्यते- द्विविधं हि कर्म। अन्तरङ्गं बहिरङ्गं च। द्रव्यकर्म अन्तरङ्गम्। कालादिलक्षणकर्म बहिरङ्गम्। अन्तरङ्गेण कर्मणा सह धात्वर्थस्य पूर्वं सम्बन्धः। बहिरङ्गेन कर्मणा सह धात्वर्थस्य परं सम्बन्धः। धातूनां सकर्मकत्व-अकर्मकत्वविचारः अपि अन्तरङ्गेणैव कर्मणा विचार्यते, न तु बहिरङ्गेण। एवञ्च लादयः अपि अन्तरङ्गे एव कर्मणि विधीयन्ते।

---

[1] अष्टाध्यायी ३.४.६९
[2] अकथितञ्च इति सूत्रभाष्ये।
[3] वाक्यपदीम् ३.७.६७
[4] अष्टाध्यायी १.४.४९
[5] लः कर्मणि च भावे चाकर्मकेभ्यः (अष्टाध्यायी ३.४.६९)
[6] अष्टाध्यायी ३.४.७०

तथाहि मासम् आस्ते इत्यस्य अर्थः मासात्मकं कालं व्याप्य आस्ते इति। गोदोहमास्ते इत्यस्य अर्थः- यावता कालेन गवां दोहः सम्पाद्यते तावत् कालं व्याप्य आस्ते इति। कुरून् स्वपीति इत्यत्रापि स्वावधिपरिच्छिन्नागमनक्रियापरिच्छिन्नकालस्य स्वापादिविशेषणस्य हेतुरिति देशस्य कालादीनां च आसनरूप-प्रधानक्रियया साक्षात् सम्बन्धाभावात् बहिरङ्गत्वम्। अतः दशकालादि बहिरङ्गं कर्म। ओदनं पचति इत्यादौ तु ओदनस्य साक्षात् प्रधानक्रियासम्बन्धात् अन्तरङ्गत्वम्। अतः ओदनादि अन्तरङ्गं कर्म। एतेषां कालादीनां सर्वैः अकर्मकैः सकर्मकैश्च धातुभिः योगे अन्तर्भूतक्रियामाश्रित्य कर्मत्वं स्वाभाविकमेव उपजायते। तदर्थं वार्तिकस्य प्रयोजनं नास्ति। किञ्च तथा सति सर्वे धातवः सकर्मकाः इत्यपि शङ्का न कर्तव्या, धातोः सकर्मकत्व-अकर्मकत्वविचारः अन्तरङ्गकर्म आश्रित्य एव विधीयते। तस्मात् कालादीनां बहिरङ्गत्वात् तदाश्रित्य धातोः सकर्मकत्वं न फलति। तेन सकर्मकत्वाभावात् भावे अपि लकारादीनां प्रयोगः सुतरां सिद्ध्यति इति न कोऽपि दोषः।

ननु कालादिबहिरङ्गकर्म आश्रित्य सकर्मकत्वं न जायते चेत् एतेषां कालादीनां कर्मत्वस्य प्रयोजनं किम्? अत्रोच्यते कालादीनां कर्मत्वस्य न केवलं द्वितीयोत्पत्तिः प्रयोजनम्, अपि तु लाद्यर्थम्।[1] अत्र लाद्यर्थम् इत्यस्य अर्थः लकारनिवृत्यर्थम्।[2] अर्थात् कालादीनाम् अप्रधानकर्मत्वात् तत्र लकाराः न स्युः। उक्तं च "कालाध्वनोरत्यन्तसंयोगे"[3] इति सूत्रे भाष्ये वार्तिकम्- "अत्यन्तसंयोगे कर्मवल्लाद्यर्थम्"[4] इति। उक्तं च भाष्ये- "प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्"[5] इति। तस्मादेव देवदत्तेन मासम् ओदनः पच्यते इत्यादिप्रयोगः। अत्र ओदनः इति प्रधानकर्मणि लकारः विहितः। तस्मात् प्रधानकर्मणः अभिहितत्वात् तत्र प्रथमा। मासम् इति अप्रधानकर्मत्वात् तत्र न लकारविधानम्। अतः मासम् इति अनभिहित्वात् कर्मणि द्वितीयैव।

एवञ्च आसनादिरूपप्रधानक्रियापेक्षया व्याप्तिरूपक्रियान्तरस्य आस्यादिधातुभिः स्वार्थे विशेषणतया क्रोडीकृतत्वात् व्याप्तिक्रियाविषयभावोपगमनेन मासादिरूपं प्राप्यं कर्म ईप्सिततममेव इति "कर्तुरीप्सिततमं कर्म"[6] प्रथमसूत्रेणैव कर्मसंज्ञा सिद्ध्यति इति फलितम्।

इदानीम् एका शङ्का क्रियते यत् मासमास्ते इत्यत्र यथा मासं व्याप्य आस्ते इति व्याप्तिरूप-अन्तर्भूतक्रियान्तरमाश्रित्य मासस्य कर्मसंज्ञा जायते तथैव कटे आस्ते इत्यत्र कटस्यापि कर्मत्वं भवेत् इति चेन्न। आसनया कटादेः व्याप्तिः नास्ति, कटस्य एकदेशे एव देवदत्तादेः कर्तुः अवस्थानात्। अतः कटे आस्ते इत्यादिप्रयोगे न कापि हानिः।

कथं पुनः कालादीनाम् अप्राधान्यं द्रव्यकर्मणां प्राधान्यम् इति प्रश्ने उच्यते-

**"आधारत्वमिव प्राप्तास्ते पुनर्द्रव्यकर्मसु।**
**कालादयो भिन्नकक्ष्यं यान्ति कर्मत्वमुत्तरम्॥" इति।**[7]

कालादिकर्म द्रव्यरूपप्रधानकर्मनिरूपितम्। कालादयः व्याप्तिक्रियायाः कर्मत्वविवक्षायामपि आधारत्वं प्राप्ताः इव। तथाहि आधारः यथा कर्तृकर्मद्वारा क्रियां धारयति तथैव मासादिः कर्तृकर्मद्वारा क्रियां धारयति। यथा क्रोशं शेते, कुरून् स्वपीति इत्यत्र अधिकरणत्वं ज्ञायते। तथैव मासम् ओदनं पचति इत्यत्रापि द्रव्यकर्मद्वारा मासस्य क्रियाधारत्वम् अवगम्यते। परन्तु अत्र व्याप्तिविवक्षायाः प्राग् आधारत्वस्य प्रसङ्गः। व्याप्तिविवक्षायां तु ईप्सिततमत्वात् कर्मत्वमेव। अतः कारिकायाम् "इव"शब्दः प्रयुक्तः।

किञ्च कारिकायाम् "उत्तरम्" इत्युक्तम्। तस्यार्थः द्रव्यकर्मणा धात्वर्थसम्बन्धात् उत्तरकाले कालादयः भिन्नकक्ष्यं कर्मत्वं यान्ति इति। अतः आदौ द्रव्यकर्मणां क्रियया सम्बन्धः। ततः परं कालादिकर्मणां क्रियया सम्बन्धः। तत्कथमिति चेत् उच्यते-

**"शक्तिप्रमाणसंख्यादेर्द्रव्यधर्माद्विशिष्यते।**

[1]"न द्वितीयाविधानार्थमेव कर्मसंज्ञात्र, अपि तु लाद्यर्था अपि।"- (हेलाराजकृतप्रकाश टीका)

[2]वाक्यपदीयस्य अम्बाकर्त्री व्याख्यानुसारम्।

[3]अष्टाध्यायी २.३.५

[4]अत्यन्तसंयोगे कालाध्वानौ कर्मवत् भवतः इति वक्तव्यम्, न तु कर्मैव।

[5]औपेदशिके हि कर्मणि लादयः न तु आतिदेशिके इति भावः।

[6]अष्टाध्यायी १.४.४९

[7]वाक्यपदीयम् ३.७.६८

**क्रियासु कालयोगोऽतः प्राग्योगो द्रव्यकर्मणा॥" इति।**

अर्थात् शक्ति-प्रमाण-संख्यादिरूपद्रव्यधर्मात् क्रियासु चिराचिरकालयोगः विलक्षणो भवति। अतः द्रव्यकर्मणा सह क्रियायाः प्राग् योगः।

यथा पाक्यद्रव्यं कठिनं भवति चेत् पाकार्थं दीर्घः समयः अपेक्षते। एवञ्च अधिकपरिमाणं भवति चेदपि अधिककालः अपेक्षते। एवमेव तद्विपरीतं भवति चेत् शीघ्रमेव पाकः सम्पद्यते। अर्थात् पाक्यद्रव्यस्य परिमाणं स्वल्पं भवति चेत् शीघ्रं पाकः समाप्यते। एवञ्च द्रव्यकर्मापेक्षः भवति कालादिविशेषः।

एवञ्च समस्तसाधनसम्बन्धे जाते क्रियायाः परिच्छेदहेतवः कालादयः अपेक्ष्यन्ते इति ते बहिरङ्गत्वेतन भिन्नकक्ष्याः। तस्मादुक्तं भिन्नकक्ष्यं कर्मत्वं यान्ति इति।

**उपसंहारः-** एवञ्च अकर्मकधातूनां योगे देशकालादीनां कर्मत्वं जायते। परन्तु तदर्थं वार्तिकस्य प्रयोजनं नास्ति। "कर्तुरीप्सिततमं कर्म"[1] इति सूत्रेणैव तत् सिद्ध्यति। परन्तु तथा सति सर्वे धातवः सकर्मकाः इत्यपि न। सकर्मकत्वाकर्मकत्वविचारः अन्तरङ्गकर्म आश्रित्य विधीयते। कालादिकर्म बहिरङ्गं भवति। अतः न कोऽपि दोषः।

**आश्रितग्रन्थसूची**


1. भर्तृहरिः; वाक्यपदीयम् (प्रकाश-अम्बाकर्त्री टीकाद्वयोपेतम्) (तृतीयं काण्डम्, द्वितीयो भागः); शर्मा श्रीरघुनाथ (सम्पादकः); सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः; वाराणसी; १९९७
2. भर्तृहरिः; वाक्यपदीयम्; खण्डूरी सत्यनारायण (सम्पादकः); चौखम्बा कृष्णदास अकादमी; वाराणसी; १९९८
3. शास्त्री सुरेशचन्द्रः; वाक्यपदीयप्रकाशिका; चौखम्बा सुरभारती प्रकाशन; वाराणसी; १९९६
4. पाणिनिः; अष्टाध्यायी; पाण्डेयः, गोपालदत्तः (सम्पादकः); वाराणसी; चौखम्बा सुरभारती प्रकाशन; २०११
5. भट्टोजिदीक्षितः; प्रौढमनोरमा (रत्नप्रकाशिका-भावप्रकाश-टीकासहिता); मिश्रः, भैरवः; पायगुण्डः, वैद्यनाथः (टीकाकारौ); वाराणसी; चौखम्बा संस्कृत संस्थान; २००३
6. पतञ्जलिः; व्याकरणमहाभाष्यम् (ज्योत्स्ना समुद्भासितम्); तिवारी; हरिणारायणः (टीकाकारः); वाराणसी; चौखम्बा विद्याभवन; २००९
7. पतञ्जलिः; व्याकरणमहाभाष्यम् [प्रदीपोद्योतोपेतम्]; शास्त्री, भार्गवः (सम्पादकः); देहली; चौखम्बासंस्कृतप्रतिष्ठान। १९८७


[1] अष्टाध्यायी १.४.४९

# अधिकरणसिद्धान्तघटितन्यायशास्त्रीयसिद्धान्तसमीक्षणम्

Pankaj Das, Ph.D. Research Scholar
Ramakrishna Mission Vidyamandira
Email- Pankaj.das.vedvid@gmail.com
Contact no- 8240830066

**सारसंक्षेपः-** षोडशपदार्थानां तत्त्वज्ञानात् मिथ्याज्ञाननाशः, मिथ्याज्ञाननाशात् दोषनाशः, दोषनाशात् प्रवृत्तिनाशः, प्रवृत्तिनाशात् जन्मनाशः, जन्मनाशात् दुःखनाशः। दुःखस्य आत्यन्तिकी निवृत्तिर्हि मोक्षः। षोडशपदार्थेषु अन्यतमः भवति सिद्धान्तः। सिद्धान्तश्चतुर्विधः- सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तः चेति। न्यायशास्त्रसिद्धान्त समीक्षणे अधिकरणसिद्धान्तस्य उपयोगिता कथं वर्तते सोदाहरणं मूलप्रबन्धे प्रस्तूयते।

**कूञ्चिशब्दाः-** मोक्षः, सिद्धान्तः, अधिकरणसिद्धान्तः, तत्त्वज्ञानम्, षोडशपदार्थः।

**भूमिका-** निखिलेऽस्मिन् पञ्चतत्त्वाञ्चिते वैरिञ्चप्रपञ्चे अनादिकालात् प्रारब्धपरिणतिं भुञ्जानां जनानाम् आध्यात्मिकादितापत्रयचक्रव्यूहोत्पाटनपटीयो षोडशपदार्थतत्त्वज्ञानमेवामनन्ति महर्षयः। षोडशपदार्थाश्च प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानाः। पूर्वोक्तेषां पदार्थानां श्रवणमनननिदिध्यासनेन साधर्म्यवैधर्म्यपुरस्कारेण तत्त्वज्ञानात् मिथ्याज्ञाननाशः, मिथ्याज्ञाननाशात् दोषनाशः, दोषनाशात् प्रवृत्तिनाशः, प्रवृत्तिनाशात् जन्मनाशः, जन्मनाशात् दुःखनाशः। अत्यन्तिकदुःखनाशात् अपवर्गः। निःश्रेयसम्, अपवर्गः, मोक्षः, मुक्तिः इति नामान्तरम्। निःश्रेयसम् आत्यन्तिकी दुःखनिवृत्तिः। आत्यन्तिकत्वं च समानाधिकरणदुःखप्रागभावासमानकालीनत्वम् इति। अतः दुःखनिवृत्तिरूपनिःश्रेयसमानाधिकरणो भवति दुःखप्रागभावः। अत्र दुःखप्रागभावशब्दार्थो भवति दुःखतत्प्रागभावः। अत्र तत्पदेन सन्निहितदुःखपदस्य परामर्शो भवति। अतः दुःखनिवृत्तेः अधिकरणं यदात्मा तद्वृत्तिः यत् दुःखं दुःखाभावश्च तेषां असमानकालीनत्वम् एव आत्यन्तिकत्वम्। अत एव समानाधिकरणदुःखसमानकालिनत्वे सति समानादिकरणदुःखप्रागाभावासमानकालिनत्वम् आत्यन्तिकत्वमिति। प्रागभावमनङ्गीकृतानां नये आत्यन्तिकत्वं नाम युगपदुत्पन्नसमानादिकरण-सर्वात्मविशेषगुणध्वंसमानकालीनत्वम् इति। पुनश्च शङ्करमिश्रेण मुक्तेः निःश्रेयसस्य प्रागभावात्मकं लक्षणं निगदितम्- 'अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावो मुक्तिः' इति। सांसारिकदशायां यो यो दुःखप्रागभावो वर्तते तत्काले अशेषविशेषगुणध्वंसः न तिष्ठति, अपि तु कतिपयविशेषगुणध्वंसः एव वर्तते। यस्तु दुःखप्रागभावः अशेषविशेषगुणध्वंसकालीनः स एव मुक्तिरिति।

तत्त्वज्ञानान्मुक्तिरित्यत्र तत्त्वेनापि तत्त्वज्ञानं भवति। कस्यापि पदार्थस्यावबोधने अपरपदार्थसापेक्षं भवति, तत्त्वावबोधने तत्करणम्। दृष्टान्तसिद्धान्तादयः पदार्थाः पदार्थावबोधने हेतवः इति। कथं सिद्धान्तादिपदार्थाः तत्त्वाबोधने शास्त्रार्थावगमे हेतुरिति अस्मिन् शोधप्रबन्धे प्रस्तूयते। अधिकरणसिद्धान्तप्रयोगे केषां तत्त्वानां सिद्धिर्भवति तत् सर्वम् आलोच्यते।

**सिद्धान्तः-** षोडशविधेषु पदार्थेषु सिद्धान्तः षष्ठतमः। न्यायसूत्रे सिद्धान्तस्य लक्षणमुदीरितम्- 'तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः।'[1] इति। योऽर्थः प्रामाणिकत्वेन अभ्युपगतः स सिद्धान्तः। सिद्धस्य संस्थितिः सिद्धान्तः। अत्र सिद्धान्तः इति लक्ष्यपदम्। तन्त्राधिकरणाभ्युपगमसंस्थितिः इति लक्षणपदम्। 'तन्त्रं शास्त्रं कुलं तन्द्रं सिद्धौषधिक्रिया'[2] इति कोषवचनात् तन्त्रशब्दस्य शास्त्रम् इत्यर्थः प्राप्तः। तन्त्रं शास्त्रम् अधिकरणं यस्य इति तन्त्राधिकरणम्। तन्त्रं कस्याधिकरणम्? प्रतिपादितपदार्थानाम्। केन सम्बन्धेन प्रतिपादितपदार्थानां तन्त्राधिकरणम्? ज्ञापकत्वेन। ज्ञापकत्वसम्बन्धेन प्रतिपादितपदार्थानां तन्त्राधिकरणम्, तादृशस्य तन्त्राधिकरणस्य अभ्युपगमः, तस्य संस्थितिः समीचीनतया असंशयतया स्थितिः संस्थितिः। तथा च वृत्तिकारः- 'तन्त्रं शास्त्रं तदेवाधिकरणं ज्ञापकतया

[1] न्यायसूत्रम्, १.१.२६
[2] नानार्थमञ्जरीकोषः

यस्य तादृशो योऽभ्युपगमस्तस्य समीचिनतयाऽसंशयरूपतया स्थितिः। तथा च शास्त्रार्थनिश्चयः सिद्धान्तः।'[1] इति।

तन्त्र्यते व्युत्पाद्यन्ते प्रमेयाः अनेनेति तन्त्रं प्रमाणम्। यः पदार्थ प्रमाणबोधितः, तस्य अभ्युपगमसंस्थितिः सिद्धान्तः। अत्र तन्त्रपदेन अविरुद्धं प्रमाणमेव लक्षितम्। तात्पर्यटीकाकारेण वाचस्पतिमिश्रेण, नैयायिकचूडामणिना आचार्यजयन्तभट्टेन, तार्किरक्षाकारेण वरदराजाचार्येण तन्त्रपदेन प्रमाणमुदीरितम्। 'तन्त्र्यन्ते व्युत्पाद्यन्ते प्रमेयाण्यनेनेति तन्त्र प्रमाणम्'[2] इति तात्पर्यटीकायाम्। 'तन्त्र्यते अनेन पदार्थोपस्थितिरिति तन्त्रं प्रमाणमुच्यते। प्रमाणमुलाभ्युपपगमविषयीकृतः सामान्यविशेषवानर्थः सिद्धान्तः इति सामान्यलक्षणमुक्तं भवति'।[3] इति। 'अभ्युपेतः प्रमाणैः स्यादाभिमानिकसिद्धिभिः। सिद्धान्तः सर्वततन्त्रादिभेदात् सोऽपि चतुर्विधः।'[4] इति। भाष्यकारमते तु विशेषधर्मस्य नियमः इति सिद्धान्तः। सिद्धान्तोऽयं चतुर्विधः सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तः चेति। तथाहि न्यायसूत्रम्- 'स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् [5] इति। 'सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः' [6], 'समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः'[7], 'यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः'[8], 'अपरीक्षिताभ्युपमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः'[9] इति सिद्धान्तचतुष्टम्।

**अधिकरणसिद्धान्तस्य न्यायशास्त्रीयसिद्धान्तावगमने उपयोगिता-** अधिकरणसिद्धान्तस्य लक्षणं यथा- 'यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः'[10] इति। यस्य सिद्धौ यत्सिद्धौ। यत्सिद्धौ नाम यस्य अर्थस्य सिद्धौ इति। यस्य अर्थस्य सिद्धौ प्रस्तुतार्थस्य सिद्धिः भवति सः अदिकरणसिद्धान्तः। प्रस्तुतार्थस्य अनुषङ्गी अयमर्थः भवति। प्रस्तुतार्थं प्रति सोऽर्थः अधिकरणसिद्धान्तः। अत्र उदाहरणं किञ्चित् दिङ्मात्रमुदाह्रियते-

१. **मङ्गलाचरणस्य शिष्टाचारविषयत्वसिद्धौ वेदबोधितकर्तव्यताकत्वसिद्धिः-** आस्तिकैः ग्रन्थारम्भे ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलं कृतम्। पूर्वं गुरुवर्याः शिष्टाः एवम् आचरणं कृतवान् अतः सर्वे एवम् आचरन्ति। अतः प्रत्यक्षेण एव मङ्गलस्य शिष्टाचारविषयत्वं सिद्धमिति। ननु कथं शिष्टाः एवं कुर्युः? 'समाप्तिकामो मङ्गलमाचरेत्' इति अनुमितश्रुतिविधानात् शिष्टाः एवम् आचरन्ति। मङ्गलस्य वेदबोधितकर्तव्यताकत्वं शिष्टाचारविषयत्वसिद्धौ एव सिद्ध्यति। मङ्गलस्य शिष्टाचारविषयत्वसिद्धौ वेदबोधिककर्तव्यताकत्वसिद्धिः इति अधिकरणसिद्धान्तः, यत्सिद्धौ अन्यप्रकरणसिद्धिः इति नियमात्।

**२. द्व्यणुकादीनां सावयवत्वसिद्धौ परमाणोः अस्तित्वसिद्धिः**

त्र्यणुकं (जालसूर्यमरीचिस्थं रजः) सावयवं चाक्षुषत्वात् इत्यनेन त्र्यणुकस्य सावयवत्वं सिद्धम्। त्र्यणुकावयवः(द्व्यणुकं) सावयवः महदारम्भकत्वात् यत्र यत्र महदारम्भकत्वं तत्र तत्र सावयवत्वमिति व्यप्ति इत्येनन द्व्यणुकस्य अवयवत्वसिद्धिर्भवति। द्व्यणुकस्य योऽवयवः स एव परमाणुः। अतः द्व्यणुकस्य अवयवत्वसिद्धौ एव परमाणोः अस्तित्वसिद्धिर्भवति। यत्सिद्धौ अन्यप्रकरणसिद्धिरिति नियमात् अत्र अधिकरणसिद्धान्तः

**३. द्व्यणुकादीनां कर्तृजन्यत्वसिद्धौ ईश्वरस्य सर्वज्ञत्वसिद्धिः**

अयम् अधिकरणसिद्धान्तः शास्त्रार्थावगमे बोधकः। यथा न्यायशास्त्रीयसिद्धान्ते अस्य उपयोगाता वर्तते एव। यथा न्यायशास्त्रस्य

[1] न्यायसूत्रवृत्ति-१.१.२६, पृ.१९३।
[2] तात्पर्यटीका
[3] न्यायमञ्जरी
[4] तार्किकरक्षा
[5] न्यायसूत्रम्, १.१.२७, पृ.२७३।
[6] न्यायसूत्रम्, १.१.२८
[7] न्यायसूत्रम्, १.१.२९
[8] न्यायसूत्रम्, १.१.३०
[9] न्यायसूत्रम्, १.१.३१
[10] न्यायसूत्रम्, १.१.३०

प्रधानः विषयः ईश्वरसिद्धिः। लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इति नियमात् नित्यज्ञानाधिकरणत्वम् ईश्वरत्वमिति लक्षणमुदीरितम्। परन्तु तदस्तित्वे किं मानम्? रूपाभावात् बाह्यप्रत्यक्षं नोपात्तम्। आत्मगुणादिव्यतिरिक्तत्वात् न मानसप्रत्यक्षम्। लिङ्गाभावात् नाप्यानुमानम्। तत्सादृश्याभावात् नाप्युपमानम्। तत्साधानागमाभावात् नापि शब्दः इति चेन्न। अङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत्। अङ्कुरादिपदेन द्व्यणुकं ग्राह्यम्। सकर्तृकं नाम कर्तृजन्यम्। यत्र यत्र कार्यत्वं तत्र तत्र कर्तृजन्यत्वम् यथा घटः। द्व्यणुकं कार्यम्, अतः द्व्यणुकं सकर्तृकम्। अनेन द्व्यणुकस्य सकर्तृकत्वं सिद्धति। ननु किं नाम कर्तृत्वम्? उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। उपादानं नाम समवायिकारणम्। उपादानकारणविषये प्रत्यक्षज्ञानं, चिकीर्षा, कृतिः यस्यास्ति स कर्ता। घटकार्यस्य उपादानकारणं कपालः, कपालविषये प्रत्यक्षज्ञानं, चिकीर्षा, कृतिः कुलालास्य अस्ति, अतः घटकार्यस्य कर्ता कुलालः। द्व्यणुककार्यस्य समवायिकारणं परमाणुः, तद्विषये प्रत्यक्षज्ञानं, चिकीर्षा, कृतिः अस्मादादिनां न सम्भवति परमाणोः अतीन्द्रियत्वात्। अतः तज्ज्ञातृत्वेन ईश्वरस्य सिद्धिः भवति। अतः द्व्यणुकादीनां कर्तृजन्यत्वसिद्धौ एव ईश्वरस्य सर्वज्ञत्वं सिद्ध्यति

**४. योऽहं घटम् अद्राक्ष्यं सोऽहमिदानीं स्पृशामि इति प्रतिसन्धानात् इन्द्रियेभ्यः आत्मनः भिन्नत्वसिद्धौ इन्द्रियस्य नानात्वसिद्धिः।**

योहम् घटम् अद्राक्ष्यं सोऽहमिदानीं घटं स्पृशामि इति प्रतिसन्धानात् प्रतीयते ज्ञाता इन्द्रियेभ्यः भिन्नः। योऽहं सोऽहमिति प्रतिसन्धानात् एकस्मिन् अर्थे इन्द्रियस्य भवितुं नार्हति, चक्षुरिन्द्रियेभ्यः भिन्नः आत्मा। योहम् घटम् अद्राक्ष्यं सोऽहमिदानीं घटं स्पृशामि इत्यनेनापि इन्द्रियाणां नानात्वमपि सिद्ध्यति। इन्द्रियेभ्यः आत्मनः भिन्नत्वे सिद्धौ इन्द्रियस्य नानात्वं सिद्धति। अतः अत्र अधिकरणसिद्धान्तः यत्सिद्धौ अन्यप्रकरणसिद्धिः इति नियमबलात्।

**उपसंहारः**

न्यायशास्त्रेषु पदार्थावगमे सिद्धान्तावगमे च सिद्धान्तादिपदार्थानां करणत्वेनोपयोगः स्यात्। परन्तु नैकेषु विशिष्टस्थानेषु अधिकरणसिद्धान्तस्य परमोपयोगः कल्पते। तन्मध्ये ईश्वरस्य सर्वज्ञत्वसिद्धिः, इन्द्रियाणां नानात्वमिति सिद्धान्ताङ्गीकारे। अस्मिन् शोधप्रबन्धे उदाहरणचतुष्टयम् एव प्रदत्तम्। अस्य महदुपयोगः न्यायसिद्धान्तग्रहणे अस्तीति निश्चप्रचं वक्तुं शक्यते। अधिकरणसिद्धान्तस्य उपयोगः न्यायशास्त्रीयसिद्धान्ते इति स्वप्लीयसा वचसा वक्तुं न शक्यते अतः विरतिरेव श्रेयसे इति शिवम्॥

**सन्दर्भग्रन्थसंकेताः**


गौतमः। *न्यायदर्शनम् (प्रथमभागः)।* सम्पा. फणिभूषणतर्कवागीशः। कलिकाता : संस्कृतवुकडिपो, २०१४।

गौतमः। न्यायदर्शनम् (द्वितीयखण्डः)। सम्पा. फणिभूषणतर्कवागीशः। कलिकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०२३।

वात्स्यायनः। *न्यायभाष्यम्।* सम्पा. द्वारिकादासशास्त्री। वारणासी : साधना प्रेस, १९९८।

विश्वनाथन्यायपञ्चाननः। *न्यायसूत्रवृत्तिः।* सम्पा. सेख-साविर-आलि। कलिकाता : संस्कृतपुस्तकभाण्डार, २०१५।

विश्वनाथन्यायपञ्चाननः। *बालप्रियाहिन्दीव्याख्यायुता आलोकसंस्कृतव्यख्यासमलंकृता न्यायसिद्धान्तमुक्तावली।* सम्पा. आचार्यलोकमणिदाहालः डां गजाननशास्त्रीमुसलगांवकरश्च। वाराणसी : चौखाम्बा सुरभारती प्रकशन, २०१४।

विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः।* सम्पा. पञ्चाननशास्त्री। कलिकाता : महाबोधिवुक एजेन्सि, २०१६।

शङ्करमिश्रः। *वैशेषिकसूत्रोपस्कारः।* सम्पा. सेखसाविर-आलि। कलिकाता, संस्कृत वुक डिपो, २०१३।

# शाब्दिकद्रव्यविमर्शः

**उत्तमघोषः, शोधच्छात्रः,**
**रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थनम्,**
**दूरवाणी- 9733053918,**
ईमेल- uttamghoshvedvid@gmail.com

**पत्रसारः-** अत्र पत्रे प्राधान्येन मञ्जूषादिशा द्रव्यपदार्थो विवेचितः। तत्रादौ व्यडिमते जातिगुणक्रियादीनां सर्वेषां द्रव्यत्वमस्त्येवेति सयुक्ति प्रतिपादितम्। तदनुषङ्गेण सर्वनामपरामर्शयोग्यत्वं द्रव्यत्वम्, भेद्यत्वेन विवक्षितोऽर्थो द्रव्यम्, अत इति यत्प्रतीयते तद्द्रव्यम् इत्यादीनि हरियस्कादीनां द्रव्यलक्षणानि विवृतानि। गुणसमुदायाद्द्रव्यं पृथग्भवति न वेति पक्षो विविधैर्भाष्यप्रमाणैर्व्यवस्थापितः। अन्ते च कैयटादिवचनानुगुण्येन परमार्थतया द्रव्यपदवाच्यं किं भवतीत्यपि विमृष्टम्।

**मुख्यपदानि-** भेद्यत्वम्, भेदकत्वम्, प्रकृतिः, भावः, वस्तूपलक्षणम्, प्रकारः, सामानाधिकरण्यम्।

**शाब्दिकद्रव्यविमर्शः**

द्रव्यशक्तिवादे जातिविशिष्टद्रव्यस्योपस्थितिरिति तत्र जातिरस्ति, किन्तु द्रव्याभिधानं व्यडिरित्यादौ व्यडिमते तु जातिर्नास्त्येव। जातिरपि द्रव्यपदवाच्या। अत एव कैयटेनोक्तम्- जातिशब्दो यदा जातौ वर्तते तदारोपितस्वरूपां स्वरूपेणैकीकृतां जातिमाहेति तदा तेषां स्वरूपं स्वार्थः, जातिस्तु द्रव्यम्। एवं गुणोऽपि द्रव्यम्। क्रियापि द्रव्यमिति।[1]

**व्याडिमतम्**

व्याडिमते जातिर्गुणः क्रिया वा यः कोऽपि यदि शब्देनोच्येत तर्हि तत् द्रव्यम। अतः तन्नये पृथक्तया जतिगुणक्रियाशब्दाः न सन्ति, सर्वेऽपि द्रव्यवाचका एव। गोघटादिशब्दाः मुख्यतया द्रव्यवाचकाः, क्वचिच्च जातिगुणादिशब्दा उपचरिततया द्रव्यवाचकाः। अत एव द्रव्यलक्षणमुक्तम्-

**"वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।**
**द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः॥"**[2]

अत्र तावत् द्रव्यस्य लक्षणद्वयमुक्तम्। प्रथमं तावत् वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते इति। सर्वनाम्नां द्वयी रीतिः। वस्तुमात्राभिधायिनः केचन सर्वनामशब्दा भवन्ति यथा सर्वादयः। विशिष्टवस्तुवाचकाश्च केचन भवन्ति यथान्तरादयः। तत्र इदं तत् इत्यादिसर्वनामशब्दैः अङ्गुलिनिर्देशेन यद्वस्त्वभिधीयते तद्द्रव्यपदवाच्यम्। अत एव **सर्वनामपरामर्शयोग्यं द्रव्यमिति** तल्लक्षणं विद्वांसो वदन्ति। निरुक्तकारोऽपि समानमेव द्रव्यलक्षणं समर्थयति- **अत इति यत् प्रतीयते तद् द्रव्यमिति।**[3]

श्लोकद्वितीयार्धेन भेद्यत्वेन विवक्षितोऽर्थोऽपि द्रव्यमित्युच्यते। भेद्यं विशेष्यम्, भेदकं विशेषणं भवति। एवञ्च भेद्यत्वेन विशेष्यत्वेन विवक्षितऽर्थोऽपि द्रव्यमेव भवति। विवक्षित इति कथनेन लोकेऽनुभवसिद्धस्य नेदं लक्षणमपि तु यल्लोके अनुभवसिद्धं द्रव्यं नास्ति जातिगुणक्रियादिष्वन्यतमोऽस्ति तमेव किञ्चिन्निरूपितविशेष्यत्वेन विवक्षित्वा तस्य द्रव्यत्वं सिध्यति।[4]

**जात्यादीनां द्रव्यत्वमेव**

एवञ्च निरुक्तद्रव्यलक्षणस्वीकारेण जातेः विशेष्यत्वविवक्षायां द्रव्यत्वमेव। एवमेव किं पचति किं आस्यते किं स्थीयते इत्येवं रीत्या तिङर्थक्रियाया पच्यादेः किमादिभिः सर्वनामशब्दैः परामर्शयोग्यत्वात् प्रथमलक्षणेन क्रियाया अपि द्रव्यत्वं सिध्यति।

---

1 "कुत्सिते"(५.३.७४) इति सूत्रभाष्ये कैयटः।

2 वा.प.- ३.४.३।

3 इदं शब्दात् पञ्चम्याः तसिल् इति सूत्रेण तसिलप्रत्यये निष्पन्नः अत इति शब्दः, तेन इदमादिसर्वनामशब्दबोध्यं यत्तद्द्रव्यमित्यायातम्। क्वचित् अद इति यत् प्रतीयते तद् द्रव्यम् इति पाठभेदोऽपि लभ्यते।

4 विवक्षित इत्यनेन न वस्त्वर्थस्येदं लक्षणम्, अपि तु शब्दार्थस्येदं लक्षणमित्युक्तम्- वै.सि.ल.म.- पृ १३०।

सुखमित्येवमादिभिः विशेषत्वाद्द्वितीयेन लक्षणेनापि[1] क्रियाया द्रव्यत्वसिद्धिः, किञ्च दीक्षितकौण्डभट्टादीनां मते संख्यायाः कर्तृप्रत्ययसमभिव्याहारे कर्तरि कर्मप्रत्ययसमभिव्याहारे च कर्मणि अन्वयः किन्तु नागेशमते आख्यातार्थसंख्याया कश्चनविशिष्टसम्बन्धेन धात्वर्थक्रियायामेवान्वयः इति परे तु इत्यादिना आख्यातार्थवादे तेनैव सिद्धान्तितम्।

क्रियाया द्रव्यत्वे पाणिनिप्रमाणमप्यस्ति तथाहि **"युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः"(१.४.५)**, **"अस्मद्युत्तमः"(१.४.५)**, **"शेषे प्रथमः"(१.४.५)** इत्यादिषु यदा युष्मदादिना धात्वर्थस्य सामानाधिकरण्यं तदा मध्यमपुरुषादिकं स्यात्। त्वं पठसि, अहं पठामि, स पठति। अत्र युष्मदादिशब्दाः द्रव्यवाचकाः, तैः धात्वर्थस्य तदैव सामानाधिकरण्यं सम्भवति यदा धातुरपि द्रव्यं भवति। एवञ्चात्र तयोस्सामानाधिकरण्यप्रतिपादनात् धातोरपि द्रव्यत्वमङ्गीकृतं पाणिनिना।

गुणस्यापि द्रव्यत्वमेव। गुणशब्दा द्विविधा भवन्ति, केचन केवलगुणवाचकाः रूपघनादयः, केचन गुणिगुणिनोरुभयोर्वाचकाः शुक्लादयः। सर्वेऽपि गुणशब्दाः पूर्वोक्तलक्षणेन द्रव्यवाचका भवति। अत्रापि पाणिनेरस्ति सम्मतिः। तथाहि सूत्रमस्ति **"तस्य भावस्त्वतलौ"(५.१.११९)** इति। द्रव्यस्य भाव[2]प्रकटनाय त्वतलौ क्रियेते। तत्रैव भाष्यवार्तिमस्ति यस्य गुणस्य भावात् द्रव्ये शब्दाभिनिवेशः तदभिधाने त्वतलाविति। भावादित्यस्य विद्यमानादित्यर्थः। तेन अवश्यं तत्र द्रव्येषु गुणास्सन्त्येव, गुणाश्रयस्यैव द्रव्यत्वम्। तत्र गुणस्य अनङ्गीकारे कथञ्चिदपि ततः गुणं विशेष्यत्वेन विवक्षित्वा त्वतलोः सम्भवः।

### गुणस्य द्रव्यत्वे विप्रतिषिद्धसूत्रोदाहणासङ्गतिः

नन्वेवं गुणस्यापि द्रव्यत्वाङ्गीकारात् शीतादीनामपि द्रव्यत्वेन विप्रतिषिद्धसूत्रोदारणासङ्गतिः। तथाहि सूत्रमस्ति **"विप्रतिषिद्धं चानधिकरणवाचि"(२.४.१३)** इति अत्र सूत्रे अधिकरणशब्देन द्रव्यं बुध्यते। अद्रव्यार्थानां विरुद्धार्थानां वा द्वन्द्वो वा एकवद् भवति इति सूत्रार्थः। अस्योदाहणम्- शीतोष्णम्, शीतोष्णे। जीवितमरणम्, जीवितमरणे। सुखदुःखम्, सुखदुःखे। शीतादीनामपि सम्प्रति द्रव्यत्वाद् अद्रव्यार्थानामेव द्वन्द्वे अनेन सूत्रेण एकवद्भावे कथमस्य सूत्रस्योदाहरणं शीतोष्णमिति।

### तन्त्रान्तरप्रसिद्धद्रव्यग्रहणात्सङ्गतिः

अत्र समाधानरूपेणोच्यते गुणवद् द्रव्यम् इति वैशेषिकतन्त्रप्रसिद्धस्य द्रव्यस्य ग्रहणं न तु सर्वनामपरामर्शयोग्यं वैयाकरणानां द्रव्यम्।[3] किमत्र कारणमिति चेदुच्यते **"विप्रतिषिद्धं चानधिकरणवाचि"(२.४.१३)** इति सूत्रेण सुबन्तावयवकस्य द्वन्द्वस्यैक-वद्भावविधानात् सुबन्तस्य च सर्वस्य जात्युपहितद्रव्यवचनत्वेन अनधिकरणवाचि इति प्रतिषेधः सार्वत्रिकः स्यादिति विधेर्निर्विषयत्वमायातमिति विधिसामर्थ्यात् प्रतिषेधः गुणवद् द्रव्यमित्यादिप्रसिद्धद्रव्यविषयो विज्ञायते। एवञ्च वस्तूपलक्षणमिति वैयाकरणानां द्रव्यलक्षणं सार्वत्रिकं नास्ति। यत्र काणादपरिभाषितद्रव्यग्रहणे व्याकरणशास्त्रीयप्रक्रिया न निरुह्यते तत्र वैयाकरणानां द्रव्यलक्षणमङ्गीकार्यम्, यत्र च वैयाकरणानां द्रव्यलक्षणाङ्गीकारे व्याकरणशास्त्रीयप्रक्रिया न निरुह्यते तत्र काणादोक्तमेव द्रव्यं ग्राह्यम्। यथा **"किमेत्तिङव्ययघादाम्वद्रव्यप्रत्यक्षे"(५.४.११)**[4] इत्यत्र वैयाकरणाभिमतं वस्तूपलक्षणमिति द्रव्यलक्षणाङ्गीकारे उच्चैस्-इत्यादीनामपि द्रव्यत्वाद् उच्चैस्तराम्, उच्चैस्तमाम् इत्याद्युदाहणमस्य सूत्रस्य न स्यात् अद्रव्यप्रत्यक्षे इति प्रतिषेधात्। अत एतादृशस्थलेषु तन्त्रान्तरप्रसिद्धद्रव्यग्रहणेनैव कार्यं साधनीयम्।

### द्रव्यविषये मतान्तराणि

व्याकरणमहाभाष्ये द्रव्यविषये भगवतः पाणिनेः तत्र तत्र मतद्वयं प्राप्यते, प्रथमं तावत् गुणात् गुणसमुदायात् वा पृथक् भवति द्रव्यमिति। द्वितीयं तावत् गुणसमुदाय एव द्रव्यं तयोः पृथक् सत्ता नास्तीति।

---

1 भेद्यत्वेन विवक्षितोऽर्थः द्रव्यमित्यस्ति द्वितीयं द्रव्यलक्षणं हरिमते।

2 प्रकृतिजन्यबोधे प्रकारो भावः।

3 विप्रतिषिद्धं च इत्यादौ तु सामर्थ्यात्तन्त्रान्तरप्रसिद्धद्रव्यग्रहणमिति हेलाराजः- वै.सि.ल.म.- पृ.१३१।

4 किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे। किंतमाम्। प्राह्णेतमाम्। पचतितमाम्। उच्चैस्तमाम्। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः।

**गुणसमुदायात् पृथक् भवति द्रव्यम्**

गुणक्रिययोः आश्रयो भवति द्रव्यम्। समवायसम्बन्धेन गुणस्य क्रियाया वा आश्रयो भवति द्रव्यम्। नैयायिकैरपि अवयवावयविनोः गुणगुणिनोः क्रियाक्रियावतोः जातिव्यक्त्योश्च परस्परं समवायसम्बन्धः स्वीकृतः।

**घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।**

**तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥**[1]

गुणक्रियातिरिक्ततया द्रव्यस्य सत्ता कणादशास्त्रेऽप्यङ्गीकृता- "**क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्।**"[2]

**गुणसमुदायो द्रव्यम्**

गुणात् गुणसमुदायाद्वातिरिक्ततया द्रव्यस्य सत्ता नाङ्गीक्रियते। गुणसमुहात्मकमेव द्रव्यं भवति। गुणरहिततया द्रव्यस्य कदापि प्रत्यक्षं न जायते। स्त्रियाम् इति सूत्रभाष्ये शङ्कासमाधानपूर्वकं गुणसमुदाय एव द्रव्यमिति इति भाष्यकारेण सिद्धान्तितम्- "**द्रव्ये च भवतः कः सम्प्रत्ययः? गुणसमुदायो द्रव्यमिति।**"[3] पतञ्जलिप्रणीतयोगसूत्राणां व्यासभाष्येऽप्युक्तम्-

"**अयुतसिद्धावयवभेदानुगतः समुदायो द्रव्यमिति पतञ्जलिरिति।**"[4]

**पक्षद्वये त्वतलसूत्रभाष्यप्रामाण्यम्**

तस्य भावस्त्वतलाविति सूत्रे द्रव्यं किम्, गुणा वा के इति प्रश्नमुपस्थाप्य **किं पुनरन्यच्छब्दादिभ्यो द्रव्यम्, आहोस्विदनन्यत्?** इति वदता भाष्यकारेण पक्षद्वयस्योपन्यासो विहितः। तत्रादौ शब्दादिगुणेभ्योऽन्यदेव द्रव्यमित्युक्त्वा शब्दरूपादिगुणव्यतिरेकेण द्रव्यस्य पृथगनुपलब्धेः, रूपादिसन्निवेशमात्रे घटादिव्यवहारात् च शब्दादिभ्योऽनन्यद्द्रव्यमित्युक्तम्। यथा पर्णशते विभक्ताः पशोः खण्डा एव समुदायतया पशुः, तत्खण्डव्यतिरिक्ततया पशोरस्तित्वं कल्पयितुं न शक्यते तद्वत् शब्दादिगुणसमुदाय एव द्रव्यं भवति शब्दादिगुणव्यतिरिक्ततया द्रव्यसत्ता कल्पयितुं न शक्यते।

एवञ्च गुणसमुदायस्य द्रव्यत्वं प्रतिपाद्य गुणादिव्यतिरिक्तं पृथगेव द्रव्यमिति पक्षमपि द्रढयति- अन्यच्छब्दादिभ्यो द्रव्यमित्यादिना।[5] अत्र द्रव्यत्वम् अनुमानगम्यम्। यथा अङ्कुराद्यवस्थासु दृष्टानां वनस्पत्यादीनां कालान्तरे देशविशेषसम्बन्धदर्शनादुपचयापचयानुमानं क्रियते यथा वा अश्वादीनां गतिपूर्विकां देशान्तरप्राप्तिम् उपलभ्यादित्यादीनां ज्योतिषाञ्च देशान्तरप्राप्त्या गत्यनुमानं क्रियते तद्वदत्रापि द्रव्यत्वसाधने अनुमानं समाश्रयणीयम्। समानौन्नत्यपारिमाण्डल्यविशिष्टयोः लौहकार्पासयोः तुलाग्रस्यान्यथात्वात् गुरुत्वभेदः। गुरुत्वस्य च समवायिकारणं द्रव्यमित्यधुना गुरुत्वसमाश्रयणात् तयोरपि द्रव्यत्वसिद्धिः। अत्र अनुमानप्रकारः नागेशेनेवं प्रोक्तः- "**द्रव्यं गुणेभ्योऽन्यत्, विशेषवत्त्वात्, यद्यतो विशेषवत् तत्ततोऽन्यत्, यथा लौहकार्पासे परस्परस्मात्**" इति।[6]

गुणव्यतिरिक्तस्य द्रव्यत्वे प्रतिपादने द्वितीयां युक्तिमुपस्थापयन्ति भाष्यकाराः- तथाहि आमलकबदरादीनां विलक्षणतेजस्संयोगात् पाकेन पूर्वरूपादिविनाशेन नूतनरूपादिकमुत्पद्यते। एवञ्च गुणान्तरोत्पत्तावपि यस्य तत्त्वं न विहन्यते तद्द्रव्यम्। आमलकादीनां नूतनपाकजरूपाद्युत्पत्तौ रक्तपीतादयो गुणाः परिवर्तन्ते तत्त्वस्य आमलकत्वस्य नाशस्तु न जायते आमलकमित्येव तत्र

1 न्या.सि.मु.- प्रत्यक्षखण्डः, कारिका-११।

2 वै.सू.- १.१.१५।

3 व्या.म.भा.- पृ ३४२।

4 यो.सू.- पृ ३६५।

5 अन्यच्छब्दादिभ्यो द्रव्यम्, तत्त्वनुमानगम्यम्। तद्यथा - ओषधिवनस्पतीनां वृद्धिह्रासौ, ज्योतिषां गतिरिति।– "तस्य भावस्त्वतलौ" (१.१.७०) इति सूत्रभाष्ये।

6 यदि प्रत्येकं द्रव्यत्वं स्यात्, उच्छ्रायविस्तारयोः साम्यात्तयोरेकत्वापत्त्या तुलाग्रादिविशेषानुपपत्तेः प्रत्येकातिरिक्तस्य तत्तद्गुणविशेषघटितगुणसमूहरूपस्य नानागुरुत्वादिभिरधिकगुरुत्वादिमत्त्वेन भाष्यप्रदर्शितविशेषसिद्धिरित्यतिरिक्तसमूहरूपद्रव्यसिद्धिरिति भाष्याभिप्रायः- "तस्य भावस्त्वतलौ" (१.१.७०) सूत्रे उद्योते, पुटसंख्या- २९८)

व्यवहारादतस्तेषां द्रव्यत्वम्।[1]

**स्त्रियामिति सूत्रभाष्यम्**

स्त्रियामिति सूत्रभाष्ये आदौ गुणसमुदायं द्रव्यत्वेन विवक्षित्वा तदनु चिकीर्षा गोतेत्यादिषु दोषप्रदर्शनपुरस्सरं सर्वनामपरामर्शयोग्यत्वं द्रव्यत्वमिति स्वीकृतम्।[2] तथा स्वीकारेऽपि गार्ग्यायणी, कारीषगन्ध्या, कालितरेता-इत्यादिषु दोषास्सन्तीति पूर्वपक्षमुपस्थाप्य समाहितम्। तथाहि- इदन्तदादिसर्वनामशब्दैः परामर्शयोग्यं वस्तु द्रव्यमिति स्वीकारे गर्ग्यायणीत्यादिषु एकमेव स्त्रीत्वं समुदायवाच्यम्, तदर्थं तु एक एव प्रत्ययः स्यात् न त्वपरस्तेन ष्फप्रत्यात् ङीप् न स्यात्, कारीषगन्ध्येत्यत्र ष्यङः चाप् न स्यात्, कालितरेत्यत्र तु कालीशब्दस्थेन स्त्रीप्रत्ययेन कालितरशब्दगतस्त्रीत्वस्यापि बोधने ततष्टाप् न स्यात् इत्येवमाक्षेपानन्तरं क्रमशः तत्समाधत्ते गार्ग्यायणी इत्यत्र षित्करणसामर्थ्यात् ङीष्, कारीषगन्ध्या इत्यत्र यङश्चाप् इत्यत्र वावचनात्, कालितरा इत्यत्र प्रकृष्टार्थविवक्षणाच्च टाप् सुतरां सिध्यतीति परिहार उक्तः। भाष्यकारेणोक्तम्- "**कालितरेति। न यावत्काली तावत्कालितरेति। किं तर्हि? प्रकृष्टा काली कालितरा। यच्छब्दरूपं प्रकर्षे वर्तते तस्यानुक्तं स्त्रीत्वमिति कृत्वा टाब्भविष्यति।**"[3]

**"चादयोऽसत्त्वे"(१.४.५७) इति सूत्रभाष्यम्**

चादयोऽसत्त्वे इति सूत्रे सत्त्वपदेन द्रव्यमुच्यते[4] अन्यथा सत्त्वपदेन सत्ताङ्गीकारे प्रतिषेधोऽनर्थकः स्यात्, यतो हि चादिगणे सत्तावाची कश्चिदपि शब्दो नास्ति। किञ्च पशुर्वै पुरुष इत्यत्रापि पशुशब्दस्य निपातत्वं स्यात् तस्य चादौ विद्यमानत्वात्। अतः तत्र सत्त्वपदेन द्रव्यं स्वीकृत्य कैयटेनोक्तम् द्रव्यशब्देन चात्र सिद्धरूपं वस्त्वभिधीयते। तत्रैव नागेशोनोक्तम् - सिद्धत्वञ्च लिङ्गसंख्याकारकान्वयित्वेन सर्वनामपरामर्शयोग्यत्वेन वेति। तेन च वा इत्यादीनां लिङ्गसंख्याद्यन्वयायोगात् अद्रव्यत्वात् निपातसंज्ञा प्राणिवाचकपशुशब्दस्य च लिङ्गाद्यन्वययोगात् द्रव्यत्वात् न निपातसंज्ञेति व्यवस्था सिध्यति।

**परमार्थद्रव्यम्**

परमार्थतया द्रव्यपदवाच्यं भवति ब्रह्म एव। अन्ततोगत्वा सर्वेषां तत्रैवावसानम्। "**सिद्धे शब्दार्थसम्बन्धे**"[5] इति कात्यायनस्य प्रथमे वार्तिके सिद्धपदं नित्यपर्यायवाचि। तदेव ब्रह्म भवति। उक्तञ्च तत्र कैयटेन "**असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वम् इह द्रव्यशब्दवाच्यम्**" इति। भर्तृहरिणापि ब्रह्मरूपं परमार्थसत्यमेव द्रव्यत्वेनाभिहितम्। उक्तञ्च तेन- निराकारस्य बुद्ध्युपारोहायोगात् यथाप्रत्ययं भेदावसायस्य बाध्यमानत्वादनुयाय्यभिन्नमेव रूपं परमार्थतः। तदेव ब्रह्मरूपं सत्यम्॥-

**"सत्यं वस्तु तदाकारैरसत्यैरवधार्यते।**
**असत्योपाधिभिः शब्दैः सत्यं एवाभिधीयते॥"**[6]


**परिशीलितग्रन्थसूची**

1. कौण्डभट्टः। वैयाकरणभूषणसारः। प्रभादर्पणव्याख्याद्वयोपेतः। बालकृष्णः पञ्चोली(सम्पा०)। वाराणसी। चौखम्बा संस्कृत संस्थान। २००६।
2. कौण्डभट्टः। वैयाकरणभूषणसारः- काशिका, दर्पणम्। सम्पा.- नन्दकिशोरशास्त्री। चौखम्बा सुरभारती प्रकाशन, वाराणसी।


1 अथ वा यस्य गुणान्तरेष्वपि प्रादुर्भवत्सु तत्वं न विहन्यते तद् द्रव्यम्। किं पुनस्तत्वम्? तद्भावस्तत्वम्। तद्यथा - आमलकादीनां फलानां रक्तादयः पीतादयश्च गुणाः प्रादुर्भवन्ति, आमलकं बदरमित्येव भवति॥- "तस्य भावस्त्वतलौ" (१.१.७०) इति सूत्रभाष्ये, पुटः-२९८)

2 कस्य तावद्भवान् एकं गुणं न्याय्यं मन्यते स्त्रीत्वं नाम? द्रव्यस्य। द्रव्ये च भवतः कः सम्प्रत्ययः? यदि तावद् गुणसमुदायो द्रव्यम्। का गतिर्य एते भावाः कृदभिहितास्तद्धिताभिहिताश्च -चिकीर्षा, गोतेति॥– "स्त्रियाम्"(४.१.३) इति सूत्रभाष्ये।

3 स्त्रियाम्"(४.१.३) इति सूत्रभाष्ये, पृ-३०।

4 अयं सत्त्वशब्दः अस्त्येव द्रव्यपदार्थकः। तद्यथा सत्त्वमयं ब्राह्मणः, सत्त्वमियं ब्राह्मणी। अस्ति क्रियापदार्थकः सद्भावः सत्त्वमिति। कस्येदं ग्रहणम्? द्रव्यपदार्थकस्य। कुत एतत? एवं च कृत्वा विधिः सिद्धो भवति, प्रतिषेधश्च- "चादयोऽसत्त्वे"(१.४.५७) इति सूत्रभाष्ये, पृ.२८२।

5 सिद्धे शब्दार्थसंबन्धे लोकतः अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते- पस्पशाह्निके वररुचेः प्रथमवार्तिकम्।

6 वा.प.- ३.२.१।

3. कौण्डभट्टः। वैयाकरणभूषणसारः। दर्पणः, सुबोधिनी च। सम्पा. चन्द्रिकाप्रसादद्विवेदी। चौखम्बा संस्कृत प्रतिष्ठान। वाराणसी।
4. गदाधरभट्टाचार्यः। शक्तिवादः। सम्पादकौ- डा.श्रीनिवासवरखेडी डा.वीरनारायणपाण्डुरङ्गी च। संस्कृत अकाडमी। उस्समानियाविश्वविद्यालयः। हैदरावाद्। २०१०।
5. गदाधरभट्टाचार्यः। शक्तिवादः। सम्पा.- डा.गब्बिटजयमाणिक्यशास्त्री। भारतीय विद्या।२०२३।
6. नागेशभट्टः। परमलघुमञ्जूषा। भावप्रकाशिका बालबोधिनी। सम्पा. जयशङ्करलालत्रिपाठी। चौखम्बा कृष्णदास अकादमी। वाराणसी।२०२२।
7. नागेशभट्टः। परमलघुमञ्जूषा।किरणावली, हिन्द्यनुवादश्च। सम्पा. आचार्यलोकमणिदाहालः। चौखम्बा सुरभारती प्रकाशन, वाराणसी। २०१३।
8. नागेशभट्टः। परमलघुमञ्जूषा। तत्त्वप्रकाशिका, विवृतिः। सम्पा. उदयनाथझा। नाग पाब्लिशर्स।२००४।
9. नागेशभट्टः। वैयाकरणसिद्धान्तलघुमञ्जूषा। कला कुञ्चिका सरला(हिन्दी) इति व्याख्यात्रयोपेता। सम्पा. आचार्यश्रीरामप्रसादत्रिपाठी। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः। वाराणसी। १९९०।
10. नागेशभट्टः। वैयाकरणसिद्धान्तलघुमञ्जूषा। नागेशभावप्रकाशव्याख्यासहिता। सम्पा. आचार्यजानमद्दिरामकृष्णः। राष्ट्रियसंस्कृतविश्वविद्यालयः। तिरुपतिः। २०२१।
11. भर्तृहरिः। वाक्यपदीयम्। पुण्यराजकृतप्रकाशसंबलितं हरिवृषभकृतवृत्तिसंबलितं नारायणहिन्दीव्याख्यासंबलितञ्चेति टीकात्रयोपेतम्। द्वितीयो भागः। हरिनारायणतिवारी। चौखम्बा संस्कृत सीरीज आफिस। वाराणसी।२०१५।
12. भर्तृहरिः। वाक्यपदीयम्। श्रीहेलाराजविरचितया प्रकाशव्याख्यया रघुनाथशर्मणा विरचितया अम्बाकर्त्री-व्याख्यया सहितम्। सम्पा. रघुनाथशर्मा। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः। वाराणसी। १९९७।
13. महर्षिपतञ्जलिः। व्याकरणमहाभाष्यम्। प्रदीपोद्योतभावबोधिनीहिन्दीव्याख्यासमुल्लसितम्। जयशङ्करलालत्रिपाठी (सम्पा०)। कृष्णदास अकादेमी। वाराणसी। २०१३।

# शारीरकमीमांसाभाष्यदिशा इष्टादिकारिणां चन्द्रलोकगतिप्राप्तिपर्यालोचनम्

कार्त्तिक मण्डलः
शोधच्छात्रः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
दूरवाणीसंख्या-9674420808,
ई-मेल् -kartik13m@gmail.com

**सारांशः-** इष्टादिकारिण एव केवलं चन्द्रमसं गच्छन्ति। अनिष्टादिकारिणः तु यमालयं गत्वा यमयातना अनुभूय इमं लोकम् आगच्छन्ति। अतः इष्टादिकारिणामेव चन्दलोकगमनं न तु अनिष्टादिकारिणाम्।

**मुख्यशब्दाः-** शारीरकमीमांसा, इष्टादिकारिणः, चन्द्रलोकगतिप्राप्तिः।

**उपोद्घातः-** जगत्यस्मिन् दुःखं मृत्युश्च चेति एतद्वयं जीवानां सर्वदा भवति। अतः दुःखनिवारणं मृत्युभयाद् रक्षणं च कः न इच्छति। अर्थात् जीवाः सर्वदा दुःखपरिहाराय मृत्योः रक्षणाय च प्रयत्नमानाः सन्ति इति लोके परिदृश्यते। श्वः कथं दुःखाभावः स्यात् कथं वा सुखादिकं च स्यादिति विषये मनुष्याः सर्वदा चिन्तामग्नाः भवन्ति। किञ्च अस्मात् जन्मन उत्तरजन्मसु का स्थितिः स्यात्, तत्स्थितौ अपि सुखादिलाभाय दुःखोद्भवनिवारणाय च के प्रयासाः भवन्ति, तदर्थम् अस्मिन् जन्मनि किं करणीयं जीवनस्य जनिमृत्युचक्रम् एवं प्रकारेण अनन्तकालं प्रवर्तिष्यति वा, तस्य कोऽपि विरामः नास्ति वा इति सर्वेऽपि प्रश्नाः मनुष्यानां भवन्ति। तदा प्रत्यक्षादिप्रमाणपुरस्सरं क्रियमाणे अन्वेषणे आदौ तत्पुरुतः दर्शनानि एव अवतिष्ठन्ते। अतः मुमुक्षुलोकमनुजिघृक्षया परमकारणिको भगवान् बादरायणः ब्रह्मसूत्रं रचितवान्।

**विमर्शः-** इष्टादिकारिणां चन्द्रलोकगतिप्राप्तिः इति अयं विषयः ब्रह्मसूत्रस्य तृतीयाध्यायस्य अनिष्टादिकार्यधिकरणे प्रतिपादितं वर्तते। अस्मिन् ब्रह्मसूत्रनामकग्रन्थे ४अध्यायाः १६पादाः १९१अधिकरणानि ५५५सूत्राणि सन्ति। तत्र अनिष्टादिकार्यधिकरणं ब्रह्मसूत्रस्य तृतीयाध्यायस्य प्रथमपादस्य तृतीयाधिकरणं वर्तते।

अनिष्टादिकारिणां यमलोके गमनं न तु चन्द्रलोके इति अस्य अधिकरणस्य प्रतिपाद्यविषयः। प्रथमाधिकरणे इष्टादिकारिणाम् चन्द्रोलोके गमनम् इति यत् प्रतिपादितं, तत् न युक्तम्। यतोहि "ये वै के च अस्मात् लोकात् प्रयन्ति चन्द्रमसम् एव ते सर्वे गच्छन्ति"[1] इति श्रुतेः अनिष्टादिकारिणामपि चन्द्रलोकं गमनम् अवगम्यते। तस्मात् प्रथमाधिकरणेन सह अस्य अधिकरणस्य आक्षेपसङ्गतिः सिध्यति। इष्टादिकारिणः एव चन्द्रमसं गच्छन्ति इति निर्धारयितुम् अधिकरणमिदमारभ्यते।

इष्टादिकारिणः चन्द्रलोकं गच्छन्ति इति प्रथमाधिकरणे उक्तम्। किन्तु अनिष्टादिकारिणः ते चन्द्रलोकं गच्छन्ति न वा इति आदौ अत्र संशयः उत्पद्यते। अत्र पूर्वपक्षिणां मते इष्टादिकारिणः एव केवलं चन्द्रलोकं गच्छन्ति इति न। कथमिति चेत्-अनिष्टादिकारिणः अपि चन्द्रलोकं गच्छन्ति इति श्रूयते। "ये वै के च अस्मात् लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इति श्रुतिरेव तत्र मानम्। जायमानानां देहारम्भः चन्द्रप्राप्तिम् अन्तरेण न अवकल्पते "पञ्चम्याम् आहुतौ"[2] इति आहुतिसंख्यानियमात्। तस्मात् सर्वे एव चन्द्रलोकं गच्छन्ति।

- **शङ्का**

इदानीम् अत्र शङ्का भवति यत्- इष्टादिकारिणाम् इतरेषाम् अनिष्टादिकारिणाञ्च समानगतित्वं न् युक्तम्।

- **समाधानम्**

तदा समाधानत्वेन उच्यते यत्- इतरेषां चन्द्रमण्डले भोगाभावात्। अर्थात् अनिष्टादिकारिणः चन्द्रोलोकं गच्छन्ति, किन्तु तत्र तेषां कोऽपि भोगः न भवति।

---

[1] कौ.उ-१.२

[2]छा.उ-५.९.१

- **सिद्धान्तः**

**'संयमने त्वनुभूयेतरेषामारोहोवरोहौ तद्गतिदर्शनात्'**[1] इति। सूत्रे 'तु' इति शब्दः पूर्वपक्षं व्यावर्तयति। अर्थात् पूर्वस्मिन् सूत्रे यत् उक्तम् आसीत् सर्वे एव चन्द्रलोकं गच्छन्ति इति तत् न युक्तम्। यतोहि चन्द्रलोकगमनं भोगाय एव, न तु निष्प्रयोजनाय, नापि प्रत्यवरोहाय। यथा कोऽपि वृक्षम् आरोहति पुष्पफलोपादानाय एव, न तु निष्प्रयोजनाय, नापि पतनाय। अनिष्टादिकारिणां चन्द्रलोके कोऽपि भोगः नास्ति। तस्मात् इष्टादिकारिणः एव केवलं चन्द्रलोकं गच्छन्ति। ते अनिष्टादिकारिणः तु यमलोकम् आरुह्य, तत्र यमालये स्वपापानुरूपां यामीयातनाम् अनुभूय पुनः इमं लोकं प्रत्यवरोहन्ति। एवं प्रकारेण तेषाम् आरोहावरोहौ भवतः। कुतः? इति चेत्- तद्गतिदर्शनात्। "न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्। अयं लोको नास्ति पर इति मानि पुनः पुनर्वशमापद्यते मे"[2] इत्यादिश्रुतौ अनिष्टादिकारिणां यमवशत्त्वलक्षणगतेः दर्शनात्।

अपि च मनुव्यासप्रभृतयः शिष्टाः यमलोके पापिनां नरकभोगं नाचिकेतोपाख्यानादिषु वर्णयन्ति। अतः धर्मिणामेव चन्द्रलोकगमनं न तु इतरेषाम्।

पुनश्च रौरवप्रमुखाः सप्त नरकाः पापफलभोगभूमित्वेन पौराणिकैः स्मर्यन्ते। अनिष्टादिकारिणः तान् लोकान् प्राप्नुवन्ति, न तु चन्द्रलोकम् इति अभिप्रायः।

- **शङ्का**

ननु रौरवादिनरकेषु चित्रगुप्तादयोऽधिष्ठातारः सन्तः पापिभ्यो यातनां ददते इति स्मर्यते। अतः पापिनो यमकृतयातनाम् अनुभवन्ति इति यदुक्तं तदयुक्तमिति आशङ्क्य उच्यते यत्-

- **समाधानम्**

**'तत्रापि च तद्व्यापारादविरोधः'**[3] इति। तेषु अपि रौरवादिषु सप्तसु नरकेषु तस्यैव यमस्य अधिष्ठातृत्वव्यापाराभ्युपगमात् अविरोधः। यतोहि यमप्रयुक्ताः एव हि ते चित्रगुप्तादयः अधिष्ठातारः स्मर्यन्ते।

पञ्चाग्निविद्यायाम् "वेत्थ यथा असौ लोकः न सम्पूर्यते" इति अस्य प्रश्नस्य प्रतिवचनासरे श्रूयते यत् "अथ एतयोः पथोः न कतरेणचन तानि इमानि क्षुद्राणि असकृत् आवर्तीनि भूतानि भवन्ति जायस्व म्रियस्व इति एतत् तृतीयं स्थानं, तेन असौ लोकः न सम्पूर्यते" [4] इति। अत्र एतयोः पथोः विद्याकर्मणोः इति। कथमिति चेत्- प्रकृतत्वात् अर्थात् विद्याकर्मणोः देवयानपितृयानात्मकमार्गद्वयसाधनत्वेन प्रकृतत्वात्। अत्र "अथ एतयोः पथोः न कतरेणचन" इति श्रुतिः वर्तते। अत्र एवमुक्तमस्ति- ये विद्यासाधनेन देवयानमार्गे अधिकृताः न भवन्ति, किञ्च कर्मणा पितृयाणमार्गे अधिकृताः न भवन्ति, तेषां कृते क्षुद्रजन्तुलक्षणः असकृदावर्ती अयं तृतीयः पन्थाः भवति। अतः अनिष्टादिकारिणः चन्द्रलोकं न गच्छन्तीति सिद्ध्यति।

अत्र अनिष्टादिकारिणः चन्द्रलोकम् आरुह्य ततः अवरुह्य क्षुद्रजन्तुत्वं प्राप्स्यन्ति इति स्वीक्रियते चेत् आरोहानर्थक्यं भविष्यति। किञ्च मृत्योः अनन्तरं सर्वे चन्द्रलोकं गच्छन्तीति स्वीक्रियते चेत् चन्द्रलोकः प्रषद्भिः सम्पूरणेन प्रश्नविरूद्धं प्रतिवचनं भविष्यति। किन्तु अत्र "असौ लोकः न सम्पूर्यते" एवं प्रतिवचनं दातव्यम्। अवरोहात् असम्पूर्णम् इत्यपि स्वीकर्तुं न शक्यते अश्रुतत्वात्। "एतत् तृतीयं स्थानं तेन असौ लोकः न सम्पूर्यते" इति श्रुतिस्तु तृतीयस्थानसंकीर्तनेन असम्पूरणं दर्शयति। तेन अनारोहात् असम्पूरणम् इति युक्तं भवति। अत्र अवरोहात् असम्पूरणमिति श्रुतिः किमर्थं न उक्तवती, इति चेत् उच्यते यत्- अवरोहस्य इष्टादिकारिषु अपि अवशिष्टत्वे सति तृतीयस्थानोक्तानर्थक्यप्रसङ्गात्। अत्र 'तु' इति शब्दः अशेषगमनाशङ्काम् उच्छिनत्ति। श्रुतिवाक्ये यत् उक्तम् आसीत् अर्थात् "चन्द्रमसमेव ते सर्वे गच्छन्तीति"। अत्र 'सर्वे' इति शब्दः अधिकृतापेक्षः अर्थात् ये इष्टकर्मानुष्ठानेन चन्द्रलोकगमने

---

1 ब्र.सू-३.१.१३

2 कठ.उ-१.२.६

3 ब्र.सू-३.१.१६

4 छा.उ-५.१०.८

अधिकृताः ते एव केवलं चन्द्रलोकं प्रति गच्छन्ति।

- **शङ्का**

किन्तु पूर्वम् उक्तम् आसीत्- देहलाभाय सर्वे एव चन्द्रमसं गच्छन्ति- "पञ्चम्याम् आहुतौ " इति आहुतिसंख्यानियमात्।

- **समाधानम्**

तदा अत्र समाधानरूपेण उच्यते यत्- **'न तृतीये तथोपलब्धेः'**[1] इति। तृतीये स्थाने प्रविष्टानां पापिनां देहलाभाय आहुतीसंख्यानियमः न आदर्तव्यः। कुतः? इति चेत् तथोपलब्धेः अर्थात् "जायस्व म्रियस्व इति एतत् तृतीयं स्थानम्" इत्यादिश्रुतौ आहुतिसंख्यां विनैव तृतीयस्थानप्राप्तिः उपलभ्यते। अतः इष्टादिकारिणामेव अयं संख्यानियमः इति भावः। अपि च "पञ्चम्याम् आहुतौ आपः पुरुषवचसो भवन्ति"[2] इति अत्र मनुष्यशरीरहेतुत्वेन आहुतिसंख्या संकीर्त्यते, न तु कीटपतङ्गादिशरीरहेतुत्वेन, पुरुषशब्दस्य मनुष्यजातिवचनत्वात्। किञ्च पञ्चम्याम् आहुतौ अपां पुरुषवचस्त्वम् उपदिश्यते, अपञ्चम्यामाहुतौ पुरुषवचस्त्वं न प्रतिषिध्यते वाक्यस्य द्व्यर्थतादोषात्। तत्र येषाम् चन्द्रलोके आरोहावरोहौ सम्भवतः तेषामेव केवलं पञ्चम्याम् आहुतौ देहः भविष्यति। अन्येषां तु आहुतिसंख्यां विनैव भूतान्तरोपसृष्टाभिः अद्भिः देहः भविष्यति।

अपि च लोके द्रोणधृष्टद्युम्नप्रभृतिनां सीताद्रौपदीप्रभृतिनां च अयोनिजत्वं स्मर्यते।

तत्र द्रोणादीनां योषिद्विषया एकाहुतिः नास्ति। किञ्च धृष्टद्युम्नप्रभृतिनां योषित्पुरुषविषये द्वे आहुती न स्तः। यथा तत्र आहुतिसंख्यानियमानादरः भवति तथैव अन्यत्रापि भविष्यति।

पुनश्च जरायुजाण्डजस्वेदजोद्भिज्जेषु चतुर्विधदेहेषु स्वेदजोद्भिज्जयोः स्त्रीपुंव्यक्तिसंयोगं विनैव उत्पत्तिदर्शनात् आहुतिसंख्यानियमानादरः भवति। एवम् अन्यत्रापि भविष्यति।

- **शङ्का**

अत्र शङ्का भवति यत् "तेषां खलु एषां भूतानां त्रीणि एव बीजानि भवन्ति, आण्डजं, जीवजम् उद्भिज्जम्"[3] इत्यादिश्रुतौ त्रिविधः एव भूतग्रामः श्रूयते, तर्हि भूतग्रामस्य चतुर्विधत्वं कथम् प्रतिज्ञातम्?

- **समाधानम्**

तदा उच्यते यत् **'तृतीयशब्दावरोधः संशोकजस्य'**[4] इति। "आण्डजं जीवजं उद्भिज्जम्"[5] इत्यत्र तृतीयेन उद्भिज्जशब्देन स्वेदजस्य संग्रहः भवति। यतोहि स्वेदजोद्भिज्जयोः उभयोरपि भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात्। न च एतवता चातुर्विध्यस्य हानिः भवति। स्थावरजङ्गमात्मत्वेन उभयोः भेदस्य अनिवार्यत्वात्।

**उपसंहारः**

इष्टादिकारिणः एव केवलं चन्द्रमसं गच्छन्ति। ते सर्वे इति सर्वश्रुतिः तु इष्टादिकारिणामेव चन्द्रलोकगमनं प्रतिपादयति। पापीनां तु यमालये पापानुरूपा यातना वर्ण्यन्ते। ते यमालयं गत्वा यमयातना अनुभूय इमं लोकम् आगच्छन्ति इति श्रूयते। तस्मात् इष्टादिकारिणः एव चन्दलोकं गच्छन्ति न तु पापिनः।

**सहायकग्रन्थाः**

बादरायणः।(२०१३)। वेदान्तदर्शनम्(बङ्गीयपुस्तुकम्)। विश्वरूपानन्दस्वामी(व्याख्याता)।
कलिकाता, उद्बोधनकार्यालयः।

---

[1] ब्र.सू-३.१.१८
[2] छा.उ-५.९.१
[3] छा.उ-६.३.१
[4] ब्र.सू-३.१.२१
[5] छा.उ-६.३.१

ब्रह्मसूत्रशांकरभाष्यम् (श्रीमदनन्तशास्त्रिणा टिप्पण्यादिभिरुपस्कृतम्, श्रीवासुदेवशर्मणा च संस्कृतम्)। २०००। वाराणसी, कृष्णदास अकादेमी।

बृहदारण्यकोपनिषत्। सं.२०७०। गोरखपुर, गीताप्रेस्।

धर्मराजध्वरिन्द्रः। सं २०१०। वेदान्तपरिभाषा। मुसलगावकरः, श्रीसीतारामः(सम्पा.)। वाराणसी, चौखम्बा विद्याभवन्.

सदानन्दयोगीन्द्रः।(१९८२)। वेदान्तसारः(बङ्गपुस्तकम्)। विपदभञ्जनपालः(व्याख्याता)। कलिकाता, संस्कृतपुस्तुकभाण्डारः।

# भारतीयज्ञानव्यवस्थायां प्राचीनजनजातीनां योगदानम्

सुशान्तमण्डलः
शोधछात्रः, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
दूरभाषसंख्या-7384697750
अनुवादसंकेतः- susanta71997@gmail.com

**प्रबन्धसारः-** भारतीयज्ञानव्यवस्थायाः स्थापनायाः अनन्तरं राष्ट्रियशिक्षानीति २०२२ तमे वर्षे स्वीकृतिः वर्धिता अस्ति तथापि आदिवासीज्ञानव्यवस्थायाः मान्यतायाः अभावः अस्ति । प्रकृत्या सह तस्याः पक्षैः सह जनजातेः सह-अस्तित्वेन अपारं ज्ञानं, स्थायित्वस्य प्रति पारम्परिकव्यवस्था च विकसिता अस्ति । अस्मिन् पत्रे आदिवासीज्ञानव्यवस्थायाः महत्त्वं, वर्तमानचुनौत्यं, भारतीयज्ञानव्यवस्थायाः भागत्वेन सारस्य साक्षात्कारार्थं सम्भाव्यसमाधानं च विषये अन्वेषणं दातुं प्रयतते ।

भारतीयज्ञानव्यवस्था (IKS) अन्तर-स्थानांतरण-प्रक्रियायां कला-शिल्प-साहित्य-परम्परा-आदिरूपेषु भारतीय-ज्ञानस्य स्वीकृतिं पुनः सजीवं कर्तुं प्रयत्नः अस्ति राष्ट्रीयशिक्षानीतिः (NEP)-२०२० इत्यनेन आईकेएस-सङ्घस्य आधारः स्थापितः, तस्य उद्देश्यं च शिक्षायाः सर्वेषु स्तरेषु पाठ्यक्रमेषु समावेशः कृतः अस्ति । पाश्चात्यशिक्षाव्यवस्थायाः निर्मिताः सर्वान् दासत्वस्य छात्रेषु भारतस्य धरोहरविरासतां च गौरवं उन्नतयितुं एषः प्रयासः अस्ति (UGC, २०२२)।

२०११ जनगणनानुसारं भारतीयजनसङ्ख्यायाः ८.६% भागः जनजातयः सन्ति। भारते जनजातेः अवधारणा विषमरचना अस्ति अरुणाचलप्रदेशस्य आप्तानीजनजातिभ्यः राजस्थानस्य भीलपर्यन्तं, तमिलनाडुस्य कामकरणात् आरभ्य ब्रोक्पापर्यन्तं, लद्दाख, सर्वाणि जनजातयः रचनायां, सांस्कृतिकपक्षेषु, सामाजिकरचने च सजीवाः सन्ति भारतीयज्ञानव्यवस्थायाः (IKS) घटकानां सदृशं आदिवासीज्ञानव्यवस्था रूढिवादैः, बाह्यप्रभावैः, दस्तावेजीकरणकारकाणां अभावात् च नष्टा अभवत् तेषां सरलजीवनं प्रकृत्या सह तस्याः संसाधनैः सह नित्यं संवादः च स्थायि-समन्वय-जीवनस्य महत्त्वपूर्ण-अवलोकनं प्रददाति आदिवासी-ज्ञान-व्यवस्थायाः केचन पक्षाः तस्याः महत्त्वं च परीक्षयामः ।

नृवंशचिकित्सा टीकेएस-सङ्घस्य सर्वाधिकं अन्वेषितः स्तरः अस्ति । Yesodharan & Suyana (२००७) इत्यनेन केरलस्य मलमालासरजनजातीनां नृवंशविज्ञानज्ञानस्य अध्ययनं कृतम् तेषां ज्ञातं यत् एताः जनजातयः कटन, सर्पदंशः, शिरोवेदना, पेचिश, पीलिया, अन्येषां रोगानाम् इत्यादीनां रोगानाम् कृते चिकित्सावनस्पतयः उपयुञ्जते ते स्वीकुर्वन्ति यत् दस्तावेजानां अभावात् , मालमालासारजनजातेः नृवंशविज्ञानज्ञानं नष्टस्य संकटे वर्तते ।

भारतीयप्राचीनपरम्परागतज्ञानव्यवस्था अद्वितीया अस्ति तथा च कस्यापि समयस्य प्रासंगिकाः अनेकाः शिक्षणमूलाः सन्ति । अस्य विकासः अभवत्, प्राचीनभारतीयज्ञानस्य विभिन्नाः अध्यायाः विविधखण्डेषु वर्गीकृताः सन्ति । अस्य इतिहासः अस्ति । अधुना एव सदा प्रासंगिकं ज्ञातुं एतादृशं ज्ञानं निदानं कर्तुं रुचिः वर्धमाना अस्ति, स्थायित्वार्थं च आवश्यकी अस्ति । तत् अस्मान् मानवकल्याणं वर्धयितुं प्रयत्नानाम् उन्नयनार्थं साहाय्यं करिष्यति । अतः मानवकल्याणसम्बद्धानां तेषां ज्ञानदर्शनमूल्यानां स्वरूपस्य इतिहासस्य च विश्लेषणस्य आवश्यकता वर्तते। प्राचीनभारतीयज्ञानव्यवस्थायाः इतिहासस्य विश्लेषणस्य एतादृशः प्रयासः अस्मिन् पत्रे कृतः अस्ति ।

**कुञ्चीशब्दाः-** प्राचीनजनजाती, भारतीयज्ञानव्यवस्था, आदिवासीज्ञानव्यवस्था रूढिवाद, आदिवासीसमूहाः स्वसांस्कृतिकपरिवेश, सामाजिकस्थान ।

**प्रस्तावनाः-**आईकेएस अखिलभारतीयतकनीकीशिक्षापरिषदः (AICTE), नईदिल्लीस्थे शिक्षामन्त्रालयस्य अन्तर्गतः एकः अभिनवः कोष्ठकः अस्ति । अस्य स्थापना २०२० तमस्य वर्षस्य अक्टोबर्-मासे अभवत् । आईकेएसस्य सर्वेषु पक्षेषु अन्तरविषयसंशोधनं प्रवर्धयितुं, आईकेएसस्य संरक्षणाय प्रसाराय च अग्रे अनुसन्धानार्थं सामाजिकप्रयोगाय च अस्य स्थापना कृता अस्ति अस्माकं देशस्य समृद्धविरासतां पारम्परिकज्ञानं च विभिन्नक्षेत्रेषु प्रसारयितुं सक्रियरूपेण प्रवृत्तं भविष्यति ।

अरुणाचलप्रदेशस्य आदिजनजातीनां स्वदेशीयजैवविविधतायाः संरक्षणे महिलानां भूमिकायाः अध्ययनस्य समये सिंह इत्यादयः (२०१३) टिप्पणीं कुर्वन्ति यत् पारम्परिकभोजनस्य निर्माणे येषां वृद्धानां महिलानां अनुभवः कौशलं च जैवविविधतायाः उपयोगे संरक्षणे च प्रमुखं कार्यं कृतवान् अस्ति। तेषां प्रयुक्तेषु ५५ जातिषु ३४ प्रजातीनां नृवंशविज्ञानीयं महत्त्वं आसीत्।

अनेके आदिवासीसमूहाः स्वसांस्कृतिकपरिवेशेषु तेषां पशूनां कृते विशेषं स्थानं दत्तवन्तः येषां पालनं तेषां पालनं च कृतम्। एते पशवः यदि तेषां संरक्षणं न पालिताः वा भवन्ति स्म तर्हि कालान्तरेण नष्टाः भवन्ति स्म। नीलगिरिस्-नगरस्य तोडासः एतादृशम् एकं उदाहरणम् अस्ति। टोडा-महिषाः, ये टोडा-सामाजिक-धार्मिक-सांस्कृतिक-आचारस्य अभिन्नभागाः सन्ति, पशुपालनार्थं अद्वितीयाः प्रजातयः इति दृश्यन्ते (कुमार इत्यादयः, २००६)। पञ्चमारी जैवमण्डलसंरक्षणस्य जनजातीनां अध्ययनं कुर्वन् काला (२०२२) उल्लेखं करोति यत् स्थायित्वार्थं सामाजिकाः प्रथागताः च कानूनाः कथं परस्परं सम्बद्धाः सन्ति। औषधसङ्ग्रहार्थं प्रयुक्तस्य शुभकालस्य 'जरि- जगण' (पृ.११) इत्यस्य अभ्यासस्य उल्लेखं करोति। ततः परं जनजातीनां विविधसञ्चितज्ञानस्य अन्वेषणं प्रदातुं लेखकः युगपर्यन्तं अनुभवेन एतत् ज्ञानं कथं विकसितं भवति, सांस्कृतिकखण्डे विश्वासव्यवस्थायां च अन्तर्गतं भवति, स्थानीयसंसाधनानाम् उपयोगं करोति इति चिनोति।

घरवालक्षेत्रस्य भोतियाजनजातेः अध्ययनं कृत्वा काला (२००२) स्वदेशीयज्ञानस्य संरक्षणस्य महत्त्वं टिप्पणीं करोति। भोटिया-नगरस्य सन्दर्भे ऊनस्य प्राकृतिक-रञ्जक-निर्माणं तेषां अर्थव्यवस्थायाः मेरुदण्डः आसीत्। परन्तु कृत्रिमरञ्जकानां बाह्यप्रभावेन रञ्जकनिर्माणज्ञानस्य क्षयः अवलोकितः अस्ति। प्राकृतिकरञ्जकनिर्माणं, यस्मिन् स्थानीयवनस्पतिसम्पदां कच्चामालरूपेण सम्मिलितं भवति स्म, स्थानीयरोजगारं च जनयति स्म, तस्य कारणं नष्टम् अभवत्।

भोटियायाः पारम्परिकविरासतां मूल्यानां च प्रति दृष्टिस्य अज्ञानस्य च अभावाय। अतः, टीकेएस "स्थानानां प्रतिनिधित्वं कुर्वन् जैव-सांस्कृतिक-शरणार्थीरूपेण कार्यं करोति ये न केवलं प्रजातीनां आश्रयं ददति, अपितु जैवविविधतायाः पारिस्थितिकीतन्त्रसेवानां च व्यावहारिकप्रबन्धनस्य विषये ज्ञानं अनुभवं च वहन्ति" (Barthel et al., २०१३)।

महिलानां स्थितिं वदन् मित्रा (२००८) मानवशास्त्रज्ञयोः हैमेन्डोर्फ्, हटनयोः कृतीनां टिप्पणीं करोति, ये दर्शयन्ति यत् सामाजिकस्थानस्य व्यक्तिगतस्वतन्त्रतायाः च दृष्ट्या नागाजनजातेः महिलाः हिन्दुमहिलानां अपेक्षया उत्तमस्थाने आसन् एवं समाजस्य तस्य संरचनायाः च केचन पक्षाः ज्ञानरूपेण आत्मसातुं शक्यन्ते।

अस्माकं समकालीनजगति यदा बहवः जनाः उपभोक्तृत्वस्य अराजकमानवसंस्थानां च जीवनात् दूरं उत्तमविश्वदृष्टिं प्रति गच्छन्ति तदा आदिवासीजीवनशैली, दर्शनं च शान्तसमाधानं भवितुम् अर्हति। आदिवासीदर्शनं यथा - व्याख्यायते, भूमिः, प्रकृतिः, समुदायः च सह सम्बन्धस्य प्रबलः भावः अस्ति। 'अत्र इदानीं' इति भावः, पश्चात् एव 'परलोकः' इति भावः प्रकृत्या अस्माकं पूर्वजैः सह तस्य एकीकरणं मन्यते सः अग्रे टिप्पणीं करोति यत् आदिवासी तत्वमीमांसा व्यक्ति-प्रकृतेः, जीवानां च समानतायाः उपरि बलं ददाति। एवं आधुनिककालस्य व्यावहारिकदर्शनस्य कृते आदिवासीदर्शनं महत्त्वपूर्णम् अस्ति।

आदिवासीज्ञानव्यवस्था प्रायः आदिम-पश्चात्ता-रूपेण अवहेलिता भवति, अतः समकालीननीतिनिर्माणे शासने च तस्याः प्रासंगिकता न्यूनतमा एव तिष्ठति। सेनगुप्ता (२०१५), त्रिपुरास्य रेआङ्गजनजातीनां विषये स्वस्य अध्ययने झुम्मिंग् एकः इत्यस्य अवधारणां विचार्य दर्शयति यत् कथं सर्वकारः आदिवासीजनानाम् आर्थिकपर्यावरणसमस्यानां समाधानार्थं असमर्थजीवानां रूपेण व्यवहारं करोति। जनजातीनां प्रति एषा दृष्टिकोणः तेषां ज्ञानं च स्वीकृतिं अवनयति सा अपि दर्शयति यत् जनजातीनां मध्ये ज्ञानं कथं संकरितं भवति। संवर्धनस्य संसाधनस्य च उपयोगाय संकरणप्रविधिः पाश्चात्यवैज्ञानिकज्ञानस्य तस्य स्वदेशीयज्ञानस्य च सन्तुलनार्थं रेआङ्गसमुदायस्य एकेन आदिवासिना क्रियते एतत् संकरणं व्यक्तिस्य लिंगस्य, आयुः, उत्पादनस्य, अन्यसामाजिक-आर्थिकस्थितेः च कारणेन भवति।

सुब्बा राव (२००६) चेतयति, बौद्धिकसम्पत्तिव्यवस्था (IPS) विषयं, स्वदेशीयज्ञानस्य रक्षणं कर्तुं असमर्थतां च रेखांकयति। यदि समये न रक्षिताः तर्हि वयं देशत्वेन वाणिज्यिकहानिः भवितुम् अर्हति। सिंह इत्याख्येन (२०१०) आदि, मोनपा, खासी जनजातीनां मध्ये जैवसांस्कृतिकसंसाधनानाम् पारम्परिकज्ञानस्य अध्ययनं कृतम्। ते अवदन् यत् युवानां मध्ये पारम्परिकं ज्ञानं क्षीणं भवति,

हस्तक्षेपस्य आवश्यकता वर्तते । ते अपि अवलोकितवन्तः यत् पूर्वसूचितसहमतिविषये ज्ञानस्य अभावेन ते गौणपक्षेण स्वस्य बौद्धिकसम्पत्त्याः चोरीं कर्तुं दुर्बलाः भवन्ति । अतः एतत् तेषां टीकेएस मूल्यस्य तस्य उपयोगितायाः च जागरूकतायाः अभावं सूचयति ।

अद्यत्वे विद्यमानः अधिकांशः आदिवासीज्ञानव्यवस्था तेषां "मौखिकपरम्परायाः माध्यमेन कालान्तरे, पीढिषु च ज्ञातस्य सामूहिकप्रज्ञायाः, व्यावहारिकस्य, अनुकूलनस्य च" सङ्घः अस्ति । मौखिकपरम्परायां अथवा अदस्तावेजितरूपेण तेषां उपस्थितिमात्रं तस्याः अन्तरिक्षं न्यूनीकर्तव्यं वा हाशियां कर्तुं वा न अर्हति भारतीयज्ञानव्यवस्था । आदिवासीज्ञानव्यवस्थायाः सारं स्थापयितुं केचन सुझावाः सन्ति : अवधारणात्मकविकृतिः पुनर्व्याख्या च : अस्माकं बहवः आदिवासीप्रथाः तस्मात् निर्गच्छन्तं ज्ञानं च आदिमं वा पश्चात्तापं वा इति अवहेलनस्य समस्या अस्ति तेषां व्याख्या महत्त्वपूर्णनृवंशविज्ञानेषु जनजातीनां विषये पुस्तकेषु च । अस्माकं एतेषां ग्रन्थानां पुनर्व्याख्या करणीयम् अस्ति तथा च अवधारणात्मकविकृतिः अथवा अवधारणासमूहः इत्यादीनां पद्धतीनां उपयोगेन आदिवासीसांस्कृतिकपरिवेशेषु अनुवादः करणीयः, येषां विकासः भारतीयज्ञानव्यवस्थायाः स्रोतांशानां व्याख्यानार्थं क्रियते। एतत् परिवर्तनकारी कार्यं संयुक्तप्रयत्नानाम् आग्रहं करिष्यति ।

मानवशास्त्रज्ञाः, समाजशास्त्रज्ञाः, समाजसेवकाः, विभिन्नविषयाणां शिक्षाविदः च । दस्तावेजीकरणम् : शोधकर्तृभिः घटमानस्य संकरनस्य पहिचानं करणीयम्, प्रारम्भिकदस्तावेजीकरणप्रक्रियायाः माध्यमेन टीकेएस-पाश्चात्यसंस्कृतेः च मध्ये भेदः करणीयः।

स्थानीयपर्यावरणस्य संस्कृतिस्य च रक्षणम् : जलवायुपरिवर्तनं वनानां कटनं च, भूमिहानिश्च, ये जनजातीनां कृते महत्त्वपूर्णाः सन्ति, ते न केवलं तेषां जीवनयापनार्थं हानिकारकाः अपितु आदिवासीज्ञानव्यवस्थानां अवमूल्यने अपि भवन्ति ।

टीकेएस तथा तस्य उपयोगितायाः विषये जागरूकता : ज्ञानधारकस्य ज्ञानस्य च रक्षणं अत्यावश्यकम् । मलागी&मालागी (२०२२) इत्यस्य शोधकार्यं वनस्पतिजातीनां कृषकाधिकारसंरक्षणकानून, २००१ तथा जैविकविविधताकानून, २००२ इत्यस्य अन्तर्गतं जनजातीनां वनस्पतिजातीनां संरक्षणं, जनजातीनां मध्ये तस्य विषये जागरूकतां वर्धयितुं च इत्यादीनि सुझावानि प्रदत्तानि सन्ति । आदिवासीदर्शनस्य समेकनम् : भिन्नतायाः विषमतायाश्च मध्ये आदिवासीदर्शनस्य समेकनं चुनौतीपूर्णं भवति, परन्तु सामूहिकं लोकाचारं समाकलितुं शक्यते । कला (२०२२) इत्यनेन ज्ञायते यत् एते सिद्धान्ताः प्राकृतिकसांस्कृतिकसंरक्षणनीतीनां मार्गदर्शनं कर्तुं शक्नुवन्ति ।

कालान्तरे विश्वस्य आदिवासीजनाः विशिष्टानि अवगमनानि संरक्षितवन्तः, ये सांस्कृतिक-अनुभवे मूलभूताः सन्ति, ये विशिष्ट-पारिस्थितिकीतन्त्रेषु मानवानाम् अन्येषां च सम्बन्धानां मार्गदर्शनं कुर्वन्ति । एते अवगमनाः सम्बन्धाः च व्यापकरूपेण स्वदेशीयज्ञानरूपेण परिचिता व्यवस्थां निर्मान्ति, या पारम्परिकज्ञानं वा आदिवासीज्ञानं वा इति अपि उच्यते । आदिवासीज्ञानव्यवस्थां कालान्तरेण संस्कृतिना परिदृश्येन च सह आदिवासीनां सम्बन्धानां संरक्षणं, संप्रेषणं, सन्दर्भीकरणं च कर्तुं उद्दिष्टानां ज्ञानानां, विश्वासानां, परम्पराणां च जालरूपेण परिभाषितुं शक्यते । एतानि ज्ञानानि सामाजिकसमागमैः, मौखिकपरम्पराभिः, संस्कारप्रथैः, अन्यैः क्रियाकलापैः च ज्ञातिसमूहेषु समुदायेषु च औपचारिकरूपेण अनौपचारिकरूपेण च प्रसारिताः भवन्ति ।

आदिवासीज्ञानव्यवस्थासु समाविष्टा अन्तर-पीढी-प्रज्ञा शताब्दशः अनुभवेन, शिक्षणेन च वर्तमानकालपर्यन्तं प्रसारिता भवति। देशे सर्वत्र जनजातीयसंशोधनसंस्थाः (TRI) स्थापिताः येषां उद्देश्यं चिन्तनसमूहरूपेण कार्यं कर्तुं आदिवासीसमुदायस्य सूचनानां भण्डारः भवितुं च अस्ति । “टीआरआइ-समर्थनम्” इति योजनायाः अन्तर्गतं मन्त्रालयः पूर्वोत्तरस्य जनजातीनां सहितस्य आदिवासीसमुदायस्य जीवनस्य संस्कृतिस्य च अध्ययनं दस्तावेजीकरणं च कर्तुं टीआरआइ-भ्यः धनं प्रदाति ।

आदिवासी चिकित्सक, औषधीय वनस्पति, आदिवासी भाषा आदि द्वारा आदिवासी प्रथाओं के शोध हेतु दस्तावेजीकरण । समृद्धजनजातीयसांस्कृतिकविरासतां संरक्षणाय प्रवर्धनाय च आदिवासीकार्याणां मन्त्रालयेन डिजिटलभण्डारः

(https://repository.tribal.gov.in/) [1] विकसितः अस्ति। पारम्परिकज्ञानस्य डिजिटलपुस्तकालयः (TKDL) भारतीय-पारम्परिकचिकित्साज्ञानस्य रक्षणार्थं अन्तर्राष्ट्रीयपेटन्टकार्यालयेषु तस्य दुरुपयोगं निवारयितुं भारतस्य अग्रणीः उपक्रमः अस्ति। अनुसूचितजनजातीनां राष्ट्रियआयोगः (NCST) अधुना भारते आदिवासीसमाजानाम् संस्कृतिनां सामाजिकप्रथानां च "पुनः दस्तावेजीकरणं" कर्तुं धक्कायति। विद्यमानं विद्वान्साहित्यं उपनिवेशकसरकारैः निर्मितस्य ज्ञानस्य निकायस्य उपरि बहुधा निर्भरं वर्तते।

प्रकृतेः समकालीनज्ञानम् वनानां निरन्तरं सामीप्यस्य कारणात् आदिवासीज्ञानव्यवस्थायां प्रकृतेः समृद्धं ज्ञानं वर्तते। एतत् ज्ञानं पर्यावरणमूल्यांकनेषु स्थायिपारिस्थितिकीतन्त्रप्रबन्धने च योगदानं दातुं शक्नोति। यथा, देशी-पारम्परिक-आहारस्य स्थायि-उत्पादनस्य, उपभोगस्य च प्राकृतिक-संसाधनानाम्, पारिस्थितिकी-तन्त्राणां च अमूल्यं लाभं भवति। एतत् स्थायिरूपेण स्वस्थतरं च आहारं योगदानं करोति, जलवायुपरिवर्तनस्य न्यूनीकरणे च सहायकं भवति। ते जानन्ति यत् केषां वनस्पतयः गृहनिर्माणार्थं, उपकरणानि शस्त्राणि च निर्मातुं, इन्धनार्थं, लाशं, बन्धनं च कर्तुं, टोकरीं कर्तुं, अस्थायी झूलानिर्माणार्थं, रञ्जकानां, विषाणां, शरीररङ्गस्य, इत्रस्य, मतिभ्रमजनकौषधानां च इत्यादीनां कृते उपयोक्तव्याः।

शताब्दशः आदिवासीजनाः रोगनिवारणाय अनेकानाम् वनस्पतयः उपयुञ्जते येषां पारम्परिकौषधप्रयोगे व्यापकस्वीकृतिः प्राप्ता। यथा - बौहिनिया पर्प्युरिया, जट्रोफा करकस इत्यादयः वनस्पतयः मांसपेशीवेदनायां, ज्वरस्य, शिरोवेदनायाः, शरीरस्य शोफस्य च चिकित्सायां यथा उपयुज्यन्ते तथा संरक्षिताः भवन्ति।

संरक्षणात्मकपक्ष भारतस्य जातीयजनाः अनेकानाम् कुमारीवनानां जैवविविधतायाः संरक्षणे महत्त्वपूर्णां भूमिकां निर्वहन्ति, आदिवासीनां पवित्रवृक्षेषु अनेकाः वनस्पतयः जीवजन्तुः च संरक्षणं कृतवन्तः। आदिवासिनः पशुव्यवहारविशेषज्ञाः सन्ति। आपदा न्यूनीकरण पारम्परिकज्ञानेन भारतस्य अण्डमान-निकोबारद्वीपेषु प्राचीनजनजातीनां २००४ तमे वर्षे सुनामी-प्रकोपस्य दुर्गतेः उद्धाराय साहाय्यं कृतम् आसीत्। तेषां लोककथासु महतीं भूमिकम्पनं, तदनन्तरं उच्चैः जलभित्तिं च कथ्यते। यदा भूकम्पाः अभवन् तदा ओङ्गे-जनाः गभीरं उच्चतरं भूमिं प्रति गतवन्तः। तेषां वने अन्तः तरङ्गस्य क्रोधात् पलायिताः। एकीकृतशिक्षणस्य प्रवर्धनम्। आदिवासीज्ञानव्यवस्थाः गीतेषु, कथासु, नाटकेषु, लोककथासु इत्यादिषु संगृहीताः भवन्ति अतः समुदायस्य कृते एकीकृतशिक्षणस्य प्रवर्धनं करोति। गुणकारणात् एताः ज्ञानव्यवस्थाः अबहिष्काराः, समतायाः चिह्निताः च भवन्ति। उल्लेखनीय लिंग अनुपात तेषां उल्लेखनीयः लिंगानुपातः अस्ति तथा च तत्र समाजे प्रायः शून्यबलात्कारप्रकरणाः सन्ति।

**निष्कर्षः-** कोमाराम भीमस्य नारे "जल जंगल जमीन्" इति, यत् आदिवासी-आन्दोलनस्य प्रसिद्धं नारा जातम् (पोयाम, २०१६), अस्माभिः न विस्मर्तव्यं यत् जल, जङ्गल (वनानि), जमीनः (भूमिः) च सर्वेषां मानवानाम् कृते महत्त्वपूर्णाः सन्ति समाजाः। एतेषां पक्षानाम् आदिवासीज्ञानव्यवस्था अस्मान् जीवनस्य मूलं समृद्धयति, संलग्नं च करोति। एवं तेषां स्वीकारः आवश्यकः। यथा सर्वकारेण Mission Life (Lifestyle For Environment) इति विकासः कृतः, यत् जलवायुपरिवर्तनस्य न्यूनीकरणस्य दिशि व्यक्तिगतस्तरस्य स्थायिप्रथानां आत्मसातीकरणं कर्तुम् इच्छति(Niti Aayog), तथैव तेषां ज्ञानव्यवस्थायाः अनेकाः आदिवासीप्रथाः आत्मसातुं शक्नोति। सामाजिकविज्ञानसहितं आधुनिकविज्ञानं प्राकृतिकसंसाधनानाम् उपयोगस्य दृष्ट्या स्थायित्वं, जलवायुपरिवर्तनस्य तस्य अनुकूलनस्य च निवारणं, जैवविविधतायाः संरक्षणं, खाद्यसुरक्षा, सामाजिकसङ्गतिः, शान्तिपूर्णसहजीवनं, अन्ये च बहवः भारतीयाः इत्यादयः अनेकेषां समकालीनविषयाणां सामनां कुर्वन्ति भारतीयज्ञानव्यवस्थायाः भागत्वेन आदिवासीज्ञानव्यवस्थायाः उपर्युक्तविषयाणां समाधानं प्रदातुं बहु किमपि प्रस्तावः अस्ति। परन्तु एतत् तदा एव सम्भवति यदा टीकेएस इत्यस्य पुनः दर्शनं, मान्यता, अभिलेखनं, अस्माकं युवानां पीढीं प्रति पाठनं, आईकेएस-अङ्गत्वेन अस्माकं नीतिषु संश्लेषितं च भवति।

[1] https://repository.tribal.gov.in

## सहायकग्रन्थसूची:-

Lakshman, A., Integrating tribal knowledge systems is key to making India a 'knowledge superpower', says President Droupadi Murmu, 2022, November 28

Prof. Shrinivasa Varakhedi: Integration of IKS and ILs in Indian Education through NEP2020; Central Sanskrit University, New Delhi

Christoph von Fürer- Haimendorf, Tribes of India: The Struggle for Survival, Univ of California Pr,1982

Stephen Fuchs, The Aboriginal Tribes of India, Macmillan India, 1974

## अन्तर्जालम्-

https://www.thehindu.com
https://www.education.gov.in
https://iksindia.org
https://egyankosh.ac.in

# आचार्यभोजराजकृत-सरस्वतीकण्ठाभरणदिशा केवलसमासविमर्शः

प्रीतम-बेरा (शोधच्छात्रः)
रामकृष्णमिशन्-विवेकानन्द-शैक्षिकशोधसंस्थानम्,
बेलुडमठः, हावडा,
दूरवाणीसंख्या – 6291873366
ईमेल – pritam99bera@gmail.com

**प्रबन्धसारः/Abstract-** महर्षिपाणिनेः उत्तरवर्त्तिनि काले पाणिनीयव्याकरणम् अनुसरन्तो नैके विद्वासः स्वप्रतिभां प्रदर्शयन्तो व्याकरणानि विरचयामासुः। तेषु आन्यतम्यं भजते हि आचार्यभोजराजः। नानाशास्त्रविशारदेनानेन विदुषा सरस्वतीकण्ठाभरणाभिधं नवीनमेकं व्याकरणं व्यरचि। तस्मिंश्च ग्रन्थे अष्टौ अध्यायाः षट्सहस्राणि च सूत्राणि विलसन्ति। तस्य व्याकरणस्य समीक्षणेन तन्मौलिकता पाठकानां दृष्टिपथमायाति। सरस्वतीकण्ठाभरणव्याकरणे तृतीयाध्यायस्य द्वितीयपादस्यारम्भे समासाधिकारो विराजते। केवलाव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाख्यान् पञ्च समासान् ऊनविंशत्यधिद्विशतसूत्रैः (२१९) प्रत्यपादि भोजराजः। अष्टाध्याय्यां तु समासविधायकत्वेन षडधिकशतं (१०६) सूत्राण्येव पदङ्कुर्वते। इत्थम् अष्टाध्याय्यपेक्षया द्विगुणितानि समाससम्बन्धीनि सूत्राणि सरस्वतीकण्ठाभरणे स्थानं लभन्त इति ज्ञायते। पञ्चसु समासेषु केवलसमासस्तावत् प्रकृतलघुशोधप्रबन्धस्य विषयतामेति। प्रकृतव्याकरणे केवलसमासविधायीनि सप्त सूत्राणि वर्तन्ते। तानि हि – **“सुप् सुपा सहैकार्थीभावे समासः”(स.क.३.२.१), “विस्पष्टादीनि गुणविशेषणतायाम्” (स.क.३.२.२), “काष्ठादीनि क्रियाविशेषणतायाम्” (स.क.३.२.३), “सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्वमुहूर्तोर्ध्वदेहोर्ध्वन्दम-कृतपूर्वादयस्तद्धिते” (स.क.३.२.४), “काकतालादय इवार्थे” (स.क.३.२.५), “इवेन विभक्त्यलोपश्च” (स.क.३.२.६), “भूतपूर्वादयः” (स.क.३.२.७)** चेति। अस्माकं विदितचरमिदं यत् अष्टाध्याय्यां भगवान् पाणिनिः **“सह सुपा”** (अष्टा.२.१.४) इत्याकारकम् एकमेव सूत्रं प्रणिनाय केवलसमासविधायकम्। सरस्वतीकण्ठाभरणे तु केवलसमासविधानार्थं सप्त सूत्राणि उपन्यस्तानि आचार्यभोजराजेन। अत एतेषां नवीनानां सूत्राणां विषये प्रकाशं विदधाति प्रकृतः लघुशोधप्रबन्धः। प्रबन्धेऽस्मिन् केवलसमासविधायकम् एकैकं सूत्रमादाय सूत्रार्थः, हृदयहारिणीटीकानुसारं सूत्राशयः उदाहरणानि च प्रतिपादातानि। समेषां सूत्राणां विशिष्टं समीक्षणमपि विहितम् अस्मिन् लघुशोधप्रबन्धे। अपि च पाणिनीयव्याकरणापेक्षया एतेषां सूत्राणां मौलिकता भेदश्च यथामति प्रतिपादिता अत्र। इत्थं प्रकृतलघुशोधप्रबन्धोऽयं केवलसमासविषयकनवनीतथ्यप्रदायकमिति चिन्तयामि।

**कुञ्चिकाशब्दाः** – समासः, सूत्रम्, अर्थः, गणपाठः।

**प्रस्तावना-** वेदरक्षायै प्रवृत्तमिदं शब्दशास्त्रं वेदाङ्गेषु प्राधान्यं भजन्निखिलशास्त्रोपकारकतामगात्। तस्मिंश्च सर्वशास्त्रोपकारके व्याकरणशास्त्रेऽस्ति च कठोरतपःसमः श्रमो विदुषाम्। तत्तपःफलकुसुमैर्मण्डितेयं व्याकरणस्रङ् नितान्तं शोभते संस्कृतमातुः शिरसि। ताञ्च स्रजं गुम्फितृषु विद्वद्वरेषु आन्यतम्यं भजते नानाशास्त्रविशारद आचार्यो भोजदेवः। पाणिनेः परवर्त्तिनि समये पाणिनीयव्याकरणम् अनुसरन्ति नाना व्याकरणानि तत्रभवद्भिर्विद्वद्भिः प्रणीतानि। तेषु अन्यतमं तावत् आचार्यभोजदेवप्रणीतं सरस्वतीकण्ठाभरणाभिधं व्याकरणम्। अध्यायाष्टकसमन्वितेऽस्मिन् व्याकरणे विलसन्ति षट् सहस्राणि सूत्राणि।

सरस्वतीकण्ठाभरणव्याकरणस्य तृतीयाध्यायस्य द्वितीयपादस्यारम्भे समासाधिकारं प्रारभते भोजराजाचार्यः। केवलाव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाख्यान् पञ्च समासान् ऊनविंशत्यधिद्विशतसूत्रैः (२१९) प्रत्यपादि भोजराजः। अष्टाध्याय्यां तु समासविधायकत्वेन षडधिकशतं (१०६) सूत्राण्येव पदङ्कुर्वते। इत्थम् अष्टाध्याय्यपेक्षया द्विगुणितानि समाससम्बन्धीनि सूत्राणि सरस्वतीकण्ठाभरणे स्थानं लभन्त इति ज्ञायते। पञ्चसु समासेषु केवलसमासस्तावत् प्रकृतलघुशोधप्रबन्धस्य विषयतामेति। प्रकृतव्याकरणे केवलसमासविधायीनि सप्त सूत्राणि वर्तन्ते। तानि हि – **“सुप् सुपा सहैकार्थीभावे समासः”(स.क.३.२.१), “विस्पष्टादीनि गुणविशेषणतायाम्” (स.क.३.२.२), “काष्ठादीनि क्रियाविशेषणतायाम्” (स.क.३.२.३),**

**"सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्वमुहूर्तोर्ध्वदेहोर्ध्वन्दम-कृतपूर्वादयस्तद्धिते" (स.क.३.२.४), "काकतालादय इवार्थे" (स.क.३.२.५), "इवेन विभक्त्यलोपश्च" (स.क.३.२.६), "भूतपूर्वादयः" (स.क.३.२.७)** चेति। अस्माकं विदितचरमिदं यत् अष्टाध्याय्यां भगवान् पाणिनिः **"सह सुपा"** (अष्टा.२.१.४) इत्याकारकम् एकमेव सूत्रं प्रणिनाय केवलसमासविधायकम्। सरस्वतीकण्ठाभरणे तु केवलसमासविधानार्थं सप्त सूत्राणि उपन्यस्तानि आचार्यभोजराजेन। सम्प्रति सप्तानां केवलसमासविधायकसूत्राणाम् आशयः प्रस्तूयते।

**१. सूत्रम् - सह सुपा सहैकार्थीभावे समासः (स.क. ३.२.१)**

सरस्वतीकण्ठाभरणगतसमासाधिकारे प्रथमस्थानं समलङ्करोति प्रकृतमिदं सूत्रम्। पञ्चपदात्मकेऽस्मिन् सूत्रे सहेत्यव्ययपदम्, सुपा इति तृतीयान्तम्, सहेत्यपि अव्ययम्, एकार्थीभावे इति सप्तम्यन्तं, समासः इति च प्रथमान्तं पदम्। अस्य सूत्रस्य विधित्वम् अधिकारत्वं चेत्युभयत्वं हृदयहारिणीटीकाकारेण दण्डनाथेन प्रत्यपादि। तथाहि तत्रोक्तं – **"लक्षणं चेदमधिकारश्च"**[1]। तेनात्र निष्कर्षो यत् प्रकृतसूत्रेण समासाधिकारः सुप्सुपासमासापराभिधेयः केवलसमासश्च विधीयते। **उपसर्जनं पूर्वम् (स.क. ३.३.५८)** इत्यतः प्राग् अयमधिकारः। इत्थं तृतीयाध्यायस्य द्वितीयपादारम्भात् तृतीयपादस्य अष्टपञ्चाशत्तमसूत्रं यावत् ऊनविंशत्यधिकद्विशतसूत्रेषु (२१९) समासाधिकारो वर्तते। एवं सामान्येन सूत्रार्थो लभ्यते यत् उपसर्जनं पूर्वम् इत्यतः प्राक् सुबन्तं सुबन्तेन सह एकार्थीभावे समाससंज्ञं भवतीति।

सामर्थ्यं हि द्विविधम् एकार्थीभावो व्यपेक्षा चेति। तथाहि समर्थाह्निके आह भगवान् भाष्यकारः – **"तथेदमपरं द्वैतं भवति - एकार्थीभावो वा सामर्थ्यं स्यात्, व्यपेक्षा वेति? तत्रैकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो भवति। विभक्तिविधानं पराङ्गवद्भावश्चासंगृहीतः॥ व्यपेक्षायां पुनः सार्मथ्येऽधिकारे च सति विभक्तिविधानं पराङ्गवद्भावश्च संगृहीतो भवति"**।[2] तत्र स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशाद् यः परस्परान्वयः तद् व्यपेक्षाख्यं सामर्थ्यम्। एतच्च वाक्ये भवति। यथा राज्ञः पुरुषः इत्यत्र राजपदं राजरूपार्थे पुरुषपदं पुरुषरूपार्थे च पर्यवसितं, ततश्च आकाङ्क्षावशात् राजपदार्थस्य पुरुषपदार्थे, पुरुषपदार्थस्य च राजपदार्थे अन्वयो जायते। इदं व्यपेक्षाभावसामर्थ्यम् इत्युच्यते। एकार्थीभावलक्षणसामर्थ्यं हि प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग्गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम्। इदं वृत्तौ भवति। यथा राजपुरुषः इति समासवृत्तौ राजपुरुषपदस्य राजसम्बन्धिपुरुषरूपविशिष्टैकार्थबोधकता, तदेव एकार्थीभावरूपं समार्थ्यम्। अनेनेदं स्पष्टं यत् एकार्थीभावसामर्थ्ये एव समासो जायते, न तु व्यपेक्षायाम्। स एवार्थो आचार्यभोजराजेन प्रकृतसूत्रस्थेन **'एकार्थीभावे'** इति पदेन सूचितः।

सूत्रस्यास्य व्याख्यानावसरे दण्डनाथाचार्येण स्वरचितायां हृदयहारिणीटीकायाम् अपरोऽपि एको विषयो दृष्टिपथं समानीतो यत् प्रकृतसूत्रे सुप् सुपा चेत्यनयोः पदयोः एकवचनसत्त्वात् तत्र एकत्वसङ्ख्याया विवक्षितत्वाच्च द्वयोः सुबन्तयोर्मध्ये एव समासो जायते, न तु अनेकेषाम्। राजगवीक्षीरम् इत्यादावपि राज्ञः गौः राजगवी, राजगव्याः क्षीरं राजगवीक्षीरम् इत्येवं द्वयोर्द्वयोः सुबन्तयोः समासो बोद्धव्यः। यदि तु गोक्षीरं राज्ञः भवति, तदा आदौ गोः क्षीरं गोक्षीरं, ततः राज्ञः गोक्षीरं राजगोक्षीरम् इत्येवं समासः कार्यः।

**समीक्षणम्-** आचार्यपाणिनिना **"समर्थः पदविधिः" (अष्टा.२.१.१)** इति सूत्रे पदसम्बन्धिनः विधेः समर्थाश्रितत्वं प्रतिपादितम्। तत्र समासस्यापि पदविधित्वात् प्रकृतसूत्रबलात् सोऽपि समर्थाश्रित इति ज्ञायते। तत्र च महाभाष्यादिग्रन्थे सामर्थ्यस्य द्वैविध्यं विचारितं, समासादिवृत्तौ च एकार्थीभावसामर्थ्यम् इत्यपि स्पष्टं वर्णितम्। परन्तु विषयोऽयं स्वयं पाणिनिना न केनचित् सूत्रेण प्रतिपादितो यत् एकार्थीभावसामर्थ्ये समासो भवतीति। तत्तु व्याख्यानात् अस्माभिर्ज्ञेयं भवति। परन्तु आचार्यो भोजराजः व्युत्पित्सूनाम् अध्येतॄणां बोधसौकर्याय स्पष्टतया स्वसूत्रे उदलिखद् यत् एकार्थीभावसामर्थ्ये समासो भवतीति।

**२. सूत्रम् - विस्पष्टादीनि गुणविशेषणतायाम् (स.क. ३.२.२)**

सरस्वतीकण्ठाभरणव्याकरणे केवलसमासविधायकं द्वितीयं सूत्रमिदम्। पदद्वयात्मकेऽस्मिन् सूत्रे विस्पष्टादीनि इति प्रथमाबहुवचनान्तं पदम्। गुणविशेषणतायाम् इति सप्तम्येकवचनान्तं समस्तं पदम्। गुणस्य विशेषणं गुणविशेषणम् इति षष्ठीतत्पुरुषः।

[1] सरस्वतीकण्ठाभरणम् हृदयहारिण्या व्याख्यया समेतं (पृ. ५१)

[2] महाभाष्यम् - समर्थाह्निकम्

गुणविशेषणस्य भावो गुणविशेषणता, तस्यां गुणविशेषणतायाम् इति **"तस्य भावस्त्वतलौ" (स.क.५.१.१३३)** इत्यनेन भावे तल्प्रत्ययः। **"सुप् सुपा सहैकार्थीभावे समासः"(स.क.३.२.१)** इति पूर्वतनं सूत्रमत्राधिक्रियते। प्रत्ययबोधकत्वात् सुप् सुप् चेत्येताभ्यां पदाभ्यां यथाक्रमं सुबन्तम् सुबन्तेन चेत्येतावर्थौ ग्राह्यौ। सुप् इति पदं बहुवचनान्तत्वेन विपरिणम्य विस्पष्टादीनि इत्यत्र सम्बध्यते। गुणविशेषणतायाम् इत्यत्र वृत्तित्वं सप्तम्यर्थः। तेन सूत्रार्थो यत् गुणविशेषणतायां वर्तमानानि विस्पष्टादीनि सुबन्तानि सुबन्तेन सह समाससंज्ञकानि भवन्ति इति। सरस्वतीकण्ठाभरणस्य अष्टमेऽध्याये **"विस्पष्ट-विचित्र-विविक्त-व्यक्त-सम्पन्न-पटु-पण्डित-कुशल-चपल-निपुणा गुणवचनेषु" (सं.क.८.४.२५)** इत्यस्मिन्सूत्रे उल्लिखिता दश शब्दाः विस्पष्टादित्वेन गृह्यन्ते। अत उक्तं हृदयहारिण्याम् – **"विस्पष्टादीन्यष्टमेऽध्याये वक्ष्यन्ते"**[1] इति।

विस्पष्टादयः शब्दाः गुणस्य विशेषणत्वेन व्यवह्रियन्ते। यथा विस्पष्टं पटुः इत्यत्र पटुनिष्ठपटुत्वगुणं विशिनष्टि विस्पष्टशब्दः। तेनात्र पटुत्वं हि विस्पष्टम्। अतो वाक्यार्थः विस्पष्टाभिन्नपटुत्ववान् पटुः इति। एवं गुणविशेषणभूतो ह्यत्र विस्पष्टशब्दः। अतः प्रकृते विस्पष्टं पटुः इति लौकिकविग्रहे विस्पष्ट सु पटु सु इत्यलौकिकविग्रहे गुणविशेषणतायां वर्तमानं विस्पष्ट सु इति सुबन्तं पटु सु इति सुबन्तेन सह प्रकृतसूत्रेण समाससंज्ञं भवति। ततः **"समासानुकरणनिपाताश्च" (स.कं.१.१.७)** इत्यनेन समासस्य प्रातिपदिकसंज्ञायां **"सुपो लुगैकार्थ्ये" (स.कं.३.१.१९७)** इति सूत्रेण पूर्वोत्पन्नयोः सुपोः ऐकार्थ्ये लुकि विस्पष्ट पटु इति स्थिते **"समासे प्रथमानिर्दिष्टमुपसर्जनम्"(स.कं.१.१.२७)** इति सूत्रेण विस्पष्टशब्दस्योपसर्जनसंज्ञायाम् **"उपसर्जनं पूर्वम् (३.३.५८)"** इति तस्य पूर्वनिपाते निष्पन्नस्य विस्पष्टपटुशब्दस्य एकदेशविकृतन्यायेन प्रातिपदिकत्वाद् विभक्तिकार्ये विस्पष्टपटुः इति रूपम्। इत्थं विचित्रकटुकः, विचित्रकषायः, व्यक्तलवणः, सम्पन्नमधुरः, कट्वम्लः, निपुणपण्डितः, कुशलदक्षः, चपलवत्सलः चेत्यादानि उदाहरणानि बोध्यानि।

**समीक्षणम्-** अष्टाध्यायां समासविधायकत्वेन नेदं सूत्रं पदङ्कुरुते। तत्र षष्ठाध्याये **"विस्पष्टादीनि गुणवचनेषु" (अष्टा.६.२.२४)** इत्याकृत्या स्वरविधायि सूत्रं विराजते। तेन च सूत्रेण विस्पष्टपटुः चेत्यादीनां समस्तपदानां प्रकृतिस्वरो विहित आचार्यपाणिनिना। पाणिनीयानुसारं तु प्रकृते **"सह सुपा" (अष्टा.२.१.४)** इति सूत्रेण सुप्सुपासमासः। विस्पष्टादीनां पटुत्वादि-प्रवृत्तिनिमित्तस्य विशेषणत्वेन सामानाधिकरण्याभावात् कर्मधारयसमासस्य नास्ति सम्भावना। अतः सुप्सुपासमास एवात्र पाणिनिसम्मत इति ज्ञेयम्। तथाह्युक्तं काशिकायाम् - **"विस्पष्टं कटुकमिति विगृह्य सुप्सुपेति समासः। विस्पष्टादयो ह्यत्र प्रवृत्तिनिमित्तस्य विशेषणम्। कटुकादिभिश्च शब्दैर्गुणवद् द्रव्यमभिधीयत इत्यसामानाधिकरण्यमतो नास्ति कर्मधारयः"** इति।[2] एतेन इदं स्पष्टं यत् विस्पष्टपट्वादिपदेषु केवलसमासोऽस्ति इत्यस्मिन् विषये वर्तते पाणिनि-भोजदेवयोः साम्मत्यम्। परन्तु समासविधायि सूत्रम् उभयोर्मते भिद्यते। तत्र पाणिनिनये **"सह सुपा"** इति सूत्रेण प्रकृते समासः। भोजदेवमते तु **"विस्पष्टादीनि गुणविशेषणतायाम्"** इति ह्यत्र समासविधायि सूत्रम् इति विवेकः।

विस्पष्टादिगणे दश शब्दाः पठ्यन्ते। वस्तुतो सरस्वतीकण्ठाभरणव्याकरणे पाणिनीयवत् पृथग् गणपाठो न विराजते। अपि तु आचार्यभोजदेवेन किञ्चित्सूत्रघटकगणान्तर्भूताः शब्दाः सूत्रान्तरे उल्लिखिताः। एवं प्रकृतेऽपि **"विस्पष्टादीनि गुणविशेषणतायाम्" (सं.क. ३.२.२)** इति सूत्रघटकविस्पष्टादिगणपठिताः शब्दाः अष्टमाध्याये **"विस्पष्ट-विचित्र-विविक्त-व्यक्त-सम्पन्न-पटु-पण्डित-कुशल-चपल-निपुणा गुणवचनेषु" (सं.क.८.४.२५)** इत्येतस्मिन् सूत्रे उल्लिखिताः। तदनुसारं विस्पष्टादित्वेन दश शब्दाः ग्राह्याः इति ज्ञायते। पाणिनीयगणपाठानुसारमपि दश शब्दाः एव विस्पष्टादिगणे पदङ्कुर्वते। परन्तु तेषु दशसु तृतीयशब्दस्य स्वरूपविषये अस्पष्टता दृश्यते। तथाहि सरस्वतीकण्ठाभरणानुसारं विस्पष्टादिगणस्य तृतीयशब्दस्तावत् **'विविक्त'** इति। पाणिनीयगणपाठानुसारं तु विस्पष्टादिगणस्य तृतीयशब्दो हि **'विचित्त'** इति। न्यासेऽपि विस्पष्टादिगणपठितशब्दानां व्युत्पत्तिप्रदर्शनावसरे विचित्तशब्दस्यैव[3]

---

[1] सरस्वतीकण्ठाभरणम् हृदयहारिण्या व्याख्यया समेतं (पृ. ५१)

2 विस्पष्टादीनि गुणवचनेषु(अष्टा.६.२.२४) इति सूत्रे काशिका

3 विचित्तशब्दम्` इति। चिती संज्ञाने` (धातुपाठः-३९) इत्यस्य निष्ठायां चित्तम्। विगतं चित्तमस्येति बहुव्रीहि। `बहुव्रीहिस्वरेण` इति। `चिती संज्ञाने` (धातुपाठः-३९) इत्यस्य निष्ठायां चित्तम्। विगतं चित्तमस्येति बहुव्रीहि। `बहुव्रीहिस्वरेण` इति। `बहुव्रीहौ प्रकृत्या` ६.२.१ इति विहितेन। (विस्पष्टादीनि गुणवचनेषु इति सूत्रे न्यासः)

व्युत्पत्तिः प्रदर्शिता। परन्तु विचित्तशब्दस्य न किञ्चिदुदाहरणं तत्र ग्रन्थे परिलक्ष्यते। हृदयहारिण्यां तु विविक्तशब्दस्य विचित्तशब्दस्योभस्य उदाहरणं न दृश्यते। वस्तुतः काशिकाकारमते नव शब्दा एव विस्पष्टादिगणे स्थानं लभन्ते, विचित्तशब्दस्य तु तस्मिन् गणे न पाठः इति तन्मतम्। अत एव उक्तं तेन **"विचित्तशब्दमन्ये पठन्ति"(काशिका)** इति। अन्यशब्दप्रयोगेण काशिकाकारमते विचित्तशब्दस्य न पाठः इति ज्ञाप्यते।

**३. सूत्रम् - काष्ठादीनि क्रियाविशेषणतायाम् (स.क. ३.२.३)**

केवलसमासविधायकं तृतीयमिदं सूत्रम्। द्विपदात्मकेऽस्मिन् सूत्रे काष्ठादीनि इति प्रथमाबहुवचनान्तं पदम्। क्रियाविशेषणतायाम् इति सप्तम्येकवचनान्तं पदम्। क्रियायाः विशेषणं क्रियाविशेषणमिति षष्ठीतत्पुरुषः। क्रियाविशेषणस्य भावः क्रियाविशेषणता, तस्यां क्रियाविशेषणतायाम्। पूर्ववद् अत्रापि वृत्तित्वं सप्तम्यर्थः। तथैव अधिकारविभक्तिविपरणामादिकमपि पूर्वसूत्रवद् अत्र बोध्यम्। तेन सूत्रार्थः सम्पद्यते यत् क्रियाविशेषणतायां वर्तमानानि काष्ठादीनि सुबन्तानि सुबन्तेन सह एकार्थीभावे समस्यन्ते इति। सरस्वतीकण्ठाभरणस्य अष्टमाध्याये **"पूजनेभ्यः काष्ठदारुणामातापुत्रवेशानुज्ञातायुताद्भुतभृश-घोरपरमस्वतिभ्यः पूजितमनुदात्तं समासे" (स.क.८.३.२३९)** इत्यस्मिन् स्वरविधायकसूत्रे उल्लिखिताः काष्ठ-दारुण-अमातापुत्र-वेश-अनुज्ञात-अयुत-अद्भुत-भृश-घोर-परम-सु-अति-इत्येते द्वादश शब्दाः काष्ठादित्वेन गृह्यन्ते।

स्वरविधायकेन **"पूजनेभ्यः काष्ठदारुण..." (स.क.८.३.२३९)** इत्यादिसूत्रेण पूजनवाचिभ्यः काष्ठादिभ्यः परस्य पूजितवाचिनः अनुदात्तस्वरो विधीयते। अनेन ज्ञायते यत् प्रकृतसमासे काष्ठादि-पूर्वपदं पूजनवाचि भवति, उत्तरपदं च पूजितवाचि भवति। अर्थात् काष्ठादिना पूर्वपदेन उत्तरपदस्य पूजा प्रंशसा वा यत्र विधीयते तत्रायं समासः तदनु अनुदात्तस्वरश्च जायत इति। अपि च प्रकृतसमासे काष्ठादिपदानि क्रियाविशेषणानि भवन्ति। अर्थात् तैः पूजनवाचिभिः काष्ठादिशब्दैः उत्तरपदबोध्यपूजितजननिष्ठक्रिया विशिष्यते। यथा काष्ठम् अध्यापयति इत्यत्र काष्ठशब्देन अध्यापकनिष्ठ-अध्यापनक्रिया विशिष्यते। काष्ठशब्दोऽत्र प्रकर्षार्थकः। तेन पूर्ववाक्यस्याशयो यत् तस्य अध्यापकस्य अध्यापनं प्रकृष्टम् अस्तीति। एवमत्र क्रियाविशेषणवाचिनः काष्ठशब्दस्य अध्यापकशब्देन सह "**काष्ठादीनि क्रियाविशेषणतायाम् (३.२.३)"** इति सूत्रेण समासो भवति। समासे सति अन्यत्प्रक्रियादिकं प्राग्वद्बोध्यम्। तेन काष्ठम् अध्यापयति इत्यर्थे काष्ठाध्यापकः इति समस्तपदं निष्पद्यते। एवमेव दारुणमध्यापयतीत्यर्थे दारुणाध्यापकः इति रूपम्। तद्वत् अमातापुत्राध्यापकः, वेशाध्यापकः, अनुज्ञाताध्यापकः, अयुताध्यापकः, अद्भुताध्यापकः, भृशाध्यापकः, घोराध्यापकः, परमाध्यापकः, स्वाध्यापकः, अत्यध्यापकः चेत्यादीनि उदाहरणानि बोध्यानि। काष्ठादीनां समेषां शब्दानाम् अद्भुतपर्यायत्वं पूजनवचनत्वं च न्यासे उक्तम्। तथाहि न्यासः – "**सर्व एते काष्ठादयोऽद्भुतपर्यायाः पूजनवचना भवन्ति**"[1]।

**समीक्षणम् -** सरस्वतीकण्ठाभरणानुसारं काष्ठाध्यापकः दारुणाध्यापकः इत्यादिषु पदेषु "**काष्ठादीनि क्रियाविशेषणतायाम्" (स.क.३.२.३)** इति सूत्रेण केवलसमासः सुप्सुपासमासो वा वर्तते। परन्तु पाणिनीयव्याकरणानुसारं तु पूर्वोक्तपदेषु **"मयूरव्यंसकादयश्च" (अष्टा.२.१.७२)** इति सूत्रेण तत्पुरुषसमासो विद्यते। तथाह्युक्तं **"पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः" (अष्टा.८.१.६७)** इति सूत्रे काशिकायां - **"मयूरव्यंसकादित्वात् समासः। समासे चैतदनुदात्तत्वम्"** इति।[2] इत्थं काष्ठाध्यापकः इत्यादिपदेषु कः समासः इत्यस्मिन् विषये पाणिनिभोजदेवयोर्वर्तते वैमत्यम्। पाणिनिमते तत्पुरुषः, भोजदेवमते तु केवलसमास इति भेदः। अनुदात्तस्वरविषये तु अस्त्युभयोः साम्मत्यम्।

काष्ठादिगणपठितशब्दानां विषयेऽपि वर्तते किञ्चित्संशयस्थानम्। तथाहि सरस्वतीकण्ठाभरणस्य अष्टमाध्यायस्थात् **"पूजनेभ्यः काष्ठदारुणामातापुत्रवेशानुज्ञातायुताद्भुतभृशघोरपरमस्वतिभ्यः पूजितमनुदात्तं समासे"** इत्यस्मात्सूत्रात् ज्ञायते यत् काष्ठ-दारुण-अमातापुत्र-वेश-अनुज्ञात-अयुत-अद्भुत-भृश-घोर-परम-सु-अति-इत्येतेषां द्वादशानां शब्दानां काष्ठादित्वमिति। परन्तु पाणनीयगणपाठानुसारं काष्ठ-दारुण-अमातापुत्र-वेश-अनाज्ञात-अनुज्ञात-अपुत्र-अयुत-अद्भुत-अनुक्त-भृश-घोर-सुख-परम-सु-अति-

1 "पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः" (अष्टा.८.१.६७) इति सूत्रे न्यासः
2 "पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः" (अष्टा.८.१.६७) इति सूत्रे काशिका

इत्येतेषां षोडशानां शब्दानां हि काष्ठादित्वम्। अर्थात् अनाज्ञात-अपुत्र-अनुक्त-सुख-इत्येते चत्वारः शब्दाः अधिकाः सन्ति पाणिनीयगणपाठे। यद्यपि हृदयहारिण्यां तु अनाज्ञातशब्दस्य उदाहरणं प्रदत्तम् अनाज्ञाताध्यापकः इति।

**४. सूत्रम् - सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्वमुहूर्तोर्ध्वदेहोर्ध्वन्दमकृतपूर्वादयस्तद्धिते (स.क. ३.२.४)**

केवलसमासविधायकं चतुर्थम् इदं सूत्रम्। अस्मिन् सूत्रे द्वे पदे वर्तेते। सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्वमुहूर्तोर्ध्वदेहोर्ध्वन्दमकृतपूर्वादयः इति प्रथमाबहुवचनान्तं पदम्। तद्धिते इति सप्तम्येकवचनान्तं पदम्। इयं च विषयसमप्तमी वर्तते। तेन तद्धितवषये इत्यर्थो लभ्यते। अनेन सूत्रेण तावत् सर्वचर्म-अद्यश्वो-दशैकादश-माशब्द-ऊर्ध्वमुहूर्त-ऊर्ध्वदेह-ऊर्ध्वन्दम-कृतपूर्वादयः समस्तशब्दाः निपात्यन्ते। अत एव सूत्रार्थः प्रोक्तः हृदयहारिण्यां यत् – **"सर्वचर्मादयः सामान्यसमासास्तद्धितविषये साधवो भवन्ति"** इति। अर्थात् तद्धितप्रत्ययः भविष्यति इत्येवं प्रसङ्गश्चेत् सर्वचर्मादिपदेषु केवलसमासो जायते।

हृदयहारिण्यां सर्वचर्मीणो रथः इति उदाहृतम्। सर्वः चर्मणा कृतः इति विग्रहे "**सर्वचर्मणः कृतः खश्च" (स.क.५.२.८)** इति सूत्रेण विधास्यमान-खप्रत्ययस्य विषयः प्रकृते वर्तत इति हेतोः सर्व सु चर्मन् टा इत्यनयोः सुबन्तयोः **सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्वमुहूर्तोर्ध्वदेहोर्ध्वन्दमकृतपूर्वादयस्तद्धिते (स.क.३.२.४)** इति सूत्रेण केवलसमासो विधीयते। सति समासे निष्पन्नात् सर्वचर्मन्शब्दात् पूर्वोक्तसूत्रेण खप्रत्यये "**नस्तद्धिते(स.क.६.३.१४०)"** इत्यनेन टिलोपे खस्य ईनादेशे[1] णत्वे च सर्वचर्मीणः इति रूपं निष्पद्यते। एवमेव अद्य श्वो वा विजायते इति विग्रहे अवष्टब्धे (समीपकाले) विजायते (प्रसवः आसन्नः) इत्यर्थे "**अद्यश्वो भवति च (स.क.५.२.२२)"** इत्यनेन विधास्यमान-खप्रत्ययस्य विषयसत्त्वात् अद्य-श्वस्-इत्यनयोः सुबन्तयोः प्रकृतसूत्रेण केवलसमासो जायते। समस्तात् च अद्यश्व-शब्दात् खप्रत्यये प्रक्रियायाम् अद्यश्वीनशब्दो निष्पद्यते। अद्यश्वीना गौः इति च तत्रोदाहरणम्। एवमेव दशभिः एकादश गृह्णाति इति दशैकादशिकः इत्यत्र दश-एकादशशब्दयोः समासे, समस्ताच्च **"दशैकादशकुसीदाभ्यां ष्ठन्" (स.क.४.४.९१)** इति ष्ठनि प्रक्रियायां दशैकादशिकः इति रूपम्। मा शब्दः क्रियतामित्याह इति माशब्दिकः इत्यत्र माङ्-शब्द-इत्यनयोः समासः, समस्तात्पदात् **माशब्द इत्यादिभ्यः(स.क.४.४.१०१)** इत्यनेन ठक्। एवमेव ऊर्ध्वं मुहूर्ताद् भवमूर्ध्वमौहूर्तिकम् इत्यत्र ऊर्ध्व-मुहूर्तशब्दयोः समासः। ऊर्ध्वं देहाद् भवम् और्ध्वदेहिकम् इत्यत्र ऊर्ध्व-देह-शब्दयोः समासः। ऊर्ध्वं दमाद् भवम् और्ध्वन्दमिकम् इत्यत्र ऊर्ध्व-दम-शब्दयोः समासः। इत्थं कृतः पूर्वं कटः अनेनेति कृतपूर्वी कटम् इत्यत्र कृत-पूर्व-शब्दयोः समासः। भुक्तपूर्वी ओदनम्, गतपूर्वी ग्रामम् इत्यादावपि समानं बोध्यम्।

**समीक्षणम्-** प्रकृतसूत्रे तद्धितरहिताः निपात्यमानाः समस्तशब्दा एव उल्लिखिताः। हृदयहारिण्यां दण्डनाथाचार्येण तु तद्धितान्तानाम् उदाहरणं प्रदत्तम्। तत्रस्थेषु उदाहरणेषु विचार्यमाणेषु इदं परिलक्ष्यते यत् तद्धितप्रत्ययविषये क्वचित् पाणिनिभोजदेवयोर्वैमत्यं वर्तते। समासविषयेऽपि तथैव स्थितिर्दृष्टिगोचरतामेति। तानि च स्थलानि यथामति परिशील्य समीक्षितान्यत्र। यथा सर्वचर्मीणो रथः इत्युदाहरणे सर्वः चर्मणा वृतः इति विग्रहः प्रदत्तो हृदयहारिण्याम्। परन्तु "**सर्वचर्मणः कृतः खश्च" (स.क.५.२.८)** इति तद्धितविधायिसूत्रेण तु 'कृत' इत्यर्थे तद्धितो विधीयते। अतो दण्डनाथाचार्यस्य वृतार्थे तद्धितविधानं चिन्त्यं प्रकृते। काशिकानुसारं सर्वचर्मीणः इत्यत्र असमर्थसमासः। तत्रापि सर्वचर्म-इति समस्तपदस्य निपातितत्वम् उक्तम्।

एवं दशैकादशिकः इत्यत्र पाणिनिमते **"कुसीददशैकादशात् ष्ठन्ष्ठचौ" (अष्टा.४.४.३१)** इत्यनेन ष्ठच्-प्रत्ययः। तेन चित्त्वात् अन्तोदात्तत्वम्। भोजदेवमते तु **"दशैकादशकुसीदाभ्यां ष्ठन्" (स.क.४.४.९१)** इत्यनेन ष्ठन्-प्रत्ययः। एतन्मते तु नित्त्वात् आद्युदात्तत्वम्। अपि च दशैकादशिकः इत्यस्य विग्रहः सिद्धान्तकौमुद्यां प्रदर्शितः यत् – दशैकादशान् प्रयच्छति[2] इति। हृदयहारिण्यां तु दशभिः एकादश गृह्णाति इति विग्रहः। परन्तु ग्रन्थयोः विग्रहे भिन्नेऽपि उभयत्र उत्तमर्णस्य एव प्राधान्यम्। न्यासे तु दशशब्दम् एकादशार्थेषु दशसु उपचार्य दश-एकादश-शब्दयोः **विशेषणं विशेष्येण बहुलम् (अष्टा.२.१.५७)** इति समानाधिकरणसमासः उक्तः। तत्र दश चामी

---

[1] आयनेयीनीयियः फ-ढ-ख-छ-घां तद्धितादीनाम् (स.क.६.४.२)

2 दशैकादशान्प्रयच्छतीत्युत्तमर्ण एवेहापि तद्धितार्थः - इति (४.४.३१) सूत्रे सिद्धान्तकौमुदी

एकादश इति विग्रहो ज्ञेयः। तथाह्युक्तं न्यासे – **"दश चैकादश चेति समानाधिकरणसमासः। ननु च भिन्नविषययोः सामानाधिकरण्यं नोपपद्यते? दशैकादशशब्दोऽप्येकादशार्थेषु दशस्वेवोपचराद्वर्तत इत्यदोषः"** [1] इति। एवं प्रकृतोदाहरणे समासविषये भोजदेवन्यासकारयोर्वैमत्यं परिलक्ष्यते। भोजदेवमते केवलसमासः, न्यासकारमते तु समानाधिकरणसमासः।

सूत्रे कृतपूर्वादयः इत्यत्रादिपदेन पूर्वशब्दोत्तरपदाः शब्दाः ग्राह्या इति हृदयाहारिणीस्थोदाहरणपर्यवेक्षणेन ज्ञायते। तथाहि तत्र भोजनपूर्वी गतपूर्वी चेति उदाहरणे प्रदत्ते।

५. **सूत्रम् - काकतालादय इवार्थे (स.क. ३.२.५)**

सरस्वतीकण्ठाभरणे केवलसमाससम्बन्धि पञ्चममिदं सूत्रम्। द्विपदात्मकेऽस्मिन् सूत्रे काकतालादय इति प्रथमाबहुवचनान्तं पदम्। इवार्थे इति सप्तम्यन्तं पदम्। पूर्वस्मात्सूत्रात् तद्धिते इत्यनुवर्तते। प्रकृतसूत्रे इवेत्यव्यस्यार्थस्तावत् उपमानोपमेयभावात्मकं सादृश्यमिति। तद्धितशब्दो ह्यत्र इवार्थे इत्यत्र सम्बध्यते। तेन सादृश्यार्थद्योतकः तद्धितः इत्येवमर्थो लभ्यते। तद्धिते इत्यत्र विषयसप्तमी इति पूर्वत्रैवोक्तम्। तेन सादृश्यार्थद्योतक-तद्धितप्रत्ययस्य विषयो भवति चेत् काकतालादयः केवलसमासबद्धाः शब्दाः साधवो भवन्ति इति सूत्रार्थो लभ्यते। अत उक्तं हृदयहारिण्याम् – **"इवार्थद्योतको यस्तद्धितस्तद्विषये काकतालादयः सामान्याः समासाः साधवो भवन्ति"**[2] इति।

काकतालीयम् इत्युदाहरणम्। काकागमनमिव तालपतनमिव इति काकतालम्। काकतालमिव इति काकतालीयम्। अत्र **समासाच्च तद्विषयादाकस्मिके (स.क.५.३.१४१)** इत्यनेन इवार्थे समस्तपदात् छप्रत्ययो भविष्यति। अत इवार्थद्योतकतद्धितस्य विषयः प्रकृते वर्तते इति कृत्वा काकतालशब्दयोः समासो जायते। समस्ताच्च काकतालशब्दात् पूर्वोक्तसूत्रेण छप्रत्यये प्रक्रियायां काकतालीयम् इति रूपम्। प्रकृतोदाहरणे उपमानोपमेयभावात्मक-सादृश्यबोधाय काकतालीयम् इत्यत्र विशेष्यदलमपि प्रयोज्यम्। तथाहि काकतालीयो देवदत्तवधः इति सन्दर्भः। यथा तालवृक्षस्याधः काकस्य आगमनं, तालस्य काकोपरि पतनं च अकस्मात् जातं, तेन च काकस्य मृत्युः सञ्जातः, तद्वत् प्रकृतेऽपि देवदत्तस्य अरण्यगमनं, दस्यूनां च तत्र उपनिपातः अकस्माज्जातम्, तैश्च दस्युभिः देवदत्तः निहतः इति उदाहरणस्यास्य आशयः। तत्र काकागमनवत् देवदत्तागमनं, तालपतनवत् च दस्य्वागमनमिति कालतालमिति समासाद् प्रतीयते। समासार्थश्च काकतालसमागमतुल्यः देवदत्तदस्युसमागमः इति। प्रत्ययार्थश्च तालपतनकृतकाकमृत्युवत् दस्युकृतदेवदत्तवध इति।

**समीक्षणम्-** अनेन सूत्रेण येषां समासानां साधुत्वं प्रतिपाद्यते, न तेषां पृथक्प्रयोगः सम्भवः। अपि तु समस्तपदात् छप्रत्यये क्रियमाणे निष्पन्नस्य तद्धितान्तस्यैव लोके प्रयोगः। पाणिनिसम्प्रदायेऽपि अमीषां केवलसमासत्वमेवाङ्गीकृतम्। तत्र काशिकायां **समासाच्च तद्विषयात् (अष्टा.५.३.१०६)** इति छप्रत्ययविधानरूपज्ञापकात् समास इत्यपि पक्षः समुपस्थापितः। तथाह्युक्तं काशिकायाम् – **"समासश्चायमस्मादेव ज्ञापकात्, नह्यस्यापरं लक्षणमस्ति। सुप्सुपेति वा समासः"**[3] इति।

काकतालादयः इत्यत्र आदिपदेन अजाकृपाण-खल्वाटबिल्व-अन्धकवर्तकादीनां सङ्ग्रहः। एतेभ्यश्च समास्तपदात् छप्रत्यये यथाक्रमम् अजाकृपाणीयम्, खल्वाटबिल्वीयम्, अन्धकवर्तकीयं चेति रूपाणि।

६. **सूत्रम् - इवेन विभक्त्यलोपश्च (स.क. ३.२.६)**

सरस्वतीकण्ठाभरणे केवलसमासविधायि षष्ठमदः सूत्रम्। त्रिपदात्मकेऽस्मिन् सूत्रे इवेनेति तृतीयैकवचनान्तं पदम्, विभक्त्यलोप इति प्रथमान्तैकवचनान्तं समस्तपदम्, चेत्यव्ययपदम्। न लोपः अलोप इति नञ्तत्पुरुषः, विभक्तेः अलोपः विभक्त्यलोपः इति षष्ठीतत्पुरुषः। **"सुप् सुपा सहैकार्थीभावे समासः"(स.क.३.२.१)** इति सूत्रमत्राधिक्रियते। अतः सूत्रार्थः प्रोक्तो हृदयहारिण्यां यत् **"सुबन्तम् इवेन सह एकार्थीभावे समस्यते, विभक्तिश्च न लुप्यते"**[4] इति। सामान्येन समासावयवभूतस्य सुपः **"सुपो**

1 "कुसीददशैकादशात् ष्ठन्ष्ठचौ" (अष्टा.४.४.३१) इति सूत्रे न्यासः

2 स.क. ३.२.५ इति सूत्रे हृदयहारिणी

3 समासाच्च तद्विषयात् (अष्टा.५.३.१०६) इति सूत्रे काशिका

4 स.क. ३.२.६ इति सूत्रे हृदयहारिणी

**लुगैकार्थ्ये" (स.कं.३.१.१९७)** इत्यनेन लुग् जायते। स च लुक् प्रकृतसूत्रेण निषिध्यते। एवञ्चानेन सूत्रेण कार्यद्वयं भवति। इवेन सह सुबन्तस्य समासः, विभक्तिलोपनिषेधश्चेति।

रघुवंशस्य मङ्गलपद्ये प्रयुक्तं वागर्थाविव इति पदं सूत्रस्यास्य प्रसिद्धमुदाहरणम्। तथाहि वागर्थौ इव इति लौकिकविग्रहे वागर्थ औ इव इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे प्रक्रियाकार्ये प्राप्तस्य सुब्लुको निषेधे समासे संहिताया नित्यत्वात् "**एचोऽयवायावः" (स.कं.६.१.८८)** इति आवादेशे वागर्थाविव रूपम्। दण्डनाथाचार्यो हृदयहारिण्याम् इमान्युदाहरणानि प्रादात् – कन्ये इव, दम्पती इव, वाससी इव, रोदसी इव चेति। इमानि सर्वाण्येव समस्तपदानि सन्ति। परन्तु सर्वत्रैव "**ईदूदेद्द्विवचनं प्रगृह्यम्" (१.१.१०५)** इत्यनेन प्रगृह्यसंज्ञायां **"प्रगृह्यः प्रकृत्या" (स.कं.६.१.१४२)** इति प्रकृतिभावे सञ्जाते सन्धिः न दृश्यते।

**समीक्षणम्-** भगवान् पाणिनिस्तु इवशब्देन सह समासं सूत्रेण न कुत्रापि व्यधात्। वार्तिककारः कात्ययनो हि "**इवेन समासो विभक्त्यलोपश्च (वा.)**" इति वार्तिकेन अयं समासः प्रोक्तः। आचार्यो भोजदेवस्तु तस्मै वार्तिकाय सूत्ररूपतां प्रादात्। वस्तुतः प्रकृते विभक्त्यलोपविधानात् समासस्य फलं किम् इति सततं जिज्ञासा समुदीयात्। वागर्थाविव इत्युदाहरणे नित्यसन्धिरूपफलं क्वचिद् वक्तुं शक्यते चेदपि हृदयहारिण्युक्तेषु कन्ये इव वाससी इव इत्यादिषूदाहरणेषु तदपि फलं नास्ति। अतः पूर्वोक्तः प्रश्नः यथार्थ एव। तत्रेदं समाधानम् यत् ऐकपद्य-ऐकस्वर्य-सम्पादनं तावत् समासस्य फलमिति।

**७. सूत्रम् - भूतपूर्वादयः (स.क. ३.१.७)**

सरस्वतीकण्ठाभरणे केवलसमासविधायीदं सप्तममन्तिमञ्च सूत्रम्। एकपदात्मकेऽस्मिन्सूत्रे भूतपूर्वादयः इति प्रथमान्तमेकमेव पदम्। भूतपूर्वादयः शब्दाः केवलसमासेन सिध्यन्तीति प्रतिपाद्यतेऽनेन सूत्रेण। अत उक्तं हृदयहारिण्यां **"भूतपूर्वादयः सामान्यसमासाः साधवो भवन्ति"** इति।

पूर्वं भूतः इति लौकिकविग्रहे पूर्व अम् भूत सु इत्यलौकिकविग्रहे भूतपूर्वादयः(स.कं. ३.१.७) इति सूत्रेण समासे ततः "**समासानुकरणनिपाताश्च**" (स.कं.१.१.७) इत्यनेन समासस्य प्रातिपदिकसंज्ञायां **"सुपो लुगैकार्थ्ये" (स.कं.३.१.१९७)** इति सूत्रेण पूर्वोत्पन्नयोः सुपोः ऐकार्थ्ये लुकि पूर्व भूत इति स्थिते सूत्रे भूतपूर्वेति निर्देशात् भूतशब्दस्य पूर्वनिपाते एकदेशविकृतन्यायेन सौ भूतपूर्वः इति रूपम्। एवमेव पूर्वं दृष्टः इति विग्रहे प्रकृतसूत्रेण केवलसमासे प्रक्रियायां दृष्टपूर्वः इति रूपम्। तद्वदेव पूर्वं श्रुत इति विग्रहे प्रकृतसूत्रेण केवलसमासे प्रक्रियायां श्रुतपूर्व इति रूपम्।

**समीक्षणम्-** आचार्यो भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुद्यां **सह सुपा (अष्टा. २.१.४)** इति पाणिनीयसूत्रस्योदाहरणरूपेण भूतपूर्व इति उदलिखत्। तत्रापि **भूतपूर्वे चरट् (अष्टा.५.३.५३)** इति सूत्रनिर्देशात् भूतशब्दस्य पूर्वनिपात इति प्रतिपादितम्। आचार्यो भोजदेवस्तु एतादृशानां प्रयोगानां साधनाय पृथक्सूत्रमेव प्रणिनाय। सूत्रेऽस्मिन् भोजदेवाचार्येण समस्तशब्दस्योल्लेखो विहितः। अपि च भूतपूर्वादयः इत्यत्र आदिशब्दप्रयोगात् अन्येऽपि एतादृशाः समासाः सन्तीति सूचयामास। के चे ते समासाः इति प्रतिपादयिषुः दण्डानाथाचार्यो हृदयहारिण्यां श्रुतपूर्वः दृष्टपूर्वः इति पूर्वोत्तरपदानि उदाहरणानि प्रादात्। तेनेदमनुमीयते यत् दण्डनाथाचार्यानुसारम् आचार्यो भोजदेवाचार्यः भूतपूर्वादयः इति सूत्रेण पूर्वशब्दः उत्तरपदं येषां केवलसमासानां तेषामेव विधानम् ऐच्छदिति चिन्तयामि।

**उपसंहारः-** केवलसमासविधायकानि सप्त सूत्राणि आचार्यभोजराजेन स्वकीये सरस्वतीकण्ठाभरणाख्ये व्याकरणे न्यस्तानि। आचार्यपाणिनिना तु **"सह सुपा"** इत्येकेनैव सूत्रेण केवलसमासं व्यदधत्। वार्तिककारेण तत्र "**इवेन समासो विभक्त्यलोपश्च**" इति वार्तिकमेकम् अयुज्यत। एवं पाणिनीयव्याकरणे शास्त्रद्वयं केवलसमासं विदधाति, सरस्वतीकण्ठाभरणे तु शास्त्रसप्तकम् इत्येवं प्रकृतव्याकरणे शास्त्रसंख्याधिक्ये किं कारणमिति विषयं प्रकृतशोधप्रबन्धः सयुक्ति प्रतिपादयति। वस्तुतो विषयेऽस्मिन् समीक्ष्यमाणे इदं लभ्यते यत् पाणिनीयव्याकरणे सूत्रान्तरेषु प्रयुक्तानां केषाञ्चन असमर्थसमासनिष्पन्नानां पदानां सरस्वतीकण्ठाभरणव्याकरणे पृथक्सूत्रैः केवलसमासनिष्पन्नत्वेन साधनं विहितम्। यथा विष्पष्टपटुः इत्यत्र विस्पष्टपदस्य पदार्थैकदेशे पटुनिष्ठपटुत्वगुणे अन्वयात् असामर्थ्यात् सामान्येन सूत्रेण समासो न सम्भवतीति हेतोः तत्साधनाय **"काष्ठादीनि क्रियाविशेषणतायाम्" (स.क.३.२.२)** इति सूत्रं विरचितम् आचार्यभोजराजेन। एवमेव काकतालीयम् इत्यादितद्धितान्तपदान्तर्गतसमासः पृथग्रूपेण पाणिनीयव्याकरणे नालोचितः। तमपि "**काकतालादय इवार्थे" (स.क. ३.२.५)** इत्यनेन आचार्यभोजराजः स्पष्टीचकार। इत्थं विषयोऽयं स्पष्टो यत् प्रकृतव्याकरणस्य

मौलिकता विशिष्टप्रयोजनं च सुतरां वर्तते इति।

## परिशीलितग्रन्थसूची/Bibliography


भोजदेवः। सरस्वतीकण्ठाभरणम्। सम्पा. टि.आर.चिन्तामणि। मद्रासविश्वविद्यालयः, १९३७।

भोजदेवः। सरस्वतीकण्ठाभरणम्। श्रीनारायणदण्डनाथविरचितया हृदयहारिण्याख्यया वृत्त्या समेतम्। सम्पा.के. साम्बशिवशास्त्री। राजकीयमुद्रणयन्त्रालयः, तिरुवनन्तपुरम्,१९५५।

भट्टः, नागेशः। *लघुशब्देन्दुशेखरः*। सम्पा. प्रो.हरेकृष्णशतपथी। राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००७।

दीक्षितः, भट्टोजिः। *वैयाकरणसिद्धान्तकौमुदी*(द्वितीयो भागः)। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा। वाराणसी: मोतीलाल बनारसी दासः, २०१४ (पुनर्मुद्रणम्)।

वामन-जयादित्यः। *काशिका*। सम्पा. जयशङ्करलाल त्रिपाठी। वाराणसी तारा वुक् एजेन्सी, १९९०।

पाणिनिः। *अष्टाध्यायी*। सम्पा. गोपालदत्तपाण्डेयः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१७। (चौखम्बा सुरभारती ग्रन्थमाला १९)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्*। सम्पा. श्रीभार्गवशास्त्री जोशी। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, १९९१।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। सम्पा. श्रीगोविन्दाचार्यः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१७।

# लाक्षणिकरूपकपरम्परायां संकल्पसूर्योदयनाटकम्- एकमध्ययनम्

अभिजित्-घोषः, शोधच्छात्रः,
श्रीसीताराम-वैदिकादर्श-संस्कृत-महाविद्यालयः, कोलकाता

**शोधसारः-** श्रीवेंकटनाथप्रणीतं संकल्पसूर्योदयनाटकं प्रबोधचन्द्रोदयाख्यादपरस्मादध्यात्मविषयप्रतिपादकान्नाटकादस्य वैलक्षण्यं प्रदर्शितं भवति। तद्धि नाटकं भगवत्पादशंकराचार्यस्यौपनिषदं सिद्धान्तं प्रकटयत् ज्ञानान्मोक्ष इति तदीयसिद्धान्तसारं प्रतिपादयति।नाटकेऽस्मिन् दश-अङ्काः सन्ति। संस्कृतसाहित्ये दार्शनिककाव्यनाट्यादीनां उद्गमविकाशप्रसङ्गे आदौ प्रबोधचन्द्रोदयस्य नामोल्लेखो भवति । श्रीकृष्णमिश्रः ख्रीष्टीय-एकादश-शतकस्य द्वितीयार्धे प्रबोधचन्द्रोदयनाटकं विरचितवान् । सर्वेषु संस्कृतनाटकेषु इदं श्रेष्ठं इति विद्वद्भिः स्वीक्रियते। अस्य प्रस्तावनायां उक्तं यत् गोपालस्य आदेशेन तस्य सहजमित्रकीर्तिवर्मणा चेदिराज-कर्णस्य पराजयम् उपलक्ष्य प्रबोधचन्द्रोदयनाटकं रचितम् अभिनीतं च अभवत् । श्रीकृष्णमिश्रः अस्मिन् नाटके विष्णुभक्तिसमन्वयेन अद्वैतवेदान्तसम्मतानि मोक्षलाभोपायानि वर्णितवान्।शान्तरसप्रधानस्य अस्य नाटकस्य विषयः मानवमनसः चिरं भावद्वयं विवेकः मोहश्च पुनः एतयोः पारस्परिकः द्वन्द्वः । अन्तिमे विवेकस्य जयः, उपनिषद्विवेकयोः मिथः मिलनेन प्रबोधस्य उत्पत्तिः। विषयोऽयं सयुक्त्या शोधपत्रेऽस्मिन् प्रदर्शयामि।

**कुञ्चिशब्दाः-** उपनिषदः, दार्शनिककाव्यम्, विष्णुभक्तिः, अद्वैतवेदान्तः, मोक्षः, विवेकः।

**उपोद्घातः-** "यत्र भवति विश्वमेकनीडम्" इति वेदोक्तं वचनं भूमण्डलीकरणप्रक्रियाया मूलं दर्शनम् । द्वितीयविश्वयुद्धानन्तरं समग्रविश्वमानवसमाजस्य मुख्यं लक्ष्यं भवति शान्तिः। शान्तिद्वारा समृद्धिः, शान्तिद्वारा मैत्रीभावः, शान्तिद्वारा सुखञ्च सम्भवति । एतदर्थं सत्यमावश्यकम् । सत्यपरिपालनेन शान्तिः शान्तिद्वारा विश्वसुखम् । अतः गीतायामुच्यते - अशान्तस्य कुतस्सुखम् ? इति ।

विश्वयुद्धानन्तरं विश्वस्य प्रभावशालिनोऽपि देशाः यथा भारतम्, आमेरिका, रुसिआ, फ्रान्स्, जापान्, जर्मानी, चाइना इंलैण्डप्रभृतयः विभिन्नैरुपायैः शान्तिस्थापनार्थं प्रयत्नं कुर्वन्तः सन्ति । एतदर्थं मिलितजातिसङ्घस्य (UNITED NATIONS) निर्माणमपि जातम्। आन्तर्जातीयस्तरे मानवाधिकारायोगस्य (INTERNATIONAL HUMAN RIGHTS COMMISSION) अपि आविर्भावः जातः । सर्वे मानवाधिकारसुरक्षापूर्वकं शान्तिस्थापनार्थं तत्पराः। सत्यमाध्यमेन शान्तिस्थापनस्य सन्देशं द्रढयितुमलौकिकविश्वस्य रचयिता स्वयं क्रान्तदर्शी कविरपि समर्थः इति प्रतिपादयितुं "विश्वायनम्" इति महाकाव्यस्य परिकल्पना कृता ।विश्वायनमहाकाव्ये नायकनायिकापरिकल्पनं प्रतीकात्मकम् अस्ति । सत्यं नायकः, शान्तिश्च नायिका । कविर्भवति तयोः सत्यशान्त्योः सुपुत्रः। सर्वेषामाशीर्वादं गृहीत्वा सः सुपुत्रः सर्वेषां दुःखदूरीकरणार्थं पुनः सर्वेभ्यः सुखं प्रदातुं समर्थः इति महाकाव्येऽस्मिन् प्रतिपादितम्।

मोहपराजयः इति गुजरातस्य चालुक्यराज्ञः अजयपालस्य मन्त्रिणा यशपालेन लिखितं रूपकात्मकं नाटकम्। अस्मिन् नाटके आचार्यहेमचन्द्रेण राजाकुमारपालस्य जैनधर्मे दीक्षा वर्णिता।मन्त्रि-पुण्यकेतोः साहाय्येन च हेमचन्द्रस्य पौरोहित्येन राजकुमारपालेन सह कृपासुन्दर्य्याः परिणयः अस्य नाटकस्य विषयवस्तु। राजकुमारपालः योगशास्त्रबलेन आचार्यस्य हेमचन्द्रस्य साहाय्येन मनोराज्यतः मोहराज्यस्य अवरोधं अपसारयितुं सक्षमः अभवत् । अस्मिन् नाटके कानिचन ऐतिहासिकातथ्यानि सन्ति, तथापि नाटकीयव्यक्तित्वानाम् आरोपे श्रीकृष्णमिश्रस्य प्रबोधचन्दोदयस्य अनुकरणेन लिखितम्।

पश्चिमवङ्गप्रदेशान्तर्गतकाञ्चनपल्लिनिवासिनः शिवानन्दसेनस्य पुत्रः परमानन्दसेनः कविकर्णपुरः इति नाम्ना ख्यात आसीत्।कविकर्णपुरः षोडशशतके उडिशाप्रदेशस्य राजा प्रतापरुद्रस्य आदेशेन दशाङ्कविशिष्टं चैतन्यचन्द्रोदयः इति नाटकं रचितवान्। अस्मिन् नाटके श्री चैतन्यदेवस्य भक्तिवादविश्लेषणस्य च प्रचारं कर्तुं प्रयासं कृतवान्। तदानीं श्रीचैतन्यस्य प्रभावः वङ्गदेशे कीदृशो जातः तत्तु अस्मिन् नाटके उपलभ्यते।

सप्तदशशतकस्य प्रथमार्धे श्रीनगरस्य फतेशा इति स्थानस्य सभाकविः गोकुलनाथः आसीत् । सः मिथिलायाः राजा राधवसिंहस्य समसामयिकः इति मन्ये । सः तस्य अमृतोदयःइति रूपकात्मकनाटकमाध्यमेन जीवानां सृष्टितः लयपर्यन्तं अवस्थां वर्णितवान्।

गोकुलनाथ: न्यायवैशेषिकदर्शनावलम्बनेन पञ्चाङ्कात्मकम् अमृतोदय: इति नाटकं रचितवान्।

मथुरानिवासी समराजदीक्षित-नरहरिविन्तुपुरन्दरः सप्तदशशतकस्य शेषार्धे 'श्रीदामचरितम्' इति पञ्चाङ्के एकं नाटकं रचितवान्। अस्मिन् नाटके रूपकस्याकारेण श्रीकृष्णस्य सखा श्रीदामस्य कथालिपिबद्धा। अत्र नायकः सरस्वत्याः प्रियपात्रंभूत्वापि लक्ष्म्या: अप्रीतिभाजनः। सः दारिद्र्ये मूर्खतयापराभूतम्।

**संकल्पसूर्योदयनाटकस्य परिचय :**

अस्मिन् नाटके दश अङ्काः सन्ति । अत्र देहधारणार्थं गुणरूपं विवेकसुमत्यादयः व्यवसायः मोहः दुर्मतिलोभादीपात्ररूपाणि कल्पितानि। अत्र विवेकः सुमतिश्च सात्विकगुणसम्पन्नौ। अपरतः मोहः, दुर्मतिः तामसिकगुणयुक्ते। विवेकोऽत्र धीरोदात्तो नायकः । पुरुषस्य संसारान्मोचनं नायकस्य प्रयोजनं संसाररूपातः अनलत:मनुष्यदेहरक्षार्थं विवेकः नायिका सुमत्या सह प्रकृतवैषयिकसुखवैमुख्यार्थं प्रयत्नं करोति। अपरपक्षे मोहः यः प्रतिनायकः एवं विवेकस्य शत्रुः। सः तस्य पत्न्या दुर्मत्या सह-पुरुषं सांसारिकसुखं प्रति आसक्तं कर्तुं प्रयासं करोति। विवेकः परिवारेण सह मोहं पराजित्य पुरुषं भगवतःकृपया भगवत्संकल्पद्वारा संसारं मोचयित्वा परब्रह्मानुभवरूपं मोक्षसाम्राज्य प्राप्तुं सहकरोति।

**वर्णितानि चरित्राणि**

| नायकपक्षः | | प्रतिनायकपक्षः | |
|---|---|---|---|
| विवेकः- | राजा | भहामोहः | प्रतिनायकः |
| सुमतिः | राज्ञी | दुर्मतिः | तत्पत्नी |
| व्यवसायः | सेनापतिः | काम : क्रोधः | सेनापती |
| तर्कः - | सारथि: | रतिः | कामपत्नी |
| संस्कार: | शिल्पी | वसन्तः | कामस्य सखा |
| दृष्टप्रत्ययः | दूतः | रागद्वेषलोभाः | मन्त्रिणः |
| संकल्प: | भगवद्दासः | दम्भः दर्पः - | मोहपरिवारौ |
| पुरुषः | निःश्रेयसाधिकारी | कुहना | दम्भपत्नी |
| बुद्धिः | पुरुषपत्नी | असूया | दर्पपत्नी |
| विष्णुभक्तिः | भगवद्दासी | स्तम्भ : | कञ्चुकी |
| श्रद्धा, विचारणा | सुमतिसख्यौ | संवृत्तिसत्यः | दूतः |
| गुरुः | सिद्धान्त: | अभिनिवेशः | कोशाधिकारी |
| शिष्य: | वाद: | दुर्वासना | तत्पत्नी |
| नारदः, तुम्बुरुः | देवर्षी | ----- | ------ |

**परिशीलितं सम्बद्धसाहित्यम्**

अनुसन्धानसमस्याचयनार्थं अनुसन्धित्सुना निम्नलिखितं सम्बद्धसाहित्यं परिशीलितम्–

अनामिका दीक्षित 2002 तमे वषे शोधकार्यं कृतवती - *प्रबोधचन्द्रोदय एवं संकल्पसूर्योदय नाटको का तुलनात्मक अध्ययन* विषये।

जयकृष्ण गोडीयाल 1981 तमेवर्षेशोधकार्यं कृतवान् –Critical study of Samkalpasuryodaya by Venkatanatha .

वसन्तकुमार मिश्र 1988 –99 तमे वर्षे शोधकार्यं कृतवान् - *भवभूति विरचिते महावीरचरित नाटके कतिपयानां मनोवैज्ञानिक तत्त्वानाम् अध्ययनम्* विषये ।

वलवन्त शर्मावत्स शोधकार्यं कृतवान् - *नैषधीयचरिते साहित्ये दृष्ट्या भारतीय दर्शनतत्त्वानां विश्लेषणम्* विषये ।

मिलिसहा 2024 तमे वर्षे शोधकार्यं कृतवती - Modern Campu Matr – Mukti – Muktāvalī of Jayakrushna Mishra – A Study.

**अनुसन्धानस्य औचित्यम्**

सत्यसंकल्पस्य निरूपाधिकसुहृदो भगवतो यः संकल्पः अमुं मोक्षयिष्यामि इत्यादि अध्यवसायरुपः, स एव मुमुक्षूणां मोक्षसाधनम् इति उपनिषदः सिद्धान्तोऽत्र प्रधानप्रतिपाद्यो विषय।

मनुष्याणां स्वकीयचरित्राणां संशोधनार्थंसंस्कृतकाव्येषु मनोवैज्ञानिकधाराइदानीम् अपि न स्वीकृता।अतः मनोवैज्ञानिकचरित्राणाम् अध्ययनमाध्यमेन अयं निबन्धः वयं कर्तुकामाः।

**शोधस्योद्देश्यानि**

प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'- अस्या उक्तेरनुसारं प्रयोजनरहिते कस्मिन्नपि कर्मणि मन्दजनोऽपि संलग्नो न भवति। अतः शोधकार्यमिदं निम्नलिखितानि उद्देश्यानि अधिकृत्य विधास्यते–

१ दर्शकाः नाट्यमाध्यमेन मनुष्यस्य मनोस्थितिम् अवगच्छन्ति।

२ मानवीय-आभ्यन्तरदोषगुणादीन् साक्षात् कुर्वन्ति।

३ उन्नतचरित्रगठनार्थविषये समीक्षणम्।

४ पुरुषस्य संसारात् मोचनाय किं किम् आवश्यकम् तेषु विषयेषु समीक्षणम्।

५ मनुष्याणां मोक्षोपायविषयाणां समीक्षणम्

**सहायकग्रन्थसूची**

१. श्रीकृष्णमिश्रः। *प्रबोधचन्द्रोदयम्*। टीकाकार रामचन्द्रमिश्रः। वाराणसीः चौखम्बाविद्याभवनम्,1955.

२. आचार्य हरेकृष्णशतपथी, *विश्वायनम्*, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2013.

३. श्रीकृष्णमिश्रः। *प्रबोधचन्द्रोदयम्*। सम्पा. अनिलचन्द्रवसु। संस्कृत वुक डिपो, कोलकाता, 1979.

४. श्रीश्रीजीवन्यायतीर्थः। *चण्डताण्डवम्*। संस्कृतसाहित्यपरिषद ,कोलकाता

५. जयकृष्णमिश्रः। *मातृमुक्तिमुक्तावली*। ओडिशा साहित्य एकाडेमी।

६. आचार्यवलदेवउपाध्यायः। *संस्कृत-वाङ्मय का वृहद् इतिहास*। उत्तरप्रदेश संस्कृतसंस्थान, लखनऊ

# प्राचीनभारते-हंससन्देशकाव्ये भौगोलिकवैचित्र्यम्

डा. अदिति वसु
Faculty of sanskrit Dept.
Saheed Nurul Islam Mahavidyala,W.B
Email id.aditibose391@gmail .com

संस्कृतसाहित्याकाशे काव्याख्यं किञ्चित् कविकर्म सहृदय-हृदय-समाह्लादकं, शब्दार्थशरीरकं, गुणालङ्कारयुतं, रसस्फुरितयुक्तं नित्यनूतनतायाः जलधारा इव प्रवहमाना भवति। तदेव काव्यस्य अनुपमं स्थानं चिरादेव कालाद् भारतमासाद्य तिष्ठति। भारतस्य नानाभागेषु कालिदासस्य प्रतिभा सर्वातिशायिनीति, अपि च इतरप्रान्तीयभाषासु तस्य विचरणं सर्वस्वत्वेन उद्घोष्यते।
इयं हि कविकर्म दृश्य-श्रव्यभेदेन द्विविधमपि। तत्र प्राचीनाचार्यः दण्डी **इष्टार्थव्यवच्छिन्ना पदावली काव्यम्** इति उल्लिखति। भामहस्तु **शब्दार्थयोः सहितयोः काव्यत्वम्** इति।
युगे युगे विश्ववासिनां हितं साधयितुं साहित्यं प्रवर्तते। हितेन सह वर्तमानम् इति तस्य भावः 'साहित्यम्' इति। अस्मिन् क्षेत्रे सहृदयदृष्ट्या मनोरञ्जनं भवति। तदिदं श्रव्यकाव्यं प्रधानतया गद्य-पद्य-चम्पू-भेदैः त्रिविधम्। प्रबन्धकाव्यं तु खण्डकाव्यं महाकाव्यमिति द्विविधम्। खण्डकाव्यं नाम महाकाव्यस्यैकदेशानुसारि किञ्चित् गेयछन्दोभिः यथा स्रग्धरा-शिखरिणी-मन्दाक्रान्ता-शार्दूलविक्रीडितादिभिः सह प्रणीयते। अस्मिन् काव्ये किमप्येकविषयतां वृत्तमाश्रित्य वर्ण्यते। केनचित् खण्डकाव्यस्य लक्षणमित्थमुक्तम्-

**ककारादिक्षकारान्तैश्चतुर्विंशतिरक्षरैः।**
**यद्यैकं चरितं गीतं खन्डकाव्यमिति स्मृतम्॥**

केचन आलङ्कारिकाः "मेघदूतम्" खण्डकाव्यमिति उच्यते। तेषु विश्वनाथ खण्डकाव्यस्य लक्षणम् उद्घोषयति यत् **खण्डकाव्यं तु काव्यस्यैकदेशानुसारि यत्।** अस्य उदाहरणरूपेण सः **मेघदूतम्** इति नाम निर्दिशति। प्राचीनभारते श्रव्यकाव्यस्य विभागाः मुक्तकं, कुलकं, कोषः, संघातः इति नामभिः अभिधीयन्ते। काव्यादर्श-प्रभाटीकायां रङ्गाचार्य-रेड्डिशास्त्री च संघातकाव्यस्य मेघदूत-काव्यस्य च तुलना दर्शितवन्तौ। अग्रे कालिदासस्य प्रभावेण मेघदूतस्य अनुकरणेन संस्कृतस्य विविधानि दूतकाव्यानि रचितानि। यथा- भ्रमरदूतम्, पिकदूतम्, वाग्दूतम्, मनोदूतमित्यादीनि।
मेघदूतम् इति मेघसन्देशः नाम्ना अपि प्रसिद्धम् अस्ति। मेघसन्देशे सन्देशः दूतसदृशः मुख्यविषयरूपेण भूमिकां निर्वहति। कानिचन सन्देशकाव्यानि अपि दृष्टिगोचराणि भवन्ति।
कपोतसन्देशः इति नाम्ना प्रसिद्धं काव्यमिदं कुञ्ञण्णिकुरुप-नामधेयेन कविना रचितम्। अत्र पद्यमिदम् उपलभ्यते—

**कश्चित् भ्रातः कुशलमयि ते सर्वतः साम्प्रतं वः ।**
**कुत्रास्मादुत्पतितुमसि चोच्छ्वासयन् पक्षतीः किम् ?**[i]

**कामसन्देशः**

१३५ पद्यैः निवद्धं प्रसिद्धं खण्डकाव्यम्, यत्र पूर्वभागे ६६, उत्तरभागे ६९ पद्यानि उपलभ्यन्ते। काव्यस्य स्वरूपविषये यथा-

**सन्देशशाख्यं मधु नवमितो नीयतामङ्गनायै ।**
**श्लिष्यद्वर्णआवलिमयमहाभाजते सङ्गृहीतम् ॥**[ii]

**सुभगसन्देशः** नारायणाभिधः भूसुरः अस्य काव्यस्य कर्ता अस्ति। यथोक्तम्-

**यस्य स्वामी यदुकुलपतिर्नामतो रामवर्मा**
**यस्य श्रीमान् भवति परमं दैवतं भागिनेयः ।**
**उद्यन्माध्वीरसपरिमले तस्य सन्देशकाव्ये**
**हृद्ये नारायणकवयितुः पूर्वभागः समाप्तः ॥**[iii]

**शुकसन्देशः**

लक्ष्मीदासेन पञ्चदशशतके सन्देशकाव्यं रचितम्। द्विभागेन मन्दाक्रान्तावृत्तेन प्रणीतम् अस्ति। चिन्तातिलकव्याख्यानस्य कर्ता गौरीदासः एकं पद्यं व्यरचयत्। यथोक्तम्-

**वक्त्रे पद्मं दृशि कुवलयं कैरवं मन्दहासे**

**हस्ते रक्तोत्पलमिव वपुः प्रेक्ष्य सङ्गह्य सख्यः ।**[iv]

**पवनसन्देशः**

पवनसन्देशः रामवर्मणा विरचितः। एतस्य काव्यस्य उत्तरखण्डः संयोजितः अस्ति। काव्येऽस्मिन् नायिका लङ्कायां तिष्ठति। तां प्रति वार्ता पवनेन प्रेषिता। तद्यथा-

**अध्यास्ते तामनिल ! नगरीं जानकी सा निषण्णा**
**तात्रात्यन्तं मलयत इवोन्मूलिता गन्धवल्ली।**

**चेतोदूतम्**

काव्याध्ययनेन ज्ञायते यत् एतत् मन्दाक्रान्ता-छन्दसि निवद्धं चेतसः द्योतकम् एव अस्ति। तत्र १२९ पद्यानि सन्ति। यथा-

**आशाबद्धो गमयति दिनान् दैन्यवानेष साक्षा**
**त्तस्य स्वामिन् ! यदि न भविता संगमस्त्वत्प्रसत्तेः ।**[v]

**मनोदूतम्**

तैलङ्गव्रजनाथेन १७५८ वर्षे काव्यमिदं प्रणीतम्। काव्योऽयं अपरं नाम 'सह्लादयाह्लादनम्' इति। काव्येऽस्मिन् द्रौपदी कृष्णं प्रति स्वकीयमानरक्षार्थं स्वकीयमनः एव दूतत्वेन प्रेषयति इति।

**पिकदूतम्**

रुद्रन्यायपञ्चाननः शार्दूलविक्रीडितेन छन्दसा व्यरचयत्। राधा विरहव्याकुला भूता पिकं दूतं कृत्वा मथुरास्थं श्रीकृष्णं प्रति सन्देशं प्रेषयति। राधा श्लोककारेण विरहावस्थां प्रणीयते।

**गौरी कोकिल मे परा तुनुरियं कृष्णेन कृष्णीकृता ।**
**सुस्स्थं शुद्धमुदारमेव परमं चित्तञ्च मत्तं कृतम् ।।**[vi]

रुपगोस्वामीकृतः उद्धवसन्देशः हंसदूतश्च – श्रीमतः अनुयायिनः चैतन्यमहाप्रभोः इति सन्देशकाव्यद्वयं प्रणीतवान्। श्रीकृष्णः मथुरायां स्थित्वा गोपी स्मृत्वा विरहव्याकुलो भूत्वा उद्धवद्वारा सन्देशं प्रेषयामास।

**हंसदूतम्**

शिखरिणीछन्दसि निवद्धानि १४२ पद्यानि सहित इदं काव्यं रूपगोस्वामिना विरचितम्। श्रीकृष्णः अक्रूरेण सह मथुरा गते राधा विरहव्याकुला भूत्वा यमुनातटे विद्यमानं हंसं दूतीकृत्वा कृष्णसभां प्रेषयति स्म।

**अनिलदूतम्**

संस्कृतशिक्षाङ्गनः भट्टपल्लिस्थः रामदयाल-तर्करत्नकृतः इदं दूतं प्रसिद्धम् आसीत्। काव्यमिदं नैव मुद्रितम्। मथुरागामी कृष्णस्य कृते एकः नीलोत्पलनयनागोपी दूतरूपः पवनस्य सहायेन कृष्णपार्श्वे प्ररितः।

**श्रीमत्कृष्णे मधुपुरगते निर्मला कापि वाला**
**गोपी नीलोत्पलनयनजां वारिधारां वहन्ती ।**[vii]

**मेघदौतम्**

त्रैलोक्यमोहन गुहनियोगिन द्वारा विरचितः मेघदौतम् अस्ति। मन्दाक्रान्ताछन्दसि निवद्धा किञ्चित् भिन्नक्रमः दृश्यते। अत्र यक्षिनीवार्ता स्वीकृत्वा मेघः दूतरूपेण यक्षपार्श्वे समागताः आसीत्। द्विशतकम् अधिकश्लोकेन काव्यमिदं रचितम्।

**भक्तिदूतम्**

संस्कृतसाहित्यपरिषदग्रन्थागारे स्थितः कालिप्रसादकृतः भक्तिदूतं वर्तते। २३ श्लोकाकारेण ग्रथितः अयं ग्रन्थे स्वकीयप्रिया मुक्तिरस्य वार्ता प्रेषितवान्।

**कीरदूतम्**

हरप्रसादशास्त्री उल्लिखितः रामगोपालकृतः कीरदूतं १०४ श्लोकाकारेण निबद्धम्।

एतानि काव्यानि विहाय चकोरसन्देशम्, उपवनदूतम्, नेमिदूतम्, इन्दुदूतम् इत्यादीनि भवन्ति। अन्यप्रान्तानां कवयसदृशाः वङ्गकवयः कालिदासप्रभावेन दूतकाव्यानि रचयन्ति स्म, केवलं एकस्मिन क्षेत्रे भिन्नता भवति। तत्र नायकस्थाने विरहिणी-नायिका विराजते।

**हंससन्देशकर्तुः परिचयः**

वामनभट्टवाणः वेमभूपालस्य राजसभायाम् आसीत्। वेमभूपालः कौन्डुवीडु प्रसिद्धः अन्ध्रदेशीयस्थानः आसीत्। तस्य काले मयूर-सुबन्धु-प्रभृतीनां रत्नानि आसीत्। एतत् समयसमीक्षा कृत्वा वक्तुं शक्यते यत् १३८-१४२० मध्यकाले आन्ध्रदेशे कविः आसीत्।

**अन्याः कृतयः**

- नलाभ्युदयः – अयं लेखः वहुकालपूर्वे त्रिवेन्द्रसंस्कृतसिरीजतः अष्टमसर्गसमन्वितं सम्पादनेन प्रकाशितः।
- रघुनाथचरितम् – द्वे मातृके समुपलभ्येते, किन्तु ३० सर्गान्त एतावता प्रकाशनं नासीत्।
- वाणासुरविजयः – एतत् विषये सम्पूर्णमातृका प्रकाशनं नैव जातम्। अस्मिन काव्ये कुमारसम्भवस्य प्रभावः दृश्यते।
- प्रभावतीपरिणयरूपकम् – पञ्चमाङ्कसमन्वितं रूपकम्। कविः आदौ स्वजीवनवृत्तान्तं रचितवान्।

**शब्दकोषः**

- शब्दचन्द्रिका – मातृकात्रयं समन्वितं, एषः कोषः नैव प्रकाशितः।
- शब्दरत्नाकरः – वि. आर. शर्ममहाशयैः प्रकाशितः। अत्र कवेः पितुः विषयकं उल्लेखः कृतः। यथा-

**वरदाग्निचितः पौत्रः पुत्रः कोमटियज्वनः।**
**जागर्ति वामनो बाणो वत्सवंशशिखामणिः॥**

**कथावस्तु**

हंससन्देशे इयं कथा वर्ण्यते- मलयपर्वतस्य उपत्यकाप्रदेशे स्थितः दक्षनाम्ना यक्षः हंसमाध्यमेन स्वप्रियां सविधे वार्तां प्रेषयति। सन्देशवाहकाय हंसाय दक्षिनभारत-मध्यभारतश्च नानाप्रदेशान्, नदीः मुख्यानि स्थानानि च उद्घाट्य प्रस्तुतानि। यक्षः स्वयं सुष्टुरूपेण मार्गं अतिक्रमति तथा सर्वं निरुपयति। एतानि विषयानि उत्तरसन्देशे पूर्वसन्देशभेदैः १२१ श्लोकैः निबन्धितानि।

**मलयपर्वतः**- पश्चिमपर्वतस्य दक्षिणपार्श्वे स्थितः। एषः तिरुवनन्तपुरं पार्श्वे विद्यते। कोयेम्वटुरः कोमटीपर्यन्तं विस्तृतः पर्वतप्रसरः। एषा पर्वतश्रेणी अण्णमलैः, कार्डामम् पर्वते अन्तर्गतः। अगस्त्यादौ तपोकृते निवासः स्म।

**ताम्रपर्णी-** तामवरभारि चित्तरनदीद्वयम् अत्रैव प्रवहति। तद्यथा-

**अम्भःपानादरविवलितैरम्बुदैः श्लिष्टपार्श्वां**
**पाथोराशेः प्रियसहचरीं ताम्रपर्णीमुपेयाः ।**[viii]

**मधुरा-** भौगोलिकनदी पार्श्वस्थः मधुरा दक्षिणमथुरारूपेण विख्यातः अस्ति। एवं रूपेण ज्ञायते – "कुलशेखराल्वार नगरस्य प्रतिष्ठाता विद्यते" इति। तस्य पार्श्वे मीनाक्षी–सुन्देरेश्वरयोः देवालयौ विराजते।

**सह्यदा (कावेरी)**- एतस्या अपरं नाम कावेरी आसीत्। चन्द्रतीर्थम् एतस्याः उत्पत्तिस्थलरूपेण परिचीयते। कुर्गजिलायाः व्रह्मगिरिपर्वते एतत् स्थानम् अस्ति। महीशूरस्य दक्षिणसीम्नः शिवसमुद्रे कावेरी जलप्रपातः विद्यते, यः भारतस्य दक्षिणपार्श्वे अन्यतमं दर्शनीयस्थानरूपेणाद्यापि परिचीयते।

**श्रीरङ्गम्-** एतस्य देशस्य अपरं नाम श्रीरङ्गम्। तस्मिन् स्थाने विष्णोः प्रसिद्धः देवालयः अस्ति, यः वैष्णवधामरूपेण परिचीयते।

**चोलदेशः**- पेन्नारनदीसमीपे चोलदेशः विराजते। आन्ध्रप्रदेशस्य नेल्लोरुतः पुडुकोटटाई पर्यन्तं कोरोमण्डलोपकूलम् अवस्थितम्। एतस्य अन्यत् नाम द्राविडदेशः इति। यस्य पुरा अपरं नाम काञ्चीपुरम् इति प्रसिद्धम् आसीत्। कावेरी नदीतीरस्थः उरैयूरु नाम्ना स्थलम् विद्यते, यस्य समीपे कुम्भकोणम्–ताञ्जावूरु इति विख्यातं नगरद्वयम् अस्ति।

**अरुणाचलम्**- मद्रासप्रदेशस्य दक्षिण आर्कटस्थितः तिरुवाण्णामलैः ख्यातः प्रदेशः। स्कन्दपुराणस्य उत्तरखण्डस्य चतुर्थपर्वणे अरुणाचल–महात्म्यं वर्ण्यते। अरुणाचलेश्वरः अर्धनारीश्वरश्चेति स्थानद्वयं अत्रैव विद्यते। यथा-

**दोषामन्यं दिनमुपवनच्छायया कल्पयन्तीं**
**रत्नालोकैरपि च दिवसश्रीसनाथां त्रियामाम् ।**[ix]

**काञ्ची**- मद्रासतः ४३ माइल् दूरे दक्षिण-पश्चिमभागे **पालायानदीसमीपे** नगरीयं विराजते। **कुलतुङ्गचोलद्वारा** एतस्य नगरस्य विनाशः कारितः। **काञ्चीपुरम्** नाम्ना यत् स्थानम् अस्ति, तत्रैव **तोण्डमण्डलनाम्ना** अन्यदेकं प्रसिद्धं स्थानम् अपि विद्यते। काव्ये एषः उल्लेखः अस्ति।

**नाम्ना काञ्चीं तदनु नगरीं याहि यस्यां सुराणा-**
**माद्यो देवः करिशिखरिणः शृङ्गमाङल्यवेद्याम् ।**[x]

**कम्पा**- एतस्य **नद्याः** अपरं नाम **पालारः, काञ्चीनगरस्य पार्श्वतः** प्रवहति। यथा-

**मध्ये तस्याः कविवरगिरेस्तस्य गव्यूतिमात्रे ।**
**नाम्ना कम्पा प्रवहति नदी नागलोकावतीर्णा ।।**[xi]

**कालहस्ती**- पूर्वतन्याम् उत्तर-आर्काटजिलायाम्, अद्यतनस्य आन्ध्रप्रदेशस्य चित्तुरुजिलायाम् वायुलिङ्गप्रधानः शिवस्य देवालयः विद्यते। सर्पाकाश्य भगवतः शिरसः उपरि विद्यमाना दीपशिखा सर्वदा कम्पमाना भगवतीत्येतत् वायुलिङ्गक्षेत्रस्य महत्त्वम् दर्शयति। स्वर्णमुखी इति नदी प्रवहति।

**कृष्णवेणी नदी**- कृष्णानदी पश्चिमाघट्टपर्वतस्य प्रकटीभूय, निजामपट्टणस्य किञ्चित् उत्तरे, मासुपर्वतस्य दक्षिणे प्रवहति।

**कनकमुखरी नदी**- अपरं नाम सुवर्णमुखरी, नायडुपेटकोटा इत्यनयोः प्रदेशयोः समीपे प्रवहति।

**अक्ष्णोरग्रे तदनु भविता कालहस्ती गिरिस्ते।**
**तस्योपान्ते कनकमुखरी नामं कल्लोलनीवी।।**

**तुङ्गभद्रा**- अद्यतनकर्णाटकराज्यस्य दक्षिण-पश्चिमभागे **तुङ्ग-भद्रा** इति नदीद्वयं मिलित्वा **तुङ्गभद्रा** नाम्ना प्रशस्यते। इयं **नन्दिकाटपुरस्य किञ्चित् उत्तरे कृष्णानद्यायाः आपतति।**

**आन्ध्रोद्देशानतिजिगमिषोरग्रतस्ते भवित्री**
**वेणीभूमेरिव कुवलयामोदिनी कृष्णवेणी।**
**आश्लिष्यन्ती तरललहरीवाहया यां सखीव**
**स्रोतोमध्यव्यवहितजला शोबते तुङ्गभद्रा।।**[xii]

**गोदावरी- गोदावरी** ब्रह्मगिरेः प्रवहति। तत्र **त्रयम्** नाम्ना प्रथितः ग्रामः **कुशावर्त्तजलाशयेन परिवृत्तः** अस्ति। तत्र **जलस्रोतः अपि वर्तते। त्रयम्बकग्रामः नासिकात् उत्तरे** विद्यते। इयं नदी **आन्ध्रदेशे वङ्गोपसागरे समुद्रमाविशति। श्रीरामचन्द्रलङ्कागमनकाले** इयं नदी **अतिक्रान्ता** इति श्रूयते।

**तामुत्तीर्य त्रिचतुरदिनोल्लङ्घताध्वा समेयाः ।**
**गोदां सीताकररुहमुखालूनपूजासरोजाम् ।।**[xiii]

**पञ्चवटी**- जनश्रुत्या प्रसिद्धं नाम **नासिकम्** इति, **रामायणानुसारं शूर्पणखायाः नासिका लक्ष्मणेन कृतः अत्रैवापतत्।**

**वृन्दाचलः- विन्ध्यपर्वतमालायां स्थितः** वृन्दावनवासिनी देवालयः भवति।

**सरयूः- सरयूः** अद्यतन **कुमायू** इति प्रसिद्धे स्थाने प्रवहति, ततः पूर्वस्यां दिशि। इयं **अयोध्यायाः अपि पार्श्वतः प्रवहति।**

**गण्डकी**- हिमालयस्य **धवलगिरिपर्वते प्रकटीभूय,** तिब्बतस्य दक्षिणसीमरेखायाः पार्श्वतः गत्वा त्रिवेणीघाटे समुद्रमाविशति। **विष्णोः गण्डदेशात्** इयं नदी प्रभवतीति प्रसिद्धिरस्ति। विहारस्य **मुजफरपुरे शोणनदे मिलिता भवति।**

**क्रौञ्चपर्वतः**- अयं पर्वतः **मानसरोवरे** विराजते। **कैलासस्य अंशीभूतः** च, **सिन्धू, ब्रह्मपुत्रा, शतद्रूः, वर्णालि** इति नदीचतुष्टयस्य जन्मस्थानम् अयं पर्वतः।

अत एव **रससिद्धः वामनभट्टवाणः**, सर्वतोभावेनोपस्थापनेन, मर्यादानुपालनेन, स्वकीयाभिव्यक्त्या कवित्वं स्थापयति। एवञ्च कविः स्वसाहित्ये न केवलं प्रकृतेः सौन्दर्यानां वर्णनं कृरोति, अपि च स्वस्य लेखनीप्रतिभायाः प्रमाणी कृतवान्।

**संङ्केतसूची**

i काव्यादर्श 1.10
ii केरलीयसंस्कृतकाव्यसनीक्षा
iii केरलीयसंस्कृतकाव्यसनीक्षा
iv केरलीयसंस्कृतकाव्यसनीक्षा
v केरलीयसंस्कृतकाव्यसनीक्षा
viAtmananda Grantharatnamala Series no 25, publ. Bhavnagar by Vallabhadas Tribhuvandas Gandhi Bhavnagar 1924.
Vii संस्कृत वाङ्मय का वृहद् इतिहास, 346
Viii A Ms of this book is in collection of आचार्य चिन्ताहरन चक्रवर्ति
ix मेघदूत ओ परिक्रमा , pg – 36
x वामणभट्टबाणकृत हंससन्देशः , पू.12
xi वामणभट्टबाणकृत हंससन्देशः , पू.25
xii वामणभट्टबाणकृत हंससन्देशः , पू.29
xiii वामणभट्टबाणकृत हंससन्देशः , पू.31

**सन्दर्भग्रन्थावली**

1. वन्द्योपाध्याय डा. उदयचन्द्र, साहित्यदर्पणः (विश्वनाथ), संस्कृत वुक डिपो ,कलकाता , 1998
2. उण्णी. एन पी, केरलीयसंस्कृतसन्देशकाव्यसमीक्षा, राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली, 1995
3. उपाध्याय श्री वलदेव, (सम्पादक) त्रिपाठी राधावल्लभ, संस्कृत वाङ्मय का बृहद इतिहास (चतुर्थ खन्ड) उत्तरप्रदेश संस्कृत संस्थान, लखनऊ
4. गोस्वामी आलपना, संस्कृत साहित्येर इतिहास, गोस्वामी प्रकाशनी, कलिकाता
5. द्विवेदी रेवाप्रसाद, कालिदास ग्रन्थावली, काशी हिन्दु विश्वविद्यालय, वाराणसी, 1997
6. वानार्जी डा पतितपावन, उत्कलेषु संस्कृतगीतिकाव्यविकाशधारा, नाग प्रकाशक, दिल्ली
7. शर्मा, डा विजेन्द्र कुमार, मेघदूतम्, साहित्य भन्डार, मेरठ
8. वन्द्योपाध्याय डा. उदयचन्द्र, मेघदूत ओ परिक्रमा, संस्कृत वुक डिपो, कलकाता
9. Krisnamachariar. A, A History of Sanskrit Litreture, Motilal Banarsidass, Delhi, 1987
लघुप्रवन्धः
10. वामनभट्टबाणविरचितस्य हंससन्देशाख्यस्य खण्डकाव्यस्य पाठसमीक्षात्मकं अध्ययनञ्च, शोधछात्रा-अदिति वसु, राष्ट्रियसंस्कृतविद्यापीठम् , 2009.

# अद्वैतदर्शन के विकास में बौद्ध सिद्धान्तों का प्रभाव

डॉ. राजेश्वर द्विवेदी
सहाचार्य, वेदान्तविभाग,
श्रीसीतारामवैदिक-आदर्शसंस्कृतमहाविद्यालय,
कोलकाता

यद्यपि सभी दर्शनों का मूल वेदादिशास्त्र हैं तथापि उन दर्शनों के विचारपद्धति तथा उनके सिद्धान्त उपस्थापन की शैली के विकास में अन्य शास्त्रों का भी प्रभाव होता हैं। सभी दर्शनों के लिए अन्य दर्शन पूर्वपक्ष के रूप में उपस्थित होते हैं। अद्वैत वेदान्त दर्शन में प्राय: आचार्यों ने सभी दर्शनों के सिद्धान्तों पर विचार करते हुए उनका खण्डन मण्डन किया है। जिनमें बौद्ध, न्याय, वैशेषिक, सांख्य, योग, पाशुपत, पाञ्चरात्रागम इत्यादि अनेकों दर्शनों पर विचार किया है। प्रस्तुत शोध लेख में अद्वैत वेदान्त पर बौद्धदर्शन के सिद्धान्तों के प्रभावों के सम्बन्ध में विचार किया गया है। वस्तुत: अद्वैत वेदान्त के उत्कर्ष में अगर कोई करणत्वेन सम्बन्धित हैं तो वह बौद्ध दर्शन ही हैं। जिस प्रकार से मूर्ति आदि में कलाकार अपने औजारों के प्रयोग से सौन्दर्य उत्पन्न करता हैं। उसी प्रकार बौद्धदर्शन के पूर्वपक्ष के रूप में प्रयोग होने से अद्वैत वेदान्त का दार्शनिक सौन्दर्य अपनी पराकाष्ठा पर पहुच गया। गौडपादाचार्य से लेकर शङ्कराचार्य से होते हुए वर्तमान के अद्वैतवेदान्तियों ने अद्वैतसिद्धान्त को सुदृढ़ करने के लिए विशेषरूप से बौद्धदर्शन का सहारा लिया है। बौद्ध दर्शन के चार सम्प्रदायों वैभाषिक, सौत्रान्तिक, योगाचार तथा माध्यमिक हैं। ब्रह्मसूत्र के भाष्य में शङ्कराचार्य ने सभी सम्प्रदायों का युक्ति द्वारा खण्डन किया है। अपने भाष्य में शङ्कराचार्य ने किसी भी बौद्ध आचार्य का नाम अथवा सम्प्रदाय का नामोल्लेख नहीं किया है किन्तु उनके द्वारा खण्डनीय विषयों के द्वारा स्पष्ट ज्ञान होता है कि किस सम्प्रदाय का खण्डन हो रहा है। द्वितीय अध्याय में समुदायाधिकरण तथा अभावाधिकरण में इन सम्प्रदायों के मतों का खण्डन किया है। शङ्कराचार्य ने बौद्धदर्शन के बाह्यार्थवादी, विज्ञानवादी तथा शून्यवादी नाम से ब्रह्मसूत्र में स्पष्टतया उल्लेख किया है। यथा-'स च बहुप्रकार: प्रतिपत्तिभेदात् विनेयभेदाद्वा। तत्रैते त्रयो वादिनो भवन्ति- 'केचित् सर्वास्तित्ववादिन:, केचिद्विज्ञानास्तित्वमात्रवादिन:, अन्ये पुन: सर्वशून्यतावादिन इति।'[1] 'विज्ञानवादी बौद्ध इदानीं प्रत्यवतिष्ठ'[2]। 'अपि च बाह्यार्थविज्ञानशून्यवादत्रयमितरेतर-विरुद्धमुपदिशता सुगतेन स्पष्टीकृतमात्मनोऽसम्बद्धप्रलापित्वं...........इति'[3]।

इस प्रकार अद्वैतवेदान्त को पृथक् सम्प्रदाय का रूप देने में शङ्कराचार्य के परमगुरु माण्डूक्यकारिकाकार गौडपादाचार्य का नाम सर्वप्रथम लिया जाता है। उनके अद्वैत सिद्धान्त प्रतिपादन की शैली एवं सामग्री पर बौद्ध आचार्यों का स्पष्ट प्रभाव देखने को मिलता है। अद्वैतवेदान्त की आधारशिला मानी जाने वाली गौडपाद रचित माण्डूक्यकारिकाओं में जगत् की उत्पत्ति के सम्बन्ध में जो अजातिवाद का उपस्थापन करते हुए आचार्य ने लिखा है-

**स्वतो वा परतो वाऽपि न किञ्चिद्वस्तु जायते।**
**सदसत्सदसद्वाऽपि न किञ्चिद्वस्तु जायते।।**[4]

उनके अनुसार स्वयं से अथवा दूसरे से या दोनों से सत्, असत् और सदसद् उभय रूप वाली कोई भी वस्तु उत्पन्न नहीं होती है। इस प्रकार जगत् की उत्पत्ति का निषेध करते हुए इसे स्वप्न सदृश सिद्ध किया है। वस्तुतः बौद्ध दर्शन के प्रतीत्यसमुत्पादवाद से अजातिवाद की उत्पत्ति मानी जाती है। प्रतीति असमुत्पादः प्रतीत्यसमुत्पादः अर्थात् जगत् के उत्पत्ति की प्रतीति होती है, परन्तु वास्तव में किसी प्रकार की कोई उत्पत्ति नहीं होती है। इसी अजातिवाद को प्रसिद्ध बौद्ध आचार्य नागार्जुन ने मूलमाध्यमिककारिका

1 ब्र.सू.2/2/18
2 ब्र.सू.2/2/28
3 ब्र.सू.2/2/32
4 माण्डूक्यकारिका 4/22

में लिखा हैं –

**न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।**
**उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ।।**[1]
**नैवाग्रं नावरं यस्य तस्य मध्यं कुतो भवेत् ।**
**तस्मान्नात्रोपपद्यन्ते पूर्वापर सहक्रमाः ।।**[2]

इस प्रकार वस्तु की उत्पत्ति को असम्भव बतलाते हुए कहा है कि जो आदि में नहीं है और न अन्त में है, वह मध्य में किस प्रकार हो सकता है। इस प्रकार आचार्य गौडपाद बौद्ध सिद्धान्तों के खण्डन के साथ साथ उनके प्रभाव से अछूते नहीं रहे। अथवा यह भी हो सकता है कि बौद्धदर्शन एवं अद्वैत वेदान्त दर्शन के समन्वय की दृष्टि से उन्होंने इस अजातिवाद का उपस्थापन किया हो। शङ्कराचार्य अपने अध्यास भाष्य में 'स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यासः' अध्यास का लक्षण लिखने के बाद बौद्धादि दर्शनों के साथ अध्यास के इस लक्षण के समन्वय की दृष्टि से 'तं केचित् अन्यत्रान्यधर्माध्यास इति वदन्ति' इत्यादि वाक्यों से आत्मख्यातिवाद का उपस्थापन करते हुए अन्त में 'सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति । तथा च लोकेऽनुभवः - शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति' इस वाक्य का उपस्थापन करते हैं। इससे सिद्ध होता है कि आचार्य गौडपाद के समान शङ्कराचार्य का भी अविवादित अंशों में समन्वय की दृष्टि रही है। अध्यास की अनिर्वचनीयता वस्तुतः सर्वतन्त्रसिद्धान्त है। सभी दर्शनों से अविरुद्ध सिद्धान्त को सर्वतन्त्र सिद्धान्त कहते हैं।

इसी अनिर्वचनीयवाद के कारण शङ्कराचार्य को तथा अजातिवाद के कारण आचार्य गौडपाद को प्रच्छन्न बौद्ध कहकर आलोचना की गई है। किन्तु शङ्कराचार्य के अनिर्वचनीयत्व का अर्थ 'सत्त्वेन असत्त्वेन उभयत्त्वेन निर्वक्तुमशक्यम्' है। यह अनिर्वचनीयता भाव रूपा है किन्तु बौद्ध सम्मत अनिर्वचनीयता अलीक, असत् अथवा अभाव रूप है। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत'[3] इत्यादि श्रुति के भाष्य में शङ्कराचार्य ने स्पष्ट किया है 'सदभावमात्रं हि प्रागुत्पत्तेस्तत्त्वं कल्पयन्ति बौद्धाः। न तु सत्प्रतिद्वन्द्वि वस्त्वन्तरमिच्छन्ति।' इस वाक्य के द्वारा बौद्ध सम्मत अभाव रूपत्व को बतलाया है। अद्वैतवेदान्त एवं बौद्धदर्शन में विषमताओं के बीच अनेक समानताएँ भी देखी जाती है। जिस प्रकार अद्वैतवेदान्त में पारमार्थिक, व्यावहारिक एव प्रातिभासिक तीन प्रकार की सत्ताए प्रसिद्ध हैं उसी प्रकार माध्यमिक बौद्ध परमार्थ, तथ्य संवृति एव मिथ्या संवृति रूप एवं विज्ञानवादी बौद्ध परिनिष्पन्न, परतन्त्र और परिकल्पित तीन सत्ताओं को मानते हैं। दोनों के मत में ज्ञान वस्तुओं के स्वभाव को विकृत नहीं करता। पर अज्ञान उनके स्वभाव को विकृत करता है।

शङ्कराचार्य ने न केवल ब्रह्मसूत्रभाष्य में बौद्धदर्शन को पूर्वपक्ष में रखा अपितु उपनिषद्भाष्यों में भी प्रमुख स्थान दिया है। बौद्धसम्प्रदाय के चार सम्प्रदायों में वैभाषिक तथा सौत्रान्तिक सर्वास्तिवादी कहे गया है। इनके अनुसार प्रत्येक वस्तु की स्वतन्त्र सत्ता है। इनमें वैभाषिक बाह्यप्रत्यक्षवादी है तथा सौत्रान्तिक बाह्यानुमेयवादी है। चैतन्य या विज्ञान के अस्तित्व को मानने वाले विज्ञानवादी हैं। माध्यमिक शून्यवादी हैं। ब्रह्मसूत्र में आचार्य बादरायण ने द्वितीयाध्याय के द्वितीय पाद में 'समुदाय उभयहेतुकेऽपि तदप्राप्तिः'[4] सूत्र के द्वारा सर्वास्तिवाद का खण्डन किया है। बाह्यजगत् के कारण पृथ्वी, जल, तेज तथा वायु के परमाणुओं का संघात है। तथा आन्तर जगत् रूप, वेदना, संज्ञा, संस्कार व विज्ञान इन पाँच स्कन्धों से निर्मित हैं। किन्तु इन अचेतन परमाणुओं का संघात एवं पञ्चस्कन्धों का समुदाय सम्भवन नहीं हैं क्योंकि इनके समुदाय को बनाने वाला कोई चेतन प्रसिद्ध नहीं है। और यदि स्वभावतः समुदाय कहें तो इन समुदायों की नित्य प्राप्ति होने से निर्वाण असम्भव हो जाएगा । विज्ञानवाद का खण्डन 'नाभाव उपलब्धेः' सूत्र के द्वारा किया है। विज्ञान के अतिरिक्त बाह्य वस्तु का जो अभाव कहा है वह

1 मूलमाध्यमिककारिका 1/3
2 मूलमाध्यमिककारिका 11/26/15
3 छान्दोग्यापनिषद् 6/2/1
4 ब्र.सू.2/2/28

बाह्यपदार्थो की उपलब्धि के कारण सम्भव नहीं है। शङ्कराचार्य ने धर्मकीर्ति के प्रमाणवार्तिक का उद्धरण दिया है।

**अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।**

**ग्राह्यग्राहक संवित्तिभेदवानिव लक्ष्यते॥**[1]

जिसके अनुसार एक विज्ञान ही भ्रमवशात् भेदबुद्धि से द्वैतरूप से दिखाई देता है। किन्तु इसके खण्डन में शङ्कराचार्य कहते हैं कि विज्ञान और बाह्य वस्तुओं में तादात्म्य सम्बन्ध न होकर कार्य-कारण सम्बन्ध होता है। बाह्य वस्तुओं का अभाव नहीं होता है, अपितु वे भाव रूप होते हैं इसीलिए उनकी प्रतीति या विज्ञान होता है। इसी प्रकार शून्यवाद का खण्डन 'क्षणिकत्वाच्च'[2] सूत्र के द्वारा करते हैं। आलयविज्ञान को शून्य मानने पर देश, काल और निमित्त की अपेक्षा से वासना के अधीन स्मृति और प्रत्यभिज्ञा आदि व्यवहार नहीं हो सकता।

खण्डनखण्डखाद्यकार श्रीहर्ष ने शून्य वाद तथा विज्ञानवाद का खण्डन किया है। 'तदनभ्युपगच्छतोऽपि चार्वाकमाध्यमिकादेर्वाग्विस्तराणां प्रतीयमानत्वात्' तथा 'तथागतेन वा मध्यमागमा नोपदिष्टा:' इत्यादि वाक्यों में माध्यमिक तथा मध्यमागम शब्द से बौद्ध सिद्धान्त के प्रमाणसत्ता के कथाङ्गत्व न मानने पर परिहास करते हुए उद्धरण दिया गया है। इसी प्रकार तत्त्वप्रदीपिका ग्रन्थ में चित्सुखाचार्य ने असत्ख्याति तथा आत्मख्याति वाद का खण्डन किया है।

इस प्रकार अद्वैतवेदान्त के दार्शनिक यात्रा में बौद्धदर्शन के अवदान को किसी भी प्रकार से नकारा नहीं जा सकता। न केवल दर्शनतत्त्व के विषय में बौद्धदर्शन की गम्भीरता का अनुकरण अद्वैतशास्त्र ने किया अपितु आचार्य शङ्कर ने बुद्ध के महायानपन्थ के समान लोकल्याणार्थ अद्वैतवाद का विस्तार भी पूरे देश में किया।

## सहायकग्रन्थसूची

शङ्कराचार्य, ब्रह्मसूत्रशाङ्करभाष्यम् संपा. आचार्य जगदीश, दिल्ली मोतीलालबनारसीदास, ई 1980

शङ्कराचार्य, माण्डुक्योपनिषद्शाङ्करभाष्य, संपा.प्रज्ञानानन्द सरस्वती, वाराणसी, विद्याविलासप्रेस, 1910

शङ्कराचार्य, छान्दोग्योपनिषद्शाङ्करभाष्य, गोरखपुर, गीताप्रेस, वि.सं. 2065

धर्मकीर्ति, प्रमाणवार्तिकम्, संपा. स्वामी द्वारिकादासशास्त्री, वाराणसी, बौद्ध भारती, 1994

नागार्जुन, मध्यमकशास्त्रम्, संपा. स्वामी द्वारिकादासशास्त्री, वाराणसी, बौद्ध भारती, 1989

1 प्रमाणवार्त्तिक 3/354

2 ब्र.सू. 2/2/32

# संस्कृत साहित्य में सामुद्रीक वाणिज्य

डॉ. परिमल मण्डल, सहायक अध्यापक
संस्कृत विभाग, स्वर्णमयी जोगेन्द्रनाथ महाविद्यालय
फोन: +91-9647704736
ईमेल: parimalbhu@gmail.com

**शोधसार-** संस्कृत साहित्य भारतीय जीवन और चिन्तन का प्राचीन आधार है, जिसे व्यासदेव, वाल्मिकी, कालिदास, भास, भर्तृहरि, श्रीहर्ष, दण्डी, सोमदेव और जयदेव जैसे रचनाकारों ने अपनी प्रतिभा से समृद्ध किया। इसमें उस समय के व्यापार और समुद्रयात्रा से जुड़े अनेक प्रसङ्ग मिलते हैं। जैसे कालिदास के *अभिज्ञानशाकुन्तलम्* और *रघुवंशम्*, श्रीहर्ष की *रत्नावली*, दण्डी के *दशकुमारचरितम्*, माघ के *शिशुपालवधम्*, सोमदेव के *कथासरित्सागरम्*, कल्हण की *राजतरङ्गिणी, सन्ध्याकरनन्दी के रामचरितम् आदि ग्रन्थों* में समुद्रयात्रा, व्यापारी जीवन, नौकायान, चीन से रेशमी वस्त्रों का आयात, सिंहल और बङ्गाल के बन्दरगाह तथा विदेशों से सम्पर्क का सजीव चित्रण मिलता है। इन ग्रन्थों से स्पष्ट होता है कि प्राचीन भारत का वाणिज्य संगठित था और दूरवर्ती देशों तक फैला हुआ था। प्रस्तुत प्रबन्ध में संस्कृत साहित्य में प्राचीन व्यवसाय एवं समुद्री वाणिज्य के संक्षिप्त चर्चा यहा किया गया है।

**मुख्यशब्द:** संस्कृत साहित्य, वाणिज्य, व्यवसाय, समुद्रयात्रा, रेशमीवस्त्र, रत्न, व्यापारिक चरित्र, प्राचीन भारत, अन्तरराष्ट्रीय व्यापार ।

**भूमिका-** संस्कृत साहित्य में व्यवसाय की अवधारणा प्राचीन काल से निरन्तर विकसित होती रही है। ऋग्वेद में समुद्री व्यापार के प्रारम्भिक और स्पष्ट साक्ष्य प्राप्त होते हैं[1]। इसमें यह उल्लेखित है कि वरुण समुद्रमार्गों का ज्ञान रखते थे[2] समुद्री यात्राओं की सुरक्षा के लिए पूजे जाते थे। ऋग्वेद में व्यापारी अपने लाभ के उद्देश्य से विदेशों की ओर जहाज ले जाते थे[3]। वे कर्मशील और परिश्रमी थे, जो समुद्र के विभिन्न भागों में व्यापार करते थे[4]। वशिष्ठ और वरुण की समुद्रयात्रा का वर्णन भी मिलता है, जिसमें एक उत्कृष्ट कारीगरी से निर्मित जहाज का उल्लेख है[5]। इसके अतिरिक्त, तुग्र के पुत्र भुज्यु की एक प्रसिद्ध समुद्री यात्रा का वर्णन भी ऋग्वेद में प्राप्त होता है, जिसमें भीषण तूफान से जहाज टूटने की दुर्घटना होती है किन्तु अश्विन देवताओं ने उसकी वीरतापूर्वक रक्षा की थी[6]।रामायण में भारतीय भूगोल तथा समुद्री व्यापार मार्गों का अत्यन्त महत्वपूर्ण और विस्तृत वर्णन मिलता है। *किष्किन्ध्याकाण्ड* के प्रसङ्ग में, जब सुग्रीव सीता की खोज के लिए वानर-समूहों को विभिन्न दिशाओं में प्रेषित करते हैं, तब वे केवल समुद्र पार जाने का ही निर्देश नहीं देते, बल्कि अनेक द्वीपों, समुद्री क्षेत्रों और दूरवर्ती भूभागों का भी उल्लेख करते हैं। इसमें **यवद्वीप** अर्थात् आधुनिक जावा, **सुवर्णद्वीप अर्थात्** आधुनिक सुमात्रा–मलेशिया और **रक्तसागर** जैसे क्षेत्रों का उल्लेख मिलता है[7]। इसी प्रकार, रामायण के

[1] वेद नावः समुद्रियः। ऋग्वेदः 1.25.7
तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः।। ऋग्वेदः 1-56-2
रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहम् ॥ ऋग्वेदः 1-47-6
[2] वेदा यो वीणां पदमन्तरिक्षेण पट्टां। वेद नावः समुद्रियः ॥ ऋग्वेदः 1.25.7
[3] उवासोषा उच्छाच्च नु देवी जीरा रथानाम्। ।
ये अस्या *आचरणेषु* दध्रिरे *समुद्रे* न श्रवस्यवः । ऋग्वेदः1.48.03
[4] तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा।। ॥ ऋग्वेदः 1.56.02
[5] आ यद्रुहाव वरुणश्च नावं प्र यत् समुद्रमीरयाव मध्यं। अधियदपां स्नुभिश्चराव प्र प्रेंख ईंखयावहै शुभे कं।। वशिष्ठंह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः। स्तोतारं विप्रः सुदिन त्वे अह्नां षान्नु द्यावस्ततनन्यादुषासः।। ऋग्वेदः 7.88.3-4
[6] तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः। तमूहथु नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः।। ऋग्वेदः 1.116.03
[7] समुद्रमवगाढॉश्च पर्वतान् पत्तनानि च। किष्किन्ध्याकाण्ड 40.25
भूमिश्च कोषकारणां भूमिश्च रजताकराम्। किष्किन्ध्याकाण्ड 40.23

अयोध्याकाण्ड में भी राम की सेना की नौकायन क्षमता और समुद्री शक्ति का सुस्पष्ट वर्णन मिलता है। यहाँ यह उल्लेख है कि राम ने सेना की तैयारी के समय पाँच सौ बड़ी नौकाओं और कई नाविकों को सशस्त्र किया था, जो समुद्री यात्रा के लिए तत्पर रखे गए थे[1] । महाभारत में भी समुद्री यात्रा और व्यापार का व्यापक उल्लेख मिलता है। जैसे सभा पर्व में सहदेव द्वारा विभिन्न द्वीपों पर जाकर म्लेच्छनरेशों पर विजय प्राप्त करने का वर्णन है[2]। शान्ति पर्व में मोक्ष की प्राप्ति की तुलना समुद्री व्यापार से होने वाले लाभ से की गई है[3]। महाभारत में पाण्डवों के जीवन का अत्यन्त रोचक प्रसङ्ग वह है, जिसमें दयालु विदुर के आदेश से गुप्त रूप से तैयार की गई एक विशेष नौका के द्वारा उन्हें रचित विनाश-योजना से बच निकलते हुए दिखाया गया है। यह नौका आकार में बड़ी थी, युद्धोपयोगी समस्त अस्त्र-शस्त्रों से सुसज्जित थी और ऐसी भाँति निर्मित थी कि प्रचण्ड तूफानों और प्रबल लहरों का सामना करने में भी समर्थ थी। स्मृतिशास्त्रों में भी समुद्री व्यापार का स्पष्ट उल्लेख मिलता है। मनुस्मृति में समुद्री मार्ग जैसे जोखिमपूर्ण व्यवसायों के लिए ब्याज-दर निर्धारित करने का कार्य उन विशेषज्ञों पर छोड़ा गया है जो समुद्रयान-कुशल हों और देश-काल-परिस्थिति का यथार्थ आकलन कर सकें; धर्मशास्त्रीय परम्परा में कहीं-कहीं समुद्रयात्रा करने वाले ब्राह्मण को श्राद्ध आदि में आमन्त्रित न करने का मत भी व्यक्त हुआ है [4]। साथ ही, नदी और समुद्री यात्रा के लिए नाव-किराये तथा उधारी पर ब्याज के पृथक नियमों का उल्लेख मिलता है, जहाँ विशेष रूप से ऐसे प्रावधान बताए गए हैं कि नाविकों को उनकी लापरवाही से हुई माल-हानि के लिए उत्तरदायी माना जाता है, जबकि दैवीय दुर्घटना की स्थिति में उन्हें दोषमुक्त समझा जाता है। याज्ञवल्क्य-स्मृति में यह भी संकेत है कि हिन्दू व्यापारी लाभ की दृष्टि से साहसिक समुद्रयात्राएँ करते थे और इस प्रक्रिया में विविध भाषाओं, बोलियों तथा विदेशी वस्तुओं से परिचित होते हुए अन्तरराष्ट्रीय व्यापार-जगत के साथ सक्रिय रूप से जुड़े रहते थे[5]। पुराणों में भी समुद्री व्यापारियों का स्पष्ट उल्लेख प्राप्त होता है। वराहपुराण के एक प्रसिद्ध प्रसङ्ग में गोकर्ण नामक एक निःसन्तान वैश्य व्यापारी का रोचक वर्णन है, जो समुद्र-पार व्यापार के उद्देश्य से जहाज पर सवार होकर दीर्घ यात्रा पर निकला था। यात्रा के मध्य में भयङ्कर तूफान आ गया, जिससे जहाज अथाह सागर के मध्य सङ्कट में पड़ गया और सभी यात्री जीवन-मरण के बीच भीषण भय से आकुल हो उठे; उन्होंने अनुमान लगाया कि जहाज पर कोई पापी व्यक्ति होने से ही यह विपत्ति घटी है। तब गोकर्ण ने अपनी दयनीय दशा और पारिवारिक कष्टों का विस्तृत वर्णन अन्य यात्रियों के समक्ष किया। इसके तुरन्त पश्चात आकाशमार्ग से एक दिव्य तोता प्रकट हुआ, जो उसके पिता तक शीघ्रता से सन्देश ले गया। गोकर्ण के पिता ने तोते के माध्यम से अपने पुत्र को भगवान वराह की विधिवत् आराधना एवं पवित्र स्तोत्रपाठ का सविस्तार उपदेश प्रदान किया, जिससे तूफान का प्रकोप शान्त हो गया और जहाज सुरक्षित तट पर पहुँच गया। इसके अतिरिक्त संस्कृत के नाटक, महाकाव्य, गद्यकाव्य तथा अन्य ग्रन्थों में भी समुद्रयात्रा और समुद्री व्यापार के उल्लेख बिखरे हुए रूप में मिलते हैं, जिनमें से कुछ प्रमुख कृतियों का संक्षिप्त परिचय नीचे प्रस्तुत किया जा रहा है।

महाकवि कालिदास संस्कृत साहित्य के सबसे प्रमुख और प्रतिष्ठित कवियों में गिने जाते हैं। उन्हें 'भारत का शेक्सपियर' कहा जाता है। पण्डित सत्यचरण शास्त्री के अनुसार, "कालिदास के समय भारतवासियों ने स्थलपथ और जलपथ दोनों से व्यापार में विशेष समृद्धि प्राप्त की थी, जो विदेशी व्यापारियों के जीवन और उत्तराधिकार तक प्रभाव डालती थी[6]।" कालिदास के अभिज्ञानशाकुन्तलम्, रघुवंशम् और कुमारसम्भवम् जैसे प्रमुख ग्रन्थों में समुद्र और समुद्री यात्रा के महत्वपूर्ण सन्दर्भ प्राप्त होते हैं। उदाहरणार्थ, अभिज्ञानशाकुन्तलम् के सप्तम अङ्क में, जब मारीच ऋषि दुष्यन्त को आशीर्वाद देते हैं, तब वे उसकी भावी विजय

---

यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम्। सुवर्णरूप्यकद्वीपं सुवर्णकरमण्डितम्। रामायणम् 4.40.30॥ ततो रक्तजलं भीमं लोहितं नाम सागरम्। रामायणम् 4.40.38

[1] नावां शतानां पञ्चानां कैवर्त्तानां शतं शतं। सन्नद्धानां तथा यूनान्तिष्ठन्त्वित्यभ्यचोदयत्॥ अयोध्याकाण्डम् 84.78

